पातित्यादिदोषयुक्तस्तु त्याज्य एव	१७९०	३
तीर्थे श्येनगृध्रादिपक्षिणां प्रतिषेधो न कार्यः	१७९०	८
सन्यासिनां तीर्थविधिः	१७९१	३
तीर्थे प्रतिग्रहनिर्णयः	१७९१	१२

इति श्राद्धविधिः ।

अथाशौचप्रकरणम् ।

प्रतिज्ञावचनम्	१७९३	१
स्त्रावलक्षणम्	१७९३	४
पातलक्षणम्	१७९३	४
प्रसूतिलक्षणम्	१७९३	५
गर्भस्रावे मातुस्त्रिरात्रं सूतकम्	१७९३	१०
गर्भस्रावे सपिण्डानां सूतकाभावः	१७९३	१०
गर्भपाते मातुर्यथामासं सूतकम्	१७९३	११
सपिण्डानां तु दिनत्रयं सूतकम्	१७९३	११
गर्भस्रावे पुरुषस्य स्नानमात्रम्	१७९५	३
अजातदन्ते तनये तथा गर्भपाते सपिण्डानामेकरात्रमशौचम्	१७९५	७
सप्तममासादिजनने पूर्णाशौचम्	१७९६	१
जाताशौचे विप्रादीनां दिनसंख्या	१७९६	४
पुत्रे जाते मातापित्रोः स्नाननिर्णयः	१७९६	७
कन्योत्पत्तौ स्नाननिर्णयः	१७९६	९
सर्ववर्णानां सूतिकाशुद्धिनिर्णयः	१७९७	५
असच्छूद्रायास्त्रयोदशेऽह्नि शुद्धिः	१७९७	९
सूतके संसर्गनिर्णयः	१७९७	१५
सूतिकायाः संस्पर्शे स्नानम्	१७९७	१६
मैथुने पुंसोऽशौचम्	१७९७	१८
असपिण्डस्यापि शयनासनादिना पूर्णाशौचम्	१७९८	५
पितृवत्सापत्नमातुः प्राक्स्नानादस्पृश्यत्वम्	१७९८	११
सूतिकायाः कर्माधिकारनिर्णयः	१७९८	१७
प्रथमषष्ठदशमदिनेषु जातकर्माधिकारः	१८००	४
पुंजन्मनि दशाहः स्त्रीजन्मनि त्र्यहः सूतकमिति मतान्तरम्	१८००	१०
मृताशौचम्	१८०२	६
जातमृते मृतजाते वा निर्णयः	१८०२	६
नालच्छेदनात्प्राक् शिशुमरणे निर्णयः	१८०२	९
नालच्छेदनोर्ध्वं दशाहमध्ये शिशुमरणे निर्णयः	१८०२	१०
नामकरणात्प्राक् शिशुमरणे निर्णयः	१८०३	७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
ब्राह्मणादीनां नामकरणकालाः	१८०३	१४
नामोत्तरं दन्तोत्पत्तेः प्राक् शिशुमरणे	१८०६	५
दन्तजननात्प्राग् दाहस्य विकल्पः	१८०७	४
दन्तोत्पत्त्यनन्तरं त्रिवर्षात्प्राङ्मरणे	१८०७	११
त्रिवर्षोर्ध्वं कृतचूडे मृते निर्णयः	१८०८	२
प्रथमवर्षादौ कृतचूडे मृते त्र्यहः	१८०९	१०
शूद्रशिशुमरणे निर्णयः	१८१०	९
त्रिवर्षात्पूर्वं शूद्रशिशुमरणे निर्णयः	१८१०	१२
त्रिवर्षोर्ध्वं शूद्रशिशौ मृते	१८१०	१३
षड्वर्षानन्तरं शूद्रशिशुमरणे	१८१०	१४
अनूढभार्ये शूद्रे मृते	१८१०	१६
षडब्दात्प्रागपि कृतोद्वाहे मासः	१८१०	१८
कन्यामरणाशौचनिर्णयः	१८१०	२२
गर्भस्थे मृते निर्णयः	१८११	३
कन्यासु चौलात्प्राङ्मृतौ स्नानम्	१८११	७
चौलोत्तरं वाग्दानात्पूर्वं मृतौ निर्णयः	१८१२	१
अविवाहितशूद्रस्याषोडशं त्रिरात्रं, ततः पूर्णम्	१८१३	१
पितृगृहेऽनूढकन्यारजस्वलामरणे	१८१३	११
अनुपनीतमृतानां दाहादिनिर्णयः	१८१४	३
त्र्यहाशौचे पिण्डदानविधिः	१८१७	८
शिशुलक्षणम्	१८१७	१३
बाललक्षणम्	१८१७	१३
कुमारलक्षणम्	१८१७	१४
पौगण्डलक्षणम्	१८१७	१५
एतेषां मृतानां क्रियाविधिः	१८१७	१७
स्त्रीणामुद्वाहात्प्राङ्मृतानां पिण्डदाननिर्णयः	१८१९	१७
जात्याशौचम्	१८२०	१४
तत्र विप्रादीनां दशाहादिनिर्णयः	१८२०	१६
पित्रादयो महागुरवः	१८२१	१५
महागुरुलक्षणम्	१८२१	१९
स्त्रीणां पतिरेव गुरुः	१८२२	१
अभ्यागतः सर्वेषां गुरुः	१८२२	३
सपिण्डानां लक्षणम्	१८२२	७
समानोदकलक्षणम्	१८२२	८
सगोत्रलक्षणम्	१८२२	९
सपिण्डगोत्रजसकुल्यानां सूतकम्	१८२२	११
स्त्रीशूद्रयोर्विवाहोर्ध्वं जात्याशौचम्	१८२३	१
आशौचसङ्कोचे निर्णयः	१८२४	१४
सर्ववर्णानां दशाहादेव शुद्धिः	१८२४	१९
चतुर्थसपिण्डादीनां शुद्धिकालः	१८२५	६
अस्थिसञ्चयनात्प्रागाशौचानिर्णयः	१८२६	२४
विप्रस्य स्नानाद्यकरणेन सर्वदा सूतकम्	१८२७	१
पूर्णाशौचे स्पर्शनिर्णयः	१८२८	७
वर्णसङ्करजानामाशौचनिर्णयः	१८२९	८
मूर्धावसिक्तानामाशौचनिर्णयः	१८२९	८
यस्य विप्रस्य क्षत्रविट्शूद्रजातीया बान्धवाः तेषामाशौचे विप्रस्य दशाहाच्छुद्धिः	१८२९	१९
प्रतिलोमजानामाशौचनिर्णयः	१८३०	१
दत्तक्रीतादि पुत्राणामाशौचनिर्णयः	१८३०	६
व्यभिचारिणीषु सपिण्डत्वादिनिर्णयः	१८३०	६
अनौरसेषु पुत्रेषु	१८३०	९
पुनर्भूषु स्त्रीषु	१८३०	१०
अन्याश्रितस्त्रीणामाशौचनिर्णयः	१८३२	१
परपत्नीसुतानामाशौचानिर्णयः	१८३२	१
दत्तके मृते पूर्वापरपित्रोराशौचनिर्णयः	१८३२	४
दत्तकस्य पुत्रपौत्राणां जनने मरणे सपिण्डानामाशौचनिर्णयः	१८३३	८
पूर्वापरभर्त्रोरुत्पन्नयोः पुत्रयोः	१८३४	१
ऊढकन्यायाः पितृगृहे प्रसवे मरणे च	१८३४	६
मातापित्रोराशौचम्	१८३४	१०
भ्रातुराशौचनिर्णयः	१८३४	१५
परस्परं भ्रातृभगिन्योराशौचम्	१८३४	१८
भ्रातृभिन्नानामाशौचम्	१८३४	१९
पतिगृहे प्रसवे निर्णयः	१८३५	३
कन्यामृतौ पित्रोराशौचानिर्णयः	१८३५	४
अजातदन्तासु कन्यासु पित्रोरेकरात्रमाशौचम्	१८३५	१०
जातदन्तासु त्रिरात्रम्	१८३५	१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
ग्रामान्तरे कन्यामृतौ पित्रोः	१८३६	२
श्वश्रूश्वशुरयोर्मरणे निर्णयः	१८३६	५
भगिनीमरणे आशौचम्	१८३६	५
मातुलमातुलान्योर्मरणे आशौचम्	१८३६	५
पित्रोः स्वसरि मृतायामाशौचनिर्णयः	१८३६	६
सोदरमरणे आशौचम्	१८३६	८
पित्रोर्मरणे स्त्रीणामाशौचनिर्णयः	१८३६	१०
भ्रातृभगिन्योरन्योन्यगृहे मरणे आशौचनिर्णयः	१८३६	१४
पुत्र्याः पितृव्याशौचम्	१८३६	१८
मातामहादीनां मरणे निर्णयः	१८३७	३
स्वगृहे परमृतौ निर्णयः	१८३७	११
शिष्यसतीर्थ्यब्रह्मचारिषु मृतेषु आशौचम्	१८३९	३
बन्धुत्रयमरणे आशौचनिर्णयः	१८३७	५
स्वल्पसम्बन्धयुक्ते मृते निर्णयः	१८३७	११
दौहित्रभागिनेययोराशौचम्	१८३७	१३
मातुलादौ सन्निधिविदेशयोर्मृते	१८३८	२
श्रोत्रिये स्वगृहे मृते निर्णयः	१८३८	६
ऋत्विग्विषये निर्णयः	१८३८	९
बन्धुत्रयनिर्णयः	१८३९	७
पितृष्वस्रादिकन्यानामाशौचनिर्णयः	१८३९	१०
जामातृमरणे निर्णयः	१८४०	८
शालकानां मरणे निर्णयः	१८४०	९
असपिण्डे स्ववेश्मनि मृते आशौचनिर्णयः	१८४०	११
ग्रामेश्वरे कुलपतौ श्रोत्रिये च मृते निर्णयः	१८४०	२२
मित्रगुरुगुर्वङ्गनामातामह्यादिमृतिषु निर्णयः	१८४०	१४
शवदूषितगृहशुद्धिविधानम्	१८४२	११
ग्राममध्ये शवस्तिष्ठति चेदाशौचनिर्णयः	१८४२	१७
शूनि द्विजमन्दिरे मृते निर्णयः	१८४२	४
शूद्रे द्विजमन्दिरे मृते निर्णयः	१८४२	४
पतिते द्विजमन्दिरे मृते निर्णयः	१८४२	५
अन्त्यात्यन्त्ययोर्विप्रगृहमृतौ निर्णयः	१८४२	६
द्विजस्य मरणे निर्णयः	१८४२	९
गृहे पश्वादौ मृते निर्णयः	१८४२	१९
क्रियाकर्तुराशौचनिर्णयः	१८४३	१८
युद्धे मृतस्याशौचम्	१८४४	१०
युद्धे मृतस्य क्रियाविनिर्णयः	१८४५	१
शृङ्गिदंष्ट्र्यादिभिर्हतानामाशौचम्	१८४५	७
डिम्बाहवगोविप्रपालनादिषु मृतानामाशौचनिर्णयः	१८४५	११
शस्त्रं विना पराङ्मुखहते आशौचम्	१८४५	१३
राज्ञा वध्ये हते निर्णयः	१८४५	१४
क्षतेन मृते निर्णयः	१८४५	१५
शस्त्राघाते त्र्यहोर्ध्वं मृते निर्णयः	१८४५	१७
शवस्य स्पर्शे आशौचम्	१८४६	२
संसर्गाशौचे कर्माधिकारः	१८४७	२
निर्हरणाद्याशौचम्	१८४७	४
निर्हरणं विना तदन्नाशने आशौचम्	१८४७	५
निर्हरणं विना तद्गृहवासे आशौचम्	१८४७	५
तदन्नानशने तद्गृहवासे चाशौचम्	१८४७	५
तद्गृहावासे तदन्नाभक्षणे च निर्णयः	१८४९	१
भृतिग्रहणेन निर्हारे दाहे च आशौचनिर्णयः	१८४९	२
विजातीयनिर्हारे निर्णयः	१८४९	६
अत्र भृतिग्रहणे द्विगुणमाशौचम्	१८४९	७
आपदि मूल्येन विजातीयनिर्हारे निर्णयः	१८४९	१२
सोदकनिर्हरणे निणयः	१८४९	१४
प्रेतालङ्करणे कृते निर्णयः	१८४९	१५
धर्मार्थमनाथाहरणे क्रियाकरणे चाशौचनिर्णयः	१८५०	२
असम्बन्धिद्विजान् वहित्वा दहित्वा च सद्यः शौचम्	१८५०	८
सम्बन्धे त्रिरात्रम्	१८५१	१
मृतं द्विजं शूद्रेण न हारयेत्	१८५१	५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
शूद्रं द्विजेन न हारयेत्	१८५१	६
ब्रह्मचारिणा शवदाहादिकृते प्रायश्चित्तम्	१८५१	७
आचार्यपित्रुपाध्यायानां निर्हरणे	१८५१	१०
सपिण्डानुगमने न दोषः	१८५१	११
असपिण्डानां निर्हरणे निर्णयः	१८५२	४
समोत्कृष्टवर्णानुगमने निर्णयः	१८५२	५
प्रेतानुगमने कृते पश्चात्कर्तव्यनिर्णयः	१८५२	१२
हीनवर्णस्य दाहादिकरणे निर्णयः	१८५४	२
रोदने आशौचनिर्णयः	१८५५	४
तत्र समोत्तमवर्णयोराशौचनिर्णयः	१८५५	४
हीनवर्णेषु	१८५५	५
विप्रस्य क्षत्रियवैश्यविषये	१८५५	६
क्षत्रियस्य वैश्येऽपि	१८५६	१
विप्रस्य शूद्रे आशौचानिर्णयः	१८५६	१
क्षत्रियवैश्ययोः शूद्रे आशौचनिर्णयः	१८५६	२
शूद्रस्य शूद्रे आशौचानिर्णयः	१८५६	३
सपिण्डानां रोदने निर्हरणे च निर्णयः	१८५६	९
मृतस्यानुगमनादिकं कृत्वा तदहोरात्रं दानादिकं वर्जयेत्	१८५६	११
आशौच्यन्नभक्षणे आशौचम्	१८५७	२
ब्राह्मणादीनामज्ञानेन आशौचान्नभक्षणे प्रायश्चित्तानि	१८५७	७
अभ्यासे द्विगुणं प्रायश्चित्तम्	१८५८	१
आपत्तावन्नभक्षणे प्रायश्चित्तम्	१८५८	२
मत्यापदि तु सवर्णाशौचे प्रायश्चित्तम्	१८५८	३
क्षत्रियाशौचे निर्णयः	१८५८	४
वैश्याशौचे निर्णयः	१८५८	४
शूद्राशौचे निर्णयः	१८५८	५
क्षत्रवैश्ययोराशौचे निर्णयः	१८५८	५
शूद्रस्य उत्तमेषु निर्णयः	१८५८	६
मत्याऽनापदि विप्रस्य वर्णेषु प्रायश्चित्तानि	१८५९	१
अभ्यासे विप्रस्य वर्णेषु प्रायश्चित्तानि	१८५९	२
दासस्याशौचम्	१८५९	४
गर्भदासस्याशौचम्	१८५९	६
भक्तदासस्याशौचम्	१८५९	५
एवं दास्यादीनामपि	१८६०	४
दत्तदासादीनां स्वामिसपिण्डमरणादौ निर्णयः	१८६०	११
दासान्तेवासिभृतकशिष्यानामेकत्रवासिनां स्वामितुल्येन शौचेन शुद्धिः	१८६१	३
पञ्चदश दासभेदाः	१८६१	६
दासत्वनिरूपणम्	१८६१	११
अन्तेवासिलक्षणम्	१८६१	१५
आचार्यलक्षणम्	१८६२	१
अनुलोमदासानामाशौचम्	१८६२	३
प्रतिलोमदासानामाशौचम्	१८६२	४
दासलक्षणम्	१८६२	६
रात्रौ जनने मरणे वा निर्णयः	१८६२	८
आहिताग्नेर्दाहादिनिर्णयः	१८६३	३
अतिक्रान्ताशौचम्	१८६४	११
तत्राशौचमध्ये जननादौ ज्ञाते शुद्धिः	१८६४	११
दशदिनमध्ये श्रुतं चेदाशौचम्	१८६४	१२
देशान्तरे अतिक्रान्ताशौचे निर्णयः	१८६५	३
दशाहोर्ध्वं मासत्रयमध्ये श्रुतं चेदाशौचम्	१८६५	८
षण्मासपर्यन्तं श्रुतं चेन्निर्णयः	१८६५	९
नवमासपर्यन्तं श्रुतं चेन्निर्णयः	१८६५	१०
तदूर्ध्वं श्रुतं चेन्निर्णयः	१८६५	१०
जननेऽतिक्रान्ताशौचनिर्णयः	१८६५	११
तत्र पितुराशौचम्	१८६६	१
अतिक्रान्ते आपदनापद्व्यवस्था	१८६७	१
देशान्तरे क्लीबादिमृतौ निर्णयः	१८६७	४
देशान्तरे भृग्वग्न्यादिमृतौ निर्णयः	१८६७	११
देशान्तरे सगोत्रमृतौ निर्णयः	१८६७	१६
देशान्तरलक्षणम्	१८६८	४
देशान्तरे मातापित्रोर्मरणे निर्णयः	१८६९	५
स्त्रीपुंसयोः परस्परं मरणे	१८६९	६
सपत्नीषु परस्परं मरणे निर्णयः	१८६९	९
सम्वत्सरादूर्ध्वं बन्धुमृतिः श्रूयते चेत्	१८६९	९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
बन्धुलक्षणम्	१८६९	१२
सापत्नमातुराशौचम्	१८७०	१
हीनवर्णसापत्नमातृषु मृतासु निर्णयः	१८७०	४
आशौचसम्पाते निर्णयः	१८७०	११
तत्र जनने जननाशौचनिर्णयः	१८७१	८
शावे शावाशौचनिर्णयः	१८७१	८
एकदिने समं न्यूनमधिकं वा प्राप्तं चेन्निर्णयः	१८७०	१४
सूतके शावाशौचम्	१८७२	३
शावे सूतकम्	१८७२	८
मरणोत्पत्तियोगे मरणस्याधिक्यम्	१८७२	१५
स्वल्पाशौचे दीर्घाशौचम्	१८७३	९
दीर्घाशौचे स्वल्पाशौचम्	१८७४	९
सूतकाद्द्विगुणं शावाशौचम्	१८७२	१७
शावाद्द्विगुणमार्तवाशौचम्	१८७२	१७
आर्तवाद्द्विगुणा सूतिः	१८७२	१८
ततोऽपि शवदाहकाशौचम्	१८७२	१८
गुरुणा लघुशुद्धिः	१८७४	१
लघुना न गुरुशुद्धिः	१८७४	१
क्वचिदल्पकालेनापि दीर्घकालाशौचनिवृत्तिः	१८७४	९
दशमेऽहनि आशौचान्तरपाते निर्णयः	१८७७	१०
पित्राशौचे मात्राशौचम्	१८८४	१
मात्राशौचे पित्राशौचम्	१८८४	३
एवं भर्तुरपि	१८८४	८
अन्वारोहणे विशेषः	१८८५	७
भर्तुराशौचोत्तरमन्वारोहणे निर्णयः	१८८६	१५
सहगमने निर्णयः	१८८६	१८
यदा आशौचे पुत्रजन्म तदा निर्णयः	१८८७	१२
यदा पुत्रजननाशौचे मृतिस्तदा निर्णयः	१८८७	१५
अथाशौचापवादः पञ्चधा	१८८८	७
तत्र कर्तृतः	१८८८	८
यत्यादीनामाशौचाभावः	१८८८	९
ब्रह्मचारिणा शववाहादिका क्रिया न कार्या	१८८९	३
व्रती आचार्यादीन् निर्हृत्य व्रतेन न वियुज्यते	१८८९	६
ब्रह्मचारिणा पित्रोरन्त्यकर्म कार्यम्	१८८९	९
एवं मातामहस्यापि दौहित्रः कुर्यात्	१८९०	१
सन्ध्यादिकर्मलोपाभावः	१८९०	१४
ब्रह्मचारिणो द्वितीयदिने विशुद्धिः	१८९१	१०
प्रथमदिने सन्ध्यादिलोपः	१८९१	१३
आशौचान्नभक्षणे तु प्रायश्चित्तमुपनयनादिकञ्च कार्यम्	१८९१	११
ब्रह्मचारिणोऽन्त्यकर्माकरणे आशौचाभावः	१८९२	२
समावर्तनोत्तरं त्र्यहाशौचम्	१८९२	४
दुर्भिक्षाद्यापन्नतानामाशौचाभावः	१८९२	१३
स्वस्थकाले सूतकादिकं कथितम्	१८९३	६
कर्मत आशौचम्	१८९३	१०
तत्र सत्रिव्रत्यादीनामाशौचम्	१८९३	११
कार्षादीनामाशौचाभावः	१८९४	१
राजादीनामाशौचाभावः	१८९४	२
सकल्पसरहस्यषडङ्गवेदाध्ययनादिसम्पन्नस्य नाशौचम्	१८९४	२३
व्रतयज्ञविवाहादिषु आरम्भोत्तरं नाशौचम्	१८९५	३
आशौचे आकस्मिकतीर्थप्राप्तौ निर्णयः	१८९५	८
दीक्षावतां जपपुरश्चरणादिपूजानुष्ठानादावाशौचाभावः	१८९६	२
सूतकिनः पूजाधिकारः	१८९६	१३
श्रौतकर्मणि विशेषः	१८९६	८
दीक्षितस्य अवभृथात्पूर्वमेवाशौचाभावः	१८९७	८
ऋत्विजामाशौचाभावः	१८९९	१
तुलापुरुषदानादौ दोषाभावः	१८९९	७
अत्रापवादान्तरम्	१८९९	१३
श्राद्धादौ विशेषः	१९००	५
अग्निहोत्राद्यकरणे प्रायश्चित्तम्	१९०१	४
स्मार्ताग्निहोमादौ सूतकाभावः	१९०१	११
आशौचे पञ्चमहायज्ञनिषेधः	१९०३	४
सन्ध्यादीनामपवादः	१९०३	१०
सूतके सन्ध्याविधिः	१९०४	५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
ग्रहणे आशौचापवादः	१९०४	१३
भोजनकाले अशुचिर्भवति चेत्	१९०५	७
कन्याविवाहादौ सूतकनिर्णयः	१९०५	५
द्रव्यतः शुद्धिनिर्णयः	१९०५	१३
विवाहप्रारम्भात्पूर्वं कूष्माण्डहोमादिकमावश्यकम्	१९०५	२०
तत्र लवणादिद्रव्यविषये	१९०५	२५
पण्यद्रव्येषु नाशौचम्	१९०६	१
सत्रे आमान्नादौ दोषाभावः	१९०७	४
पक्वान्नादिभक्षणनिषेधः	१९०७	५
उभाभ्यामपरिज्ञाते सूतके निर्णयः	१९०८	२
विवाहोत्सवादिषु सूतके निर्णयः	१९०८	४
एकेनापि परिज्ञाते सूतके निर्णयः	१९०८	३
भुञ्जानेषु विप्रेषु सूतके निर्णयः	१९०८	६
पुस्तकशुद्धिः	१९०९	४
मृतदोषतः शुद्धिनिर्णयः	१९०९	६
तत्रात्मघाते	१९०९	७
पतितानां मृतानां दाहादिनिर्णयः	१९०९	१०
शापादिमरणे निर्णयः	१९१०	२
अभिचारहते	१९१०	३
यस्य भार्या सुरापा तस्यार्धं शरीरं पतति	१९१०	२०
चाण्डालादिभ्यो मरणे निर्णयः	१९११	१
मद्यपगुरुतल्पगादिभिः सह सम्वासेन तत्समत्वम्	१९११	१७
पतितानामन्त्यकर्मकरणे प्रायश्चित्तम्	१९१२	१०
आत्मत्यागिनां क्रियाकरणे प्रायश्चित्तम्	१९१४	६
अज्ञानेन कृते निर्णयः	१९१४	८
तप्तकृच्छ्रविधिः	१९१५	८
आहिताग्निर्विशेषः	१९१६	९
प्रमादमरणे त्वाशौचनिर्णयः	१९१८	२
सर्पहते मृते विशेषः	१९१८	१४
दुर्मरणनिमित्तदानादि	१९१८	१८
तत्र व्याघ्रेण निहते निर्णयः	१९१८	२०
सर्पदष्टे मृते निर्णयः	१९१८	२१
राज्ञा निहते निर्णयः	१९१९	१
चौरेण निहते	१९१९	२
वृषेण निहते	१९१९	३
शय्यामृते	१९१९	४
शौचहीने मृते	१९१९	६
संस्कारहीने मृते	१९१९	७
अश्वहते	१९१९	८
शुना हते	१९१९	९
सूकरेण हते	१९१९	१०
कृमिभिर्मृते	१९१९	११
वृक्षहते निर्णयः	१९१९	१२
शृङ्गिणा हते निर्णयः	१९१९	१३
शकटेन हते निर्णयः	१९१९	१४
भृगुपातमृते निर्णयः	१९१९	१५
अग्निना निहते निर्णयः	१९१९	१६
दारुणा निहते निर्णयः	१९१९	१७
शस्त्रेण निहते निर्णयः	१९१९	१८
अश्मना निहते निर्णयः	१९१९	१९
वृषेण मृते निर्णयः	१९१९	२०
उद्बन्धनेन मृते निर्णयः	१९१९	२१
जलेन मृते निर्णयः	१९२०	१
विषूचिकामृते निर्णयः	१९२०	२
कण्ठान्नकवले मृते निर्णयः	१९२०	३
कासरोगेण मृते निर्णयः	१९२०	४
अतिसारमृते निर्णयः	१९२०	५
शाकिन्यादिग्रहैर्मृते निर्णयः	१९२०	६
विद्युत्पातेन मृते निर्णयः	१९२०	७
अन्तरिक्षमृते निर्णयः	१९२०	८
अस्पृश्यस्पर्शतो मृते निर्णयः	१९२०	९
पतिते मृते निर्णयः	१९२०	१०
अपत्यरहिते मृते निर्णयः	१९२०	११
वैधमरणे निर्णयः	१९२०	१२
भृग्वग्न्यनशनाम्बुभिः आत्मघाते निर्णयः	१९२०	१४
व्याधिरहितस्य आत्मतनुत्यागनिषेधः	१९२१	१
क्षत्रियस्य संग्रामे मृते निर्णयः	१९२१	१०
आत्मघातव्यवस्था	१९२२	५
ब्राह्मणस्यात्मघातनिषेधः	१९२२	९
आत्मघातविधिः	१९२३	६
वाराणस्यामात्मघातविधिस्तत्फलञ्च	१९२४	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
स्त्रिया अन्वारोहणे निर्णयः	१९२४	६
तीर्थे मृते निर्णयः	१९२५	२
वाराणसीमृते निर्णयः	१९२५	७
कलौ स्त्रीणां सहगमनम्	१९२६	२
प्रयागमृते निर्णयः	१९२६	७
प्रयागादौ मरणे दशाहाशौचम्	१९२८	१३
अनशनादिमृतानामाशौचम्	१९२८	१५
मरणान्तप्रायश्चित्ते निर्णयः	१९२९	१
आत्महादीनां वत्सरान्ते और्ध्वदेहिकम्	१९२९	५
म्लेच्छीकृतानामपि गयाश्राद्धम्	१९२९	६
आत्मघातादिप्रायश्चितम्	१९३१	५
नारायणबलिः	१९३१	७
पतितेमृते	१९३१	१२
नारायणबलिव्याख्या	१९३२	८
पतितोदकविधिः	१९३५	५
नारायणबलिप्रयोगः	१९३७	११
अत्र सर्पहते तु विशेषः	१९४०	१
उदकमृते विशेषः	१९४०	८
नारायणबलिकर्तुराशौचम्	१९४१	६
अशक्तौ नारायणबलिप्रयोगे प्रकारान्तरम्	१९४१	२
व्युच्छिन्नसन्ततिमृते विशेषः	१९४१	११
अपुत्रस्य नारायणबलिः	१९४१	१५
विधानादाशौचाभावः	१९४१	१७
ब्रह्मीभूतयतिसंस्कारनिर्णयः	१९४२	२
यतेर्नारायणबलिः	१९४३	२
कृतजीवच्छ्राद्धे मृते निर्णयः	१९४४	१०
आहिताग्नौ प्रोषिते मृते निर्णयः	१९४५	४
अस्थ्याद्यलाभे पालाशादिदाहविधिः	१९४५	१०
पालाशादिस्थापनावधिः	१९४६	६
अङ्गेषु स्थापनार्थद्रव्याणि	१९४७	९
इदं निरग्नेरपि	१९४८	३
प्रोषितस्य द्वादशाब्दातिक्रमे	१९४८	४
देशान्तरमृतस्य दिनाज्ञाने संस्कारकालः	१९४८	२२
आहिताग्न्यादीनामाशौचनिर्णयः	१९४९	२
तत्र गृहीताशौचानां निर्णयः	१९४९	१३
अगृहीताशौचानां निर्णयः	१९४९	१२
अतीतसंस्कारे आशौचनिर्णयः	१९५०	६
प्रेतसंस्कारकालः	१९५१	२
प्रत्यक्षशवसंस्कारे निर्णयः	१९५१	३
आशौचमध्ये शवसंस्कारे निर्णयः	१९५१	४
आशौचोत्तरं संस्कारे निर्णयः	१९५१	५
प्रेतकृत्ये उत्तरायणं श्रेष्ठम्	१९५१	७
तत्र कृष्णपक्षः श्रेष्ठः	१९५१	८
तत्र वर्ज्यचन्द्राः	१९५१	१०
तत्र वर्ज्यनक्षत्राणि	१९५१	२०
जन्मनक्षत्रनिषेधः	१९५१	१६
वर्ज्यतिथयः	१९५२	६
अस्तादिवर्ज्यम्	१९५२	७
अस्यापवादः	१९५२	११
प्रेतस्य साक्षात्संस्कारे निर्णयः	१९५२	१२
अतीते अस्तादिवर्ज्यम्	१९५२	१७
निषिद्धकाले दाहे दानादिकम्	१९५२	२०
कृतौर्ध्वदेहिको जीवन्नागच्छति चेन्निर्णयः	१९५३	७
अमृतस्य दाहादौ स्त्रीसहगमने निर्णयः	१९५३	१९
सर्पसंस्कारे कृते आशौचनिर्णयः	१९५४	२
सर्पसंस्कारविधिः	१९५४	४
नागबलिविधिः	१९५५	१५
जीवतोऽन्त्यकर्माशौचम्	१९५५	२३
पतितस्य घटस्फोटविधिः	१९५६	१
पतितसंग्रहविधिः	१९६०	३
पापस्य गूहनं न कार्यम्	१९५७	३
तत्पापं धर्मविद्भ्यो निवेदयेत्	१९५७	४
अकृतप्रायश्चित्तस्य पापिनो नरकप्राप्तिः	१९५७	७
कृतघटस्फोटस्य सङ्ग्रहविधिः	१९६०	३
पतितानां चरितव्रतानां परिग्रहः	१९६१	१२
जीवच्छ्राद्धे कृते निर्णयः	१९६२	१५
अन्त्यकर्मसाधारणविधिः	१९६२	१८
तत्राधिकारिणः प्रागुक्ताः	१९६२	१९
सर्वाभावे धर्मपुत्रः	१९६२	१९
योऽग्निदः स दशाहं कुर्यात्	१९६३	२
आसन्नमरणे दानादिकं कार्यम्	१९६३	१५
तत्र मोक्षधेनुदानमन्त्रः	१९६३	१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
ऋणधेनुदानमन्त्रः	१९६४	२
पापधेनुदानमन्त्रः	१९६४	५
मरणस्य पुण्यकालः	१९६४	८
वैतरणीधेनुदानम्	१९६४	१४
उत्क्रान्तिधेनुदानम्	१९६५	२
दश दानानि	१९६५	३
तिलपात्रदानम्	१९६५	८
मरणकाले पुण्यमन्त्रश्रवणम्	१९६५	१४
अष्टौ दानानि	१९६५	१५
कर्तुरधिकारार्थं प्रायश्चित्तम्	१९६६	१
मुमूर्षोर्मधुपर्कदानम्	१९६६	३
दुर्मरणे निर्णयः	१९६६	१३
शूद्रेण दग्धे प्रायश्चित्तम्	१९६६	१७
मधुपर्कदानमन्त्रः	१९६६	७
अस्पृश्यस्पर्शे प्रायश्चित्तम्	१९६७	६
ऊर्ध्वोच्छिष्टे मृते प्रायश्चित्तम्	१९६७	५
खट्वायां मरणे प्रायश्चित्तम्	१९६७	६
प्रेतधनहारिणोऽन्त्यकर्माकरणे प्रायश्चित्तम्	१९६६	२२
श्वानक्रव्यादिसंस्पर्शे प्रायश्चित्तम्	१९६७	७
सतान्त्यजैः संस्पर्शे प्रायश्चित्तम्	१९६८	५
रजकादयः सतान्त्यजाः	१९६९	२५
अर्धदग्धे कुणपे अन्त्यजादिभिः स्पृष्टे प्रायश्चित्तम्	१९६८	७
चाण्डालादिभिः स्पृष्टे प्रायश्चित्तम्	१९६९	२
रात्रौ प्रेतदाहे निर्णयः	१९६९	८
रात्रौ वपननिर्णयः	१९६९	१९
गङ्गादिसप्तसु स्थानेषु वपनं कार्यम्	१९७०	२
प्रेतस्य वपननिर्णयः	१९७०	७
आशौचान्ते पुनर्वपनम्	१९७०	९
रात्र्युषिते प्रेते प्रायश्चित्तम्	१९७०	१२
अन्तरिक्षमृते प्रायश्चित्तम्	१९७०	१४
क्रियाकर्तुः तद्दिने मुण्डनम्	१९७०	१९
अन्येषां लघीयसां पुत्राणां दशाहे मुण्डनम्	१९७०	२०
पर्युषितनिरूपणम्	१९७०	२५
पर्युषितस्य पञ्चगव्येन स्नापनम्	१९७१	८
साग्नेर्मरणे विशेषः	१९७१	१
अथ प्रयोगः	१९७३	[illegible]
अथ टीकास्थः प्रयोगः	१९७३	[illegible]
विच्छिन्नश्रौताग्नेः प्रेताधानम्	१९७४	[illegible]
अग्न्यरणीनां नाशे निर्णयः	१९७५	[illegible]
वृष्ट्यादिनाऽग्निनाशे निर्णयः	१९७५	[illegible]
पत्नीमरणेप्येवम्	१९७७	[illegible]
प्रथमायां जीवन्त्यां द्वितीयायां मृतायां दाहनिर्णयः	१९७७	[illegible]
दम्पत्योर्मध्ये प्रथममृतस्य दाहनिर्णयः	१९७७	[illegible]
पश्चान्मृतस्य दाहनिर्णयः	१९७८	[illegible]
साग्नेः पत्नीमृतौ पक्षद्वयम्	१९७८	[illegible]
मृतायां भार्यायामुपाधिनापि अग्निहोत्रादिकं कार्यम्	१९७९	[illegible]
रामचन्द्रेणापि सौवर्णी सीतां कृत्वा यज्ञादिकं कृतम्	१९७९	[illegible]
अपत्नीकस्याधानम्	१९७९	[illegible]
विधुरस्य दाहाग्निनिर्णयः	१९८०	[illegible]
विधवाया दाहाग्निनिर्णयः	१९८०	[illegible]
ब्रह्मचारिणो दाहे निर्णयः	१९८१	[illegible]
कपालजाग्निलक्षणम्	१९८१	[illegible]
उत्तपनाग्निलक्षणम्	१९८१	[illegible]
दाहे शूद्रसंस्पृष्टाग्नितृणकाष्ठादिनिषेधः	१९८१	[illegible]
ब्राह्मणादीनां शवनिर्हरणे दिङ्नियमः	१९८३	[illegible]
निर्हरणप्रकारः	१९८३	[illegible]
शवसंस्कारविधिः	१९८४	[illegible]
आहिताग्नौ विदेशमृते दाहनिर्णयः	१९८५	[illegible]
ऊनद्विवर्षस्य निखननम्	१९८४	[illegible]
प्रेतस्य स्नानवस्त्रालङ्करणम्	१९८५	[illegible]
शवस्य मुखादिसप्तसु छिद्रेषु हिरण्यशकलप्रक्षेपः	१९८६	[illegible]
साग्नेर्दाहे पात्रन्यासादि	१९८६	[illegible]
दहनप्रकारः	१९८५	[illegible]
शवेऽग्निदानमन्त्रः	१९८७	[illegible]
हवनप्रयोगः	१९८७	[illegible]
एवमाहिताग्नेः पात्रन्यासादिकम्	१९८८	[illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
साग्नेरुत्तानमुखत्वम्	१९८८	८
निरग्नेरधोमुखस्थापनम्	१९८८	९
स्त्री तूत्ताना दाह्या	१९८८	१२
उत्क्रान्तिकाले षट्पिण्डदानम्	१९८९	७
अर्धे दग्धे आज्याहुतिर्देया	१९८९	१७
प्रेतस्य स्नानादिकं कार्यम्	१९९०	४
प्रेतस्य वपनम्	१९९०	९
नलदानुलेपनादि	१९९०	९
नग्नः प्रेतो न दग्धव्यः	१९९०	११
सशेषः प्रेतो दाह्यः	१९९०	१३
दाहकालेऽग्निनाशे निर्णयः	१९९०	१४
पर्णशरदाहाग्निनाशे	१९९१	४
पर्णशरदग्धे तद्देहलाभे निर्णयः	१९९१	६
दम्पत्योरेकदामृतौ	१९९१	११
मृते भर्तरि दाहात्प्राक् पत्नी मृता चेन्निर्णयः	१९९२	३
पत्न्यां प्रमीतायां दाहात्प्राक्पतिर्मृतश्चेन्निर्णयः	१९९२	४
भर्तरि मृते भर्त्रा सह चितामारूढायां दाहादिनिर्णयः	१९९२	८
अस्थिसंचयनपृथक्त्वे विकल्पः	१९९२	१०
सहगमने पाकनियमः	१९९२	१२
उदकदानविधिः	१९९२	१४
प्रेतस्य स्नाने विशेषः	१९९३	६
उदकदानमन्त्रः	१९९३	२१
शवदाहप्रयुक्तस्नानान्ते पाषाणे जलाञ्जलिदानम्	१९९४	४
प्रेतस्नाने विशेषः	१९९४	९
अञ्जलिदाननिर्णयः	१९९५	१०
प्रेततर्पणप्रकारः	१९९६	१३
सपिण्डीकरणात्पूर्वं कुशानियमः	१९९६	१६
क्लीवादिभिर्नोदकं देयम्	१९९७	९
आशौचे नियमाः	१९९८	८
स्नानान्ते स्थित्वा सर्वैः इतिहासादिकं वक्तव्यम्	१९९८	१२
प्रेतोद्देशेन रोदननिषेधः	१९९८	१९
प्रेतं दग्ध्वा गृहमागत्य निम्बदंशनादि कार्यम्	१९९९	१
तद्दिने क्रीतलब्धमन्नादि भक्षणीयम्	१९९९	५
उपवासाशक्तौ अशननिर्णयः	२०००	१०
अधःशय्यासनादिनियमाः	२०००	१४
दशाहमध्ये ज्ञातिभोजनम्	२००१	१३
मरणाशौचे लवणादिभोजननिषेधः	२००२	२
उपवासनियमः	२००२	४
प्रथमतृतीयसप्तमदशमदिनेषु ज्ञातिभिः सह भोजनम्	२००२	६
आशौचे दिवा भोजनम्	२००२	९
मृन्मयपर्णपुटकादिपात्रेषु भोजनम्	२००२	१२
आशौचमध्ये यत्नेन स्वगोत्रजान् भोजयेत्	२००२	१४
अन्त्यकर्मकालीनवस्त्रत्यागः कार्यः	२००२	१८
आशौचे दानप्रतिग्रहादि वर्ज्यम्	२००३	२
मृत्युस्थाने प्रत्यहं बलिर्देयः	२००३	४
नग्नप्रच्छादनश्राद्धे वस्त्रादिदानानि	२००३	८
रात्रौ तिलोदकपिण्डादि न कार्यम्	२००३	१०
प्रेतपिण्डनिर्णयः	२००३	१२
वर्णभेदेन पिण्डसंख्या	२००३	१३
सर्ववर्णप्रेतेभ्यः दशपिण्डा देयाः	२००३	१६
पिण्डस्याष्टाङ्गत्वम्	२००३	२२
विप्रान्येषु दशमपिण्डोत्कर्षः कार्यः	२००४	२
सद्यःशौचे पिण्डदाननिर्णयः	२००४	६
त्र्यहाशौचे पिण्डदाननिर्णयः	२००४	८
उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये निर्णयः	२००४	१३
क्रियाकर्तुर्नाशे निर्णयः	२००५	५
भार्यायाः कर्तृत्वे रजोदर्शने निर्णयः	२००५	९
आशौचमध्ये कर्तुरस्वास्थ्ये निर्णयः	२००५	११
असंस्कृतानां पिण्डः कुत्र देयः	२००६	८
फलमूलादिद्रव्यमिश्रितः पिण्डो देयः	२००७	८
दर्भेषु तिलमिश्रः पिण्डो दक्षिणतो देयः	२००७	९
तूष्णीं प्रत्येकं पुष्पादिकं देयम्	२००७	१०
एकमेव पिण्डद्रव्यम्	२००७	११
पिण्डान्नं लौकिकाग्नौ पचेत्	२००७	१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
प्रेतपिण्डार्थं प्रसृतितण्डुलपाकः	२००८	२
तस्य त्रिः प्रक्षालनम्	२००८	२
पिण्डदानप्रकारः	२००८	४
प्रेतपिण्डं ग्रामाद्बहिर्दद्यात्	२००९	७
दाहकर्तैव दशाहं कुर्यात्	२०१०	३
येन केनापि दाहादिक्रिया आरब्धा चान्निर्णयः	२०११	५
पुत्रेण पुनःकरणे निषेधः	२०११	८
प्रेतपिण्डदाने पितृशब्दस्वधाशब्दादि नोच्चारणीयम्	२०११	१३
पिण्डं दत्त्वा दिनात्यये अभीयात्	२०११	१७
यत्र प्रथमपिण्डो दत्तस्तत्रैव द्वितीयादिपिण्डो देयः	२०११	२१
पिण्डैः शरीरावयवनिष्पत्तिः	२०१२	२
एकादशाहपर्यन्तं जलं दुग्धं च रात्रौ देयम्	२०१३	२
दशाहे तैलदीपः स्थाप्यः	२०१३	८
भोजनकाले भक्तमुष्टिदानम्	२०१३	१०
दशाहमध्ये दर्शपाते निर्णयः	२०१३	१५
मातापित्रोस्तु विशेषः	२०१४	१
अत्र देशाचाराद्यवस्था	२०१४	१५
अस्थिसंचयः	२०१४	१७
तत्र कालनिर्णयः	२०१४	१८
संचयने श्राद्धत्रयम्	२०१६	८
सद्यःशौचे संचयनम्	२०१६	१३
त्र्यहाशौचे संचयनम्	२०१६	१४
संचयने श्मशानदेवताः	२०१६	१६
संचयनविधिः	२०१६	१७
प्रेतस्य प्रधानाङ्गास्थिग्रहणम्	२०१७	१४
तीर्थे अस्थिक्षेपविधिः	२०१८	८
अन्यकुलस्थस्यास्थिनयने दोषः	२०१८	१२
गङ्गातोयेऽस्थिक्षेपे ब्रह्मलोकावाप्तिः	२०१९	११
गुरुशुक्रास्तादिकाले गङ्गादितीर्थे अस्थिक्षेपनिषेधः	२०१९	१४
दशाहमध्ये न दोषः	२०२०	१
अस्थिक्षेपविधिः	२०२०	६
अस्थिक्षेपाङ्गेहमश्राद्धम्	२०२१	७
अस्थिक्षेपाङ्गहोमः	२०२२	४
अत्र दशदानम्	२०२२	८
अस्थ्नां शुद्धिकरणे पदार्थाः	२०२१	१०
संचयनोत्तरं श्राद्धम्	२०२३	११
अनुपनीतस्यास्थिसंचयनिर्णयः	२०२४	१
नवश्राद्धनिर्णयः	२०२४	४
अत्र शाखाभेदाद्यवस्था	२०२७	१
नवश्राद्धलक्षणम्	२०२६	१७
विप्रनिमन्त्रणमन्त्रः	२०२७	६
आवाहनमन्त्रः	२०२७	१०
नवश्राद्धाकरणे दोषः	२०२७	१
प्रेतश्राद्धे अष्टादश पदार्था वर्ज्याः	२०२८	१०
नवश्राद्धे सर्वममन्त्रकम्	२०२९	१
एकोद्दिष्टे पात्रमुत्तानं स्थापयेत्	२०२९	६
पार्वणे न्युब्जं स्थापयेत्	२०२९	७
प्रेतश्राद्धानि लौकिकाग्नौ गृहे कार्याणि	२०२९	१
प्रेतश्राद्धं सति सम्भवेऽन्नेन कार्यम्	२०२९	११
नवश्राद्धशेषभोजने प्रायश्चित्तम	२०२९	१२
नवश्राद्धे विघ्ने प्राप्ते निर्णयः	२०२९	१६
अन्वारोहणे विशेषः	२०३०	१
आशौचान्त्यदिनकृत्यम्	२०३०	५
दशमदिने वपननिर्णयः	२०३१	१
जननाशौचेऽपि मुण्डनम्	२०३१	१५
अत्र देशाचाराद्यवस्था	२०३१	१६
तच्च शिखावर्जं वपनम्	२०३१	१७
गृहस्था विहारादन्यत्र न वपेयुः	२०३१	१८
वपनाकरणे दोषः	२०३२	२१
एकादशाहविचारः	२०३३	८
विप्रादीनामाशौचशुद्धिः	२०३३	९
आद्यश्राद्धमेकादशेऽह्नि कार्यम्	२०३३	१६
प्रेताय पिण्डदानाकरणे नरकप्राप्तिः	२०३७	१
स्वगोत्राणां परगोत्राणामपि प्रेतानां पिण्डदानान्मुक्तिः	२०३७	१९
येषां षोडशश्राद्धाभावस्तेषां पिशाचत्वम्	२०३८	२५
वस्त्रालङ्कारशय्यादिकं सर्वं श्राद्धभोक्त्रे देयम्	२०३९	३
विप्राय स्नापनाभ्यञ्जनं देयम्	२०४०	२३
विप्राय स्वागतक्रिया विधेया	२०४०	२५
छत्रादिदानम्	२०४०	२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
सर्वेषामानुरूप्येण दक्षिणा देया	२०४१	१५
अस्य विघ्ने गौणकालमाह	२०४२	१
आद्यमासिकाब्दिकयोर्निर्णयः	२०४२	११
अत्र विशेषः	२०४४	७
तिलप्रक्षेपमन्त्रः	२०४५	९
विप्राभावे अग्नावेवैकोद्दिष्टम्	२०४५	१३
वृषोत्सर्गनिर्णयः	२०४५	२०
वृषोत्सर्गाकरणे दोषः	२०४६	१
नीलवृषोत्सर्गफलम्	२०४६	१०
वृषोत्सर्गकालः	२०४६	१५
अयं गृहे न कार्यः	२०४६	१९
वर्षमध्ये वृद्धिश्राद्धनिषेधः	२०४६	२२
नीलवृषलक्षणम्	२०४७	१
चतस्रो वत्सिका द्वे वा देयाः	२०४७	६
वृषाभावे मृदादिना कार्यः	२०४७	८
तदभावे होमः कार्यः	२०४७	१०
वृषोत्सर्गविधिः	२०४७	११
नीलवृषलक्षणान्तरम्	२०४७	२२
उत्सृष्टवृषस्य धारणवाहनादिनिषेधः	२०४८	२
पानिपुत्रवत्याः वृषोत्सर्गो न कार्यः	२०४८	५
तत्स्थाने सवत्सा पयस्विनी देया	२०४८	६
आशौचान्तरेऽपि वृषोत्सर्गादिकर्म कार्यमेव	२०४८	८
अत्र पददानम्	२०४८	१५
पददानवस्तूनि	२०४९	२
चतुर्दशोपदानानि	२०४९	१२
शय्यादानम्	२०४९	१९
शय्यादानसामग्री	२०५०	१
शय्यादानमन्त्रः	२०५०	१०
मृतकशय्यादाने	२०५०	१७
लालाटिकास्थिभोजनम्	२०५१	३
शय्यादानफलम्	२०५१	८
उदकुम्भदानम्	२०५१	१२
अन्नदानम्	२०५२	५
उदकुम्भाकरणे दोषः	२०५२	१८
उदकुम्भनिष्क्रयं दातव्यम्	२०५२	१७
प्रथमाब्दे प्रत्यहं दीपो देयः	२०५५	२
मासिकश्राद्धानि	२०५५	६
तत्र षोडशश्राद्धनिर्णयः	२०५५	८
ऊनमासिकनिर्णयः	२०५५	१३
त्रिपुष्करलक्षणम्	२०५७	८
प्रतिमासं श्राद्धकरणाशक्तौ निर्णयः	२०६१	३
एतेषां युगपत्करणे निर्णयः	२०६३	९
वृद्धिं विनापकर्षे पुनः करणम्	२०६४	१९
वृद्धिनिमित्तापकर्षे पुनः करणाभावः	२०६६	१६
सपिण्डनापकर्षे दोषः	२०६६	१४
अन्तरितनवश्राद्धमासिकयोरुत्तरेण सहानुष्ठानम्	२०६८	२
सपिण्डीकरणम्	२०६८	६
तत्र साग्निकनिरग्निकयोर्निर्णयः	२०७०	३
सपिण्डीकरणकालः	२०७१	४
सपिण्डीकरणापकर्षनिर्णयः	२०७४	१
साग्निकनिरग्निकयोर्द्वादशेऽहनि सपिण्डनम्	२०७५	८
वृद्धिश्राद्धस्यावश्यकतानावश्यकतानिर्णयः	२०७६	१
अन्तरितसपिण्डीकरणे नक्षत्रादिविचारः	२०८०	१४
सपिण्डीकरणे अष्टौ कालाः	२०८१	२
सपिण्डीकरणे ज्येष्ठस्यैवाधिकारः	२०८६	६
मलमासेऽपि आब्दिकं कर्तव्यम्	२०८३	२३
पुत्रे सति नान्यः कुर्यात्सपिण्डनम्	२०८५	१
आहिताग्नेः कनिष्ठस्याप्यधिकारः	२०८७	३
एवं वृद्धावपि कार्यम्	२०८७	४
वृद्ध्यभावे वर्षान्ते सपिण्डीकरणम्	२०८८	६
ज्येष्ठे देशान्तरे सति निर्णयः	२०८९	२
महागुरौ प्रेतभूते वृद्धिकर्मनिषेधः	२०९०	४
वृद्धिं विना कनिष्ठेन कृते विदेशस्थेन ज्येष्ठेन पुनः कार्यम्	२०९१	१
देशान्तरे पितरि मृते पुत्रैः किं कार्यम्?	२०९१	७
अत्र दत्तकस्य विशेषः प्रागुक्तः	२०९२	२
क्वचित्कनिष्ठस्याप्यधिकारो युक्तः	२०९२	३
पुनः सपिण्डीकरणे विशेषः	२०९२	१०
व्युत्क्रममृतौ सपिण्डीकरणनिर्णयः	२०९२	१४
पुत्रादेः सपिण्डनाधिकारः	२०९४	१३
स्त्रीणां सपिण्डीकरणनिर्णयः	२०९६	१३
संविभक्तधनेष्वपि एकेनैव नवश्राद्धादि कार्यम्	२०९२	२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
अपुत्रायाः सपिण्डनम्	२०९७	१३
अन्वारोहणे भर्त्रैव सापिण्ड्यम्	२०९८	३
आसुरादिविवाहितायाः सपिण्डीनिर्णयः	२०९९	६
सर्वत्र देशभेदाद्विकल्पः	२०९९	१४
कोकिलमतानुसारिणः	२१००	१
पत्युः सापिण्ड्यम्	२१००	१८
अपुत्राणां सपिण्डनम्	२१००	२२
अपत्नीनां सपिण्डनम्	२१०१	४
ब्रह्मचारिणां सपिण्डनम्	२१०१	६
अपुत्रे व्युत्क्रममृते विधिः	२१०२	१
यतीनां सपिण्डनं नास्ति	२१०२	९
सपिण्डनविधिः	२१०२	१३
सपिण्डने कामकालौ देवौ	२१०३	९
आमान्नेन सपिण्डनं न कर्तव्यम्	२१०३	१६
सपिण्डीकरणं पक्वान्नेनैव कर्तव्यम्	२१०३	१९
सपिण्डनानन्तरं पाथेयश्राद्धम्	२१०३	२२
ततो वृद्धिश्राद्धं कार्यम्	२१०४	१
एतन्मलमासेऽपि कर्तव्यम्	२१०४	२

इति सपिण्डीकरणम् ।

प्रथमाब्दकर्तव्यादीनि ।

प्रथमाब्दे निषिद्धानि	२१०४	७
महागुरुनिपातने महातीर्थादि गमनं न कर्तव्यम्	२१०४	१६
दैवपित्र्यकर्मणि अशुचित्वम्	२१०५	१०
महागुरुनिपातनेऽपि दाहाद्येकादशाहान्तं कार्यम्	२१०६	१
पत्न्यादौ अपवादः	२१०६	५
संघातमरणे निर्णयः	२१०६	७
पितरि मृते अन्यस्य श्राद्धं न कार्यम्	२१०६	१९
गुरुपाते वर्षमध्ये अन्यश्राद्धपरान्नादिकं वर्जयेत्	२१०६	२१
महागुरुनिपाते सपिण्डनात्प्राक् काम्यादिकं नाचरेत्	२१०७	७
पित्रादीनामाशौचनिर्णयः	२१०७	१४
तत्र पितरि मृते अब्दपर्यन्तमाशौचम्	२१०७	१४
मातुःषण्मासपर्यन्तमाशौचम्	२१०७	१४
भार्यायास्त्रिमासपर्यन्तमाशौचम्	२१०७	१५
भ्रातृपुत्रयोः सार्धमासमाशौचम्	२१०७	१५
प्रथमेऽब्दे गयाश्राद्धादिनिषेधः	२१०८	५
अस्यापवादः	२१०९	१७
पतितस्य अब्दादूर्ध्वं गयायां श्राद्धविधिः	२११०	३
विधानानि	२११०	६
तत्र पञ्चकमृते विधानम्	२११०	६
त्रिपादृक्षे मृतौ विशेषः	२१११	१
त्रिपुष्करे मृतौ विशेषः	२१११	६
तद्दाहे मन्त्रः	२१११	१०
पञ्चकादिमृतेषु दाहविधिः	२११२	१
सूतकान्ते शान्तिविधिः	२११२	१०
पञ्चरत्नानि	२११३	१
प्रकारान्तरेण शान्तिविधिः	२११३	१०
पञ्चकमृते शवमुखे पञ्चरत्नादिकं देयम्	२११२	१०
पञ्चरत्नाभावे कर्षार्धं स्वर्णं देयम्	२११३	१
सुवर्णाभावे आज्यं देयम्	२११३	५
त्रिपान्नक्षत्राणि	२११३	१८
मृतः श्मशानाज्जीवन्पुनरागच्छेच्चेत्	२११३	२१
तत्र शान्तिविधिः	२११४	३
ब्रह्मचारिमृतौ	२११४	८
तत्रावकीर्णिदोषप्रायश्चित्तम्	२११४	१०
कुष्ठिमृतौ प्रायश्चित्तम्	२११५	११
कुष्ठिलक्षणानि	२११५	२०
प्रायश्चित्तं विना कुष्ठिदाहे प्रायश्चित्तम्	२११६	४
अन्यदीयकुष्ठिनो मरणान्तमाशौचम्	२११६	५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
अष्टौ महारोगाः	२११६	१३
रजस्वलामरणे	२११६	१६
सूतिकामरणे	२११६	२१
गर्भिणीमरणे	२११८	१९
अन्तरिक्षमरणे प्रायश्चित्तम्	२११७	८
अन्वारोहणे प्रयोगः	२१२०	५
तत्र हरिद्राकुङ्कुमाञ्जनयुतशूर्पवायनानि दद्यात्	२१२०	१५
तत्र मन्त्रः	२१२०	१७
अग्निप्रार्थना	२१२१	६
आज्यहोमः	२१२१	९
विष्णुरूपिणेऽग्नये अर्घ्यदानम्	२१२१	२४
सूर्यायार्घ्यदानम्	२१२१	११
शूर्पदानमन्त्रः	२१२१	१४
दृषदुपलापूजनम्	२१२२	४
पुनरग्निप्रार्थनामन्त्राः	२१२२	५
कातरायाः पुनरुत्थापनम्	२१२२	१४
सहगमनमहिमा	२१२२	१८
पृथक्चितारोहणे निषेधः	२१२३	२
क्षत्रियादिस्त्रीणां पृथक्चितिः	२१२३	८
पत्यौ देशान्तरे मृते गमने विशेषः	२१२३	९
अस्थिदाहे पर्णशरदाहे वा न पृथक्चितिदोषः	२१२४	१
ग्रामान्तरस्थायाः सहगमननिर्णयः	२१२४	९
उदक्यायाः अन्वारोहणनिर्णयः	२१२४	१२
चितिभ्रष्टायाः प्रायश्चितम्	२१२४	१९
गर्भिण्यादीनां सहगमने निषेधः	२१२५	८
अन्वारोहणे विशेषः	२१२५	३
तिन्नतानामेवाधिकारो न दुर्वृत्तानाम्	२१२६	८
अन्वारोहणे रजस्वलायाः शुद्धिविधिः	२१२७	३
अत्र श्राद्धादौ निर्णयः पूर्वमुक्तः	२१२७	११
अग्निप्रवेशाशक्तौ निर्णयः	२१२७	१४
विधवाधर्माः	२१२८	४
विधवायास्तर्पणविधिः	२१२८	१२
श्राद्धादौ विशेषः प्रागुक्तः	२१२८	२१
सन्यासनिर्णयः	२१२९	१
अत्र विप्रस्यैवाधिकार उक्तः	२१३०	६
अविरक्तस्य सन्यासनिषेधः	२१२९	२४
आतुरसन्यासविधिः	२१३०	३
वर्णक्रमेणाश्रमा उक्ताः	२१३४	१
सन्यासश्चतुर्धा	२१३६	१
तत्र कुटीचकलक्षणम्	२१३६	४
बहूदकलक्षणम्	२१३६	७
हंसलक्षणम्	२१३६	८
परमहंसलक्षणम्	२१३७	२
त्रिदण्डिलक्षणम्	२१३७	१०
वैराग्यं विना सन्यासे दोषः	२१३७	१७
यतेः पूज्यत्वम्	२१३८	५
सन्यासविधिः	२१३८	८
तत्रादौ प्रायश्चित्तं कार्यम्	२१३८	१६
अष्टौ श्राद्धानि	२१३८	१९
तत्र प्रतिश्राद्धं देवताक्रमः	२१३८	२१
तद्विधिश्च	२१३८	२१
देवौ दक्षक्रतू सत्यवसू वा	२१३९	९
दण्डादिसामग्री	२१३९	११
पूर्वेद्युर्नान्दीश्राद्धम्	२१३९	१४
दण्डस्य प्रमाणं लक्षणञ्च	२१३९	१७
साग्नेर्निरग्नेश्च विधिः	२१३९	२३
सन्यासग्रहणक्रमः	११४१	६
तत्राधिकारार्थं स्वयं नव श्राद्धादीनि कर्तव्यानि	२१४१	७
अनाश्रमी चेत्प्रायश्चित्तम्	२१४१	८
सन्यासग्रहणकालः	२१४१	९
सन्याससंकल्पादि	२१४१	११
होमे अग्निसिद्धिः	२१४१	१४
तत्राहिताग्नेर्गार्हपत्ये	२१४१	१४
विधुरोऽग्निहोत्री चेत्	२१४१	१५
ब्रह्मचारी चेल्लौकिके	२१४१	१७
वपनपूर्वकं सावित्रीप्रवेशादिकर्म	२१४१	२१
अत्र विरजाहोमः केचिन्मते	२१४२	२०
ततोऽवशिष्टप्रयोगः	२१४३	१
यतिधर्माः	२१४५	९
यतिभिक्षाकालः	२१४६	१
यतेर्भिक्षाविधिः	२१४६	७
यतेर्भोजनविधिः	२१४६	१३
यतिभिक्षादाने फलम्	२१४६	१७
यतीनां ग्रामे एकरात्रं वासः	२१४६	२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयाः	पृष्ठाङ्काः	पङ्क्त्यङ्काः
नगरे पञ्चरात्रं वासः	२१४६	२२
वर्षासु चत्वारो मासा वासः	२१४६	२३
यतीनां वासस्थानानि	२१४६	२४
यतीनां कर्तव्याणि षट् कर्माणि	२१४७	५
यतीनां पतनहेतूनि षट् कर्माणि	२१४७	७
यतीनां बन्धककर्माणि षट्	२१४७	९
यतीनामध्ययनादिनिषेधः	२१४७	१२
यतिपात्राणि	२१४७	१३
यतीनां निषिद्धभिक्षा	२१४७	१५
यतीनां निषिद्धकर्माणि	२१४७	१८
यतिधर्माः	२१४७	२१
यतीनां पितृपुत्रादिमरणे स्नानमात्रम्	२१४७	२५
यतिसंस्कारः	२१४८	१
आतुरसंन्यासः	२१४८	४
आतुरसंन्यासप्रयोगः	२१४८	१२
संन्यासग्रहणे फलम्	२१४८	२३
कृच्छ्रनान्दीश्राद्धविरजाहोमाशक्तौ निर्णयः	२१४९	१३
श्रौतातुरस्य विलम्बितस्य प्रयोगः	२१४९	९
आतुरसंन्यासविधिः	२१४९	२०
तत्र अप्सु होमः	२१५०	१
आतुरसंन्यासिनि मृते निर्णयः	२१५०	१९
विरक्तस्यातुरस्य निर्णयः	२१५०	२१
समाधिसंस्कारादि निर्णयः	२१५०	२४
आतुरसंन्यासानन्तरं जीवितश्चेन्निर्णयः	२१५०	२५
कुटीचकस्य दहनम्	२१५१	६
बहूदकं पूरयेत्	२१५१	६
हंसस्य जले निक्षेपः	२१५१	७
परमहंसं पूरयेत्	२१५१	७
पलाशमूले नदीतीरे वा पूरणम्	२१५१	८
शवस्य स्नानालंकरणादिपूजनम्	२१५१	९
यथास्थानं दण्डादिदानम्	२१५१	१४
ततः प्रोक्षणम्	२१५१	१९
अवटे प्रोक्षणं प्रेतनिक्षेपश्च	२१५१	२१
खड्गेन मूर्धभेदनम्	२१५१	२४
ततो लवणेन गर्तपूरणम्	२१५१	२५
कुटीचकस्य दहनविधिः	२१५२	१
अस्थ्नां तीर्थे प्रक्षेपः	२१५२	६
अस्थ्याशौचं नास्ति	२१५२	६
एकादशेऽह्नि पार्वणम्	२१५२	९
हंसपरमहंसानां न पार्वणम्	२१५२	१०
द्वादशेऽह्नि नारायणबलिः	२१५२	१५
तद्विधिरन्यश्च विशेषः	२१५२	१६
ग्रन्थकर्तुः श्लोकाः	२१५२	१७

इति श्रीसटीकनिर्णयसिन्धुविषयानुक्रमणिका समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*दानवाक्ये विकल्पः । याज्ञवल्क्यः—

कामोदकं सखिप्रत्तास्वस्त्रीयश्वशुरर्त्विजाम् ।

काम इच्छा । प्रेततृप्तीच्छायां देयमन्यथा नेत्यर्थः ॥ शङ्खपारस्करौ*"आचार्ये चैवं मातामहयोश्च स्त्रीणां चाप्रत्तानां कुर्वीरंस्ताश्च तेषाम्"इति । द्विवचनान्मातामह्या अपि । शङ्खलिखितौ—"उदकक्रिया कामं श्वशुरमातुलयोः शिष्ये सहाध्यायिनि राजनि च" इति । वृद्धमनुः—

*क्लीबाद्या नोदकं कुर्युः*स्तेना*व्रात्या*विधर्मिणः ।
गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः ॥

याज्ञवल्क्यः—

न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ।

षडशीतौ—

स्वीयाचारादपि भ्रष्टाः पतिता ये च दूषिताः ।
न कुर्युरुदकं ते वै तेभ्योऽप्यन्ये न चैव हि ॥

ण्डीति । *दानवाक्ये । प्रेतस्तृप्यतु इति । प्रचेताः-अमुष्मै स्वधेति । बैजवापो-असावेतत्ते उदकमिति । पारस्करोऽसौ तृप्यतामिति । हारीतः गोत्रनामपदान्ते च तर्पयामीत्येवं वदेदिति हारीतः कात्यायनश्चेति तत्तदानमन्त्रैः सह रामायणदानवाक्ये । सखा मित्रम् । प्रत्ता परिणीता दुहितृभगिन्यादिः । सपिण्डसोदकानामुदकदानस्य नित्यत्वार्थे कामपदम् । अन्यत्रापि नित्यं, तदाह-*आचार्ये इति । स्त्रीणां दुहितृभगिन्यादीनाम् । *क्लीबाद्या इति । आद्यपदेन ब्रह्महादयः । *स्तेनाः सुवर्णतत्समद्रव्यहर्त्तारः । *व्रात्याः कालेऽनुपनीताः । *विधर्मिणः पाखण्डिनः । गर्भपदं पुत्रदुहित्रोरुपलक्षणम् । गर्भादयश्चत्वारोऽब्राह्मणं प्रति । योषितोऽसवर्णा अपि अपविद्धाः बहिष्कृताः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदनरत्ने हारीतः—

पतितानामवृद्धानां चरन्तीनां च कामतः ।
*प्रत्तानां चैव कन्यानां निर्वर्त्या सलिलक्रिया ॥

अपरार्के शङ्खलिखितौ—"अपपात्रितस्य रिक्थपिण्डोदकानि व्यावर्तन्ते" । अपपात्रितः कृतघटस्फोटः । तस्यापि संग्रहविधौ कृते आशौचोदकादि कुर्यादेवेत्याशौचप्रकाशः ॥

अथा*शौचे नियमाः । याज्ञवल्क्यः—

*इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः ।

---

*प्रत्तानां स्वस्रादीनाम् ।

*आशौचे मरणाशौचे । *इतीति ।

कृतोदकान् समुत्तीर्णान् मृदुशाद्वलसंस्थितान् ।
स्नातानपवदेयुस्तानितिहासैः पुरातनैः ॥
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
यः करोति स संमूढो जलबुद्बुदसंम्भवे ॥
पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः ।
कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥
गन्त्री वसुमती नाशमुदधिर्दैवतानि च ।
फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥

इति प्रकृतम् । ग्रामात् उदकात् सम्यगुत्तीर्णान् । मृदुशाद्वलेति तत्रैव "शवस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनाद्रात्रौ चेदादित्यस्य" इति पारस्करोक्तेः बहिरेव वस्त्रशोषणादिकं कर्तव्यम् । बहिःस्थित्यशक्तौ स एव "ब्राह्मणानुमत्या वा" इति । तान् पुत्रादीन् प्रति । कुलवृद्धा इति अर्थलभ्यम् । शोकनिर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*विदश्य निम्बपत्राणि *नियता द्वारि वेश्मनः ॥
आचम्या*ग्न्यादिसलिलं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मानि पदं शनैः ॥
प्रवेशनादिकं कर्म *प्रेतसंस्पर्शिनामपि ।
*क्रीतलब्धाशना भूमौ स्वपेयुस्ते *पृथक् *क्षितौ ॥

सनसमर्थेतिहासमाह–मानुष्येति । जलबुद्बुदोऽचिरविनश्वरः । पञ्चधा भूतपञ्चकात्मतया । स्वशरीरं प्राग्जन्मतः यदि फलोपभोगक्षयः । परिदेवनाऽनुशोचनम् । वस्तुतस्तथात्वात् । वस्तुस्थिते केनाप्यतिक्रमितुमशक्यत्वात् । नेदमाश्चर्यं यन्मरणमित्याह–गन्त्रीति । कथमिति । तथाच मरणधर्मिणः नाशस्यावश्यकतया शोको निष्फल इति भावः । अनिष्टापादकत्वादपि न शोको युक्त इत्याह–श्लेष्मेति । अतो नेति । इतः परं रोदननिषेधः । ग्रन्थे–*विदश्येति । विदशनं (१)खण्डनं न तु भक्षणम् । *नियताः मूत्रपुरीषाद्युत्तरं विहितशौचेन शुचयः । अत्रार्थक्रम ऊह्यः । *अग्न्यादीति । "अश्मानमग्निं गोमयमक्षतां तैलमप उपस्पृशन्ति" इत्याश्वलायनः । तत्र दृश्यस्पर्शः पादेन, "कृत्वाश्मनि पदम्" इत्युल्लङ्घनव्यावर्तनात् । "दूर्वाप्रवालमग्निवृषभौ वा" इति शङ्खः । दूर्वाप्रवालं दूर्वाङ्कुरः इदमादिपदग्राह्यम् । केषाञ्चिदालम्भे मन्त्रानपि वक्ष्यति–शमीमित्यादिना । *प्रेतसंस्पर्शिनाम् । सपिण्डानां शवनिर्हरणस्नानालङ्करणकर्तॄणाम् । *क्रीतम् । अयाचितं लब्धं वा । एतदेवोत्पन्नम् । महागुरुमृतौ त्र्यहमेकाहं वोपोष्य पारणा क्रीतोत्पन्नेनैव । *पृथक् एकाकिनः । *क्षितौ तार्णास्तीर्णायाम् । क्षितिपदं खट्वाकम्बलादिनिषेधार्थं न तु कटस्य, "भूमौ प्रस्तरशायिनः" इति विष्णुपुराणात् । दिवाऽप्युपवेशनं तार्णास्तीर्णक्षितावेवेत्याह–

(१) खण्डनं दन्तैरिति यावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं चाद्येऽह्नि । वसिष्ठः-"*अधः(१)प्रस्तरे ऽद्य(१)हमनश्नन्त आसीरन् क्रीतोत्पन्नेन वा वर्तेरन्" । शुद्धितत्त्वे बैजवापः-"शमीमालभन्ते शमी पापं शमयत्विति, अहमानमहमेव स्थिरो भूयासमिति, अग्निमग्निर्नः शर्म यच्छत्विति, (२)ज्योतिरित्यन्तरा गामजमुपस्पृशन्तः क्रित्वा लब्ध्वा वाऽन्यगेहोदकान्नमलवणमेकरात्रं दिवा भुञ्जीरंस्त्रिरात्रं च कर्मोपरमणम्" क्रीताद्यशनमुपवासाशक्तस्य । आश्वलायनस्तु-"नैतस्यां रात्र्यामन्नं पचेरन् क्री(३)तोत्पन्नेन वा वर्तेरंस्त्रिरात्रमक्षारलवणाशिनः स्युर्द्वादशरात्रं वा" इत्याह । अशक्तौ रत्नाकरे आपस्तम्बः-"भार्यापरमगुरुसंस्थायां चाकालभोजनानि कुर्वीरन्" । यदा मृतिः, परादिने तावत्कालामित्यर्थः । बृहस्पतिः—

अधःशय्यासना *दीना *मालिना भोगवर्जिताः ।
अ*क्षारलवणान्नाः स्युर्लब्धक्रिताशनास्तथा ॥
भोगोऽभ्यङ्ग*ताम्बूलादिः । *क्षाराः परिभाषाया-

---

*अधःप्रस्तरे इति । आशौचिनां शयनासनार्थं निर्मितः कटादिरधः प्रस्तारः । *दीना इति मङ्गलहर्षरहस्यादेर्निषेधः । *मलिना इति । मार्जनवस्त्रक्षालनादेः । *क्षारो यवक्षारादिः, लवणविशेषणं वा । तेन सैन्धवादेरनिषेध इति । मेधातिथिस्त्वक्षारलवणान्ना इत्यत्रैव अक्षारालवणाशिन इति आश्वलायनेन नञ्द्वयोपादानात्पृथक् क्षाराणां गोधूमगुडादीनां निषेध इत्याह । *ताम्बूलादिरिति । आदिना स्रक्चन्दनादिधारणव्यसनोच्चासनादिग्रहः । *क्षारा इति ।

---

(१) 'अद्य प्रस्तरे गृहमनश्नन्त' ग० ।
(२) 'ज्योतिषअन्तरा' ग० । (३) 'क्रीतोत्पन्नेन वा वर्तेरन्' ग०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुक्ताः । यत्तु मार्कण्डेयपुराणे—

तैलाभ्यङ्गो बान्धवानामङ्गसंवाहनं च यत् ।
तेन चाप्यायते जन्तुर्यच्चाश्नन्ति स्वबान्धवाः ॥
प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा ।
वस्त्रत्यागं बहिः स्नानं कृत्वा दद्यात्तिलोदकम्॥इति ।

तदन्त्यदिनपरम्, "आशौचान्ते *तिलकल्कैः स्नाता गृहं प्रविशेयुः" इति विष्णूक्तेः । विष्णुपुराणे त्वस्थिसंचयनोर्ध्वं *भोगोप्युक्तः—

शय्यासनोपभोगस्तु *सपिण्डानामपीष्यते ।
अस्थिसंचयनादूर्ध्वं *संयोगस्तु न योषिताम् ॥

भारते—

तिलान् द(१)दतु पानीयं दीपं द(१)दतु जाग्रतु ।
ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम् ॥

मनुः—

*मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ ।

तिलमुद्गावृते शैब्यं सस्ये गोधूमकोद्रवौ ।
धान्याके देवधान्यं च शमीधान्यं तथैक्षवम् ।
स्विन्नधान्यं तथा पण्यं मूलं क्षारगणाः स्मृताः ॥ इति ।

*तिलकल्कैरिति । तिलकल्काविकल्पितत्वादन्त्यदिनमात्रगामीति भावः । *भोगोपीति लोलुपताऽर्थः । *सपिण्डानामिति । पुत्रस्य तु दशाहं कटम् यावदाशौचं यावद्भोगनिषेधः, "दशाहं कटमुपासीरन्मातापित्रोर्मरणे" इति बौधायनस्मृतेः । *संयोगो मैथुनम् । सपिण्डानामिति वर्तते । *मांसाशनमिति गौतमेन "ब्रह्मचारिणो न मार्जयीरन मांसं न भक्षयेयुराप्रदानात्" इति प्रदानमैकादशाहिकश्राद्धं तत्पर्यन्तं मार्जनरहितस्ना-

---

(१) 'ददत' क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवजानीये कारिकायाम्—

लवणक्षीरमाषान्नापूपमांसानि पायसम् ।
वर्जयेदाहृतान्नेषु बालवृद्धातुरैर्विना ॥
उपवासो गुरौ प्रेते पत्न्याः पुत्रस्य वा भवेत् ॥

मरीचिः—

*प्रथमेऽह्नि तृ(१)तीये च सप्तमे दशमे तथा ।
ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम् ॥

भोजनं च दिवैव,

दिवा चैव तु भोक्तव्यममांसं मनुजर्षभ ।

इति विष्णुपुराणात् । 'क्रीत्वा लब्ध्वा वा दिवान्नमश्नीयुः' इति पारस्करोक्तेश्च । मदनरत्ने हारीतः-'पाणिषु मृन्मयेषु पर्णपुटकेषु वाऽश्नीरन्' । देवजानीये ब्राह्मे (शु(२)द्धितत्त्वे आदिपुराणे-)

आशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान् ।

अन्त्यदिने तु मदनरत्ने ब्राह्मे--

यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः ।
स तत्र गृहशुद्धिं च *वस्त्रशुद्धिं करोत्यपि ॥

अन्त्यकर्मकालीनवस्त्रयोस्तु तत्रैवोक्तम्—

ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे तु वाससी ।
अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोत्यथ॥इति ।

नं मांसभक्षणवर्जनं चोक्तम् । "त्र्यहं मांसाशनं च नाश्नीयुः" इति मनुस्तु मांसलोलुपपरः । दिनविशेषे सहभोजनपक्षमाह—*प्रथमेऽह्नीति । एकान्नमिति । "क्रीत्वा लब्धा वाऽन्यगृहादेकान्नमलवणमेकां रात्रीं भुञ्जीरन्" इति बैजवापोऽपि द्रष्टव्यः । *वस्त्रशुद्धिः निर्णेजकादिद्वारा निर्णेजनम् । "प्रथमतृतीयपञ्चमसप्तम-

---

(१) 'तृतीये च चतुर्थे सप्तमे तथा' क० ।
(२) धनुश्चिन्हान्तर्गतं नास्ति ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शङ्खः—

दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च।
प्रेतपिण्डक्रियावर्ज्यमाशौचे विनिवर्तते॥

काठकगृह्ये-'यत्र प्राणोत्क्रमस्तत्रान्वहं महाबलिं कुर्यात्' इति। पारस्करः-'तदानीमेव वस्त्रं तण्डुलं दीपं कांस्यभाजनं प्रेताय दद्यात्'। आशौचप्रकाशे भरद्वाजः-

वासोऽन्नं च जलं कुम्भं प्रदीपं कांस्यभाजनम्।
नग्नप्रच्छादने श्राद्धे ब्राह्मणाय निवेदयेत्।

भृगुः—

तिलोदकं तथा पिण्डान् नग्नप्रच्छादनादिकम्।
रात्रौ न कुर्यात्संध्यायां यदि कुर्यान्निरर्थकम्॥

अथ *प्रेतपिण्डः। यद्यपि हेमाद्रौ पारस्करेण—

ब्राह्मणे दशपिण्डास्तु क्षत्रिये द्वादश स्मृताः।
वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत्प्रकीर्तिताः॥

इ(१)त्युक्तं, तथापि—

प्रेतेभ्यः सर्ववर्णेभ्यः पिण्डान्दद्याद्दशैव तु।

इति तेनैवोक्तेः सर्वेषां दशैव ज्ञेयाः। मदनरत्नेऽप्येवम्। *तथाच हेमाद्रौ ब्राह्मपाद्मयोः—

जात्युक्ताशौचतुल्यांस्तु वर्णानां काचिदेव हि।

नवमेषु वाससां त्यागः" इति गौतमोक्तत्यागस्तु परिवर्तनमात्रम्। *प्रेतपिण्डः—

तिलमन्नं च पानीयं धूपं दीपं तथैव च।
मधु सर्पिः खण्डयुतं पिण्डमष्टाङ्गमुच्यते॥

इत्यष्टाङ्गः। नन्वेवं पूर्वोक्तसंख्यां बाधेतेत्यत आह-*तथा-

---

(१) अत्र शक्तं प्रति पक्षान्तरमुक्तं धर्मप्रदीपे-प्रथमेऽहि तृतीये वा पञ्चमे सप्तमे तथा। द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषास्तु दशमेऽहनि॥इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*देशधर्मान्पुरस्कृत्य प्रेतपिण्डान्वपन्त्यपि ॥

इत्युक्त्वा विप्रान्येषु दशमपिण्डोत्कर्ष उक्तः—

देयस्तु दशमः पिण्डो राज्ञां वै द्वादशेऽहनि ।
वैश्यानां वै पञ्चदशे देयस्तु दशमस्तथा ॥
शूद्रस्य दशमः पिण्डो मासे पूर्णेऽह्नि दीयते ॥ इति ।

युद्धमृतादेः सद्यःशौचे त्र्यहादौ च तेनैवोक्तम्—

सद्यःशौचे प्रदातव्याः सर्वेऽपि युगपत्तथा ।
*त्र्यहाशौचे प्रदातव्यः प्रथमेऽह्न्येक एव हि ॥
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि ॥

त्र्यहे *प्रकारान्तरं प्रागुक्तम् । शातातपः—

आशौचस्य च ह्रासेऽपि पिण्डान्दद्याद्दशैव तु ।

तत्रैकपात्रे सकृत्पक्त्वा दश पिण्डान् दद्यात,

*उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये ।
पूर्वदत्ताञ्जलीन्दद्यात्पूर्वपिण्डांस्तथैव च ॥

इति गृह्यकारिकायां पात्रविपर्यये दोषोक्तेः । शि-

चेति । सर्वेषां दशैव पिण्डा इति सिद्धौ चेत्यर्थः । *देशेति । पूर्वोक्तसंख्याया देशविशेषविषयतया न विरोध इति भावः । *महाशौचेति । त्र्यहादाविति पाठे आदिपदेन शूद्रपञ्चाहादि ग्राह्यम् । *प्रकारान्तरम्—

प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः ।
द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा ॥
त्रींस्तु दद्याच्तृतीयेऽह्नि वस्त्रादि क्षालयेत्ततः ।

इति पारस्करोक्तम् । *उत्तरीयेति । आचार्यविपर्ययेऽप्येव-मिति (१)वदतामयमभिप्रायः-आचार्यस्यापि कारयितृत्वेन प्रयो-

---

(१) अन्त्येष्टिपद्धतौ भट्टानामित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लाविपर्यये घटस्फोटादेर्नावृत्तिः । *अत्राभ्यञ्जनादिपदकर्मणः एकहायनीनयनवदप्रयोजकत्वात् । तद्वचात्र लौकिकग्रहणम् । कोचित्तु—

नवान्यादाय भाण्डानि आरुकं चरुकं तथा ।

इति प्रचेतसोक्तेः पात्रानेकत्वमाहुः । *क्रियाकर्तुर्नाशेऽन्येन शेषः समापनीयः,

एवं क्रियाप्रवृत्तानां यदि कश्चिद्विपद्यते ।

तद्बन्धुना क्रिया कार्या सर्वैर्वा सहकारिभिः ॥

इति शुद्धितत्वे बृहस्पतिस्मृतेः । पत्न्याः कर्तृत्वे रजोदर्शने च तदन्ते कुर्यात्, 'शावाद् द्विगुणमार्तवम्' इत्युक्तेः । आशौचान्ते आर्तवे कर्तुरस्वास्थ्ये वाऽन्येन क्रिया सर्वाऽऽवर्तनीया, कर्तुर्विपर्ययात्कालातिक्र-

---

जककर्तृत्वमिति । *अत्रेति । ज्योतिष्टोमे "एकहायन्या क्रीणाति" इति सोमक्रय आम्नातः । सेयमेकहायनी गौर्यदा सोमं क्रेतुमानीयते तदाऽध्वर्युः पृष्ठतोऽनुगच्छन् सप्तमे पदे हिरण्यं निधाय हुत्वा तत्पदगतं रजो गृह्णीयात् गृहीतेन च तेन रजसा हविर्धानयोः शकटयोरक्षमञ्ज्यात् इत्यक्षाञ्जनमपि "यदि हविर्धाने प्राची प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यात्" इत्यभिहितम् । तत्र यथा क्रयः सन्निकृष्टः तथा पदकर्माप्यक्षाञ्जने सन्निकृष्टमिति क्रयवत् पदकर्मापि सोमक्रयण्यानयनस्य प्रयोजनमिति पूर्वपक्षे एकहायन्या सोमं क्रीणातीति तृतीयाश्रुत्या गोः क्रयार्थत्वावगमाद् गोद्वारा तदानयनक्रयार्थमिति क्रय एवानयने प्रयोजकः । ननु पदकर्मार्थत्वं गोर्वा तदानयनस्य वा क्वचिद् ब्रूयते इति न पदकर्मानयनप्रयोजकमिति सिद्धान्तः । तद्वद् घटस्फोटो न शिलानयनस्य प्रयोजकः किन्त्वौर्ध्वदेहिकमित्यर्थः । शुद्धितत्त्वोक्तविपर्ययपदोपादानफलमाह—*क्रियाकर्तुरिति । पित्रोर्दशाहं कुर्वन् यदि पुत्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मायोगाच्च ।

वाराहे—

स्थण्डिले प्रेतभागं तु दद्यात्पूर्वाह्ण एव तु ।
कृत्वा तु पिण्डसंकल्पं नामगोत्रेण सुन्दरि ॥

मरीचिः—

प्रेतपिण्डं बहिर्दद्याद्दर्भमन्त्रविवर्जितम् ।
प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः ॥

दर्भवर्जनमनुपनीतपरम्, 'असंस्कृतानां भूमौ पिण्डं दद्या*त्संस्कृतानां कुशेषु' इति प्रचेतसोक्तेः । मिताक्षरायां स्मृत्यन्तरे— *'भूमौ माल्यं पिण्डं पानीयमुपले वा दद्युः' ।

मृतः पुत्रान्तरं शेषपिण्डं दद्यात् तदसत्त्वे तु तत्पुत्रः प्रत्यहमादौ स्वपितुः पिण्डं दत्त्वा स्नात्वा पितामहस्य शेषपिण्डं दद्यात् अन्यस्याधिकाराभावात् । दत्तकसत्त्वे यथामतं स वा पौत्रो वा शेषपिण्डं दद्यात् । एवमेवान्यस्मिन् कर्त्तरि । न त्वपकृष्य शेषः समापनीय इत्यर्थः । एतच्च दाक्षिणात्या न मन्यन्ते । सपिण्डने पितामहमृतौ दशाहान्तः पितृमृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वं भावयेत् वृत्ते दशाहे नैवमिति स्वयमभिधानस्य मानत्वात् । *संस्कृतानामिति । "संस्तरे दर्भान्" इत्युत्तरब्राह्मं तूपनीतपरमिति भावः । *भूमाविति । सकलस्मृतिपुराणेषु भूमिः कुशास्तीर्णैव "गृहद्वारि तस्मै प्रेताय पिण्डं निर्वपेयुः भूमौ माल्यं पानीयं चोपलिप्तायां दद्युः" इति प्रचेतोवचनाच्चात्रापि उपलिप्तायामिसेव पाठः । केचित्तु भूमावित्यसंस्कृतपरम् । तत्परमेव चोपले इति । पाषणमयदेशे इत्यर्थ इत्याहुः । स्मृत्यन्तरे तु—

भूमौ पिण्डप्रदानं च कर्षूं कृत्वा विधानतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(हा(१)रीतः—

अकृत्तचूडा ये बाला ये च गर्भाद्विनिःसृताः ।
मृता अनुपनीता ये अनूढा अपि कन्यकाः ॥
ये मृताश्चाप्यसंस्कारास्तेभ्यो भूमौ प्रदीयते ।

पैठीनसिः—

शालिनां सक्तुभिर्वापि पिण्याकैर्वापि निर्वपेत् ॥)

शुनःपुच्छः—

*फलमूलैश्च पयसा शाकेन च गुडेन च ।
*तिलमिश्रं तु दर्भेषु पिण्डं दक्षिणतो हरेत् ॥
*तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च ।
शालिनां सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत् ॥
प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकम् ।

मदनरत्ने मात्स्ये—

तैजसं मृन्मयं वाथ पात्रं संशोध्य यत्नतः ।
लौकिकाग्नावधिश्रित्य पचेदन्नं घृतप्लुतम् ॥
स्नात्वाऽथ तिलसंमिश्रं प्रदद्याद्दर्भसंस्तरे ॥

शुद्धितत्त्वे देवजानीये च ब्राह्मे—

प्रथमेऽहनि यो दद्यात्प्रेतायान्नं समाहितः ।
अन्नं नवसु चान्येषु स एव प्रददात्यपि ॥

इत्युक्तम् । प्रादेशमात्रदीर्घश्चतुरङ्गुलविस्तारस्तावदेव निम्नो गर्तः कर्षूः । *फलेति । फलादीनां साक्षादसाधनत्वेऽपि तन्मिश्रितस्य तत्त्वं, परन्तु फलादीनां बहलत्वमावश्यकं गाधान्यात् । *तिलमिश्रमिति सर्वशेषः सर्पिःसेकोऽप्यावश्यकः । क्षीरसेकस्तु सति सम्भवे । प्रथमेऽह्निकरणे त्वग्रेऽप्यावश्यकः । एतेन—

फलमूलगुडक्षीरतिलमिश्रं तु कुत्रचित् ।

इति ब्राह्मं व्याख्यातम् । मधुस्थाने गुड उक्तः । *तूष्णी-

---

(१) कंसान्तर्गतं नास्ति क० छ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृन्मयं भाण्डमादाय नवं स्नातः *सुसंयतः ।
तण्डुलप्रसृतिं तत्र त्रिः प्रक्षाल्य पचेत्स्वयम् ॥
सपवित्रैस्तिलैर्मिश्रं कृमिकेशविवर्जितम् ।
द्वारोपान्ते ततः क्षिप्त्वा शुद्धां वा गौरमृत्तिकाम् ॥
भूपृष्ठे संस्तरे दर्भान् याम्याग्रान्देशसंभवान् ।
ततोऽवनेजनं दद्यात् संस्मरन् गोत्रनामनी ॥
तिलसर्पिर्मधुक्षीरैः संसिक्तं *तसमेवहि ।
दद्यात्प्रेताय पिण्डं तु दक्षिणाभिमुखः स्थितः ।
अर्घ्यैः पुष्पैस्तथा धूपैर्दीपैस्तोयैश्च शीतलैः ।
ऊर्णातन्तुमयैः शुद्धैर्वासोभिः पिण्डमर्चयेत् ॥
दिवसे दिवसे देयः पिण्ड एवं क्रमेण तु ।
सद्यःशौचे प्रदातव्याः सर्वेऽपि युगपत्तथा ॥
त्र्यहाशौचेऽपि दातव्यास्त्रयः पिण्डाः समाहितैः ।
द्वितीये चतुरो दद्यादस्थिसञ्चयनं तथा ॥
त्रींस्तु दद्यात्तृतीयेऽह्नि वस्त्रादि क्षालयेत्ततः ।
दशाहेऽपि च दातव्यः प्रथमे त्वेक एव हि ॥
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकं च दीयते ।

मिति । प्रसेकोऽर्घ्यः । *सुसंयत इति । एतदुत्तरं—

लकुडं सर्वदोषघ्नं गृहीत्वा तोयमानयेत् ।
ततश्चोत्तरपूर्वस्यामग्निं प्रज्वालयेद्दिशि ॥

इत्येतदनन्तरं तण्डुलप्रसृतिमित्यादि । द्विः प्रक्षाल्य पचेदिति पाठः । *तसमिति ।

न याति यावदाकाशं पिडाद्धाष्पमयी शिखा ।
तावत्तत्संमुखं तिष्ठेत् सर्वं तोये क्षिपेत्ततः ।

इति ब्राह्मं च द्रष्टव्यम् । तण्डुलेति मुख्यः कल्पः फलमूलैरित्यादिस्त्वनुकल्पः । शुद्धां वेति वाकार उपान्त्यदेशानियतार्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीये द्वौ तृतीये त्रीन्'

*इत्याद्युक्त्वा—

एवं स्युः पञ्चपञ्चाशत्तोयस्याञ्जलयः क्रमात् ।
तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः ॥इति।

पात्रं कुम्भः । अत्राहःपदमहोरात्रपरम् । तेन रात्रावपि देय इति गौडाः । *दिवसपदाद्रात्रौ नेति मै-

---

"प्रेतपिण्डं बहिर्दद्यात्" इत्युक्तेः ।

ग्रामाद् बहिश्च कर्तव्यं जलाशयसमीपतः ।
पिण्डदानं दशाहानि प्रेतायारण्यमाश्रितैः ॥

इति ब्राह्माच्च । शुनःपुच्छोपि--

द्वारदेशे प्रदातव्यो देवतायतनेषु च । इति ।

गौरमृत्तिकाप्रक्षेपस्तु स्थण्डिलार्थः, "स्थण्डिले" इत्युक्तवाराहात् । मधु क्षौद्रं कलिवर्ज्यमित्याहुः । *इत्याद्युक्त्वेति ।

"चतुर्थे चतुरस्तथा ।
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त चैव हि ।
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ॥

इत्युक्तेत्यर्थः । पञ्चपञ्चाशत्तोयाञ्जलिदानं च पिण्डोपरि, द्वितीयतृतीयादिशब्दैः सन्निहितपिण्डानामेवोक्तेः । पिण्डानामवयवपूरकत्वमुक्त्वा--

एकादशैवेन्द्रियाणि सन्ति बुद्धिवधैः(?) सह ।
सर्वेषामेव भूतानां परलोकसमागमे ॥
प्रेतभावगतानां तु रौरवादिषु वर्तताम् ।
पञ्चभिः पञ्चभिस्त्वेभिः पात्रैरञ्जलिभिस्तथा ॥
एकादशैवेन्द्रियाणि पूर्यन्ते शास्त्रदर्शनात् ।

इति ब्राह्मे सपात्राञ्जलीनामिन्द्रियपूरकत्वाभिधानाच्चापूर्वतोयाञ्जलीनां च तापोपशान्त्यर्थत्वात्। अत्रास्वरसं सूचयन्नाह-*दि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

थिलाः। स एवेत्युक्तेः सपिण्डेन दशापिण्डे प्रक्रान्ते पुत्रागमेऽपि स न दद्यात्, *'असगोत्रः सगोत्रो वा' इति प्रागुक्तेः। *दाहकर्तैव दशाहं कुर्यादिति मिताक्षराया-

---

वसेति। रात्रिमृतौ त्ववयवकरणपिण्डमपवादः। *असगोत्र इति। यः सन्निकृष्टासन्निधानात् प्रथमेऽहनि दद्यात् स मध्ये सन्निकृष्टासन्निधानेऽपि दद्यात् नान्य इत्यर्थः। यत्तु—

स्वगृहे विद्यते पुत्रः पिता ग्रामान्तरे मृतः।
केनापि तत्र चारब्धमग्निपिण्डोदकादिकम्॥
पुत्रः संचयनात् प्राक् चेद् गच्छेदूर्ध्वं स आचरेत्।
स्वगृहे तत्र वा सर्वं प्रेतकार्यं सपिण्डनम्॥

इति मैत्रायणीयपरिशिष्टोक्तेः कथं कर्तृनियम इति? तन्न, तस्य निर्मूलत्वात्। यद्वा कर्ता चेत् पुत्रेण प्रतिषिद्धः सन् दशाहकर्म त्यजति तदा पुत्रो दशाहमावर्तयेत्। पुत्रश्चेद्गच्छेत्तदा सञ्चयनात् प्रागूर्ध्वं च स आचरेदित्यर्थः। सञ्चयनं यदि कृतं तदा पुत्रो न तदाचरेत्, अन्यथा तु तदपि। ननु—

भयस्थानेऽथवा मार्गे मृतस्तत्र च संस्कृतः।
न तिष्ठति जनस्तत्र तत्र पिण्डं च वर्जयेत्॥

इति वाक्यवेद्यदाहास्थिसञ्चयौ संस्कारौ यत्र कृतौ तत्र भयादिना स्थातुमशक्तौ यत्र यत्र प्रेतकार्यकृद्गच्छेत्तत्रैव पिण्डोदकदानादि सपिण्डान्तं कुर्यादित्यापत्तिरितिचेत्? न, दशाहाक्रियादेशस्य दाहास्थिसञ्चयदेशबाधेऽपि भेदाऽयोगात्। यदि पित्रोर्दशाहं कुर्वन् पुत्रो रोगेणान्येन वा केनचित्प्रतिबन्धेन समापयितुमशक्तः तदा तत्पुत्रः पितामहस्य दशाहमावर्तयेत्। तस्य पुत्रान्तरसत्त्वे तु स एव। दत्तकसत्त्वे यथामतं स वा पौत्रो वा। मातुः पक्षिणीमध्ये मातृक्रिया कार्या, द्व्यहत्र्यहवृद्धौ त्र्यहाशौचवत्। *दाहकर्तैवेति। पुत्राद्यसन्निधानेऽन्येन दाहे कृते प्रथमपिण्डो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म् । शुद्धितत्त्वे वायवीयेऽपि—

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।
यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात् स एव हि ॥ इति ।

तत्रैव—

*पूरकेण तु पिण्डेन देहो निष्पद्यते यतः ।
कृतस्य करणायोगात् पुनर्नावर्तयेत् क्रियाम् ॥

शुद्धिप्रकाशे वायवीयेऽपि—

निवर्तयति यो मोहात् क्रियामन्यनिवर्तिताम् ।
विधिघ्नस्तेन भवति पितृहा चोपजायते ॥
तस्मात् प्रेतक्रिया येन केनापि च कृता यदि ।
न तां निवर्तयेत्प्राज्ञः सतां धर्ममनुस्मरन् ॥ इति ।

आदिपुराणे—

पितृशब्दं स्वधां चैव न प्रयुञ्जीत कर्हिचित् ।
*अनुशब्दं तथा चेह प्रयत्नेन विवर्जयेत् ॥
उपतिष्ठतामयं पिण्डः प्रेतायेति समुच्चरेत् ।

क्रियानिबन्धे व्यासः—

प्रेताय पिण्डं दत्त्वा तु ततोऽश्नीयाद्दिनात्यये ॥

भविष्ये—

ओदनामिषसक्तूनां शाकमूलफलादिषु ।
प्रथमेऽहनि यद्दद्यात्तद्दद्यादुत्तरेऽहनि ॥
गृहद्वारे श्मशाने वा तीर्थे देवगृहेपि वा ।
यत्राद्ये दीयते पिण्डस्तत्र सर्वं (१)समाचरेत् ॥

प्रक्रमात्पूर्वं पित्राद्यागमनेऽपि दाहकर्तृभिन्नतया निषेधात्कथञ्चिद्-ग्धुर्विपर्यासे क्रियामात्रावृत्तिर्वाचनिकत्वात् । *पूरकेण त्विति । आद्यपिण्डानन्तरं पुत्राद्यागमे देहस्य प्रारब्धत्वात्तन्निष्पत्तावेव यते-

---

(१) 'समापयेत्' ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मे—

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।
द्वितीयेन तु कर्णाक्षिनासिकाश्च समासतः ॥
गलांसभुजवक्षांसि तृतीयेन यथाक्रमम् ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
जानू जङ्घे तथा पादौ पञ्चमेन तु सर्वदा ।
सर्वमर्माणि षष्ठेन सप्तमेन तु नाडयः ॥
दन्तलोमान्यष्टमेन वीर्यं तु नवमेन च ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥ इति ।

याज्ञवल्क्येन तु—

*पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् ।

इत्युक्तम् । अत्र फलतारतम्यं ज्ञेयमिति विज्ञानेश्वरः । तेन त्र्यहाशौचपरत्वं देवयाज्ञिकोक्तं चिन्त्यम् ।

आशौचस्य च ह्रासेपि पिण्डान्दद्याद्दशैव तु ।

इति वचनाच्च । दिनत्रयावश्यकत्वार्थमिति हारलतादयः ।

शातातपः—

जलमेकाह*माकाशे स्थाप्यं क्षीरं च मृन्मये ।

पारस्करः—"मृन्मये तां रात्रिं क्षीरोदके विहायसि

तेत्यर्थः । *अनुशब्दं ये च त्वामत्रान्विति । *पिण्डयज्ञावृतेति । पितृयज्ञवत् आवृत् अनुष्ठानप्रकारः तया प्राचीनावीतित्वादिना दिनत्रयं प्रेतायान्नं क्षितौ दद्यादित्यर्थः । पितृयज्ञप्रकारोक्तावपि स्वधाशब्दादिनिषेधः पूर्वोक्तः । *आकाश इति । शिक्यादौ द्रव्यद्वयविधानसामर्थ्याद्द्वयोः शरावयोर्भेदेन विधानम् । 'मृन्मये' इति एकवचनादेकत्रैवोभयविधानमिति तु न युक्तम्,

पृथक्शरावयोर्दद्यादेकाहं क्षीरमम्बु च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निदध्युः, *प्रेतात्र स्नाहीत्युदकं, पिब चेदमिति क्षीरम्" । इदं रात्रावेवेति गौडाः । गारुडे तु—

अपक्के मृन्मये पात्रे दुग्धं दद्याद्दिनत्रयम् ।

इत्युक्तम् । हेमाद्रौ पाद्मे तु दशाहमुक्तम्—

*तस्मान्निधेयमाकाशे दशरात्रं पयो जलम् ।
सर्वतापोपशान्त्यर्थमध्वश्रमविनाशनम् ॥

देवजानीये कारिकायाम्—

तत्र प्रेतोपकृतये दशरात्रमखण्डितम् ।
कुर्यात्प्रदीपं तैलेन वारिपात्रं च मार्तिकम् ॥
भोज्याद्भोजनकाले तु भक्तमुष्टिं च निर्वपेत् ।
नामगोत्रेण सम्बुद्ध्या धरित्र्यां पितृयज्ञवत् ॥

शातातपः—

भूलोकात्प्रेतलोकं तु गन्तुं श्राद्धं समाचरेत् ।
तत्पाथेयं हि भवति मृतस्य मनुजस्य तु ॥

अथ दशाहमध्ये दर्शपाते निर्णयः । भविष्ये—

प्रवृताशौचतन्त्रस्तु यदि दर्शं प्रपद्यते ।
समाप्य चोदकं पिण्डान् *स्नानमात्रं समाचरेत् ॥

ऋष्यशृङ्गः—

आशौचमन्तरा दर्शो यदि स्यात्सर्ववर्णिनाम् ।
समाप्तिं प्रेततन्त्रस्य कुर्यादित्याह गौतमः ॥

पैठीनसिः—

आद्येन्दावेव कर्तव्या प्रेतपिण्डोदकक्रिया ।
द्विरैन्दवे तु कुर्वाणः पुनः शावं समश्नुते ॥

इति गारुडात् । निधानभेदेन मन्त्रभेदमप्याह-*प्रेतात्रेति । *तस्मादिति ।

तस्मात्प्रेतपुरं प्रेतो द्वादशेऽहनि नीयते ।
गृहं पुत्रकलत्रं च द्वादशाहं स पश्यति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातापित्रोस्तु श्लोकगौतमः—

अन्तर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत् ।
पित्रोस्तु यावदाशौचं दद्यात्पिण्डान् जलाञ्जलीन् ॥

इदमपि त्र्यहमध्ये दर्शपाते । तदूर्ध्वं दर्शे तु पित्रोरपि तन्त्रं समाप्यमेव,

पित्रोराशौचमध्ये तु यदि दर्शः समापतेत् ।
तावदेवोत्तरं तन्त्रं पर्यवस्येत् त्र्यहात्परम् ॥

इति गालवोक्तेः । अन्येषां तु त्र्यहमध्येपि समाप्तिरिति पराशरमाधवीये निर्णयामृते चोक्तम् । कालादर्शेपि—

दर्शो दशाहमध्ये स्यादूर्ध्वं तन्त्रं समापयेत् ।
त्रिरात्रादुत्तरं पित्रोर्मृताविति विनिश्चयः ॥

मदनपारिजाते तु गालवीयमा*पदनौरसपुत्रादिविषयम् । 'त्र्यहोर्ध्वमपि पित्रोर्न तन्त्रसमाप्तिः' इत्युक्तम् । मदनरत्नेप्येवम् । *मम तु देशाचाराद्व्यवस्थेति प्रतिभाति ।

अथास्थिसंचयः । तत्राश्वलायनेन च कृष्णपक्षे *एकादशीत्रयोदशीदर्शेषु *आषाढाफल्गुनीप्रोष्ठपदाभिन्नर्क्षे उक्तम्, तदाशौचमध्येऽसंभवे तदूर्ध्वं च प्राग-

---

इति पूर्वश्लोकः । *स्नानमात्रं प्राक्पादिकं । *आपादिति । अत्र गौतमीयस्यापदनौरसपुत्रादिपरतया च वैपरीत्यमपि सुवचमित्यस्वरसः । *मम त्विति । इदमापाततः, अत्रोर्ध्वपित्रोस्तन्त्रसमाप्तौ धार्मिकाणां माधवादिनां प्रामाण्यात् ।

"सञ्चयनमूर्ध्वं दशम्याः कृष्णपक्षस्यायुजास्वेके" इत्यस्य "नक्षत्रे" इत्यस्य कृष्णपक्षसम्बन्धिदशम्युत्तरास्वित्यर्थं दर्शयति—*एकादशीति । एकनक्षत्रे इत्यस्यार्थमाह—*आषाढेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्दा*त्करणे ज्ञेयम् । आशौचमध्ये तु मदनरत्ने संवर्तः—

*प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा ।
अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सह ॥

छन्दोगपरिशिष्टे तु--

अपरेद्युस्तृतीये वा अस्थिसंचयनं भवेत् ।

इति द्वितीयेप्युक्तम् । विष्णुकात्यायनौ-'संचयनं चतुर्थ्याम्' इति । माधवीये यमः--

भौमार्कमन्दवारेषु तिथियुग्मे विवर्जयेत् ।
वर्जयेदेकपादर्क्षे द्विपादर्क्षेऽस्थिसंचयम् ॥
प्रदातृजन्मनक्षत्रे त्रिपादर्क्षे विशेषतः ।

ब्राह्मे--

चतुर्थे ब्राह्मणानां तु पञ्चमेऽहनि भूभृताम् ।
नवमे वैश्यजातीनां शूद्राणां दशमात्परम् ॥

दशमेऽहनीति वा पाठः । शौनकः--

पलाशेष्वस्थिदाहे च सद्यःसंचयनं भवेत् ॥

---

*करणे । सपिण्डीकरणे । *प्रथमेन्हीति ।

अनग्निमत उत्क्राते साग्नेः संस्कारकर्मणः ॥
शुद्धिः सञ्चयनं दाहान्मृताहस्तु यथाविधि ।

इत्याङ्गिरसा दिनं गणितम् । वर्णविशेषेण कालव्यवस्थापक्षमाह ब्राह्मे—

क्वचित्तृतीये विप्रस्य चतुर्थे क्षत्रियस्य च ।
पञ्चमे वैश्यजातेश्च शूद्रस्य दशमेऽहनि ॥
अस्थ्नां च सञ्चयः प्रेते क्रियते देशगौरवात् ॥ इति ।

अत्र—

चतुर्थे ब्राह्मणां तु पञ्चमेऽहनि भूभृताम् ।
नवमे वैश्यजातीनां शूद्राणां दशमात् परम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काम्यमरणे तु--

तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः ।

इत्युक्तम् । अङ्गिराः--

*प्रेतीभूतं तथोद्दिश्य यः शुचिर्न करोति चेत् ।

देवतानां तु यजनं तं शपन्त्यथ *देवताः ॥

तद्विधिः स्वस्वसूत्रे भट्टकृतौ च ज्ञेयः ।

हेमाद्रौ नागरखण्डे--

त्रीणि सञ्चयनस्यार्थे तानि वै शृणु साम्प्रतम् ।

यत्र स्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत् ॥

एकोद्दिष्टं ततो मार्गे विश्रामो यत्र कारितः ।

ततः संचयनस्यार्थे तृतीयं श्राद्धमिष्यते ॥

अपरार्के मदनरत्ने च ब्राह्मे--

सद्यःशौचे तथैकाहे सद्यःसंचयनं भवेत् ।

त्र्यहाशौचे तृतीयेऽह्नि कर्तव्यस्त्वस्थिसञ्चयः ॥

*तत्रैव—

*श्मशानदेवतायागं चतुर्थे दिवसे चरेत् ।

मृन्मयेषु च भाण्डेषु कुम्भेषु रुचकेषु वा ॥

सुपक्वैर्भक्ष्यभोज्यैश्च पायसैः पानकैस्तथा ।

फलैर्मूलैर्वनोत्थैश्च पूज्याः कव्याददेवताः ॥

इति तु प्रमादपाठ इत्यग्रे स्फुटम् । द्वादशाहे सपिण्डने आशौचमध्य एव सञ्चयनं, "तदुत्तरं श्राद्धं चास्मै दद्युः" इत्येकोद्दिष्टविधानात् सपिंडनानन्तरं तन्निषेधात् । *प्रेतीभूतामिति ।

अस्थिसञ्चयने यागो देवानां परिकीर्तितः ।

इति पूर्वार्द्धम् । यागः पूजा । *देवता इति ।

श्मशानवासिनो देवाः शवानां परिकीर्तिताः ।

इत्युत्तरार्द्धम् । श्मशानदेवतापूजाप्रकारमाह-*तत्रैवेति *श्मशानेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धूपो दीपस्तथा माल्यमर्घ्यं देयं त्वरान्वितैः।
तत्र पात्राणि पूर्णानि श्मशानाग्नेः *समन्ततः॥
निवेदयद्भिर्वक्तव्यं तैः सर्वैरनहंकृतैः।
नमः क्रव्यादमुख्येभ्यो देवेभ्य इति सर्वदा॥
येऽत्र श्मशाने देवाः स्युर्भगवन्तः सनातनाः।
तेऽस्मत्सकाशाद्गृह्णन्तु बलिमष्टाङ्गमक्षयम्॥
प्रेतस्यास्य शुभान् लोकान् प्रयच्छन्तु च शाश्वतान्।
अस्माकमायुरारोग्यं सुखं च ददतां चिरम्॥
एवं कृत्वा बलीन्सर्वान्क्षीरणाभ्युक्ष्य *वाग्यतैः।
एवं दत्वा बलिं चैव दद्यात्पिण्डत्रयं बुधः॥
एकं श्मशानवासिभ्यः प्रेतायैव तु मध्यमम्।
तृतीयं तत्सखिभ्यश्च दक्षिणासंस्थमादरात्।
ततो याज्ञियवृक्षोत्थां शाखामादाय *वाग्यतः।
प्रेतस्यास्थीनि गृह्णाति प्रधानाङ्गोद्भवानि च॥

स्नात्वा त्रिरात्रं कुर्वन्ति प्रेतायोदकतर्पणम्।
इति पूर्वार्द्धम्। *समन्तत इति।

कैश्चिद्देयानि सर्वाणि पानीयान्यक्षतानि च।

इत्युत्तरार्धम्। धूपैः इत्यारभ्य प्रत्येकं कैश्चिदित्यस्यान्वयादार्थक्रमेणार्थो युक्तः। पुष्पाणि मालाः धूपो दीपः तण्डुलादिपूर्णपात्राणि केषुचित्पात्रेषु प्रणीयानि यवाद्यक्षताश्चेति पूजाङ्गानि भिन्नभिन्नपुरुषैः खलेकपोतन्यायेन दातव्यानि। अत एव त्वरान्वितैः निवेदयद्भिरिति बहुत्वम्। भक्षभोज्यपायसपानकफलमूलात्मको बलिः, प्रधानभक्ष्यादीनां पूजाकरणत्वोक्तेः। *वाग्यतैरिति।

विसर्जनं च देवानां कर्तव्यं च समाहितैः।

इत्युत्तरार्धम्। *वाग्यत इति॥

अपसव्यं क्रमाद्वस्त्रं कृत्वा काश्चित्सगोत्रजः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*शिरसो वक्षसः पाण्योः पार्श्वाभ्यां चैव पादतः।
पञ्चगव्येन संस्नाप्य क्षौमवस्त्रेण वेष्ट्य च ॥
प्रक्षिप्य मृन्मये भाण्डे नवे साच्छादने शुभे।
अरण्ये वृक्षमूले वा शुद्धे संस्थापयत्यपि ॥
गृहीत्वाऽस्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत्।
ततः संमार्जनं भूमेः कर्तव्यं गोमयाम्बुभिः।
पूजां च पुष्पधूपाद्यैर्बलिभिः पूर्ववत्क्रमात् ॥ इति।

अथ तीर्थेऽस्थिक्षेपविधिः। तत्रैव—

*तत्स्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले।
कश्चित्क्षिपति सत्पुत्रो दौहित्रो वा सहोदरः ॥
मातृकुलं पितृकुलं वर्जयित्वा *नराधमः।
अस्थीन्यन्यकुलस्थस्य नीत्वा चान्द्रायणं चरेत् ॥

तत्रैव ब्रह्माण्डपुराणे—

अस्थीनि मातापितृपूर्वजानां नयन्ति गङ्गामपि ये कथंचित्
सद्बान्धवस्यापि दयाभिभूतास्तेषां तु तीर्थानि फलप्रदानि
*स्नात्वा ततः पञ्चगव्येन सिक्त्वा

इत्युत्तरार्धम्। प्रधानाङ्गान्याह—*शिरस इति।

अप्रदक्षिणमस्थीनि गृण्हातीत्यादिगोभिलः।

इत्युत्तरार्धम्। गर्ते इति पाठः। तोये इति पाठे वर्षाकालादन्यत्रेति बोध्यम्।

भूमेराच्छादनार्थं च वृक्षः पुष्करकोऽपि वा।
पादिको वा प्रकर्तव्यः तत्र सर्वैर्विधानतः ॥

इति ग्रन्थातरे। पुष्करः पुष्करिणी। पादिकः चत्वरः संचितास्थिप्रतिपत्तिमाह—*तत्स्थानादिति। वैधानिखातस्थानादित्यर्थः। *नराधम इति। भृतिग्रहणे। अत एव सद्बान्धवस्यापीति अपिना तादितरस्यापि समुच्चयात्। सत्त्वं चेह स्वाचारस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हिरण्यमध्वाज्यतिलैश्च योज्य ।
ततस्तु मृत्पिण्डपुटे निधाय
पश्यन् दिशं प्रेतगणोपरूढाम् ॥
नमोस्तु धर्माय वदेत्प्रविश्य
जलं स मे प्रीत इति क्षिपेच्च ।
*उत्थाय भास्वन्तमवेक्ष्य सूर्यं
स दक्षिणां विप्रमुखाय दद्यात् ॥
एवं कृते प्रेतपुरःस्थितस्य ।
*स्वर्गे गतिः स्यात्तु महेन्द्रतुल्या ॥

यमः—

गङ्गातोयेषु यस्यास्थि क्षिप्यते शुभकर्मणः ।
न तस्य पुनरावृत्ति*र्ब्रह्मलोकात्सनातनात् ॥

तथा—

*अस्तं गते गुरौ शुक्रे तथा मासे मलिम्लुचे ।
गङ्गायामस्थिनिक्षेपं न कुर्यादिति गौतमः ॥

लित्वमबान्धवेऽपि । *स्नात्वेति । तीर्थपात्रप्रक्षेपे । *उत्थायेति ।
स्नात्वा तथोत्तीर्य दिवाकरं च दृष्ट्वा प्रदद्यादथ दक्षिणं तु ।
इति सेतुः । *स्वर्गे इति । अन्यत्रापि—
यस्मिन् काले नृणामस्थि गङ्गायां क्षिप्यते नृभिः ।
तं कालमादितः कृत्वा स्वर्गलोके भवेत् स्थितिः ॥ इति ॥
अत्रोत्तरावध्यसत्त्वात्कल्पांतोऽवधिः । *ब्रह्मेति । प्रयागादि-
क्षेत्रविशेषे ब्रह्मलोकः अन्यथा स्वर्गः ।
भविष्ये—
कावेरी तुङ्गभद्रा च कृष्णवेणी च गौतमी ।
जान्हवी चेति विख्याताः पञ्च गङ्गाः प्रकीर्तिताः ॥
इत्युक्तम् । *अस्तं गते इति । प्रथमाब्दे न निषेध इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*दशाहान्तर्न दोषः,

दशाहाभ्यन्तरे यस्य गङ्गातोयेऽस्थि मज्जति ।
गङ्गायां मरणे यादृक् तादृक् फलमवाप्नुयात् ॥

इति मदनरत्ने वृद्धमनूक्तेः ।

शौनकः—

शौनकोऽहं प्रवक्ष्यामि अस्थिक्षेपविधिं क्रमात् ।
आदौ ग्रामाद्बहिर्गत्वा स्नानं कुर्यात्सचैलकम् ॥
प्रोक्षयेत्पञ्चगव्येन भुवं मन्त्रैर्विचक्षणः ।

*गायत्र्याद्यैः पञ्चगव्यमन्त्रैर्निखातास्थिभूमिं प्रोक्षेदित्यर्थः

उपसर्पादिभिर्मन्त्रैः प्रार्थनं खननं तथा ।
मृत्तिकोद्धरणं चास्थ्नां ग्रहणं च यथाक्रमम् ।

उपसर्पेति चतुर्भिर्मन्त्रैः क्रमेण प्रार्थनादि ज्ञेयम् ।

*स्नात्वाऽस्थिशुद्धिं कुर्वीत *एतोन्विन्द्रेति सूक्ततः
स्पृष्ट्वा स्पृष्ट्वा ततः स्नानं पञ्चगव्येन शुध्यति ॥
*दश स्नानानि कुर्वीत *तत्तन्मन्त्रैर्विचक्षणः ।

वक्ष्यति । *दशाहान्त इति गङ्गारहितग्राममृतस्य तु गङ्गातो दाहसम्भवे तत्र शवो नेयः । तदनयने तु पिण्डदानादिकमारभ्य प्रक्षेपः । दशाहमध्ये गङ्गाप्राप्त्यसंभवे तु सपिण्डनोत्तरमेव, आ व्यग्रेतकर्मणो देशैक्यनियमात् । द्वादशाहोत्तरसपिण्डने त्वेकादशा होत्तरमपि । *गायत्र्याद्यैरिति । आदिना गन्धद्वाराम् आप्या वस्व दधिक्राव्णः घृतं मिमि इति ग्रहः । गोमूत्रगोमयपयोदधिघृ र्पींषि पञ्चगव्यम् । सेतौ तु पयोदधिगोमूत्रगोमयसर्पींषि तत्तन्मन्त्रैरुक्तानि । *स्नात्वेति । जलाशयेऽस्थिसाहित इत्यादिः ।

ततो जलाशयं गत्वा स्नानं कुर्याद्यथाविधि ।

इति सेतौ वचनात् । *एतोन्विति । एतोन्विन्द्रेति सूक्तं स्पृष्ट्वा पञ्चगव्येन स्पृष्ट्वा प्रक्षाल्य शुध्यति ततः शुद्धोदकेन स्नायेदित्यर्थः । *दशेति । सास्थिरित्यादि । *तत्तन्मन्त्रैः । ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
भस्म मृन्मधु वारीणि मन्त्रतस्तानि वै दश ॥
कुशैः संमार्जयेदस्थीन्यतोदेवेति मन्त्रतः ।
*एतोन्विन्द्रं शुचीवेति नतमंह इतीति च ॥
पावमानीर्ममाग्ने च रुद्रसूक्तं यथाक्रमम् ॥
*एतैः कुशैर्मार्जनम् ।
हेमश्राद्धं ततः कुर्या*त्पितॄनुद्दिश्य यत्नतः ।
पिण्डदानं प्रकुर्वीत ततश्च तिलतर्पणम् ॥
अस्थिक्षेपाङ्गं चेदम् ।
*अजिनं कम्बला दर्भा गोकेशाः शाण एव च ।

यत्या गोमूत्रम् , गन्धद्वारामिति गोमयम् , आप्यायस्वेति पयः दधिक्राव्ण इति दधि, घृतं मिमिक्षे इति घृतम्, आपोहिष्ठेति कुशोदकम् । देवस्य त्वेति केचित् । मानस्तोके इति भस्म, "बाळित्था पर्वतानाम्" इति अश्वक्रांते इति इत्यादिभिर्वा मृत्, मधुवातेति मधु आपोहिष्ठेति कुशोदकम् । *एतोन्विन्द्रमिति । एतोन्विन्द्रमिति तृचं शुचीवोहव्येति तृचं नतमंह इति अष्टर्चम् "इति मे मन" इति त्रयोदशर्चं यदन्ति यच्चेति तृचं ममाग्ने वर्च इति नवर्चं कद्रुद्रायेति नवर्चं च सूक्तम् । मन्त्रत इति विशेषोक्त्याऽतोदेवेत्यत्रैव सूक्तसम्बन्धाभावात् । *एतैरिति । प्रतिमन्त्र इति यावत् । *पितॄनिति । यदस्थीनि तद्दैवत्यम् । कृते सापिण्डने पार्वणं पुरूरवार्द्रवौ विश्वेदेवाः । सक्तुभिः तण्डुलेन वाऽग्नौकरणं, सक्तुभिः पायसेन वा पिण्डदानम् । अकृते सपिण्डने त्वेकोद्दिष्टम् । नमो वः पितर इति मन्त्रे इषेपदस्थाने हेम्ने इत्यूहः । स्मृत्युक्तप्रकारे तु "उशन्तस्त्वा" इत्यादिमन्त्रेष्वपि ऊहः । श्राद्धांते यद्दैवत्यं श्राद्धं तद्दैवत्यं तिलतर्पणम् । यक्षकर्दमादिलेपः पुष्पैः पूजा च । *अजिनमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूर्जपत्रं ताडपत्रं सप्तधा वेष्टनं स्मृतम् ॥
हेमं च मौक्तिकं रौप्यं प्रवालं नीलकं तथा ।
निक्षिपेदस्थिमध्ये तु शुद्धिर्भवति नान्यथा ॥
ततो होमं प्रकुर्वीत तिलाज्येन विचक्षणः ।
*उदीरतेति सूक्तेन हुनेदष्टोत्तरं शतम् ॥
ततो गत्वा क्षिपेत्तीर्थे स्पर्शदोषो न विद्यते ।
मूत्रं पुरीषाचमनं कुर्वन्नास्थीनि धारयेत् ॥
अत्र दशदानं वैतरणीऋणमोक्षपापधेनुदानमुक्तम् । दिवोदासीये काशीखण्डे—
धनञ्जयोऽपि धर्मात्मा मातृभक्तिपरायणः ।
आदायास्थीन्यथो मातुर्गङ्गामार्गस्थितोऽभवत् ॥

अजिनं कम्बला दर्भा गोकेशा भूर्जपत्रकम् ।
ताडपत्रं च नेत्रं चेत्यस्थ्नां वेष्टनसप्तकम् ॥
इति पाठान्तरम् । *उदीरतेति । सूक्तग्रहणात्सूक्तस्याष्टोत्तरशतमावृत्तयः । एकमन्त्राणि कर्माणीति न्यायेन ऋगन्त एव होमः । होमसंख्याबाहुल्येऽपि यावद्वचनन्यायाददोष इत्येके । चतुर्दशऋगात्मकमुदीरतेति सूक्तं तस्य ऋगन्ते होमात्सप्तावृत्त्याऽष्टनवतिहोमान् संपाद्य पुनरुदितिमन्त्रैर्दशभिर्हुत्वाऽष्टोत्तरसंख्यापूर्तिः अवशिष्टमन्त्रचतुष्टयत्यागः । अत एवाग्निमुखं कृत्वा शताष्टकृत्व इति बौधायनसूत्रे शतंचाष्टचेति अष्टोत्तरशतं तत्पूरणाय षडर्चसूत्रस्याष्टादशावृत्तयः कार्याः । एवं चाश्विनं कपालमित्यादौ अतिदेशप्राप्तानां कपालोपधानमन्त्राणां बहुत्वेऽपि आद्यद्वितीयमन्त्राभ्यां कपाले उपधाय शेषमन्त्रलोपवदिति कौस्तुभे इत्यन्ये । होमशेषं समाप्य ताम्रसंपुटेऽस्थीनि निदध्यात् । ततः चण्डालपतितव्रात्योक्तशौचाचमने कृत्वा तानि गृह्णीयात् । ततस्तीर्थे सास्थि स्नात्वा पलाशपत्रपुटेऽस्थीनि निधाय अमुकगोत्रस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चगव्येन संस्नाप्य तथा पञ्चामृतेन वै ।
यक्षकर्दमलेपेन लिप्त्वा पुष्पैः प्रपूज्य च ॥
आवेष्टय (१)तत्र वस्त्रेण ततः पट्टाम्बरेण च ।
ततः सुरसवस्त्रेण ततो माञ्जिष्ठवाससा ॥
नेपालकम्बलेनाथ मृदा चाथ विशुद्धया ।
ताम्रसंपुटके कृत्वा मातुरङ्गान्यथो वहत् ॥

व्यासः—

पट्टवस्त्रं च कौशेयं माञ्जिष्ठं श्वेतवस्त्रकम् ।
कम्बलं शाणपट्टं च अजिनं च तथोत्तरम् ॥

*एषां विकल्पः । अन्यश्चात्र विशेषस्त्रिस्थलीसेतौ दिवोदासीये च ज्ञेयः । संचयनोत्तरं श्राद्धमाहाश्वलायनः—'श्राद्धमस्मै दद्युः' इति । स्मृत्यर्थसा-

मुकशर्मणोऽपुनरावृत्तिब्रह्मलोकावाप्तये गङ्गायां मोक्षप्राप्तये तीर्थान्तरे अस्थिनिक्षेपं करिष्ये इति सङ्कल्प्यास्थीनि तूष्णीं पञ्चगव्येन प्रक्षाल्य शुद्धोदकेन स्नापयित्वा हिरण्यशकलमधुघृततिलैर्मिश्रीकृत्य मृत्पेटिकायां संस्थाप्य दक्षिणतोऽवेक्ष्यमाणो नाभिमात्रजलस्थो नमोस्तु धर्मराजाय स मे प्रीतोस्त्विति मन्त्रेण निक्षिप्य जलाद्बहिरागत्य सूर्यं दृष्ट्वा नत्वा च हरिं स्मृत्वा यज्ञोपवीती अमुकगोत्रशर्मणः कृतास्थिनिक्षेपस्य साद्गुण्यायेदं रजतं पितृदैवत्यं चन्द्रदैवत्यं सम्प्रददे इति यथाशक्ति दक्षिणां ब्राह्मणाय दद्यात् । पितृकृत्यत्वाद्रजतम् । अस्थिग्रहणादि प्रक्षेपान्तं दक्षिणावर्तं प्राचीनावीती कुर्यात् । *एषामिति । वेष्टनसाधनानां वेष्टनक्रमाणां चेत्यर्थः । तीर्थमात्रेऽयं विधिः, प्रयागे तु अत्यावश्यकः । अस्थिक्षेपोत्तरमेव तीर्थविधिरिति दिवोदासः । अन्ये तु तीर्थकृत्यानन्तरमस्थिक्षेपः, तीर्थश्राद्धादौ विलम्बनिषेधात् 'आगन्तू-

(१) 'नेत्रवस्त्रेण' ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रे—'संचयने कृते म(१)नुष्यलोकात्प्रेतलोकं गच्छतः पाथेयश्राद्धमामेन कार्यमिति । अनुपनीतस्य न संचयनम्' ।

अथ नवश्राद्धम् । पृथ्वीचन्द्रोदयेऽङ्गिराः—

प्रथमेऽह्नि तृतीये च पञ्चमे सप्तमे तथा ।
नवमैकादशे चैव तन्नवश्राद्धमुच्यते ॥

शिवस्वामी—

नवश्राद्धानि पञ्चाहुराश्वलायनशाखिनः ।
आपस्तम्बाः षडित्याहु*र्विभाषा त्वितरेषु हि ॥

पञ्च एकादशाहिकं विना, *'मरणाद्विषमेषु दिनेष्वेकैकं नवश्राद्धं कुर्यादानवमात्, यदि नवमं विच्छिद्येतैकादशे तत्कुर्यात् ।' इति मदनरत्ने बौधायनोक्तेः । भविष्ये—

नव सप्त विशां राज्ञां नवश्राद्धान्यनुक्रमात् ।
आद्यन्तयोर्वर्णयोस्तु षडित्याहुर्महर्षयः ॥

हेमाद्रौ वृद्धवसिष्ठः—

*अलब्ध्वा तु नवश्राद्धं प्रेतत्वान्नैव मुच्यते ।

नामन्ते निवेशः' इति न्यायाच्चेत्याहुः । वस्तुतस्तु अस्थिप्रक्षेपफलोद्देशेन चेद्गतः तेनादौ स एव कार्यः, उद्देश्यकृतश्राद्धादिविलम्बस्य तच्छ्राद्धेनाभ्यनुज्ञातत्वात् : अत्र तीर्थनिमित्तकक्षौरादिकृत्यान्यपि पश्चादेव । यस्तु तीर्थफलोद्देशेन गच्छन् अनुषङ्गादस्थीनि नयति स सकलतीर्थकृत्यानन्तरं तानि निक्षिपेदिति मयूखे । संक्षिप्तोऽस्थिनिक्षेपप्रयोगस्तत्रैव द्रष्टव्यः । *विभाषा त्वितरेषु हीति । विभाषामैतरेयिण इति रघुनाथपाठः । *मरणादिति । नवश्राद्धानि पञ्च । नवमदिनकर्तव्यं तु तत्रासम्भवे एकादशे

---

(१) 'मनुष्यलोकं गच्छतः' क० घ० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्वाक् तु द्वादशाहस्य लब्ध्वा तरति दुष्कृतम् ॥

अतः षडेव। एतान्येव विषमश्राद्धानीत्युच्यन्ते। नागरखण्डे तु—

*पञ्चमे सप्तमे तद्वदष्टमे नवमे तथा।
दशमैकादशे चैव नवश्राद्धानि तानि च ॥

इत्युक्तम्। कात्यायनस्तु—

चतुर्थे पञ्चमे चैव नवमैकादशे तथा।
यदत्र दीयते जन्तोस्तन्नवश्राद्धमुच्यते ॥

प्रथमे सप्तमे चैवेत्याद्यपादे व्यासपाठः। बह्वृचानां तु—

*नवश्राद्धं दशाहानि नवमिश्रं तु षड्ऋतून्।

ऽन्हि कार्यमित्यर्थः। नवश्राद्धानां प्रेतत्वनिवर्तकतामाह-*अलब्ध्वेति। षट् पञ्च वा नवश्राद्धानि। अनयोः पक्षयोर्व्यवस्था च शिवस्वाम्युक्तैवेत्यन्ये। *पञ्चमे इति। त्रीणि सञ्चयनस्यार्थे इत्यादि प्रागुक्तश्राद्धत्रयसाहित्यमिह विवक्षितम्। तथाच नवत्वसंख्यालाभः। चतुर्थाहनवश्राद्धे त्वन्यदपि देयम्,

चतुर्थेऽहनि विप्रेभ्यो देयमन्नं हि बान्धवैः।
गावः सुवर्णं वित्तं च प्रेतमुद्दिश्य शक्तितः ॥
(?)यदीनृङ्गीवतश्चासीन्न दद्यात्तस्य यत्नतः।

इति बृहस्पत्युक्तेः। क्षत्रियादिभिस्तु पञ्चमादिषु,

चतुर्थे ब्राह्मणानां च पञ्चमेऽहनि भूभुजाम्।
नवमे वैश्यजातीनां शूद्राणां दशमात्परे।

इति ब्रह्माण्डात्। शय्यादिकं त्वेकादशाह एव। आत्रिणा त्वेकमेवोक्तम्—

नवश्राद्धानिमित्तं तु एकमेकादशेऽहनि। इति।

*नवश्राद्धमिति। नवश्राद्धं नवनवमिश्रपुराणभेदात्त्रिधा। प्रथमाद्येकादशाहान्तं नवम्। षड्ऋतूनमासिकानि न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्तं नारायणवृत्तौ । दीपिकायाम्—'अथ तनुयादाद्ये चतुर्थे दिने श्राद्धं पञ्चमसप्तमाष्टनवदिग्रुद्रेषु *युग्मद्विजैः' ।

*प्रथमेह्नि तृतीयेऽह्नि पञ्चसप्तनवस्वपि ।
द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषेष्वेकं तु विन्यसेत् ॥

एको विषमश्राद्धेऽवयवपिण्डश्चैक इति द्वावित्यर्थः ।

वमिश्रम् । 'षडुत्तरम्' इति पाठे नवश्राद्धानामुत्तरत्र उपरि कर्तव्यमित्यर्थः ।

अतः परं पुराणं च त्रिविधं श्राद्धमुच्यते ।

इत्युत्तरात्पत्याब्दिकात्तृतीयमित्यर्थः । संज्ञाकरणं "चान्द्रायणं नवश्राद्धे" इत्यादिप्रायश्चित्तविशेषविधानार्थम् । *युग्मद्विजैरिति । यद्यपि नवश्राद्धानाम्—

नव श्राद्धानि कुर्वीत प्रेतोद्देशेन यत्नतः ।
एकोद्दिष्टविधानेन नान्यथा तु कदाचन ॥

इति ब्रह्माण्डपुराणात्सपिण्डनप्राग्भावित्वाच्चैकोद्दिष्टत्वं, तथापि—

पञ्चमे नवमे चैव तथैवैकादशेऽहनि ।
युग्मांस्तु भोजयेद्विद्वान्नवश्राद्धं तु तद्विदुः ॥

इति कौर्मवचनाद्ब्राह्मणयुग्मं कार्यम् । अत्रानुक्तेष्वपि युग्मद्विजा एव, नवश्राद्धं तु तद्विदुरित्युक्तत्वात् । एतेन—

अयुग्मान् भोजयेद्विप्रांस्तन्नवश्राद्धमुच्यते ।

इति शूलपाणिः । *प्रथमेऽन्हीति । एतेन—

प्रथमेऽन्हि तृतीयेऽन्हि पञ्चमे सप्तमे तथा ।
द्वौ द्वौ पिण्डौ प्रदातव्यौ शेषास्तु दशमेऽहनि ॥

इति व्याख्यातम् । द्वितीयाद्यवयवपिण्डाः क्रमेण दशमेऽह्नि समापनीया इति चतुर्थपादार्थात् । ननु नवश्राद्धे कः पक्ष आश्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अत्र शाखाभेदाद्व्यवस्था ।

अपरार्के भविष्ये--

नवश्राद्धं त्रिपक्षं च षण्मासं मासिकानि च ।
न करोति सुतो यस्तु तस्याधः पितरो गताः ॥

वाराहे--

*गतोऽसि दिव्यलोकं त्वं कृतान्तविहितात्पथः ।
मनसा वायुभूतेन विप्र त्वाहं नियोजये ॥
पूजयिष्यामि भोगैस्त्वामेवं विप्रं निमन्त्रयेत् ॥

आवाहनेऽपि तत्रैव—

इहलोकं परित्यज्य गतोसि परमां गतिम् ।
मनसा वायुभूतेन विप्रे त्वाहं नियोजये ॥ इति ।

तत्रैव बह्वृचपरिशिष्टे—

अनूदकमधूपं च गन्धमाल्यविवर्जितम् ।
नवश्राद्धममन्त्रं च पिण्डोदकविवर्जितम् ॥

उदकमर्घ्यः । पिण्डोदकं 'शुन्धन्तां पितरः' इत्य*-
वनेजनादिः ।

*एकोद्दिष्टेषु सर्वेषु न स्वधा नाभिरम्यताम् ।
नाग्नौकरण(१)मन्त्रश्च एकं वाथ तिलोदकम् ॥

णीय इत्यत आह—*अत्रेति । यहि गृह्येषु नवश्राद्धान्युक्तानि तदा एतान्येव कार्याणि, अन्यथाऽऽङ्गिरसोक्तानि, आचारात् । नागरखण्डाद्युक्तानि तु यत्र तदाचारस्तत्रैवेत्यर्थः । *गतोसी-ति । द्वयमैकादशाहिकश्राद्धे । *अवनेजनादीति । आदिना प्रत्यवनेजनग्रहः । *एकोद्दिष्टेषु सर्वेष्विति । यद्यपि याज्ञ-वल्क्यादिभिरेकोद्दिष्टसामान्ये 'अभिरम्यताम्' इति विसर्जनम-न्त्र उक्तः गोभिलेनापि "अभिरम्यताम् इति विसर्जनमेतत्

---

(१) 'मन्त्राश्च एक चार्थ'क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनपत्येषु सर्वेषु न स्वधा नाभिरम्यताम् ।
स्वस्त्यस्तु विसृजेदेवं सकृत्प्रणववर्जितम् ॥
एकोद्दिष्टस्य पिण्डे तु *अत्रशब्दो न विद्यते ।
पितृशब्दं न कुर्वीत पितृहा चोपजायते ॥

सपिण्डनात्प्रागिति हेमाद्रिः । तेन—

न च स्वधां प्रयुञ्जीत प्रेतश्राद्धे दशाहिके ।

इति ऋष्यशृङ्गोक्तौ दशाहिकोक्तेरेकादशाहे स्वधाप्रयोग एवेति हारलता परास्ता ।

रत्नावल्याम्—

आशिषो द्विगुणा दर्भा जयाशीः स्वस्तिवाचनम् ।
पितृशब्दः (१)स्वसम्बद्धः शर्मशब्दस्तथैव च ॥
*पात्रालम्भो*ऽवगाहश्च उल्मुकोल्लेखनादिकम् ।
तृप्तिप्रश्नश्च विकिरः शेषप्रश्नस्तथैव च ॥
प्रदक्षिणा विसर्गश्च सीमान्तगमनं तथा ।
अष्टादश पदार्थां*श्च प्रेतश्राद्धे विवर्जयेत् ॥

अत्र स्वधापितृनमः*शब्दानां "तिलोऽसि" इतिमन्त्रे *प्रेतशब्दोहेन तूष्णीं वा तिलावपनम् । *तूष्णीमर्घं

प्रेतश्राद्धम्" इति विशेषतोऽपि तथापि आश्वलायनानां प्रेतश्राद्धं न भवति तत् परिशिष्टे तन्निषेधात् मन्त्रान्तरविधानाच्चेत्याशयः । *अत्रशब्दः अत्र 'पितरो मादयध्वम्' इति मन्त्रः । 'अनुशब्दो न विद्यते' इति पाठे 'ये च त्वामत्रानु' इतिमन्त्रः । *पात्रालम्भः समन्त्रः । *अवगाहः द्विजाङ्गुष्ठनिवेशनम् । महैकोद्दिष्टयोगमाह—*चेति । *शब्दानामिति । इदमुपलक्षणं न धूर्यादयो नाभिश्रवणं न श्राद्धशेषभोजनमित्यपि बोध्यम् । *प्रेतशब्दोहेन प्रत्तः प्रेतमिमानित्यूहः—*तूष्णीमिति । अमुकगोत्रामुकप्रे

---

(१) 'स्वसम्बन्धः' क० छ० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दानम्। अमुष्मै स्वाहेति प्रेतनाम्ना पाणिहोमः *नाम्ना एकः पिण्डः। निनयनमन्त्रे ऊहः। अनुमन्त्रणादि त्वमन्त्रकम्। आभिरम्यतामिति विसर्जनम्। एवं *नवश्राद्धवर्जैकोद्दिष्टेषु। 'नवश्राद्धे त्वमन्त्रकं सर्वम्' इति नारायणवृत्तिः। क्रियानिबन्धे--

उत्तानं स्थापये*त्पात्रमेकोद्दिष्टे सदा बुधः।
न्युब्जं तु पार्वणे कुर्यात्तस्योपरि कुशान्न्यसेत्॥
*नवश्राद्धं गृहे कुर्याद्भार्या यत्राग्नयोऽपि वा।
सपिण्डीकरणान्तानि प्रेतश्राद्धानि यानि वै॥
तानि स्युर्लौकिके वह्नावित्याह त्वाश्वलायनः॥

इदं सम्भवे*ऽन्नेन कार्यम्,

नवश्राद्धेषु य*च्छिष्टं *ग्रहपर्युषितं च यत्।
दंपत्योर्भुक्तशेषं च न तद्भुञ्जीत कर्हिचित्॥

इत्यङ्गिरोवचनालिङ्गात्।

द्वाभ्यां तदा तु कृच्छ्राभ्यां शुद्धिः स्यात्तु विवेकिनाम्।

इति ब्राह्मे उक्तम्। विघ्ने तु निर्णयामृते कण्वः-

नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत्।
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते॥

हेमाद्रौ गालवः--

शावे तु सूतकं चेत्स्यान्निशायां च मृतौ तथा।

महैकोद्दिष्टे इदमर्घ्यं तवोपतिष्ठतामिति सङ्कल्प्यापोशनादि दद्यात्। *नाम्नेति। अमुकगोत्रामुकप्रेताऽयं ते पिण्डमुपतिष्ठतामिति मन्त्रः। *नवश्राद्धवर्जेति। नवश्राद्धभिन्नेत्यर्थः। *पात्रम्। अर्घ्यस्य। *नवश्राद्धमिति। प्रयोगोन्त्येष्टिपद्धतौ बोध्यः। *अन्नेनेति। सक्तुशेषादिलक्षणेऽप्युक्तैव निष्कृतिः। *शिष्टं शेषः। *ग्रहः ग्रहणम्। निशायां मृतावित्यन्वयादाह--

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवश्राद्धानि देयानि यथाकालं यथाक्रमम् ॥

निशायामाशौचान्ते*द्व्यहवृद्धौ । अन्वारोहणे तु—

नवश्राद्धानि सर्वाणि सपिण्डीकरणं पृथक् ।
एक एव वृषोत्सर्गो गौरेका तत्र दीयते ॥

आशौचान्त्यदिने कार्यमुक्तं ब्राह्मे—

यस्य यस्य तु वर्णस्य यद्यत्स्यात्पाश्चिमं त्वहः ।
स तत्र वस्त्रशुद्धिं च गृहशुद्धिं करोत्यपि ॥
समाप्य दशमं पिण्डं प्रेतस्पृष्टे तु वाससी ।
अन्त्यानामाश्रितानां च त्यक्त्वा स्नानं करोत्यपि ॥
श्मश्रुलोमनखानां च यत्त्याज्यं तज्जहात्यपि ।
गौरसर्षपकल्केन तिलकल्केन संयुतम् ॥
शिरःस्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः ।
वृषभं गां सुवर्णं च स्पृष्ट्वा शुद्धो भवेन्नरः ॥

क्रियानिबन्धे गृह्यकारिकायाम्—

*अत्र पिण्डत्रयं दद्युस्तत्सखिभ्यस्तथाऽऽदिमम् ।
प्रेताय मध्यमं तद्वत्तृतीयं च यमाय वै ॥

तथा—

कर्ताऽत्र प्रार्थिताः सन्तो ज्ञातिसंबन्धिबान्धवाः ।
ददुरभ्यङ्गतः पूर्वं त्रींस्त्रीन्धर्मोदकाञ्जलीन् ॥
पूर्ववन्नामगोत्राभ्यां नियमो नेह कश्चन ॥

मदनरत्ने विष्णुहारीतौ—'आशौचान्ते कृतश्मश्रुकर्मा णस्तिलकल्कैः सर्षपकल्कैर्वा स्नाताः शुक्लवाससो गृ

---

*द्व्यहवृद्धाविति । यद्यपि तत्र पुत्रस्याग्निदस्य च पूर्णमेवाशौ तथाप्यन्यस्मिन् क्रियाकर्त्तरि तद् द्रष्टव्यम् । *अत्रेति । अत्र प कुम्भाः स्थाप्याः । तत्र मध्यमे प्रेताय पूर्वे प्रेतसखिभ्यः दक्षिणे यमा पश्चिमे वायसायोत्तरे प्रेताधिपतये तद्राजायेति पञ्च पिण्डा इति प्रका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रविशेयुस्तत्र *शान्तिकं कृत्वा ब्राह्मणपूजनं कुर्युः।'इति । देवलः—

*दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् ।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च ॥

अपरार्के बृहस्पतिः—

*नवमे वाससां त्यागो नखरोम्णां तथान्तिमे ।

तत्रैव व्यासः—

आशौचान्त्यदिने क्षौरं जनन्या च गुरौ मृते ।

एतत्प्रेताल्पवयसामित्याहापस्तम्बः—*'अनुभाविनां च (१)परिवापनम्' इति । अनुभाविनः कनिष्ठा इति विज्ञानेश्वररत्नाकरादयः ।

आशौचमनुभवतां पुंसां सर्वाशौचे तु मुण्डनम् ।
आज्ञया नरपतेर्द्विजन्मनां दारकर्ममृतसूतकेषु च ।
बन्धमोक्षमखदीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोडुषु ॥

इति रत्नमालोक्तेर्जननाशौचेऽपीति शुद्धितत्त्वादयः । अत्र देशाचारतो व्यवस्था । परि शिखावर्जम्, 'केशश्मश्रुलोमनखानि वापयीत शिखावर्जम्' इति गोभिलोक्तेः । यत्त्वापस्तम्बः—'न समावृत्ता वपेयुरन्यत्र विहारादित्येके' । विहारो दर्शादियागः । तेन विना समावृत्ता गृहस्था न वपेयुरित्यर्थः । यच्च—

वृथा छिनत्ति यः केशांस्तमाहुर्ब्रह्मघातिनम् । इति,

रान्तरमन्त्येष्टौ । *शान्तिकं सपिण्डनोत्तरपाथेयश्राद्धानन्तरम् । *दशमेऽहनीति । अन्त्यदिने इत्यर्थः । उपान्त्यदिनं विकल्पयति—*नवमे इति । वाससां त्यागो निर्णेजकादौ निर्णेजनार्थः । *अनुभाविनां चेति । दशमेऽहनीति पूर्वोक्तदेवलवाक्यात्स्नानवत्सर्वेषां वपने प्राप्ते अनेन मृतकनीयःसपिण्डानां तन्नियम्यते । एवं च

(१) 'परिवपनम्' ग०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्—

केशश्मश्रु धारयतामग्र्या भवति संततिः ।

इति दानधर्मोक्तकाम्यपरम् । अनुभाविनः *पुत्रादय एवेत्येके,

*पुत्रः पत्नी च वपनं कुर्या(१)दन्ते यथाविधि ।
पिण्डदानोचितोऽन्योपि कुर्यादित्थं समाहितः ॥

इत्यपरार्के व्यासोक्तेः । यत्तु मिताक्षरायाम्—

द्वितीयेऽहनि कर्तव्यं क्षुरकर्म प्रयत्नतः ।
तृतीये पञ्चमे वापि दशमे वाऽऽप्रदानतः ॥ इति ।

आप्रदानतः इति *चतुर्थादीनि । तत्प्रथमदिनेऽसंभवे ज्ञेयम्,

"कृतश्मश्रुकर्माणः" इति वाक्यान्तराण्यपि संकुचद्वृत्तीन्येव । श्मश्रुपदं तु तत्पूर्वकत्वलाभाय, तत्कल्पनस्यावश्यकत्वार्थं च तेन क्षणमपि न यवनाचारप्रसङ्गः । एवं च शिष्यस्यापि पुत्रधर्मातिदेशेन तत्सिद्धौ "गङ्गायां भास्करक्षेत्रे" इत्यादिवचनात् मातापित्राचार्यमरणे तदावश्यकम् अन्यत्र चानियतम् । अन्यथैतदानर्थक्यापत्तेः । गङ्गापदं च सर्वतीर्थोपलक्षणं, "सर्वतीर्थेष्वयं विधिः" इत्युक्तत्वात् । *पुत्रादय एवेत्येके इति । एकशब्दाभिधानं भ्रात्रादेर्निवृत्तावस्वारस्य सूचकम् , तेषामपि प्रेताभ्युदयकामनायां तत्प्राप्तेः । पत्न्यास्तु पुत्रवत्तन्नित्यमित्याह—*पुत्र इति । पत्न्याः प्रथमेऽन्हि दशमे वा यथाचारम् । यतिपत्न्यास्तु तदैव । यत्तु—

सूतके मृतके क्षौरं न कुर्याद्दशमेऽह्नि यः ।
तस्याशौचं भवेन्नित्यं पितरो नरके स्थिताः ॥ इति ।

तन्निर्मूलम् । समूलत्वे त्वनुभाविविषयतया संकुचितमिति मृतके सूतके इत्यस्य मृतिनिमित्तकाशौचे इत्यर्थः *चतुर्थादीनीति । प्रदा-

---

(१) 'अन्त्ये' क०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अलुप्तकेशो यः पूर्वं सोऽत्र केशान्प्रवापयेत् ।
द्वितीयेऽह्नि तृतीयेऽह्नि पञ्चमे सप्तमेऽपि वा ॥
यावच्छ्राद्धं प्रदीयेत तावदित्यपरं मतम् ॥

इति माधवीये मदनरत्ने च बौधायनोक्तेः । मदनपारिजाते तु दशमे प्रथमे च समुच्चय उक्तः । यत्तु—

दशमं पिण्डमुत्सृज्य रात्रिशेषे शुचिर्भवेत् । इति, तदे*कादशाहश्राद्धाङ्गविप्रनिमन्त्रणार्थं ज्ञेयम् ॥

अथैकादशाहः । मनुः—

*विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधे ।
वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः ॥

शुद्धितत्त्वे देवलः—

अघाहःसु निवृत्तेषु सुस्नाताः कृतमङ्गलाः ।
आशौचाद्विप्रमुच्यन्ते ब्राह्मणान्स्वस्ति वाच्य च ॥

याज्ञवल्क्यः—

(मृ(१)तेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् ।
प्रतिसंवत्सरं चैव) आद्यमेकादशेहनि ॥

क्षत्रियाद्यैराशौचेऽप्येकादशेऽह्नि श्राद्धं कार्यम्,

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि ।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः ॥

नमैकादशाहिकश्राद्धमिति स्वतन्त्रविधिः । *अलुप्तकेश इति । तथाच दग्धृपरं मिताक्षरावचनम्, दाहाङ्गभूतस्य वपनस्य प्रथमदिन उक्तेः । *एकादशाहेति । विज्ञानेश्वरमते महैकोद्दिष्टाहन्येव प्रातर्विप्रनिमन्त्रणं युक्तम् ।

*विप्र इति । कृतक्रियः कृतस्नान इति विप्रादीनां विशेषणम् । तथाच यस्य विप्रादेर्यावत्कालमाशौचमुक्तं स तत्काला-

---

(१) कंसान्तर्गतं नास्ति । क० छ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति हेमाद्रौ शङ्खोक्तेः । पैठीनसिः—

एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम् ।
चतुर्णामपि वर्णानां सूतकं तु पृथक्पृथक् ॥

यत्तु मरीचिः—

आशौचान्ते ततः सम्यक् पिण्डदानं समाप्यते ।
ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः ॥ इति ।

तत्सर्ववर्णानां दशाहाशौचपरम् । यत्तु विष्णुः-'अथाशौचापगमे' इति । यच्च गौडग्रन्थे हारीतः-'श्वोभूते एकोद्दिष्टं कुर्यात्' । यच्च बैजवापः-'ऊर्ध्वं दशम्या अपरेद्युः' इति; तद्विप्रविषयम् । एतेन *दशमपिण्डो-

तिक्रमे सति स्नायात् । ततो विप्रो हस्तेनापः स्पृष्ट्वा शुद्ध्यति । एवं क्षत्रिय इति । स्पृष्ट्वेति स्पर्शक्रियैवोच्यते नतु स्नानमाचमनं वा, तस्यैवाग्रेऽनुषङ्गात् । अत्र कृतक्रियो यावदाशौचं कृतक्रियोदको विप्रादिक्रमेणोदकादिकं स्पृष्ट्वा विशुद्ध्यतीति आशौचकालानन्तरभाविस्नानप्रतिनिधिरुच्यते इति पक्षान्तरं शिष्टा नाचरन्ति ।

*दशमेति ।

ब्राह्मणे दश पिण्डाः स्युः क्षत्रिये द्वादश स्मृताः ।
वैश्ये पञ्चदश प्रोक्ताः शूद्रे त्रिंशत् प्रकीर्तिताः ॥

इत्येको गात्रपूरकपिण्डपक्षः । अपरश्च—

सर्वेभ्यः प्रेतवर्णेभ्यः पिण्डान् दद्यादशैव तु ।

इतिपारस्करोक्तपक्षे—

राज्ञस्तु दशमः पिण्डो द्वादशेऽहनि दीयते ।
वैश्यस्य पञ्चदशमे ज्ञेयस्तु दशमस्तथा ॥
शूद्रस्य दशमः पिण्डो मासे पूर्णेऽन्हि दीयते ॥

इत्यादिपुराणोक्त इत्यर्थः । याज्ञवल्क्योक्तावयवपिण्डपक्षे पूर्वोक्तसर्ववर्णदशाहाशौचपक्षे च अवयवपिण्डसमाप्तिलाभादुक्तम्-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्कर्ष*पक्षे अवयवपिण्डासमाप्तौ कथमेकादशाहे श्राद्धमिति मूर्खोक्तिः परास्ता, *वचनादाशौचमध्य इव तत्राप्यविरोधात् ।

भविष्ये—

एकादशभ्यो विप्रेभ्यो दद्यादेकादशेऽहनि ।
भोजनं तत्र वैकस्मै ब्राह्मणाय महात्मने ॥

यत्तु मात्स्ये—

एकादशेऽहनि तथा विप्रानेकादशैव तु ।
क्षत्रादिः सूतकान्ते तु भोजयेदयुजो द्विजान् ॥ इति ।

तद्रु*द्रगणश्राद्धपरमिति मदनपारिजातः । गौडास्त्व*स्माद्वचनात्क्षत्रियादीनामाशौचान्त एवेत्याहुः ।

*पक्षे इति । *वचनादिति । तथाच वचनबलादेकादशाहश्राद्धं कृत्वा पिण्डसमाप्तौ न क्षतिः "नास्ति वचनस्यातिभारः" इति न्यायादित्यर्थः । अत एव शूद्रस्य मृताहावधिकद्वादशाहे षोडशश्राद्धपूर्वकं सपिण्डनं विज्ञानेश्वरसंमतमाचक्षते रघुनाथप्रभृतयः । *रुद्रगणेति । वस्तुतस्तु तस्याऽऽद्यश्राद्धपरत्वमेव, ब्राह्मण एकादशाहे आद्यश्राद्धे एकादश द्विजान् भोजयेदेव क्षत्रियादिस्तु तत्रैव तत्कुर्वन्नपि न पक्वेनान्नेन तदा ब्राह्मणान् भोजयेत् । किन्तु तदा त्यक्तेन तावद्ब्राह्मणभोजनपर्याप्तेनाऽऽमेन सूतकांते पक्त्वा भोजयेदिति तदर्थात् । अयं च विधिरावश्यकः विष्णुना सूतकान्तमात्राभिधानात्तस्य सर्ववर्णसाधारण्यापातात् । तस्य विप्रपरत्वोपगमे एकादशाहे क्षत्रियादेर्भोजनप्रसङ्गात् । *अस्मात् मात्स्यात् । एतन्मते च सपिण्डनमाद्यश्राद्धोत्तरदिन एवेति बोध्यम् । गौडास्त्वित्यस्वरसः । मात्स्यवचनस्य "एकादशेऽहनि" इत्युक्तस्य श्राद्धीयस्यामस्य सूतकान्ते पाकेन भोजनार्थकत्वेनोपपत्तेः सूतकान्तकर्त्तव्यत्वबोधकत्वाभावात् । नच—

शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रामायणेऽपि—

समतीते दशाहे तु कृतशौचो यथाविधि ।
चक्रे द्वादशिकं श्राद्धं त्रयोदशिकमेव च ॥

द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः ॥
गलांसभुजवक्षांसि तृतीयेन तु सर्वदा ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
ऊरुजङ्घे तथा पादौ पञ्चमेन विधीयते ।
षष्ठेन सर्वमर्माणि सप्तमेन च नाडयः ॥
दन्तलोमाद्यष्टमेन वीर्यं तु नवमेन च ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः ॥
दशाहप्रेतपिण्डेन ज्ञानं प्रेतेषु जायते ॥

इति ब्रह्मपुराणात् दशपिण्डदानस्य पूर्णप्रेतशरीरावयवनिष्पादकत्वम् ।

प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता ॥

इति वचनाच्च । तथाचोत्तरश्राद्धसहकारेण तद्विनाशफलकस्याद्यश्राद्धस्य तत्पूर्वकपितृत्वप्राप्तिफलकानां वा सपिण्डनान्तानां दशमपिण्डात् पूर्वकरणं विरुध्यते इति वाच्यम् । प्रेतशरीरस्य—

क्षुत्तृष्णे प्रत्यहं तत्र भवेतां भृगुनन्दन ।

इति वचनात् दुःखैकहेतुत्वेन वैधकर्मफलत्वासम्भवात् । एतच्छरीरपातावशिष्टकर्मभिः शुक्रशोणिताहारपरिणामविशेषादिभिर्दृष्टैश्च तदारम्भोपपत्तेरेतत्पिण्डदानानपेक्षणात् । अन्यथा चण्डालतिर्यगादिशरीरपातानन्तरं न स्यात्, तत्र पिण्डदानाभावात् । तस्मात् पिण्डदानफलं नावयवनिष्पत्तिः किन्तु तदकरणनिमित्तकप्रेतनरकनिवृत्तिः । तथाच ब्राह्मे--

ग्रामाद्बहिश्च कर्तव्यं जलाशयसमीपतः ।
पिण्डदानं दशाहानि प्रेतायारण्यमाश्रितैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अरण्ये पिण्डदानं तु मोहान्न क्रियते यदि ।
तदा रौरवमायाति प्रमीतः प्रथमेऽहनि ॥
पुन्नामसंज्ञं त्वपरे महारावं तृतीयके ।
तामिस्राख्यं चतुर्थे तु प्रयात्यथ सुदारुणम् ॥
पञ्चमे चान्धतामिस्रं षष्ठे घोरं च सुप्रभम् ।
अमेध्यं कृमिसम्पूर्णं सप्तमेऽहनि घातकम् ॥
असिपत्रवनं घोरमष्टमेऽहनि सर्वथा ।
महारौरवसञ्ज्ञं तु नवमे याति मानवः ॥
अवीचिरिति विख्यातं दशमेऽहनि भीषणम् ॥ इति ।

नच पिण्डदानाकरणस्यारण्यसम्बन्धांशे एवेयं निन्दा, नानाविधविशेषणवत्तया पिण्डदानस्यैव प्रागवगमात् । नचैवं वाराणसीमरणादिनिमित्तकमुक्तौ नरकादर्शनफलकप्रवृत्तकर्मणा वा प्रेतगतानिष्टासत्त्वेन पिण्डदानं व्यर्थमिति वाच्यम्,

तण्डुलैः सक्तुभिः शाकैः फलैर्वा श्रद्धया ततः ।
देशकालानुसारेण कुर्यात् प्रेतस्य तर्पणम् ॥

इत्यादिशाकेङ्गुदीपिण्याकादिनिःसारद्रव्यविधानेन तदकरणे कर्त्तुरेव प्रत्यवायकल्पनात् । अथवा पिण्डदानस्य प्रेतत्वावस्थानिवृत्तिरेव फलं—

स्वगोत्रा वाऽन्यगोत्रा वा स्त्रियो वा पुरुषास्तथा ।
प्रेतास्तु पिण्डसम्बन्धान्मुच्यन्ते तेन कर्मणा ॥
वायुभूतास्तु तिष्ठन्तः कालापेक्षेण सर्वदा ॥

इत्यादित्यपुराणात् । एवं च प्रागुक्तवचनस्याधर्मारब्धं प्रेतशरीरं दुःखैकभोगहेतुस्तन्निवर्तकाभावे दुःखभोगार्थं तांस्तान् नरकान् गच्छेत् पिण्डदानेन तु तदारम्भकादृष्टनाशेन तच्छरीरानिवृत्तौ तदप्राप्तिरित्यत्र तात्पर्यम् । तस्मात् क्षत्रियादिभिर्दशमपिण्डदानात्प्राक् प्रेतत्वनिवर्तकस्यैकादशाहस्य शूद्रेण वा द्वादशाहे सपिण्डनान्तस्य करणे न कोपि विरोधः । प्रेतत्वनिवृत्तिस्तु दशमपि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*द्वादशिकं (१)द्वादशाहेन निर्वर्त्य त्रयोदशाहश्राद्धम् । त्रयोदशिकं चतुर्दशाहविधेयं सपिण्डनपाथेयादि । क्षत्रियाणां द्वादशाहाशौचे त्रयोदशे महैकोद्दिष्टं चतुर्दशे सपिण्डनम् । *द्विविधवाक्यादेकादशाहाशौचान्तयोर्विकल्प इत्येके । *सद्यःशौचादौ युद्धहतादेरेकादशाहे *अन्येषामाशौचान्त इति वयम् । कौर्मे—

एकादशेऽह्नि कुर्वीत प्रेतमुद्दिश्य भावतः ।
द्वादशे वाऽह्नि कर्तव्यमनिन्द्येऽप्यथवाऽहनि ॥

ण्डोत्तरमेव । द्वादशाहादिसपिण्डने प्रेतत्वनिवृत्तेर्वत्सरोत्तरत्ववत्तदन्त एव सकलनिवर्तकसम्पत्तेः । समतीते इत्यादि रामायणवाक्यस्य चायमर्थः—सत्यपि द्वादशाहाशौचे दशाहोत्तरदिने एकादशाहिकं चक्रे, ततो द्वादशाहिकं श्राद्धं, ततस्त्रयोदशाहिकं पाथेयश्च श्राद्धमिति । गौडमते दशाहपदस्याशौचकालद्वादशाहपरत्वाद् व्याचष्टे—*द्वादशिकमिति । मतान्तरमाह—*द्विविधेति । एकपक्षाङ्गीकारसम्भवाद्विकल्पोऽष्टदोषग्रस्तो नाङ्गीकार्य इत्यस्वरसः । सिद्धान्तमाह—*सद्य इति । आदिना त्र्यहैकाहग्रहः ।

तृतीये तूदकं दत्त्वा चतुर्थे श्राद्धमाचरेत् ।

इत्यादौ तु तद्बाधोऽनुसन्धेयः । *अन्येषामिति । अयं भावः—प्रायशः एकसंवत्सरस्थायी वायवीयः प्रेतदेहः, तदारम्भकश्च मनुष्यशरीरारम्भकाधर्मशेषः पितृत्वप्राप्तिप्रतिबन्धकः तद्देहभोग्यदुःखभोगैकनाश्यः, तदधर्मनाशार्थं दुःखभोगस्तदर्थं च प्रेतदेह आवश्यकः तदुत्पत्त्यर्थं च पिण्डदानमिति प्रेतदेहोत्पत्तिर्भवत्येव पिण्डदानफलम् । अत एवैकादशाहादिश्राद्धानां पूर्णप्रेतशरीरानिवृत्तिः फलं,

यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश ।

---

(१) 'द्वादशाहेऽतीते श्राद्धम्' क० छ० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निन्द्यं प्रेतक्रिया(१)काले उक्तम्। एकादशे तु न निषेध इत्युक्तं प्राक्। बृहस्पतिः—

वस्त्रालंकारशय्यादि पितुर्यद्दाहनादिकम्।
गन्धमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे तदर्पयेत्॥
श्रोत्रिया भोजनीयास्तु नव सप्त त्रयोदश।
(२)ज्ञातयो बान्धवा निःस्वास्तथा चातिथयोऽपरे॥

पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि॥

इति यमोक्तेः।

एकादशाहादिभिः श्राद्धैर्मृतस्याप्यायनं भवेत्।
सम्यक् संवत्सरे प्रेतः पितॄणां स्थानमृच्छति॥

इति देवलोक्तेश्च। आप्यायनं प्रेतत्वपरिहार इति हि शूलपाणिः। "सगोत्रा वाऽन्यगोत्रा वा" इति वचनं तु चिरकालमृताकृतौर्ध्वदेहिककेवलदुरितप्राप्तप्रेतदेहविषयं, "कालापेक्षेण तिष्ठन्तः" इति तत्रैवाभिधानात्। यत्तु त्रिरात्रं दशरात्रं वा प्रेतमुद्दिश्योदकं क्षीरं च स्नानपानार्थं दीयते तेन तदानीमेव प्रेतो न स्नानपाने कुरुते तयोः प्रत्यक्षतोऽदर्शनात् किन्तु तदा तज्जन्यापूर्वेण तदानीमेव तस्य स्नानपानयोग्यदेहलाभोऽनन्तरं तत्सजातीयनीरक्षीरान्तरोपस्थितिः। एवं दशाहमध्ये शालीनां सहभोजनादेः प्रेताप्यायकत्वेऽपि। अथवा यथा गर्भिण्युपभुक्तं दोहदान्नपानादि अपूर्णस्यैव गर्भस्याप्यायकं तथा क्षीरोदकदानादि अपूर्णद्वारेण प्रेतदेहपुष्टिकरम्। ततश्च मरणानन्तरमेव दत्तैर्गात्रपूरकैः पिण्डैः प्रेतभावार्हाणामक्लेशेन क्षिप्रं प्रेतशरीरं भवति इति वा व्यवस्थायामवैधं बुद्धिपूर्वं वा मरणे दुर्मरणे च प्रायश्चित्तविशेषादिनाऽधिकारं सम्पाद्य दत्तैः पिण्डैस्तत्। अधिकारासम्पादने तु क्षिप्रमप्यतिमूढं पिण्डदानवत्त्वेऽप्यनर्हम्। सर्वथा पिण्डदाने तु विलम्बेन क्लेशेन च तदिति सिद्धम्। तथाच दशमपिण्डदानात् पूर्वं

(१) 'कालयुक्तम्' ग। (२) 'जातयो' ग०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवयाज्ञिकनिबन्धे—

एकादशसु विप्रेषु प्रेतमावाह्य भोजयेत् ।

प्रेतदेहस्यैवानिष्पन्नत्वात्तन्निवृत्त्यर्थानामेकादशाहादिश्राद्धानामाशौचमध्ये कथं करणमिति याज्ञवल्क्यादिवाक्ये पैठीनसिवचने चैकादशाहग्रहणमाशौचान्त्यदिनोत्तरदिनार्थकं विष्णुवचनैकवाक्यत्वात् । "ततः श्राद्धमशुद्धौ तु" इति शङ्खवचनपाठे श्राद्धं प्रथमादिदिनेष्वशुद्धौ कुर्यादित्यर्थः । अशुद्धौ कथं श्राद्धं स्यादित्यत्राह-कर्त्तुरिति । एकादशाहे अशौचोत्तरदिने च कुर्यादिति व्याख्येयम् ।अशुद्धोऽपीति पाठे सर्वेषामपि आशौचान्त्यदिनस्य महैकोद्दिष्टाङ्गविप्रनिमन्त्रणपरत्वम्।तत्सिद्धं सर्वैरपि दशमपिण्डे दत्ते स्वस्वाशौचोत्तरेऽह्नि एकादशाहश्राद्धं कार्यं तदितरैकादशाहकृत्यं च तत्रैव,तयोरेकदिनकर्त्तव्यत्वात् । द्वादशाहाशौचकारिक्षत्रियाणां मासाशौचकारिशूद्राणां चाचारोऽप्येवमेव । तदुत्तरेऽह्नि च सपिण्डनम् । सर्वेषां दशाहाशौचपक्षे तु एकादशाहद्वादशाहयोरेव तत्कृत्यम् । शूद्राणां द्वादशे सपिण्डनविधानं तु न मरणाद्द्वादश इति वक्ष्यामः । एकादशभ्य इति । एकस्यैव प्रेतस्थाने एकादश ब्राह्मणा इति मुख्यः कल्पः । विष्णुना तु यथाशक्ति ब्राह्मणा उक्ताः । यथा—"आशौचव्यपगमे प्रातः सुप्रक्षालितपाणिपादः स्वाचान्तः ब्राह्मणान् यथाशक्ति उदङ्मुखान् गन्धमाल्यवस्त्रादिभिः पूजितान् भोजयेत्" इति । ग्रन्थेऽपि एतदभिप्रेत्यैव "नव सप्त त्रयोदश" इत्युक्तम् । एकैको वा, "गतोऽसि दिव्यलोकं त्वम्" इति प्रागुक्तवाराहात् ।

स्नापनाभ्यञ्जनं दद्याद्विप्राय विधिपूर्वकम् । इति,

ब्राह्मणं शीघ्रमेवानयेत् ।

आगतं च द्विजं दृष्ट्वा कर्तव्या स्वागतक्रिया । इति ।

आवरणार्थं छत्रं तद्ब्राह्मणाय प्रदीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रा*द्याय च शय्यादि दद्यादाद्यामिति स्मृतम् ॥
विष्णुः—'एकवन्मन्त्रानूहेतैकोद्दिष्टे' बहुवचनान्तानेकवचनान्तान्वदेदित्यर्थः । एतत् *दृष्टार्थत्वे ।

पश्चादुपानहौ दद्यात् पादस्पर्शकरे शुभे ॥
सन्तप्तवालुकां भूमिं महीं कण्टकितां तथा ।
सन्तारयति दुर्गाणि प्रेतं ददुपानहौ ॥
तिलोपचारं कृत्वा तु विप्रस्य नियतात्मवान् ।

इत्यनेकवाक्येष्वेकवचनाच्च ।

नवश्राद्धनिमित्तं तु एकमेकादशेऽहनि ।

इत्यत्रिवचनाच्च । बहुपक्षेऽपि प्रेतोपभुक्तवस्त्रादिकं नवशय्या च तन्मध्ये एकस्मै गुणवते देया "तस्मात्तेषामेकस्मै गुणवते शय्या देया" इति सत्यव्रतवचनात् । गुणवांश्चाऽऽद्यः कर्तव्य इत्याह—*आद्यायेति । एवं चेतरेभ्यो यथाशक्ति दक्षिणैव, एकस्मै वस्त्रादिदानमुक्त्वा—

प्रदद्याद्दक्षिणां तेषां सर्वेषामनुरूपतः ।

इति बृहस्पत्युक्तेः । अयं च सर्वैकोद्दिष्टप्रकृतिरिति मिताक्षरादर्शनान्मासिकसांवत्सरिकाद्येकोद्दिष्टेषु तद्धर्मातिदेशो बोध्यः । ननु वैष्णवं पुराणैकोद्दिष्टे एव प्रवर्तते न तु सपिण्डनप्राक्तने मासिके एकादशाहिके च प्रेतैकोद्दिष्टे । तदानीं पितृत्वाभावेन तद्वाच्यावस्थाविशेषात्मकपितृत्वाभावेन तद्वाचिबहुवचनान्तपितृपदोपेतमन्त्राणां तत्राप्रवृत्तेः।"पितृशब्दं न युञ्जीत"इति निषेधश्च न्यायप्राप्तानुवादप्रायत्वात् । अत एवान्वष्टक्ये पितृपदे न मातृपदोह इति वृत्तिकृतः । नच पवित्रच्छेदनमन्त्रे द्विवचनान्तः पवित्रशब्दस्तत्रैकवचनोह इति वाच्यं तथापि 'मन्त्रान्' इतिबहुत्वानुपपत्तेरिति चेत् ? न, वैष्णवस्य प्रेतैकोद्दिष्टमुपक्रम्याम्नानेन तत्साधारण्यस्यावश्यकत्वात् । *दृष्टार्थत्वे इति । दृष्टार्थत्वार्थसम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य विघ्ने गौणकालमाह हेमाद्रौ बौधायनः—

एकोद्दिष्टं श्व एव स्याद् द्वादशेऽहनि वा पुनः ।
अत ऊर्ध्वमयुग्मेषु कुर्वीताहःसु शक्तितः ॥
अर्धमासेऽथवा मासि ऋतौ संवत्सरेपि वा ॥ इति ।

तत्रैव लघुहारीतः—

एकोद्दिष्टं तु कुर्वीत पाकेनैव सदा स्वयम् ।
अभावे पाकपात्राणां तदहः समुपोषणम् ॥

गोभिलः—

ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा ।
पुनश्च भोजयेदेकं द्विरावृत्तिर्भवेदिति ॥
एतदाद्यमासिकाद्याब्दिकयोः सिद्ध्यर्थमिति भट्टाः ।

(ते(१)न महैकोद्दिष्टं षोडशश्राद्धाद्भिन्नमेव । अत एवाद्यम् सर्वैकोद्दिष्टप्रकृतिभूतमेकादश इति विज्ञानेश्वरः । अन्ये त्वाद्यमासिकाब्दिकयोः 'आद्यमेकादशेऽहनि' इति नियमादभेदमाहुः । द्वयोस्तन्त्रत्वबाधार्थं गोभिलीयमित्यन्ये ।) युद्धहतादौ तु हेमाद्रौ पृथ्वीचन्द्रोदये पैठीनसिः—

सद्यःशौचेऽपि दातव्यं प्रेतस्यैकादशेऽहनि ।
स एव दिवसस्तस्य श्राद्धशय्यासनादिषु ॥

एवमेकाहादौ । अतोऽत्र द्वितीयेऽह्न्येकादशाहं वदन् ढौण्ढुः शूलपाणिः स्मार्तगौडश्च परास्ताः । एतेन 'आद्यमेकादशेऽहनि' इत्याशौचानन्तरादिनपरामिति विष्णू-

---

वेतार्थतादिभिरूहः कार्यः तेन शुन्धनमन्त्रादौ जनकवाचिबहुवचनान्तपितृशब्दसत्त्वेऽपि नोहः, अवनेजनादिनिषेधात् । पुराणैकोद्दिष्टेऽपि "नमो वः पितरः" इत्यादौ समुदितपित्राद्यभिप्रायेण बहु-

---

(१)कंसान्तर्गतं नास्ति । क० छ० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्तेः प्रागुक्तशङ्खादिवचनानां चानाकरत्वादिति वदन्तः कल्पतरुवाचस्पतिप्रमुखाः सर्वमहानिबन्धविरोधादुपेक्ष्याः । उशनाः—

त्र्यहाशौचेऽपि कर्तव्यमाद्यमेकादशेऽहनि ।
अतीतविषये सद्यस्त्र्यहोर्ध्वं वा तदिष्यते ॥

याज्ञवल्क्यः—

एकोद्दिष्टं दैवहीनमे*काघ्र्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं त्वपसव्यवत् ॥
उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने ।

त्वस्य समवेतार्थतयोहः । न तु समवेतार्थत्वात् । नापि—

एतद्वः पितरो वास इति जल्पन् पृथक् पृथक् ।

इति ब्रह्मपुराणोक्तपक्षे एतद्व इति मन्त्रे एतादिति यथाब्दिकस्यावश्यकत्वं तथा वक्ष्यामः। *एकाघ्र्यैकपवित्रकमिति। एकोऽर्घ्यः एकं पवित्रमिति एकः पिण्डानिति अर्घ्यपिण्डकत्वश्रवणं न्यायप्राप्तानुवादः दैवतैक्यादेव तत्सिद्धेः । यत्त्वेकं पवित्रमित्यनुवादः । तथाहि, 'पवित्रान्तर्हितेष्वप आसिच्य' इत्युक्तेः पात्रद्वाराऽर्घ्योदकसंस्कारकं पवित्रम् । तच्च न "अस्त्री कुशं कुथो दर्भः पवित्रम्" इति कोशात्कुशसामान्यं, किन्त्वनन्तर्गर्भिणं साग्रमिति लक्षणात्कुशद्वयदलविशेषः, वाक्येन होमप्रकरणपाठबाधात् । तत्र पार्वणे पितृपात्रत्रये पवित्रमित्यनुवाद इति । तन्न, अप्राप्तदलैक्यविधायकत्वात् । पवित्रशब्दो हि "अथ पवित्रे करोति" इति वाजसनेयिब्राह्मणे "पवित्रे कृत्वा" इति पारस्करादिसूत्रे "बर्हिषः प्रादेशमात्रे पवित्रे कुरुते", "पवित्राभ्यामाज्यस्योत्पवनम्" इति गोभिलाश्वलायनादौ "पवित्रे स्थो वैष्णव्यम्" इति मन्त्रे च द्विवचनान्ततया एकदलवचन एव । एवं च क्वचित् पवित्रमित्येकवचनं समुदायाभिप्रायं नतु तद्दलाद्दलद्वयसमुदाय एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभिरम्यतामिति वदेद् ब्रूयुस्तेभिरताः स्म *ह ॥

इत्यग्नौकरणनिषेधोऽन्यपरः । *बह्वृचानां सर्वैकोद्दिष्टेषु तद्भवत्येवेत्युक्तं *प्राक् । स्वादितामिति तृप्तिप्रश्न इति कात्यायनः । प्रथमे पात्रे संस्रवानित्यस्य तृतीयेनापिधानस्य च बाधान्न पात्रन्युब्जतेति शूलपाणिः । प्रचेताः—'नात्र पात्रालम्भो नाशिषः प्रार्थयेत्' ॥

अत्र विशेषो हेमाद्रौ वाराहे—

श्मश्रुकर्म तु कर्तव्यं नखच्छेदस्तथैव च ।
स्नपनाभ्यञ्जने दद्याद्विप्राय विधिपूर्वकम् ॥

तथा—

उपवेश्यासने भद्रे छत्रं तत्र प्रकल्पयेत् ।
पश्चादुपानहौ दद्यात्सर्वाण्याभरणानि च ॥

विष्णुः—'दक्षिणान्तं श्राद्धमुक्त्वा दत्ताक्षय्योदकेषु चतुरङ्गुलपृथ्वीस्तावदन्तरालास्तावदधःखाता वितस्त्या-

---

तद्वाच्यः । श्रुत्यादौ बहुषु लक्षणापातात् । न च होमाङ्गपवित्रादेकैकदलरूपादिदं न भिन्नमेव दलद्वयरूपं, तस्यैवान्यत्रापि विनियोगसम्भवेन भेदे मानाभावात् । ततश्च द्वित्वविशिष्टस्य दलरूपस्य पवित्रस्योत्पन्नत्वात्पार्वणे प्रतिपात्रं दलद्वयरूपमिव एकोद्दिष्टे एकपात्रे द्वयदले प्राप्ते इति एकतद्विधानार्थमेकं पवित्रम् । वस्तुतस्तु "तिस्रस्तिस्रः शलाकास्तु" इति वचनात् पार्वण इवात्रैकैकदलात्मकानि त्रीणि पवित्राणि प्राप्तानि, तत्र एकदलं विधीयते । तथाचोक्तम्—"एकोद्दिष्टे शलाकैकम्" इति । *हेति । प्रसिद्धौ । प्रसिद्धपार्वणसम्बन्धिशेषधर्मप्रापकम् । *बह्वृचानाम् । आश्वलायनसूत्रानुसारिणाम् । *प्रागिति । "अथातः पार्वणे श्राद्धे काम्ये आभ्युदयिके एकोद्दिष्टे च" इति चत्वारि श्राद्धानि प्रक्रम्याग्नौकरणादीनां समानविधानादित्यादि । *दत्तेति । अ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यतास्तिस्रः कर्षूः कुर्यात् । कर्षूणां समीपेऽग्नित्र(१)यमाधाय परिस्तीर्यैकैकस्मिन्नाहुतित्रयं जुहुयात् सोमाय पितृमते स्वधानमोऽग्नये कव्यवाहनाय यमायाङ्गिरस्वते इति ॥' स्थानत्रये प्राग्वत्पिण्डनिर्वपणं दधिमधुघृतमांसैः कर्षूत्रयं पूरयित्वैतत्त इति जपेत् । शेषं नवश्राद्धवत् । अत्र साग्नेरप्यन्ते वैश्वदेव इत्युक्तं प्राक् । इदं दशाहकर्त्रा पुत्रेण वा कार्यमित्युक्तम् । क्रियानिबन्धे गृह्यकारिकायाम्—

तिलोसि प्रेतदेवत्यः प्रेतं लोकान्हिनोन्तकम् ।
मन्त्रमुक्त्वा तिलानेवं प्रक्षिपेदर्घ्यपात्रतः ॥
दक्षिणामुदकुम्भं च सान्नं दत्त्वा तथैव गाम् ।
तस्मै दद्याद् *भुक्तशेषं तद्भाण्डान्यपि भाजनम् ॥

विप्राभावेऽग्नावेकोद्दिष्टम्, 'अग्नौ पायसं श्रपयित्वाऽऽज्यभागान्ते तदग्रे श्राद्धप्रयोगं कृत्वाऽग्नौ प्रेतमावाह्य गन्धाद्यैः सम्पूज्य पृथिवी ते पात्रमित्यादिनाऽन्नं सङ्कल्प्योदीरतामवर इत्यष्टाभिश्चतुरावृत्ताभिर्द्वात्रिंशदाहुतीर्हुत्वा पिण्डदानादिश्राद्धं समापयेत' इति । याज्ञवल्क्यः—

एतत्सपिण्डीकरणमेकोद्दिष्टं स्त्रिया अपि ॥

अथ वृषोत्सर्गः । स च नित्यः काम्यश्च,

थाशौचव्यपगमे सुस्नातः सुप्रक्षालितपाणिपाद आचान्तस्त्वेवंविधान् ब्राह्मणान् यथाशक्त्युदङ्मुखान् गन्धमाल्यवस्त्रालङ्कारादिभिः पूजितान् भोजयेदेकवन्मन्त्रानृहेतैकोद्दिष्टे उच्छिष्टसन्निधावेकमेव तन्नामगोत्राभ्यां पिण्डं निर्वपेत् । भुक्तवत्सु ब्राह्मणेषु दक्षिणयाऽभिपूजितेषु प्रेतनामगोत्राभ्याम्" इत्यादि । *भुक्तशेष-

---

(१) 'त्रय' नास्ति । ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न करोति वृषोत्सर्गं सुतीर्थे वा जलाञ्जलिम् ।
न ददाति सुतो यस्तु पितुरुच्चार एव सः ॥

उचारः पुरीषम् ।

एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥

इति मात्स्यकौर्मोक्तेः,

एकादशेऽहि प्रेतस्य यस्य नोत्सृज्यते वृषः ।
प्रेतत्वं सुस्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥

इति षट्त्रिंशन्मते निन्दाश्रुतेः,

एवं कृत्वा ह्यवाप्नोति फलं वाजिमखोदितम् ।
यमुद्दिश्योत्सृजेन्नीलं स लभेत परां गतिम् ॥
वृषोत्सृष्टः पुनात्येव दशातीतान्दशापरान् ।

इति देवीपुराणे भविष्यादौ फलश्रुतेश्च । अयं द्वादशाहे उक्तो भविष्ये—

*चैत्र्यां वापि तृतीयायां वैशाख्यां द्वादशेहि वा ।

इति ।

विष्णुधर्मे तु मृताहेप्युक्तः—

*विषुवद्द्वितये चैव मृताहे बान्धवस्य च । इति ।

अयं गृहे न कार्यः,

न गृहे मोचयेन्नीलं कामयन्पुष्कलं फलम् ।

इति कालिकापुराणात् । कामधेनौ—

वत्सराभ्यन्तरे पित्रोर्वृषस्योत्सर्गकर्मणि ।
वृद्धिश्राद्धं न कुर्वीत तदन्यत्र समारभेत ॥

मिति । श्राद्धशेषभोजनाभावात् । *चैत्र्यामिति ।

कार्तिक्यामथवा माघ्यामयने वा युधिष्ठिर ।

इत्यादि । *विषुवदिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तल्लक्षणं तु ब्राह्मे—

लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥

श्वेतवर्णस्य मुखादीनि श्यामानि श्यामस्य वा श्वेतानि यस्य सोऽपि नीलवृष उक्तो मात्स्यादौ । देवीपुराणे—

*चतस्रो वत्सिका भद्रा द्वे वा संभवतोऽपि वा ।

यत्तु-पठन्ति—

वृषोत्सर्जनवेलायां (१)वृषाभावे कथंचन ।
मृद्भिः पिष्टैश्च दर्भैर्वा वृषं कृत्वा विमोचयेत् ॥
न शक्यते वृषोत्सर्गो होमं वा तत्र कारयेत् ॥ इति,

तन्निर्मूलम् । तद्विधिर्हेमाद्रौ भट्टकृतौ च ज्ञेयः । अत्र देवयाज्ञिकेन वृषोत्सर्गात्पूर्वं पुरुषसूक्तेन विष्णुरूपिप्रेतोद्देशेन विष्णुतर्पणमुक्तम् । तत्र मूलं चिन्त्यम् ।

पारस्करः—

सव्येन पाणिना पुच्छं समालम्ब्य वृषस्य तु ।
दक्षिणेनाप आदाय सतिलाः सकुशास्ततः ॥
प्रेतगोत्रं समुच्चार्य अमुकस्मै इति ब्रुवन् ।
वृष एष मया दत्तस्तं तारयतु सर्वदा ॥
सहेम सतिलं भूमावित्युच्चार्य विनिक्षिपेत् ॥

उत्सृजेन्नीलकण्ठं वै कौमुद्याः समयागमे ।

इति शेषार्थम् । कौमुदी आश्वयुजी पूर्णिमा ।

चरणाश्च मुखं पुच्छं यस्य श्वेतानि गोपतेः ।
लाक्षारससवर्णं तु तं नीलमिति निर्दिशेत् ॥

इति लक्षणान्तरम् । *चतस्र इति ।

अयं हि गोपो मद्दतः सर्वासां पतिरुत्तमः ।
तुभ्यं च ता मया दत्ताः पत्न्यः सर्वा मनोरमाः ॥

---

(१) 'वृषाभावः' ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा—

विधारयेन्न तं कश्चिन्न च कश्चन वाहयेत् ।
न दोहयेच्च ता धेनूर्न च कश्चन बन्धयेत् ॥

स्त्रीषु विशेषः संग्रहे—

पतिपुत्रवती नारी भर्तुरग्रे मृता यदि ।
वृषोत्सर्गं न कुर्वीत गां दद्याच्च पयस्विनीम् ॥

पतिपुत्रयोः *साहित्यं विवक्षितम् । अन्वारोहणेऽपि गोदानमेवेत्युक्तं प्राक् । आशौचान्तरेऽपि वृषोत्सर्गाद्य-मासिकशय्यादि दद्यादेवेत्युक्तम् । क्रियानिबन्धे स्मृत्यन्तरे—

सूतके मृतके चैव द्वितीयं मृतकं यदि ।
पिण्डदानं प्रकुर्वीत वृषोत्सर्गं तथैव च ॥
न हन्यात्सू(१)तकं कर्म द्वादशैकादशाहिकम् ।
शुद्धो वा यदि वाऽशुद्धः कुर्यादेवाविचारयन् ॥ इति ।

अत्र पददानमुक्तं देवजानीये गारुडे एकादशाहं प्रक्रम्य-

तदहि दीयते (२)सर्वं द्वादशाहे विशेषतः ।
पदानि सर्ववस्तूनि वरिष्ठानि त्रयोदश ॥
यो ददाति मृतस्येह जीवतोऽप्यात्महेतवे ।
सुखी भूत्वा महामार्गे वैनतेय स गच्छति ॥

इति मन्त्रो बहुगोपक्षे एकाद्वपक्षेऽनूह्य इत्येके । एकगोयुक्तप्र-योगस्य बहुगोयुक्तप्रयोगेन प्रकृतिविकृतित्वाभावात् । 'व्रीहीणां मेध' इत्यस्य यवप्रयोग इवास्यापि लोप इत्यन्ये । *साहित्यमिति । अत्राहुः—सत्यपि वृषोत्सर्गाधिकारिणि पुत्रे भर्तृसमक्षं मृताया यदि त वृषोत्सर्गः, तदा सुतरां पुत्राभावे, भर्तृसमक्षमृतेरेव तदकरणप्रयो-जकत्वात् "अपि पुत्रवती नारी" इति पाठान्तराच्च । तस्मात्सा-

---

(१) 'सूतके' ग० । (२) 'सर्वैः' ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा—

आसनोपानहौ छत्रं मुद्रिका च कमण्डलुः ।
(१)भाजनं भोजनाधारो वस्त्राण्यष्टविधं पदम् ॥

तथा—

भाजनासनदानेन मुद्रिकाभोजनेन च ।
महिषीरथगोदानात्सुखी भवति निश्चितम् ।
सर्वोपस्करयुक्तानि पदान्यत्र त्रयोदश ॥
यो ददाति मृतस्येह जीवन्नप्यात्महेतवे ।
स गच्छति परं स्थानं महाकष्टविवर्जितः(२) ॥
*त्रयोदश पदानीत्थं प्रेतायैकादशेऽहनि ।
दातव्यानि यथाशक्ति तेनासौ प्रीणितो भवेत् ॥
अन्नं चैवोदकं चैवोपानहौ च कमण्डलुः ।
छत्रं वस्त्रं तथा यष्टिं लोहदण्डं तथाष्टमम् ॥
अग्नीष्टिकां च दीपं च तिलांस्ताम्बूलमेव च ।
चन्दनं पुष्पदानं चोपदानानि चतुर्दश ॥
योऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत् ।
स्वमहिम्नोऽनुसारेण तत्तत्सुखमवाप्नुयात् ॥ इति ।

अत्र मूलं चिन्त्यम् ॥

अथ शय्यादानम् । हेमाद्रौ भविष्ये—

तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् ।
दन्तपत्रचितां रम्यां हेमपट्टैरलंकृताम् ॥
हंसतूलीप्रतिच्छन्नां शुभगण्डोपधानिकाम् ।

हित्यं न विवक्षितमिति । *त्रयोदशेति । अशक्तौ तु—
त्रयोदश तथा पञ्च तत्र त्रीणि यथाक्रमम् ।

---

(१) 'भोजनं' ग० ।

(२) चतुःषष्टिपदान्याद्ये द्वात्रिंशन्मध्यमे पदम् । षोडशापि कनिष्ठे स्युस्त्रयोदश त्वनाद्यके ॥ एवं निर्णयामृते इत्येकस्मिन्पुस्तकेऽधिकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रच्छादनपटीयुक्तां गन्धधू(१)पादिवासिताम् ।
तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितम् ॥

अत्र हरिस्थाने प्रेतम् ।

उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ।
ताम्बूलं कुङ्कुम(२)क्षोदं कर्पूरागरुचन्दनम् ॥
दीपिकोपानहच्छत्रं चामरासनभाजनम् ।
पार्श्वेषु स्थापयेद्भक्त्या सप्त धान्यानि चैव हि ॥
शयनस्थस्य भवति यदन्यदुपकारकम् ।
भृङ्गारकरकाद्यं तु पञ्चवर्णवितानकम् ॥

मन्त्रस्तु—

यथा न कृष्णशयनं शून्यं सागरजातया ।
शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥
यस्मादशून्यं शयनं केशवस्य शिवस्य च ॥

अर्धं तदेव ।

दत्त्वैवं तस्य सकलं प्रणिपत्य विसर्जयेत् ।
एकादशाहेपि तथा विधिरेष प्रकीर्तितः ॥
विशेषं चात्र राजेन्द्र कथ्यमानं निशामय ।
तेनोपभुक्तं यत्किंचिद्वस्त्रवाहनभाजनम् ॥
यद्यदिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत् ।
तमेव पुरुषं हैमं तस्यां संस्थापयेत्तदा ॥
पूजयित्वा प्रदातव्या मृतशय्या यथोदिता ॥

पाद्मे—

मृतकान्ते द्वितीयेऽहि शय्यां दद्यात्सु(३)लक्षणाम् ।
काञ्चनं पुरुषं तद्वत्फलवस्त्रसमन्वितम् ॥
संपूज्य द्विजदांपत्यं नानाऽऽभ(४)रणभूषितम् ।

(१) 'धूपाधि' क० । (२) 'क्षोदक' क० ।
(३) 'सलक्षणाम्' ग० । (४) 'मणिविभू' ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपवेश्य तु शय्यायां मधुपर्कं ततो (१)ददेत् ॥
रजतस्य तु पात्रेण दधिदुग्धसमन्वितम्।
*अस्थि लालाटिकं गृह्य सूक्ष्मं कृत्वा सपायसम् ॥
भोजयेद्द्विजदांपत्यं विधिरेष सनातनः।
एष एव विधिर्दृष्टः पार्वतीयैर्द्विजोत्तमैः ॥

एतत्प्रतिग्रहे तत्रैवोक्तम्—

गृही(२)तायां तु तस्यां वै पुनः संस्कारमर्हति।

शय्यादानफलं भविष्ये—

स्वर्गे पुरंदरपुरे सूर्यपुत्रालये तथा।
सुखं वसत्यसौ जन्तुः शय्यादानप्रभावतः ॥
आभूतसंप्लवं यावत्तिष्ठत्यातङ्कव(३)र्जितः ॥ इति।

अथोदकुम्भः। हेमाद्रौ स्मृतिसमुच्चये—

*एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः।
दिनेदिने प्रदातव्यो यावत्संवत्सरं सुतैः ॥

इति द्रष्टव्यम्। *अस्थीति। अयं पार्वतीयाचारोऽन्यदेशीयानां निन्द्यः। एतद्वचनानां निर्मूलत्वमिति धार्मिकाः। अन्तरितमुत्क्रान्तिधेनोर्वैतरण्याश्च दानम् एवमासनस्य ताम्रादिभाजनस्योदकुम्भस्य महिष्या गन्त्र्या हिरण्यस्य कार्पासस्य सप्तधान्यानां भुवः गोर्घृतस्य शालग्रामस्य रुद्राक्षस्य वेदपुराणस्मृत्यादिपुस्तकस्य चैवञ्जातीयस्य प्रेतकल्पोक्तस्य दानमपि अमुकस्मै इत्येकोद्देशेन क्रियमाणे बहूनां नामभिः एकादशेऽन्हि कुर्वन्ति। *एकादशाहादिति। वर्षान्तसपिण्डनपक्षे।

प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता।
क्षुत्तृष्णे प्रत्यहं तत्र यतो हि भृगुनन्दन ॥

---

(१) 'वदेत्' ग०। (२) 'गृहीत्वा मृतशय्यां' इति पाठः।
(३) 'बर्जितम्' ग०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लौगाक्षिः—

*यस्य संवत्सरादर्वाक् सपिण्डीकरणं भवेत् ।
मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम् ॥

उत्तरार्धे—

तस्याप्यन्नं सोदकुम्भं दद्यात्संवत्सरं द्विजे ।

इति याज्ञवल्क्यपाठः । सपिण्डनापकर्षेऽस्यापकर्षप्रा-प्तेर्बाधकमिदमिति शूलपाणिः । तन्न, प्रकृतिविकाराभावेन तदन्तन्यायाविषयत्वात् । मात्स्ये—

यावदब्दं च यो दद्यादुदकुम्भं विमत्सरः ।
प्रेतायान्नसमायुक्तं सोऽश्वमेधफलं लभेत् ॥
केचित्त्रयोदशाहमारभ्याहु*स्तन्निर्मूलम् ॥ अ(१)

त्र देवयाज्ञिकः-'सपिण्डनापकर्षे संवत्सरं यावदुदकुम्भं अर्वागेव दद्यात नोर्ध्वम्'

प्रेतलोकगतस्यान्नं सोदकुम्भं प्रयच्छत ।

इति गोविन्दराजधृतविष्णूक्तेः ।

अन्नं चैव स्वशक्त्या तु संख्यां कृत्वाब्दिकावधि ।
दातव्यं ब्राह्मणे स्कन्द घटादौ निष्क्रयं तु वा ॥
अपि श्राद्धशतैर्दत्तैरुदकुम्भं विना नराः ।

तदर्थमिह दातव्यं जलान्नमभिवत्सरम् ।

इति च । द्वादशाहादौ सपिण्डनपक्षेऽपि षोडशश्राद्धापकर्षवन्नास्यापकर्षः, "श्राद्धानि षोडशादत्त्वा" इतिवद्वचनाभावात् । प्रत्युतानपकर्षमेवाह—*यस्येति । पूर्वार्द्धे च—

अर्वाक् सपिण्डीकरणं यस्य संवसराद्भवेत् ।

इति पाठः । *तन्निर्मूलमिति । एकादशाहात्प्रभृति कर्तव्ये उदकुम्भश्राद्धे मासिकसपिण्डनयोः प्रेतस्य अनुमासिके अन

---

(१) 'अत्र' नास्ति क० ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दरिद्रा दुःखिनस्तात भ्र(१)मन्ति च भवार्णवे ॥
तेनापकृष्य दातव्यं प्रेतस्याप्युदकुम्भकम् ॥

इति गोभिलभाष्ये स्कान्दाच्च सपिण्डनात्प्रागेव तस्य विधानादूर्ध्वं निषेधादित्याह । तन्न, उदकुम्भे पार्वणविधिनानुपपत्तेरेवं व्याख्यायां मानाभावान्मिताक्षरादिविरोधाच्च । वचनं यदि समूलं तदा *वृद्धावपकर्षं विधत्ते,

प्रेतश्राद्धानि सर्वाणि सपिण्डीकरणं तथा ।

इति हेमाद्रौ शाट्यायनोक्तेः । 'तस्याप्यन्नं सोदकुम्भम्' इति याज्ञवल्क्यविरोधाच्च ।

मदनरत्ने गौतमः—

अदैवं पार्वणं श्राद्धं सोदकुम्भमधर्मकम् ।
कुर्या*त्प्रत्याब्दिकाच्छ्राद्धात्संकल्पविधिनाऽन्वहम् ॥

अधर्मकं *ब्रह्मचर्यादिनियमहीनम् । *एतन्मासिकवदे-

न्तरमृतस्य च ब्राह्मणायैवं उदकुम्भं दद्यात् न तु पृथगुदकुम्भश्राद्धमिति तु ध्येयम् । *वृद्धाविति । एतच्च न सपिण्डनानिमित्तापकर्षविधायकं, याज्ञवल्क्यवचनविरोधात् । किन्तु यदा कदापि सपिण्डने प्रत्यहं सोदकुम्भान्नदानाशक्तौ नैकस्मिन्नेव दिने आमेन तन्निष्क्रयेण वाऽपकृष्यापि तावत् कर्तव्यमित्येवमर्थमित्यन्ये । *प्रत्याब्दिकात् । आप्रत्याब्दिकात् । सङ्कल्पविधिश्च—

सङ्कल्पं तु यथा कुर्यान्न कुर्यात्पात्रपूरणम् ।
नावाहनाग्नौकरणे न पिण्डान् विकिरं नच ॥

इत्यादि । *ब्रह्मचर्यादीति । कर्तृभोक्त्रोरित्यादि । सपिण्डनात्प्राक् क्रियमाणस्य तस्यैकोद्दिष्टत्वात् तदुत्तरं क्रियमाणमधिकृत्याह—*एतदिति । "पार्वणं वा" इति यथाश्रुतार्थं दूषयन्ने-

---

(१) 'भवन्ति' क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोद्दिष्टं पार्वणं वा कार्यम् । *अपरार्कस्तु—

सपिण्डीकरणं वृत्ते पृथक्त्वं नोपपद्यते ।

पृथक्त्वे तु कृते पश्चात्पुनः कार्या सपिण्डना ॥ इति ।

लघुहारीतोक्तावपि—

*तस्याप्यन्नं सोदकुम्भं देयं संवत्सरं द्विजे ।

इति याज्ञवल्कीये तस्येत्येकत्वोक्तेः सपिण्डनोत्तरमप्येकोद्दिष्टमेवेत्याह । अत्र पिण्डदानं कृताकृतम्, 'अहरहरन्नम*स्मै ब्राह्मणायोदकुम्भं च दद्यात्पिण्डमप्येके निपृणन्ति' इति हेमाद्रौ पारस्करोक्तेः । श्राद्धाशक्तौ पिण्डमात्रमिति गौडाः । तन्न, अपिशब्दबाधापत्तेः । हारीतः—

मृते पितरि वै पुत्रः पिण्डमब्दं समाचरेत् ।

अन्नं कुम्भं च विप्राय *प्रेतनिर्देशधर्मतः ॥

*प्रेतशब्दोच्चारणेनेति हलायुधः । यद्वा प्रेतस्य निर्देशो यत्र तदेकोद्दिष्टं तद्धर्मकमित्यर्थः । अत्राशौचान्तदिनाद्यब्दान्तं यावद्वत्सरपूर्तेः शौचं नाधिकारिविशेषणम् । तेन मृतिदिनमारभ्यैतत्कार्यमिति केचित् । तन्न, हेमाद्रिधृतवचोविरोधात् । मध्ये आशौचादिना बाधे तु लोप एव दार्शवत् ।

वाह-*अपरार्केत्यादि । *तस्यापीति । यथाचानन्तरमृतस्यैकमृतस्यैवोद्देश्यत्वं न्याय्यमिति भावः । *अस्माइति । एकवचनस्य विवक्षितत्वात्सपिण्डनात् प्राक् प्रेतशब्देन पश्चात्त्वनुमासिकवत् पितृशब्देन नतु प्रेतशब्देन । एवञ्च पूर्ववाक्ये पार्वणश्राद्धमित्यस्य पार्वणविधिना प्रेतशब्दं विहायेति यावत् श्राद्धमित्यर्थः अत्रोत्तरत्र चान्नमुदकं चेत्यभिधानात्सोदकुम्भादिपदेन प्रधानगुणभावविवक्षा । तेनैष उदकुम्भः इदमन्नमिति पृथगेव त्यागः । *प्रेतनिर्देशधर्मत इति । प्रेतशब्देन प्रेतोद्देश्यत्वरूपधर्मेणेत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा प्रथमाब्दे दीपदानमुक्तम् देवजानीये गारुडे—

प्रत्यहं दीपको देयो मार्गे तु विषमे नरैः ।
यावत्संवत्सरं वापि प्रेतस्य सुखलिप्सया ॥
प्राङ्मुखोदङ्मुखं दीपं देवागारे द्विजालये ।
कुर्याद्याम्यमुखं पित्र्ये आद्धिः संकल्प्य सुस्थि(१)रम् ॥

अथ मासिकानि । *तानि च कृत्वैव सपिण्डनं कार्यम् । तथा च गोभिललौगाक्षी—

श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिण्डनम् ।
श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ॥

तानि त्वाह जातूकर्ण्यः—

*द्वादश प्रतिमास्यानि आद्यषाण्मासिके तथा ।
त्रैपाक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश ॥

आद्यषाण्मासिकाब्दिकशब्दाः *ऊनमासिकोनषष्ठोनाब्दिकपराः । हेमाद्रौ तु—

सपिण्डीकरणं चैव इत्येतच्छ्राद्धषोडशम् ।

---

*प्रेतेति । धर्मपदवैयर्थ्यापत्तिरस्वरसः । *तानिचेति अकृतनवश्राद्धादिकस्य न मासिकेष्वधिकारः,

नवश्राद्धादिश्राद्धानि न कृतानि तु यस्य वै ।
नाधिकारी भवेत्तत्र मासषाण्मासिकाब्दिके ॥

इति वचनात् । *द्वादशप्रतिमास्यानीति । मासश्च मृततिथिं गृहीत्वा चान्द्रत्रिंशत्तिथिसमुदायः । अवयवपिण्डे जाते यदि नवश्राद्धमात्रमन्तरितं करोति तदा एकादशाहे तदीयगौणकाले वा तत्कार्यम् । तत्र च नाशौचं, कर्मणो वृत्तत्वात् । अन्यथा एकादशाहे अन्तरितनवश्राद्धकरणे तत्प्रसङ्गात् । इदानीन्तनाचारसंवादिपक्षमाह—*ऊनमासिके इति । द्वादशाहे इत्यर्थः,

---

(१) 'सुस्थितम्' ग० छ० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युत्तरार्धे पाठः। तदा आद्यमूनमासिकं द्वादशाहे, षाण्मासिके उनषष्ठोनाब्दिके इत्यर्थः। कात्यायनस्त्वन्यथाह—

द्वादश प्रतिमास्यानि आद्यषण्मासिके तथा।
सपिण्डीकरणं चैव इत्येतच्छ्राद्धषोडशम् ॥
एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः।
न्यूनः संवत्सरश्चैव स्यातां षण्मासिके तदा ॥

द्विवचनादूनषष्ठोनाब्दिके इत्यर्थमाह पृथ्वीचन्द्रः। व्यासस्त्वन्यथाह—

द्वादशाहे त्रिपक्षे च षण्मासे मासिकाब्दिके।
श्राद्धानि षोडशैतानि संस्मृतानि मनीषिभिः ॥

द्वादशाहपदमूनमासिकपरं तस्य द्वादशाहेप्युक्तेरिति कालादर्शः। मदनरत्ने ब्राह्मे त्वन्यथोक्तम्—

नृणां तु त्यक्तदेहानां श्राद्धाः षोडश सर्वदा।
चतुर्थे पञ्चमे चैव नवमैकादशे तथा ॥
ततो द्वादशभिर्मासैः श्राद्धा द्वादशसंख्यया ॥ इति।

चतुर्थादीनि दिनानि। भविष्ये त्वन्यथोक्तम्—

अस्थिसंचयनं श्राद्धं त्रिपक्षे मासिकानि तु।
रिक्तयोश्च तथा तिथ्योः प्रेतश्राद्धानि षोडश ॥ इति।

रिक्तयोस्तिथ्योरित्यूनषष्ठोनाब्दिकपरमिति हेमाद्रिः। अत्र देशकुलशाखाभेदाद्व्यवस्थेति सर्वनिबन्धाः। गालवः—

ऊनषाण्मासिकं षष्ठं मासे वाप्यूनमासिकम्।
त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा ॥

ऊनमासिके तु गोभिलः—

मरणाद्द्वादशाहे स्यान्मास्यूने चोनमासिकम् ॥

मदनरत्ने कालादर्शे च श्लोकगौतमः—

एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः ॥
क्रियानिबन्धे क्रतुस्तु--

सार्धे एकादशे मासे सार्धे वै पञ्चमे तथा ।
ऊनाब्दमूनषण्मासं भवेतां श्राद्धकर्मणि ॥

इत्युक्तं, तत्र मूलं चिन्त्यम् ।
ऊनेषु वर्ज्यान्याह मरीचिः—

*द्विपुष्करे च नन्दासु सिनीवाल्यां भृगोर्दिने ।
चतुर्दश्यां च नोनानि कृत्तिकासु त्रिपुष्करे ॥

गालवः—

त्रिभिर्वा दिवसैरूने त्वेकेन द्वितयेन वा ।
आद्यादिषु च मासेषु कुर्यादूनाब्दिकादिकम् ॥

*एकन्यूनपक्षे पञ्चम्यां मृतस्य तृतीयायां त्रिभिर्न्यूने प्रतिपदि द्व्यूने द्वितीयायामिति केचित् । माधवस्तु—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा ॥

इति पैठीनसिवाक्ये *ऊनषाण्मासिकं सप्तममासगत

ऊने मासि द्वादशाहे वा तस्य कर्त्तव्यत्वात् । आद्यमैकादशाहिकं षण्मासे ऊने षष्ठे मासे मासिकाब्दे ऊनमासिकस्य ऊनाब्दे । मासिकैः सह द्वादशाहरूपकालो जातूकर्ण्याद्विशेषः । रिक्तत्वमेकतिथिन्यूनत्वम् । *द्विपुष्करे चेति । गार्ग्योऽपि-

नन्दायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे ।
ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥ इति ।

निषेधश्च द्वित्रिदिनन्यूनपक्षे । अत्र "एकाहेन तु षण्मासाः" इत्यादिवाक्यान्तरे चोनत्वोक्तेः फलितमाह-*एकेति । मासः आद्यमृताहं गृहीत्वोत्तरमृताहपूर्वतिथिपर्यन्तात्रिंशत्तिथिसमुदायः, तथैव लोकप्रसिद्धेः । तस्यैकाहन्यूनता उपान्त्यातिथावेव, अन्त्यायां पूर्तेः । एवं त्र्यहन्यूनताप्यन्तपूर्वचतुर्थ इति । *ऊनेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*मृताहात्पूर्वेद्युः कार्यम्, ऊनाब्दिकं तु द्वितीयाब्दे मृताह-दिनात्पूर्वेद्युः कार्यमित्यर्थमाह। पूर्वेद्युर्मृताहादित्यर्थः,'मासिकानि स्वकीये तु दिवसे' इत्युक्तेः। *इदमेव युक्तम्। मदनरत्नेप्येवम्। याज्ञवल्क्यः—

मृतेहनि तु कर्तव्यं प्रतिमासं तु *वत्सरम्।

षाण्मासिकाब्दिकशब्दयोरूनषाण्मासिकोनाब्दिकपरत्वात्। *मृताहादिति। मृताहपूर्वतिथीत्यर्थः। पूर्वमतेऽस्वरसं सूचयति-*इदमेवेति। एकाहन्यूनतापक्षेऽमान्ततन्मासान्त्यतिथावेव करणम्, अन्यथा पैठीनसिवचनविरोधात्। किञ्च अन्त्यतिथ्यन्त्यक्षण एव मासपूर्तेर्यदेकातिथ्यभावप्रयुक्ता मासस्यैकाहन्यूनता तस्यां तिथाविति एकाहन्यूनता लभ्यते उपान्त्यतिथौ तु तत्करणे द्व्यहन्यूनता स्यात्। यत्तिथित्रयाभावप्रयुक्ता त्र्यहन्यूनता तन्मध्ये-प्रथमतिथाविति त्रिभिर्न्यून इत्यस्येति। अत्रोक्तं मयूखे-सत्यमन्त्यतिथ्यन्तक्षण एव मासपूर्तिः। परन्तु षष्ठ्यां मृतस्य पञ्चम्यां माससमाप्तिर्न तु षण्मासा इति जातूकर्ण्येनापि एकाहेन न्यूनइत्यनेनैकाहरहितमासस्यैव ऋतुतया प्रतिपादनात् दर्शितक्रपरिष्कारस्याप्रामाणिकत्वात्।

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते।

इति पैठीनसिवाक्ये माससमाप्तेः पूर्वेद्युरित्यर्थो नतु मृताहात् पूर्वेद्युरिति, ऊनानां मृताहकर्त्तव्यताया अप्रसक्तत्वेन तदुक्तिवैयर्थ्यात्। एवं च "एकाहेन तु षण्मासाः" इत्यादौ "एकद्वित्रिदिनैरूने" इत्यादौ "पूर्वेद्युरेव ते" इत्यादौ च अहरादिपदस्य तिथिपरत्वे प्रमाणाभावाद्यथामासिकादीनामूनैरेकाहोव्यवधानं भवति तथा तत्कालो ग्राह्य इति। *वत्सरमिति। यावदिति शेषः। मासे भवं मासिकमित्येव मासिकाद्यमासिकादिशब्दव्युत्पत्तिः नचैवं समुदायान्तर्गततया किञ्चित्तिथौ तत्करणे मासिकत्वं स्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रा*द्यमासिकमा*द्याब्दिकं *चैकादशेहीति निर्णयामृतादयः ।

ब्राह्मणं भोजयेदाद्ये होतव्यमनलेऽथवा ।
पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति ॥

इति गोभिलीयं च *तद्विषयमाहुः । *अन्ये तु 'मासपक्षतिथिस्पष्टे' इत्यादि *विरोधादाब्दिकं *वर्षान्ते एव । मासिकं तु मासादौ । द्विरावृत्तिस्तु एकादशाहिकाद्यमासिकपरा । देवयाज्ञिकोप्येवमाह । लौगाक्षिरपि—

मासादौ मासिकं कार्यमाब्दिकं वत्सरे गते ।

ज्योतिष्टोमादेर्वसन्तकालत्ववदापरपाक्षिकत्ववच्छ्राद्धस्येति वाच्यं, प्रथमातिक्रमे कारणाभावात् "मृतेहनि तु कर्तव्यम्" इति वचनाच्च तत्तन्मासाद्यतिथावेवाद्यमासिकादेः सिद्धेः । एवञ्च मृततिथावेवाद्यमासिकस्य कर्त्तव्यत्वे प्राप्ते तदुत्कर्षमाह—*आद्यमिति । *आद्याब्दिकं चेति । वर्षे भवं वार्षिकमिति व्युत्पत्तौ प्रथमातिक्रमे कारणाभावात् प्रतिसंवत्सरं चैवमित्यत्र मृताहनि इत्यनुवृत्तेश्च मरणोत्तरमेव प्राप्तमाद्यवार्षिकमाद्यमित्यनेनोत्कृष्यते तस्याप्याद्यत्वाद्विशेषानुक्तेश्चेत्यर्थः । *एकादशेऽहनि । आशौचोत्तरदिने । *तद्विषयमिति । आद्याब्दिकाद्यमासिके महैकोद्दिष्टेन सह तन्त्रेण कार्ये इति तु मयूखे । मलमासमृतस्याद्याब्दिकं तु तत्र प्रथमदिने प्राप्तमप्येकादशेह्न्येव, दाहादिसपिण्डनान्तकर्मणो मलमासे प्रतिप्रसूतत्वात् । द्वितीयाद्यदिनकर्तव्यतया विहितं शुद्धमास एव । इदानीन्तनाचारसंवादिमतमाह—*अन्ये त्विति । *विरोधादिति । तथाभूतमासादिना मृततिथिसाजात्यम् । तद्वत्येवोत्पन्नस्याब्दिकस्य तन्निरूपकमरणतिथौ करणे तद्विरोधः । वार्षिकत्वं तस्य दर्शयति—*वर्षान्ते इति । वर्षान्ते भवं वार्षिकं नतु वर्षे भवम्, सपिण्डनं विधाय "अत ऊर्ध्वं संवत्सरे वत्सरे प्रेता-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आद्यमेकादशे कार्यम*धिके त्वधिकं भवेत् ॥

दीपिकायां तु—'*आद्यं रुद्रमितेऽर्कसंमितदिने वा स्यात्' इत्युक्तम् । गौडास्तु मृततिथ्यवधिके एकादिनाधिके । *माससंवत्सरपदं गौणम् । *पूर्णेऽब्दे इति ईष-

---

यान्नं दद्यात् यस्मिन्नहनि प्रेतः स्यात्" इति गोभिलवचनात् । एवञ्च मरणतिथावप्राप्तस्य नैकादशेऽन्हि उत्कर्षः नापि एकस्यैवाब्दिकस्यैकादशेऽन्हि प्रेतदैवत्यं द्वितीयादितत्तिथौ पितृत्वप्राप्तेस्तद्दैवत्यमिति वैरूप्यम् । *अधिके इति । मलमासमृते तु मरणादेकादशेऽह्नि अधिकाद्यं कृत्वा स्वकाले ऊनं कुर्यात् । 'षष्ट्या तु दिवसैर्मासे' इत्युक्तावपि "अधिके त्वधिकं भवेत्" इति दर्शनान्मासिकेषु त्रिंशत्तिथीनामेकमासत्वात् । ततः शुद्धमासादौ द्वितीयाद्यं कृत्वा त्रैपक्षिकं ततो द्वितीयमासिकम् । एवं सति—

मलमासमृतानां तु सौरं मासं समाश्रयेत् ।

इति वचोनुगृहीतमाब्दिकं सुकरम् । द्वितीये मलमासे तु एकादशेऽह्नि आद्यमासिकं स्वकाले चोनमासिकं कृत्वा मलेऽधिकमासिकं कृत्वा त्रैपक्षिकं, ततो द्वितीयमासिकम् । एवं च यत्र षष्ठद्वादशौ मलमासौ तत्र तयोराधिकमासिकं कृत्वा तदुत्तरयोः षष्ठद्वादशमासिके तत ऊनषाण्मासिकोनाब्दिके अधिकमासस्य पूरणप्रत्ययान्तेनाव्यवहारात् । *आद्यामिति । तन्मासादिस्पृष्टाहः तेन मरणतिथेरपि संग्रहो दुर्वारः, तथाभूतेत्यनेन तद्भेदालाभात् । "आब्दिकं वत्सरे गते" इति लौगाक्षिवाक्येऽप्यगते इति च्छेदाच्च । तस्माद्वर्षेभवमित्येव व्युत्पत्तिर्नतु वर्षान्तेभवमित्याशयः । *माससंवत्सरपदमिति । प्रथममासिकप्रथमसांवत्सरिकादिप्रकृतिभूतमाससंवत्सरादिपदं तादृशमासे तद्घटितवत्सरे च लाक्षणिकमित्यर्थः । द्वितीयादिमासवर्षयोस्तत्रानुपपत्तेरिति शेषः । मृततिथेर्मृततिथिं यावत्त्रिंशत्तिथ्यात्मको मास इति लक्षणेऽपि दर्शश्चान्द्रव-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दसमाप्तपरत्वमिति शूलपाणिः । *तेन द्वितीयमासादावाद्यमासिकादीति तन्मौर्ख्यकृतम् ।

अशक्तौ तु हारीतः—

मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति ।
द्वादशाहेन वा भोज्या एकाहे द्वादशापि वा ॥

*ऋतुं प्रति द्वेद्वे इत्यर्थः । *यदा पितुर्मरणात्त्रयोविंशतितमे दिने *दर्शो वृद्धिर्वा स्यात्तदा *द्वादशादिनेषु द्वादशमासिकानि कार्याणीत्यर्थः । त्रैपक्षिकं तु त्रिपक्षेऽतीते मृताहे कार्यम्,

---

दवधौ पञ्चमीतिवन्मृततिथेर्न मासान्तर्गतत्वम्, एवं त्रिपक्षशब्दोऽपि तादृशपञ्चचत्वारिंशत्तिथिरूपसार्धमासवाची । नन्वेवं द्वितीयवर्षाद्यदिने सपिण्डीकरणप्रसङ्ग इत्यत आह—*पूर्णे इति । *तेनेति । आदिना आद्याब्दिकं द्वितीयवर्षाद्यतिथौ कार्यमित्यस्य ग्रहः । अत्राद्याब्दिकस्य द्वितीयवर्षाद्यतिथौ कर्तव्यत्वेपि आद्यमासिकस्य द्वितीयमासाद्यतिथौ कथं करणं तत्राद्यमासत्वाव्यवहारात् आद्यमासो गत इति व्यवहाराच्चेत्यस्वरसः । अपर्याप्तौ प्रतिमासं श्राद्धकरणाशक्तौ ऋतुं प्रतीत्यस्यार्थमाह—*ऋतुमिति । मुख्यस्य चान्द्रस्य सौरस्य वा नेह ग्रहणम्, असम्भवात्; किन्तु मृततिथिमारभ्य त्रिंशत्तिथिरूपमासद्वयम् तथाचैकं मृताहमतिक्रम्य तदुत्तरमृताहेऽतिक्रान्तं प्राप्तकालं चेति श्राद्धद्वयं कार्यमित्यर्थः । एवं करणे क्वचित्त्रयमपि। यथा एकादशे आद्यं, स्वकाले ऊनं, द्वितीयमासिकत्रैपाक्षिकाभ्यां सह तृतीयं मासिकं, चतुर्थेन सह पञ्चमं, षष्ठोनषाण्मासिकाभ्यां सप्तमम्, अष्टमेन नवमं,दशमेनैकादशं,द्वादशेनोनाब्दिकमिति । सपिण्डनापकर्षपक्षे पक्षद्वयं द्वादशाहेन वेत्यनेनोक्तं, तत्राद्यपक्षविषयमाह—*यदेति । *दर्श इति । तत्राहिताग्नेः पितृयज्ञार्थं सपिण्डनस्यावश्यकत्वात् । *द्वादशादिनेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रैपक्षिकं भवेद्वृत्ते त्रिपक्षे तदनन्तरम् ।
इति भविष्योक्तेरिति मदनरत्ने उक्तम् । पृथ्वीचन्द्र-
कालादर्शनिर्णयामृतादयस्तु—
ऊनान्यूनेषु मासेषु विषमाहे समेपि वा ।
त्रैपक्षिकं त्रिपक्षे स्यान्मृताहे त्वितराणि तु ॥
इति कार्ष्णाजिनिस्मृतेः पूर्वत्र वृत्ते प्रवृत्ते इत्यर्थमाहुः।
ते तदनन्तरशब्दविरोधात् त्रैपक्षिकद्वितीयमासिकयोः
संकरापत्तेरेवं व्याख्यायां मानाभावाच्चोपेक्ष्याः । त्रिप-
क्षसपिण्डने त्वेवंशब्दाभावादधिकरणत्वमेव ज्ञेयम्।
यत्तु क्रियानिबन्धे गारुडे—
त्रैपक्षिकं त्रिपक्षे तु प्रवृत्ते विषमे दिने ।
मासिकान्यपि चोनानि अष्टाविंशतिमे दिने ॥ इति,
तन्निर्मूलम् । स्मृतिरत्नावल्याम्—
द्वादशाहे यदा कुर्यात्पितुः पुत्रः सपिण्डनम् ।
एकादशेऽह्नि कुर्वीत प्रेतश्राद्धानि षोडश ॥
पैठीनसिः—
सपिण्डीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश ।
एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु ॥

द्वादशमासिकानीति । मध्यवर्तीनि ऊनमासिकादीन्यपि ग्रा-
ह्याणि । ततश्चैकादशाहे आद्यं, तदुत्तरदिने ऊनं द्वितीयं च, तदु-
त्तरदिने त्रैपक्षिकं तृतीयं च, तदुत्तरदिनेषु चतुर्थपञ्चमषष्ठानि,
तदुत्तरदिने ऊनषाण्मासिकं सप्तमं च, तत्तदुत्तरदिनेष्वष्टमनवम-
दशमैकादशानि, तदुत्तरदिने द्वादशमूनाब्दिकं चेति मरणादिनाद्वा-
विंशतिदिनानि गतानि । ततस्त्रयोविंशतितमे दिने सापिण्डनं कृत्वा
पितृयज्ञं वृद्धिं वा कुर्यात् द्वादशाहे सापिण्डने तु एकादशाहे एकोद्दि-
इत्यर्थः । तत्र तु द्वादशाहे एव मासिकान्यपि क्रियन्ते । तत्राद्यस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सपिण्डीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः ।
प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि ॥

मदनरत्ने कात्यायनः—

श्राद्धम*ग्निमतः कार्यं दाहादेकादशेऽहनि ।
ध्रुवाणि तु प्रकुर्वीत प्रमीताहनि सर्वदा ॥

ध्रुवाणि त्रैपक्षिकादूर्ध्वानि । क्रियानिबन्धे गारुडे—

*त्रिपक्षात्पूर्वतः साग्नेर्भवेत्संस्कारवासरे ।
ऊर्ध्वं मृतदिनेऽनग्नेः सर्वाण्येव मृताहतः ॥

*एतानि च *यदा सपिण्डनात्पूर्वं युगपत्कुर्यात्तदा देशकालकर्त्रैक्ये तन्त्रत्वादे*कः पाक इति केचित् । पाकभेद इति भट्टचरणाः । *अत्र केचिदाहुः—

पूर्वेऽह्नि जातत्वादूनमारभ्य पञ्चदशमासिकानि कार्याणि न षोडश । एवं यदा वृद्धिपूर्वादिनादौ सापिण्डनार्थं क्रियन्ते तदा स्वकालवाचिनौ न यदि तर्ह्यनर्थकौ तथात्वे सापिण्डनात्पूर्वं परस्ताद्वा सकृदेवानुष्ठानापत्तेः । *अग्निमत इति । आहिताग्नेरित्यर्थः ।

मरणादेव कर्त्तव्यं संयोगो यस्य नाग्निभिः ।
दाहादूर्ध्वमशौचं स्याद्यस्य वैतानिको विधिः ॥

इति शङ्खवचनात् एकादशपदं च नवश्राद्धादेरप्युपलक्षणम् । *त्रिपक्षादिति । त्रैपक्षिकान्तं पूर्वश्राद्धं दाहवासरमारभ्य भवेदित्यर्थः ।

ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत् ।
अधस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः ॥

इति जातूकर्ण्यवचनात् । *एतानि चेति । षोडशश्राद्धानीति प्रकृतं । *यदेति । वृद्ध्यर्थं चोत्तराणि कुर्यादिति शेषः । *एकः पाक इति । एतच्च यावत्संन्निपाति आरादुपकारकं च तस्य तन्त्रत्वार्थम् । ये तु प्रधानयोर्विप्रभोजनपिण्डदानयोरपि तन्त्रं मन्यन्ते तन्मतं दर्शयति—*अत्र केचिदाहुरिति। प्रधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देशकालकर्तृदैवतैक्ये तन्त्रत्वात् श्राद्धकालातिक्रमापत्तेः,

*द्वाद्दशाहेऽथ सर्वाणि संक्षेपेण समापयेत्।
तान्येव तु पुनः कुर्यात्प्रेतशब्दं न कारयेत्॥

इति कात्यायनोक्तेः,

नैकः श्राद्धद्वयं कुर्यात् समानेऽहनि कुत्रचित्।

इत्यस्य दैवतैक्यपरत्वेऽप्यत्र तत्सत्त्वात्—

श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न कारयेत्।

इति जाबाल्युक्तेः। *षोडशसंख्यायाश्च वाजपेये प्राजापत्ययागसप्तदशत्ववत्सान्नाय्ययागाद्वित्ववच्च दर्शपातसंक्रान्तिश्राद्धवद्युगपदनुष्ठानेप्युपपत्तेः—'आद्यमासिकाद्यूनाब्दिकान्तेषु षोडशश्राद्धेषु क्षणः क्रियताम्' इत्येवं प्रयोगेणैको विप्रः पिण्डोऽर्घ्यश्चेति। *विरुद्धविधिविध्वंसेप्येवम्। तन्मन्दम्,

द्वादशाहेन वा भोज्या*एकाहे द्वादशापि वा।

इति हेमाद्रौ हारीतवचोविरोधात्। तेन विप्रभेदात् पिण्डार्घ्याद्यपि भिन्नमिति सिद्धम्।

एतानि द्वादशाहादौ सपिण्डनात्पूर्वं कृतान्यपि वृद्धिं विनाऽपकर्षे पुनः स्वकाले कार्याणि,

---

नतन्त्रस्य वाचनिकत्वमप्याह—*द्वादशाहे इति। ननु प्रयोगैकषोडशत्वव्याघात इत्यत आह—*षोडशेति। *विरुद्धविधीति। अथाहिताग्नेर्मरणदिनात् पञ्चमे मासि दाहः तदा षष्ठे मासि सपिण्डनं चेत् यानि सुकराणि तानि कृत्वा सापिण्डनप्रागुदिने सर्वाणि कृत्वा सापिण्डनं तदा तस्मात्त्रैपक्षिकान्तं कृत्वा मृताहानि सप्तममासि तृतीयमासिकादि ऊनषाण्मासिकान्तानि। तत्रैकैकं, तत्र शेषमप्यपकृष्य कुर्यात्, ततः सपिण्डनमित्याद्यूह्यम्। *एकाहे द्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्य संवत्सरादर्वाक् सपिण्डीकरणं कृतम्।
मासिकं चोदकुम्भं च देयं तस्यापि वत्सरम्॥

इति मदनरत्नेऽङ्गिरसोक्तेः। न चेदं मासिकानामपकर्षं *विधत्ते किंतु सपिण्डनोर्ध्वं स्वकालेऽनुष्ठानमेवेति वाच्यम्,

श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिण्डताम्।

इति विरोधात्,

यस्य संवत्सरादर्वाग्विहिता तु सपिण्डता।
विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडश॥

इति माधवीये गोभिलोक्तेश्च।

अर्वाक् संवत्सराद्यस्य सपिण्डीकरणं कृतम्।
षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतमः॥

इति तत्रैव गालवोक्तेः। षोडशत्वं चैकादशाहसपिण्डनपक्षे तत्राद्यमासिकस्य कालसत्त्वात्,अन्यपक्षे-

---

दशेति। अयं भावः—यत्र द्रव्यगता संख्या तत्र कर्मणस्तन्त्रत्वेऽपि न बाधः यथा "सप्तदश प्राजापत्यान्" इत्यादौ। यत्र तु कर्मगता संख्या तत्र कर्मणः तन्त्रत्वेऽपि संख्यायाः पृथक्त्वसन्निवेशित्वाद्बाधः यथा षोडशश्राद्धे। एकाहे द्वादश विप्रा भोज्या इति च भोजनरूपप्रधानपृथक्त्वे पर्यवसानादिति। एकाहश्चैकादशाहः उत्तरत्राद्येस्यैकादशे कृतत्वात्तं विनैवानुष्ठानं स्यात्। तदुत्तरदिने वा,

मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा।

इति वचनात्। यदातु तदुत्तरं वृध्यादिवशादपकर्षः प्राप्तस्तदा मृताहे एव अवशिष्टानि कर्तव्यानि एकस्यापि तावत्स्वकालानुग्रहलाभात् इतरेषामपि मृताहसामान्यकालानुग्रहात्। मृताहालाभे तु सपिण्डनदिने एव, तन्निमित्तस्यापकर्षस्य तद्दिन एव कर्तुमुचितत्वात्। *विधत्ते इति। अन्यथोदकुम्भानामप्यपकर्षः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षु यथासंभवं ज्ञेयम् । यत्तु दीपिकायाम्—'अनुमासिकानि तु चरेत्तान्येव सापिण्ड्यतः पश्चात् द्वादश' इत्युक्तेरूनानां न पुनः कृतिरित्युक्तं, तदेतद्विरोधाच्चिन्त्यम्। यत्तु गौडाः—

सपिण्डीकरणान्ता तु ज्ञेया प्रेतक्रिया बुधैः ।

इति शातातपोक्तेर्मासिकानां प्रेतत्वविमोक्षार्थत्वात्सपिण्डनापकर्षे तदन्तन्यायेन तेषामप्यपकर्षान्मासिकानां न पुनः कृतिः । यत्तु 'मासिकं चोदकुम्भं च' इति लौगाक्ष्यादिवचनं, तन्निर्मूलम् । समूलत्वेपि दार्शपरं चेत्याहुः । त उक्तवक्ष्यमाणवचोनिबन्धाविरोधान्मूर्खा इत्युपेक्ष्याः । यत्तु मिताक्षरायां सपिण्डनोर्ध्वं स्वकाले एव कार्याणि अपकर्षस्त्वनुकल्प इत्युक्तम्, तदपि पूर्वविरोधाच्चिन्त्यम्। तेन वृद्धिं विनाऽपकर्षे पुनः *कृतिः।

अर्वाक्संवत्सराद्यस्य सपिण्डीकरणं भवेत् ।
प्रेतत्वमिह तस्यापि ज्ञेयं संवत्सरं नृप ॥

इत्यग्निपुराणात् । वृद्धिनिमित्तापकर्षे त्वस्त्येव तन्निवृत्तिः, अन्यथा वृद्ध्यसंभवादिति शूलपाणिः । कार्ष्णाजिनिः—

*सपिण्डीकरणादर्वागपकृष्य कृतान्यपि ।
पुनरप्यपकृष्यन्ते वृद्ध्युत्तरनिषेधनात् ॥

स्यात् । *कृतिरिति । प्रेतत्वपरिहारार्थमेव तत्करणादिति भावः । अत एवापकृष्य कृतानां स्वकाले पुनः क्रियमाणानां वृद्ध्युपस्थितौ पुनरपकर्षमाह—*सपिण्डीति ।

सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिकम् ।
सांवत्सरविधानेन दद्यादित्याह शौनकः ॥

इति छन्दोगपरिशिष्टं तु येषामुत्तराक्रियाऽनावृत्तिका ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निषेधं चाह कात्यायनः—

निर्वर्त्य वृद्धितन्त्रं तु मासिकानि न तन्त्रयेत् ।
*अयातयामं मरणं न भवेत्पुनरस्य तु ॥ इति ।

द्विरनुष्ठानं चोत्तरेषामेव, न पूर्वेषां स्वस्वकालकृतानाम् । तदाह माधवीये कार्ष्णाजिनिः—

अर्वाद्दाद्यत्र यत्र सपिण्डीकरणं कृतम् ।
तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिः ॥

हेमाद्रौ शाट्यायनिः—

प्रेतश्राद्धानि शिष्टानि सपिण्डीकरणं तथा ।
अपकृष्यापि कुर्वीत कर्तुं नान्दीमुखं द्विजः ॥

वृद्धिं विनापकर्षे दोषमाहोशनाः—

*वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत् ।
स श्राद्धी नरके घोरे पितृभिः सह मज्जति ॥ इति ।

आधानेऽपकर्षमाह हेमाद्रावुशनाः—

पितुः सपिण्डीकरणं वार्षिके मृतिवासरे ।
*आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात् ॥

षां पुनःकरणं निषिध्यान्येषां तत्प्रापकम् । सांवत्सरं पार्वणम् । प्रागुक्तलघुहारीतं तु अशक्त्यारोपेणानावश्यकवृद्ध्यर्थं वा अपकर्षो न कार्य इति बोधयदेव वत्सरान्तान्यसपिण्डनकालानामनुकल्पत्वव्यञ्जकं । *अयातयामं नूतनम् । वृद्धिश्राद्धोत्तरं मासिकाकरणेऽस्य मरणं न नूतनं अन्यथा तु नूतनमिति परिग्रहः । *वृद्धिश्राद्धविहीनः तदुपस्थितिविहीनः । *आधानादीति । आदिना इष्टापूर्तिपरिग्रहः । यत्तु आधानाद्यङ्गभूतनान्दीश्राद्धाधिकारसिध्यर्थमयं सपिण्डनापकर्षः नान्दीश्राद्धस्य चापूर्वाधानेऽङ्गत्वं न पुनराधाने । तस्मात्पित्रादिमरणोत्तरं प्रथमाब्दे अपूर्वाधानसोमयागादि कार्यमिति । तदसत्, एतद्वाक्यस्यापूर्वाधाने प्रवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषस्तूक्तो विवाहनिर्णये। कण्वः—

नवश्राद्धं मासिकं च यद्यदन्तरितं भवेत्।
तत्तदुत्तरसातन्त्र्यादनुष्ठेयं प्रचक्षते॥

गारुडेऽपि—

आपदाद्यकृतं यत्तु कुर्यादूर्ध्वं मृतेऽहनि।

अथ सपिण्डीकरणम्। माधवीये हारीतः—

या तु पूर्वममावास्या मृताहाद्दशमी भवेत्।
सपिण्डीकरणं तस्यां कुर्यादेव सुतोऽग्निमान्॥

त्तेरभावात् यथाचैतत्तथोक्तं—"पितुरब्दमशौचं स्यात्" इत्यत्र पुनराधाने च,

स्नानाधानविवाहेषु नान्दीश्राद्धं विधीयते।

इत्यविशेषेणैव पुनरुपनयनपुनर्विवाहयोरिव नान्दीश्राद्धस्याङ्गतया प्राप्तेः तत्रैवैतत्प्रवृत्तेरुपपत्तेः। इदं तु बोध्यं प्रेतश्राद्धानि शिष्टानि सपिण्डीकरणादर्वाग् इति विध्योः "निर्वर्त्य वृद्धितन्त्रं तु" इति निषेधस्य च सामान्यरूपत्वेपि चौलोपनयनविवाहाधानेष्टा तेष्वेव प्रवृत्तिः नतु गर्भाधानपुंसवनसीमन्तजातकर्मनामान्नप्राशनादिषु, दाक्षिणात्यानां तथैवाचारात्। जातकर्मादौ केषांचित् मासिकाद्यपकर्षाचारस्तु नादरणीयः, न्यायविरोधात्। यथा यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं विना क्षिपेत् न्यग्धस्तिमिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तस्मै भक्षं प्रयच्छेत् सोममिति राजन्यवैश्यनिमित्तविहिते फलचमसे सोमाङ्गानां याभिषवादिविधीनां न प्रवृत्तिः नित्यानित्यसंयोगविरोधात् नित्यस्य सोमधर्मस्य क्रयादेरनित्येन फलचमसेन संयोगः सा या विरुद्धो नित्यक्रयादिभिर्ज्योतिष्टोमे उपकुर्यादनित्यफलेन सद्वारेति वाक्यार्थोपगमेन उपपन्न इति यावत्। तथात्रापि यतो मासिकापकर्षो मृताह एव कार्यः, एकस्यापि स्वकाललाभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*मृताहादूर्ध्वं दशमी एकादशीत्यर्थः ।
सपिण्डीकरणं कुर्यात्पूर्ववच्चाग्निमान्सुतः ।
परतो (१)दशरात्राच्चेत्कुहूरब्दोपरी*तरः ॥

इतरेषामपि मृताहरूपसामान्यकालानुग्रहात् नान्यतिथौ । तथाच जातकर्मादिष्वपि । अधिकृतस्यैवापकर्षेऽधिकारो नान्यस्य । नच जननात् प्राग् जातकर्माधिकारोऽस्ति येन सोऽपकर्षे स्यात् । जन्मोत्तरं जातकर्माधिकारे च सूतकेन प्रतिबन्धात्तन्निवृत्तावेकादशाहनियमेन मृताहासम्भवान्नित्यानित्यसंयोगविरोधः जातकर्माणि नित्यमपकर्षः कार्यः स चानियतमृताहप्राप्ताविति वाक्यार्थसम्भव इति यावत् । एवं गर्भाधाने षोडशादिनावधिऋतुकालेऽप्यनियत एव मृताहः । एवं नामकर्मणि । षष्ठे मास्यन्नप्राशनमित्यादौ प्रायशो मृताहसम्भवेऽपि यस्य मृताहो दर्शे तदुत्तरप्रतिपदि शिशोः षष्ठमासप्रवृत्तिः, तत्र मध्ये मृताहासम्भवादुत्तरे वर्षे मासस्यैव समासत्वान्न नियमेन मृताह इति न तत्रापकर्षः नापि वृध्युत्तरनिषेधप्रवृत्तिः । तृतीये वर्षे चौलमिति वर्षादिविहितचौलादिषु च नियमेन मृताहसम्भवात्तत्रैवापकर्षः । एवमनियतकालेष्विष्टापूर्तादिष्वपकर्षः नियमेन मृताहसम्भवात् । ननु वर्षाधिकारेऽप्युपनयनादौ अष्टमवर्षान्त्यकाले मुहूर्तो धृतः तन्मास एव कर्तुः पित्रादेर्मृतत्वात्सपिण्डनार्थमपकृष्टानामपि मासिकानामुपनयने वृद्धिश्राद्धार्थमपकर्षे मृताहासम्भवात् पूर्वोक्तन्यायप्रवृत्तिर्दुर्वारेति चेत् ? ईदृशान्तिममुहूर्तनिश्चयस्य पुरुषापराधप्रभवत्वेन मृताहापकर्षकर्तव्यताविध्याविघातत्वात् । अतस्तत्र नवमवर्षे एवोपनयनं कार्यम् । तस्माच्चौलादिष्वेवापकर्षो न गर्भाधानादिषु । अत एव कालकाण्डहेमाद्रिप्रयोगपारिजातादिषु गर्भाधानाद्युल्लङ्घ्य चौलादिष्वेवापकर्षविधिवि-

(१) 'दशरात्रस्य पूर्णे त्वब्दे तथेतरे' क०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति कार्ष्णाजिनिस्मृतेः । *आहिताग्नेस्तेन विना श्रौ-
तपिण्डपितृयज्ञासिद्धेः । तदाह गालवः-

सपिण्डीकरणात्प्रेते पैतृकं पदमास्थिते ।
आहिताग्नेः सिनीवाल्यां (१)पितृयज्ञः प्रवर्तते ॥

मदनरत्ने प्रजापतिः-

*नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।

षयो दर्शित इति । आहिताग्नेः पुत्रस्य पित्रोः सपिण्डने कालत्रयं
दर्शरूप एकादशाहः दशाहात् परं दर्शात् पूर्वं यत्किञ्चिद्दिनं
द्वादशाहो वेति क्रमेण दर्शयति—*या त्वित्यादि । अत्र साग्नि-
कपदान्याहिताग्निपराणि । तत्राग्निपदं त्रिधुरान्याग्निपरं, विच्छि-
न्नाग्नेः पितृयज्ञस्याकर्तव्यत्वात् पार्वणश्राद्धस्यानावश्यकत्वाच्च ।
अनग्न्यादिपदान्यनाहिताग्निपराणि । *मृताहादिति । यदि
तु मृताहादशमी या रात्रिस्ततः परो दर्श इति व्याख्यायते तदा द-
शाहात् परो दर्शः कालो लभ्यते नान्यथा दर्शात्मकैकादशाहस्या
नियतत्वात् । *इतरः अनाहिताग्निः । *आहिताग्नेरिति
औपासनाग्निमतस्तु दशाहान्तःपातिदर्शवत् पितृयज्ञलोपः न
तस्य पितृयज्ञानुरोधादुक्तकाले सपिण्डनमपि । *नासपिण्ड्येति

पापी भवत्यकुर्वन् हि पितृहा चोपजायते ।

इत्युत्तरार्धेन स्मार्ताग्निमतः पितृयज्ञाकरणे पापाभावो ध्वन्य-
ते । तस्योक्तकालाविधानात् । यथाऽनाहिताग्नेर्विहितो "यदह-
वृद्धिरापद्येत" इति कालः आहिताग्नेर्न प्रवर्तते एवमाहिताग्नेर्वि-
हितकालोऽप्यनाहिताग्नेः, आहिताग्न्यधिकारिककालनियम-
बाधवदनाहिताग्न्यधिकारिकतन्नियमाबाधस्यैवौचित्यात् । अ-
तु साग्निकेन पितृयज्ञाधिकारिणा सम्भवे आशौचोत्तरदिनमा-
भ्य द्वादशसु दिनेषु प्रोक्तरीत्या षोडशश्राद्धानि विधाय तदुत्तरं

(१) 'प्रेतयज्ञः' क०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपरार्के कात्यायनः-

एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि ।
प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिण्डताम् ॥

आशौचान्तप्रथमदर्शयोर्मध्ये कस्मिंश्चिदह्नीत्यर्थः । पित्रादीनां सपत्नीकानां देवतात्वेन *मातुरपि तत्रानुप्रवेशान्मातुरपि प्राग्दर्शात्सपिण्डनं *युक्तमित्यपरार्कः ।

ने पितृपितामहप्रपितामहान्यतमस्य मात्रादीनां च सपिण्डनं कार्यम् । तदुत्तरदर्शे पितृयज्ञः दर्शात्पूर्वं तावत्कालासम्भवे "एकाहं द्वादशाथवा" इति पक्षेणाशौचोत्तरदिने तन्त्रेण षोडशश्राद्धानि विधाय तदुत्तरदिने दर्शादर्वाग् यत्र क्वापि दिने वा सपिण्डनं कृत्वा दर्शे पितृयज्ञः "एकादशाहान्तं निर्वर्त्य" इति वाक्यात् । द्वादशदिन एव दर्शपाते तत्रैव सपिण्डनं पितृयज्ञश्च । एकादशाहे तत्पाते तु तत्रैव षोडशश्राद्धानि सपिण्डनं पितृयज्ञश्च । "सपिण्डीकरणं कुर्यात्" इत्यत्र दशरात्रस्य परतः पूर्वे दर्शे इत्यन्वयेन "या तु पूर्वममावास्या" इत्यत्र मृताहावधिकदशमीत्वोक्त्या चाशौचान्त्यदिनानन्तरभाविदर्शविषयत्वात् । सपिण्डनं कृत्वा पितृयज्ञस्तु दुष्करः तथाचोक्तं "नासपिण्ड्याग्निमान्" इत्यादीनि वदन्ति। *मातुरपीति । पितामह्यादेरुपलक्षणमनुप्रवेशादिति ।

एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके ।

इति वचनात् । *युक्तमिति । मातापित्रोरिति स्पष्टमुक्तमित्यर्थः । नचैवं श्राद्ध इव पिण्डपितृयज्ञेऽपि सपत्नीकत्वेन पित्रादिनिर्देशापत्तिः तं विनाप्यसम्भावित्वोपपत्तेः मातुर्मातामहेन सपिण्डने तत्पिण्ड इव एकमूर्तित्वमायातीतिवचनात् अन्यथा मातामहांशभागित्वार्थं तस्यापि सदुहितृकत्वेन निर्देशापत्तेः । अत्र सुतः पुत्रः मातापित्रोरितिपदवशात्साग्निकः पुत्र एव । अनग्निकोऽपि स एव तत्प्रतियोगित्वादिति मतं निराकर्तुमाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*एवं पितामहादेरपि सपिण्डनं प्राग्दशात्कार्यम् । *तेन विना *पार्वणायोगात् । द्वादशाहे वा कार्यम् ।

साग्निकस्तु यदा कर्ता प्रेतश्चानग्निमान्भवेत् ।
द्वादशाहे भवेत्कार्यं सपिण्डीकरणं सुतैः ॥

इति गोभिलोक्तेः । साग्नेः प्रेतस्य तु त्रिपक्षे,

प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनग्निर्यदा भवेत् ।
सपिण्डीकरणं तस्य कुर्यात्पक्षे तृतीयके ॥

इति सुमन्तूक्तेः । मदनरत्ने लघुहारीतोपि-

अनग्निस्तु यदा वीर भवेत्कुर्यात्तदा गृही ।
प्रेतश्चेदग्निमांस्तु स्यात्त्रिपक्षे वै सपिण्डनम् ॥

---

*एवमिति । पिण्डपितृयज्ञार्थं साग्निकस्य कर्तुः साग्नेर्निरग्नेर्वा प्रेतस्य सपिण्डने द्वादशाहादिविधिषु पितृग्रहणं पितामहप्रपितामहयोर्मातृग्रहणं पितामहीप्रपितामह्योश्चोपलक्षणं पुत्रग्रहणं च पौत्रप्रपौत्रयोः । अन्यथा तद्देवताकपितृयज्ञानिर्वाहात् । निरग्नेस्तु कर्तुः साग्निकस्य निरग्निकस्य वा प्रेतस्य त्रिपक्षद्वादशाहादिविधिषु पितृपुत्रग्रहणं नोपलक्षणं मानाभावादित्यर्थः। हेत्वन्तरमाह-*तेनेति । *पार्वणेति । मृतपितृकस्य साग्निकस्य पितृयज्ञवदर्शश्राद्धमप्यावश्यकम् ,

नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत् ।
न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम् ॥

इति प्रजापतिनाऽऽवश्यकाभ्युदयसाहचर्येण पार्वणोक्तेः त्रिपक्षे वै इति अधिकरणसप्तमीवशात्तृतीयपक्षः स कालः न तु तत्पूर्त्यनन्तरा मृतसजातीया तिथिः, तस्यास्तर्हि भूतत्वात् । एवं त्रिमासषण्मासादावपि । प्रेतश्राद्धनिषिद्धतिथिनक्षत्रादिकं तु तत्र त्याज्यम् । वैशब्दादाहिताग्नेस्त्रिपक्ष एवेति नियमः । न त्वस्यैव त्रिपक्ष इति अग्रिमभविष्यविरोधात् । विरुद्धनियमोपगमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वयोः साग्निकत्वे द्वादशाह एव,

साग्निकस्तु यदा कर्ता प्रेतो वाप्यग्निमान्भवेत् ।
द्वादशाहे तदा कार्यं सपिण्डीकरणं *पितुः ॥

इति तेनैवोक्तेः । द्वयोरनग्निमत्त्वे तु भविष्ये—

सपिण्डीकरणं कुर्याद्यजमानस्त्वनग्निमान् ।
अनाहिताग्नेः प्रेतस्य *पूर्णेऽब्दे भरतर्षभ ॥

त्रिपक्षेऽकृतसपिण्डनस्य नैव सपिण्डनं स्यादिति चेत् ? न, नियमेन एकादशाहद्वादशाहयोः पूर्वकालयोरेव निवृत्तिर्नतूत्तरभाविनां तृतीयमासादीनां, द्वादशाहादिकालेष्विति गोभिलवाक्यात् ।

स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः ।

इति मण्डनोक्तेश्च । अत्र विच्छिनाग्नेस्त्रिपक्ष एवात्मन्यग्निसत्त्वेन साग्नित्वात् । यत्र च दम्पत्योरन्यतरस्य पूर्वं मरणेनाग्नयो गतास्तत्रेतरस्य कालान्तरे मरणे साग्नित्वाभावान्न त्रिपक्षनियमः । उत्सृष्टाग्नेरप्येवम् । *पितुरिति । पितुरित्युक्तेः पित्रादिभिन्नस्य साग्निकस्यापि कर्तुर्न द्वादशाहनियमः । नच पितुरित्यविवक्षितम् , उभयोः साग्निकस्यापि कर्तृत्वापत्तेः । एवं साग्निकायाः पत्न्याः पुत्राभावात् पत्या सपिण्डने न द्वादशाहनियमः पुत्रग्रहणात् साग्निपदस्य विद्यमानाग्निपरत्वाच्च । नापि तस्या अनग्निकर्तृके साग्नेः सपिण्डने त्रिपक्षविधानात्त्रिपक्षनियमः,

प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनग्निर्यदा भवेत् ।

इत्यत्राहिताग्निपदवशादनग्निनाऽनाहिताग्नेरेव ग्रहणात् । एवं साग्निकः पतिः पत्न्याः सपिण्डनं करोति तत्र न द्वादशाहत्रिपक्षयोर्नियमः । *पूर्णेऽब्दे इति । अतीते इत्यनेन व्यक्तम् । तत्राशक्तावेकादशो मासः, तत्राप्यशक्तौ नवमः, तत्राप्यशक्तौ आशौचान्त्यदिनोत्तरं दिनमारभ्य द्वादशसु अहःसु षोडशश्राद्धानि कृत्वा त्रयोदशेऽह्नि, तत्राप्यशक्तौ एकादशाहे द्वादशाहेऽप्येव वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादशेऽहनि षण्मासे त्रिपक्षे वा त्रिमासि वा ।
एकादशेऽपि वा मासि *मङ्गलस्याप्युपस्थितौ ॥

तानि कृत्वा मृतिदिनाद् द्वादशाहे इत्यर्थः षाण्मासादित्रिके पूरणप्रत्ययार्थविवक्षया षष्ठमासादावित्यर्थः । तेषां च षष्ठमासादीनां समस्तानामेवाङ्गत्वमधिकरणत्वात् । नतु तदुत्तरतिथेः 'पूर्णे' इत्यस्मरणात् । संवत्सरान्वयित्वेन श्रुतस्यानुषङ्गे प्रमाणाभावात्—"मासं दर्शपूर्णमासाभ्याम्" इत्यादिषु "उपसद्भिश्चरित्वा" इत्यस्येव। तेन षष्ठमासादिगते इति हेमाद्रिः प्रत्युक्तः । ननु आहिताग्नेः प्रेतस्याहिताग्निश्चेत् कर्ता तदा द्वादशाहनियमात् अनाहिताग्निश्चेत्कर्ता तदा त्रिपक्षनियमादेतौ कालौ अनाहिताग्नौ प्रेते अनाहिताग्नेः कर्तुः कथं स्याताम् ? नहि तयोरयमेव काल नान्य इत्येवनियमो नान्यादृश इति मन्तव्यम् । "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्यादिषु एकवाक्योपादानाद्ब्राह्मणादयो वसन्तादिष्वेव वसन्तादिषु ब्राह्मणादय एवेति द्वयोरपि कर्तृकालयोर्मिथोनियमद्वयस्य दुर्वारत्वात् । मैवं, तत्र कर्तृकालविशेषयोरैककर्म्यादरुणैकहायनीवद्युक्तो मिथोनियमः । इह तु सापिण्डनस्य वाक्यान्तरेण विधानेनाविधेयत्वात्क्रियानुवादेन गुणद्वयविधेरसम्भवात्, यदा चेत्यादिशब्दैः कर्तृप्रेतसाग्निकत्वादेर्निमित्तत्वेन स्पष्टमुपादानाच्च तयोः स एव कालो नान्य इत्येक एव नियमः । अत एवाऽऽनन्त्यात्कुलधर्माणामिति व्याघ्रवचनमपि साग्निप्रेतकानग्नौ कर्तरि न प्रवर्तते । एवं हेमाद्रिमाधवादिसकलनवीनप्राचीनधार्मिकसंमते साग्नौ प्रेते अनग्नौ कर्तरि त्रिपक्ष एवेति नियमे स्थिते, ये—

आहिताग्निः पिता चाथ पुत्रश्चानाग्निमान् भवेत् ।
त्रिपक्षादौ द्वादशेऽन्हि त्रयोदशदिनेऽथवा ॥
सापिण्डीकरणं तस्य कुर्यादिति पितामहः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कात्यायनगोभिलौ–'यदहर्वा वृद्धिरापद्येत' इति । तच्च वृद्धिदिन एवेति वाचस्पतिः । तन्न, 'प्रातर्वृद्धिनिमित्तकम्' इति नियमात्सापिण्डनस्य चा*पराह्णकालीनत्वेन पूर्वत्वबाधापत्तेः । *वृद्धिदिने तत्पूर्वदिने वेति श्रीदत्तः । *स्मार्तगौडस्तु 'वृद्धिपूर्वो वर्षान्त्यश्च क्षणः सापिण्डनस्य प्रेतत्वनाशे सहकारी । तेन परेद्युर्विघ्नाद्वृद्ध्यभा-

---

इति पद्यं वृद्धगार्ग्यनाम्ना—

उभयोः साग्निकत्वेऽपि निरग्नित्वेऽपि वै सुतः ।
पितुः सापिण्डनं कुर्याद् द्वादशेऽह्नयेव नित्यशः ॥

इति पद्यमाङ्गिरोनाम्ना—

कर्ताऽनग्निर्यदा प्रेतः साग्निकस्तु भवेत्तदा ।
त्रिपक्षादौ च सापिण्ड्यं द्वादशेऽह्नयथवा भवेत् ॥

इति पद्यं लघुहारीतनाम्ना च मुक्तकण्ठाः पठन्ति तत्र "यवमयश्चरुर्भवति" इत्यादौ यथा दीर्घशूकेषु यवशब्दप्रसिद्धिरार्याणां कंगौ तत्प्रसिद्धिर्म्लेच्छानाम् । अतो म्लेच्छप्रसिद्धिं विहायार्यप्रसिद्धेरुपग्रह आर्यम्लेच्छन्याये दर्शितस्तथा त्रिपक्षादिरेवानाहिताग्नौ कर्तरि साग्नेः प्रेतस्य सपिण्डीकरणकालः हेमाद्रिमाधवप्रभृतिसमस्तानामार्याणां संमतः द्वादशाहस्तु तादितरेषामिति इतरमतं कालं विहायार्यमतः काल एवोपादेयः । किञ्च प्रेतत्वनिवृत्तिसहितापितृत्वप्राप्तिमुद्दिश्य सपिण्डनं विहितं, तच्च कथं धार्मिकाननुमते द्वादशाहे तस्य तत्कर्तृकसपिण्डनाद् वृथा चेष्टारुपालभ्येत, तत्र तथाचेष्टां कुर्वन वा पितृद्रोग्धा न स्यादिति ? वृद्धिनिमित्तं सपिण्डनापकर्षमाह–*मङ्गलस्यापीति । *अपराण्हकालीनत्वेनेति । मध्याह्नकालीनत्वेन वेति शेषः । *वृद्धिदिने इति । यत्र नान्दीश्राद्धमपराण्हे तत्र वृद्धिदिने, यत्र तत्र प्रातस्तत्र पूर्वदिने इत्यर्थः। वृद्धिपूर्वदिनस्य सापिण्डनकालत्वं दूषयतां मतमाह–*स्मार्तगौड-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेऽपि 'तत्कर्तव्यतानिश्चयसहितमेव कालान्तरक्रियमा-
णवृद्धिपूर्वक्षणसहकृतं प्रेतत्वनाशकम्' इत्याह । तन्न,
*अकाले कृतस्य फलाजनकत्वात् । एतेन निमित्तनिश्च-
यवत एवाधिकाराद्वृद्ध्यभावेऽपि न क्षतिरिति मिश्रोक्तिः
परास्ता । वृद्धिपूर्वदिनस्य *वर्षान्तस्य च कालस्या-
ङ्गत्वेन निमित्तत्वाभावात् । तेन पुनः कार्यमित्यन्ये ।
मदनरत्ने पुलस्त्यः—

निरग्निकः सापिण्डत्वं पितु*र्मातुश्च धर्मतः ।
पूर्णे संवत्सरे कुर्याद्वृद्धिर्वा यदहर्भवेत् ॥

चतुर्विंशतिमते—

सपिण्डीकरणं चाब्दे संपूर्णेऽभ्युदयेपि वा ।
द्वादशाहे *तु केषांचिन्मतं चैकादशे तथा ॥

हित्वेति । *अकाले इति । मासानन्तरं वृद्धिः कर्तव्येति
निश्चयवतोऽप्यधिकारापातादिति भावः । *वर्षान्तस्येति मृता-
हस्य वर्षान्तस्य पक्षेण स्मृत्यर्थसारमतेन च । वस्तुतस्तु आपद्येतेति
गोभिलस्य सन्निधीयेतेत्यर्थाद् वृद्धिसन्निहिते दिने इत्यर्थः ॥

पितुः सपिण्डीकरणं वत्सरादूर्ध्वतः स्थितम् ।
वृद्धिरागामिनी चैत्स्यात्तदाऽर्वागपि कारयेत् ॥

इति नागरखण्डात् । सन्निहितादिनं च पूर्वं तत्रासम्भ-
तत्पूर्वादिकम् । सम्भवति च मृताहे मासिकानि कृत्वा सपिण्ड-
ततो वृद्धिरिति । *मातुश्चेति । चकारो मातामहादिसङ्ग्रहा-
यतो वृद्धिनिमित्तकः सपिण्डनापकर्षो वृद्धिश्राद्धार्थः, सपिण्ड-
विना पितृत्वप्राप्त्यभावेन श्राद्धस्यैव दुष्करत्वात् । *तु केषांचि-
दिति । द्वयोर्निरग्निकयोरेकादशाहोपि सपिण्डीकरणकाल इत्यर्थः
न चायं दर्शात्मक एकादशाहः पिण्डपितृयज्ञाधिकारिकसाग्निक-
कर्तृविषय एवास्तीति वाच्यं, वर्षान्तरूपसपिण्डनकालान्तरानु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृथ्वीचन्द्रोदये बौधायनः—*'अथ सपिण्डीकरणं, त्रिपक्षे वा तृतीये वा मासि, षष्ठे वैकादशे वा द्वादशे वा द्वादशाहे वैकादशाहे वा' इति । एतत्प्रक्रमे विष्णुः—'मासिकार्थं द्वादशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि वा कुर्यात् । मन्त्रवर्ज्यं हि शूद्राणाम् । द्वादशेऽह्नि संवत्सराभ्यन्तरे यद्यधिमासो भवेत्तदा मासिकार्थं दिनमेकं वर्धयेत्' इति । आशौचोत्तरं द्वादशस्वहस्सु मासिकानि । तेष्वेवाद्यषष्ठद्वादशादिनेषून*मासिकादीनि कृत्वा त्रयोदशेऽह्नि सपिण्डनं कुर्यात् । अधिमासे तु चतुर्दशेऽह्नि कुर्यात् । *शूद्रस्त्रयोदशे "द्वादशेऽह्नि' इत्यस्य मासिकान्त्यदिनपरत्वादिति पृथ्वीचन्द्रः । पैठीनसिः—'संवत्सरान्ते सपि(१)ण्डनं नवमे मासीत्येके ।' अत्र*साग्रेरनग्रेर्वोक्तकालाभावे त्रिपक्षादिसंवत्सरान्ता अनुकल्पा ज्ञेयाः । कल्पतरुस्त्वग्रे वृद्धिनिश्चय एव सर्वेऽपकर्षप्रकारा इत्याह । तन्न, 'यदहर्वा' इति स्वातन्त्र्यश्रुतेः । यद्यपि

धेनैतद्वाक्यस्य द्वयोरनग्निविषयत्वात् । एकादशाहद्वादशाहशब्दौ तु आशौचान्त्यदिनोत्तरदिनतदुत्तरदिनपराविति स्मर्तव्यम् ।

*अथ सपिण्डीकरणमिति । द्वादशेवेत्यत्रातीते इति शेषः । अथ संवत्सरे पूर्णे सपिण्डीकरणमिति पाठे द्वादशे वेति न पाठः, मयूखादौ तदलेखात् । मासिकानामर्थः प्रयोजन प्रेतत्वनिवृत्तिस्तद्वत् ।*ऊनमासिकादीति । आदिना त्रैपक्षिकोनषष्ठोनाद्धपरिग्रहः । श्राद्धशब्दस्य षोडशश्राद्धपरत्वात् । *शूद्र इति । अधिमासे इति वर्तते । अयमर्थः—द्विजातीनामाशौचापगमोत्तरं त्रयोदशे अधिमासपाते चतुर्दशेऽह्नि अपकर्षं विधाय शूद्राणां न तत्राह्नि किन्तु द्वादशदिन एव आधिकपाते त्रयोदशदिन एव तत्र कर्त-

---

(१) 'संसर्जनं' ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृद्धिनिमित्तोपकर्षो निरग्नेरेवोक्तस्तथापि साग्नावपि ज्ञेयः। उक्तकालासंभवे वर्षान्तादिगौणकालवद्वृद्धेरपि प्राप्तेः, वक्ष्यमाणगोभिलवचनात्;

अयातयामं मरणं न भवेत्पुनरस्य तु।

इति दोषश्रुत्यविशेषाच्च। अपरार्कपृथ्वीचन्द्रादिस्वरसोऽप्येवम्। अत्र वृद्धिपदं चूडोपनयनविवाहमात्रपरम्। सीमन्तादौ तु वृद्धिश्राद्धलोप एवेत्याचार्यचूडामणिः। पुंसवनाद्यन्नप्राशनान्तेष्वावश्यकेष्वपकर्ष इति श्राद्धविवेकः। स्मृ(१)तिसागरेपि बृहस्पतिः—

प्रत्यवायो भवेद्यस्मिन्नकृते वृद्धिकर्मणि।
तन्निमित्तं समाकृष्य पित्रोः कुर्यात्सपिण्डनम्॥

गर्भाधानस्य ऋत्वन्तरेऽपि संभवात्।

अन्यश्राद्धं परान्नं च गन्धमाल्यं च मैथुनम्।

इति देवलेन प्रथमाब्दे मैथुननिषेधाच्च न तत्रापकर्ष इति श्राद्धकौमुद्यादयः। तन्न, 'ऋतुस्नातां तु यो भार्याम्' इति निषेधात्, 'ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रश्च वर्जयेत्' इति मैथुने दोषाभावाच्च। पितामहमरणे पौत्रस्य वृद्धौ नापकर्षः तस्य *महागुरुत्वाभावात्। तत्र तदूर्ध्वभ्यो वृद्धिश्राद्धमिति श्राद्धचन्द्रिका। तन्न, 'भ्रातव्यं मासिकं कृत्वा सपिण्डनापकर्षः कार्यः। मासिकार्थवदिति पूर्वभागैकवाक्यत्वादिति। *साग्नेरिति। साग्नेर्द्विविधस्यापि कर्तुर्द्वादशाहः निरग्नेस्तु साग्निप्रेतस्य त्रिपक्षः निरग्निप्रेतस्यान्तः वृद्ध्युपस्थितिमांश्च कालो मुख्यः, तदभावे इत्यर्थः। अत्रेत्यादिमतत्रये वक्ष्यमाणदाक्षिणात्याचाराविरोधोऽस्वरसः। *महेति

महागुरौ प्रेतभूते वृद्धिकर्म न चाचरेत्।

(१) 'श्रुतिसागरे ग०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च' इत्यादौ तदभावेऽप्यपकर्षोक्तेः । तेन *निर्देशोऽप्युपलक्षणम् ।

व्याघ्रः—

*आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् ।
अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यते ॥

*एतदाशौचान्तोपलक्षणम्--

इति निषेधात् । *निर्देशः महागुरोः ।

*आनन्त्यादिति कुलधर्माणां सपिण्डीकरणाभावेऽनुष्ठातुमशक्यानां तृतीयपञ्चमवर्षादौ चूडाकरणादीनां प्रतिकुलं व्यवस्थितानां मङ्गल्यानां च । एतेन सपिण्डनाधिकारिणा तदनुष्ठानं यावद् वृद्धिश्राद्धानङ्गकमपि कुलाचारादिप्राप्तं मङ्गल्यं कर्म न कर्तव्यमिति ध्वन्यते । शरीरस्यास्थितिः परचक्राक्रमणादिनिमित्तकपलायनादिना सपिण्डनसामग्रीमदेशानवस्थानं रोगादिना कर्मकरणसामर्थ्यरूपस्थित्यभावो वा । एतच्च वचनमायुःक्षयादिसम्भावनानिमित्तं सपिण्डनापकर्षं विदधान्निरग्न्युभयमात्रविषयं, साग्निककर्तृसपिण्डनापकर्षस्य पितृयज्ञादिनिमित्तत्वात् । एवं सति द्वादशाहस्य प्रशस्तत्वं भवति । संवत्सरान्त एव वस्तुतोऽनुष्ठेयस्य सपिण्डनस्योक्तत्रयान्यतमसम्भावनयाऽर्वाक्त्रिपक्षादावप्यनुष्ठानं चेदनन्तरद्वादशाहे एव तदस्थितिः । एतच्च द्वयोर्निरग्निप्रकरणस्थमिति स्वयमत्रोपनिबद्धमयुक्तं चान्यत्र । साग्निककर्तृकसपिण्डने द्वादशाहेतरकालस्य गौणतया तदभावे स्वत एव प्रशस्ते द्वादशाहे तद्बोधानुपयोगात् । साग्निप्रेतमात्रे द्वादशाहस्य विधातुमनीशतया तद्बोधे बाधाच्च । केचित्तु एतद्यत्र द्वादशाहः प्राप्तः तत्र तस्य प्राशस्त्यबोधकम् । तथाच प्रेतमात्रस्य साग्नित्वे तस्याप्राप्तत्वान्न द्वादशाहः किन्तु त्रिपक्ष एवेत्याहुः । द्वादशं च तदहश्चेति विग्रहः ततः मृतिदिनाद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वेषामेव वर्णानामाशौचान्ते सपिण्डनम् ।

इति निर्णयामृते कात्यायनोक्तेः । सर्वेषामिति त्रैवर्णिकपरम् । शूद्राणां त्वाशौचमध्ये,—

मन्त्रवर्जं हि शूद्राणां द्वादशेऽहनि कीर्तितम् ।

इति विष्णूक्तेः । एतद्दर्शश्राद्धकारिशूद्रविषयमित्यपरार्के कल्पतरौ च । वृद्धमनुः—

*द्वादशेऽहनि विप्राणामाशौचान्ते तु भूभुजाम् ।

वैश्यानां तु त्रिपक्षादावथ वा स्यात्सपिण्डनम् ॥

निर्णयामृते गोभिलः—

द्वादशाहादिकालेषु प्रमादादननुष्ठितम् ।

सपिण्डीकरणं कुर्यात्कालेषूत्तरभाविषु ।

इदं *साग्नेरुक्तकालासम्भवे गौणकालविधानार्थमिति मदनपारिजातः । मदनरत्नेऽप्येवम् । ऋष्यशृङ्गः—

*सपिण्डीकरणं श्राद्ध*मुक्तकाले न चेत्कृतम् ।

रौद्रे हस्ते च रोहिण्यां मैत्रभे वा समाचरेत् ।

द्वादशे त्वस्य विप्रमात्रपरत्वं स्यादत आह—*एतदिति । दशमपिण्डदानस्याजातत्वादिति । सच्छूद्रस्य दशाहाशौचस्य ज्ञापितत्वात् । ततश्च तस्य दर्शश्राद्धार्थतया साग्निकविप्रवदयं सपिण्डनापकर्षः । अत्र मासाद्याशौचिशूद्राणामपि द्वादशाहे सपिण्डने कथं विरोधः ? प्रेतत्वानिवृत्तेः सत्त्वात् । दशमपिण्डानन्तर्यस्य वचनवशेन त्यागादिस्वरसः । दर्शितनिष्कर्षमालोच्य त्रैवार्णिककालं व्यवस्थाप्याह—*द्वादशेऽहनीति । *साग्नेरिति । साग्निप्रेतमात्रस्येत्यपि द्रष्टव्यम् । तेन द्वयोरनग्नित्वे वचनवैय्यर्थ्यं न शङ्क्यम् । साग्निनिरग्निसाधारण्येन संवत्सरान्तेऽपि यदि सपिण्डनं जातं तदा कथमित्यत्राह—*सपिण्डीति । *उक्तकाले वत्सरान्ते । प्रोक्ताः सपिण्डनकाला लाघवात्तदधिकारा अन्यैर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालादर्शेपि—

*एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि वा ।
षष्ठे चैकादशे वाब्दे संपूर्णे वा शुभागमे ॥
सपिण्डीकरणस्येत्थमष्टौ कालाः प्रकीर्तिताः ।
साग्नौ कर्तर्युभावाद्यौ प्रेते साग्नौ तृतीयकः ॥
अनग्नेस्तु *द्वितीयाद्याः सप्त काला मुनीरिताः ।
*रोहिणीरौद्रहस्तेषु मैत्रभे वापि तच्चरेत् ॥

नारदसंहितायां तु—

सपिण्डीकरणं कार्यं वत्सरे वा*र्धवत्सरे ।
त्रिमासे वा त्रिपक्षे वा*मासि वा द्वादशेऽह्नि वा ॥

इत्युक्तं, *तच्च वत्सरेऽतीते ज्ञेयम्,
ततः सपिण्डीकरणं वत्सरात्परतः स्थितम् ।

पि संगृहीता इत्याह-*एकादशे इति । *द्वितीयाद्या इति । एकादशाहं नवममासं च कालं कालादर्शकृतो न लिखन्ति । *रोहिणीति नक्षत्रम् । सपिण्डनं यावद्वार्षिकपार्वणानुष्ठातॄणामपि वार्षिकमेकोद्दिष्टं श्राद्धं पितृत्वप्राप्त्यभावात् । *अर्धवत्सरे इत्यधिकरणसप्तमी । *मासि वेति । मृताहात्त्रयोविंशतितमे दिनेऽधिकपाते विंशतिमे दिने इति पक्षे । ननु प्राक् पूर्णेऽब्दे इत्यत्र न सतिसप्तमी कारकसप्तम्या बलीयस्या बाधात् । नच पूर्णत्वं न पूर्तिक्षणस्य सपिण्डनाधारत्वासम्भवादिति वाच्यं, लक्षणया पूर्तितिथिमत्त्वसम्भवात् । अत एवात्र वत्सरस्यैवाधिकरणत्वमुक्तमित्यत्राह—*तच्च वत्सरेऽतीते इति । शूलपाण्यादयस्तु आद्यमृताहावधिकषष्ठ्यधिकशतत्रयतिथ्यात्मकः संवत्सरः, तदन्यमृताहे सपिण्डनम् "ततः संवत्सरे पूर्णे" "समाप्ते संवत्सरे" इत्यादिष्वधिकरणसप्तमी । पूर्तिसमाप्ती च नान्त्यकलारूपे तत्र श्राद्धासम्भवात्, किन्त्वन्त्यदिनरूपे--

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति भविष्योक्तेः,

पितुः सपिण्डीकरणं वत्सरादूर्ध्वतः स्थितम् ।

इति नागरखण्डोक्तेः ।

पितुः सपिण्डीकरणं वार्षिके मृतिवासरे ॥

इत्युशनसोक्तेश्च ।

*पूर्णे संवत्सरे पिण्डः षोडशः परिकीर्तितः ।

तेनैव च सपिण्डत्वं तेनैवाब्दिकमिष्यते ॥

इति हेमाद्रौ वचनाच्च । अस्यानाकरत्वोक्ति*र्मूर्खोक्तिरेव । यत्तु—

पूर्णे संवत्सरे कुर्यात् सपिण्डीकरणं सुधीः ।

*एकोद्दिष्टं च तत्रैव (१)मृतेऽहनि समापयेत् ॥

सम्पूर्णे तु ततो मासे पिण्डशेषं समापयेत् ।

शूद्रस्य दशमः पिण्डो मासे पूर्णेऽन्हि दीयते ॥

इत्यादिवत् । यद्वा, संवत्सरपदमेकादिनाधिकवत्सरपरम् । "संवत्सरान्ते प्रेताय" इत्यादिवैष्णवेऽधिकैकादिनकवर्षस्यान्तो मृताह इत्यर्थ इति । तत्र वस्तुतः सपिण्डनकालस्याभेदेऽपि मृताहं गृहीत्वैव वत्सरो निर्वाच्यः । तथा सति 'वत्सरात् परतः' इत्यादिप्रागुक्तसङ्गतिः । अत एव नैकदिनांतभावेनार्थ इत्यभिप्रायः । पूर्णशब्दसहिताब्दादिपदात् वचनवशाद् वत्सरोत्तरदिनमेव ग्राह्यमितिस्थितेऽपि पूर्णसंवत्सरपदस्य तत् लक्षकत्वे स्फुटं वचनमप्याह—*पूर्ण इति । सपिण्डनाब्दिकयोरेकदिनकर्तव्यत्वोक्तेस्तल्लाभः । तत्र सतिसप्तमीप्रकृतेर्लक्षणयाऽधिकरणसप्तमी उत्तरदिने इति शेषो वा वाच्यः । स एव "संवत्सरान्ते प्रेताय" इत्यादावप्यालम्ब्यः । *मूर्खेति । तथाच सपिण्डनमात्रेणैवाब्दिकनिर्वाह इति ग्रन्थकृत्सम्मतोऽर्थः । *एकोद्दिष्टम् मासिकम् ।

---

(१) 'मृताहनि' ग० छ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति धवलनिबन्धे जाबाल्युक्तेः

पुत्रः सपिण्डनं कृत्वा कुर्यात्स्नानं सचैलकम् ।
एकोद्दिष्टं ततः कुर्यात् कुतपं न विचारयेत् ॥

अत्र वदन्ति सपिण्डीकरणं कृत्वा प्रथमसांवत्सरिकमनुष्ठेयम् । यतः हेमाद्रिवचने षोडशेत्यस्य कोऽर्थः । न तावद् द्वादशमासिकम्, तेन सापेण्डनादिकार्यानिर्वाहात् । नापि सपिण्डीकरणं पितृत्वापन्नतृप्तिरूपस्याब्दिककार्यस्य तेनासम्भवात्। किन्तु ऊनाब्दिकपिण्डः,

पूर्णे संवत्सरे श्राद्धं षोडशं परिकीर्तितम् ।

इति पाठात् । तेनैवेत्यस्य च—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।

इत्यत्र मृताहात् पूर्वेद्युरित्यर्थे तदनन्तरं मृताहे नेति फलितार्थः । अर्थान्तरे तु तेनैव संदृब्धमिति पूरणेन तदधिकरणादिनोत्तरमृताहे नेत्यर्थः । अथ संदृब्धार्थकसांवत्सरिकं दुष्करं यतः मुख्यकालः सपिण्डनेनावरुद्धः । नच गौणकालः सम्भवति श्राद्धशेषभोजनरूपोतराङ्गं विना सपिण्डीकरणप्रयोगासमाप्तेः । न च—

एकोद्दिष्टस्य शेषं तु ब्राह्मणेभ्यः समुत्सृजेत् ।
ततः स्वयं तु भुञ्जीत पुनर्मङ्गलभोजनम् ॥

इति मते श्राद्धभोजनमिति प्रेतश्राद्धशेषभोजनमिति प्रेतश्राद्धशेषभोजनं निषिद्धमेवेति वाच्यम्, पार्वणैकोद्दिष्टयोः पाकस्य भिन्नत्वादेकोद्दिष्टांशशेषस्याभोजनेऽपि पार्वणांशशेषभोजनस्यावश्यकत्वात् । वृद्धिमद्दिनसपिण्डने त्वगत्या शेषभोजनलोपे नैव तत्समाप्तिः—

मलमासेऽपि कर्तव्यमाब्दिकं प्रथमं सुतैः ।

इत्याब्दिकं तु द्वादशाहात्तु सपिण्डनपक्ष एवेति चेत् ? मैवम्, विसर्जनेन समाप्ते श्राद्धप्रयोगे पश्चादनियमेन प्राप्तस्य भोजनस्य नियमः श्राद्धशेषप्रतिपत्त्यर्थः । तद्दिनरात्रिगतब्रह्मचर्यादिनियम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्वल्पमात्स्योक्तेश्चाब्दिकं तद्दिने पुनः कार्यमिति कोचित् । ते निर्मूलत्वाद्धेमाद्रिविरोधाच्चोपेक्ष्याः । षोडशत्वं च सपिण्डनस्य षोडशश्राद्धान्तर्भावपक्षे । स्मृत्यर्थसारे तु वर्षान्त्यदिने संवत्सरविमोक्षश्राद्धं सपिण्डनं च कृत्वा परेद्युर्मृताहे वार्षिकं कार्यमित्युक्तम् । गौडा अप्येवमाहुः । तत्पूर्वविरोधाच्चिन्त्यम् ।

वत्प्रयोगबहिर्भूत एव श्राद्धाङ्गव्यवधानबीजाभावात्तु प्रायशोऽव्यवधानम् । एवं च सपिण्डनवत्यां तिथौ अवश्यं प्राप्तं वार्षिकमनुष्ठाय तन्त्रेण श्राद्धद्वयाङ्गतया तत्करणे न क्षतिः,

पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः ।

इति वचनादेकदिने क्रियमाणेषु सांवत्सरिकश्राद्धेष्विव । नित्यत्वाच्च गौणकालेऽप्यनुष्ठानमदोषः । वस्तुतस्तु सपिण्डीकरणस्य मध्याह्नः कालः वार्षिकस्यापराह्ण इति पार्वणविधिनाऽनुष्ठाने क्व गौणकालः । नच सपिण्डनस्यैकोद्दिष्टांशेन मध्याह्नप्राप्तावपि पार्वणांशेनापराह्ण एवेति वाच्यम् , एकोद्दिष्टस्य मुख्यतया मध्याह्नस्य तद्धर्मस्यैव युक्तत्वात् । मुख्यत्वं च प्रेतदेवत्वात् । पार्वणांशस्य तु तदभावे संयोजनस्य दुष्करतया तदुपकारितयाऽनुष्ठानात् एकोद्दिष्टस्य प्रथमानुष्ठेयत्वाच्च । चत्वार्युदकपात्राणि एकं प्रेतस्य त्रीणीतरेषां प्रथमं प्रेतपात्रं पितृपात्रेषु नियोजयेत् । एवमेव प्रथमं पिण्डं त्रिषु पिण्डेषु नियोजयेदित्याश्वलायनादिगृह्यात् । त्रीणि पितॄणामेकं प्रेतस्येति गोभिलीयं यदि छन्दोगानां क्रमस्यापि कल्पकं तदोपजीव्यत्वादेकोद्दिष्टकाल एव ग्राह्यः । नच पार्वणे योगत्रयसत्त्वाज्जघन्यस्यापि तस्य मुख्यस्य धर्मत्वेन काल इति ग्राह्य इति वाच्यम् , कर्मण एकत्वादेव समुच्चितदेवतानुरोधेनाभ्यासमात्रभेदात्तेषां कालादिधर्मानन्वयात् कालस्य देवताधर्मत्वाभावाच्च । तस्मात्कुतपप्रभृतिमध्याह्ने सपिण्डीकर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तच्च पुत्रे सति नान्यः कुर्यात्,

श्राद्धानि षोडशादत्त्वा नतु कुर्यात्सपिण्डताम् ।

*प्रोषितावासिते पुत्रः कालादतिचिरादपि ॥

इति वायवीयोक्तेः । *षोडशश्राद्धानां वर्षादूर्ध्वं कालाभावेपि तान्यदत्त्वा न कुर्यात्, किंतु *दत्त्वैव । *ता-

---

रणकमनुष्ठायापराह्णमध्य एव पार्वणविधिना सांवत्सरिकमुपक्रमितुं शक्यते न तत्र गौणकालताप्रसङ्गः । एकोद्दिष्टविधिना सांवत्सरिकमनुतिष्ठतां तु नित्यत्वाद्गौणकाले तदनुष्ठाने न कश्चिद्दोषः । यत्तु पूर्णे संवत्सरे सपिण्डनमभिधायात ऊर्ध्वं संवत्सरे प्रेतायान्नं दद्याद्यस्मिन्नहनि प्रेतः स्यादिति गोभिलसूत्रात् प्रथमाब्दे वार्षिकं न कार्यमिति । तदशुद्धम्, प्रथमाब्दे सर्वथा वार्षिकासत्त्वे मलमासीयप्रथमवार्षिकनिर्णयवैयर्थ्यापत्तेः, अत ऊर्ध्वं गोभिलीये सपिण्डनोर्ध्वमित्यर्थेन प्रथमवत्सरेऽपि तस्य प्राप्तेः । एवञ्च—

पूर्णे संवत्सरे वृत्ते मृताहे पुनराब्दिकम् ।

सपिण्डीकरणं कृत्वा कुर्यात् पुत्रस्तु नेतरः ॥

इत्यत्र ग्रन्थोक्तजाबालस्वल्पमात्स्ययोश्च पुत्रपदमुत्तरक्रियाधिकारिपरम् । सपिण्डनानन्तरं स्वल्पमात्स्यात्, सचैलस्नानं कृत्वा वार्षिकमिति कृतं पल्लवितेन । *प्रोषितेति । प्रोषितेन सता पितृमरणे ज्ञाते चिरादपि कालात् वर्षान्तरूपचरमकालातिक्रमेऽपि सपिण्डनं पुत्र एव कुर्यान्नान्य इत्यर्थः । *षोडशेति । यथाऽशक्त्यादिना वर्षान्तरूपस्य सपिण्डनकालत्वं तथा प्रवासादिना तदुत्तरस्य पूर्वोक्तवचनान्नाक्षत्रस्य । एवञ्च तत्र नियमवशात् षोडशश्राद्धे प्रसक्ते शास्त्रीयं कालं विना कृतस्य शास्त्रीयकर्मणः फलाजनकत्वात्सपिण्डनस्य शास्त्रीययत्किञ्चित्काललाभेनानुष्ठानेऽपि तेषां कालालाभादननुष्ठाने प्राप्ते श्राद्धानीति विधिद्वारा कालं विधत्ते इति भावः । *दत्त्वैवेति । एतद्वाक्यस्य सपिण्डनविषये "पुत्राभावे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नि यदि कनिष्ठभ्रात्रादिना कृतानि तदा सपिण्डनमेव कुर्यादित्यपरार्कः। सपिण्डने तु कनिष्ठानां नैवाधिकार इत्यर्थः। तत्रैव—

अज्ञानादथवा मोहान्न कृता चेत्सपिण्डता।
तत्रापि विधिवत्कार्या कालादतिचिरादपि॥

तेष्वपि ज्येष्ठस्यैवाधिकारः,

ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः।

इति मनूक्तेः। अपरार्के प्रचेता अपि—

*एकादशाद्याः क्रमशो ज्येष्ठस्तु विधिवत्क्रियाः।
कुर्यान्नैकैकशः श्राद्धमाब्दिकं तु पृथक्पृथक्॥

मरीचिः—

*सर्वेषां तु मतं कृत्वा ज्येष्ठेनैव तु यत्कृतम्।
द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्॥

यत्तु वाचस्पतिशूलपाणिभ्यामुक्तं द्रव्यदानानुमत्यभावे कनिष्ठैः पृथक्कार्यमिति। तन्न, एवकारस्य तदभा-

---

तु पत्नी स्यात्" इत्यादिसामान्यविध्यपवादकतया पुत्रासन्निधाने तद्भिन्नकृतम् 'अनधिकारिणा कृतमप्यकृतमेव' इति पुत्रेण सपिण्डनमावर्तनीयम्। प्रासिकापकर्षोऽप्यावर्तनीयः। तत्र सपिण्डनाधिकृतस्यैवाधिकारादित्यर्थः। अपरार्कमतमाह—*तानीति। अत्र—

श्राद्धानि षोडशापाद्य विदधीत सपिण्डताम्।
श्राद्धानि षोडशादत्त्वा न तु कुर्यात्सपिण्डताम्॥

इति समानकर्तृकत्वभङ्गापत्तेरित्यस्वरसः। *एकादशाद्या इति। एकादशपदं षोडशश्राद्धार्थकं श्राद्धानीत्येकवाक्यत्वात्, न तु महैकोद्दिष्टादिपरम्। तेन तस्य पत्न्यादिना करणेऽपि नावृत्तिः। ननु "कुर्यान्नैकैकशः श्राद्धम्" इत्यनेन सपिण्डनान्तश्राद्धस्य विभक्तपुत्रेषु पृथक्त्वनिषेधे कनीयः पुत्रादेस्तत्फलानुपपत्तिरित्यत्राह—*सर्वेषां त्विति। तस्य द्रव्यदानानुमतिद्वारा फल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेऽपि पृथक्करणाभावार्थत्वात्*अन्धादेरिव ज्येष्ठे सति कनिष्ठानामनधिकाराच्च। *अतस्तेषां प्रत्यवायमात्रम्। आहिताग्निः कनिष्ठस्तु *कुर्यादेव। अन्यथा *पितृयज्ञासिद्धेः। *एवमावश्यकवृद्धावपि कनिष्ठोऽन्यः सपिण्डो

लाभ इति भावः। *अन्धादेरिति। अग्न्याधाने इति विशेषः। *अत इति। ज्येष्ठे सति तदन्यः पितुः सपिण्डनं न कुर्यादित्येवकारवशान्निषेधविध्युल्लङ्घनादिति भावः। *कुर्यादेवेति। एवकार आवृत्तिव्यवच्छेदार्थः। अयं चाधिकारः ज्येष्ठस्यासन्निधाने सूतकादिबन्धे वा। *पितृयज्ञेति।

एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि।
प्रकुर्वीताग्निमान् पुत्रो मातापित्रोः सपिण्डनम्॥
नासपिण्ड्याग्निमान् पुत्रः पितृयज्ञं समाचरेत्।
न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम्॥
प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु।
आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते॥

इत्यादिवचनात्। नचैमानि पितृयज्ञस्य प्रमाणान्तरप्राप्तसपिण्डनप्रयोजकत्वबोधमेनैवार्थवन्ति एतदुपात्तार्थान्तरस्य प्रमाणान्तरप्राप्तत्वात्। परन्तु क्लृप्ताधिकारं ज्येष्ठं प्रति चरितार्थानि नाक्लृप्तं कनीयसोऽधिकारमपि कल्पयन्ति गौरवादिति वाच्यम्, आरब्धपिण्डपितृयज्ञस्यानिर्वाहापत्त्या कनिष्ठेऽपि प्रवृत्त्यनङ्गीकारात्। यद्वा,

पितुः पुत्रेण कर्तव्याः पिण्डदानादिकाः क्रियाः।

इत्यादिभिः पुत्रमात्रस्य सर्वक्रियाधिकारे प्राप्ते "एकादशाहाद्याः क्रमशः" इत्यादिना एकादशाहादिषु कनिष्ठं प्रत्यपवादे जाते उक्तवाक्यं प्रतिप्रसवविधित्वेन लाघवात्कनिष्ठं प्रत्येव प्रवर्तते, न ज्येष्ठं प्रति; अपूर्वविधित्वे गौरवादनुवादत्वेन वैयर्थ्यात्। शेषं क्रमाधिकारिप्रकरणे। *एवमिति। तथाचेहापि ज्येष्ठस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा कुर्यात् ।

*भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव च ।
सहपिण्डक्रियां कृत्वा कुर्यादभ्युदयं ततः ॥
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

इति मदनरत्ने लघुहारीतवचनात् । *वृद्ध्यनन्तरं प्रथमाब्दमध्येऽपि काम्यं कुर्यात् । वृद्ध्यभावे तु प्रथमाब्दादूर्ध्वमेवेत्यर्थः । काम्योक्ते*रनावश्यकेष्टापूर्तादौ *नापकर्षः । *एतद्*भ्रातृपुत्रादिसंस्कारे प्राप्ताधिकारस्य *ना-

---

पुत्रस्य वा न सपिण्डनिवृत्तिरितिभावः । *भ्राता वेति । "अर्धमन्तर्वेदि" इत्यादिन्यायेन भ्रात्रादिपदैराभ्युदयिककर्तृमात्रं ग्राह्यमित्याहुः । काम्यमनावश्यकमपि कर्म वत्सराद् प्रथमादृते तदुत्तरसपिण्डनं कृत्वैव कुर्यात् नतु प्रथमवर्षे तदर्थं सपिण्डनमपकृष्य काम्यस्यापकर्षनिमित्तत्वाभावादित्यर्थे फलितमाह--*वृद्धीति । श्राद्धाङ्गकयोरभ्युदयकाम्ययोरत्र ग्रहणात्तदुत्तरं सपिण्डनापकर्षेऽपि प्रथमाब्दे न कार्यमित्यपि केचित् । *अनावश्यकत्वं सगतिकत्वम् । *नापकर्ष इति । षोडशश्राद्धपूर्वकसपिण्डनस्येति शेषः । अत्र यस्य कस्यापि सपिण्डस्य गृहे वृद्ध्युपस्थितौ येन केनापि सपिण्डेन स्वपित्रादेः सपिण्डनं कार्यमिति दाक्षिणात्यमूर्धन्यतमाचारं प्रदर्शयितुमाह--*एतदिति । अशक्त्यादिनाऽनुकल्पकाले तदनुष्ठाने तु अनुमासिकापकर्षो भवत्येवेत्युक्तं-*भ्रात्रिति । "पितैवोपनयेत्पुत्रम्" इत्यादि । "पिता पितामहो भ्राता" इत्यादिना क्रमेण योऽधिकारस्तद्वत इत्यर्थः । *नान्दीति ।

स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु ।
पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात् ॥

इति कातीये तस्याभावे तत्क्रमात् "पितैवोपनयेत् पुत्रम्" इत्यादिः "पिता पितामहो भ्राता" इत्यादिश्च यत्क्रमोऽधिकारिक्रमस्तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्दीश्राद्धाधिकारार्थम् । *अभ्युदयपदं च नान्दीश्राद्धनिमित्तकर्ममात्रपरामिति हेमाद्रिः । तेन ज्येष्ठे देशान्तरस्थे कनिष्ठः सपिण्डनं विनैव वृद्धिं कृत्वा पुत्रसंस्कारं कुर्यादिति श्रीदत्तोक्तिः परास्ता । *भ्रातृशिष्याद्युक्ते*नान्दीश्राद्धेऽयदेवतामात्रपरोऽपकर्ष इ*त्यपास्तम् । अस्य क्रममात्रपरत्वाद्वृद्धिकर्तैव सपिण्डनं कुर्यादिति न नियम इति

क्रमेण स्वपितृभ्य एव दद्यान्न संस्कार्यपितृभ्य इत्यर्थादिति भावः। अभ्युदयक्रियापदे नान्दीश्राद्धकर्मणो लाभं वारयति—*अभ्युदयेति । तेन नान्दीश्राद्धस्य सपिण्डननियमत्वपूर्वेण नियमेन । दर्शिताचारनिर्वाहार्थं जेष्ठापेक्षां निरस्यति--*भ्रात्रिति । *नान्दीति । येषां नान्दीश्राद्धे देवतात्वं तेषामेव पितृत्वसिद्ध्यर्थं । लघुहारीतेन सपिण्डनं कर्तव्यतयोक्तम्, आकाङ्क्षितविधानस्य न्याय्यत्वात् । *अपास्तामिति । अत्र भ्रातृशिष्याद्युक्तेरिति हेतुः। न च "स्वपितृभ्यः पिता दद्यात्"इत्यादौ चतुर्थपादस्य भ्रात्राद्यपत्यसंस्कारे संस्कार्यपितृभ्य एव नान्दीश्राद्धोक्तेः भ्रातावेत्यादेर्भ्रात्राद्यपत्यसंस्कारविषयत्वेनैवोपपत्तेर्न तद्विरोधः । एवमनाकाङ्क्षितविधानोपगमे सपिण्डान्यगुरोरसपिण्डनापत्तिरिति वाच्यम्, सुतसंस्कारकर्मसु स्वपितृभ्यो दद्यादिति तावत् सामान्यतो विशेषतश्च प्राप्तं नान्दीश्राद्धमनूद्य—

नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमाचरेत् ।

इति वचनादन्यसंस्कारे कथमित्यपेक्षायां चतुर्थचरणस्य विधायकत्वमुपेयम् । अन्यथा वैयर्थ्यापत्तेः । तथा च तत्र स्वपितृभ्य इत्यस्यैव सम्बन्धो नतु संस्कार्यपितृभ्य इत्यस्य "सिद्धमन्त्रम्" इति न्यायात् । नहीदं सपिण्डनं नान्दीश्राद्धे देवतात्वसिध्यर्थं किन्तु कर्तुरधिकारसिध्यर्थम् । समानकर्तृकत्वं तु क्वाचित्कत्वेनाप्युपपद्यते । अत एव—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गौडाः । अत एव कन्याया मातृमरणे भ्रात्रा सपिण्डने कृते पितुर्दानाधिकारः ।

*शूलपाणिस्तु—

*महागुरौ प्रेतभूते वृद्धिकर्म न युज्यते ।

इति निषेधात्*मृतस्य भ्रात्रादिः सपिण्डनं कृत्वा तत्पुत्रकन्यादेरभ्युदयं कुर्यान्न तु स्वपुत्रसंस्कारे संस्कार्यपितुः सपिण्डनं विना वृद्धौ देवतात्वाभावादित्याह । तन्न, देवताप्रयुक्तापकर्षस्य निरस्तत्वात् । वृद्धिं विना क-

---

श्राद्धानि षोडशापाद्य विदधीत सपिण्डनम् ।

इत्येतत्समानकर्तृकत्वस्यापि मायिकत्वाद्यदा कनिष्ठेन षोडशश्राद्धानि कृतानि तदा ज्येष्ठेन सपिण्डनमेव कार्यमित्यपरार्केऽप्युक्तम् । तथाच भ्राता चेत्यादिवाक्येनाभ्युदयिकश्राद्धदेवताभिन्नस्यापि सपिण्डनस्य सपिण्डनं कार्यमिति दाक्षिणात्याचारः सुस्थ एव । तस्याभावे तु तत्क्रमादित्यस्य भ्रात्राद्यपत्यसंस्कारे संस्कार्यपितृभ्य एव दद्यादित्यर्थमनुसृत्य भ्रात्रेत्यादि वाक्यं व्याचक्षाणस्य मतमाह—*शूलपाणिस्त्विति । तत्र संस्कार्यपित्रादेः सपिण्डनं तत्संस्कारोपस्थितौ तदधिकारिणा तदङ्गनान्दीश्राद्धार्थमपकृष्य कार्यमिति प्रथमतः साधयति—*महागुरावेति । नहि भ्रात्रादेर्भ्रात्रादिर्महागुरुर्भवति स्वापत्यस्येति । तदनुसृत्य भ्राता चेत्यस्यार्थमाह—*मृतस्येति । भ्रात्रादयश्च सन्निहिताधिकार्यन्तराभावान्मृतस्य सपिण्डनाधिकारिणः सन्तस्तदपत्यसंस्काराधिकारिणः कत्वागत्ययात् । पुत्रस्याग्रहणं च पित्रादेः सपिण्डनं कृत्वैव स्वापत्यस्य भगिन्यादेश्च संस्कारं कुर्यादित्यस्य वचनान्तरसिद्धत्वात् । अथ मातापितृमृतिवत्सरे तदपत्यानां कथं संस्कारः?

पितरौ तु मृतौ यस्य देहस्तस्याशुचिर्भवेत् ।

न दैवं नापि पित्र्यं वा यावत्पूर्णो न वत्सरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निष्ठेन कृते तु विदेशस्थेन ज्येष्ठेन पुनः कार्यम्,

यवीयसा कृतं कर्म *प्रेतशब्दं विहाय तु ।
तज्ज्यायसापि कर्तव्यं सपिण्डीकरणं पुनः ॥

इति स्मृतेः ।

ज्येष्ठेन वा कनिष्ठेन सपिण्डीकरणे कृते ।
आद्यपादे 'मातापित्रोः कनिष्ठेन' इति वा पाठः ।
देशान्तरगतानां च पुत्राणां तु कथं भवेत ।
श्रुत्वा तु वपनं कार्यं दशाहान्तं तिलोदकम् ॥
ततः सपिण्डीकरणं कुर्यादेकादशेऽहनि ।
द्वादशाहे न कर्तव्यमिति शातातपोऽब्रवीत् ॥

इति वचनाच्चेति भट्टाः । सिङ्गाभट्टीयेऽप्येवम् । *पूर्ववचनेऽत्र च मूलं चिन्त्यम् । स्मृत्यर्थसारे तु-'*विभ-

---

इति निषेधादिति चेत् ? न, अशुचित्वोक्तेरनावश्यककर्मपरत्वात् । अपकर्षस्यावश्यकवृद्धिविषयत्वात् । "आधानाद्युपसंप्राप्तौ" इत्यभिधानात् "तथैव काम्यं यत्कर्म" इति लघुहारीताच्च । *प्रेतशब्दमिति । न च सपिण्डनस्य ज्येष्ठमात्राधिकारित्वेऽनधिकारिकनिष्ठकृतसपिण्डनेन प्रेतत्वानिवृत्त्या कथं प्रेतशब्दप्रयोगेन पुनरावृत्तिरिति वाच्यं दशाहोत्तरदर्शे कनिष्ठस्य पितृयज्ञार्थं सपिण्डनेऽधिकारात् । तत्र प्रेतशब्दं विनाऽर्घ्यसंयोजनादिरूपं सपिण्डनमन्यत्र तु प्रेतशब्दसहितं तत्कार्यम् । अत एव कनिष्ठाधिकारस्येवार्घ्यसंयोजनादिभागस्याप्रामाणिकतामनुपदं द्रढयति । यत्र कनिष्ठेन पुत्रातिरिक्तेन वाऽभ्युदयार्थं सपिण्डनं कृतं तत्र ज्येष्ठेन पुत्रेण वा नावर्तनीयमित्यावेदनाय वृद्धिं विनेत्युक्तम् । *पूर्ववचने यवीयसेति वचने । तथाच पितृयज्ञार्थं कनीयसा सपिण्डने कृतेऽपि ज्येष्ठस्य सपिण्डनावृत्तिः प्रेतशब्दसहितैव । तेन वृद्ध्यर्थमपकृष्टे तु तत्र न ज्येष्ठस्यावृत्तिरिति नव्यमतमित्यर्थः । *वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्ता ऋद्धिकामाश्चेत्पुत्राः पृथक्सपिण्डीकरणं कुर्युः' इत्युक्तम्। अत्र दत्तकस्य तत्पुत्रादीनां विशेषः प्रागुक्तः। केचित्तु वृद्धिं विनाऽपि कनिष्ठस्य सपिण्डनमाहुः—

मातापित्रोर्मृतेः काले ज्येष्ठे देशान्तरस्थिते।
कनिष्ठेन प्रकर्तव्यं सपिण्डीकरणं तथा॥

इति कार्ष्णाजिनिस्मृतेः।

गते वा रोधिते ज्येष्ठे पित्रा वा प्रेषिते सति।
षण्मासान्न निवर्तेत तदा कार्यं कनीयसा॥

संवर्तः—

पुनः सपिण्डीकरणं श्राद्धं पार्वणवच्चरेत्।
अर्घ्यसंयोजनं नैव पिण्डसंयोजनं न च॥ इति।

ते *वचसां निर्मूलत्वात्—'प्रोषितावसिते पुत्रे' इत्यादिविरोधाच्चोपेक्ष्याः।

व्युत्क्रममृतौ तु हेमाद्रौ ब्राह्मे—

मृते पितरि यस्याथ विद्यते च पितामहः।
तेन देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः॥
तेभ्यश्च पैतृकः पिण्डो नियोक्तव्यस्तु पूर्ववत्।
मातर्यथ मृतायां च विद्यते च पितामही॥

भक्ता इति।

नवश्राद्धं सपिण्डत्वं श्राद्धान्यपि च षोडश।
एकैनैव तु कार्याणि संविभक्तधनेष्वपि॥

इत्यस्यात्रापवादः। वृद्धिकामनया प्राप्ताधिकारेण कनीयसा कृते तु ज्येष्ठेन प्रेतशब्दरहितमेवावर्तनीयम्। *वचसामिति। अत एव—

काश्यादिषु गयायां च प्रेतकार्यं तु यत्कृतम्।
सपिण्डैरसपिण्डैर्वा पुत्रैरेव कृतं भवेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रपितामहीपूर्वस्तु कार्यस्तत्राप्ययं विधिः ॥

एवं प्रपितामहजीवने तत्पित्रादिभिर्ज्ञेयम् । तदाह सुमन्तुः—

त्रयाणामपि पिण्डानामेकेनापि सपिण्डने ।
पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥

यत्तु—

*व्युत्क्रमात्तु प्रमीतानां नैव कार्या सपिण्डता । इति, तन्मातापितृभर्तृभिन्नविषयम्,

व्युत्क्रमेण मृतानां न सपिण्डीकृतिरिष्यते ।
यदि माता यदि पिता भर्ता नै*ष विधिः स्मृतः ॥

इति माधवीये स्कान्दोक्तेः । मदनरत्नादौ चैवम् । अत्र 'प्रपितामहादिभिः पितुः सपिण्डने कृते पितामहे मृते तत्सपिण्डने सति पुन*स्तेन सह पितुः सपिण्डनं कार्यम्' इति हेमाद्रिर्मतमाह । अन्ये *नैतन्मन्यन्ते । तत्त्वं तु पितुः सपिण्डनाभावे पितामहेन सह पुनः कार्यं, न तत्सत्त्वे,

त्रयाणामपि पिण्डानामेकेनापि सपिण्डने ।
पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ॥

इति विष्णुधर्मोक्तेः । पितामहे प्रपितामहे वा पुत्रान्तरै*रसंस्कृतेष्वसंस्कृताभ्यामेव पितुः सपिण्डनं-

---

इत्यादीन्यपि निर्मूलानि तीर्थप्रशंसापराणि वा । एवमिदं तीर्थं प्रशस्तं यद्दशाहान्तप्रेतकार्ये पुत्रेतरकृतेऽपि पुत्रकरणप्रयुक्तफलवदिति, नतु ज्येष्ठेतरेण येन केनापि सपिण्डनं कार्यमित्यर्थपराणि तथापदाभावात् । तत्र ज्येष्ठस्यैवाधिकारादिति माधवः । *व्युत्क्रमादिति । गोब्राह्मणादिहतोपलक्षणम् । *एष निषेधरूपो विधिः । * तेन पितामहेन । *नैतादिति । पितुः पुनः सपिण्डनवचनासत्त्वादिति शेषः । *असंस्कृते अकृतसपिण्डने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुर्यात् ,

असंस्कृतौ न संस्कार्यौ *पूर्वौ पौत्रप्रपौत्रकैः ।
पितरं तत्र संस्कुर्यादिति कात्यायनोऽब्रवीत् ॥

इति छन्दोगपरिशिष्टात् । असंस्कृतौ दाहाद्यैरिति केचित् । असपिण्डीकृताविति तु तत्त्वम् । अत एवोक्तं तत्रैव—

पापिष्ठमपि शुद्धेन *शुद्धं पापकृतापि वा ।
पितामहेन पितरं संस्कुर्यादिति निश्चयः ॥

पापिष्ठमकृतसपिण्डनं न तु पतितादि, 'अभिशस्तपतितभ्रूणघ्नाः स्त्रियश्चातिचारिणीर्न संसृजेत्' इति बैजवापोक्तेः 'पापकर्मिणो न संसृजेरन्' इति गौतमोक्तेश्चेत्युक्तं निर्णयामृते ॥

पूर्वयोः पुत्राभावे तु पौत्रः कुर्यादेव,

पितामहः *पितुः पश्चात्पश्चत्वं यदि गच्छति ।

एतच्चान्तिमकाले एव । पूर्वकाले तु पितामहप्रपितामहयोः तत्पुत्रादिना तदभावे स्वयं वा सपिण्डनं संपाद्यैव पितुः सपिण्डनसम्भवात् । न चैवं वर्षान्तपर्यन्तातिक्रमेऽपि तयोः सपिण्डनं कृत्वैव पितुः सपिण्डनं नक्षत्रेषु सुकरमिति वाच्यं, वचनवैयर्थ्यापत्त्या कृतसपिण्डनाभ्यां ताभ्यां वर्षान्तकाले पितुः सपिण्डनस्य वाचनिकत्वोपगमात् । तावता वचनसार्थक्यात् तत्पूर्वकालेषु पितामहादिपितृभावानपेक्षपितृसपिण्डनाबोधनात् । *पूर्वौ पितामहप्रपितामहौ । *शुद्धमिति । पितामहेनेति प्रपितामहेनेत्यपि बोध्यम् । अकृतसपिण्डनेन पितामहादिना सह सम्यक् शुद्धं कुर्यादिति भावः । मातामहादित्रयाणां सपिण्डनासत्त्वे तु चतुर्थेन सपिण्डनस्यैवासम्भवात् । वर्षान्तकालेपि पितुः सपिण्डनं न सम्भवति । किन्तु शुद्धैरशुद्धसपिण्डनानन्तरं पितामहेनैवेति । *पितु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पौत्रेणैकादशाहादि कर्तव्यं श्राद्धषोडशम् ॥
नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः ।
पितुः सपिण्डतां कृत्वा कुर्यान्मासानुमासिकम् ॥

इति कात्यायनोक्तेः । अपरार्के शूलपाणौ चैवम् । तेन सपिण्डनस्यानित्यत्वादकृतसपिण्डनयोरेव पार्वणानुप्रवेश इति *मूर्खोक्तिः परास्ता ।

*कृते सपिण्डीकरणे प्रेतः पार्वणभाग्भवेत् ।

इति हारीतविरोधाच्च । केचित्पुत्रान्तराभावे पितामहवार्षिकमप्याहुः । तन्न, श्राद्धषोडशमिति नियमात् । इच्छया भवत्येव ।

पितामहस्य चेद्द्व्यादेकोद्दिष्टं न पार्वणम् ।

इति वाचस्पतिधृतगर्गोक्तेः । *त्रयाणां यौगपद्ये तु प्राधान्यात्पितुः सपिण्डनं कृत्वा पूर्वयोः कुर्यात् । *पितामहे मृते दशाहान्तः पितृमृतौ पितुः संस्कारं कृत्वा पितामहस्य पुनः सर्वमावर्तयेत् । वृत्ते दशाहे नैवम् ।

रिति । तत्र दर्शश्राद्धमप्यकृतसपिण्डनाभ्यां ताभ्यां सह कार्यं नतु तदर्थं तयोः सपिण्डनप्रतीक्षेत्यर्थः । *मूर्खोक्तिरिति । सामान्यतोऽकृतसपिण्डनयोरित्युक्तिरित्यर्थः । वर्षान्तान्यकाले कृतसपिण्डनयोः पार्वणानुप्रवेशापत्तेरिति भावः । नच वर्षान्ते तादृशाभ्यां ताभ्यां सपिण्डने तयोः पार्वणानुप्रवेशो मास्त्विति वाच्यं, तथा सति "पापिष्ठमपि शुद्धेन" इति वचनोत्तरं "पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकम्" इति वचनविरोधात् । *कृते इति । निरग्निकस्य प्रायिकं साग्निकस्य तु दर्शादर्वाक् सपिण्डनं दर्शश्राद्धार्थमुक्तम् । *त्रयाणामिति । एतदपि पितुः वर्षान्तकाल एव । *पितामहे मृते इति । क्रियाकर्तुर्नाशे क्रियावृत्तिर्नास्तीतिप्रागुक्तशुद्धितत्त्वमतं तु हेयम् । अग्निसंस्कारा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अशक्त्या पित्रानुज्ञातेन पौत्रेण पितामहश्राद्धे प्रक्रान्ते पितृमृतौ तदाशौचं वहन्नेव पौत्रः पितामहकर्म कुर्यात्प्रक्रान्तत्वादिति मदनपारिजातपृथ्वीचन्द्रौ । यत्तु—

उत्तरात्रितयरौद्ररोहिणी
याम्यसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म सकलं च वर्जये
त्प्रेतकार्यमपि बुद्धिमान्नरः ॥

इति सपिण्डनप्रकरणे पाठा*न्मुख्यकाले निषिद्धर्क्षे सपिण्डनापकर्षः । सर्वकालेषु तद्वत्त्वे तद्वर्ज्यान्येव । पूर्वोक्तब्रह्मोक्तानि षोडशश्राद्धानि कार्याणीति वाचस्पतिमिश्राः । तन्न, अस्य परिभाषात्वेन वाक्यात्सावकाशकर्मपरत्वात, अस्य प्रेतमात्रदैवत्याभावाच्च ॥

अथ स्त्रीषूच्यते । हेमाद्रौ बृहस्पतिः—

भर्तृगोत्रेण नाम्ना च मातुः कुर्यात्सपिण्डनम् ।

यत्तु भविष्ये—

पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः । इति,

तदा*सुरादिविवाहोढापरम्,

आसुरादिविवाहेषु पितृगोत्रेण धर्मवित् ।

इति वृद्धशातातपोक्तेः । तच्चानेकवचनेषु पितामह्याः पत्या मातामहेन वा सहोक्तम् । तत्र व्यवस्थोक्ता भविष्ये—

जीवत्पिता पितामह्याः मातुः कुर्यात्सपिण्डनम् ।

वृत्तिर्केचिन्मते । *अशक्त्येति । इदं तु बोध्यम्—अशौचान्तरमध्ये क्रिया एकादशाहान्तैव सपिण्डनस्य शुद्धकालसम्भवात् । *मुख्यकाले वर्षान्ते ।

*आसुरादीति । आदिना गान्धर्वराक्षसपैशाचा ग्राह्याः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमीतपितृकः पित्रा तत्पित्रा पुत्रिकासुतः ॥

तत्पित्रा मातुः पित्रा । लौगाक्षिः—

पितामह्यादिभिः सार्धं मातरं तु सपिण्डयेत् ।
पितरि म्रियमाणे तु *तेनैवोपरते सति ॥

शङ्खः—

मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतः ।
पितामह्यादिभिः सार्धं सपिण्डीकरणं स्मृतम् ॥

येन केनापि मातुः सापिण्ड्ये यत्रान्वष्टकादौ मातुः श्राद्धं पृथगुक्तं तत्र पितामह्या सह कार्यम् ।

नान्दीमुखेऽष्टकाश्राद्धे गयायां च मृतेऽहनि ।
पितामह्यादिभिः सार्धं मातुः श्राद्धं समाचरेत् ॥

इति शातातपोक्तेः । अपुत्रायां तु पैठीनसिः—

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डनम् ।
श्वश्र्वादिभिः सहैवास्याः सपिण्डीकरणं भवेत् ॥

यत्तु लघुहारीतः—

पुत्रेणैव तु कर्तव्यं सपिण्डीकरणं स्त्रियाः ।
पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये ॥ इति ।

यच्च मार्कण्डेयपुराणे—

सपिण्डीकरणं स्त्रीणां पुत्राभावे न विद्यते । इति,

तत्पुत्रपत्यभावे ज्ञेयम् । अत्र सपत्नीपुत्रोऽपि ज्ञेयः,

बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् ।
सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः ॥

इति मनूक्तेरेतत्परत्वात् । यत्तु शातातपः—

मृते पितरि मातुस्तु न कार्या सहपिण्डता ।

तथा च भर्तृगोत्रेणेति वचनं ब्राह्मदैवार्षप्राजापत्यान्यतमविवाहोढापरम् । *तेनैवेति । यत्र सहगमनेनान्यथा वा स्त्रियाः सपिण्डनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितुरेव *सपिण्डत्वे तस्या अपि कृतं भवेत् ॥ इति, तदशक्तपरम्, केषाञ्चिद्वा मतमिति हेमाद्रिः। अन्वारोहणे तु भर्त्रैव सापिण्ड्यम्,

मृता यानुगता नाथं सा तेन सहपिण्डताम्।
अर्हति स्वर्गवासं च यावदाभूतसंप्लवम् ॥

इति शातातपोक्तेः।

पत्या चैकेन कर्तव्यं सापिण्डीकरणं स्त्रियाः।
सा मृतापि हि तेनैक्यं गता मन्त्राहुतिव्रतैः ॥

इति यमोक्तेश्च। अत्रैकशब्दः पितामह्यादिपञ्चनिवृत्त्यर्थः। पतिपदं वर्गपरम्। सपिण्डनस्य पार्वणैकोद्दिष्टरूपत्वादिति माधवकल्पतरुमदनरत्नादयः। अन्ये तु भर्त्रैवैकेनाहुः—

*स्वेन भर्त्रा सहैवास्याः सपिण्डीकरणं भवेत्।

इत्येवकारश्रवणात्। पृथ्वीचन्द्रोदयेऽपि विकल्प उक्तः। इदं तु तत्त्वम्—यदा हेमाद्र्यादिमते द्वयोरेकः पिण्डस्तदा वर्गेण सह। यदा माधवपृथ्वीचन्द्रादिमते पृथक्पिण्डस्तदैकेन पत्यैकवचनाच्चैकेनापि। अतो *मातृपिण्डमसापिण्डीकृतेनैव पतिपिण्डेन संयोज्यैकीकृतं पि-

---

पत्या सह तत्र भर्तरि अकृतसापिण्डनेऽपि प्रेतीभूते "पापिष्ठमपि शुद्धेन" इति न्यायेनेति। *सपिण्डत्वे सपत्नीकत्वे।

पूर्वमतेऽस्वरसमाह—*स्वेनेति। *मातृपिण्डामिति। पितृभावापन्नेनैव सपिण्डनं न प्रेतेनेति नियमे मानाभावात्। अत्र पितृमातृपितामहादित्रयाणां पञ्चार्घ्यपात्राणि तत्र मातृपात्रदत्तार्घ्यशेषं पितृपात्रे आसिच्य दत्तार्घ्यजलशेषं पितृपात्रं पितामहादिपात्रत्रये सिञ्चेदित्यर्घ्यप्रकारो बोध्यः। विवेचनकृतस्तु पत्युः सपिण्डनं कृत्वा तद्दिन एव कालान्तरे वा भिन्नप्रयोगं स्त्रियाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ण्डद्वयं तत्पित्रादिभिः संयोजयेत्। *अन्त्यपक्ष एव-युक्तः। स्मृत्यर्थसारे तु-'अन्वारोहणेनैकदिनमरणे स्त्रियाः पृथक्सपिण्डनं नास्ति। भर्तुः कृते स्त्रिया अपि कृतं भवति इत्युक्तम्, तन्मतान्तरमस्तु। इदं ब्राह्मादिविवाहेषु ज्ञेयम्।

आसुरादिषु तु शातातपः—

तन्मात्रा तत्पितामह्या तच्छ्वश्र्वा वा सपिण्डनम्।
आसुरादिविवाहेषु विन्नानां योषितां भवेत्।

माताभह्या मातुःपितामह्या तत्प्रपितामह्या चेत्यर्थः। सुमन्तुः—

पिता पितामहे योज्यः पूर्णे संवत्सरे सुतैः।
माता मातामहे तद्वदित्याह भगवाञ्छिवः॥

इदमासुरादिपरं पुत्रिकापुत्रपरं चोक्तं प्राक्। हेमाद्रिस्तु *ब्राह्मादिष्वपि सर्वत्र देशभेदाद्विकल्पमाह।

सपिण्डनं कार्यम्, आहत्य प्रयोगैक्यस्य प्रेतीभूतभर्तृपिण्डसंयोजनस्य च विध्यदर्शनात्। तत्रापि पत्नीपिण्डसंयोजनमेकेनैव भर्तृपिण्डेन। "पत्या चैकेन" इति वचनादिति प्राहुः। वस्तुतस्तु आहत्यैकप्रयोगाविध्यभावेऽपि एकदेशकालकर्तृत्वादेकप्रयोगत्वं भविष्यति, "पत्या चैकेन" इति सामान्यवचनादेव च प्रेतपिण्डसंयोजनम्। नच सपिण्डनजन्यपितृभावापन्नैरेव सपिण्डनं "पितृत्वजनकपितृपात्रेषु प्रेतपात्रमासिञ्चति एतेन पिण्डो व्याख्यातः" इति कात्यायनोक्तेरिति वाच्यम्, "शुद्धं पापकृताऽपि वा" इत्यादिवशेन सम्भवन्त्याः पितृत्वापत्तेरत्याग इत्येतावन्मात्रबोधनात् भिन्नप्रयोगस्यावाचनिकत्वात् तत्कल्पनस्याचारविरोधेन दुर्घटत्वाच्चेत्याशयेनाह—*अन्त्यपक्ष एवेति। एवकारो भिन्नप्रयोगपक्षव्यावृत्त्यर्थः। आचारमपि तत्र दर्शयति—*ब्राह्मेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत ए(१)व गुर्जरेषु कोकिलमतानुसारिणां मातृमातामहप्रमातामहा इति श्राद्धप्रयोगः *सपिण्डनं च दृश्यते। हेमाद्रावापस्तम्बेपि—

कोकिलस्य यथा पुत्रा अन्यसंचयजीविनः।
पुष्टास्ते स्वकुलं यान्ति एवं नारी मृता सती॥

यदपि विज्ञानेश्वरो मातामहेन मातुः सापिण्ड्ये पितृश्राद्धवन्मातृश्राद्धं *नित्यमित्याह, यच्च वृद्धिश्राद्धे छन्दोगपरिशिष्टम्—

षड्भ्यः पितृभ्य*स्तदनु श्राद्धदानमुपक्रमेत्। इति,

तदेतद्विषयमेव, *मातुः पृथक् श्राद्धाभावात्।

अत एव हेमाद्रौ भविष्ये मातुः सपिण्डनं प्रक्रम्य—

उदितेऽनुदिते चैव होमभेदो यथा भवेत्।
तथा कुलक्रमायातमाचारं च चरेद्बुधः॥

इत्युक्तम्। अस्य वृद्धावपवादमाह तत्रैव व्याघ्रपात्—

कुर्यान्मातामहश्राद्धं सर्वदा मातृपूर्वकम्।
विधिज्ञो विधिमास्थाय वृद्धौ मातामहादिवत्॥

केचिदेतत्पुत्रिकापुत्रपरमाहुः।

पत्युः सापिण्ड्यमाह लौगाक्षिः—

सर्वाभावे स्वयं पत्न्यः स्वभर्तृणाममन्त्रकम्।
सपिण्डीकरणं कुर्युस्ततः पार्वणमेव च॥ इति।

यत्तु वचनम्—

अपुत्रस्य परेतस्य नैव कुर्यात्सपिण्डताम्। इति,

यच्चापस्तम्बः—

अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोऽपि वा।

---

*सपिण्डनं चेति। मातामहेन सहेत्यादिः। *नित्यमिति। पृथगित्यर्थः। *तदनु सपिण्डनानन्तरम्। *मातुरिति। अ

---

(१) 'एव' नास्ति ग०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेषां सपिण्डनाभावादेकोद्दिष्टं न पार्वणम् ॥ इति, तत्पुत्रोत्पादनविधिप्रशंसार्थमिति माधवः ।

सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं विधीयते ।
अपुत्राणां तु सर्वेषामपत्नीनां तथैव च ॥

इति हेमाद्रौ प्रचेतसोक्तेश्च । अन्ये तु द्विविधवाक्यदर्शनाद्विकल्पमाहुः । स्मृत्यर्थसारेपि–'ब्रह्मचारिणामनपत्यानां च सपिण्डनं नास्ति, तेषां सदैकोद्दिष्टमेव *व्युत्क्रममृतानां सापिण्ड्यं कार्यं न वा । केचि*त्सर्वत्र

न्यथेत्यादिः । अन्यत्र "पतिना सह" इत्युक्तेः । *व्युत्क्रमेति ।

पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः ।
पितुः स नाम संकीर्त्य कीर्तयेत् प्रपितामहम् ॥

इति मनूक्तौ पितुर्नाम संकीर्त्य पितरं देवतात्वेनोद्दिश्य प्रपितामहं तदादित्रीनुद्दिशेदित्यर्थात् "यस्य पिता प्रेतः स्यात्स पित्रे पिण्डं निधाय पितामहात्पराभ्यां दद्यात्" इति विध्युक्तौ "पित्रे पिण्डं निधाय पितामहात् पराभ्यां द्वाभ्याम्" इत्यत्र तृतीयस्याप्युपलक्षणादितिव्याख्यापक्षे कार्यम् अन्यव्याख्यायां तु न कार्यम् । सा चेत्थम्, व्युत्क्रममृतपुत्रेण दर्शादौ पितामहादीनामेव पार्वणं कार्यम्,

ब्राह्मणादिहते ताते पतिते संगवर्जिते ।
व्युत्क्रमाच्च मृते देयमेभ्य एव ददात्यसौ ॥

इति कात्यायनोक्तेः । एवञ्चोक्तमानवं पितुः पितामहप्रपितामहवृद्धप्रपितामहेभ्य इति प्रयोगनियमार्थम् । पितृप्रपितामहवृद्धप्रपितामहोद्देश्यकपार्वणविध्यर्थत्वासम्भवेन पितुर्नाम सङ्कीर्त्येत्यादेः तत्सम्बन्धित्वेन स्वप्रपितामहादिबुद्धिरेवेत्यर्थात् । ईदृशपार्वणेन सदा पितुरेकोद्दिष्टं च कार्यं, प्रोक्तविष्णुना "पित्रे पिण्डं निधाय" इत्युक्तेः । एवञ्च तद्वाक्ये पितामहादित्यादेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सपिण्डनमाहुरिति। अपुत्रे व्युत्क्रममृते विशेषो रेणुकारिकायाम्—

*भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा।
सर्वबन्धुविहीनस्य पत्नी कुर्यात्सपिण्डताम्।
ऋत्विजं कारयेद्वापि पुरोहितमथापि वा॥
वसुरुद्रादितिसुतैः कार्या तेषां सपिण्डता।
व्युत्क्रमाच्च प्रमीता *ये*तद्दिना प्रेतता ध्रुवम्॥
पुनः सपिण्डनं तेषां कुर्यात्प्रेते पितामहे। इति।

*अत्र मूलं मृग्यम्। यतीनां सपिण्डनं नास्ति किन्त्वेकादशेह्नि पार्वणं कार्यम्। तदपि त्रिदण्डिनः। एकदण्ड्यादीनां तदपि नेत्युक्तं प्राक्। दण्डग्रहणात्पूर्वं मृते तु दाहादिसपिण्डनान्तं सर्वं कार्यमिति भट्टचरणाः।

सपिण्डनविधिमाह बैजवापः—'समाप्ते संवत्सरे चत्वार्युदपात्राणि प्रयुनक्ति एकं प्रेताय, त्रीणि पितृभ्यः प्रेतपात्रं पितृपात्रेष्वासिञ्चति ये समाना इति द्वाभ्या*मेवं पिण्डोऽथाभिमृशति—

एष वोऽनुगतः प्रेतः पितरस्तं ददामि वः।

पितुर्यः पितामहस्तत्पराभ्यां द्वाभ्यां दद्यादित्यर्थः। पितामहस्त्वात्मनः प्रपितामहः सम्प्रदानभूतः स्थित एवेति पितुः पितामहादित्रयलाभः। *सर्वत्रेति। इदानींतनाः शिष्टाः परिगृह्णन्ति। *भ्राता वेति। एकादशाहान्तश्राद्धकर्ता स तदन्यो वेत्यत्र न विशेषः। *ये इति। तेषां सपिण्डतां कुर्यादित्यनुवर्तते। हेतुमाह—*तद्दिनेति। सपिण्डनं विनेत्यर्थः। *अत्रेति। पुनः सपिण्डनांशे इत्यर्थः। यदि च व्युत्क्रममृतस्य सपिण्डनमकृतं तदा पितामहे मृते तेन कुर्यादिति व्याख्या तेषां पुनरिति योजनयोचितेति बोध्यम्। *एवंपिण्ड इति। पिण्डोत्थानपर्यन्तं पिण्डदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिवं भवतु शेषाणां जायन्तां चिरजीविनः ॥

"समानी वः" "संगच्छध्वं संवदध्वम्" इति (१)द्वाभ्याम्' इति । यद्यपि—

तच्चापि देवरहितमेकार्घ्यैकपवित्रकम् ।
नैवाग्नौकरणं तत्र तच्चावाहनवर्जितम् ॥

इति मार्कण्डेयेनोक्तम्, तथापि—

सपिण्डीकरणं श्राद्धं दैवपूर्वं नियोजयेत् ।

इत्यादिविरोधाद्विकल्पः, प्रेतांशे वा ज्ञेयम् ।

अत्र कामकालौ विश्वेदेवावपीत्युक्तं प्राक् । मैत्रायणीयपरिशिष्टे—

पित्र्यविप्रकरे होमः साग्नेरपि भवेदिह ।

यत्तु गोभिलः—

अनुक्तकालेष्वपि तु व्युत्क्रमेण मृतावपि ।
आमेन वापि सापिण्ड्यं हेम्ना वापि प्रकल्पयेत्॥इति,

तदापदि मातापितृभिन्नपरम्,

आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ।

इति तेनैवोक्तेः । शुद्धितत्त्वे कामधेनौ च लघुहारीतः—

सपिण्डीकरणं यावत्प्रेतश्राद्धं तु षोडशम् ।
पक्वान्नेनैव कर्तव्यं सामिषेण द्विजातिभिः ॥

विश्वप्रकाशे—

प्रेतः सपिण्डनादूर्ध्वं पितृलोकेऽनुगच्छति ।
कुर्यात्तस्य तु पाथेयं द्वितीयेऽह्नि सपिण्डनात् ॥

नप्रयोगं कृत्वा पिण्डसंयोजनं कार्यं, "दत्त्वा पिण्डान्" "निरूप्य चतुरः पिण्डान्" इत्यादिपिण्डदानभावनोत्तरं तद्विधानात् । विष्णुना तु विसर्जनोत्तरमुक्तम् "उच्छिष्टसंनिधौ पिण्डत्रयं कुर्यात्

---

(१) 'द्वाभ्याम् इति यद्यपि' नास्ति ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्मृत्यर्थसारेऽप्येवम् । ततो वृद्धिश्राद्धं कुर्यात् । एतन्मलमासेपि कार्यम्,

अधिमासे न कर्तव्यं श्राद्धमाभ्युदयं तथा ।
तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

इति हेमाद्रौ हारीतोक्तेः ॥

इति भट्टकमलाकरकृते निर्णयसिन्धौ सपिण्डीकरणम् ॥

अथ प्रथमाब्दे निषिद्धानि । हेमाद्रौ—

*स्नानं चैव महादानं *स्वाध्यायं चा*ग्नितर्पणम् ।
प्रथमाब्दे न कुर्वीत महागुरुनिपातने ॥

अन्यतर्पणामिति शुद्धितत्वे पाठः ।—

अग्नितर्पणं लक्षहोमादि नत्वा*धानम् ।

तत्तु प्रथमाब्दे भवत्येव । तदाह हेमाद्रावुशनाः—

पितुः सपिण्डीकरणं वार्षिके मृतवासरे ।
आधानाद्युपसंप्राप्तावेतत्प्रागपि वत्सरात् ॥

आदिपदं *वृद्धिनिमित्तनित्यकर्मपरम् । दिवोदासीये-

महातीर्थस्य गमनमुपवासव्रतानिच ।
संवत्सरं न कुर्वीत महागुरुनिपातने ॥

देवपूर्वान् ब्राह्मणानाचान्तानदत्तदक्षिणांश्चानुव्रज्य विसर्जयेत् । ततः प्रेतपिण्डमर्घ्यपात्रोदकवत् पिण्डत्रये निदध्यादिति" । केचित्तु संयोजितान् त्रीन् पिण्डान् इदानीन्तनमृतमारभ्य पुरुषत्रयपर्यन्तं पुनरपि पार्वणवन्नामगोत्राण्युच्चार्य दद्यादित्याहुः । तत्तु न ग्रन्थकृत्संमतम् , तथावचनानुपलम्भात् । अक्षय्यादौ तु प्रेतशब्द एव । पिण्डमात्रेण पितृत्वाप्राप्तेः सङ्गस्य जनकत्वात् ।

*स्नानं समावर्तनं काम्यस्नानं वा । *स्वाध्यायं काम्याध्ययनम् । *अग्नितर्पणामिति पितृतर्पणमिति पाठान्तरम् । *आधानं पुनराधानम् । *वृद्धीति । आवश्यकेषु वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं श्राद्धकौमुद्यां देवीपुराणस्थमुक्तम् ।
गौडनिबन्धे मात्स्ये—

सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेत् ।
वृद्धीष्टापूर्तयोग्यश्च गृहस्थश्च सदा भवेत् ॥

वर्षान्तसपिण्डनाभावे नाधिकारीत्यर्थः । गृहस्थः सपिण्डोऽपीत्यर्थः । अत एव—

*प्रेतकर्माण्यनिर्वर्त्य चरेन्नाभ्युदयक्रियाम् ।
आचतुर्थं, ततः पुंसि पञ्चमे शुभदं भवेत् ॥

इति ज्योतिषे उक्तम् । माधवीये देवलः—

प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् ।
न दैवं नापि वा पित्र्यं यावत्पूर्णो न वत्सरः ॥

इदं वर्षान्तसपिण्डनपरम्,

तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ।

इति लघुहारीताद्येकवाक्यत्वात् । वृद्धिनिमित्तापकर्षे तु वर्ष(१)मध्येऽपि काम्यादि भवत्येवेति गौडाः । पित्र्यं सपिण्डनम् । अत एव लौगाक्षिः—

अन्येषां प्रेतकार्याणि महागुरुनिपातने ।
कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत् ॥

वाहचौलोपनयनेष्टापूर्तेषु वर्षमध्येऽधिकार इत्यर्थः । *प्रेतकर्माणीति । येषां करिष्यमाणवृद्धिश्राद्धे देवतात्वं तेषामेवापकर्षो नान्येषां प्रमाणाभावादिति मते आत्मानमारभ्य चतुर्थः प्रपितामहः तत्पर्यन्तसपिण्डनमावश्यकम् । स्वकर्तृकाभ्युदयिकश्राद्धे पितृपितामहप्रपितामहानां देवतात्वात्सपिण्डीकरणाभावे वृद्धिश्राद्धाभावात् । पञ्चमस्य वृद्धप्रपितामहस्य पौत्रपुत्रकर्तृकाभ्युदये देवतात्वाभावात् सपिण्डीकरणान्तश्राद्धाभावेऽपि तत्कर्तृकमाभ्युद-

---

(१) 'वर्षमध्येऽपि' नास्ति ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दाहाद्येकादशाहान्तं कार्यम् । तत्राशौचान्तरस्या-प्रतिबन्धकत्वात् ।

आद्यं श्राद्धमशुद्धोऽपि कुर्यादेकादशेहनि ।

इत्युक्तेश्च । एकं सपिण्डनम् ।

पत्न्यादौ त्वपवादमाह माधवीये ऋष्यशृङ्गः—

पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयस्य च ।
स्नुषास्वस्रोश्च पित्रोश्च संघातमरणं यदि ॥
अर्वागब्दान्मातृपितृपूर्वं सापिण्ड्यमाचरेत् ॥

लौगाक्षिः—

पत्नी पुत्रस्तथा पौत्रो भ्राता तत्पुत्रका अपि ।
पितरौ च यदैकस्मिन् (१)म्रियेरन्वासरे तदा ॥
आद्यमेकादशे कुर्यात्त्रिपक्षे तु सपिण्डनम् ॥

धवलनिबन्धे—

महागुरुनिपाते तु प्रेतकार्यं यथाविधि ।
कुर्यात्संवत्सरादर्वागेकोद्दिष्टं न पार्वणम् ॥

भृगुः—

माता चैव तथा भ्राता भार्या पुत्रस्तथा स्नुषा ।
एषां मृतौ चरेच्छ्राद्धमन्यस्य न पुनः पितुः ॥

एतदपि सपिण्डनपरम् । पितुर्मृतावन्यस्य श्राद्धं न चरेदित्यर्थः । शुद्धितत्त्वे श्रा(२)द्धकौमुद्यां च देवलः-

अन्यश्राद्धं परान्नं च गन्धमाल्यं च मैथुनम् ।

यिकं शुद्धमित्यर्थः । यस्यकस्यापि सपिण्डस्य गृहे वृध्युपस्थितौ येन केनापि सपिण्डेन स्वपित्रादेः सपिण्डनं कार्यमिति दाक्षिणात्यरीतौ च वर्षमध्ये सपिण्डनेऽप्यनधिकारश्चतुर्थान्तः । अत एव गृहस्थः सपिण्डोऽपि इत्युक्तम् । पञ्चमादौ तु उक्तदाक्षिणा-

---

(१) 'म्रियेताम्' । (२) 'श्राद्धकौमुद्यां च' नास्ति ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्जयेद् गुरुपाते तु यावत्पूर्णो न वत्सरः ॥

पारस्करभाष्ये बृहस्पतिः—

पितर्युपरते पुत्रो *मातुः श्राद्धान्निवर्तते।
मातर्यपि च वृत्तायां पितृश्राद्धादृते समम् ॥

समं पितरं विनाऽन्यश्राद्धं नेत्यर्थः। शुद्धितत्वे देवलः—

महागुरुनिपाते तु काम्यं किंचिन्न चाचरेत्।
आर्त्विज्यं ब्रह्मचर्यं च श्राद्धं देवक्रियां तथा ॥

एतत्सपिण्डनात्प्रागिति केचित्। तदुत्तरमपीत्यन्ये। श्राद्धकौमुद्यां कालिकापुराणे पू(१)र्वार्धे—

विशेषतः शिवपूजां प्रमीतपितृको नरः।
यावद्वत्सरपर्यन्तं *मनसापि न चाचरेत् ॥

केचित्तु—

पित्रोरब्दमशौचं स्यात्षण्मासं मातुरेव च।
त्रैमासिकं तु भार्यायास्तदर्धं भ्रातृपुत्रयोः ॥

इति स्मृतेः सापत्नमातु*रब्दार्धमाहुः। श्राद्धकौमुदीकारस्तु—

द्वयोरेव महागुर्वोरब्दमेकमशौचकम्।
नान्येषामधिकाशौचं स्वजातिविहितात्किल ॥

त्याचाराद् वर्षमध्ये सपिण्डने इष्टापूर्तादिकमपि शुभदमिति। *मातुः श्राद्धादिति। यत्र मातृमरणानन्तरं पिता मृतस्तत्र मातुः सपिण्डनस्यावश्यकतया स्वपुत्रादिना तत्कारणीयम्। अथवा यत्र मातुः सपिण्डनमपि न कार्यं तत्रान्यसपिण्डने किं वक्तव्यमित्यन्यसपिण्डननिन्दायां तात्पर्यम्। *मनसापीति। अपिः संक्षेपपूजाविशेषलाभार्थः *अब्दार्धमिति। पूजाऽनाचरणार्थ-

(१) 'पूर्वार्धे' नास्ति क० छ०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति समूलजातूकर्ण्यविरोधान्निर्मूलमाह । हेमाद्रौ भविष्ये—

गयाश्राद्धं मृतानां तु पूर्णे त्वब्दे प्रशस्यते ।

त्रिस्थलीसेतौ गारुडे—

तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकम् ।
अ(१)ब्दमध्ये न कुर्वीत महागुरुविपत्तिषु ॥

इदं वृद्ध्यर्थसपिण्डनाभावे । वृद्धौ सपिण्डनापकर्षेऽब्दमध्येपि दर्शादि कार्यमेव,

पितुः सपिण्डनं कृत्वा कुर्यान्मासानुमासिकम् ।

इति छन्दोगपरिशिष्टात्;

सपिण्डीकरणादूर्ध्वं प्रेतः पार्वणभुग्भवेत् ।

इति मात्स्यात्;

ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते ।
विन्दते पितृलोकं च ततः श्राद्धं प्रवर्तते ॥

इति हारीताच्चेति शूलपाणिः । यत्तु कातीयम्—

सपिण्डीकरणादूर्ध्वं न दद्यात्प्रतिमासिकम् ।
एकोद्दिष्टविधानेन दद्यादित्याह शौनकः ॥ इति ।

तत्रैकोद्दिष्टविधिना न दद्यादित्यन्वयः । *तुर्यपादेन पार्वणे विकल्प उक्तः ।

(ब्रह्म(२)वैवर्ते—

उद्वाहश्चोपनयनं प्रथमेऽब्दे महीपते ।
कृते सपिण्डनेऽप्यूर्ध्वमस्थनां चोद्धरणं त्यजेत् ॥
तथापि कर्तुमिच्छन्ति त्रीणि चैतानि वै सुताः ।

मिति शेषः । ननु पुनर्दद्यादित्यधिकं स्यादित्यत आह—*तुर्येति ।

प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स तान्यपि ।

---

(१) 'प्रथमाब्दे' क० (२) कंसान्तर्गतं नास्ति । क० छ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासिकान्यवशिष्टानि चापकृष्य चरेत्पुनः ॥)

अत्रेदं तत्त्वम्। वृद्धिं विनाऽर्वागपि सपिण्डनापकर्षे पितृत्वप्राप्तिर्वर्षान्त एव,

कृते सपिण्डीकरणे नरः संवत्सरात्परम्।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥

इति विष्णुधर्मोक्तेः—

अर्वाक्संवत्सराद्यस्य सपिण्डीकरणं भवेत्।
प्रेतत्वमिह तस्यापि विज्ञेयं वत्सरं नृप ॥

इत्याग्निपुराणाच्च। तेन तत्सत्त्वेऽपि वृद्धिदैवपित्र्येष्वनधिकारः। वृद्धिनिमित्ते त्व*नन्तरमेव,

अर्वाक्संवत्सराद्वृद्धौ पूर्णे संवत्सरेऽपि वा।
ये सपिण्डीकृताः प्रेता न तेषां तु*पृथक् क्रिया ॥

इति शातातपोक्तेः। तथैव काम्यमिति हेमाद्रिधृतहारीतादिवशाच्चैवमिति। तथा—

अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकम्।
प्रथमेऽब्दे न कुर्वीत *(१)कृतेऽपि तु सपिण्डने ॥

अस्यापवादः—

अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकम्।
प्रथमेऽब्देऽपि कुर्वीत*यदि स्याद्भक्तिमान्सुतः ॥

*भक्त्याख्यं श्राद्धं तद्वानिति मदनपारिजातादयः। अन्ये यथाश्रुतमाहुः। तत्त्वं तु यदीदं समूलं तदा वृद्धिं

इति प्रागुक्तत्वादिति भावः। *अनन्तरमेवेति। पितृत्वप्राप्तिरिति वर्तते। *पृथक्क्रियेति। आभ्युदयिकश्राद्धदेवतात्वात् पृथक्कार्येत्यर्थः। एवञ्च पितृत्वावाप्तिरर्थसिद्धैवेति। *कृतेपि त्विति। यदि न स्यात्सापिण्डनमिति अन्यत्र पाठः। *यदि स्यादिति। कृतं यस्यौर्ध्वदेहिकमिति केचित्। *भ-

---

(१) 'कृते पितुः' ग०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनापकर्षे पूर्वं,*वृद्ध्यर्थे तु परामिति योज्यम् । पतितानां गयायां विशेषो ब्राह्मे—

क्रियते पतितानां च गते संवत्सरे क्वचित् ।
देशधर्मप्रमाणत्वाद्गयाश्राद्धं स्वबन्धुभिः ॥

अथ विधानानि । तत्र पञ्चकमृते मदनरत्ने गारुडे—

आदौ कृत्वा *धनिष्ठार्धमेतन्नक्षत्रपञ्चकम् ।
रेवत्यन्तं सदा दृष्यमशुभं दाहकर्मणि ॥
शवस्य च समीपे तु क्षेप्तव्याः पुत्तलास्तदा ।
दर्भमयास्तु*चत्वार ऋक्षमन्त्राभिमन्त्रिताः ॥
ततो दाहः प्रकर्तव्यस्तैश्च पुत्तलकैः सह ।
सूतकान्ते ततः पुत्रैः कार्यं शान्तिकपौष्टिकम् ॥
*पञ्चकेषु मृतो यो वै न गतिं लभते नरः ।
तिलांश्चैव हिरण्यं च तमुद्दिश्य घृतं ददेत् ॥

क्रियानिबन्धे—

भाजनोपानहौ छत्रं हैममुद्रां च वाससी ।

त्याख्यमिति । देवतात्वसंपादकं चेदम् । *वृद्ध्यर्थे तु इति । अपकर्षे इति वर्तते । एवञ्च भक्तिमानिति यथाश्रुतमेव सिद्धाया भक्तेरनुवादः ।

यतिधर्मे—

नाश्नन्ति पितरो देवा मृते वै गृहमेधिनि ।
भिक्षुर्भिक्षां न गृह्णाति यावत्कुर्यात्सपिण्डनम् ॥

अत्र वर्षान्ते वृध्यर्थं वा सपिण्डनमवधिः । पितुरब्दमशौचं स्यादिति वचनानुसारिणो यतयः । *धनिष्ठार्धमिति । अतिनिषिद्धं धनिष्ठाया एव निषेधात् । *चत्वार इति चतुर्नक्षत्राभिप्रायकम् । तेन दर्भाणां प्रतिमाः कार्याः इत्यादिना न विरोधः । ऋक्षमन्त्रा जप्याः । अत्र वसवोरन्त१, तत्त्वायामि ब्रह्मणा२, सुतनोहिबुध्न्यः३, कद्रुद्राय४, पूषा गा अन्वेतु५ । शान्तिकपौष्टिकं वक्ष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दक्षिणा दीयते विप्रे सर्वपातक*मोचनी ॥

मदनरत्ने गार्ग्यः—

यदि भदातिथीनां स्याद् भानुभौमशनैश्चरैः।
त्रिपादृक्षैश्च संयोगो द्वयोर्योगे द्विपुष्करः ॥
द्वित्रिपुष्करयोगे तु मृतिर्मृत्यन्तरावहा।
दहने मरणे चैव त्रिगुणं स्यात्त्रिपुष्करे ॥
खननेऽप्येवमेव स्यादेतद्दोषोपशान्तये।
तिलपिष्टैर्यवैर्वापि शरीरं कारयेत्ततः ॥
शूर्पे निधायालंकृत्य दाहयेत्पैतृकोपरि ॥

तद्दाहे मन्त्रमाह बौधायनः—

अस्मात्त्वमिति मन्त्रेण तिलपिष्टं प्रदाहयेत्।
द्वित्रिपुष्करयोर्दोषस्त्रिभिः कृच्छ्रैर्व्यपोहति ॥
वासवे मरणं चेत्स्याद् गृहे वापि पुनर्मृतिः।
सुवर्णं दक्षिणां दद्यात्कृष्णवस्त्रमथापि वा ॥

वासवं धनिष्ठा। ब्राह्मे—

कुम्भमीनस्थिते चन्द्रे मरणं यस्य जायते।
न तस्योर्ध्वगतिर्दृष्टा संततौ न शुभं भवेत् ॥
न तस्य दाहः कर्तव्यो विनाशात्स्वेषु*जन्तुषु।
अथवा तद्दिने कार्यो दाहस्तु विधिपूर्वकम्।
धनिष्ठापञ्चके जीवो मृतो यदि कथंचन।
त्रिपुष्करे याम्यभे वा कुलजान्मारयेद्ध्रुवम् ॥
तत्रानिष्टविनाशार्थं विधानं समुदीर्यते।

प्रेतस्य गतिसिद्ध्यर्थमाह—*पञ्चकेष्विति। *मोचनीति।

बालवृद्धस्य यूनश्च पञ्चकेषु मृतस्य च।
विधानं यो न कुर्वीत विघ्नस्तस्य प्रजायते ॥

इत्युत्तरश्लोकः। *जन्तुष्विति। ततः पञ्चकानन्तरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दर्भाणां प्रतिमाः कार्याः पञ्चोर्णासूत्रवेष्टिताः ॥
यवपिष्टेनानुलिप्तास्ताभिः सह शवं दहेत् ॥
प्रेतवाहः प्रेतसखः प्रेतपः प्रेतभूमिपः ।
प्रेतहर्ता पञ्चमस्तु नामान्येतानि च क्रमात् ॥

अत्र प्रतिमा गन्धपुष्पैः पूजयित्वा प्रथमां शिरसि, द्वितीयां नेत्रयोः, तृतीयां वामकुक्षौ, चतुर्थीं नाभौ, पञ्चमीं पादयोर्न्यस्य तदुपरि नामाभिर्घृतं "हुत्वा-"यमाय सोमं" "त्र्यम्बकम्" इति मन्त्राभ्यां प्रत्येकं तास्वाज्यं हुनेदिति भट्टाः ।

सूतकान्ते ततः पुत्रः कुर्याच्छान्तिकपौष्टिकम् ।
कांस्यपात्रस्थितं तैलं वीक्ष्य दद्याद्द्विजन्मने ॥
ब्रह्मविष्णुमहेशेन्द्रवरुणप्रीतये ततः ।
माषमुद्गयवव्रीहिप्रियंगवादि प्रयच्छति ॥
स्वर्णदान रुद्रजाप्यं लक्षहोमो द्विजार्चनम् ।
गोभूदानं षडंशेन कुर्याद्दोषोपशान्तये ॥

अपरार्के--

धानिष्ठापञ्चकमृते पञ्चरत्नानि तन्मुखे ।
प्रास्याहुतित्रयं तत्र हुनेद्वहवपामिति ॥
ततो निर्हरणं कुर्यादेष साग्निर्विधिः स्मृतः ।
इतरं निखनेदेव जले वा प्रतिपादयेत् ॥
त्रिपादर्क्षमृते तद्वद्धिरण्यशकलं मुखे ।
न्यस्य पिष्टमयं कुर्यात्पुरुषत्रितयं ततः ।
होमं प्रतिमुखं कुर्यात्तथा वहवपामिति ।
कार्ष्णायसं च कार्पासं कुसुम्भं प्रतिपाद्य च ।
निर्यात्य साग्निं संस्कुर्याद्भुव्यग्नौ वान्यमुत्सृजेत् ॥

कार्यं दाहादिकं मध्ये न त्वित्यर्थः । *हुत्वेति । उदकधारां च द-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैव—

कनकं हीरकं नीलं पद्मरागं च मौक्तिकम् ।
पञ्चरत्नमिदं प्रोक्तमृषिभिः पूर्वदर्शिभिः ॥
रत्नानां चाप्यभावे तु स्वर्णं कर्षार्धमेव च ।
सुवर्णस्याप्यभावे तु आज्यं ज्ञेयं विचक्षणैः ॥

मदनरत्नेप्येवम् । तथा—

एकाशीतिपलं कांस्यं तदर्धं वा तदर्धकम् ।
नवषट्त्रिपलं वापि दद्याद्विप्राय शक्तितः ॥

तथा*न्यत्र—

*स्वगृह्योक्तविधानेन कृत्वाग्नेः स्थापनं ततः ।
अन्वाधानं निर्वपणं देवतानां तथाहुतिः ॥
यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै क्रमात् ॥
विधिना श्रपणं कृत्वा एकैकामाहुतिं *हुनेत् ॥

त्रिपादर्क्षेप्येतदेव । अपरार्के—

पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी ।
पूर्वाभाद्रा विशाखा च ज्ञेयमेतत्त्रिपादभम् ॥

मयूरचित्रे गर्गः—

मृतः श्मशानं यो नीत उपजीवति मानवः ।

चेति अन्त्येष्टिः । *अन्यत्र बौधायनीयशान्तिसर्वस्वे । *स्वगृह्योक्तेति ।

पञ्चके ये मृता विप्रास्तेषां शान्तिं विधानतः ।
अतीते सूतके कुर्यात्कोचित्तद्दक्षयोगतः ॥

इत्यादि । *हुनेदिति ।

कृष्णां गां कृष्णवत्सां च हैमानिष्कसमन्विताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहे यस्य प्रविष्टोसौ तिष्ठेदथ कदाचन ॥
अचिरान्मृत्युमायाति हृतदारपरिग्रहः।
तत्र शान्तिं प्रवक्ष्यामि धर्मराजमतं यथा ॥
सक्षीराणां घृताक्तानामग्नेर्हुत्वा मुखे बुधः।
औदुम्बराणां विधिवत्ततः शान्तिः कृता भवेत् ॥
सावित्र्यष्टसहस्रेण क्षीरशान्तिं च कारयेत्।
कपिलां तिलकांस्यं च हुतान्ते भूरिदक्षिणा॥ इति।

अथ ब्रह्मचारिमृतौ शौनकः—

ब्रह्मचारिमृतौ रीतिं कथयामि समासतः।
तत्रावकीर्णदोषस्य प्रायश्चित्तं प्रशान्तये ॥
द्वादशाब्दं षडब्दं वा त्र्यब्दं शक्त्याथवा*चरेत्।
स्नातको ब्रह्मचारी च निधनं प्राप्नुयाद्यदि ॥
संयोज्य चार्कविधिना संयोज्यौ तौ ततः परम्॥

देशकालौ स्मृत्वा-'अमुकगोत्राऽमुकनाम्नो मृतस्य ब्रह्मचारिणो व्रतविसर्गं करिष्ये' इत्युक्त्वा हेम्ना नान्दीश्राद्धं कृत्वाऽग्निं प्रतिष्ठाप्याघारान्ते चतसृभिर्व्याहृतिभिरग्नये व्रतपतये व्रतानुष्ठानसंपादनाय विश्वेभ्यो देवेभ्यश्चाज्यं हुत्वा स्विष्टकृदादि समाप्य पुनर्देशकालौ स्मृत्वाऽर्कविवाहं करिष्ये इत्युक्त्वा हेम्ना नान्दीश्राद्धं कृत्वाऽर्कशाखां शवं च हरिद्रया लिप्त्वा पीतसूत्रेण वस्त्रयुग्मेन चावेष्ट्याऽग्निं प्रतिष्ठाप्याघारान्तेऽग्नये बृहस्पतये विवाहविधियोजकाय च "यस्मै त्वं कामकामाय"इति कामाय व्याहृतिभिश्चाज्यं हुत्वा स्विष्टकृदादि

दद्याद् विप्राय शान्ताय प्रीतो भवतु मे यमः ॥
इत्यपि क्वचित्। *चरेदिति।
ततो वृषविसर्गाख्यं विधिं सम्यक् समाचरेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समाप्यार्कशाखां शवं च दहेत् । विधानमालायाम्—

येषां कुले ब्रह्मचारी निधनं प्राप्नुयाद्यदि ।
तत्कुलं क्षयमाप्नोति सोऽपि*दुर्गतिमाप्नुयात् ॥
मृतस्य म्रियमाणस्य षडब्दं व्रतमादिशेत् ॥
त्रिंशद्भ्यो *ब्रह्मचारिभ्यो दद्यात्कौपीनकान्नवान् ।
हस्तमात्रान्कर्णमात्रान्दद्यात्कृष्णाजिनानि च ॥
पादुकाछत्रमाल्यानि गोपीचन्दनमेव च ।
मणिप्रवालमालाश्च *भूषणादि समर्पयेत् ॥
एवं कृते विधाने च विघ्नः कोऽपि न जायते ।

अत्र मूलं मृग्यम् ॥

कुष्ठिमृतौ तु यमः—

मृतस्य कुष्ठिनो देहं निखनेद्गोष्ठभूमिषु ।
वासरात्रितयं पश्चादुद्धृत्यान्यत्र तं दहेत् ॥
न गङ्गाप्लवनं कार्यं निक्षेपे विधिरुच्यते ।
षडब्दव्रतपूर्णेन विधिनान्त्यं क्रतुं चरेत् ॥
ततोऽस्थिसंचयं तस्य गङ्गायां प्रक्षिपेत्सुधीः ।
मासिमासि ततः कुर्यान्मासि श्राद्धानि पार्वणान् ॥
इत्येतत्कुष्ठिमरणे कथितं शास्त्रकोविदैः ॥

शुद्धितत्त्वे भविष्ये—

शृणु कुष्ठिगणं विप्र उत्तरोत्तरतो गुरुम् ।
विचर्चिका तु दुश्चर्मा चर्चरीयस्तृतीयकः ॥

इत्युत्तरार्धम् । एवमेव ब्रम्हचारिपदस्थाने स्नातकपदं योजयित्वा विधिर्द्रष्टव्यः । *दुर्गतिमिति । सा च तत्रैव—

ग्रहत्वमाप्नुयाद् बोधिद्रुमेऽनवरतं वसेत् । इति ।

*ब्रह्मचारिभ्य इति । तदभावे "ये सकृद्रात्रौ संयुज्यन्ते ब्रह्मचारिण एव ते" इत्युक्तब्रह्मचारिभ्यः । साधुगृहस्थेभ्य इत्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विकर्चूर्व्रणताम्रौ च कृष्णश्वेते तथाष्टकम् ॥

इत्युक्त्वा—

मृते तु प्रापयेत्तीर्थमथवा तरुमूलकम् ।
न पिण्डं नोदकं कार्यं नच दानक्रियां चरेत् ॥
षण्मासीयास्त्रिमासीयो मृतः कुष्ठी कदाचन ।
यदि स्नेहाच्चरेद्दाहं यातिचान्द्रायणं चरेत् ॥

अकृतप्रायश्चित्तकुष्ठ्यादिदाहे इदं प्रायश्चित्तम् ॥ अत एव कुनख्यादिवत्कुष्ठिनोपि द्वादशरात्रं शूलपाणिनोक्तम् । अतएवान्यदीयकुष्ठिनो मरणान्तमाशौचमुक्तं कौर्मे—

क्रियाहीनस्य मूर्खस्य महारोगिण एव च ।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम् ॥

महारोगास्तु—

वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्तिताः ॥ इति ॥

रजस्वलायास्तु वृद्धशातातपः—

रजस्वलायाः प्रतायाः संस्कारादीनि नाचरेत् ।
ऊर्ध्वं त्रिरात्रात्स्नातां तां शवधर्मेण दाहयेत् ॥

अतः प्रक्षाल्य काष्ठवद्दग्ध्वा *त्र्यहोर्ध्वं दहेत् ॥ सङ्कटे तु मदनरत्ने स्मृत्यन्तरे—

उदक्या सूतिका वापि मृता स्याद्यदि तां तदा ॥
आशौचे त्वनतिक्रान्ते दाहयेदन्तरा यदि ॥
उद्धृतेन तु तोयेन स्नापयित्वा तु मन्त्रतः ।
आपोहिष्ठेति तिसृभिर्हिरण्यवर्णाश्चतसृभिः ॥
पवमानानुवाकेन यदन्तीति च सप्तभिः ।

न्ये । *भूषणादीति । ब्रह्मसूत्राणि चार्पयेदिति अन्त्येष्टिः । *त्र्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो यज्ञपवित्रेण गोमूत्रेणाथ ते द्विजाः ॥
स्नापयित्वाऽन्यवसनेनाच्छाद्य शवधर्मतः ।
दाहादिकं ततः कुर्यात्प्रजापतिवचो यथा ॥

यज्ञपवित्रमापो अस्मानिति । मिताक्षरायाम्—

पञ्चभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलाम् ।
वस्त्रान्तरावृतां कृत्वा दाहयेद्विधिपूर्वकम् ॥

गृह्यकारिकायाम्—

अन्तरिक्षमृता ये च वह्नावप्सु प्रमादतः ।
उदक्या सूतिका नारी चरेच्चान्द्रायणत्रयम् ॥

ततो यवपिष्टेना*नुलिप्याष्टोत्तरशतं शूर्पोदकैः *संस्नाप्य *भस्मगोमयमृत्कुशोदकपञ्चगव्यशुद्धोदकै-*रापोहिष्ठापावमानीभिः संस्नाप्यान्यवस्त्रे धृते दहेदिति भट्टाः ।

अत्र प्रायश्चित्तमाह बौधायनः—

उदक्यासूतिकामृत्यौ चरेच्चान्द्रायणत्रयम् । इति ।

सूतिकायास्तु मिताक्षरायाम्—

सूतिकायां मृतायां तु कथं कुर्वन्ति याज्ञिकाः ।
कुम्भे सलिलमादाय पञ्चगव्यं क्षिपेत्ततः ॥
पुण्यार्ग्भिरभिमन्त्र्यापो वाचा शुद्धिं लभेत्ततः ।
तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि ॥
अग्निलिङ्गाभिर्मन्त्रिताभिर्वामदेव्याभिरेव च ।
अन्यैश्च वारुणैर्मन्त्रैः संस्नाप्य विधिना दहेत् ॥

होर्ध्वमिति अतन्त्रम् । *अनुलिप्येति । स्वयं स्नात्वेति शेषः। *संस्नाप्येति । प्रेतं प्रक्षाल्येति शेषः । *भस्मेति । संस्नाप्येत्यनुवर्तते । *आपोहिष्ठेति । पावमानीः स्वस्त्ययनीः, यदन्ति यच्च दूरके, आपोहिष्ठेति चतसृभिः, कया नः इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृह्यकारिकायाम्—

सूतिकामरणे प्राप्ते सर्वौषध्यनुलेपनम् ।
असूतकी तु संस्पृष्टः शूर्पाणां तु शतं क्षिपेत् ॥

प्रायश्चित्ते विशेषस्तत्रैव—

सूतिका तु यदा साध्वी विस्नाता मरणं गता ।
त्रिवर्षपूर्णपर्यन्तं शुध्येत्कृच्छ्रेण सर्वदा ॥

इदं चाद्यत्र्यहे ॥

सूतिका तु यदा नारी रजसा तु परिप्लुता ।
म्रियते चेत्तु सा नारी द्विवर्षं कृच्छ्रमाचरेत् ॥

इदं द्वितीयत्र्यहे ॥

सूतिका तु यदा साध्वी विस्नाता मरणं गता ।
अब्दं कृच्छ्रेण शुद्ध्येत व्यासस्य वचनं यथा ॥

इदं तृतीयत्र्यहे । अत्राशक्तौ पक्षान्तरमुक्तं तत्रैव—

सूतिका तु यदा नारी विस्नाता मरणं गता ।
त्रिषण्णवदिनादर्वागे*काब्देन विशुध्यति ॥

ऊर्ध्वं तु—

सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् ।
मासमेकावधिं यावत्त्रिभिः कृच्छ्रैर्विशुद्ध्यति ॥

गर्भिणीमृतौ मदनरत्ने शौनकः—

गर्भिण्युदक्यासंस्कारं शिशुसंस्कारमेव च ।

त्रिभिरित्यर्थः । *एकाब्देनेति । एककृच्छ्रेणेति पठित्वा दशाहोर्ध्वमेककृच्छ्रमित्यन्ये ।

सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् ।
मासमेकावधिर्यावत्त्रिभिः कृच्छ्रैर्व्यपोहति ॥

इति तु दशाहोर्ध्वम् । सर्वं च प्रायश्चित्तं तदैव प्रत्याम्नायेन सूतकान्ते वा कार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रवक्ष्यामि समासेन शौनकोऽहं द्विजन्मनाम् ॥
गर्भिणीमरणे प्राप्ते गोमूत्रेण जलैः सह ।
आपोहिष्ठादिभिर्मन्त्रैः प्रोक्ष्य भर्ता समास्थितः ॥
प्रेतं श्मशाने नीत्वाऽथोल्लिख्य सव्योदरं ततः ।
पुत्रमादाय जीवंश्चेत्स्तनं दत्त्वा सुताय तु ॥
यस्ते स्तनः शशय इत्यृचा ग्रामे निधाय च ।
उदरं चाव्रणं कुर्यात्पृषदाज्येन पूर्य च ॥
मृद्भस्मकुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः ।
स्नाप्य चाच्छाद्य वासोभिः शवधर्मेण दाहयेत् ॥

तत्रैव षडशीतिमते गद्यानि—"गर्भिण्यां मृतायां दक्षिणशिरसं निधाय तस्या नाभिरन्ध्रात्सव्यमुदरं चतुरङ्गुलं हिरण्यगर्भः समवर्ततेति छित्त्वा गर्भश्चेदप्राणस्तं प्रक्षाल्य निखनेत्स यदि जीवन् 'जीव त्वं मम पुत्रक' इत्युक्त्वा क्षेत्रियेत्वेति पञ्चभिः स्नापयित्वा हिरण्यमन्तर्धाय भूमौ निधाय व्याहृतिभिरभिमन्त्र्य यस्ते स्तनः शशय इति स्तनं पाययित्वा शिशुं ग्रामं प्रापयेत् । गर्भच्छेदस्थले शतायुधायेति पञ्चाहुतीर्हुत्वा प्राणाय स्वाहा पूष्णे स्वाहेत्यनुवाकाभ्यां व्याहृत्या वाऽऽज्यं हुत्वा भिन्नमुदरं सूत्रेण संग्रथ्य घृतेनानुलिप्य ब्राह्मणाय तिलान् गां भूमिं सुवर्णं दद्यादथ यथोक्तेन कल्पेन दहेत्" । बौधायनेन तु शतायुधायेति पञ्चहोमानन्तरं प्रयासाय यासाय वियासाय संयासायोद्यासाय शुचे शोकाय तप्यते तपत्यै ब्रह्महत्यायै सर्वस्मै इति स्वाहान्तैराहुतयोऽप्यधिका उक्ताः । गृह्यकारिकायाम्—

यदा गर्भवती नारी सशल्या संस्थिता भवेत् ।
कुक्षिं भित्त्वा ततः शल्यं निर्हरेद्यदि जीवति ॥
प्रमीतं निखनेत्तं तु प्रायश्चित्तमतः परम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा त्रयस्त्रिंशता कृच्छ्रैः शुद्ध्यते शल्यदोषतः ॥
सगर्भदहने तस्या वर्णजं वधपातकम् ।
प्रायश्चित्तं चरित्वा तु शुद्ध्यन्ति पापकारिणः ॥
दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत् ॥
अथान्वारोहणं स्त्रीणामात्मनो भर्तुरेव च ।
सर्वपापक्षयकरं निरयोत्तारणाय च ॥
अनेकस्वर्गफलदं मुक्तिदं च तथैव च ।
जन्मान्तरे च सौभाग्यधनपुत्रादिवृद्धिदम् ॥
देशकालौ स्मृत्वाऽरुन्धतीसमाचारत्व-*स्वर्गलोकमहीयमानत्व-मनुष्यलोमसमसंख्याब्दावच्छिन्नस्वर्गवास-भर्तृसहितचतुर्दशेन्द्रावच्छिन्नकालिकक्रीडमानत्व-मातृपितृश्वशुरकुलत्रयपूतत्व-ब्रह्मघ्नमित्रघ्नकृतघ्नपतिपुत्तत्व-पत्यवियोग-कामा भर्तृ*ज्वलच्चितारोहणं करिष्ये। अनुगमने तु-फलमुल्लिख्यान्वारोहणं करिष्ये इत्युक्त्वा *हरिद्राकुङ्कुमाञ्जनादियुतशूर्पाणि सुवासिनीभ्यो दद्यात। मन्त्रस्तु—

लक्ष्मीनारायणो देवो बलसत्त्वगुणाश्रयः ।

---

*स्वर्गलोकेति । अत्रा स्वरोमसमिताब्दानां सहस्रं स्वर्गमाचरेत् । *ज्वलच्चितारोहणं स्वर्गमनम् । *हरिद्रेति ।

देवैः सम्पादितो मह्यं पतिस्त्वं सार्वदैवतः ।
त्वया सह गमिष्यामि भर्ता त्वं चान्यजन्मनि ॥

इत्युक्त्वा स्नात्वा कुङ्कुमादिना स्वात्मानमलङ्कृत्य पुत्रादिभ्यो बन्धुभ्यश्चाशिषो दत्त्वा—

चितिस्थो भगवानग्निर्विष्णुरूपी जनार्दनः ।
पतिलोकसमावाप्त्यै गृहाणार्घ्यं नमोऽस्तु ते ॥

इति विष्णुरूपिणेऽग्नयेऽर्घ्यं दत्त्वा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गाढं सत्त्वं च मे देया(१)द्वायनैः परितोषितः ॥
सोपस्कराणि शूर्पाणि (१)वायनैः संयुतानि च ।
लक्ष्मीनारायणप्रीत्यै सत्त्वकामा ददाम्यहम् ॥
अग्नेः समीपमागत्य *पञ्चरत्नानि पल्लवैः ।
नीलाञ्जनं तथा बध्वा मुखे मुक्ताफलं न्यसेत् ॥
ततोऽग्निप्रार्थनं कृत्वा मन्त्रेणानेन मिश्रितम् ।
स्वाहासंश्लेषनि(२)र्विण्ण सर्वगोत्र हुताशन ॥
सत्त्वमार्गप्रदानेन नय मां भर्तुरन्तिकम् ॥
ततोग्नावाज्येनाऽग्नये तेजोऽधिपतये, विष्णवे स-
त्त्वाधिपतये, कालाय ध(३)र्माधिपतये, पृथिव्यै लोका-

एष चार्घ्यो मया दत्तः सूर्य साक्षिंस्त्वदग्रतः ।
प्रसादं कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते ॥

इति सूर्याय तं दत्त्वा—

त्वं ब्रह्मा त्वं च वै रुद्रस्त्वं रविस्त्वं प्रजापतिः ।
त्वमिन्द्रो वसवस्त्वष्टौ परमात्मा त्वमेव हि ॥
त्वमेव शरणं विष्णो शरणं त्वं पतिर्मम ।
स्वर्गे वा नरके वाऽपि यत्र यत्र गमिष्यसि ॥
तत्र तत्र त्वहं पृष्ठे गमिष्यामि तवाशु वै ।
ब्रह्महत्यादिभिः पापैर्मोक्ष्यामि च यमालयात् ॥
अहं ब्रह्मा ह्यहं विष्णुरहं सूर्यश्च दिक्पतिः ।
आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो(?)प्यहर्निशा च ।
एते च सर्वे मम साहसेन तुष्यन्तु ते देववराश्च सर्वे ॥

इति पठित्वा पञ्च शूर्पाणि हारिद्राकुङ्कुमाञ्जनकञ्चुक्यादियुतानि दद्यादित्यर्थः । *पञ्चेति । स्ववस्त्रपल्लवे पञ्चरत्ननीलाञ्जनबन्धः ।

---

(१) 'वाणकैः' ग० । (२) निर्वाण सर्वगात्र, क० ।
(३) 'सर्वाधिष्ठात्रे' क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिष्ठात्र्यै, अद्भ्यो रसाधिष्ठात्रीभ्यः, वायवे बलाधिपतये, आकाशाय सर्वाधिपतये, कालाय धर्माधिष्ठात्रे, अग्नये सर्वसाक्षिणीभ्यः, ब्रह्मणे वेदाधिपतये, रुद्राय श्मशानाधिपतये च हुत्वाऽग्निं प्रदक्षिणीकृत्य दृषदमुपलां च संपूज्य पुष्पाञ्जलिं गृहीत्वाऽग्निं प्रार्थयेत्—

त्वमग्ने सर्वभूतानामन्तश्चरसि साक्षिवत् ।
त्वमेव देव जानीषे न विदुर्यानि मानुषाः ॥
अनुगच्छामि भर्तारं वैधव्यभयपीडिता ।
सत्त्वमार्गप्रदानेन नय मां भर्तुरान्तिकम् ॥
मन्त्रमुच्चार्य शनकैः प्रविशेच्च हुताशनम् ॥

गौडास्तु—'इमा नारीरविधवाः' इति,

ॐ इमाः पतिव्रताः पुण्याः स्त्रियोऽपापाः सुशोभनाः
सह भर्तुः शरीरेण संविशन्तु विभावसुम् ॥

इति च विप्रः पठेदित्याहुः । कातरां तु—प्रेतोत्तरे सुप्तां देवरः शिष्यो वा उदीर्ष्वेति द्वाभ्यामुत्थापयेत् । एतन्माहिमा मिताक्षरादौ ज्ञेयः ।

पृथ्वीचन्द्रोदये स्कान्दे—

*अनुव्रजन्ती भर्तारं गृहात्पितृवनं मुदा ।
पदेपदेऽश्वमेधस्य फलं प्राप्नोत्यनुत्तमम् ॥

यत्त्वाङ्गिराः—

या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ।
सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत् ॥ इति,

शीलापूजोत्तरं तदारोहणं कार्यम् । *अनुव्रजन्ती भर्तारमिति

मृते भर्त्तरि या नारी धर्मशीला दृढव्रता ।
अनुगच्छति या नारी शृणु तस्यास्तु यत्फलम् ॥
तिस्रः कोट्योऽर्धकोटी च यावन्त्यङ्गरुहाणि वै ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यच्च व्याघ्रपात्—

न म्रियेत समं भर्त्रा ब्राह्मणी (१)शोककर्शिता ।
न ब्रह्मगतिमाप्नोति मरणादात्मघातिनी ॥ इति,

तत् पृथक्चितिपरम् ,

पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
अन्यासां चैव नारीणां स्त्रीधर्मोऽयं परः स्मृतः ॥

इत्युशनसोक्तेः ।

पृथक्चितिस्तु क्षत्रियादिपरा । तद्विधिर्ब्राह्मे—

देशान्तरे मृते पत्यौ साध्वी तत्पादुकाद्वयम् ।
निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादात्साध्वी स्त्री न भवेदात्मघातिनी ।
त्र्यहाशौचे निवृत्ते तु श्राद्धं प्राप्नोति शास्त्रवत् ॥

इमा नारीरविधवा इति ऋग्वेदवादः । त्र्यहाशौचमन्वारोहणपरमिति स्मार्ताः । *निषेधवाक्यानि प्रायश्चित्तार्थं मृतेन पतितेन वा सह मरणानिषेधपराणीत्य-

---

तावन्त्यब्दसहस्राणि स्वर्गलोके महीयते ॥
मातृकं पैतृकं चैव यत्र कन्या प्रदीयते ।
कुलत्रयं पुनात्येषा भर्त्तारं याऽनुगच्छति ॥

व्यासः—

यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः ।
संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः ॥
तिष्ठते विवशो दीनश्चेष्टमानः स्वकर्मभिः ।
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ॥
तद्वदुद्धृत्य सा नारी तेनैव सह मोदते ॥

*निषेधेति । यस्तु प्रायश्चित्तार्थं मृत एव शुद्धस्तेन सह

---

(१) 'शोकपीडिता' क० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्याहुः। अस्थिदाहे पलाशदाहे वा न *पृथक्चितिदोषः। अङ्गत्वेन स्थानापत्त्या वा शरीरतुल्यत्वात्। यत्तु—

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः।
पुनात्यविधवा नारी तमादाय मृता तु या॥

इति हारीतीयम्, त*त्पतितदाहादिनिषेधेन सहगमनस्य दूरतोऽपास्तत्वादर्थवादमात्रमिति पृथ्वीचन्द्रः। जन्मान्तरीयपापवता सह मरणे नोद्धार इति स्मार्तगौडाः। शुद्धितत्वे व्यासः—

दिनैकगम्यदेशस्था साध्वी चेत्कृतनिश्चया।
न दहेत्स्वामिनं तस्या यावदागमनं भवेत्॥

तत्रैव भविष्ये—

तृतीयेऽह्नि उदक्याया मृते भर्तरि वै द्विजाः!।
तस्यानुमरणार्थाय स्थापयेदेकरात्रकम्॥
एकां चितिं समासाद्य भर्तारं याऽनुगच्छति।
तद्भर्तुर्यः क्रियाकर्ता स तस्याश्च क्रियां चरेत्॥

*एतद्दशाहान्तम्,

यश्चाग्निदाता प्रेतस्य पिण्डं दद्यात्स एव हि।

इति वायवीयोक्तेः। आपस्तम्बः—

चितिभ्रष्टा तु या नारी मोहाद्विचलिता भवेत्।

कथं निषेधः स्यादित्यस्वरसः। *पृथगिति। यूपादिशब्दवाचितिशब्दस्य दृष्टादृष्टवाचित्वादन्यदेशे काष्ठवद्दाहे संस्काराभावान्न चितिभेदः, समन्त्रदाहे तु विप्राया दोषो न क्षत्रियादेः। *पतितेति। प्रायश्चित्ताधिकारी प्रायश्चित्तमकृत्वा मृतस्तस्य प्रायश्चित्तं दत्त्वौर्ध्वदेहिके सहगमनस्तावकमिदमिति तु वस्तुगतिः। *एतद्दशाहान्तमिति। एकादशाहादिभिन्नमित्याभिप्रायः। परे तु यदि मृतस्य भिन्नमातृका अनेके पुत्रास्तदा पितुः सर्वज्येष्ठ एवौर्ध्वदे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राजापत्येन शुध्येत तस्माद्वै पापकर्मणः ॥

तथा—

अन्वारोहे तु नारीणां पत्युश्चैकोदकाक्रियाम् ।
पिण्डदानाक्रियां तद्वच्छ्राद्धं प्रत्याब्दिकं तथा ॥
अन्वारोहे कृते पत्न्या पृथक्पिण्डांस्तिलाञ्जलीन् ।
पृथक्शिले न कुर्वीत दद्यादेकाशिले तथा ॥

*अन्यत्प्रागुक्तम् ।

इदं गर्भिणीबालापत्यासूतिकारजस्वलाव्यभिचारिणीभिर्न कार्यम् ,

स्वैरिणीनां गर्भिणीनां पतितानां च योषिताम् ।
नास्ति पत्याऽग्निसंवेशः पतितौ हि तथा उभौ ॥

इति मदनरत्ने स्मृतिसंग्रहोक्तेः । मदनरत्ने बृहस्पतिः—

बालसंवर्धनं मुक्त्वा बालापत्या न गच्छति ।
व्रतोपवासनियता रक्षेद्गर्भं च गर्भिणी ॥

तृतीयपादे 'रजस्वला सूतिका च' इति पृथ्वीच-

हिकं कुर्यात् । अन्वारूढायास्तु कनीयानपि साक्षात्पुत्र एव सर्वं कुर्यात्; नतु सपत्नीपुत्रो ज्येष्ठ एव, तत्र तन्निरूपितपुत्रत्वाभावात् । दाहस्तु एकस्यामेव चितौ । सपिण्डीकरणं तु ज्येष्ठेन पितुरेव पितामहादिभिः, कनिष्ठेन तु पत्या मातुः पितृसपिण्डनादिने दिनान्तरे वा कार्यमिति प्राहुः । अत्रैकादिने दिनान्तरे वा सपिण्डनं पितृसपिण्डनोत्तरमेव सम्भवति, पितृभावापन्नेन संयोजने प्रेतसंयोजनायोगादित्यप्याहुः । तत्रापि मातुः पितुश्चैकोद्दिष्टद्वयमेव । मातुरेकोद्दिष्टं पितुः पार्वणमित्यन्ये । *अन्यदिति ।

नवश्राद्धानि सर्वाणि सापिण्डीकरणं पृथक् ।
एक एव वृषोत्सर्गो गौरेका तत्र दीयते ॥ इति ।

अवयवपिण्डार्थः पाकस्तन्त्रेण, पिण्डः पृथगित्यादि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्द्रोदये गौडीयशुद्धितत्त्वे च पाठः । तत्रैव बृहन्नारदीयेऽपि—

बालापत्या च गर्भिण्यो ह्यदृष्टऋतवस्तथा ।
रजस्वलाराजसुते नारोहन्ति चितां तु ताः ॥ इति ।

अत्र—

पतिव्रता सुसंदीप्तं प्रविशेद्या हुताशनम् ।

इति भारतात्, 'ऋग्वेदवादात्साध्वी स्त्री' इति ब्राह्माच्च पतिव्रतानामेवाधिकारो न दुर्वृत्तानाम् । यत्तु—

अवमत्य च याः पूर्वं पतिं दुष्टेन चेतसा ।
वर्तन्ते याश्च सततं भर्तॄणां प्रतिकूलतः ॥
तत्रानुमरणं काले याः कुर्वन्ति तथाविधाः ।
कामात्क्रोधाद्भयान्मोहात्सर्वाः पूता भवन्त्युत ॥

इति भारतम्, तत् कैमुतिकन्यायेन स्तावकमिति पृथ्वीचन्द्रः । ब्राह्मण्या एकाचितिरेव न पृथक्चितिः । क्षत्रियादीनां पृथगेका वेति कल्पतरुरत्नाकरमदनपारिजातादयः । शुद्धिचिन्तामणौ चैवम् । तत्रान्वारोहणे भर्त्रशौचमध्ये तदूर्ध्वं वा कृते त्रिरात्रमध्ये एव दशापिण्डाः । सहगमने तु भर्तृशौचतुल्यमाशौचं पिण्डदानं च,

अन्वितायाः प्रदातव्या दश पिण्डास्त्र्यहेण तु ।
स्वाम्याशौचे व्यतीते तु तस्याः श्राद्धं प्रदीयते ॥

इति शुद्धितत्त्वे शूलपाणौ च पैठीनासिस्मृतेः ।

संस्थितं पतिमालिङ्ग्य प्रविशेद्या हुताशनम् ॥
तस्याः पिण्डादिकं देयं क्रमशः पतिपिण्डवत् ।

इति (१)शूलपाणिशुद्धितत्त्वधृतव्यासोक्तेः । अन्यत्प्रागुक्तम् । यदा तु रजस्वलाऽपि पत्नी मृते पत्यौ देश-

(१) 'जिकनशूल' छ० क०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालवशात्तदैवानुगच्छति न शुद्धिं प्रतीक्षते तत्र देवयाज्ञिकनिबन्धे—

यदा स्त्रियामुदक्यायां पतिः प्राणान्समुत्सृजेत् ।
द्रोणमेकं तण्डुलानामवहन्याद्विशुद्धये ॥
मुसलाघातैस्तदसृक् स्रवते योनिमण्डलात् ।
विरजस्कां मन्यमाना स्वे चित्ते तदसृक्क्षयम् ॥
दृष्ट्वा शौचं प्रकुर्वीत पञ्चमृत्तिकया पृथक् ।
त्रिंशद्विंशतिर्दश च गवां दत्त्वा त्वहःक्रमात् ॥
विप्राणां वचनाच्छुद्धा समारोहेद्धुताशनम् ।
नारीणां सरजस्कानामियं शुद्धिरुदाहृता ॥

अत्र श्राद्धादौ निर्णयः पूर्वमुक्तः ।

इति श्रीभट्टकमलाकरकृते निर्णयसिन्धावन्त्यकर्मनिर्णयः ।

अग्निप्रवेशाशक्तौ तु विष्णुः—'मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा' इति । ब्रह्मवैवर्ते—

सहानुगमनं शस्तं वैधव्यस्याथ पालनम् ।

यत्तु तत्रैव—

कलौ नान्या गतिः स्त्रीणां सहानुगमनादृते । इति,

तद्ब्रह्मचर्याशक्यत्वपरम् । तथा च मनुः—

ब्रह्मचर्यं चरेद्वापि प्रविशेद्वा हुताशनम् ।

काशीखण्डेऽपि—

पत्यौ मृतेऽपि या योषिद्वैधव्यं पालयेत्क्वचित् ।
सा पुनः प्राप्य भर्तारं स्वर्गलोकं समश्नुते ॥
अनुयाति न भर्तारं यदि दैवात्कथंचन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रापि शीलं संरक्षेच्छीलभङ्गात्पतत्यधः ॥
तद्वैगुण्यादपि स्वर्गात् पतिः पतति नान्यथा ।
तस्याः पिता च माता च भ्रातृवर्गस्तथैव च ॥

अथ विधवाधर्माः । मदनरत्ने स्कान्दे—

विधवाकबरीबन्धो भर्तृबन्धाय जायते ।
शिरसो वपनं तस्मात्कार्यं विधवया सदा ॥
एकाहारः सदा कार्यो न द्वितीयः कदाचन ।
मासोपवासं वा कुर्याच्चान्द्रायणमथापि वा ॥
पर्यङ्कशायिनी नारी विधवा पातयेत्पतिम् ।
नैवाङ्गोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित् ॥
गन्धद्रव्यस्य सम्भोगो नैव कार्यस्तया पुनः ।
तर्पणं प्रत्यहं कार्यं भर्तुस्तिलकुशोदकैः ॥
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकम् ।

इदमपुत्रापरमिति मदनपारिजातः ।

नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि ॥
कञ्चुकं न परीदध्याद्वासो न विकृतं वसेत् ।
वैशाखे कार्तिके माघे विशेषनियमं चरेत् ॥

प्रचेताः—

ताम्बूलाभ्यञ्जनं चैव कांस्यपात्रे च भोजनम् ।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत् ॥

श्राद्धादौ तु विशेषः प्रागुक्तः । यत्तु बौधायनः—

संवत्सरं प्रेतपत्नी मधु मांसं विवर्जयेत् ।
अधःशयीत षण्मासानिति मौद्गल्यभाषितम् ॥ इति,

तदसवर्णापरमित्यपरार्कः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ संन्यासः । याज्ञवल्क्यः—

वनाद्वा *गृहाद्वा कृत्वेष्टिं *सार्ववेदसदक्षिणाम् ।
प्राजापत्यां तदन्ते तानग्नीनारोप्य चात्मनि ॥
अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान् ।
शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ॥

एतदाश्रमसमुच्चयपक्षे । *जाबालश्रुतौ त्वन्येऽपि पक्षा उक्ताः—'यदि चे*तरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा । *अथ पुनर*व्रती वा व्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा *यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति । अङ्गिराः—

प्रव्रजेद्ब्रह्मचर्याद्वा प्रव्रजेद्वा गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाथ दुःखितः ॥

संसारमेव निःसारं दृष्ट्वा पारदिदृक्षया ।
प्रव्रजत्यकृतोद्वाहः परं वैराग्यमाश्रितः ॥

इत्यङ्गिरसोक्तेः । *गृहादिति । आश्रमपक्षः । *सार्ववेदसं सर्वस्वम् । आश्रमचतुष्टयसमुच्चयश्च—

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥

इति मनुनोक्तः । यदा तु प्राग्भवीयसुकृतपरिपाकादिवशाद्बाल्य एव वैराग्योत्पत्तिस्तदाऽऽह—*जाबालश्रुतौ त्विति । *इतरथा वैराग्ये । *अथेति । तथाच संन्यासो ब्रह्मचार्यादिभिरेव ग्राह्य इति न नियमः । किन्तु स्नातकविधुरादिभिरपीत्यर्थः । *अव्रतीति । उपनयनस्यापि नापेक्षा शुकनामदेवादिवत् सुकृतपाकातिशयसत्त्वे । *यदहरेवेति । अविरक्तस्य तु—

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आतुरो मुमूर्षुः । दुःखित*श्चौर*व्याघ्रादिभीतः ।

भारते—

आतुराणां तु संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् ॥

जाबालश्रुतावपि—*यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्' इति । अत्र विप्रस्यैवाधिकारः 'ब्राह्मणाः प्रव्रजन्ति' इति जाबालश्रुतेः;

आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।

इति मनूक्तेश्चेति विज्ञानेश्वरादयः । वृद्धयाज्ञवल्क्योऽपि—

अनधीत्य गुरोर्वेदाननुत्पाद्य तथाऽऽत्मजान् ।
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन् व्रजत्यधः ॥

इति मनूक्तनिषेधाभिप्रायक एवकारः । *चौरेति ।

उत्पन्ने सङ्कटे घोरे तथा व्याघ्रादिसङ्कटे ।
भयभीतस्य संन्यासमङ्गिरा मुनिरब्रवीत् ।

इति महाभारतात् । *व्याघ्रादीति । आदिना नद्यादिग्रहः । *यद्यातुरः स्यादिति । नन्वत्र किं विधीयते ? न तावत्संन्यासः, तस्य यदहरेवेति प्रागेव विधानात् । नापि तदनुवादेन वाङ्मनसी । नहि तद्विधिर्नियमरूपः, प्रैषादिविधिपर्यालोचनया वाङ्मनसोर्नित्यं प्राप्तेरप्राप्तांशपूरणफलकस्य तस्यायोगात् । नापि परिसंख्या, त्रैदोष्यात् । नच संन्यासमनूद्यातुरः कर्ता विधीयताम्, तथा सति कर्तृस्वरूपमात्रस्य क्रियाऽविनाभावबललब्धतयाऽऽतुरत्वे विधिपर्यवसानापत्तेः । नचैवमेवास्तु, क्रियागुणभूतकर्तृविशेषणं हि तदङ्गं स्यात् । तच्च यद्युपादेयं, संन्यासदशायां नियमेनानुष्ठीयेत, वाग्यतस्तिस्रो दोहयित्वेति दोहदशायां वाग्यमवत् । अनुपादेयत्वे तु राजत्ववदधिकारिसङ्कोचकं स्यात् । उभयथापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनातुरस्य संन्यासाननुष्ठानापत्तिरिति चेत् ? न, यतः ज्ञानार्थतया काम्ये संन्यासकर्मणि सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारादतथाभूतस्यातुरस्याधिकाराप्राप्तौ तत्प्राप्तिफलकोऽयमपूर्वविधिरेव "यदि ब्राह्मणो यजेत" इत्यादिवत् । परं चास्य कर्तृपक्षाविशेषः, आतुरार्थतया संन्यासस्यैव विधेयत्वात् । तादर्थ्यं च तस्य तदपेक्षितफलजनकत्वेनैव सम्भवतीति । किं तत्फलमित्यपेक्षायां यदेवाप्रागवगतं वाक्यशेषात्तदेवात्रापि सम्बध्यते । यथा "यदि ब्राह्मणो यजेत" इत्यादिब्राह्मणादीन् प्रति नित्याप्राप्ताऽवेष्टिप्रयोगविधायकवाक्ये फलापेक्षायाम् "एतयाऽन्नाद्यकामं याजयेत्" इत्येतत् । इयांस्तु विशेषः—तत्र राजसूयान्तर्गतत्वेनावेष्टेरितरसापेक्षतयैव साधनत्वावगमाद्राजसूयसाध्यत्वेनावगतस्य स्वाराज्यस्यावेष्टिफलत्वेनानुपस्थानाद्विश्वजिन्न्यायेन रात्रिसत्रन्यायेन वा फलस्यावेष्टिसाध्यत्वेन प्राप्तौ 'एतयान्नाद्यकामम्' इत्येतस्य प्रवृत्तेरपेक्षितविधानात्सार्थक्यम् , अत्र तु प्रागेव संन्यासस्य निरपेक्षसाधनतावगमात्सन्न्याससाध्यत्वेनावगतस्याप्रत्यूहमुपस्थितस्यापरित्यागान्न फलोपस्थापकवाक्यापेक्षेति । यावज्जीवादिवाक्येषु तूपस्थितोऽपि स्वर्गस्त्यज्यते, निमित्तवशेन प्रयोगस्यावश्यकत्वसिद्धौ निष्कामं प्रति प्रयोगनिर्वाहाय पापक्षयार्थत्वस्यैव कल्प्यत्वात् । ननु "यदि रथन्तरसामा सोमः स्यात्" इत्यादाविवात्रापि यदिशब्दवशादातुरत्वं निमित्तं स्यादिति चेत् ? पीडावत्त्वं ह्यातुरत्वम् । तच्च संसृतस्य शरीरत्वान्नित्यमतो न निमित्तम् । अत एव "यस्य पुरोडाशौ क्षायतः" इत्यत्र पुरोडाशक्षामस्य पुनः प्रयोगनिमित्तत्वे एकदेशक्षामस्य स्थायिनिमित्तत्वं प्रापय्य एकदेशक्षामस्यावर्जनीयत्वेन नित्यतया निमित्तत्वायोगाद् 'इयानवर्जनीयो दाहो नाधिकः' इत्यपरिज्ञानाच्चावर्जनीयदाहातिरिक्तस्यैकदेशेऽपि वर्त्तमानस्य दाहस्य निमित्तत्वासम्भवात्सर्वक्षाममेव निमित्तमिति स्थापितं "क्षामे तु सर्वदाहे स्यात्" (जै०सू०६-४-५-१७) इत्यधिकरणे । अधिकारपक्षे तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वाङ्गोपसंहारासमर्थमात्रोपलक्षणतयाऽऽतुरशब्दार्थे नानुपपत्तिः। तथाचातुरस्य यथासम्भवमङ्गोपसंहारौ प्रत्युक्तौ। अनुवादोऽयं "मनसा वाचा वा" इति। यथाकथञ्चित् प्रधानमात्रेणापि आतुरस्य फलसिद्धिरिति वाक्यतात्पर्यम्, "आख्यातानामर्थं ब्रुवतां शक्तिः सहकारिणी" इति न्यायेन विधिनैवातुरत्वतारतम्यानुरोधेनाङ्गोपसंहारतारतम्याभ्यनुज्ञानात्। नच काम्ये यथाशक्त्यङ्गोपसंहारोपगमे तिर्यगधिकरणविरोधः, आतुरसंन्यासविधिबलेनेह तदुपगमात्। एक एव संन्यासः स्वस्थातुररूपकर्तृभेदेन अङ्गान्यपेक्षते नापेक्षते इति विरुद्धमिति चेत्? सन्ध्यावन्दनादौ नित्ये तथादर्शनात्। यत्त्वातुरसन्न्यासो भिन्न एव इडो यजतीत्यादाविवाभ्यासेन कर्मभेदादिति। तन्न, अनन्यपरपुनःश्रवणरूपो ह्यभ्यासः कर्मभेदकः। नचेह सोऽस्ति, पुनःश्रवणस्यातुराधिकारसिद्धिप्रयोज्यकत्वेनान्यपरत्वात्। विधेर्हि प्रयोजनमात्रं वाच्यम्। नच पुनर्विधाने विधित्रैविध्यभङ्गः, इतरनिवृत्तिप्रयोजकत्वस्यैवापूर्वविधित्वेन तत्र प्रवेशात्। तत्त्वं च साक्षात्परंपरया वेत्यन्यदेतत्। यद्वा विधिस्त्रिधेति प्रायोवादः। "षडस्माकमनादयः" "समासश्चतुर्धा" "अनुपस्थितस्याप्रकारत्वम्" इति तत्तद्दर्शनस्थोद्घोषवत्। अस्ति हि मूलावरणादेरप्यनादिता। अस्ति च "सुप् सुपा" इति समासः। अस्ति चानुपस्थिताभावत्वादेः प्रकारतेति। ननु तथापि यदिशब्दः कथं योज्य इति चेदत्र भट्टपादाः—यदिशब्दपरित्याग उताध्याहारकल्पना। व्यवधानेन सम्बन्धो हेतुहेतुमतोश्च लिङिति। अस्यार्थः—"यदि ब्राह्मणः" इत्यत्रेव हुंफडादौ निपातानामनर्थकत्वदर्शनाद्यदिशब्दस्य तथात्वकल्पनया इह परित्यागः, अथवा यदि रोचेतेत्यध्याहारः, अथवा व्यत्ययेन सम्बन्धः यदि सन्यस्येत्तर्ह्यातुर इति "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्" इत्यादौ यदि गृह्णीयात्तर्हि रथन्तरसामा सोमः स्यादिति रथन्तराधिकरणपूर्वपक्षवत्। वस्तुतस्त्विह न व्यत्ययः कार्यः यद्यातुररूपेप्सितं फलं भावयेत्तर्हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्न्यासेनेति तं विनैवोपपत्तेः । फलांशस्यातुरशब्देन समर्पणात्तत्र विधेरनुष्ठापकत्वात् । उक्तं हि सौभराधिकरणपूर्वपक्षे—पुरुषशेषता च तदभिलषितफलसाधनतयेति । अथवा सोमः स्यादिति हेतौ लिङ्, गृह्णीयादिति विधौ रथन्तरसामसोमहेतुकान् ऐन्द्रवायवाग्रान् गृह्णीयादिति अक्रियमाणस्य हेतुत्वासम्भवादर्थात्सोमविधिः । यद्वा गृह्णीयादिति हेतुमति । सोमः स्यादिति विधौ । हेतुपदादि..... .....सोमस्यैव च ग्रहाग्रतारूपफलजनकः सोमया..... संन्यासस्य श्रवणांगत्वादातुरस्य प्रधानभूतश्रवणाभावादनुष्ठानं व्यर्थमिति चेत्? न, अङ्गत्वासिद्धेः । तथाहि "एतमेव लोकमिच्छन्तः प्रव्रजिताः प्रव्रजन्ति" इतिश्रुतिर्विधिर्नार्थवादः । "एतद् ब्रह्म" इत्यर्थवादसम्बद्धत्वात् । अर्थवादस्यार्थवादान्तरापेक्षानुपगमात् । तस्मादनया संन्यासो विधीयते । स च फलमाकाङ्क्षमाणः एकवाक्योपात्तकामनार्थकधातुपदसमभिव्याहृतकर्मप्रत्ययान्तलोकशब्देनैतच्छब्दसमानाधिकरणेनोपस्थापितं प्रकृतं ज्ञानविशिष्टमात्मानं फलत्वेन गृह्णाति । तत्र विशेष्यस्य कूटस्थनित्यस्य स्वरूपेण भाव्यत्वायोगादानर्थक्यतदङ्गावतरणन्यायेन सविशेषणे हीति न्यायेन वा ज्ञानमेव भाव्यं गृहीत्वा पर्यवस्यति । न च प्रकरणप्रायपाठाभ्यां सन्न्यासस्य श्रवणाङ्गत्वाद्गुणार्थवादोऽयं "वर्म वा यज्ञस्य" इत्यादिवदिति वाच्यं, प्रकरणापेक्षया वाक्यस्य प्राबल्यात्। प्रयाजादौ अन्यतराकाङ्क्षयाऽऽर्थवादिकं फलं कल्प्यमिति तदपेक्षया दर्शपूर्णमासाङ्गताग्राहकस्य प्रकरणस्य प्राबल्यमिति वैषम्यात् । न च संन्यासस्य ज्ञानफलकत्वे तुल्यार्थत्वाच्छ्रवणेन सह विकल्पापत्तिरिति वाच्यं, द्वारभेदात् । अद्वितीये ब्रह्मणि वेदान्तानां तात्पर्यावधारणानुकूलव्यापाररूपमुपक्रमोपसन्धानं श्रवणम्। तच्च प्रमाणताऽसम्भावनानिवृत्तिद्वारोपयुज्यते । संन्यासस्तु प्रतिबन्धककल्मषनिवृत्तिद्वारा,

ये च संतानजा दोषा ये च स्युः कर्मसम्भवाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिचोदिताः।
क्षत्रियस्य त्रयः प्रोक्ता*द्वावेको वैश्यशूद्रयोः॥इति।

संन्यासस्तान् दहेत्सर्वांस्तुषाग्निरिव काञ्चनम् ॥

इतिमाधवोक्तस्मरणात्;

मृत्तोयैः शोध्यते शोध्यं नदी वेगेन शुद्ध्यति ।
रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः ॥

इतिमनूक्तेश्च। एवञ्च संन्यासस्य ज्ञानाङ्गत्वे स्थिते श्रवणाङ्गत्वायोगाद् "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इत्यादिवद् "वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत्" इत्यादिवाक्यानि क्रममात्रविधायकानि। अतएव "अन्तरा चापि तु तद्दृष्टेः" (ब्र०सू०३-४-९-३६) इत्यधिकरणे विधुरस्यापि श्रवणाधिकारः समर्थितः, जन्मान्तरीयेणापि क्रमनिर्वाहात्। यदि च माधवोक्तरीत्याऽग्निहोत्राद्यभावात्सत्कर्मजन्यान्तःकरणशुद्ध्यभावेन साधनासम्भवाद्विधुराणां न सन्न्यासाङ्गविशिष्टश्रवणेऽधिकार इति पूर्वपक्षः। जप्यादिना चित्तशुद्धिसम्भवात्साङ्ग एवाधिकार इति सिद्धान्त इत्युच्यते। तदापि गार्गीप्रभृतिष्वगतिरेव "पुराकल्पेतु" इत्यादिना तासां वेदाध्ययनाधिकारावगमात्। अत एव गार्गीप्रभृतीनां विद्याधिकारोऽपि तत्रैव भाष्यकारैः समर्थितः। अत एव वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैरिति संक्षेपशारीरकं न केवलमैहिकमेव पारिव्राजकं किन्तु जन्मान्तरीयमपि .....
..... त्वाद् श्रवणं न विरुद्ध्यते। जन्मान्तरीयसंन्यासकल्पनात्। नत्वेतज्जन्मन्येव संन्यासोत्तरं गार्हस्थ्यम्,

त्रयाणामानुलोम्यं स्यात् प्रातिलोम्यं न विद्यते।
प्रातिलोम्येन यो याति न तस्मात् पापकृत्तमः ॥

इति दक्षेण निषेधात् उत्तरमीमांसायां तृतीयाध्याये "तद्भूतस्य तु नातद्भावः" इत्याद्यधिकरणेऽवरोहाभावस्य निर्णीतत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*माधवस्तु—

ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वा प्रव्रजेद् गृहात् ।

इति कौर्माद्युक्तेर्वर्णत्रयस्याप्यधिकारः । पूर्ववाक्यं तु काषायदण्डादिनिषेधार्थम्,

मुखजानामयं धर्मो यद्विष्णोर्लिङ्गधारणम् ।

राजन्यवैश्ययोर्नेति दत्तात्रेयमुनेर्वचः ॥

इति बौधायनोक्तेरिति पक्षान्तरमाह । तत्त्वं तु कुटीचकादिपरमेव तदिति । योऽपि 'संन्यासं पलपैतृकम्' इति कलौ निषेधः, सोपि त्रिदण्डादिपर इत्युक्तं प्राक् ।

च्च । *द्वाविति । द्वौ वैश्यस्य एकः शूद्रस्येत्यन्वयः । यत्तु—

चत्वार आश्रमाः प्रोक्तास्तेषु शूद्रस्तु नार्हति । इति,

तत्समन्त्रकविवाहनिषेधार्थम् । *माधवस्त्विति । अत्रायमस्वरसः—यद्यपि सुरेश्वरवार्तिके एव—

त्रयाणामविशेषेण संन्यासः श्रूयते श्रुतौ ।

पदोपलक्षणार्थं स्याद्ब्राह्मणग्रहणं तदा ॥ इति ।

प्रत्ययार्थात्म्यविज्ञानस्वभावश्चेत्समर्थ्यते ।

उत्थानं यस्य यस्य स्यात्स स व्युत्थातुमर्हति ॥

इति द्विजानां संन्यास उक्तस्तथापि भाष्यकृद्भिर्ब्राह्मणस्यैव संन्यासे अधिकारोक्तेः स एव युक्तः। न च क्वचित्सामान्यशब्दश्रवणबलात्सर्वत्र ब्राह्मणशब्दस्य द्विजपरत्वं सांप्रतम्, "पुरोडाशं चतुर्धा करोति" "आग्नेयं चतुर्धा करोति" इत्यत्रेव सामान्यस्य विशेषे उपसंहारात्। नतु विपरीतम्, अभिधात्र्यश्रुतेः। द्विजशब्दस्य ब्राह्मणपरत्वे च न कोपि बाधः। किञ्च क्षत्रियादिसंन्यासनिषेधानां मुखजानामिति वचनमालम्ब्य काषायादिनिषेधपरत्वप्रयुक्तलक्षणापत्तेः। मुखजानामित्यनेनापि हि अंगनिषेधमुखेन क्षत्रि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सच सन्यासश्चतुर्धेत्याह हारीतः—

कुटीचको बहूदको हंसश्चैव तृतीयकः ।
चतुर्थः परमो हंसो यो यः पश्चात्स उत्तमः ॥

*आद्यः पुत्रादिना कुटीं कारयित्वा तत्र गृहे वा वसन् काषायवासाः शिखोपवीतत्रिदण्डवान् बन्धुषु स्वगृहे वा भुञ्जान आत्मज्ञो भवेत् । एतदत्यन्ताशक्तपरम् । द्वितीयस्तु बन्धून् हित्वा सप्तागाराणि भैक्षं चरन् पूर्वोक्तवेषः स्यात् । हंसस्तु पूर्वोक्तवेषोऽप्येकदण्डः,

एकं तु वैणवं दण्डं धारयेन्नित्यमादरात् ।

इति स्कान्दात् । विष्णुरपि—

यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम् ।
तावान् परिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः ॥

यादीन् प्रति प्रधानमेव बाध्यते, ज्ञानार्थतया काम्ये संन्यासे सर्वाङ्गोपसंहारेणैवाधिकारात् । तत एवातुरवाक्यस्याप्यप्रवृत्तिः सजातीययोरातुरानातुरयोरधिकारसिद्धेः । एतेन मुखजानामिति वाक्यस्य कुटीचकादिपरत्वमप्ययुक्तं पारहंस्यस्याप्यननुमतत्वादिति । *आद्य इत्यादि । तथाच स्कान्दे—

कुटीचकश्च संन्यस्य स्वे स्वे सद्मनि नित्यशः ।
भिक्षामादाय भुञ्जीत स्वबन्धूनां गृहेऽथवा ॥
शिखायज्ञोपवीती स्यात्त्रिदण्डः सकमण्डलुः ।
बहूदकश्च संन्यस्य बन्धुपुत्रादिवर्जितः ॥
सप्तागारं चरेद्भैक्ष्यमेकान्नं तु परित्यजेत् ।
गोवालरज्जुसंबद्धं त्रिदण्डं शिक्यमुद्धृतम् ॥
जलपात्रं पवित्रं च खनित्रीं च कृपाणिकाम् ।
शिखां यज्ञोपवीतं च देवताराधनं चरेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थोऽपि स्कान्दे—

*परहंसस्त्रिदण्डं च रज्जुं गोवालनिर्मिताम् ।
शिखां यज्ञोपवीतं च *नित्यं कर्म परित्यजेत् ॥

अयमप्येकदण्ड एव । ये तु शिखोपवीतादित्यागनिषेधास्ते कुटीचकादिपराः । यत्तु मेधातिथिः—

यावन्न स्युस्त्रयो दण्डास्तावदेकेन वर्तयेत् । इति,

तदपि तत्परमेव । यच्चात्रिः—

चतुर्धा भिक्षवः प्रोक्ताः सर्वे चैव त्रिदण्डिनः ।इति,

तद्वाग्दण्डादिपरं न यष्टिपरम्,

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ।
यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते ॥

इति मनूक्तेः । तस्मात्परमहंसस्यैकदण्ड एव । सोऽप्यविदुषः । विदुषस्तु सोऽपि नास्ति,

'न दण्डं न शिखां नाच्छादनं चरति परमहंसः' इति महोपनिषदुक्तेः; 'ज्ञानमेवास्य दण्डः' इति वाक्यशेषाच्च । यत्तु यमः—

काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः ।
स याति नरकान् घोरान् महारौरवसंज्ञितान् ॥इति,

हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैव च ।
कन्थां कौपीनमालाद्यमङ्गवस्त्रं बहिःपटम् ॥
एकं तु वैणवं दण्डं धारयेन्नित्यमादरात् ।
.....कुर्याद् ध्यानं समर्चयन् ॥

इत्युक्त्वा परमहंस उक्तस्तमाह —*परहंस इति । *नित्यं कर्म । संध्यावन्दनगायत्रीजपादि । तथा—

कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम् ।
अक्षमालां च गृण्हीयाद्वैणवं दण्डमव्रणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्वैराग्यं विना जीवनार्थसंन्यासपरम्,
एकदण्डं समाश्रित्य जीवन्ति बहवो नराः ।
नरके रौरवे घोरे कर्मत्यागात्पतन्ति ते ॥
इति स्मृतेः । यच्चाश्वमेधिके—
एकदण्डी त्रिदण्डी वा शिखी मुण्डित एव वा ।
काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिर ॥ इति,
तस्यापि पूर्वोक्तव्यवस्था ज्ञेया ।
*अथ तद्विधिः । बौधायनः—
कृत्वा श्राद्धानि सर्वाणि पित्रादिभ्योऽष्टकं पृथक् ।
वापयित्वा च केशादीन् मार्जयेन्मातृका इमाः ॥
सर्वाणीति स्वस्य नवश्राद्धषोडशश्राद्धादि कृत्वेत्यर्थः ।
स्मृत्यर्थसारेऽपि—
एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि षोडश ।
अग्निमान्पार्वणेनैव विधिना निर्वपेत्स्वयम् ॥ इति ।

कात्यायनः—
कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ।
आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत् ॥

बौधायनः—
सदैवमार्षकं दिव्यं पित्र्यं मातृकमानुषे ।
भौतिकं चात्मनश्चान्ते अष्टौ श्राद्धानि निर्वपेत् ॥
अत्र क्रममाह हेमाद्रौ शौनकः—"देवश्राद्धे ब्रह्मवि-
ष्णुमहेश्वरा देवताः । आर्षे देवर्षिब्रह्मर्षिक्षत्रर्षयः, देव-

---

माधूकरमथैकान्नं परहंसः समाचरेत् ॥ इति ।
आद्यौ त्रिदण्डावन्त्यावेकदण्डौ । इष्टैः प्राक्कर्तव्यतया श्राद्धा-
दि वक्तुं प्रतिजानीते—*अथेति । एतच्च विश्वेश्वर्यादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्षिक्षत्रर्षिमनुष्यर्षयो वा"। मरीच्यादिऋषय इति संन्यासपद्धतौ। तच्चिन्त्यम्। दिव्ये वसुरुद्रादित्याः। मानुषे सनकसनन्दनसनातनाः। भूतश्राद्धे पृथिव्यादिभूतानि चक्षुरादिकरणानि चतुर्विधो भूतग्रामश्चेति तिस्रः। पित्र्ये पित्रादित्रयो मातामहाश्च। मातृके मात्रादयस्तिस्रः। आत्मश्राद्धे आत्मपितृपितामहा देवताः। आत्मश्राद्धं परमात्मदैवत्यमिति संन्यासपद्धतौ। तच्चिन्त्यम्। सर्वत्र च नान्दीमुखत्वं विशेषणं ज्ञेयम्। सर्वत्र पिण्डदानम्। युग्मा विप्राः। दक्षक्रतू सत्यवसू वा विश्वेदेवौ। अन्यन्नान्दीश्राद्धवदिति हेमाद्रिः। स्मृत्यर्थसारे—

केशश्मश्रुलोमनखं वापयित्वोपकल्पयेत्।
दण्डं जलं पवित्रं च शिक्यं पात्रं कमण्डलुम्॥

आसनं कौपीनमाच्छादनं कन्थां पादुके इति दश पञ्च वा। एतच्च पूर्वेद्युर्नान्दीमुखं कृत्वा परेद्युः पुण्याहवाचनं कृत्वा कार्यमिति शौनकः।

बौधायनः—

त्रीन्दण्डानङ्गुलीस्थूलान्वैणवान् मूर्धसंमितान्।
एकादश नव द्वित्रिचतुःसप्तान्यपर्वकान्॥
वेष्टितान्कृष्णगोवालरज्ज्वा तु चतुरङ्गुलान्।
एको वा तादृशो दण्डो गोवालसदृशो भवेत्॥
अनग्निरग्निमुत्पाद्य नित्येन विधिना ततः॥

पृष्टोदिविविधानेनेत्यर्थः।

स्वाग्नावेवाग्निमान्कुर्यादपवर्गोक्तमादितः।
आज्यं पयो दधीत्येतत्त्रिवृद्वा जलमेव वा॥
ॐभूरित्यादिना प्राश्य रात्रिं चोपवसेत्ततः।
अथादित्यस्यास्तमयात्पूर्वमग्नीन्विहृत्य सः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आज्यमग्नौ गार्हपत्ये संस्कृत्यैतेन च स्रुचा ।
पूर्णयाहवनीये तु जुहुयात्प्रणवेन तत् ॥
ब्रह्मान्वाधानमेतत्स्यादाग्निहोत्रे हुते ततः ।
संस्तीर्य गार्हपत्यस्य दर्भानुत्तरतोऽत्र तु ॥
पात्राण्यासाद्य दर्भेषु ब्रह्मायतन एव तु ।
जागृयाद्रात्रिमेतां तु यावद्ब्राह्मो मुहूर्तकः ॥
अग्निहोत्रं स्वकाले तु हुत्वा प्रातस्तनं ततः ।
इष्टिं वैश्वानरीं कुर्यात्प्राजापत्यामथापि वा ॥

जाबालश्रुतौ-'तद्धैके प्राजापत्यामेवेष्टिं कुर्वन्ति तद्धु तथा न कुर्यादाग्नेयीमेव कुर्यात्पश्चात् त्रैधातवीयामेव कुर्यात्" इत्युक्तम् । तेनात्र विकल्पः । अत्राहुः-त्रेताग्नेः प्राजापत्या, तद्वाक्यशेषेऽग्नीनिति बहुत्वश्रुतेः; एकाग्नेस्त्वाग्नेयी इति । अनाहिताग्नेरिष्टिस्थाने वैश्वानर आग्नेयो वा चरुरिति माधवः । कात्यायनः—

आत्मन्यग्निं समारोप्य वेदिमध्ये स्थितो हरिम् ।
ध्यात्वा हृदि त्वनुज्ञातो गुरुणा प्रैषमीरयेत् ॥

कपिलः—

विधिवत्प्रैषमुक्त्वाऽथ त्रिरुपांशु त्रिरुच्चकैः ।
अभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यपो भुवि ॥
निनीय दण्डाशिक्यादि गृहीत्वाऽथ बहिर्व्रजेत् ॥

निबन्धेष्वतिविस्तृतमिति तत एव न्यूनातिरिक्तं निश्चेतव्यमित्युपरम्यते ॥

इति आर्डोपाह्वकृष्णभट्टविरचिता रत्नमाला ॥

श्रीरस्तु । शुभं भवतु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(अ(१)भयमिति मन्त्रेणापां पूर्णमञ्जलिं निनीयेत्यर्थः।)

बौधायनः—

सखे मेत्यादिना दण्डं येन देवाः पवित्रकम् ।
यदस्य पारे शिक्यं तु पात्रं व्याहृतिभिस्तथा ॥
युवासुवासाः कौपीनं गृहीत्वा बान्धवांस्त्यजेत् ।

अथ क्रमः । तत्र संन्यासेऽधिकारसिद्ध्यर्थं स्वस्य नवश्राद्धषोडशश्राद्धसपिण्डनानि साग्निः पार्वणान्यनग्निस्त्वेकोद्दिष्टविधिना कृत्वाऽनाश्रमी चेत्कृच्छ्रचतुष्टयम्, अन्धस्तु तप्तकृच्छ्रं कृत्वोदगयने एकादश्यां द्वादश्यां वा साग्निरमावास्यायां पौर्णमास्यां चतुर्दश्यां वा यथा पर्वणि प्राजापत्या स्यात् । तत्र देशकालौ स्मृत्वा परमहंसादिसंन्यासग्रहणं करिष्य इति संकल्प्य गणेशं संपूज्य पुण्याहं वाचयित्वा मातृकापूजां वृद्धिश्राद्धं च कृत्वाऽस्तमयात्प्रागौपासनं समिध्याहिताग्निस्तु गार्हपत्यं, विधुरोऽग्निहोत्री तु त्रिकाण्डमण्डनोक्तदिशा कुशपत्न्या सह पवमानेष्ट्यन्तं पूर्णाहुत्यन्तं वाधानं कुर्यात् । ब्रह्मचारी चेल्लौकिके विधुरश्चेद्व्याहृतिभिः प्रणवेन चाग्निमाधायान्वग्निरुषसामित्यानीय पृष्टोदिवीति निधाय तेनैव समिध्य "तत्सवितुः" "तां सवितुः" "विश्वानि देव" इति तिस्रः समिधोऽभ्यादध्यात् । एवमग्नौ सिद्धे कक्षोपस्थवर्ज्यं वपनं कृत्वा पयोदधियुतमाज्यमपो वा—"ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम्" इति प्राश्याचम्य पुनरादाय—"ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि" इति द्वितीयम्, ॐस्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात्" इति

(१) कंसान्तर्गतं नास्ति ग० पुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयम्, समस्तया चतुर्थम्-ॐभूर्भुवः स्वः सावित्रीं प्रवि-
शामि तत्सवितु०यात् इति। संन्यासपद्धतौ तु त्रिवृदसी-
ति प्रथमं, प्रवृदसीति द्वितीयं, विवृदसीति तृतीयं प्राश्या-
पः पुनन्त्विति जलं प्राश्य सावित्रीप्रवेश उक्तः। तत
आहवनीयं विहृत्य ब्राह्मणमुपवेश्याज्यं संस्कृत्य चतु-
र्द्वादश वा गृहीत्वा समित्पूर्वमोंस्वाहा परमात्मन इद-
मिति हुत्वोपवसेत्। (इ(१)दं ब्रह्मान्वाधानम्।) ततः
सायंहोमं वैश्वदेवं च कृत्वा अग्नेरुदक्कुशानास्तीर्य द-
ण्डादीनि दश पञ्च वाऽऽसाद्य ब्रह्मासने कृष्णाजिनोप-
विष्टो रात्रौ जागरणं कृत्वा प्रातर्होमानन्तरं प्राजापत्यां
वैश्वानरीं वा कृत्वा ऋत्विग्भ्यः सर्वस्वं ब्रह्मणे च मधु-
पूर्णं तैजसपात्रं दत्त्वा दारुपात्राण्याहवनीयेऽश्ममृन्म-
यानि च जले क्षिपेत्। कृष्णाजिनं त्वाददीत। अना-
हिताग्निस्तु वैश्वानरमाग्नेयं वा चरुं हुत्वा पात्राण्यग्नौ
क्षिप्त्वा भूर्भुवः स्वरित्यपः स्पृष्ट्वा "तरत्समन्दी" इति
सू(२)क्तं जप्त्वा विप्रान्संभोज्य पुण्याहं वाचयित्वा अ-
त्र वा वपनं कृत्वा हेमरूप्यकुशजलैः स्नात्वा पुरुषाय
चरुं कृत्वा प्राणाय स्वाहेति पञ्चाज्याहुतीर्हुत्वा पुरुषसू-
क्तेन प्रत्यृचमाज्यं चरुं च जुहुयात्।

अत्र विरजाहोमं केचिदाहुः। यथोक्तं शिवगीतासु-

जुहुयाद्विरजामन्त्रैः प्राणापानादिभिस्ततः।
अनुवाकान्तमेकाग्रः समिदाज्यचरून्पृथक्॥
आत्मन्यग्नीन्समारोप्य यातेअग्नेति मन्त्रतः।
भस्मादायाग्निरित्याद्यैर्विमृज्याङ्गानि संस्पृशेत्॥
पापैर्विमुच्यते सत्यं मुच्यते नात्र संशयः।

(१) कंसान्तर्गतं नास्ति ग० पुस्तके।
(२) 'सूक्तं' नास्ति ग० पुस्तके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा—"प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्माभूयासꣳ स्वाहा ।" सर्वत्र लिङ्गोक्तदेवताभ्य इदमिति त्यागः । वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणरेतोबुद्ध्याकूतिसङ्कल्पा मे शुध्यन्तां ज्योति० । त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोऽस्थीनि मे शुध्यन्तां ज्योति० । शिरःपाणिपादपार्श्वपृष्ठोरूदरजङ्घाशिश्नोपस्थपायवो मे शुध्यन्तां ज्योतिरहं० । उत्तिष्ठ पुरुष हरितपिङ्गललोहिताक्षि देहिदेहि ददापयिता मे शुध्यन्तां ज्योति० । पृथिव्यापस्तेजोवायुराकाशा मे शुध्यन्तां ज्योति० । शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योति० । मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योति० । अव्यक्तभावैरहंकारैर्ज्योति० । आत्मा मे शुध्यन्तां० । अन्तरात्मा मे शुध्यन्तां० । परमात्मा मे शुध्यन्तां० । क्षुधे स्वाहा । क्षुत्पिपासाय स्वाहा । विविध्यै स्वाहा । ऋग्विधानाय स्वाहा । कषोत्काय स्वाहा । क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मानꣳ स्वाहा । अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयमात्मा मे शुध्यन्तां ज्योति० । ततः स्विष्टकृदादि हुत्वा ब्रह्मणे हिरण्यमाज्यपात्रं धेनुं च दत्त्वा "संमासिञ्चतु" इत्युपतिष्ठेत । अत्र केचिदनग्नेः सावित्रीप्रवेशं पूर्णाहुतिं चाहुः ।

ततो—"यात अग्ने यज्ञिया तनूः" इति त्रिस्त्रिरेकैकं जिघ्रन्नात्मन्यग्नीन् समारोप्य गुरवे सर्वस्वं दत्त्वा—

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।

तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इस्युपस्थाय दक्षिणं जान्वाच्य पादावुपसंगृह्याधी-
हि भगवो ब्रह्मेति वदेत्। ततो गुरुरात्मानं ब्रह्मरूपं
ध्यात्वा शङ्खं द्वादशप्रणवैरभिमन्त्र्य तेन शिष्यमभि-
षिच्य-"शन्नो मित्रः" इति शान्तिं पठित्वा तच्छिर-
सि हस्तं दत्त्वा पुरुषसूक्तं जप्त्वा—"मम व्रते हृदयं ते
दधामि" इति च जप्त्वोदङ्मुखः प्रणवार्थमनुसंदध-
द्दक्षिणे कर्णे प्रणवमुपदिश्य तदर्थं च पञ्चीकरणाद्यवबो-
ध्य अयमात्मा ब्रह्म, तत्त्वमसि, प्रज्ञानं ब्रह्मेत्यादयुप-
दिशेत्। तदर्थं च वदेत्। ततो नाम दद्यात्। ततः शि-
ष्यस्तेनोपदिष्टो हरिं स्मरन्नूर्ध्वबाहुस्तिष्ठन् देवान्सा-
क्षिणः कृत्वा ॐभूर्भुवःस्वः संन्यस्तं मयेति त्रिरुपांशु
त्रिरुच्चैस्त्रिरत्युच्चैश्चोक्त्वा जलसमीपं गत्वा स्नात्वा
अभयं सर्वभूतेभ्यो मत्तः स्वाहेति त्रिरञ्जलिं क्षिप्त्वा
"युवा सुवासाः" इति काषायं कौपीनं वाससश्च परिधा-
य (१)सखे मा गोपायेति मुख्यं वैणवं पालाशं बैल्व-
मौदुम्बरं वा दण्डं गृह्णीयात्। अत्र पुत्रकामो गृहस्थः
शङ्खेन पुरुषसूक्तेन दण्डमभिषिच्य दद्यादित्याचारः।
ततः शिखामुत्पाट्य ॐभूःस्वाहेत्यग्नौ जले वा हुत्वा
तथैवोपवीतं हुत्वा "येन देवाः पवित्रेण" इति जल-
पवित्रं, "यदस्य पारे" इति शिक्यम्, सावित्र्या कम-
ण्डलुं, सप्तव्याहृतिभिर्भोजनपात्रमिदं विष्णुरित्यासनं
बृसीं वा गृहीत्वा ॐभूस्तर्पयामीति व्यस्तसमस्ताभिर्म-
हर्नम इति तर्पयित्वा ॐभूः स्वधों भुवः स्वधोंस्वः स्व-
धोंभूर्भुवःस्वर्महर्नमः स्वधेति पितॄंस्तर्पयित्वा "उदुत्यं"
"चित्रम्" "तच्चक्षुः" "हंसः शुचिषद्" "नमो मित्रस्य" इति

(१) 'सखा' क० छ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नात्वा सुरभिमतीभिरापोहिष्ठेति हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिश्च मार्जयित्वा अष्टोत्तरशतवारमघमर्षणं प्राणायामांश्च कृत्वा ॐभूर्भुवः स्वरिति च पठित्वा "नमःसवित्रे" इति सूर्यं चोपस्थाय पुनः स्नात्वा जङ्घे क्षालयित्वा ओमिति ब्रह्मोमितीदं सर्वमोमिति ब्रह्म वा एष ज्योतिर्य एष तपति वेद्यमेवैतद्य एष वेदो यदवनमस्तीति जपित्वा अष्टसहस्रं गायत्रीं जपेदिति ॥

अथ यतिधर्माः—प्रातरुत्थाय "ब्रह्मणस्पते" इति जपित्वा दण्डादीनि मृदं च निधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणं शौचं कृत्वाऽऽचम्य पर्वद्वादशीवर्ज्यं प्रणवेन दन्तधावनं कृत्वा तेनैव मृदा बहिः कटिं प्रक्षाल्य जलतर्पणवर्ज्यं स्नात्वा पु(१)नर्जङ्घे प्रक्षाल्य वस्त्रादीनि गृहीत्वा मार्जनान्तं कृत्वा केशवादिनमोन्तनामभिस्तर्पयित्वा ॐभूस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्जनस्तर्पयामीति तर्पयेत्। ॐभूःस्वाहेति स्वाहाशब्दान्तैः स्वधाशब्दान्तैश्चैभिरेव पुनस्तर्पयेदिति केचित्। तत आचम्याञ्जलिना प्रणवेन जलमादाय व्याहृतिभिरुद्धृत्य गायत्र्या त्रिःक्षिप्त्वा गायत्रीं जपेत्। उदिते सूर्ये प्रणवेन व्याहृतिभिर्वार्घ्यं त्रिर्दत्त्वा मित्रस्य चर्षणीत्याद्यैः पूर्वोक्तसौरीभिरिदं विष्णुस्त्रिर्देवो ब्रह्मजज्ञानमिति चोपस्थाय सर्वभूतेभ्यो नम इति प्रदक्षिणमावर्तते। ततो नत्वा "आदित्याय विद्महे सहस्राक्षाय धीमहि। तन्नः सूर्यः प्रचोदयात्" इति त्रिर्जपेत्। एवं त्रिकालं विष्णुपूजां ब्रह्मयज्ञं च कुर्यात् ॥

---

(१) 'पुनः' नास्ति ग०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ भिक्षा ।

विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
कालेऽपराह्णे भूयिष्ठे नित्यं भिक्षां यतिश्चरेत् ॥

इत्युक्ते काले उद्वयमिति चतसृभिरादित्यमुपस्थाय तेनैक्यं ध्यात्वा आकृष्णेनेति प्रदक्षिणं कृत्वा "येते पन्थानः" इति जप्त्वा—

योऽसौ विष्णवाख्य आदित्ये पुरुषोऽन्तर्हृदि स्थितः ।
सोऽहं नारायणो देव इति ध्यात्वा प्रणम्य तम् ।
त्रिदण्डं दक्षिणे त्वङ्गे ततः संधाय बाहुना ॥
पात्रं वामकरे क्षिप्त्वा श्लेषयेद्दक्षिणेन तु ।

इति बौधायनोक्तदिशा त्रीन्पञ्च सप्त वा गृहान् गत्वा भवत्पूर्वां भिक्षां याचित्वा "पूर्णमसि पूर्णं मे भूयाः" इत्यागत्य शुचिरन्नं प्रोक्ष्य ॐभूःस्वधा नम इत्यादिव्यस्तसमस्तव्याहृतिभिः सूर्यादिदेवेभ्यो भूतेभ्यश्च भूमौ क्षिप्त्वा भुक्त्वा प्रणवेन षोडशप्राणायामान्कुर्यादिति संक्षेपः । गौतमव्याख्यायां भृगुः—

यतिहस्ते जलं दत्त्वा भैक्ष्यं दद्यात्पुनर्जलम् ।
भैक्ष्यं पर्वतमात्रं स्यात्तज्जलं सागरोपमम् ॥

अत्र सर्वत्र मूलं माधवापरार्कमदनरत्नस्मृत्यर्थसारादौ ज्ञेयम् ।

कण्वः—

एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम् ।
वर्षाभ्योऽन्यत्र, वर्षासु मासांस्तु चतुरो वसेत् ॥

जाबालश्रुतौ—"शून्यागारदेवगृहतृणकुटीवल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थण्डिलेष्वनिकेतनः" इति । मात्स्ये—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम् ।
एकत्र चतुरो मासान्वार्षिकान्निवसेत्पुनः ॥
अविमुक्ते प्रविष्टानां विहारस्तु न विद्यते ।

अत्रिः—

भिक्षाटनं जपं स्नानं ध्यानं शौचं सुरार्चनम् ।
कर्तव्यानि षडेतानि सर्वथा नृपदण्डवत् ॥
मञ्चकं शुक्लवस्त्रं च स्त्रीकथां लौल्यमेव च ।
दिवास्वापं च यानं च यतीनां पतनानि षट् ॥
आसनं पात्रलोभश्च संचयः शिष्यसंग्रहः ।
दिवास्वापो वृथाजल्पो यतेर्बन्धकराणि षट् ॥

दक्षः—

नाध्येतव्यं न वस्तव्यं न श्रोतव्यं कथंचन ।
यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च ॥

मदनरत्ने अत्रिः—

पित्रर्थं कल्पितं पूर्वमन्नं देवादिकारणात् ।
वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा ॥

बृहस्पतिः—

न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः ।
न चाध्ययनशीलः स्यान्न व्याख्यानपरो भवेत् ॥

एतद्भेदार्थभिन्नपरम् । अत्रिः—

स्नानं सुरार्चनं ध्यानं प्राणायामो बलिः स्तुतिः ।
भिक्षाटनं जपः संध्या त्यागः कर्मफलस्य च ॥

एते यतिधर्मा इत्यर्थः । अन्येऽपि माधवमिताक्षरादौ ज्ञेयाः । यतिधर्मसमुच्चये—

न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते ।
पितृमातृक्षयं श्रुत्वा स्नात्वा शुद्ध्यति साम्बरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ यतिसंस्कारः स्मृत्यर्थसारे—

(१)संन्यसेद् ब्रह्मचर्याद्वा संन्यसेच्च गृहादपि ।
वनाद्वा प्रव्रजेद्विद्वानातुरो वाऽथ दुःखितः ॥
आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं च संन्यास आतुराणां विधीयते ॥
उत्पन्ने सङ्कटे घोरे चौरव्याघ्रादिगोचरे ।
भवभीतस्य संन्यासमङ्गिरा मनुरब्रवीत् ॥
"यद्यातुरः स्यान्मनसा वाचा वा संन्यसेद्द्विजः ॥"

इति जाबालश्रुतिः ।

आतुराणां च संन्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य संन्यासं तत्र कारयेत् ॥
संन्यस्तोऽहमिति ब्रूयात्सवनेषु त्रिषु क्रमात् ।
त्रिवारं च त्रिलोकात्मा शुभाशुभसुधाद्रवे ॥
यत्किंचिद्बाधकं कर्म कृतमज्ञानतो मया ।
प्रमादालस्यदोषाद्यत्तत्संत्यक्तवानहम् ॥
एवं संत्यज्य भूतेभ्यो दद्यादभयदक्षिणाम् ।
पद्भ्यां कराभ्यां विहरन्नाहं वाक्कायमानसैः ॥
करिष्ये प्राणिनां हिंसां प्राणिनः सन्तु निर्भयाः ॥

इत्यातुरस्य स्वशक्त्याऽवस्थानुरूपमङ्गलभूतप्रैषोच्चारणादियथाशास्त्रं मनसा वाचा वा कुर्वतस्तावतैव कृच्छ्रचान्द्रायणनान्दीश्राद्धनखकृन्तनादीनि कृत्वा संन्यासपूर्तिरिति प्रतीयते । आङ्गिराः—

षष्टिः कुलान्यतीतानि षष्टीनामधिकानि च ।
कुलान्युद्धरते प्राज्ञः संन्यस्तमिति यो वदेत् ॥

---

(१) कंसान्तर्गतो भागो ग० पुस्तकं विहायान्यपुस्तकेषु नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विष्णुः—

एकरात्रोषितस्यापि यतेर्या गतिरुच्यते ।
न सा शक्या गृहस्थेन आतुरोऽपि च संन्यसेत् ॥
संन्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि ।
न तत्क्रतुशतैः पुण्यं प्राप्तुं शक्नोति मानवः ॥

मनुः—

यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् ।
तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः ॥

अथ श्रौतातुरस्य विलम्बितस्य—

प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूजयेत् ॥ इति ।

अत्र मात्रत्वोपसम्भवादङ्गकलापाव्यापकत्वेनाप्युपपत्तौ कर्तुर्यागत्यागकलापव्यावृत्तस्यैकत्वानुपपत्तेः कृच्छ्रनान्दीश्राद्धविरजाहोमादिकर्तुमशक्तस्यातुरस्य विद्यमानाग्नेरिष्टदेवतायै पूर्णाहुतिं हुत्वा असौ स्वर्गाय लोकाय स्वाहेति आहवनीये दारुमयानि पात्राणि प्रज्वाल्य मृन्मयान्यप्सु प्रक्षिप्य समाप्तिं च मरुत इत्युपस्थाय याते अग्ने इत्यनेन हस्तं प्रताप्य आत्मन्यग्निं समारोप्य सर्वप्रायश्चित्तपूर्वकं सप्तपञ्चकेशान् विसृज्य वापयित्वा यथाविधि स्नात्वा आतुरसंन्यासं कुर्यात् ॥

अथातुरसन्यासविधिः। अपां समीपे गत्वा तिथ्याः स्मरणपूर्वकं स्नानसन्ध्यावन्दनादि कृत्वा देशकालौ सङ्कीर्त्य ममाशेषदुःखनिवृत्तिनिरतिशयानन्दप्राप्तिपरमपुरुषार्थप्राप्तये च परमहंससंन्यासं करोमीति सङ्कल्पयेत् । तत्र प्रधानानि प्रेषोच्चारप्रणवोपदेशमहावाक्यानि । ततः संन्यासोचितं क्षौरं कृत्वा पूर्ववत्सप्तपञ्चकेशान् विसृज्य स्नात्वाचम्य पात्रेण तोयमादाय उपस्पृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्र्य दक्षिणेन पाणिनाऽप्सु जुहोति । एष वोग्नेर्योनिर्यः प्राणं गच्छ स्वाहा इति प्रथमाहुतिः । आपो वै सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोमि स्वाहा इति द्वितीया । ततो हुतशेषम् आशुःशिशान इत्यनुवाकेनाभिमन्त्र्य पुत्रेषणा वित्तेषणा लोकेषणा मया त्यक्ता स्वाहेति प्रथमां पिबेत् । ॐ ॐभूर्भुवः स्वरोम् मया संन्यस्तं स्वाहेति द्वितीयां पिबेत् । अभयं सर्वभूतेभ्यो मत्तः स्वाहेति तृतीयां पिबेत । ततोऽन्यत्तोयमञ्जलिपूर्णमादाय प्रागादिदिक्षु प्रत्येकं निनयेत् ॐभूः सावित्रीं प्रवेशयामि, ॐभुवः सावित्रीं प्रवेशयामि, ॐस्वः सावित्रीं प्रवेशयामि, ॐभूर्भुवः स्वः सावित्रीं प्रवेशयामि इति सावित्रीप्रवेशं कृत्वा अथोर्ध्ववाहुः सूर्याभिमुखो भूत्वा ॐभूः संन्यस्तं मया, ॐभुवः संन्यस्तं मया, ॐस्वः संन्यस्तं मया, ॐभूर्भुवःस्वः संन्यस्तं मयेति प्रैषोच्चारं ब्रूयात् । एवं मन्द्रमध्योच्चैस्त्रिरुक्त्वा तूष्णीं शिखां निकृत्य स्नात्वाचम्य यज्ञोपवीतमुद्धृत्याञ्जलिना गृहीत्वा भूःस्वाहेति अप्सु हुत्वा दिगम्बरो भूत्वा पुत्रेषणावित्तेषणालोकेषणातो मुक्तोऽहमिति ब्रूयात् । अत ऊर्ध्वं न पुत्रगृहं गच्छेत् । मृते च पुरुषसूक्तेन विष्णुबुद्ध्याऽभिषिञ्चति संस्कारमेव कुर्यात । एवं विरक्तस्यातुरस्य स्वस्थस्य संन्यासविहिताङ्गेषु यन्मन्त्रानुष्ठाने शक्तिर्यथाविधिस्तदनुष्ठानपूर्वकं प्रधानं प्रैषोच्चारणमात्रं मत्वा संन्यासयुक्तिरिति श्रवणात् । तदुत्तरकालमेव मृतस्योपदेशविकलस्यापि खननसंस्कारमेव कुर्यात् । जीवतश्चेच्छिखां यज्ञोपवीतं च नित्यक्रियाविधिवद्विसृज्य दण्डकाषायवस्त्रादीनि चाऽऽदाय यतिधर्मानेवानुतिष्ठेत् । सद्गुरुमन्विष्य तदुपदेशं गृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हीत्वा स्वधर्मनिष्ठो भवेत् । अयमर्थो विद्वत्संम्मतः प्रयोक्तव्यः । इत्यातुरसंन्यासः)।

सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च ।
न तस्य दहनं कार्यं नाशौचं नोदकक्रिया ॥

तथा—

कुटीचकं तु प्रदहेत्पूरयेत्तु बहूदकम् ।
हंसो जले तु निक्षेप्यः परहंसं (१)प्रपूरयेत् ॥

पालाशमूले नदीतीरेऽन्यत्र वा गन्धपुष्पालङ्कृतं शवं वाद्यघोषेण नीत्वा दण्डमात्रं व्याहृतिभिः खात्वा सप्तव्याहृतिभिस्त्रिः प्रोक्ष्य दर्भानास्तीर्य नवघटे पञ्चरत्नोदकं क्षिप्त्वा नारायणः परं ब्रह्मेत्यभिमन्त्र्य तेनैव संस्नाप्याष्टाक्षरेण वस्त्रगन्धपुष्पधूपदीपान् दत्त्वा विष्णो हव्यं रक्षस्वेति शवं गर्ते निधाय "इदं विष्णुः" इति दक्षिणहस्ते दण्डं "यदस्य पारे" इति सव्ये शिक्यं "येन देवाः पवित्रेण" इति मुखे जलपवित्रं सावित्र्योदरे (२)भिक्षापात्रं "भूमिः श्वभ्रे" इति गुह्ये कमण्डलुं निधाय "चित्तिः स्रुक्" इति दशहोत्राभिर्मन्त्रयेदिति विश्वादर्शटीकायां स्मृत्यर्थसारे च । बृहच्छौनकस्तु—

यतिं पुरुषसूक्तेन स्नापयित्वाऽवटं ततः ।
प्रणवेनाष्टवारं तं प्रोक्षयेदथ सर्वतः ॥
विष्णो हव्यं रक्षस्वेति यजुषा प्रणवेन च ।
गर्ते प्रेतं विनिक्षिप्य चेदं विष्णुर्विचक्रमे ॥
इति मन्त्रेण दण्डं तु दद्याद्दक्षिणहस्तके ।
मूर्धानं भूर्भुवः स्वश्चेत्युक्त्वा शङ्खेन भेदयेत् ॥
गर्तं पुरुषसूक्तेन लवणेन प्रपूरयेत् ।
सृगालश्वादिरक्षार्थं सम्यग्गर्तं प्रपूरयेत् ॥ इति ।

(१) 'प्रपूजयेत्' क० छ० । (२) 'भिक्षा' नास्ति ग० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुटीचकस्य तु दाहः कार्यः । यथा सर्वं प्राग्वत्कृत्वाऽग्निं प्रज्वाल्य साग्नेर्दक्षिणकरे उपावरोहेत्यवरोह्य निर्मथ्य वा गर्ते चितिं कृत्वा "अग्निनाग्निः समिध्यते" इत्यग्निं दत्त्वा सावित्र्या प्रणवेन वा दहेत् । ततोऽष्टशतं प्रणवं नारायणः परं ब्रह्मेति जप्त्वा सशिरःप्रणवव्याहृत्या गायत्र्या तद्भस्मास्थीनि तीर्थे क्षिप्त्वा स्नानाच्छुचिः । नास्यान्यदौर्ध्वदेहिकम्,

त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते ।

इति उशनःस्मृतेः । एकादशेऽह्नि पार्वणं तदपि त्रिदण्डिनः । हंसपरमहंसादीनां पार्वणादिकमपि न कार्यम्, इति शूलपाणिः । श्राद्धचिन्तामणौ दत्तात्रेयः—

एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसत्क्रियाम् ।
न कुर्याद्वार्षिकादन्यद्ब्रह्मभूताय भिक्षवे ॥

प्रेतक्रियायैकोद्दिष्टनिषेधे सिद्धे पुनस्तद्ग्रहणमाब्दिकपरम् । तेन तत्पार्वणमेव । त्रिदण्डिनां द्वादशे नारायणबलिः । तद्विधिरन्यश्च विषेशः प्रागुक्त इत्यलं बहुना ॥

एवं निरूपितमिदं गहनं तु धर्म-
तत्त्वं विचार्य वचनैश्च नयैश्च सम्यक् ।
तद्दोषदृष्टिमपहाय विवेचनीयं
विद्वद्भिरित्यविरतं प्रणतोऽस्मि तेषु ॥ १ ॥
मया सद्वाऽसद्वा यदिह गदितं मन्दमतिना
किमेतच्छक्यं वाऽऽध्यवसितुमपि स्वल्पमतिना ।
तदेवं यत्किंचिद्वादितमिह विख्यातमहिमा
प्रतापोऽयं सर्वो विकसति तु पित्रोश्चरणयोः ॥ २ ॥
यो भाट्टतन्त्रगणनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योऽत्र श्रमः किल कृतः कमलाकरेण
प्रीतोऽमुनाऽस्तु सुकृती बुधरामकृष्णः ॥ ३ ॥
श्रीभट्टरामेश्वरसूरिसूनुश्रीभट्टनारायणसूरिसुनोः ।
श्रीरामकृष्णस्य सुतः कृतीमं व्यधान्निबन्धं कमलाकराख्यः ॥ ४ ॥

नानानिर्णयवत्त्वान्निर्णयसिन्धुः प्रोच्यतां विबुधाः ।
निर्णयसरोजवत्त्वान्निर्णयकमलाकरोऽप्यस्तु ॥ ५ ॥
वसुऋतुऋतुभूमिते १६३८ गतेऽब्दे
नरपतिविक्रमतोऽथ याति रौद्रे ।
तपसि शिवतिथौ समापितोऽयं
रघुपतिपादसरोरुहेऽर्पितश्च ॥ ६ ॥
जगति सकलविद्यासिन्धुमुष्टिंधयानां
परभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम निबन्धे दूषणं भूषणं वा
यदि भवति विदग्धैस्तद्व्यवश्यं विमृश्यम् ॥ ७ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणश्रीमद्रामेश्वरभट्टसूरिसूनुनारायणभट्टसुतविद्वन्मुकुटहीराङ्कुरश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ तृतीयः परिच्छेदः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इस कार्यालय द्वारा इस सूचीपत्र के अलावा ४ संस्कृत ग्रन्थमालायें यथा "चौखम्बासंस्कृतसीरिज़" "काशीसंस्कृतसीरिज़" "बनारससंस्कृतसीरिज़" तथा "हरिदाससंस्कृतसीरिज़" ग्रन्थमालायें भी निकलती हैं, सूचीपत्र पृथक् मंगवाकर देखने की कृपा करें। इन सब सूचीपत्रों में छपे ग्रन्थों के अलावा भारतवर्ष के सभी प्रकाशकों के प्रकाशित ग्रन्थ भी विक्रयार्थ प्रस्तुत रहते हैं, इसके अलावा इस प्रेस द्वारा सर्व प्रकार की संस्कृत, हिन्दी, अंग्रेजी की सुन्दर छपाई होती है, परीक्षा प्रार्थनीय है।

पत्रादि प्रेषणस्थानम्—

जयकृष्णदास हरिदास गुप्तः—

चौखम्बासंस्कृतसीरिज़ आफिस, विद्याविलासप्रेस,

गोपालमन्दिर के उत्तर फाटक, बनारस सिटी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

January *1920.*

THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 265.

कमलाकरभट्टविरचितो-

निर्णयसिन्धुः ।

कृष्णंभट्टकृतव्याख्यासहितः ।

श्रीधर्माधिकारिपाठशालायां प्रधानाध्यापकेन श्रीयुत पं०
व्याकरणोपाध्याय नेने–इत्युपाख्यगोपालशास्त्रिणा
तदीयगुरुवर पं० पर्वतीयनित्यानन्दपन्त-
प्रदर्शितरीतिमनुसृत्य संशोधितो
टिप्पण्या परिष्कृतश्च ।

NIRNAYA SINDHU;

of Kamalakara Bhatta
With Commentary of Krishnam Bhatta.
Edited With Notes by Uyakaranopadhyaya
Gopala shastri Nene.

FASCICULUS I–१.

PUBLISHED & SOLD BY THE SECRETARY.
CHOWKHAMBÂ SANSKRIT SERIES OFFICE, BENARES.
AGENTS: OTTO HARRASSOWITZ, LEIPZIG:
PANDITA JYESHTHARAMA MUKUNDAJI, BOMBAY:
PROBSTHAIN & CO., BOOKSELLERS, LONDON.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1919
Price Rupee one.

Registered According to Act XXV. of 1867. (All Rights Reserved.)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ श्रीः ॥

—*—

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ॥
सुवर्णाऽङ्कितभव्याभशतपत्त्रपरिष्कृता ॥ १ ॥
चौखम्बा—संस्कृतग्रन्थमाला मञ्जुलदर्शना ॥
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः—२६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐनमः सदुद्धराय माधवाय ।

सठ्याख्येनिर्णयसिन्धौ

प्रथमःपरिच्छेदः

मङ्गलाचरणम् ।

*कारुण्यैकनिकेतं रामं सीतालतायुक्तम् ॥
विश्वामित्रान्ववायव्रततिसमालम्ब्यशाखिनं वन्दे ॥१॥
*लक्ष्मीसहायं कल्पद्रु*तलं रञ्जितगोकुलम् ॥

श्रीगणेशाय नमः ॥

लक्ष्मीनारायणं नत्वा पितरौ च गुरूनपि ॥
कृष्णशर्मा वितनुते सारार्थां सिन्धुदीपिकाम् ॥ १ ॥
कमलाभू राङ्गनाथिः कृष्णो नारायणानुजः ॥
अधिनिर्णयसिन्ध्वाह संशयध्वान्तनाशिनीम् ॥ २ ॥

विघ्नध्वंसार्थं कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति–कारुण्ये ति । अन्ववायो वंशः । व्रततिर्लता, प्रतानत्वात् । उभयतोलता-द्वययुक्तशाखिरूपकं चेदं समस्तदेशविवर्त्ति । यद्यप्यत्र सीताल-तायुक्तो रामशाखी स्वकुललतासमालम्ब इति न लभ्यते इत्य-भवन्मतयोगः, तथाऽपि नमस्कार्यताप्रयोजकरूपानन्तःपातिनस्तादृ-शसमालम्बस्य वन्द्यतोपपादकतया ऽभिधानात्तद्विधेयतायामतात्प-र्यान्न दोषः ॥ १ ॥

विघ्नबाहुल्यादिसम्भावनाया अवर्जनीयतया तद्विधूननाय मङ्गलान्तरमाह–लक्ष्मीति । तलम्—स्वरूपम् । 'अधःस्वरूप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बर्हापीडं घनश्यामं महः किञ्चिदुपास्महे ॥ २ ॥
*वेदार्थधर्मरक्षायै मायामानुषरूपिणम् ॥
पितामहं हरिं वन्दे भट्टनारायणाह्वयम् ॥ ३ ॥
यत्पादसंस्मृतिः सर्व*मङ्गलप्रतिभूर्मता ॥
तान् भट्टरामकृष्णाख्यान् *श्रीतातचरणान्नुमः ॥
सर्वकल्याणसन्दोहनिदानं यत्पदद्वयम् ॥
द्युनदीसोदरीमम्बामुमाख्यां नौमि सादरम् ॥ ५ ॥

योस्तलम्' इति कोशात् । कल्पद्रुत्वाभिधानं चाचिन्त्यमहिमकम् । कल्पद्रुस्तलमधो यस्येति वा । मुक्तेरपि दातृत्वात् । गोकुलमिति सुगमम् । 'तलरञ्जितगोकुलम्' इति पाठे कल्पवृक्षैर्गोकुलं येनेति । तत्र कल्पवृक्षा गोकुले वर्त्तन्ते । श्रीभगवानेव कल्पवृक्ष इति तु वस्तुगतिः । 'कल्पद्रुतरलं जितगोकुलम्' इति पाठे कल्पद्रुस्तरलो येनेति उक्तहेतोर्जितमायत्तं गोकुलं यस्येति बोध्यम्

स्वस्य धर्मज्ञत्वमवगमयितुं धार्मिकपरम्परितत्वमाह—वेदार्थेति । मायामानुषरूपिणं हरिमिति न्यूनाभेदरूपकम् ।

मङ्गलेति । यद्यपि नमस्क्रियाया एव मङ्गलत्वं न तु स्तुतेः, विघ्नध्वंसार्थविहितसुवर्णदानादिवत्, तथाऽपि तत्त्वमक्षतमित्येवमर्थं प्रतिभूपदम् । पितृपादस्तुतिश्च तदन्तर्गतिरूपेति मङ्गलरूपत्वम् । सर्वोत्कृष्टत्वज्ञापको व्यापारः स्तुतिः स्वोत्कर्षज्ञापकः स नातिरिति भेदः । श्रीतातेति । चरणशब्दस्य राजपुङ्गवादिशब्दवन्न पूर्वपदार्थगतश्रैष्ठ्यमर्थः

'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥'

इत्यनुशासने तदनुक्तेः, साजात्यासम्भवात्, तथा मासाननुशासनाच्च । नापि 'गुरुचरणा आहुः' इतिवत्क्रियाकारकत्वारोपः । तद्वत् क्रियान्वयाभावात् । तथाऽपीह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बिन्दुमाधवपादाब्जरोलम्बीकृतविग्रहम् ॥
ज्यायांसं भ्रातरं भट्टदिवाकरमुपास्महे ॥ ६ ॥
*हेमाद्रिमाधवमते प्रविचार्य सम्य-
गालोच्य तत्त्वमथ *तीर्थकृतां परेषाम् ॥
श्रीरामकृष्णतनयः कमलाकराख्यः
काले* यथामति विनिर्णयमातनोति ॥ ७ ॥
सन्ति यद्यपि विद्वांसस्तन्निबन्धाश्च कोटिशः ॥

शाखाध्येता बोध्यः । अथैवं कर्मधारये तातबहुत्वलाभाद्विरुद्धमति-कृत्त्वं दुर्वारम् । मैवम् । काव्यमीमांसामांसलमनसामेव तथा मतिः, न तु वेदमीमांसामांसलमतीनाम् । तेषां पुनर्गौरवस्यैव चरणशब्दव्यवायेन लाभात् । यद्वा 'नागाद्याः'इत्याद्यपदेन 'पादपद्मचन्द्राद्याः'इति क्षीरस्वामिवचनात्पादचरणादिशब्दानामपि श्रेष्ठ्यार्थकत्वम् । तदुत्कटताविशेषस्फोरकं च बहुवचनम् । केचित्तु चरणयोरेव तदाख्यामारोप्य द्वित्रा इतिवद्द्वित्वैकत्वाविवक्षया बहुवचनम्, यत्पादेति कर्मधारय इत्यप्याहुः । 'तं भट्टरामकृष्णाख्यं श्रीतातं सादरं नमुमः' इति तु रमणीयम् ।

उन्मत्तप्रलपितत्वशङ्कां निरस्यन्नेव प्राचीनग्रन्थैरन्यथासिद्धिशङ्कां परिहरति—हेमाद्रीति । तीर्थम्-शास्त्रम् । तथा च हेमाद्र्यादिमतस्यैव प्रामादिकांशं परिहृत्योपादानान्नान्यथासिद्धिरिति भावः । कालानङ्गीकर्तृसांख्यनिरासार्थं काले इति । वैषयिक आधारः । ज्योतिःशास्त्रादौ स्वरूपतो निर्णीतस्यापि 'सायं जुहोति'इतिवत्'चतुर्थ्यां पूजयेद्देवम्'इत्यादिनाऽधिकरणसप्तमीवशाल्लब्धस्य विनायकपूजाद्यङ्गत्वस्य चतुर्थ्या दिनद्वयसत्त्वे संशयः स्यादिति तस्याः पूर्वत्वादिनाऽप्यङ्गत्वं निश्चीयत इत्यर्थः । तादृशनिश्चयश्च क्वचिदेकतरकोटेः साधकस्य, क्वचित्तु बाधकस्योपन्यासेन । तच्च साधकं बाधकं च द्विविधम्, न्यायवचनभेदादिति तत्सर्वं प्रदर्श्यते इति यावत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाऽप्यमुष्य *वैदग्धीं केचिद्विज्ञातुमीशते ॥ ८

तत्र *संक्षेपतः कालः षोढा–अब्दो, ऽयनम्, मासः, पक्षो, दिवस इति।

तत्राब्दो *माधवमते पञ्चधा*– सावनः, सौ चान्द्रो, नाक्षत्रो, बार्हस्पत्य इति । गुरोर्मध्यम

वैदग्धीमिति । निर्णयकमलाकरतया निर्णया उन्मज्जन्त्येव । षयसंशयजनकतदप्रामाण्यसन्देहभञ्जकानि विशेषदर्शनानि तु ख्यावतामेव प्रतिभासन्ते इति व्यञ्जनाय । तत्र–न्यायवचना निश्चेतव्येऽङ्गत्वे । संक्षेपत इति । यद्यपि साक्षाद्व्याप्येन वि सम्भवति परम्परासाधारण्येन सोऽमङ्गतः, कलाकाष्ठादिना तत्प्राप्तेरिति प्रथमतो जन्यत्वानित्यत्वाभ्यामेव विभागो वा तथाऽपि नित्यस्य तस्य कर्मानङ्गत्वात्त्यागः । कर्मादौ तत्स्मरण वाङ्गत्वात् स्मृतिद्वाराऽपि तस्याङ्गत्वे मानाभावात् ।

माधवमते इति । एवमादिप्राचीनग्रन्थतत्कर्तृनामलो च प्रायशः स्वोत्प्रेक्षामूलकत्वशङ्कानिराकरणाय । स्वानभि तु अरुचिं दर्शयामः । पञ्चधेति । तथा चोक्तं माधवेनैव–

'सौरबृहस्पतिसावनशशधरनाक्षत्रिकाः क्रमेण स्युः । तल(३६५)–पतला(३६१)–ऽतल(३६०)–वमल(३५४)–वरगा (३२४)वत्सराः पञ्च'इति । मतलपाऽवरगाः क्रमेण पञ्चषष्ट कशून्यचतुर्द्वित्र्यर्थकाः । अङ्कानां च वामतो गतिः । अत्रारुचिं द यन्नेवाऽऽह–हेमाद्रिस्त्विति* । अत्र सावनादीनामनियमेन ग्रा तु न शङ्क्यम् । यतो यत्र तिथिविशेषरूपं स्पष्टं लिङ्गम्, यथा

'वसन्ते किंशुकाशोकशोभिते प्रतिपत्तिथिः ।
शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थितः' ॥

इत्यादौ शुक्लप्रतिपत् । तत्र—

'ललाटपट्टे तिलकं कुर्याच्चन्दनपङ्कजम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिभोगेन बार्हस्पत्यः । स च ज्योतिःशास्त्रे प्रसिद्धः । *हेमाद्रिस्त्वन्त्ययोर्धर्म*शास्त्रेऽनुपयोगात्तत्र एव

ततः प्रभृत्यनुदिनं तिलकालङ्कृतं मुखम् ॥
धार्यं संवत्सरं यावच्छशिनेव नभस्तलम्' ।

इत्यादितिलकव्रतादौ । यथा वा 'शुक्लपक्षे चतुर्दश्याम्'इत्यादि'नव वर्षाणि पञ्च च'इतिसंवत्सरावृत्तिसाध्येऽनन्तादिव्रते शुक्लचतुर्दश्यादि । तत्रोभयत्रापि चान्द्र एव संवत्सरः ।

यत्र वा मेषसंक्रमणे 'सोपवासो नरोत्तम'इत्यादौ संक्रमरूपं तत् तत्र 'कृत्वा व्रतं वत्सरमेतदिष्टं म्लेच्छेषु तिर्यक्षु न चापि जन्म'इतिसंवत्सरसाध्ये सुजन्मावाप्तिव्रते, यत्र वा 'अयने विषुवे चैव त्रिरात्रोपोषितो नरः'इत्यादि अयनादिरूपं तत् तत्र 'एवं संवत्सरे पूर्णे कुर्यादुद्यापनक्रियाम्'इतितादृशधान्यदानादिव्रते, तत्र संवत्सरः सौर एव ।

यत्र तु "गोसत्रं वै संवत्सरो, य एवं विद्वांसः संवत्सरमुपयन्ति"इत्यादौ गवामयनस्य संवत्सरशब्देन व्यवहारात्संवत्सरकालस्य तदङ्गत्वप्रतीतौ अभिप्लवषडहचतुष्टयैकपृष्ठ्यषडहयोः सावनैकमाससाध्ययोः सांवत्सरिकीणां द्वादशावृत्तीनां चान्द्रसौराभ्यामनिर्वर्त्तनम्, तत्र पारिशेष्यात्सावन एवाब्दः । एवम्—

"त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन् द्विजः" ॥

इति द्वादशाहोरात्रसाध्यानां प्राजापत्यानां षष्ट्युत्तरशतत्रयरूपं द्वादशाब्दं तस्य चान्द्रसौराभ्यामनुष्ठानासम्भवात्सावन एवाब्दः । एवं द्वादशाब्दादिस्थाने नवाब्दादावपि । यथा पराकादिमिश्रप्राजापत्यादौ पराकषडब्दे त्र्यब्दं प्राजापत्यं षडब्दं चेति, तत्र द्वादशाब्दानपेक्षायामपि सावन एव तत्राब्दः । अत एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधा आह । तत्र वक्ष्यमाणैः *सावनादिद्वादशमा
स्तत्तदब्दम् । मलमासे तु सति षष्टिदिनात्मक ए
मास इति द्वादशमासत्वमविरुद्धम् । तथाच व्यास
'षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः' इति ।

तत्र चान्द्रोऽब्दः षष्टिभेदः । तदाह गार्ग्यः—

'प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः ।
अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥

मर्त्तुकामस्यैव दक्षिणा मुख्या, नान्यस्येति सिद्धान्तः । त
अब्दानङ्गत्वात् । एवं यत्र "सावनेनैव कर्त्तव्या शत्रूणां चाप
सना"इतिसमयपालनादौ विशेषवचनम्, तत्रापि सावन एव।

एवं च यत्र विशेषतो न लिङ्गादि तत्रेच्छया वि
ल्पः। यथा 'एताः संहिता नानन्तेवासिने प्रब्रूयान्नासंवत्स
वासिने' इतिव्यतिरेकमुखेनाम्नातगुरुकुलवासादौ । *धर्मेति
अथ नाक्षत्रस्यायुर्द्दाये एवोपयोगाद् माऽस्तु धर्मशास्त्रे त
पञ्चः, 'गौतम्यां सिंहगे गुरौ'इत्यादौ अपेक्षणात्तु बार्हस्पत्य
तं को वारयिता ? इति चेत् । तिलकव्रतादौ हि चान्द्रादेर्वत्सर
ज्ञानमपेक्षितम्, न तु क्वापि कर्मणि बार्हस्पत्यस्य तत् । 'सिं
गुरौ'इत्येव श्रवणात् । यदपि—

"गुरोर्मध्यमसंक्रान्तिहीनो यश्चान्द्रवत्सरः ।
अधिसंवत्सरस्तस्मिन्कारयेन्न सवत्रयम् ॥
वर्जनीयाः प्रयत्नेन प्रतिष्ठाः सर्वनाकिनाम् ।
स्फुटसंक्रान्तिहीनश्चेत्केऽप्याहुरधिमासवत्" ॥

इत्युत्तरसौरं, तदपि बार्हस्पत्यस्य संवत्सरत्वाज्ञानेऽपि मध्यमग
नया गुरुसंक्रमशून्ये चान्द्राब्दे बृहस्पतिसवादिस्फुटगणनया त
तत्राधिमासवत् कामादि च न कार्यमित्यर्थकमिति न कश्चिद्विरो
*सावनादीति । तिथिबद्धद्वादशादिमासैरब्दमपि द्रष्टव्यम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।
चित्रभानुः सुभानुश्च तारणः पार्थिवोऽव्ययः ॥
सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।
नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥
हेमलम्बो विलम्बोऽथ विकारी शार्वरी प्लवः ।
शुभकृच्छोभनः क्रोधी विश्वावसुपराभवौ ॥
प्लवङ्गः कीलकः सौम्यः साधारण(१)विरोधकृत् ।
परिधावी प्रमादी च आनन्दो राक्षसोऽनलः ॥
पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ।
दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः' ॥ इति ।

यद्यपि ज्यौतिषे गुरोर्मध्यमराशिभोगेन प्रभवादीनां माघादौ प्रवृत्तिरुक्ता, तथाऽपि प्रभवादीनां चान्द्रत्वमप्यस्ति । 'चान्द्राणां प्रभवादीनां पञ्चके पञ्च-

---

अन्यथा "मृताहानि तु कर्तव्यं प्रतिमासं तु वत्सरम्" इतिवत्सरत्वज्ञानसापेक्षे आब्दिकादौ अनियमेन वत्सरापत्तेः । लिङ्गाभावेन चान्द्रसौरयोरसम्भवादन्यवत्सरकर्त्तव्यताकगोसत्राद्यन्यतया साधनस्य च नियमासम्भवात् । प्रभवादीनां चान्द्रत्वमप्रामाणिकमित्याशङ्कते—*यद्यपीति । मध्यमगणना गुरोः शराः ५ खमिति । प्रत्यहं पञ्चकला गुरोर्गतिरित्यर्थः । *भोगेनेति प्रभवान्वयि, न तु प्रवृत्तौ असम्भवात् । माघादौप्रभवादीनामित्यादिपदे विभवादेः फाल्गुनादिप्रवृत्तिसूचके ।

"तपसि खलु यदाऽसावुद्गमं याति मासि
प्रथमलवगतः सन् वासवे वासवेज्यः ॥
निखिलजनहितार्थं वर्षवृन्दे वरिष्ठः

---

(१) इदं लुप्तविभक्तिकम्, साधारणसहितो विरोधकृदिति उत्तरपदलोपी वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

के युगे'* इति माधवोक्तेः । तेन चान्द्रः प्र
वादिश्चैत्रसिते प्रवर्तते । बार्हस्पत्यस्तु माघादौ
तयोर्विनियोगो ज्योतिर्निबन्धे ब्रह्मसिद्धान्ते-

'व्यावहारिकसंज्ञोऽयं कालः स्मृत्यादिकर्मसु ।
योज्यः सर्वत्र तत्रापि जैवो वा नर्मदोत्तरे' ॥

आर्ष्टिषेणः—

*'स्मरेत्सर्वत्र कर्मादौ चान्द्रं संवत्सरं सदा ।
नान्यं *यस्माद्वत्सरादौ प्रवृत्तिस्तस्य कीर्तिता' ॥ इति

अयननिर्णयः । अयनं तु *सौरर्तुत्रयात्मक
'सौरर्तुत्रितयं प्रदिष्टमयनम्' इति दीपिकोक्तेः । तद्द्वि
धम्-दक्षिणमुत्तरं चेति । कर्कसंक्रान्तिर्दक्षिणायन
मकरेऽन्त्यम् ।

अनयोर्विनियोगमाह मदनरत्ने सत्यव्रतः-

'देवताऽऽराधनाद्यादिप्रतिष्ठादङ्मुखे रवौ ।

प्रभव इति स नाम्ना जायतेऽब्दस्तदानीम्" ॥

इत्युपक्रम्य

"इयं हि षष्टिः परिवत्सराणां बृहस्पतेर्मध्यमराशिभोगा
उदाहृता पूर्वमुनिप्रवर्यैर्नियोजनीया गणना क्रमेण" ॥

इत्युपसंहारात् । *युग इति ।

संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इदा वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ॥
इद्वत्सरः पञ्चमस्तु तत्सङ्घो युगसंज्ञकः" ॥ इत्युक्तेः ।

'जैवो वा'इति वाकारोऽस्वरससूचनाय । को व्यावहा
रिकसंज्ञकः काल इत्यत आह-*स्मरेदिति । *यस्मादिति क
शुक्लादिर्मुख्य इत्येतदर्थम्, न तु कृष्णादेः कर्मानङ्गत्वार्थम
अनेकवचनविरोधात् । *सौरेति मासातिदेशप्राप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दक्षिणाशामुखे कुर्वन्न तत्फलमवाप्नुयात्' ॥

वैखानसः—

*'मातृभैरववाराहनरसिंहत्रिविक्रमाः ॥
महिषासुरहन्त्र्यश्च स्थाप्या वै दक्षिणायने' ॥

वैशब्दोऽप्यर्थे, न तु दक्षिणायन एवेति नियमः ।

पूर्ववचने दक्षिणायने निषिद्धाया देवप्रतिष्ठाया देवविशेषे प्रतिप्रसवमात्रात् ।

रत्नमालायाम्—

'*गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम् ।
सौम्यायने कर्म शुभं विधेयं
यद्गर्हितं तत्खलु दक्षिणे च' ॥ इति ।

अस्यापवादः काशीखण्डे—

*'सदा कृतयुगं चास्तु सदा चास्तूत्तरायणम् ।
सदा महोदयश्चास्तु काश्यां निवसतां सताम्'* ॥

इत्ययनम् ॥

ऋतुनिर्णयः । ऋतुर्मासद्वयात्मा । मलमासे तु मासद्वयात्मक एको मासः, तेन मासद्वयात्मकत्वमाविद्धम् । स द्वेधा चान्द्रः सौरश्च । 'चैत्रारम्भो वसन्तादिश्चान्द्रः । मीनारम्भो, मेषारम्भो वा सौरः । *'मी-

---

त्वादिष्युदासार्थम् । *मातृ इति उग्रकर्मोपलक्षणम् ।

"उग्रे कर्मणि सौम्ये च स्तोऽयने दक्षिणोत्तरे"

इति माधवोक्तेः । तदेवाह—*गृहेति । *सदा कृतेत्यादि अपवादत्वाभ्युपगमवादः । अस्त्वित्यत्याशीर्लोटः कृतयुगादिकार्यापापकत्वात् । *सतामिति निगूढदुर्वृत्तानां भासमानसाधुभावानां व्यावृत्तिः ।

*मीनेति । एतदनुसारेणोत्तरे ग्रीष्मादयो विकल्प्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमेषयोर्मेषवृषयोर्वा वसन्तः' इति बौधायनोक्ते अनयोर्विनियोगमाह त्रिकाण्डमण्डनः—

'श्रौतस्मार्तक्रियाः सर्वाः कुर्याच्चान्द्रमसर्तुषु।
*तदभावे तु सौरर्तुष्विति ज्योतिर्विदां मतम्॥

स द्विविधोऽपि षोढा। वसन्तो, ग्रीष्मो, वर्षा, शरद्, हेमन्तः, शिशिरः। इत्यृतुः॥

मासनिर्णयः। मासश्चतुर्द्धा। सावनः, सौरः,

तदभावे तु इति सौरर्तुगौणत्वार्थम्। एवं कृष्णादिमासानां त्वात्तद्घटितमासद्वयात्मकर्तूनामपि गौणत्वं द्रष्टव्यम्। एवं च "ब्राह्मणोऽग्निमादधीत" इत्यादौ नानैव वाक्यार्थः। अन्यथा मुख्य गौणत्वविवेचनवैयर्थ्यात्। तत्र मुख्यवाक्यार्थे शुक्लादिचान्द्रमास घटितो मुख्य एव वसन्तः। कृष्णादिचान्द्रमासद्वयघटितस्य वा पदार्थस्य गौणत्वात्, सौरमासद्वयघटितस्य तस्य गौणतरत्व मुख्यासम्भवे गौणवाक्यार्थो ऽवलम्बनीयः।

"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते।
न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम्"॥

इतिमनुवचनात्। एवं च 'श्रौतस्मार्त्तक्रियाः' इत्यत्र श्रौ सङ्गच्छते। "चान्द्रमासर्त्तुषु" इत्यत्र चान्द्रमुख्यगौणर्त्तुभ्यां णमुख्यभावोऽपि विवक्षितः। अन्यथा सौरर्त्तुना गौण प्रदर्शनासङ्गतेः। एवं शरदादिपदेऽपि। एवं च—

"मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति"।

"नवमिश्रं तु षड्ऋतून्" इत्यादौ ऋतुघटकत्वेन मुख्यचान्द्र सग्रहणे मृताहे श्राद्धं न स्यादिति मृततिथेर्मृततिथिं च्चान्द्रो मासः, तद्युग्मं च ऋतुरिति तत्र मासानां गौण ऋतुपदं गौणमेव। अस्तु वा तत्र ऋतुपदं मुख्यचान्द्रमासाव परतया मुख्यमेव। मृताहकर्त्तव्यत्वं च—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्रो, नाक्षत्र इति । त्रिंशद्दिनः सावनः । अर्कसंक्रान्तेः संक्रान्त्यवधिः सौरः ।

यद्यपि हेमाद्रिमाधवकालादर्शाद्यालोचनेन, 'मेषसंक्रान्त्यां समाप्तामावास्याकत्वं चैत्रत्वम्' इति लक्षणाच्च मेषसंक्रान्तेश्चैत्रत्वं प्रतीयते; तथापि मेषसंक्रमे दर्शद्वये सति वैशाखस्यैवाधिक्यात्तत्पूर्वभावित्वेन मीनस्यैव चैत्रत्वं युक्तम् । एवं मेषादयो वैशाखाद्याः । अतो मीनसंक्रान्तिमध्यस्थपौर्णमासीकत्वम्, तादृशाद्यतिथिकत्वं वा चैत्रत्वमिति लक्षणात् मीन एव सौरश्चैत्रः । एवं वैशाखादयोऽपि मेषाद्या ज्ञेयाः ॥

सौरमासप्रसङ्गात् *संक्रान्तिनिर्णय उच्यते । तत्र—

'मृतेऽहनि तु कर्त्तव्यं प्रतिमासं तु वत्सरम्' ।

इतिवचनात् । तथा च मासि मासीयस्य प्रतिशुक्लादिमासं संवत्सरं यावन्मृततिथौ श्राद्धं कार्यमित्यर्थः । ऋतुश्च तद्द्वयात्मक इति ।

*संक्रान्तीति । मण्डलनेमिमध्यं केन्द्रः । तस्य पूर्वराशिसम्बन्धत्यागेनोत्तरराशिप्रवेशः संक्रान्तिः । तत्कालश्चातिसूक्ष्म इति तत्रैकस्यापि कर्त्तव्यस्याननुष्ठाने प्रसक्ते तद्योग्यतया तत्सन्निहितः पूर्वोत्तरः कालो ग्राह्यः । स च यावता कालेन केन्द्रपूर्वापरौ भागावुत्तरराशिचक्रं प्रविशतस्तावान् । स एव च भोगः । भुज्येते पाल्येते विधिनिषेधावत्रेति व्युत्पत्तेः । स च सामान्यतः पञ्चदशपञ्चदशनाडीरूपः ।

'अतीतानागते भोगे नाड्यः पञ्चदश स्मृताः' ।

इत्युक्तेः । एतेन—

'संक्रान्तिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पूर्वतोऽपि परतोऽपि संक्रमात्
पुण्यकालघटिकास्तु षोडश'*–

इति सामान्यतः पुण्यकालः सर्वैरुक्तः । विशेष
च्यते । अत्र मामकाः संग्रहश्लोकाः–

'प्रागूर्ध्वा दश, पूर्वतः षडवनि, स्तद्वत्पराः, पू
स्त्रिंशत्, षोडश पूर्वतो, ऽथ परतः, पूर्वाः पराः स्यु
पूर्वाः षोडश, चोत्तरा ऋतुभुवः, पश्चात् खवेदाः,
पूर्वाः षोडश, चोत्तराः पुनरथो पुण्यास्तु
दितः'इति ॥

अस्यार्थः—मेषे प्रागूर्ध्वं च दश घटि
पुण्यकालः । वृषे पूर्वाः षोडश । मिथुने पराः
डश । कर्के पूर्वास्त्रिंशत् । सिंहे पूर्वाः षोडश
कन्यायां पराः षोडश । तुलायां प्रागूर्ध्वा दश । वृ
के पूर्वाः षोडश । धनुषि पराः षोडश । मकरे च
रिंशत्पराः । इदं च हेमाद्रिमतेनोक्तम् । माधवमते
परा विंशतिः पुण्याः । कुम्भे पूर्वाः षोडश । मीने
षोडशेति ।

'याऽप्युत्तरा पुण्यतमा मयोक्ता
*सायं भवेत्सा यदि साऽपि पूर्वा ।
पूर्वा तु योक्ता यदि सा विभाते*

तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः' ॥

इतिवचनस्य पूर्वं त्रिंशत् परं च त्रिंशदिति व्याख्यानमनादेय
पूर्वापरं मिलित्वा त्रिंशदित्यस्यैव युक्तत्वात् । यदि कदाचित्ता
लिकरविमण्डलवशात् प्रवेश एकघट्याधिक्यमपेक्षते तदाभिप्राये
ह–*षोडशेति । *सायं–सूर्यास्तात् प्राक् । वक्ष्यति माधवे 'यद
सूर्यास्तात्प्राक्'इति । *विभाते–उदयोत्तरम् । वक्ष्यति च श्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साऽप्युत्तरा रात्रिनिषेधतः स्यात् ॥
अर्वाङ् निशीथाद्यदि संक्रमः स्यात्
पूर्वेऽह्नि पुण्यं परतः परेऽह्नि ।
आसन्नयामद्वयमेव पुण्यं
निशीथमध्ये तु दिनद्वयं स्यात् ॥
कर्के झषेऽप्येवमिति ब्रुवाच
हेमाद्रिसूरिश्च तथाऽपरार्कः ।
झषः प्रदोषे यदि वाऽर्धरात्रे
परेऽह्नि पुण्यं त्वथ कर्कटश्चेत् ॥
प्रभातकाले यदि वा निशीथे
पूर्वेऽह्नि पुण्यं त्विति माधवार्यः' ॥

अत्र मूलवचनानि माधवापरार्कहेमाद्र्यादिषु द्रष्टव्यानि ।

सर्वासु संक्रान्तिषु दानविशेषो हेमाद्रौ दानकाण्डे उक्तः ।

विश्वामित्रः—

'मेषसंक्रमणे भानोर्मेषदानं महाफलम् ।
वृषसंक्रमणे दानं गवां प्रोक्तं तथैव च ॥
वस्त्रान्नपानदानानि मिथुने विहितानि तु ।
घृतधेनुप्रदानं च कर्कटेऽपि विशिष्यते ॥
ससुवर्णं छत्रदानं सिंहेऽपि विहितं सदा ।
कन्याप्रवेशे वस्त्राणां वेश्मनां दानमेव च ॥
तुलाप्रवेशे तिलानां(धान्यानां)गोरसानामपीष्टदम् ।
अन्नकीचलिते भानौ दीपदानं महाफलम् ॥
(अन्नकी वृश्चिकः) ।
धनुष्प्रवेशे वस्त्राणां यानानां च महाफलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

झषप्रवेशे दारूणां दानमग्नेस्तथैव च ॥
कुम्भप्रवेशे दानं तु गवामम्बुतृणस्य च ।
मीनप्रवेशे स्थानानां मालानामपि चोत्तमम्' ॥
अत्रोपवासमाह हेमाद्रावापस्तम्बः-

'सूर्योदयोत्तरं संक्रमेतु'इति । मूलवचनानि—

'मध्ये तु विषुवे पुण्यं प्राग्विष्णौ दक्षिणायने ।
षडशीतिमुखेऽतीते ह्यतीते चोत्तरायणे' ॥

इत्यादीनि, 'अह्नि संक्रमणे पुण्यम्'इत्याद्यग्रिमाणि च । उभयतः प्रसक्तस्य षोडशत्वादेः-

'वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दश' ।

इति विषुवयोरपवादः, विष्णुपदीषु पूर्वत एव, षडशीत्यां परत एवेति च नियम इति केचित् ।

वस्तुतस्तु सर्वसंक्रान्तिषु भोगसाम्येन व्यवस्थायां मा भावाद्विशेषतो दशत्वादीनि पुण्यतमत्वार्थानि ।

'या याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः'-

इत्युक्तेः । अत एव-

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
पूर्वापरविभागेन रात्रौ संक्रमते रविः ॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि' ॥

इतिस्कान्दे तमनुपात्तः । उभयत्वपूर्वत्वादीनि चोभयगिनीत्वपूर्वभोगिनीत्वादिव्यवहारार्थानि । एतेन-

'पुण्यकालो विष्णुपद्याः प्राक् पश्चादपि षोडश' ।

इति वचनादुभयतः षोडशत्वस्य विष्णुपद्यामुपसंहारापास्तम् । तत्र विष्णुपदीग्रहणस्योपलक्षणत्वात् । एवं च-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*'अयने विषुवे चैव त्रिरात्रोपोषितो नरः ।
स्नात्वा यस्त्वर्चयेद्भानुं सर्वकामफलं लभेत्' ॥
अशक्तौ तु वृद्धवसिष्ठः—
'अयने संक्रमे चैव ग्रहणे चन्द्रसूर्ययोः ।
अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते' ॥
अत्रोपवासः संक्रमदिने, दानादि तु पुण्यकालदिन इत्याचार्यचूडामणिः । विधिलाघवात्पुण्यकालदिन एवोभयमिति वृद्धाः ।

'षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः' ।
इति कृत्स्नदिवसाभ्यनुज्ञानं प्रत्युक्तम् । षडशीत्या आरभ्य चतसृणां प्रत्येकं पञ्चदशेत्यर्थात् ।
'षडशीतिमुखेऽतीते नाड्यः पञ्चदश स्मृताः' ।
इत्युक्तेः ।
*अयने इति । अत्रायनविषुवपदम्—
'अयने कोटिपुण्यं च लक्षं विष्णुपदीफलम् ।
षडशीतिसहस्रं तु षडशीत्यां स्मृतं बुधैः ॥
शतमिन्दुक्षये दानमनन्तं तु दिनक्षये ।
विषुवे शतसाहस्रं व्यतीपाते त्वनन्तकम्' ॥
इतिवृद्धवसिष्ठोक्ताद्यन्तोपग्रहमुखेन तदुक्तसर्वसंक्रान्तिपरम् ।
'नित्यं द्वयोरयनयोर्नित्यं विषुवतोर्द्वयोः ।
चन्द्रार्कयोर्ग्रहणयोर्व्यतीपातेषु पर्वसु ॥
अहोरात्रोषितः स्नानं श्राद्धं दानं तथा जपम् ।
यः करोति प्रसन्नात्मा तस्य स्यादक्षयं च तत्' ॥
इतिवत्प्राधान्याभिप्रायं वा । तेन सर्वसंक्रान्तिलाभान्नात्र तत्पदासङ्गतिः । एवं संक्रान्तिसामान्ये त्र्युपवासप्राप्तेस्तत्राशक्तस्याग्रिमैकोपवासोक्तेरपि । अहोरात्रोषित इतिक्तप्रत्ययार्थो (भूतकालः)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं च पुत्रिगृहस्थातिरिक्तविषयम् ।
*'आदित्येऽहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
उपवासो न कर्तव्यः पुत्रिणा गृहिणा तथा' ॥
इति जैमिनिवचनात् ।
अत्र श्राद्धमुक्तं हेमाद्रौ विष्णुधर्मे—
'श्राद्धं *संक्रमणे भानोः प्रशस्तं पृथिवीपते'
अपरार्केऽपि विष्णुः-

न विवक्षितः ।
'अमावास्या द्वादशी च संक्रान्तिश्च विशेषतः ।
एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥
अत्र स्नानं जपो होमो देवतानां च पूजनम् ।
उपवासस्तथा दानमेकैकं पावनं स्मृतम्' ॥
इतिसांवर्तैकवाक्यत्वात् । वस्तुतस्तु त्रिरात्रोपोषित पूर्ववाक्ये प्रत्ययार्थो विवक्षितः । 'अगृहिभिः पुत्रीतरैः प्राच्यह्नां त्रितयेऽथवोपवसनं कार्यम्'इति दीपिकायां इतिविशेषणात् । तद्वदहोरात्रोषित इत्यत्रापि स विवक्षित सांवर्त्ते तु संक्रान्त्यधिकरणकोपवासविध्यन्तरमिति ।
*आदित्ये इति ।
'रविवारार्कसंक्रान्तावेकादश्यां सितेतरे ।
पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही' ॥
इति पारणनिषेधात्तदङ्गिनः पूर्वस्य त्र्यहस्य एकाहस्य उपवासस्य निषेधोऽपि द्रष्टव्यः । इत्थमेव—
'सप्तवारानुपोष्यैव सप्तधा संयतेन्द्रियः ।
सप्तजन्मकृतात्पापात्तत्क्षणादेव हीयते' ॥
इति रविशन्युपवासयोः साक्षात्, पारणानिषेधमुखेन वा त्येऽहनि'इति 'रविवार'इति च निषेधः । परं तु संक्रान्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदित्यसंक्रमश्चैव (१)विशेषेणायनद्वयम् ।
व्यतीपातो ऽथ जन्मर्क्षं चन्द्रसूर्यग्रहस्तथा ॥
(जन्मभमभ्युदयश्च) ।
एतांस्तु श्राद्धकालान्वै *काम्यानाह(२) प्रजापतिः ।
इति ।

द्वादशादिदिनैरर्वागयनांशप्रवृत्तावपि पुण्यं वक्तुमयनग्रहणम् । अन्यथा संक्रमेण सिद्धेरयनग्रहणं व्यर्थं स्यादित्यपरार्कः ।

हेमाद्रावपि गालवः-
*अयनांशकतुल्येन कालेनैव स्फुटं भवेत् ।

न्निमित्तकमर्थः, न तु तदधिकरणकेति । प्रयुक्तान्तरनिमित्तकोपवासपारणयोरावश्यकत्वात् । 'तत्प्रयुक्तोपवासस्य'इत्यादिन्यायसाम्यात् । एवं च-

भृगुभानुदिनोपेता सूर्यसंक्रान्तिसंयुता ।
एकादशी सदोपोष्या पुत्रपौत्रप्रवर्द्धिनी ॥

इति विष्णुधर्मादि संगच्छते । *संक्रमणे इति पुण्यकालीनत्वार्थम् । *विशेषेणेति मेषायनादौ श्राद्धसूचकम् । *नित्यानिति ।

रविसंक्रमणे प्राप्ते न स्नायाद्यस्तु मानवः ।
सप्तजन्मानि रोगी स्याद्दरिद्रश्चापि जायते ॥

इति स्नानवत् श्राद्धस्यापि नित्यत्वं नैमित्तिकत्वादित्यपि द्रष्टव्यम् । सर्वसंक्रान्तावयनांशसत्त्वे किं मानमित्यत्राऽऽह-*अय-

---

(१) यद्यपि लिखितपुस्तकेषु "विषुवं चायन" इति पाठस्तथाऽपि टीकायां 'विशेषेण' इति प्रतीकसत्त्वादयमेव युक्त इति ।

(२) अत्र 'नित्यानाह' इति पाठः साधुः । नैमित्तिकत्वेन तेषां काम्यत्वाभावात् । टीकायां 'नित्यान्' इति प्रतीकाच्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृगकर्कादिगे सूर्ये याम्योदगयने सति ॥
तदा संक्रान्तिकाले स्युरुक्ता विष्णुपदादयः ।
अयनांशकच्युतिरूपे संक्रान्तिकालेऽपि विष्णुप
यः प्रवर्तन्ते । तेन *तत्प्रयुक्तं पुण्यकालादि तत्रापि
मिति स एव व्याचख्यौ । तच्च मेषायनं वृषाय
त्यादि सर्वत्र ज्ञेयम् । माधवीयेऽपि जाबालिः-
*संक्रान्तिषु यथा कालस्तदीयेऽप्ययने तथा ।
अयने विंशतिः पूर्वा मकरे विंशतिः पराः ॥
मकरायने पूर्वा विंशतिघटिकाः पुण्याः । म
क्रान्तौ तु पश्चाद्विंशतिः । अन्यत्रायने तत्संक्रा
वदित्यर्थः ।
विष्णुपदादिस्वरूपं च दीपिकायामुक्तम्-
हर्यङ्घ्रिर्वृषसिंहवृश्चिकघटेष्वर्कस्य यः संक्रमः,
कन्यामीनधनुर्नृयुक्षु षडशीत्यास्य, तुलामेषयो
प्रोक्तं तद्विषुवं,झषेऽयनमुदक्,कर्कटके दाक्षिणम्
हर्यङ्घ्रिः-विष्णुपदम् । नृयुक्-मिथुनम् । अ
*पिण्डरहितं श्राद्धं कुर्यात् । तथा चापरार्के मात

नांशेति । मकरादिगे सूर्ये सति यदुदगयनादि, तत्र सति त्रेपि
यनांशकालस्तत्तुल्यकालेनैव कुम्भादौ सिंहादौ चायनं पुण्य
स्फुटं भवेत् । तत्र यः संक्रमकालः, सोऽपि च पुण्यकाल
सर्वं विष्णुपदाद्युक्तं विद्यादिह यथाऽन्यथा ।
इतिप्रथमश्लोकोत्तरार्द्धपक्षे अयनांश एव विष्णुपदा
अन्यथा-तत्र तदकरणे इत्यर्थः । *तत्प्रयुक्तम्-अयनांशप्रयु
विष्णुपदाद्ययनांशे पूर्वादिभोगिनीत्वं सापवादमाह-*संक्रा
ष्विति । *पिण्डरहितमिति तत्सहचरितधर्मोपलक्षण
'पिण्डनिर्वापरहितम्' 'पिण्डो यत्र निवर्त्तेत'इत्याद्यग्रे स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
संक्रान्तिषु च सर्वासु पिण्डनिर्वपणादृते ॥ इति ।

श्राद्धशूलपाणिस्त्वस्य निर्मूलत्वात्, समूलत्वेऽपि—

ततःप्रभृति संक्रान्तावुपरागादिपर्वसु ।
त्रिपिण्डमाचरेच्छ्राद्धमेकोद्दिष्टं मृतेऽहनि ॥

इतिमात्स्योक्ते(१)ग्रहणा*ग्रहणवद्विकल्प एवेत्याह ।

*तन्न । अस्य *पार्वणानुवादकत्वेन पिण्डाविधायकत्वात् । पिण्डो—व्यक्तिः । *अन्यथैकपदे* पिण्डानुवादे त्रित्वविधौ च वषट्कर्तुः प्रथमभक्षव*द्वैरूप्यापत्तेः । तथा चोभयसमूलत्वे पिण्डरहितं पार्वणं कर्तव्यमित्युभयवचनयोरर्थः । त्रिपिण्डशब्देनैकोद्दिष्टव्यावर्तनमात्रम् ।

मङ्गलकृत्येषु विशेषमाह ज्योतिर्निबन्धे नारदः—

त्याज्याः सूर्यस्य संक्रान्तेः पूर्वतः परतस्तथा ।
विवाहादिषु कार्येषु नाड्यः षोडश षोडश ॥ इति ।

एतत्पुण्यकालोपलक्षणम् ।

---

*ग्रहणेति । वैधीं प्राप्तिमनूद्यैकार्थस्य निषेधस्य पाक्षिकतन्निवृत्तौ पर्यवसानात् । येषां मृताहन्येकोद्दिष्टसमाचारस्तेषामपि संक्रान्त्यादौ त्रिपिण्डं—पार्वणं श्राद्धमित्येवार्थ इत्याशयेन दूषयति—*तन्नेति । *पार्वणानुवादकत्वेनेति अमावास्याविकृतित्वेन षड्दैवत्यत्वार्थम् । बाधकमप्याह—*अन्यथेति । *एकपदे—एकप्रसरे पदे । *वैरूप्यम्—उद्देश्यत्वविधेयत्वरूपम् । "वषट्कर्तुः प्रथमभक्षः" इत्यत्र भक्षणमुद्दिश्य प्राथम्यविधिर्न युक्तः । विधिप्रतीतेरुद्देश्यप्रतीतिपूर्वकत्वेनैकप्रसरताभङ्गापत्तेः । न चैवं "लोहितोष्णीषा ऋत्वि-

---

(१) ज्योतिष्टोमसंस्थाभूते ऽतिरात्रे 'अतिरात्रे षोडशिनं गृह्णाति' 'नातिरात्रे षोडशिनं गृह्णाति' इति विधिनिषेधाभ्यां षोडशिसंज्ञकपात्रग्रहणविकल्पवदित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भानोः संक्रान्तिभोगश्च *कुलिकश्चार्धयामकः
इति ज्योतिःशास्त्रे वर्ज्येषु परिगणनात् ।

अयनव्यतिरिक्तासु दशसु संक्रान्तिषु रात्रौ (१) नश्राद्धादि न कार्यम् ।

अहि संक्रमणे कृत्स्नमहः पुण्यं प्रकीर्तितम् ।
रात्रौ संक्रमणे भानोर्दिनार्धं स्नानदानयोः ॥
*अर्धरात्रादधस्तास्मिन्मध्याह्नस्योपरि क्रिया
ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयम् ॥
पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः ।
प्राहुर्दिनद्वयं* पुण्यं मुक्त्वा मकरकर्कटौ ॥
इतिवृद्धवसिष्ठादिवचनैरहःपुण्यत्वोक्त्या,

जः प्रचरन्ति" इत्यत्रोष्णीषमुद्दिश्य लौहित्यविधिर्न स्यादिति वा
म् । तत्रोद्देश्यस्यान्यतः सिद्धत्वात् । इहतु भक्षणस्य पिण्डस्य
विधानादन्यतः सिद्धं पार्वणमनूद्यते इत्येव युक्तमित्यर्थः
*कुलिक इति ।

कुलिकः कालवेला च यमघण्टश्च कण्टकः ।
वाराद् द्विघ्ने क्रमान्मन्दे बुधे जीवे कुजे क्षणः ॥ इति ।
वाराद् द्विघ्ने क्रमान्मन्दे घट्यूनः कुलिको निशि । इति
भौमभार्गवसूर्यज्ञसौरीन्द्वाङ्गिरसक्रमात् ।
वासरेषु द्वितीयाद्या अर्द्धयामा बुधैः स्मृताः ॥

इति चार्द्धयामः । किं तद्दिनार्धमित्यत्राऽऽह *अर्धरात्रे
दिति । *दिनद्वयमिति अर्धावच्छिन्नं बोध्यम् ।
नार्धमित्युपक्रमात् ।

---

(१) मनुरप्याह—"रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता
सा । सन्ध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते" इति । (अ०३श्लो०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रात्रौ संक्रमणे भानोर्दिवा कुर्यात्तु तत्क्रियाम् ।
पूर्वस्मात्परतो वाऽपि प्रत्यासन्नस्य तत्फलम् ॥

सम्पूर्णे अर्द्धरात्रे तु उदये ऽस्तमये ऽपि वा ।
मानार्द्धं भास्करे पुण्यमपूर्णे शर्वरीदले ॥
इति देवीपुराणाच्च ।

म्पूर्णे अर्द्धरात्रे–रात्रेरष्टममुहूर्त्ते । उदये -प्रातःसन्ध्यायाम् । अस्त-
ये–सायंसन्ध्यायाम् । अपूर्णे शर्वरीदले–निशीथपूर्वोत्तरभागयोश्च
क्रमे । भास्करे–भासं करोतीति व्युत्पत्त्या दिवसे यन्मानार्द्धं, त-
पुण्यमिति तदर्थः । 'अर्द्धमन्तर्वेदि'इतिन्यायेन कृत्स्नां रात्रिमनूद्य
दिनमानार्द्धत्वविधेः ।

आदौ पुण्यं विजानीयाद्यद्यभिन्ना तिथिर्भवेत् ।
अर्द्धरात्रे व्यतीते तु विज्ञेयमपरेऽहनि ॥

इति देवीपुराणं च दिनद्वयपुण्यत्वे नैमित्तिकावृत्तिवारणा-
म् । निशीथे संक्रमे तिथेः पूर्वदिनतिथ्यभेदे पूर्वं दिनार्द्धं
पुण्यम्, परदिनतिथ्यभेदे च परदिनार्द्धमिति चाऽऽर्थिकम् ।
त्थं च तत्र दिनद्वयतिथिसत्त्वे पूर्वभोगिनीषु पूर्वम्, उत्त-
भोगिनीषूत्तरम्, उभयभोगिनीषु तु इच्छया विकल्प इति
न्तव्यम् । "आहत्य पूर्वदिनतिथ्यभेदोक्त्या तद्विपरीतस्तत्तिथिभेद
वाऽऽर्थिकः, न तूत्तरतिथ्यभेदस्तादृशः । येन निमित्तद्वयसन्निपा-
न व्यवस्थापेक्षायामुक्तव्यवस्था घटेत । तथा चोत्तरभोगिन्यादा-
पि पूर्वातिथ्यभेदे पूर्वमेव पुण्यम्" इति हेमाद्र्यादयः । व्यतीते
त्वेत्यत्र द्वितीयपादानुषङ्गादर्द्धरात्रादूर्द्धं संक्रमे पूर्वतिथ्यभेदेऽपि
रेद्युरेवेत्यर्थः । अर्द्धरात्रो मध्यवर्त्तिदण्डद्वयम् । के चित्तु या
ा इत्यनेन दश पूर्वा दशापराः' इत्यादिविशेषशास्त्रप्रसिद्धसंख्या
ानूद्यते । सकलशिष्टाचारविरोधात् । किं तु सामान्यतः प्राप्त-
टीषु तत्तत्संख्या । तदनुरोधेन च क्षण एवार्धरात्र इत्याहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वसिष्ठवचनाच्चार्था*द्रात्रौ स्नानादिनि प्रतीतेः । यानि तु—

विवाहव्रतसंक्रान्तिप्रतिष्ठा*ऋतु(१)जन्मसु ।
तथोपरागपातादौ स्नाने दाने निशा शुभा ॥
राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च ॥

इत्यादीनि विष्णुगोभिलादिवचनानि, *तानि करकर्कसंक्रान्तिविषयाणि । 'मुक्त्वा मकरक इति तयोर्दिवानुष्ठानस्य पर्युदस्तत्वादिति हेम

---

*अर्थादिति । अहःसंक्रमे तत्पुण्यत्वसिद्धेरहरेवेतिनियम त्वेकान्वये इतरानन्वयेन समुच्चयासम्भवादितरव्युदासे शब्दत कल्पनयैव नियमः—यथा 'याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनम इत्यादौ, अत्रार्जने उपायत्रयान्वये कृष्यादेर्नान्वयः—प्रकृते च मे पूर्वोत्तरभागत्वेन रात्रिभागस्यापि समुच्चित्यान्वयः सम्भवति नियम इति मतम्, तेषां मते परिसंख्यैव । एवं चैकतरभोगि संध्योपजातानामपि न पुण्यं, कैव कथा रात्रावुपजातानां स्थिते तत्र कथन्तायां रात्रावित्याद्युक्तम् ।

*ऋत्विति । 'ऋतौ तु गर्भशङ्कित्वात्'इत्यादि ऋतु निमित्तं स्नानं वक्ष्यति । *तानीति । मुक्त्वेत्यस्यार्द्धरात्रनिर्णयशेषत्वं कृत्स्नरात्रिनिर्णयशेषत्वं वा उपेत्य कर्क विवाहेत्यादेर्विषयो वाच्यः । इत्थं च 'मिथुनात्कर्कसंक्रा 'कार्मुकं तु परित्यज्य'इत्येवमादीनां रात्रिमपरिहृत्यार्थ य विकल्प उपेयते इति भावः । वक्ष्यमाणस्वरसादाह—

---

(१) 'मृतिजन्मसु'इति क्वचित्पुस्तके पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धवादयः । *वस्तुतस्तु प्रागुक्तवचनेन तयोर्दिद्वयपुण्यत्वादेरेव पर्युदासान्मकरकर्कटयोरपि *'स्नादानं परेऽहनि' इत्यादिभिरहःपुण्यत्वोक्तेरहःपुण्यत्वानुपपत्त्या कल्प्यरात्रिनिषेधस्य च प्रत्यक्षरात्रिविधिना बाधात्सर्वसंक्रान्तिषु रात्रावनुष्ठानविकल्पः । स च देशाचाराद्व्यवतिष्ठत इति युक्तः पन्थाः । अयनयोस्तु वक्तव्यो विशेषः श्रावणे माघे च वक्ष्यते । ज्योतिर्निबन्धे गर्गः–

यस्य जन्मर्क्षमासाद्य रविसंक्रमणं भवेत् ।
तन्मासाभ्यन्तरे तस्य वैरक्लेशधनक्षयाः ॥
तगरसरोरुहपत्रै रजनीसिद्धार्थलोध्रसंयुक्तैः ।
स्नानं जन्मर्क्षगते रविसंक्रमणे नृणां शुभदम् ॥

हेमाद्रौ–

अहि चेद्रात्रियुग्मं स्याद्रात्रौ चेद्वासरद्वयम् ।
संक्रान्तिः पक्षिणी ज्ञेया *दानाध्ययनकर्मसु ॥

यत्तु गौडाः–

संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
सायंसंध्यां न कुर्वीत कुर्वंश्च पितृहा भवेत् ॥

इति कर्मोपदेशिन्यां व्यासोक्तेः सायं पुण्यकाले

---

*वस्तुतस्त्विति । नन्वेतयोरर्थत एव रात्रिपुण्यत्वं स्यादत आह–*स्नानामिति । तथा चान्यथापि कथंताशान्तेर्न रात्रिपुण्यत्वापत्तिरिति भावः । *दानं–वेदस्य । अध्ययनपदसन्निकर्षात् । अध्यापनमिति यावत् । एतच्चायनविषुवमात्रानध्यायविषयम् ।

निशाद्वयं दिवा, रात्रौ संक्रमे वासरद्वयम् ।
अनध्यायं प्रकुर्वीत अयने विषुवे तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संध्यानिषेधमाहुस्तन्निर्मूलम् । अन्यच्च *बहु विस्तरभीतेर्नोच्यते ॥ इति संक्रान्तिनिर्णयः ॥

इति नव्यधृतवचनात् । *बह्विति ।

सूर्ये घोरा, विधौ ध्वांक्षी, पापवारे महोदरी ।
बुधे मन्दाकिनी नाम, मन्दा सुरपुरोहिते ॥
मिश्रिता शुक्रवारे स्याद्, राक्षसी च शनैश्चरे ।
मन्दा ध्रुवेषु विज्ञेया, मृदौ मन्दाकिनी तथा ॥
क्षिप्रे ध्वांक्षी विजानीयाद्, उग्रे घोरा प्रकीर्त्तिता ।
चरैर्महोदरी ज्ञेया, क्रूरैर्ऋक्षैस्तु राक्षसी ॥
मिश्रिता चैव विज्ञेया मिश्रैर्ऋक्षैस्तु संक्रमे ।
द्विचतुःपञ्चसप्ताष्टनवद्वादश तासु तु ॥
क्रमेण घटिका ह्येतास्तत्पुण्यं पारमार्थिकम् ।

पारमार्थिकं-सूक्ष्मतमे संक्रमकाले यत्पुण्यं धर्मानुष्ठानात् तासु तत्तद्वारे तत्तन्नक्षत्रे तत्तत्फलं पूर्णम् । वारर्क्षयोर्विपर्यासे मिश्रमिति बोध्यम् ।

मन्दा विप्रजने शस्ता, मन्दाकिन्यस्तु राजनि ।
ध्वांक्षी वैश्येषु विज्ञेया, घोरा शूद्रे सुखप्रदा ॥
महोदरी तु चौरेषु, शौण्डिकेषु तु राक्षसी ।
चण्डालपुल्कसानां च ये चान्ये क्रूरकर्मिणः ॥
सर्वेषां दारुणानां च मिश्रिता वृद्धिकारिणी ।

एवं—

पूर्वाह्णकाले नृपतीन्, द्विजेन्द्रान्मध्यन्दिने, चाथ विशो ऽपराह्णे शूद्रान् रवावस्तमिते, प्रदोषे पिशाचकान्, रात्रिचरान्निशि नटादिकांश्चापररात्रिकाले, प्रत्यूषकाले पशुपालकाँश्च संक्रान्तिरर्कस्य समस्तलिङ्गिव्रतं च सन्ध्यासमये निहन्ति इति वेलाफलम् । अत्र यस्य या शुभा संक्रान्तिः, तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क्षयुगजश्चान्द्रो मासः । स द्वेधा* । शुक्लादिरान्तः, कृष्णादिः पूर्णिमान्तश्चेति । तथा च त्रिकाण्डमण्डनः—

चान्द्रोऽपि शुक्लपक्षादिः, कृष्णादिर्वेति च द्विधा ।

इत्युक्त्वा देशभेदेन तद्व्यवस्थामाह—

रमोदयसाधनं महादानादि कार्यम् । यस्य याऽशुभा, तेन स्यामरिष्टहानिकरं तत्तच्छान्त्यादि । तदर्थ एव च षोडशघटिकादिः सामान्यकालः । आदित्यस्य नक्षत्रसंक्रमे, ग्रहान्तराणां राशिनक्षत्रयोः संक्रमे च पुण्यकालं स्नानादि चाऽऽह जैमिनिः—

नक्षत्रराश्यो रविसंक्रमे स्युरर्वाक् परस्ताच्च रसेन्दुनाड्यः ।
पुण्यास्तथेन्दोस्त्रिधरापलैर्युगैकैव नाडी मुनिभिः शुभोक्ता ॥
नाड्यश्चतस्रः सपलाः कुजस्य, बुधस्य तिस्रो मनवः पलानि ।
सार्द्धाश्चतस्रः पलसप्तयुक्ता गुरोश्च, शुक्रे सपलाश्चतस्रः ॥
द्विनागनाड्यः पलसप्तयुक्ताः शनैश्चरस्याभिहिताः सुपुण्याः ।
आद्यन्तमध्ये जपहोमदानं कुर्वन्नवाप्नोति सुरेन्द्रधाम ॥

इति । अर्वाक् परस्तादिति सर्वत्र सम्बध्यते । रसेन्दुः—षोडश । त्रिधरा—त्रयोदश । सपलाः—एकपलाधिकाः । मनवः—चतुर्दश । नागाः—अष्ट, द्विगुणिताः षोडश । एषु संक्रमेषु दिवापदाभागाद्रात्रौ जातेषु तत्रैव पुण्यम् ॥ इति संक्रमाटिप्पणी ॥

*द्वेधेति । गवामयनाविकृतौ उत्सर्गिणामयने ऽतिदेशतः प्रतिमासं प्राप्तेषु त्रिंशदहःसु द्वितीयादिमासीयप्रथमाहस्त्यागे "अमावास्यया मासान् सम्पाद्याहरुत्सृजन्ति, अमावास्यया हि मासान् सम्पश्यन्ति" । "पौर्णमास्या मासान् सम्पाद्याहरुत्सृजन्ति, पौर्णमास्या मासान् सम्पश्यन्ति" इति श्रुतेः । यस्तु यत्किञ्चित्रिंशत्तिथिसमुदायत्वेनानुगतधर्मेणाक्रान्तस्तिथिबद्धो यत्किञ्चित्तिथिमारभ्य तत्तिथ्यवधिकश्चान्द्रः, स न विभक्तः । विशे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति के च न
येऽपीच्छन्ति न तेषामपीष्टो विन्ध्यस्य दक्षिणे
इति । विन्ध्यस्य दक्षिणे कृष्णादिनिषेधादुत्त
द्वयोरभ्यनुज्ञा गम्यते । तत्रापि शुक्लादिर्मुख्यः, कृ
दिर्गौणः । *शास्त्रेषु चैत्रशुक्लप्रतिपद्येव चान्द्रसं
रारम्भोक्तेः । तदुक्तं दीपिकायाम्–

'चान्द्रोऽब्दो मधुशुक्लगप्रतिपदारम्भः' इति
हि ये कृष्णादिं मन्यन्ते, तेषां वत्सरारम्भो भि
अतः शुक्लादिर्मुख्यः । कृष्णादिना मलमासासम्भ
चन्द्रस्य सर्वनक्षत्रभोगेन नाक्षत्रो मासः । साव
नां व्यवस्थोक्ता हेमाद्रौ ब्रह्मसिद्धान्ते ।

षवाचिनां चैत्रादिशब्दानां तत्राप्रयोगात् । न च तस्य
एवान्तर्भावः । षट्सवनस्नानविधिवशात्सवनशब्दो दिनस्य
तृतीयभागार्थक इति तदुभयसम्बन्ध्यहोरात्रद्वारकतत्सम्ब
त्रिंशदहोरात्रसमुदायस्यैव सावनत्वात् ।

*उत्तरत इति । विन्ध्यस्येति शेषः । नर्मदोत्त
इत्यप्याहुः । ननु कर्मवर्णविशेषेषु अग्रिमवचनसद्भावादस
विषय इति चेत्सङ्कल्प एव । आचारात् । त्रिकाण्डमण्डनवचनस
चारमूलकत्वात् । एवं च मुख्यचान्द्रमासातिरिक्तगौणमासम
कर्मस्वपि सङ्कल्पे विन्ध्योत्तरे शुक्लाद्युल्लेखाचाराभावात् कृष्ण
रेवोल्लेख्यः । विन्ध्यदक्षिणे तु शुक्लादिः, न तु गौणमास

यत्तु 'द्वयोरभ्यनुज्ञा' इत्युक्तं, तस्य तिथिकृत्ये चेति विषयः । *
स्त्रेष्विति । 'चैत्रे मासि जगद्ब्रह्मा' इत्यादिकल्पयुगादिप्रवृत्तेः शु
तिपत्सूर्योदयकालीनत्वोक्तेरित्यर्थः । अथ कृष्णादेर्गौणत्वमयु
संवत्सरमासयोरारम्भतिथिरेकैवेत्यनियमात्, वैशाखादौ गतत
न चैवं कृष्णादिना मलमासापत्तिः । तस्य शुक्लादित्वोपग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ात एव माघस्नानादौ चातुर्मास्यादौ च कृष्णादेर्विनियोगः । न्यथा गौणमुख्यन्यायेन तदसङ्गतेः । न चाननुगमः । स्वीयप-दशकलावृद्धिक्षयपरिच्छेदपर्याप्तिमत्त्वसम्बन्धेन चन्द्रवत्त्वं चान्द्रत्वं नुगतम् । एतच्च तिथिबद्धचान्द्रेऽपि । आदौ कासां चित्कलानां द्धिः, ततः पञ्चदशानां तासां क्षयः, ततः पुनस्तासां कासा-श्चद् वृद्धिः; आदौ वा कासां चित्तासां क्षयः, ततः पञ्चदशानां ासां वृद्धिः, ततः पुनः कासां चित्तासां क्षय इति पौर्वापर्यभेदेऽपि न्यूनानधिकपञ्चदशकलावृद्ध्यादिसत्त्वात् । एकद्यादिकलावृद्ध्या-दिमत्तिथिद्वयादिवारणाय स्वीयत्वं यावत्कलालाभार्थम् । तथा व स्मरणम्—

मस्यन्ते परिमीयन्ते स्वकलावृद्धिहानितः ।
मासा एते स्मृता मासास्त्रिंशत्तिथिसमन्विताः ॥ इति ।

तथा च तिथिबद्धचान्द्रापरिगणने न्यूनता; इति चेन्न । एतद्धि तिथिबद्धचान्द्रव्यावृत्तमेव स्वीकार्यम् । अन्यथा एते इति चैत्रादि-विशेषवाचिसर्वनामदर्शनात्तस्य चैत्रत्वाद्यापत्तेः । एवं स्थिते 'अ-न्यायश्चानेकार्थत्वम्' इति न्यायेन शुक्लकृष्णाद्योरेकतरस्य गौणत्वे आवश्यके कृष्णादेरेव तथात्वमुपेयते । स्वकलावृद्धिहानीत्यत्र वृद्धिहान्योः क्रमस्यापि विवक्षणात् ।

इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः ।
अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकौ ॥

इतिलघुहारीतेनाऽऽदिमध्यसमाप्त्युपादानात्तदुपलक्षितकालवि-शेषत्वरूपमाससामान्यलक्षणस्य दर्शान्तचान्द्र एव सत्त्वाच्च । उक्तसा-धारणलक्षणं तु व्यर्थमेवेति न तिथिबद्धचान्द्रो गणितः । एवं चैत्राद-योऽपि दर्शान्तचान्द्रे एव मुख्याः । मुख्यमासलक्षणमभिधाय 'एते' इत्यभिधानात् । किञ्च इन्द्राग्नी यत्रेत्यादिशुक्लादिमाससामान्यल-क्षणमभिधाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चक्रवत् परिवर्त्तेत सूर्यः कालवशाद्यतः ।
अतः सांवत्सरं श्राद्धं कर्त्तव्यं मासचिह्नितम् ॥
मासचिह्नं तु कर्त्तव्यं पौषमाघाद्यमेव हि ।
यतस्तत्र विधानेन स मासः परिकीर्त्तितः ॥

इति लघुहारीतेन–सांवत्सरश्राद्धं पूर्वोक्तमासचिह्नितं यच्च मासचिह्नं तत्पौषमाघाद्यमित्युक्तेः दर्शान्तप्रकरणात्तत्पौषादिलाभाच्च सौरयोस्तयोः पुष्यमघायोगासम्भवात् । अथ "तपस्तपस्यौ शैशिरावृतू" "मधुश्च माधवश्च वासन्तिकावृतू" "शुचिश्च ग्रैष्मावृतू" अथैतदुदगयनं देवानां दिनम्। "नभश्च नभस्यौ वार्षिकावृतू" "इषश्चोर्जश्च शारदावृतू" "सहश्च सहस्यश्च हैमन्तिकावृतू" अथैतद्दक्षिणायनं देवानां रात्रिः" इति श्रुतावयनयोरत्वात्तद्घटकऋतुप्रविष्टा मासास्तपआदयोऽपि सौरा एव वा ततश्च तत्पर्यायतया माघादीनामपि सौरत्वमुपेयम् । पर्यायत्वं

माघमासस्तपाः प्रोक्तः, तपस्यः फाल्गुनः स्मृतः ।
चैत्रो मासो मधुः प्रोक्तो, वैशाखो माधवो भवेत् ॥
ज्येष्ठमासस्तु शुक्रः स्याद्, आषाढः शुचिरुच्यते ।
नभो मासः श्रावणः स्यात्, नभस्यो भाद्र उच्यते ॥
इषश्चाश्वयुजो मासः, कार्त्तिकश्चोर्जसंज्ञकः ।
सहो मासो मार्गशिराः, सहस्यः पौषनामकः ॥

इति स्मरणादवगम्यते । तथा च श्रुतेर्बलीयस्त्वाच्चा गौणत्वं स्यात्।मैवम् । सन्ति हि 'या वैशाखस्यामावास्या रोहिण्यमुपद्यते'इत्यादीनि वचनानि, तत्र वैशाखो न सौरः । मेषस्थसूर्ये रोहिण्यृक्षीयवृषस्थचन्द्रवत्त्वासम्भवात् । तस्यां सूर्याचन्द्रमसोरेकराशिस्थत्वनियमात् । किं तु दर्शान्तचान्द्रः । तत्रामायां चन्द्रसूर्यकराशिस्थत्वसम्भवात् । उभयोः श्रौतत्वाविशेषेऽपि अनेकार्थभयेनैकत्र गौणत्वे आवश्यके अर्थवादगतेष्वेव तपआदिश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्कल्प्यते, न विधिगतेषु वैशाखादिशब्देषु । "न विधौ परः श-
दार्थः" इति न्यायात् । एवं च चान्द्रसौरभिन्ने चैत्रादिशब्दानां
योग एव नास्ति, चान्द्रसौरयोरपि अनेकार्थत्ववारणाय चान्द्रे एव
मुख्यत्वमुपेयम् । "नक्षत्रेण युक्तः कालः" "साऽस्मिन् पौर्णमासी-
ते"(१)संज्ञायाम् इति पाणिनिस्मरणात् । तेन हि तत्तच्चान्द्रमासतत्त-
पूर्णिमासु कादाचित्कतत्तन्नक्षत्रयोगमभिप्रेत्यावयवार्थः प्रदर्श्यते ।
सौरेषु त्वाश्विनपौषमाघेषु कन्याधनुर्मकरेषु तस्यां कदाचिदपि
आश्विनीपुष्यमघायोगः । तथा सति चन्द्रस्य यथाक्रमं मेषकर्कसिं-
स्थत्वेन सूर्यचन्द्रयोः पूर्णिमान्ते षडष्टकेनावस्थानापत्त्या "सू-
र्याचन्द्रमसोर्यः परो विप्रकर्षः सा पौर्णमासी"इति-अन्योन्यं
राशिसप्तकेनावस्थानरूपपरविप्रकर्षकथनविरोधात् । ननु एवमपि
चैत्र्यादिपूर्णिमायाश्चित्रादियोगाभावे कथं चैत्र्यादिशब्दार्थता, त-
द्धितार्थबाधात् । दृष्टश्च-"पौर्णमासीषु सर्वासु मासर्क्षसहितासु च ।
दत्तानामिह दानानां पुण्यं दशगुणं भवेत्" कार्त्तिक्यां तु यदा
कृत्तिकाम्"इत्याद्याग्रेमवचनैः पूर्णिमायां तत्तन्नक्षत्रविरहः । एवं च
चैत्रादिशब्दानां योगासम्भवाद् रूढा एव स्वीकार्याः । रूढचैत्रा-
दिमासयोगाश्च चैत्र्यादिशब्दाः ।

आषाढे कार्त्तिके वाऽपि माघवैशाखयोरपि ।
पौर्णमासीषु दातव्यं महादानं युधिष्ठिर ॥

इति भारतात् पौर्णमासीष्विव "प्रौष्ठपद्यष्टका भूयः" "क्षीराब्धौ
शेषपर्यङ्के आषाढ्यां संविशेद्धरिः । निद्रां त्यजति कार्त्तिक्याम्"
इत्यादौ पौर्णमासीभिन्नेऽपि प्रौष्ठपद्यादिशब्दप्रयोगः । तथा च
प्रयोगाविशेषाच्चान्द्रेऽपि यौगिकत्वासम्भवात् रूढ्याश्रयणे चैत्र्या-
दिशब्दानां सौरचान्द्रयोर्मुख्यत्वं दुर्वारम् । सत्यम् । चैत्र्या-
दिशब्दा यौगिका एव पौषी रात्रिर्माघी रात्रिरितिवत्तत्त-

(१) इतिशब्दादिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नक्षत्रयुक्ततत्तद्व्यक्तिवचनाः । चैत्रादिशब्दास्तु चान्द्रे योगरू
संज्ञायामिति पाणिन्युक्तेः । तत्र तेषु योगः चित्रास्वात्य
द्यादिभयोगवचनतया ।

अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभो मतः ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥

इति वचनात् । मासानां च पौर्णमासीद्वारकं द्विभत्वादि

द्वे द्वे चित्रादितारागां परिपूर्णेन्दुसंगमे ।
शेषा मासा द्विभा ज्ञेयाः कृत्तिकादिव्यवस्थया ॥

इति संकर्षणकाण्डवचनात् । ततश्चैत्रादिशब्दो न चित्रा
दियोगनिमित्तको, ऽपि तु चित्रास्वात्यन्यतरादियोगनिमित्त
त्र्यादिप्रकृतिचित्रादिपदे च चित्रास्वात्यन्यतरत्वादिनाऽजहत्
लक्षणा, मनोतास्थाग्निपदे इव सोमसाहिताग्नेः । न च चित्रा
चित्रायां शक्तिः, स्वात्यां लक्षणेति वाच्यम् । युगपद्वृत्तिद्वयाभा
दृश्यते चायःशूलिको दाण्डाजिनिक इत्यादौ प्रकृतेरपि भावे
हसदम्भयोर्लक्षणा । साहसिको दाम्भिक इत्येव प्रतीतेः । चैवमुपे
हस्तादिपाते तूत्पातः । 'प्रकृतेरन्यत्वमुत्पातः' इति लक्षणात् । त्रपव
तिथिबद्धचान्द्रोऽपि सौरादितो मुख्य एव । चान्द्रत्वात् । दर्शो
चान्द्रस्य सर्वतो मुख्यत्वेऽपि वार्षिकादावेतस्य विनियोगः
वचनात् । यथा गौणस्यापि कृष्णादेर्नियतः पाक्षिको वा
नियोगः, सौरादेश्च गौणतरस्य वचनादेव । नन्वेवं मास
विध्यानुपपत्तिः । गौणमुख्ययोरसमत्वात् । न च त्रिंशद्गुणि
नावच्छिन्नत्वमनुगतमासत्वमिति वाच्यम् । नाक्षत्रमासे ऽव्याप्

माने मासस्तु नाक्षत्रे सप्तविंशतिभिर्दिनैः ।
परिशेषेषु मानेषु मासस्त्रिंशद्दिनः स्मृतः ॥

इति विष्णुधर्मोक्तेः । न च तावद्दिनेष्वेव भागकल
त्रिंशत्त्वं वाच्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चन्द्रार्कगत्या कालस्य परिच्छेदो यदा भवेत् ।
तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य भार्गव ॥
भगणेन समग्रेण ज्ञेया द्वादशराशयः ।
त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते ॥
आदित्यसन्निकृष्टं तु भागद्वादशकं यदा ।
चन्द्रमाः स्यात्तदा राम तिथिरित्यभिधीयते ॥
इति तिथिं भागं च प्रदर्श्य—
तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्तितः ।
अहोरात्रेण चैकेन सावनो दिवसः स्मृतः ॥
आदित्यराशिभोगेन सौरो दिवस उच्यते ।
चन्द्रनक्षत्रयोगेन नाक्षत्रो दिवसः स्मृतः ॥

इतितत्तद्दिनप्रदर्शकविष्णुधर्मे नक्षत्रव्याप्त्यैव नाक्षत्रदिनप्रदर्श-
त्तिद्वयात् । वस्तुतस्तु "इन्द्राग्नी यत्र हूयेते" इतिवत्सङ्कोचकस्पष्टलिङ्गा-
रपि सावेन मासशब्दमात्रश्रवणेन च चान्द्रगौणमुख्यसाधारण्येन तथा-
। चैवमुपेत्याचान्द्रेषु मासेषु मासपदप्रयोगो भविष्यति, अनौरसेषु
णात् पुत्रपदवत् । नाक्षत्रे तत्प्रयोगबीजं तु चन्द्रकर्तृकैकसमुदाय-
। दृगोचरभोगावच्छेदकत्वेन चान्द्रवृत्तिधर्मेणैव । तथा च—

चन्द्रमाः पौर्णमास्यन्ते भास्करादतिरिच्यते ।
राशिषट्कं तदा राम मासार्द्धेन न संशयः ॥
भागद्वादशकं पूर्वं तिथ्यां तिथ्यां क्रमेण तु ।
चन्द्रमाः कृष्णपक्षान्ते सूर्येण सह युज्यते ॥
सन्निकर्षादथारभ्य सन्निकर्षमथापरम् ।
चन्द्रार्कयोर्बुधैर्मासश्चान्द्र इत्यभिधीयते ॥
साब्दे तु तथा मासे त्रिंशत्सूर्योदयाः स्मृताः ।
सूर्योदयाः—सूर्योदयरूपपूर्वोत्तरावधिकाः सावनाः ॥
आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अमावास्यापरिच्छिन्नो मासः स्याद्ब्राह्मणस्य
संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोः ॥

सर्वर्क्षपरिवर्त्तैस्तु नाक्षत्रो मास उच्यते ॥

इति विष्णुधर्मवचनं तच्चातुर्विध्ये विरुध्यते इति किञ्चातः । पुत्रद्वादशत्वादिवत्संख्यानं भविष्यति । स्वरूपस्य तत्तत्कर्मसु तत्तद्वचनविहितानां तेषां स्वरूपजिज्ञासायामुपयुक्तं द्वादशपुत्रादिस्वरूपकथनवत् । एतेन स्वरूपकथनं मासपदस्य नानार्थत्वद्योतनायेत्यपाकृतम् । उक्तरीत्यैवोपपत्तौ नानार्थत्वे भावादित्यलं पल्लवेन ।

*अमावास्येति । ननु मासशब्दस्य चैत्रादिशब्दस्य च शुक्लादेः मुख्यत्वे "मासमग्निहोत्रं जुहोति" "मासं दर्शपूर्णमासाभ्यां" "मासं चातुर्मास्यैः" ।

"यथा कथञ्चित् पिण्डानां तिस्रोऽशीतीः समाहितः ।
मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकताम्" ॥
"पयसा वापि मासेन" ।
"गोमूत्रयावकाहारो मासं मासार्द्धमेव च" ॥

इत्यादिषु प्रत्यक्षैः, शुभाशुभफलकथनोन्नेयैर्वा विधिभिः मासविशेषाङ्गकेषु विवाहोपनयनदेवतडागादिप्रतिष्ठामन्त्रदीक्षा विवाहाद्युत्तरपिण्डदानादिनिषेधेषु, संख्याविशेषावच्छिन्नमासाः व्रतादिषु च, तादृशेषु गर्भाधानादिषु च साक्षान्मासानपि षोडशदिनाद्यात्मकऋत्वादिरूपस्वकालघटनार्थं मासविशेषेषु च सर्वत्र गौणमुख्यन्यायाच्छुक्लादिचान्द्रस्यैव ग्रहणादव्यया अप्रसङ्गाद् "अमावास्या परिच्छिन्नो मासः" इति वचनं, "मासो विवाहादौ" इत्याद्यग्रिमवचनानि च न संगच्छेरन् । सौरव्यवस्थाविधेर्नियमविधितया सौरादेः पाक्षिकप्राप्त्यपेक्षणात् स्याश्चासत्त्वात्, दर्शान्तचान्द्रव्यवस्थावचनं च न कार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यप्राप्तत्वादिति चेत् । न, यतो न्यायप्रवृत्तेः प्राक् सर्वमासानां प्तिर्वाच्या । अन्यथा तस्यापि नियामकत्वं न स्यात् । तथा च स्या अवश्यवाच्यत्वे तद्दशायां मन्थरान्न्यायात् प्राक् प्रवृत्तस्य ास्त्रस्यैव नियामकत्वमुपेयते ।

इत्थमेव (१)मुख्यद्रव्योपादानाशक्तिनिर्णये न्यायेन सुसदृश यमात्प्रागेव प्रधानविधिबोधितप्रधानकर्त्तव्यताक्षेपात् सर्वद्रव्या- पाक्षिकप्राप्तिसमये प्रवृत्तः पूतीकानां विधिर्नियमविधिरेवे- च्यते ।

एवम् "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इत्यादिरुपस्थाने करण- ताया ऐन्द्र्या विधिस्तस्या नियमाय पाक्षिकप्राप्त्या वाच्यः । न्यायेन मुख्यसामर्थ्यवत्या आग्नेय्या एव कस्याश्चि- नियमः स्यात, समीपे स्थित्वाऽभिधानात्मकमुपस्थानं मन्त्रै- करणकमित्यव्यभिचारात् लिङ्गमात्रेणापि मन्त्रस्य विनियो- सम्भवात्, देहादिभिन्नात्मज्ञानस्येव पारलौकिकफलककर्मा- ष्ठाने । तथा च यावन्न्यायः मुख्यसामर्थ्यवतीं कां चनाऽऽग्नेयीं नियन्तुमुपक्रमेत, तावच्छीघ्रप्रवृत्तेन प्रत्यक्षविधिनैवैन्द्री नियम्य- इति ।

एवमेव "तिलमाषैश्च सर्षपैः" इत्यादिषु माषनिषेधप्रवृत्तिपू- कालीनां निषेध्यप्रसक्तिरूपां पाक्षिकप्राप्तिमपेक्ष्यैव तन्नियम- धित्वमिति दिक् ।

एवं च 'सौरो मासो विवाहादौ' इत्यादेः—एतेषु र्येष्वेते एव मासा ग्राह्या इत्यर्थे, शेषेषु मुख्यचांद्र ए- तिव्यवस्थार्थं दर्शान्तचान्द्रवचनान्यप्यावश्यकानि । अन्यथा

---

१ मुख्यस्य द्रव्यस्य सोमस्योपादाने ऽशक्तौ लाभाभावादिभि- णाशक्तौ निर्णये कस्य ग्रहणं कर्तव्यमिति सन्देहे तत्करणे प्राप्ते यनेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यावद्व्यवस्थाप्यविषयानुपादानात्तदसङ्गतेः। दर्शान्तचान्द्रवचने केषां चित्कार्याणामुपादानं चोदाहरणमात्रम्। एवं कृष्णादिसौरादिमासानां गौणत्वेऽपि मासशब्दवत्सु शास्त्रेषु, सङ्कल्पाद्युल्लेखे वा क्वचित्तेषामपि ग्रहणं मासत्वाभिधानात्। 'नापुत्रस्य लोकोऽस्ति' 'पितृपुत्रेण कर्त्तव्या'इत्यादौ क्षेत्रजादीनामिव पुत्रत्वाभिधानादिति।

अथ "कृष्णपक्षादिकं मासम्"इत्यादित्रिकाण्डमण्डनस्थदेशविशेषव्यवस्थावाक्यमाचारमूलकम्। इच्छन्ति इष्ट इत्युक्तेः। तच्च विन्ध्यदक्षिणे न कृष्णादिः, विन्ध्यतदुत्तरयोश्च न शुक्लादिरित्यर्थकम्। क्वापि शिष्टाचारे तत्र शुक्लाद्युल्लेखादेरदर्शनात्। विन्ध्यदक्षिणतः शुक्लादिरेवेष्टः, अन्यत्र कृष्णादिरेवेति चाऽऽर्थिक एवार्थः। एवं च कर्मवर्णविशेषव्यवस्थावचनैर्विरोधे आचारस्य बाध्यत्वात्तद्वचनमशुद्धमेव; इति चेत्—न हि तद्वचनस्य कर्मादिव्यवस्थावचनैर्विरोधः। तथा हि—कर्मवर्णव्यवस्था ऽङ्गभूतमासविषया, न तु विन्ध्यदक्षिणतः शुक्लादिरेव, ततोऽन्यत्र कृष्णादिरेवेति व्यवस्थाऽपि। तस्या अङ्गानङ्गसाधारणसङ्कल्पाद्युल्लेख्यलौकिकाधिकरणमात्रमासविषयत्वात्। कर्मसत्तावच्छेदकतया सूक्ष्मकालवन्मासादिस्थूलकालस्यापि अस्मिन्वर्षे ऽस्मिन् मासे कृतमिति प्रतीत्या तादृशाधिकरणत्वात्। स्मर्यते च—

मासपक्षतिथीनां च निमित्तानां च सर्वशः।
उल्लेखनमकुर्वाणो न तस्य फलभाग्भवेत्॥—

इति सङ्कल्पादौ मासाद्युल्लेखः। निमित्तानामिति। देशक्षेत्रादीनां नक्षत्रयोगकरणादीनां च। अत एव व्यतीपातादिकमनुल्लिख्य स्नातस्य तदुल्लिख्य पुनः स्नानमिच्छन्ति।

ननु मासादिविधिबोध्यो मासाद्युल्लेखो ऽङ्गभूतमासादिविषय एवास्तु, तदुल्लेखविधेस्तदनुसन्धानार्थत्वात्। अङ्गभूतस्यैव चानुसन्धानं प्रयोगविधिरपेक्षते। तस्य मासा सम्भवेऽपि विधिवशादेवोल्लेखेनैव कर्त्तव्यत्वम्। यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यहरहःस्नानादौ विध्यभावान्मासादेर्नाङ्गत्वं, तथापि यत्र यस्य मासादेरङ्गत्वं तत्रैव तस्योल्लेखविधिरस्तु । यद्यपि च निमित्तस्यानङ्गत्वाद् दृष्टानुसन्धानार्थं तदुल्लेखविधिर्न घटते, तथापि निमित्तत्वमनुष्ठानप्रयोजकं, तच्चाज्ञातस्य नोपपद्यत इत्यनङ्गस्यापि तस्यानुसन्धानं प्रयोगविधिरपेक्षत एवेति तदुल्लेखविधिरपि निष्प्रत्यूहः । तथा च सङ्कल्पवाक्यगतोल्लेखोऽङ्गभूतमासविषय इति कर्मवर्णव्यवस्थावाक्यविरोधो दुर्वारः; इति चेन्न । उल्लेखस्यादृष्टार्थत्वमेव । अनुसन्धानार्थत्वे च सर्वशब्देन च प्रतीयमानस्य सर्वेषां सर्वत्रोल्लेखस्य बाधापत्तेः ।

वस्तुतस्तु अवच्छेद्यकालस्याधिकरणत्वेन सर्वत्र प्राप्तत्वात् कालविधयः सर्वे तदवच्छेदककालोपाधिपराः । ते च कालोपाधयः कर्मप्रयोगाधिकरणकालपरिच्छेदमुखेन कर्मप्रयोगाङ्गाः । परिच्छेदश्चाऽऽद्ये कालविषयकर्तृव्यापारे ऽपेक्षितः । स च व्यापारः कर्मप्रयोगारम्भार्थं प्रति ईक्षा । प्रयोगारम्भश्च सङ्कल्प एव । तथा च प्रयोगाङ्गकालस्य सङ्कल्पे उल्लेखार्थं ततः पूर्वमनुसन्धानमपेक्षितम् । ततश्च पूर्वमनुसन्धानेनोल्लेखे जाते ततो जायमानमप्यनुसन्धानमग्रे ऽनुपयोगान्नोल्लेखप्रयोजनं भवितुमर्हति, यद्वशेन तस्याङ्गभूतमासविषयकत्वं, वचनसङ्कोचो वा स्यात् । एवं निमित्तस्य ज्ञातस्यानुष्ठानप्रयोजकत्वात्सङ्कल्पात्पूर्वमेव तदनुसन्धानमपेक्षितं, न तूल्लेखकृतेन तदनुसन्धानेन कश्चिदर्थः । तत् इत्थं सङ्कल्पादिगतो मासाद्युल्लेखो ऽङ्गानङ्गसाधारणमासविषयो ऽदृष्टार्थः ।

यथा चाहुः–'असङ्कल्पितान्निषिद्धादिव तादृशाद्विहितादप्यदृष्टं जायते । आद्यं पापम्, उत्तरं पुण्यमित्यन्यदेतत् । मासाद्युल्लेखश्चाभ्युदयविशेषहेतुरित्यत्र व्यतिरेकप्रदर्शनार्थम् 'उल्लेखनमकुर्वाण' इत्यादि, न तु तस्य विहितस्य कर्मणः मासाद्यनुल्लेखे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलं न जायते इति । तद्विषयं च देशव्यवस्थावचनं नाङ्गभूतमासविषयकर्मादिव्यवस्थावचनैर्बाधितुं शक्यम् । भिन्नविषयत्वात् । एवं चाधानादौ वर्णविशेषव्यवस्थावचनेन दर्शान्तादेर्विवाहादौ कर्मविशेषव्यवस्थावचनेन सौरादेर्मासस्याङ्गत्वेऽपि सङ्कल्पे विन्ध्यदक्षिणे शुक्लादेरेव, विन्ध्यतदुत्तरयोश्च कृष्णादेरेवाधिकरणत्वेनोल्लेखो वचननिबद्धाच्छिष्टाचारादिति—

अथोषःकालीनाहरहःस्नानादावौदयिक्यास्तिथेर्वारस्य चामसे सङ्कल्पे कस्योल्लेखः ? । अत्र केचित्—उदयस्य कर्मकालत्वाभावेऽप्युषःकाले स्नानादिसङ्कल्पे औदयिकयोरेव तिथिवारयोरुल्लेखः ।

सप्ताहं प्रातरस्नायी द्विजः शूद्रत्वमाप्नुयात् ।

इतिनिन्दास्मरणादाचाराच्च. तत्रावश्यकसन्ध्यादिविधिना स्नानलोपो मा प्रसाङ्क्षीदिति अल्पद्वादश्यां माध्याह्निकापकर्षवदुषसि स्नानापकर्षोपगमात् साकल्यवचनज्ञापिताहार्यातिथ्युल्लेखवदुषःस्नाने प्रातःस्नानत्वव्यवहारादुन्नीताहार्यप्रातस्त्वसत्त्वाच्चेत्याहुः ।

वस्तुतस्त्वहरहःस्नानादौ तिथिवारयोर्न विधिः । तिथिवाराङ्गकस्य च प्रतिपदादिभानुवारादिस्नानादेरुदयोत्तरमेवानुष्ठानं हेमाद्र्यादिसम्मतम् । सप्ताहमितिवचनं गौणकालातिक्रमे दोषाधिक्यार्थं, न तु तिथ्यादेरङ्गत्वार्थम् । तथा च सङ्कल्पे ऽधिकरणतयोपगततिथिवारयोरेवोल्लेखः । तथाविधस्नानजनितशुचित्वं तु वचनात्सकलकर्मोपयोगि । आचारस्तु स्मृतिविरोधाद्विगीत एवेति । मासपक्षेत्यादिवचनावोधितत्वात्तु नोषस उल्लेखः ।

इदं तु बोध्यम् । नैत्यके स्नान–देवपूजादौ, नैमित्तिके ग्रहण–संक्रान्ति–स्नानश्राद्धादौ, काम्ये च–सर्वत्र प्रधाने गौणकालकर्त्तव्येऽपि मुख्यचान्द्रवत्सरवत्, तादृश एव ऋतुः सङ्कल्पे उल्लेख्यः । स च गौणवसन्तादिरूपो ग्रीष्मादिः । अङ्गे तत्र मुख्यस्य तस्याबाधादा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अत्र ब्राह्मणादीनां यत्र कर्मविशेषे वचनान्तरेण *'वसन्ते ब्राह्मणोऽग्निमादधीत'इत्यादिवत् मास उक्तः । तत्र दर्शान्तत्वमात्रं नियम्यते, न तु सर्वकर्मसु दर्शान्त

चाराच्च, प्रधानविधिस्थवसन्तादिपदवृत्तिसजातीयवृत्तिलभ्यार्थकत्वे मानाभावाच्च । मासस्तु विन्ध्यदक्षिणे शुक्लादिः, विन्ध्यतदुत्तरयोः कृष्णादिः प्रागुक्त एवेति ।

अथ 'अमावास्यापरिछिन्न' इत्यादिवर्णव्यवस्थावचनादे-र्दर्शान्तमासविधायकत्वेन सर्वकर्मविषयता स्यात् न तु मासो-पबद्धकर्मविषयतेत्यत आह *अत्रेति ।

वसन्ते इति । ब्राह्मणादीनामाधानोपनयनादिकालवस-न्तादिप्रविष्टत्वेन मासे प्राप्ते विशेषमात्रं विधीयते, ब्राह्मणादेर्यो मासः स दर्शान्त एवेति । अङ्गत्वेन मासविशेषविधाने मा-सपदस्यापि विधेयार्थकत्वेन गौरवादित्यर्थः । इदमुपलक्षणं, विवाहादिषु विधिनिषेधमुखेन शुभाशुभफलसूचकतया, तदुत्तर-पिण्डदानादिनिषेधविषयत्वेन च यज्ञेषु मासाग्निहोत्रादिषु सत्रा-दिषु चाङ्गत्वेन, अहीनगर्भाधानादिषु चाङ्गभूताहोरात्रघटनार्थं मासे प्राप्ते "सौरो मास" इत्यादिर्विशेषविधिः । यो विवाहा-दिषु मास उपादेयः, स सौरादिरिति तदर्थः ।

ननु कर्मव्यवस्थावाक्ये मासस्योद्देश्यत्वे शुद्धतदुद्देशासम्भवात् कर्मविशेषीयमासो वाच्यस्तदपेक्षया शुद्धं कर्मानूद्यैव मासविशेष-विधिः । वर्णव्यवस्थावाक्ये च कर्मणीत्यध्याहारेण कर्तृषष्ठ्यङ्गी-कारेण च ब्राह्मणकर्तृककर्मोद्देशेनैव दर्शान्तादिविधिः । उभयत्रापि मासपदं विशेषाविनाभावादेव प्राप्तत्वादनुवाद एव । यद्वा षष्ठ्यन्तै-कपदार्थब्राह्मणसम्बन्धाद्युद्देशेनैव दर्शान्तादिविधिः । किं तद्ब्राह्मण-सम्बन्धीत्याकाङ्क्षायां च विधीयमानविशेषोपस्थापितस्य मासस्यैव तत्त्वावगमात्तत्तद्वर्णविशिष्टमासोद्देशस्यार्थात्सिद्धेर्मासपदं नित्यानुवाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एव; इति चेन्न। उक्तरीत्या मासपदस्योद्देश्यार्थकत्वसम्भवे अनर्थक
नुवादत्वाङ्गीकारानौचित्यात् । वर्णव्यवस्थावचने श्रुतमाससम्बन्ध
जनितषष्ठीसम्भवे ऽश्रुतकर्मसम्बन्धाधीनषष्ठ्यङ्गीकारस्यायुक्तत्व
कर्मणीत्यध्याहारवैयर्थ्याच्च । ब्राह्मणकर्तृककर्ममात्रमुद्दिश्य दर्शान
विधौ एतस्य कर्मव्यवस्थावाक्यस्य च बलाबलासम्भवेन वि
वाहादौ तद्वचनप्राप्तेः सौरादिभिर्विकल्पापत्तेः ।

ननु कर्मवर्णव्यवस्थावचनेषु कर्मानूद्यैव मासविशे
विधिरस्तु, न तु तद्विशिष्टमासमनूद्य, इति चेन्न । यत्र मा
समात्रस्य चैत्रादीनां वाऽङ्गतया ऽन्यथा वा कथञ्चित्प्राप्ति
तत्रैव विधिर्न्याय्यः । अपेक्षितविधित्वात् सामान्यप्राप्तिलाघवाच्च
यथा "पुरा वाचः प्रवदितोर्निर्वपेत्" इत्यादिनिर्वापाङ्गविशेष
विधिरिव पौर्वाह्णिकप्रधानाङ्गनिर्वापे अङ्गानां प्रधानकालत्व
न तत्र प्रातःसामान्यस्य प्राप्तेः । अन्यथा माध्याह्निकप्रधा
नाङ्गनिर्वापे तदप्रवृत्तिदौर्लभ्यं स्यादिति। अत्र च कर्मविशेषे
वर्णविशेषेषु च यथाप्राप्तमासानां गौणमुख्यानेकतद्विशेषोपपत्ति
मा प्रसाङ्क्षीदिति कर्मविशेषव्यवस्थावचनं यथा तदनुवादे
तत्तन्मासनियामकं तत्तन्मासोपबद्धतत्तत्कर्मविशेषविषयमेव, न
सर्वकर्मविषयम्; एवं वर्णविशेषव्यवस्थावचनमपि येष्वाधानोपनय
नादिषु ब्राह्मणादिपुरस्कारेण साक्षाद्, ऋत्वादिघटकतया वा मासो
पदेशः तत्कर्मगतब्राह्मणादिसम्बन्धिमासोद्देशेन तत्तन्मासनिया
मकं तत्तत्कर्मविषयमेवेत्यभिप्रेत्य यत्र कर्मविशेषे इत्युक्तम् । तथा
च भिन्नविषयत्वेनाविरोधान्न विकल्प इति ।

नन्वेवमप्युपनयने समानविषयत्वाद्विरोधो दुर्वारः । तत्र हि
वर्णव्यवस्थावाक्येन "वसन्ते ब्राह्मणमुपनयीत, शरदि वैश्यम्" इति
ब्राह्मणस्य वसन्तोपदेशात्तद्घटकौ चैत्रवैशाखौ दर्शान्तौ, वैश्यस्य
च शरद्घटकौ पूर्णिमान्तावाश्विनकार्त्तिकौ । कर्मव्यवस्थावाक्येन हि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवेति । वृष्ट्याद्यर्थसौभरे (१)हीषादिनिधननियमवद्धि-धिलाघवात् ।

विवाहादावित्यादिपदार्थतया सौरौ । मैवम् "सौरो मासो विवाहादौ"इत्यस्योपनयनांशे वर्णव्यवस्थावचनसंवादेन क्षत्रियमात्रपरत्वात् । वस्तुतस्तु वर्णव्यवस्थावचनमेव तत्र कर्मव्यवस्थावचनाद्बलीयः । विशेषरूपत्वात् ।

अत्र कर्मव्यवस्थावचनं कर्मांशे विशेषरूपमपि वर्णांशे सामान्यरूपं, वर्णव्यवस्थावचनं तु वर्णांशे विशेषरूपमपि कर्मांशे सामान्यरूपमित्याशङ्क्य तत्परिहारार्थं दृष्टान्तमाह* हीषिति । "हीषिति वृष्टिकामाय निधनं कुर्यात्"इत्यादौ हीषादेर्वृष्टिकामतादर्थ्यसम्बन्धघटनाय सौभरमालोच्यम् । अन्यथा वृष्टिकामाय हीष्निधनविधाने निधनस्यापि विधेयत्वापत्त्या-सर्वसामविषयकतापत्त्या च गौरवात् । एवमुद्देश्यस्य मासस्य षष्ठ्यर्थब्राह्मणादिसम्बन्धघटनार्थमुभयसम्बन्धविहितकर्मविशेष आलोच्यः । अन्यथा ब्राह्मणादेर्दर्शान्तादिमासविधाने मासस्यापि विधेयतापत्त्या सर्वकर्मविषयकतापत्त्या च गौरवात् ।

एवं च यथा सौभरमालोच्य हीषित्यादिना वृष्ट्यर्थसौभरसम्बन्धिनिधनमुद्दिश्य हीष्मात्रं विधीयते । एवमेव वर्णव्यवस्थावचनेन कर्मविशेषमालोच्य ब्राह्मणादेस्तत्तत्कर्माणि विहितं मासमुद्दिश्य दर्शान्तत्वादि विधीयते इति वाच्यम् । कर्मव्यवस्थावचने तु न वर्णविशेषालोचनमावश्यकम् । तदनालोचनेऽपि विवाहादौ कर्मणि यो मासः स सौरादिरिति समन्वयसम्भवात् । तथा च वर्ण-

---

(१) वृष्ट्याद्यर्थमित्यत्रादिशब्देन वृष्ट्यर्थमन्नाद्यर्थं स्वर्गार्थं च सौभरे सौभराख्यसाम्नां क्रियमाणायां स्तुतौ हीषादि होष् उर्क् ऊ एषां निधननियमवत् निधनं साम्नोऽन्तिमभागस्तस्य नियमो यथा वृष्ट्यर्थं हीष् निधनम्, अन्नाद्यर्थमूर्क् स्वर्गार्थम् ऊ इति तद्विधिलाघवात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रैवर्णिकानां सर्वकर्मसु मासविशेषविधेः सा नादीनां शूद्रानुलोमादिपरत्वापत्तेश्चेति गुरुचरणाः ज्योतिर्गर्गः-

सौरो मासो विवाहादौ, यागादौ सावनः स्मृतः।
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते ॥

ऋष्यशृङ्गः-

व्यवस्थावचनेन वर्णांश इव कर्मांशेऽपि विशेषरूपतया स्वविषे वर्णांशे सामान्यरूपस्य कर्मव्यवस्थावचनस्य बाधादुपनयनादि वर्णव्यवस्थैवाऽऽश्रयणीया । न च विवाहादावित्यादिपदेनोपन यनं ग्राह्यं श्रीकरेणोक्तमिति वाच्यम् । उपनयने सौरमासविष यकानां मूर्द्धावसिक्तादिविषयकत्वस्य तेनोक्तत्वादित्याखण्डल र्थः । नन्वेतादृशायासमपेक्ष्य वर्णव्यवस्थावचनस्य कर्मव्य स्थावचनेन बाधात्तदविषयस्नानादिविषयत्वमस्तु इति चेत् कर्मव्यवस्थावचनस्य वर्णव्यवस्थावचनेन बाधात्तदविषयमूर्द्ध वसिक्तादिविषयत्वं स्यादिति ।

वर्णव्यवस्थावचने कर्मविशेषानालोचने बाधकान्तरमाह त्रैवर्णिकानामिति । विवाहादाविति । ननु श्रीकरादिभि स्तावद्विवाहादावित्यादिपदेनोपनयन-चूडा-व्रत-नियम-प्रतिष्ठा गृहकरण-क्षौर-यात्रा-महाषष्ठी-महासप्तमी-विजयद्वादशी-दशा रा-युगाद्यादीनां ग्रह इत्यभिहितम् । तत्र मासान्तरस्य प्रापकाभा का गतिः ? । तथा हि विवाहोपनयनादौ उदगयनविधिः सौरस्य शुक्लपक्षतिथिविधिस्तु चान्द्रस्य, तत्रैव "गर्भाष्टमे ऽष्टमे वाऽब्दे" तृतीय वर्षे चौलं, गोदानं षोडशे वर्षे "अष्टवर्षा भवेद्गौरी" इत्यादौ गर्भग्र णसम्बन्धिनमहोरात्रं तिथिं वाऽऽरभ्य वर्षमासादिगणनेन सावन स्य, तिथिबद्धचान्द्रस्य वा, तथा यज्ञेषु "या वैशाखस्यामावास्य तस्यामादधीत" इति चान्द्रस्य, "विवाहव्रतयज्ञेषु सौरं मानम्" इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सौरस्य च, पितृकृत्येषु "कन्यागते सवितरि" इति "अनेन विधिना श्राद्धं त्रिः पैत्रमिह निर्वपेत् । कन्याकुम्भवृषस्थेऽर्के" इति सौरस्य । एवमन्यत्राप्यूह्यम् । एवं च कथं वर्णकर्मव्यवस्थावचनैव्यवस्थाप्यम् ? । सत्यम् । वर्णव्यवस्थावचनस्य वर्णकर्मोभयांशे विशेषरूपतयाऽतिबलीयस्त्वात्तद्विषये आधानोपनयनादौ मासो ब्राह्मणादिभिर्दर्शान्तादिरेवोपादेय इत्युक्तम् ।

ननु यज्ञादौ सावन इत्युक्तेराधाने सावनोऽस्तु । मैवम् । तस्य स्वतो यज्ञभिन्नत्वात् । सद्यो निरूप्याणि पवमानहवींषीति यज्ञसंवलितत्वेऽपि न सः । वसन्ताद्यृतुद्वारकस्य माससम्बन्धस्य सत्त्वेऽपि साक्षात्तदसम्बन्धात् । ऋतूनां सौरचान्द्रान्यतरमात्रत्वेऽप्यसावनत्वात् ।

एवं च वर्णव्यवस्थावचनविषयभिन्नेषु तेषु तेषु कर्मव्यवस्थावचनविषयेषु सौरादिरिति स्थितम् । तत्रापि विवाहादाविति विवाहपदं संस्कारत्वसाधर्म्याच्चौलोपनयनादिग्राहकम् । तत्र विशेषनामभिर्विहिता निषिद्धाश्च मासाः सौराः । ते च यथा तत्र विवाहाधिकारे नारदः—

माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः ।
मध्यमः कार्त्तिको मार्गशीर्षो वै निन्दिताः परे ॥

इत्यादि । तत्र च तिथिपक्षविशेषविधिः सम्भवत्येव । आकाङ्क्षावशात् । एवम्—

"एकोदरभ्रातृविवाहकृत्यात् स्वसुर्न पाणिग्रहणं विधेयम् ।
षण्मासमध्ये मुनयः समूचुः" ।
"एकमातृजयोरेकवत्सरे पुरुषस्त्रियोः ।
भ्रात्रोर्युगे, युगे स्वस्रोः, भ्रातृस्वसृयुगे तथा ॥
विवाहो ऽब्ददलादर्वाङ् नैकस्मिन् मण्डपे गृहे" ।
"कुले ऋतुत्रयादर्वाक्" ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"विवाहश्चैकजातानां षण्मासाभ्यन्तरे यदि" ।
"विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकम्" ।

इत्यादौ सौरा एव मासाः । तेषां विवाहाद्यनङ्गत्वेऽपि विवाहादिसम्बन्धस्याविशिष्टतया विवाहाधिकरणमासस्य सौरत्वेन तदवधिकानां तेषामपि तादृशानामेवोपस्थितेः । यत्तु यस्मिन्सौरे माघादौ यत्पक्षगतायां यस्यां तिथौ विवाहादि जातं, तदवधिकाः सौरा एव फाल्गुनादयस्तत्पक्षगततत्तिथि पर्यन्ताः षडादयो मासा एषु बोध्याः । यज्ञेष्वितिपाठान्तरम् । चूडोपनयनाधिकारे वृद्धगार्ग्यः-

"माघादिपञ्चमासेषु मेखलाबन्धनं मतम् ।
चूडाकरणमप्यत्र"
इत्यादि । नारदः—
दृश्यमाने गुरौ, शुक्रे, शाखेशे चोत्तरायणे ।
शरद्धेमवसन्तेषु व्युत्क्रमात्तु द्विजन्मनाम् ॥
मुख्यं, साधारणं तेषां तपोमासादिपञ्चकम् ।
गर्गः—
ज्येष्ठे मासि विशेषेण सर्वज्येष्ठस्य चैव हि ।
उपनीतस्य पुत्रस्य जडत्वं मृत्युरेव वा ॥

व्यासः-"या चैत्रवैशाखसिता तृतीया"इत्यादि । व्रतानि निर्णयाश्च संक्रान्त्यादिसामान्यविशेषप्रयुक्ता एव । विवाहव्रतयज्ञेष्विति व्रतशब्देऽप्येते एव । मूर्तिप्रतिष्ठाधिकारे मात्स्ये-"चैत्रे वा फाल्गुने वाऽपि"इत्यादि । जलाशयोत्सर्गाधिकारे भविष्ये-"तस्मिन् सलिलसम्पूर्णे कार्त्तिके च"इत्यादि । गृहारम्भाधिकारे-"वैशाखे फाल्गुने पौषे" इत्यादि । क्षौराधिकारे-

न भाद्रमासे न च चैत्रमासे क्षौरं विवाहो न च कर्णवेधः
इत्यादि । यात्राधिकारे मनुः-
मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते ।

फाल्गुनं वाऽथ चैत्रं वा मासं प्रति यथाबलम् ॥
अन्येष्वपि च कालेषु यदा पश्येद् ध्रुवं जयम् ।
तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः ॥ इति ।
मन्त्रदीक्षाधिकारेऽगस्त्यसंहितायाम्–
मधुमासे भवेद् दुःखं, माधवे धनसञ्चयः ।
मरणं भवति ज्येष्ठे, आषाढे बन्धुनाशनम् ॥
समृद्धिः श्रावणे नूनं, भवेद्भाद्रे धनक्षयः ।
प्रजानामाश्विने मासि सर्वतः शुभमेव हि ॥
ज्ञानं स्यात्कार्त्तिके मासि, मार्गशीर्षे भवत्यरिः ।
पौषे ज्ञानक्षयो, माघे भवेन्मेधाविवर्द्धनम् ।
फाल्गुने ऽपि च वृद्धिः स्यान्मलमासं विवर्ज्जयेत् ॥ इति ।

महासप्तम्यादीनां योगानां तत्तद्राशिस्थसूर्यं पुरस्कृत्यैवाभिधानात्, महाषष्ठीदशहरायुगादीनां च

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।
उपाकर्ममहाषष्ठ्योर्ह्येतदिष्टं वृषादितः ॥

इति तत्तन्मासेऽधिके सति तत्रैव कर्त्तव्यत्ववचनेन तदुत्पत्तिवाक्यगतज्येष्ठवैशाखादिशब्दानां सौरपरत्वावगमात्तत्तन्मासाः सौरा एव ।

*विवाहव्रतयज्ञेष्विति । यज्ञो निरूढपशुबन्धादिः । तत्र "पशुःपत्ययनं तथा" इत्ययनघटकऋतुप्रविष्टमासः सौर एव । विवाहोत्सवयज्ञेष्विति पाठान्तरम् । एवम्–"उदगयन आपूर्यमाणपक्षे पुण्याह" इत्यादिवचनादुत्सर्गतो दैवकर्मणि सौर एव मासः । एवमन्येऽपि तत्तत्कर्मसु तत्तन्मासविशेषनामभिस्तत्तद्विधयो बोध्याः । एतच्च श्रीकराद्युक्तादिपदग्राह्यम् । यज्ञादावित्यादिपदेन लौकिकानां शास्त्रीयाणां च सावनं विना कर्त्तुमशक्यानामहोरात्रसाध्यानां ग्रहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टं तथाऽऽब्दिके*॥
स्मृत्यन्तरे-

तत्र लौकिकानि भृतिवृद्धिग्रहणादीनि । मासिकी भृतिर्वृद्धिर्वा
यिका । कायनिर्वाहार्थं दिनविभागेन गृह्यमाणत्वात् । तदुक्तं-

कायाविरोधिनी शश्वत् पणपादादिकायिका। इति ।

कायनिर्वाहश्चाहोरात्रकृत्यं, न तु तिथिकृत्यम् । शा
याणि च श्रीकरादिभिरुक्तानि । यथा दान-होम-गर्भाधान-
मन्तोन्नयन-जातकर्म-ऋण-क्रयविक्रयव्यहारादीनि । तत्र हो
मासाग्निहोत्रहोमादिः । दानमपि तादृशमेव किञ्चिद् ग्रा
व्यहादिसाध्यानि महादानव्याधिप्रतिमादानादीनि च, स
न्तजननादौ विहितानि सप्ताहब्राह्मणभोजनादीनि च । ग
धाने च रजोदर्शनदिवसात् षोडशदिवसात्मक ऋतुः
वन एव । सावनस्य तत्प्रथमदिनस्य द्वेधा त्रेधा विभा
दिना व्यवस्थादर्शनात् । सीमन्तोन्नयनपरिगणनं तु अशुद्धमे
योषिद्व्यवहारानुरोधेन तत्र तिथिबद्धचान्द्रस्यैवाश्रयणात् । ज
तकर्म तु कालातिपन्नम् । अन्यथा तस्य निमित्तानन्तरकालत्वे
नियतकालत्वात्सावननियमविषयेषु गणनानुपपत्तेः । ऋणे तु
रेण विकल्पः । "ऋणादौ सौरसावनौ"इत्युक्तेः । क्रयविक्रयौ
होरात्रसाध्यौ । आदिपदाद्द्वादशाहादिसाध्यानि कृच्छ्रातिकृच्छ्र
कादीनि, "यथा कथञ्चित्पिण्डानां तिस्रोऽशीतीः समाहितः ।
सेनाश्नन्"इत्यादिविहितचान्द्रायणं च । "तिथिवृद्ध्या चरेत्पिण्डा
इत्याद्युक्तचान्द्रे तु शुक्लादिः, कृष्णादिर्वा चान्द्र एव, न तु
वनः । एवं दशाहाद्याशौचमासाशौचादीनि पञ्चाहिकचातुर्मा
दीनि ऐकादशाहिकानि नामकरणैकोद्दिष्टानि । एकोद्दिष्टे
विधानं तु कन्यासंक्रान्त्यादिनिमित्तकतत्परम् ।

*आब्दिके इति । आब्दिकम्—अब्दसापेक्षम् । चौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पनयनविवाहव्रतगोदानादौ गर्भधारणं जन्म वाऽऽरभ्य वर्षगणनम् । यच्चैत्रादिमासगतयत्पक्षगतायां यत्तिथौ गर्भधारणं जन्म वा तां तिथिमारभ्य वैशाखादिमासगततत्पक्षगततत्तिथिपर्यन्तैकद्व्यादिमासगणनया द्वादशमासात्मकमेकं वर्षम् । एवं द्वितीयादीत्येवं रूपम् । तत्र तिथिबद्ध एव चान्द्र उपयुज्यते । एवमनन्तादिव्रतेषु, द्वादशाब्दादिव्रतचर्यासु च । "ब्रह्महा द्वादशाब्दानि"। "पिण्याकं वा कणान्वाऽपि भक्षयेत्त्रिसमा निशि"इत्यादेः, "गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति"इत्यादेश्च आवृत्तिं विना सिद्धेः । प्रायश्चित्तक्रिया तथा सावननैवेत्यादिकं तु आवृत्त्या क्रियमाणपाजापत्यादिपरमिति न तद्विरोधः । एवं वर्षवृद्धावपि द्वितीयादिवर्षादिभूतायां द्वितीयादितन्मासतत्पक्षीयतत्तिथौ स एव,

सर्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः ।
गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥
स्वनक्षत्रं च पितरौ तथा देवः प्रजापतिः ।
प्रतिसंवत्सरश्चैवं कर्त्तव्यश्च महोत्सवः ॥

इति ब्राह्मे जन्मदिनोत्सवपर्यायतदभिधानात्, न तु सौरः । तदुपगमे कदाचित्तत्तिथेरप्राप्त्या तल्लोपप्रसङ्गेन प्रतिसांवत्सरिकत्वव्याघातापत्तेः । पुंसवनादिगर्भसंस्कारेषु निष्क्रमणान्नप्राशनादिषु च यस्तृतीयादिमासः सोऽपि गर्भग्रहणजन्मतिथिबद्धचान्द्र एव । एवमुपनिषदादावुक्ताः प्रथममासमारभ्य गर्भावस्थाः, दन्तजन्म सप्तमे मासीत्याद्याश्च, तत्र तिथिबद्धचान्द्र एव । प्रतिमासमायग्रहणादवस्थितयोर्भृतिवृद्ध्योरपि षष्ट्युत्तरशतत्रयतिथ्युत्तरं गृह्यमाणतया तथाविधवर्षघटका मासास्त एव । पितृकार्ये चेति असम्भवाच्चान्द्राणामेव पैत्राणां सावनप्रवेशः ऐकादशाहिकादीनां न त्वतथाभूतानां त्रैपक्षिकादीनामिति सूचनाय । 'अनेन विधिना श्राद्धम्' इति तु स्वविषये एतदपवादः । तत्प्रयोजनं च वर्षमध्ये तिसृष्वेवामावास्यासु श्रा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धपक्षे सौरमासस्थानामेव तासां ग्रहणम् । कन्यादावधिमासपक्षे तु तत्स्थानामेव, न तूत्कर्ष इति । कन्यागते सवितरीति च न सौरमासविधायकं, किं तु तत्प्राशस्त्यबोधकमिति तत् न सौरनियामकम् । *व्रतेति । व्रतपदं च न हरिशयनाद्युत्सवपरम् । तस्य तिथिबद्धचान्द्रकर्तव्यत्वात् । एवं च 'तत्र—

मिथुनस्थे सहस्रांशौ स्थापयेन्मधुसूदनम् ।
तुलाराशिगते तत्र पुनरुत्थापयेत्तु तम् ॥
कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाऽऽश्विने ।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनम् ॥

इति वचनात्सौर एव मासो युक्तो, न तु चान्द्रः । हरिशयनप्रबोधयोश्चान्द्रमासकर्तव्यत्वे चातुर्मास्यव्रते सौरबाधापत्तेः, तस्य हरिशयनोत्थानोपक्रमावसानत्वात्' इति प्रत्युक्तम् । शक्रध्वजोत्थापनादेश्चातुर्मास्यव्रतस्य च चान्द्रकर्तव्यत्वात् । नापि मासोपवासादिपरं तत् । तस्याश्विनशुक्लैकादशीमारभ्य कार्त्तिकशुक्लैकादशीपर्यन्ततिथिबद्धचान्द्रकर्त्तव्यत्वात् । नापि मासिकपयोव्रतादिपरम् । तस्य तिथिबद्धचान्द्रकर्त्तव्यत्वात् । 'तिथिवृद्ध्या चरेत्पिण्डान्' इति मुख्यचान्द्रं तु अमान्तेन पूर्णिमान्तेन वा मासेन कार्यम् । कार्त्तिकवैशाखस्नानादिनियमाश्च पौर्णमास्यन्त-तिथिबद्ध-चान्द्रान्यतरं, सौरं वा मासमाश्रित्य कार्याः । सर्वत्र वचनसत्त्वात् । तथाहि-आश्विनशुक्लैकादशीपौर्णमासीषु तदुपक्रमाभिधानात् ।

कार्त्तिकस्य तु यत्स्नानं माघे मासि विशेषतः ।
कृच्छ्रादिनियमानां च चान्द्रमानं प्रमाणकम् ॥

इति पितामहोक्तेश्च । 'तुलामकरमेषेषु' इति वचनात् । उपाकर्मणि सामगानां सौरः । 'उपाकर्ममहाषष्ठ्योः' इति वचनात् । अन्येषां चान्द्रः । 'श्रावण्यां प्रौष्ठपद्यां वा' इति तिथिकर्त्तव्यत्वात् । एवं च यत्र न विशेषतो वचनं, नियामकं वा; तत्र विकल्पः । 'तत्र एताः संहिता नानन्तेवासिने प्रब्रूयान्नासंवत्सरवासिने' इतिवत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*एकोद्दिष्टविवाहादौ ऋणादौ सौरसावनौ ।

ज्योतिर्गर्गः—

आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा ।

'अपर्याप्तावृतुं प्रति' इत्यत्र तिथिबद्धचान्द्रमासद्वयात्मा गौण एव ऋतुः । एवम्—

एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः ।
न्यूनाः संवत्सरश्चैव, स्यातां षाण्मासिकेतरे ॥

इत्यत्रापि तिथिबद्धचान्द्र एव । यद्वा—

षाण्मासिकाब्दिके श्राद्धे स्यातां पूर्वेद्युरेव ते ।
मासिकानि स्वकीये तु दिवसे द्वादशेऽपि वा ॥

इत्येतदेकवाक्यतया गौणचान्द्रः । मुख्यचान्द्रग्रहणे दर्शे त्रयोदश्यां वा ऊनषाण्मासिकद्वयापत्तेः । मासिकेषु तु मुख्यचान्द्रः । पितृकार्ये चेत्युक्तेः । मृताहकर्त्तव्यत्वस्य च

मृतेऽहनि कर्त्तव्यं प्रतिमासं तु वत्सरम् ।

इति वचनसिद्धत्वात् । एवं च 'मुख्यं श्राद्धं मासि मासि' इत्यस्य वत्सरं यावत् प्रतिशुक्लप्रतिपदादिदर्शान्तं मासं मृतितिथौ श्राद्धमित्यर्थः ।

यस्तु 'प्रतिसवत्सरं चैव' इत्यादौ 'न्यूनाः संवत्सरश्चैव' इत्यादौ च संवत्सरः स मृतितिथिमारभ्य यावत्तादृशमृतितिथिं षष्ट्यधिकत्रिशततिथिसमुदायरूपो गौण एवेति दिक् ।

अष्टकेति हेमन्तशिशिरमासां सौरत्वात्तव्युदासाय । अन्यथा तदीयत्रिंशद्भागरूपाष्टमीत्वस्य कदाचित् नवम्यामपि सत्त्वेन तत्राप्यष्टकाकरणापत्तेः ।

*एकोद्दिष्टेति । पार्वणस्थाने एकोद्दिष्टमनुष्ठातॄणां मलमासमृतविषयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सावनेनैव कर्तव्या शत्रूणां चाप्युपासना* ॥

विष्णुधर्मे–

"*नक्षत्रसत्राण्ययनानि चेन्दो-
र्मासेन कुर्याद्भगणात्मकेन" । इति ।

ब्राह्मे–

तिथिकृत्ये च कृष्णादिं, व्रते *शुक्लादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत् ।
अथ मलमासः । *तत्रै*कमात्रसंक्रान्तिरहित-
एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ।
तत्कार्यं पूर्वकाले च कालाधिक्ये च धर्मतः ॥

इति गर्भस्तिवचनात् । *उपासना–समयप्रतीक्षा । सत्रे "सत्राण्युपास्यान्यथ सावनेन" इति निर्द्धारितः सावनस्तदपवादमाह–*नक्षत्रेति । *व्रते इति । व्रतकाण्डोक्तेषु व्रतेषु प्राप्त शुक्लादेरेव ग्रह इत्यर्थः ।

॥ इति मासग्रन्थटिप्पणी ॥

अथ मलमासस्य कथं मासत्वम् ? । न च मीनस्थाद्यादित्यावच्छिन्नकालत्वं तत्, तच्च सौर एवेति स एव मुख्य इति वाच्यम् । तस्य चान्द्रत्वबाधापत्तेः । मैवम् । मीनस्थाद्यादित्यारब्ध शुक्लप्रतिपत्कत्वादिकं चैत्रादित्वम् ।

मीनादिस्थो रविर्येषामारम्भप्रथमक्षणे ॥
भवेत्, तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः ॥

इत्युक्तेः । एतच्च दर्शान्तचैत्रादावेव, न तु पूर्णिमान्ते । कृष्णप्रतिपत्क्षणस्य मीनस्थादित्यवत्त्वानियमात् । द्वादशेति च मलस्य शुद्धशेषत्वमालम्ब्य । *तत्रेति । मासेष्वित्यर्थः । मीनस्थाद्यादित्यारब्ध शुक्लप्रतिपत्कससंक्रान्तात्रिंशत्तिथिकत्वं शुद्धत्वम् । तादृशासंक्रान्तात्रिंशत्तिथिकत्वं च मलत्वम् । असंक्रान्तत्वं चैकसंक्रान्तिशून्यत्वमित्याशयेनाह–एकेति । न च यत्रामायां तुलासंक्रान्तिः ततो मासमति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रम्य प्रतिपदि वृश्चिकसंक्रान्तिः, ततो ऽव्यवहितामायां धनुःसंक्रान्तिः । तत्रासंक्रान्तः कार्त्तिकः, तुलास्थरव्यारब्धशुक्लप्रतिपत्कत्वात् । तदुत्तरक्षयमासो मार्गशीर्षः पौषात्पूर्वः, धनुस्थरव्यारब्धशुक्लप्रतिपत्को हि पौषः, तत्रा(१)व्याप्तिः । वृश्चिकस्थरव्यारब्धत्वाभावादिति वाच्यम् । तत्र वृश्चिकोपधानाभावेऽपि तत्स्वरूपयोग्यताघटितलक्षणसम्भवात् ।

यां तिथिं समनुप्राप्य तुलां गच्छति भास्करः ।
तथैव सर्वसंक्रान्तिर्यावन्मेषं न गच्छति ॥

इति वचनादसंक्रान्ताऽमैव स्वभावतो वृश्चिकसंक्रान्तिस्थानं, गतिमान्द्यात्तु तस्याः प्रतिपदि भवनम् ।

यदा वक्रातिचाराभ्यां सूर्यसंक्रमणं भवेत् ।
क्षत्रियाणामसृग्धारां तदा पिबति मेदिनी ॥

इत्युक्तेः । वक्रातिचाराविह शीघ्रमन्दगती ।

ननु यत्र दर्शे कन्यासंक्रान्तिः, ततो दर्शमतिक्रम्य प्रतिपदि तुलासंक्रान्त्या कन्यायामसंक्रान्तः । ततो वृश्चिकधनुषी शुक्लप्रतिपदोरेव । तदनन्तरदर्शे एव मकरसंक्रान्तिरिति धनुषि क्षयः । ततः कुम्भमीनौ दर्शयोरेव । ततो ऽनन्तरदर्शमतीत्य मेषसंक्रान्तिरिति मीने पुनरसंक्रान्तः । तत्र क्षयस्य वृश्चिकस्थरव्यारब्धत्वान्मार्गशीर्षत्वं स्यात् । न चेष्टापत्तिः । पौषमासविलोपापत्तेः । यतस्तदुत्तरो न पौषः, धनुस्थरव्यनारब्धत्वात् । न च धनुर्योग्यकालस्थरव्यारब्धत्वं तत्र पौषत्वमिति वाच्यम् । प्रतिपदस्तुलाकालत्वेन तस्या एव स्वाभाविकधनुःस्थानत्वादमायाश्चातथात्वात् । किं तु मकरस्थरव्युपक्रान्तत्वान्माघः । तदुत्तरश्च न माघः, मकरस्थरव्यनारब्धत्वात्, किन्तु फाल्गुनः । कुम्भस्थरव्युपक्रान्तत्वात् । तदुत्तरो न फाल्गुनः, कुम्भस्थरव्यनारब्धत्वात्,

(१) तत्र-मार्गशीर्षे इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किन्तु चैत्रः । मीनस्थरव्युपक्रान्तत्वात् । प्रतिपज्जातमेषसंक्रान्तिस्तु द्वितीयश्चैत्रः, मीनस्थरविसत्त्वात् । तदुत्तरे तु वैशाखादय वेति । सत्यम् । मकरकुम्भमीनानां दर्शजातानामपि स्वाभाविकतदुत्तरप्रतिपत्स्थानत्वमेव । 'यां तिथिं समनुप्राप्य'इत्युक्तेः । एवं च तत्र मकरादिसंक्रान्तिमदमाया धनुरादियोग्यकालत्वादेव धनुरादिस्थरव्यारब्धत्वघटितं पौषत्वादिकं क्रमेणासंक्रान्तावधिकमासत्रयस्योपेयम् । धनुरादिस्वरूपयोग्यकालोपरस्वीयप्रथमक्षणत्वमारब्धत्वार्थ इति न तत्राव्याप्तिः ।

ननु तथापि यत्र दर्शे कन्यासंक्रान्तिः, ततो ऽसंक्रान्तः, तत्र प्रतिपदि तुलासंक्रान्तिः, तदनन्तरदर्श एव वृश्चिकसंक्रान्त्या कार्त्तिकक्षयः । ततो ऽमास्वेव मेषान्ताः संक्रान्तयः, ततो दर्शमतीत्य प्रतिपदि वृषसंक्रान्त्या वैशाखोऽसंक्रान्तः । तत्र क्षयस्य कथं कार्त्तिकत्वम् । तुलापूर्वतनामायास्तुलायोग्यत्वासम्भवात् । 'यां तिथिं समनुप्राप्य'इतिवचनविरोधात् । तेन हि तुलासंक्रान्तिमात्तिथिसजातीतिथेरेव वृश्चिकादिमत्त्वं बोध्यते, न तु तुलाप्राक्तनामायास्तुलादियोग्यत्वम् । मैवम् । एकवर्षे जातयोर्द्वयोरसंक्रान्तयोरन्यतरस्त्रिंशन्मात्रतिथिकत्वात्प्राकृतत्वे वाच्ये-

एकस्मिन्नपि वर्षे चेद् द्वौ मासावधिमासकौ ।
पूर्वो मासः प्राकृतः स्यादुत्तरस्त्वधिमासकः ॥

इत्यादिवचनात् तुलापूर्वतनामावास्यायास्तुलायोग्यत्वमवसीयते । अन्यथा प्राकृतत्ववैयर्थ्यात् । एकशक्तिमत्त्वेन चामावास्यत्योस्तद्योग्यता । ततश्च तदुत्तरस्य कार्तिकत्वम् । आश्विनस्य योग्यतया तुलासम्बन्धाच्छुद्धत्वं च । एवं च विद्यमानस्यैव कार्त्तिकादेः क्षयः नाममात्रतया । सङ्कल्पे क्षयमासस्य तन्मासत्वेनैवोल्लेख इति नवीनानुसारी पन्थाः ।

माधवानुसारिणस्तु मेषादिस्थरविसमाप्यत्वं तत्तन्मासत्वम् "मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सितादिश्चान्द्रो मासो मलमासः।एकमात्रसंक्रान्तिराहित्यमसंक्रान्तत्वेन संक्रान्तिद्वयसत्त्वेन च भवतीति मलमासो द्वेधा । अधिमासः, क्षयमासश्चेति । तदुक्तं काठकगृह्ये—

*यस्मिन्मासे न संक्रान्तिः, संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः*॥ इति

चैत्राद्यः स ज्ञेयः पूर्तिद्वित्वे ऽधिमासोऽन्त्यः" ॥ इतिवचनात् । यत्र पूर्वोक्तरीत्या धनुषि क्षयः, तत्र धनुस्थरविमदन्त्यक्षणकामान्तात्रिंशत्तिथिकत्वं मार्गशीर्षत्वं लुप्यते । क्षयसंज्ञाया लोपनिबन्धनत्वात् । किन्तु तत्र मकरस्थरविसमाप्यत्वं पौषत्वमेवेति संकल्पे पौष एवोल्लेख्य इति वदन्ति । तदसत् । प्रागुक्तकार्त्तिकक्षये कार्त्तिकत्वलोपस्य दुरुपपादत्वात्, वृश्चिकस्थरविसमाप्यत्वसत्त्वात् । अथ—तत्र तुलासंक्रान्तिकालसजातीयत्वयोग्यतया प्रतिपद एव वृश्चिकसंक्रान्तिकालत्वात् तत्पूर्वदर्शस्य तुलासम्बन्धयोग्यता वाच्या । तथा च तुलास्थरविसमाप्यत्वरूपाश्विनत्वसत्त्वात् कार्त्तिकत्वलोपः । सङ्कल्पे चाश्विन एवोल्लेख्य इति चेत्—तर्हि तदुत्तरस्य धनुस्थरविसमाप्यत्वरूपमार्गशीर्षत्वसम्भवात् क्षीणकार्त्तिकत्वविशिष्टमार्गशीर्षत्वानुपपत्तिरिति कृतमतिविस्तरेण ।

*यस्मिन्निति । न चात्र क्षयस्य तत्पूर्वभाविनश्च संसर्पस्यैकसंक्रान्तान्यत्वेऽपि अनधिककालत्वात्कथं मलत्वम् ? ।

मलं वदन्ति कालस्य मासं कालविदोऽधिकम् ।

इतिवचनादधिकस्यैव मलत्वात्; इतिवाच्यम् । तयोस्तादृशमलत्वाभावेऽपि

यस्मिन्मासे न संक्रान्तिः, संक्रान्तिद्वयमेव वा ।
संसर्पाहस्पती मासावधिमासश्च निन्दिताः ॥

इतिवर्ज्यत्वरूपमलत्वोक्तेः । *त्रयोदश इति । अधिक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्यव्रतोऽपि-

राशिद्वयं यत्र मासे संक्रमेत दिवाकरः ।
नाधिमासो भवेदेष मलमासस्तु केवलः* ॥ इति।

अधिकमासस्य कालनियममाह वसिष्ठः-

द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा ।
घटिकानां चतुष्केण पतत्यधिकमासकः ॥ इति।

एतच्च *सावनादिमानेन संभवार्थं, न तु नियमार्थम् । *अन्यथा षोडशदिनाधिकद्वात्रिंशन्मासानन्तरं कृष्णपक्षनियमेन शुक्लादित्वभङ्गापत्तेः । *तेन न्यूनाधिककाले मलमासपातेऽपि न दोषः । अत एवोक्तं

मासो, न तु द्विसंक्रान्तः । तस्य तत्त्वासम्भवात् । *केवल इति चतुर्दशत्ववारणार्थम् । *सावनादीति । आदिना सौरग्रहः तदुक्तं विष्णुधर्मे-

सौरेणाब्दस्तु मानेन यदा भवति भार्गव ।
सावने तु तदा माने दिनषट्कं प्रवर्द्धते ॥
ऊनरात्राश्च ते राम प्रोक्ताः संवत्सरेण षट् ।
सौरसंवत्सरस्यान्ते मानेन शशिजेन तु ॥
एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ।
समाद्वये साष्टमासे तस्मान्मासोऽतिरिच्यते ॥ इति ।

अत्र चान्द्रसमाद्वयात्सौरसमाद्वयं द्वाविंशतिदिनैराधिकं, चान्द्रमासाष्टकाच्च सौरमासाष्टकं सार्द्धसप्तदिनैरिति मिलित्वा त्रिनार्द्धन्यूनो मासः स्यादित्याशङ्कायां दिनार्द्धपूरणाय त्रिनैः षोडशभिर्घटिकानां चतुष्केणेत्युक्तं, तच्च सावनमात्रान्वयिसूचनाय सावनपदोपादानम् । चान्द्रमासं निरस्यति-*अन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माधवीये-'मासे त्रिंशत्तमे* भवेत्' इति । क्षयस्यापि ज्योतिःशास्त्रे-

असंक्रान्तिमासोऽधिमासः *स्फुटं स्यात्
द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् ।

थेति । नियमाङ्गीकारे बाधकमाह-*तेनेति ॥ *त्रिंशत्तमे इति* । तदुक्तं विष्णुधर्मोत्तरे—

दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः ।
करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः ॥
एवमर्द्धतृतीयानामब्दानामधिमासकम् ॥
ग्रीष्मे जनयतः पूर्वं पश्चाब्दान्ते तु पश्चिमम् ॥ इति ।

दिवसाहःशब्दौ चान्द्रतिथिपरौ । मलमासस्य चान्द्रत्वात्तत्रापेक्षणात् । सूर्येण चन्द्रेण च प्रतितिथि तिथिषष्टिभागस्य दण्डस्य च्छेदेनार्कषेणन ऋतौ मासद्वये प्रत्येकं ताभ्यामेकैकतिथ्याकर्षणात् तिथिद्वयलाभक्रमेणार्द्धतृतीये वर्षे त्रिंशत्तिथयो लभ्यन्ते । एवं पञ्चाब्दमध्ये द्विः सम्भवेऽपि पूर्वो ग्रीष्मे एव वैशाखादिमासषट्के एव । "यां तिथिं समनुप्राप्य" इतिवचनात् । तुलादौ तिथेरवृद्ध्याऽसंक्रान्तपाताभावादिति । अयं च माधवेन शकवर्षाणामष्टपञ्चाशद्युतशतद्वयाधिके सहस्रे गते योऽनन्तरभावीश्वरसंवत्सरः, तत्र श्रावणमासोऽधिकः । ततः पूर्वे भावसंवत्सरे फाल्गुनोऽधिकः । तन्मध्यगौ युवधातृवत्सरावित्युदाहृतः । तत्रैव च तेनैव यथोक्तेश्वरसंवत्सरोत्तराचित्रभानुसंवत्सरे वैशाखोऽधिकः । तदुत्तरभाविनि तारणसंवत्सरे भाद्रोऽधिक इत्येकोत्तरात्रिंशत्तमत्वेन दुर्मुखसंवत्सरे श्रावणोऽधिकः । विकारिसंवत्सरे ज्येष्ठोऽधिक इति पञ्चत्रिंशत्तमत्वेन च न्यूनाधिकपात उदाहृतः । *स्फुटं-स्फुटमानेन । *कार्त्तिकादीति । यत्र कन्यायां संसर्पः, ततः क्रमेण तुलावृश्चिकसंक्रान्ती, ततो धनुषि क्षयः । तत्र संसर्पामाया एव तुलायोग्यस्थानत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षयः *कार्तिकादित्रये, नान्यतः* स्यात्
तदा वर्षमध्ये ऽधिमासद्वयं च ॥

एकः क्षयात्पूर्वं, परतश्चैक इत्यधिमासद्वयं व
वतीत्यर्थः ।

अत्र विशेषमाह जाबालिः-

मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत् ।
*प्राकृतस्तत्र पूर्वः स्यादधि*मासस्तथोत्तरः ॥ इति

त्संसर्पपरयोः क्रमेण कार्त्तिकादिकृत्यं बोध्यम् । *नान्यतः-
कतः । क्षयोभयपार्श्वयोरिति यावत् ।

*प्राकृत इति । प्रकृतिः स्वभावः त्रिंशद्दिनरूपस्तद्युक्तः
अनधिकः, शुद्धः, कर्मार्ह इति यावत् । *अधिः-अधिको मासः

नन्वस्तु संसर्पोऽपि षष्टिदिनो मासः । एकराशिस्थरव्यारब्धत्वात्
'षष्ट्या तु दिवसैः" इति वचनाच्च । तत्र च पूर्वार्द्धस्य निन्द्यत्वबाधात्
प्राकृत इत्युक्तम् । ततश्चाश्विने संसर्पे द्वितीयाश्विनोत्तरमेव कार्त्तिक
मासः । तुलास्थरव्यारब्धत्वात् तत्र प्रथमाश्विने यथायथं शु
क्लकृष्णपक्षकर्म कार्यमेव, प्रत्याब्दिकादि च । तस्य शुद्धत्वेन प्रथ
मातिक्रमे कारणाभावात् । द्वितीयाश्विने च न पुनस्तत्करणम्
'सकृत्करणेन कृतः शास्त्रार्थः' इति न्यायादङ्गभूतकालानुरोधे
प्रधानीभूतकर्मावृत्तेरयुक्तत्वात् । काम्यारम्भाश्च द्वितीयाश्विन एव
आद्यस्य तस्य "न कुर्याद्भानुलङ्घिते" इत्यनेन निषेधात् । एवं दी
पावल्यादिकमपि परत्रैव, न पूर्वत्र । आश्विनस्य कथमपि कार्त्ति
कसम्बन्धाभावात् । एवं च संसर्पोऽपि उत्तरमाससंज्ञोऽस्त्विति चेत्
पूर्वोक्तकार्त्तिकरूपक्षयाव्यवधानेन जातस्य संसर्पस्य षष्टिदिना
त्मकत्वासम्भवात् । तस्य षष्टिदिनात्मकत्वोपगमे त्वेकमासत्वे
क्षयस्य कार्त्तिकत्वानुपपत्तेः । द्वितीयाश्विनस्य क्षयत्वे च "क्षय
कार्त्तिकादित्रये" इतिनियमभङ्गापत्तेः । अत्र त्रिंशत्तिथिक्रमसंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्तरे एव* कालाधिक्यं, न पूर्वस्मिन्नित्यर्थः ।

यकालापेक्षिकं पौर्वापर्यं विवक्षितम् ।

कार्त्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ ।
सर्वकर्महरः प्रोक्तः पूर्वस्तत्र मलिम्लुचः ॥

इतिज्योतिःपराशरानुरोधात् । यत्र क्षयमासोभयपार्श्वयोराश्विनादिषट्के एवासंक्रान्तद्वयं तत्र पूर्वो ऽसंक्रान्तः त्रिंशत्तिथिक्रमसञ्चयकालादुपरि चेज्जायते तदा षष्टिदिनात्मको ऽधिक एव । तादृशकालात् प्राग् जनने तु स त्रिंशद्दिनात्मकः प्राकृत एव । एवमुत्तरोऽपि चेत्तादृशकालादूर्ध्वं पतेत्तदा ऽधिको, न तु ततः प्राक् पतने । तथा च पूर्वस्यैव प्राकृतत्वमुत्तरस्यैवाधिकत्वमिति न नियम इति तदर्थः । यदा तु पूर्वं आश्विनादिषट्के, उत्तरस्तु चैत्रादिषट्के तदा तिथिक्रमसञ्चयकालादूर्ध्वं पतन्नपि पूर्वो नाधिकः ।

चैत्रादर्वाङ् नाधिमासः परतस्त्वधिको भवेत् ।

इत्यपवादात्; इति मतं निराकर्त्तुमाह—*उत्तर एवेति । पूर्वो ऽसंक्रान्तः कार्त्तिकादित्रयान्यतमपातिनः क्षयात्पूर्व एव । तेन व्यवहितो ऽव्यवहितो वाऽऽश्विनादिषट्के नियमितो, न तु तद्व्यवधानेन चैत्रादिषट्के भवितुमर्हः । उत्तरोऽसंक्रान्तस्तु शीघ्रमन्दगतिभ्यां चैत्रात्पूर्वतनषट्के 'यां तिथिं समनुप्राप्य'इति, स्वाभाविकऋजुगत्या चैत्रादिषट्के वा भवतीति क्षयमास एव पूर्वत्वोत्तरत्वयोरवधित्वेन ग्राह्यः, उपस्थितत्वात् । न तु त्रिंशत्तिथिक्रमसंचयकालः । तस्याबुद्धिस्थत्वेन पराम्रष्टुमशक्यत्वात् । एवं च यत्र त्रिंशत्तममासादुत्तरत्वेऽपि नाधिक्यं कल्पयितुमर्हं, त्रिंशत्तमात् प्राग्भवे तु तत्र त्रिंशत्तिथित्वं, प्राकृतत्ववचनात् । प्राकृतत्वोक्त्या च यथास्थिते वर्षे यस्त्रिंशद्दिनात्मकः शुद्ध आयाति, स एवायमिति बोध्यते इति भवति तस्य षष्टिदिनात्मकत्वबाधः । तथा च प्रोक्तकार्त्तिककृत्ये न कस्यापि विमतिरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तु ब्रह्मसिद्धान्ते-

*चैत्रादर्वाङ् नाधिमासः, परतस्त्वधिको भवेत्।

इति। तत्र चैत्रात्पूर्वमसंक्रान्तद्वये पूर्वो नाधिकः, किंतु *पर इत्यर्थः। यच्च ज्योतिःसिद्धान्ते-

*धटकन्यागते सूर्ये *वृश्चिके वाऽथ धन्विनि।
मकरे वाऽथ कुम्भे वा नाधिमासो विधीयते॥ इति

तिथिसञ्चयकालात्पौर्वापर्याभिप्रायेणेदमिति तु न सत्। चैत्रात्पूर्वमसंक्रान्तद्वये पूर्वो नाधिक इत्यनेन विरोधात्। तेन चैत्रात्पूर्वस्य तिथिसञ्चयक्रमकालोत्तरस्याप्युत्तरचैत्रादिषट्कपातेऽनाधिकत्वाभिधानात्। *चैत्रादर्वागिति। मासस्यैवावधित्वे सर्वस्याप्युत्तरस्य तथात्वाच्चैत्रादर्वाङ् नाधिमास इत्यस्यासङ्गतिः। त्रिंशत्तिथिसञ्चयक्रमकालस्यावधित्वे तु आश्विनादिषट्कपातिनोऽप्युत्तरासंक्रान्तस्यैव नियतमाधिक्यम्। प्राथमिकासंक्रान्तस्यापि कदाचित्तथात्वात्। चैत्रादिषट्कपातिनस्तु तस्य नियतं तदित्यर्थ इत्यभिमानात्।

*नाधिक इति कालतःपदगर्भम्। *पर इति। कालतोऽधिक इत्यनुवर्तते। अत्र यद्यपि ऋजुगत्या चैत्रात् परा मेषादिष्वेवाधिकमास इति क्षयरहितसाधिमासवर्षपरत्वं सम्भवति। तदुक्तम्-

मध्ये विषुवतोर्भानुर्वर्द्धयेत्स्वान्यहानि तु।
तैः सम्भूयाधिको मासः पतत्येष त्रयोदशः॥ इति,

तथापि ब्रह्मसिद्धान्तः क्षयमासप्रकरणस्थ इति तथा नोक्तम्।

*धटेति। क्षयोत्तरस्याधिकत्वाद्विरोधः। *वृश्चिके वेति। मीनमपि प्रवेश्य वृश्चिकादिपञ्चके इति(१) विवक्षितम्। यत्रामे कन्यासंक्रान्तिः, ततोऽमोत्तरप्रतिपदि तुलासंक्रान्तिः, तदनन्तरदर्शे एव वृश्चिकसंक्रान्तिः, ततो ऽसंक्रान्तोत्तरप्रतिपदि धनुःसं

---

(१) तेन 'चैत्रादर्वाग्' इत्यनेन न वैषम्यमिति बोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद् वृश्चिकादिचतुष्टये मलमासे सति पूर्वं तुलाकन्यागते सूर्ये क्षयपूर्वभाव्यधिमासस्य कालाधिक्यमात्रनिषेधार्थं, न त्वधिकमासस्य ।

दशानां फाल्गुनादीनां प्रायो माघस्य च क्वचित् ।
*नपुंसकत्वं भवतीत्येष शास्त्रविनिश्चयः ॥

इति हेमाद्रौ विष्णुधर्मविरोधात् । *मलमासेऽष्टकादिनिषेधानुपपत्तेश्च । *'मकरे वाऽथ कुम्भे वा' इति *दृष्टान्तार्थम् । प्राप्त्यभावात् ।

शः, तदभिप्रायेण वृश्चिकपदम् । कन्याग्रहणं चाऽऽश्विनस्य वैशाखादिषट्कपातित्वात्तत्र कालाधिक्यशङ्कावारणार्थम् । वस्तुतस्तु क्षयस्य कार्त्तिकादित्रयनियततया तुलादित्रये क्षयमासे सति कन्यादेर्न कालाधिक्यमित्यर्थः । तथैव मकरे चेत्यादिसंगतेः । *नपुंसकत्वम्–पुंसो मण्डलाधिष्ठातुः सूर्यस्याभावात् । तथा चोक्तम्—

अरुणः सूर्यो भानुस्तपनश्चन्द्रो रविर्गभस्तिश्च ।
अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णू च ॥
एते द्वादश सूर्या माघाद्येषूदयन्ति मासेषु ।
निःसूर्योऽधिकमासो मलिम्लुचाख्यस्ततः पापः ॥ इति ।
मासेषु द्वादशादित्यास्तपन्ते हि यथाक्रमम् ।
नपुंसके ऽधिके मासि मण्डलं तपते रवेः ॥ इति च ।

न च चैत्रादिषट्क एव कालाधिक्यान्नपुंसकत्वं नान्यत्र, "मध्ये विषुवतोः" इति वाक्यादिति वाच्यम् । आश्विनादित्रयस्य माघफाल्गुनयोश्चासंक्रान्तत्वस्य क्षयमासनिबन्धनत्वात् । तुलादौ नाधिमास इत्यर्थं निरासितुमाह–*मलमासे इति । षष्टिदिनात्मकमासपूर्वभागे इत्यर्थः । हेमन्तादेर्मलतया "षष्ट्या तु दिवसैः" इति निषेधोपपत्तिरिति भावः । ननु क्षयस्य तुलादित्रयनैयत्यान्मकरे इत्येव न युज्यते, कैत्र कथा कुम्भे इत्यस्येति । तथा च कथं वृश्चिकादिचतुष्टये मलमासे सतीत्युक्तमित्यत्राह–*मकरे इति । *दृष्टा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षयस्याऽऽगमनकाल उक्तः सिद्धान्तशिरोमणौ-

गतोऽब्ध्यद्रिनन्दैर्मिते शाककाले
तिथीशैर्भविष्यत्यथाङ्गाक्षसूर्यैः ।
गजाग्न्यग्निभूभिस्तथा प्रायशोऽयं
*कुवेदेन्दुवर्षैः क्वचिद् गोकुभिश्च ॥ इति ।

अब्धयः—चत्वारः, अद्रयः—सप्त, नन्दाः—नव एषां प्रातिलोम्येन पाते ९७४ । तैर्मिते वर्षे कश्चित् क्षयमासः पूर्वं जात इत्यर्थः । तिथयः-पञ्चदश, ईशाः-एकादश, १११५। एवंमिते याते कश्चिद्भविष्यतीत्यर्थः । अङ्ग ६, अक्ष ५, सूर्याः १२, एकत्र १२५६ गजाः ८, अद्रयः ७, अग्नयः ३, भूः १, एकत्र १३७८ कुः १, वेदाः ४, इन्दुः १, एकत्र १४१ । गावः ९, कुः १, एकत्र १९ । एतैर्मिते वर्षे याते कश्चिद्भविष्यतीत्यर्थः ॥

अथ *मलमासे कार्याकार्यं निरूप्यते । तत्र जाबालि

न्तार्थम्-व्यतिरेकदृष्टान्तार्थम् । वृश्चिकादिद्वये क्षयमासे सति यद्यपि मकरादेरधिकमासत्वं कालाधिक्यात्, तथा तुलादेर्नास्तीत्यर्थः । एवं च वृश्चिकादिचतुष्टये मलमासे सतीत्येव सम्यक् ।

*कुवेदेन्दुवर्षैरिति । अब्ध्यद्रिनन्देषु (९७४)कुवेदेन्दु (१४१)योजने तिथीशाः(१११५) । तत्र तद्योजने अङ्गाक्षसूर्या (१२५६) । तत्र गोकु(१९) न्यूनतद्(१२२)योजने (१३७८ गजाग्न्यग्निभूमयः । तथा च गोकुभिश्चेति पूर्वोक्ते क्षेपके तावन्मा नाधिकपातेऽपि सम्भवार्थम् । *मलमासे—

"अमावास्याद्वयं यत्र मासि मासि प्रवर्त्तते ।
उत्तरश्चोत्तमो ज्ञेयः पूर्वस्तत्र मलिम्लुचः" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*नित्यनैमित्तिके कुर्याच्छ्राद्धं कुर्यान्मलिम्लुचे ।
तिथिनक्षत्रवारोक्तं, काम्यं नैव कदाचन ॥

अयं च काम्यनिषेध आरम्भसमाप्तिविषयः ।

*असूर्या नाम ये मासा न तेषु मम संमतः ।
व्रतानां चैव यज्ञानामारम्भश्च समापनम् ॥

इति तेनैवोक्तत्वात् । असूर्या अधिकमासा इत्य-

"त(१)मतिक्रम्य तु रविर्यदि गच्छेत्कथं च न ।
आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः" ॥

इत्याद्युक्तेः ।

*नित्येति । मलमासे अनन्यगतीनि नित्यनैमित्तिकानि, आवश्यकानि काम्यानि च आरम्भणीयानि । सावनमानसाध्यानि तु प्रागारब्धानि तत्र समाप्यानि । तत्र तदितरेषामारम्भः, समाप्तिश्च न; किं त्वनुवृत्तिमात्रमित्याखण्डलार्थः ।

सिनीवालीमतिक्रम्य यदा संक्रमते रविः ।
रविणा लङ्घितो मासो ह्यनर्हः सर्वकर्मसु ॥

इत्यादिसामान्यतोनिषेधानां विशेषप्रतिप्रसवैर्बाधात्तदितरकाम्यादिपरत्वमेव ।

*असूर्या इति ।

प्रवृत्तं मलमासात्प्राक् काम्यं कर्मासमापितम् ।
आगते मलमासेऽपि तत्समाप्यमसंशयम् ॥

इति तु सावनमानप्रवृत्तकृच्छ्राहीनसत्रादिपरम् । एतेनैतत्समाप्त्यनुज्ञानात्तद्वर्जनवचनं मोहात्तत्र प्रक्रान्तकाम्यसमाप्तिपरमित्यपास्तम् । अनियतकालानां तत्रानुवृत्त्यैव प्रयोगप्राशुभावाभङ्गे प्रतिप्रसवस्य तत्साधारण्यायोगात् । ननु कारीरीराक्षोघ्नाभिचारमत्यभिचाररोगग्रहदौःस्थ्यादिनिमित्तकस्य शान्त्यादेः काम्यत्वा-

(१) तं—मासमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थः । तत्र 'मण्डलं तपते रवेः' इति वचनात् । *कारी-
र्यादेः काम्यस्य त्वारम्भसमाप्ती भवत एवेत्यादि-
रन्यत्र विस्तरः । काठकगृह्येऽपि—

मले*ऽनन्यगतिं कुर्यान्नित्यां* नैमित्तिकीं क्रियाम्
इति ।

तानि नैमित्तिकानि दीपिकायामुक्तानि-

यन्नैमित्तिक*मग्निनष्ट्यनुगताग्न्याधानमर्चासु वा

न्मलमासे कथमनुष्ठानमत आह-*कारीर्यादेरिति । विलम्ब-
सहत्वादिति शेषः ।

नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ।
तथा तथैव कार्याणि न कालस्तु विधीयते ॥

इति दक्षोक्तेः ।

नेहेतात्र विशेषेज्यामन्यत्राऽऽवश्यकाद्विधेः ।

इति गृह्यपरिशिष्टाच्च ।

नित्यनैमित्तिकान्यपि विशिनष्टि—*मले इति । *अ-
नन्यगतिम्—यस्या मासान्तरे ऽनुष्ठाने कालातिक्रमनिमि-
त्तकप्रायश्चित्तपातो, विहितकालालाभेन लोपो वा, ताम् ।
*नित्यामिति ।

अवषट्कारहोमाश्च पर्व चाग्रयणं तथा ।
मलमासे तु कर्त्तव्यं काम्या इष्टीश्च वर्जयेत् ॥

इति तु दिङ्मात्रम् । अवषट्कारहोमाः-अग्निहोत्रौपासनहो-
वैश्वदेवादयः । पर्व-दर्शपूर्णमासेष्टी, पार्वणस्थालीपाकश्च ।

*अग्नीति । अग्नेर्नष्टौ सत्यामनुगताग्न्याधानम् । तद्विला-
प्रायश्चित्तापत्तेः ।

अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च ।
वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कारादिविलोपने सति पुनः प्रोक्तं प्रतिष्ठादिकम् ।
इति । *गत्यन्तरयुतं तु सोमादि हेयमेव ।

*तत्र कर्तव्यान्युक्तानि कालादर्शे-

*द्वादशाहसपिण्डान्तं कर्म, ग्रहणजन्मनोः ।
सीमन्ते पुंसवे श्राद्धं, द्वावेतौ, जातकर्म च ॥
रोगशान्तिरलभ्ये च योगे श्राद्धं व्रतानि च ।
प्रायश्चित्तं निमित्तस्य वशात्पूर्वे परत्र वा ॥

माङ्गल्यमभिषेकं च मलमासे विवर्जयेत् ।

इत्यत्र तु अग्याधेयप्रतिष्ठे नैमित्तिकातिरिक्तपरे । संस्कारादिलोपः चण्डालादिस्पर्शप्रयुक्तः । *गत्यन्तरेति ।

सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे ।
षष्ठीष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि ॥
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् ।
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ॥

इति काठकगृह्यात् । अत्र गत्यन्तरयुक्तत्वं बीजं बोध्यम् । षष्ठीष्टिः—काठकप्रसिद्धा पुत्रेष्टिः । पुष्टीष्टिरिति पाठे जातेष्टिः । शौचकालरूपाङ्गोपग्रहार्थं तस्या आशौचोत्तरत्वे मलोत्तरत्वस्यापि न्याय्यत्वात् ।

इदानीं विशिष्य कार्याकार्यमाह—*तत्रेति । विशेषतः प्रपञ्चनीये कार्याकार्यसमुदाये । *द्वादशाहेति ।

जातकर्मान्त्यकर्माणि नवश्राद्धं तथैव च ।
मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश ॥
चन्द्रसूर्यग्रहे स्नानश्राद्धदानजपादिकम् ।
कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा ।

इति वचनात् । यत्तु—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अब्दोदकुम्भमन्नादि महालययुगादिषु ।
श्राद्धं दर्शेऽप्यहरहःश्राद्ध*मूनादिमासिकम् ॥
मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकम् ।
श्राद्धं तु पूर्वदृष्टेषु तीर्थेष्वेवं युगादिषु ॥
मन्वादिषु च यद्दानं दानं दैनन्दिनं च यत् ।
तिलगोभूहिरण्यानां *सन्ध्योपासनयोः क्रिया ॥

अधिमासे न कर्त्तव्यं श्राद्धमभ्युदयं तथा ।
तथैव काम्यं यत्कर्म वत्सरात्प्रथमाद् ऋते ॥

इति वचनं, तत्र श्राद्धं द्वादशाहसपिण्डनान्त-ग्रहणा-ऽलभ्य योग—गर्भसंस्काराऽऽभ्युदयिका-ऽधिकमासिक-प्रथमसांवत्सरिक-मलमासमृतसांवत्सरिकभिन्नं ग्राह्यम् । सपिण्डनान्तोपादानादुत्तरं न कार्यमिति लभ्यते ।

सपिण्डीकरणादूर्ध्वं यत्किञ्चिच्छ्राद्धिकं भवेत् ।
इष्टं वाऽप्यथ वा पूर्त्तं तन्न कुर्यान्मलिम्लुचे ॥

इत्यादिवचनात् । ग्रहणजन्मनोः श्राद्धं तन्निमित्तकदानमुपलक्षणम् । वृद्धिश्राद्धस्य जातकर्मानङ्गत्वात् पृथगुक्तिः ।

*अब्देति ।

अब्दमम्बुघटं दद्यादन्नं चापि सुसञ्चितम् ।
संवत्सरे विवृद्धेऽपि प्रतिमासं च मासिकम् ॥

इति कौथुमिवचनात् त्रिंशत्सोदकुम्भान्नदानानि, अधिकमासिकं चेत्यर्थः । *ऊनादीति । अनन्यगतिकत्वात् ।

*सन्ध्येति ।

कुर्यात्प्रात्यहिकं कर्म प्रयत्नेन मलिम्लुचे ।
नैमित्तिकं च कुर्वीत सावकाशं न यद्भवेत् ॥

इति वचनात् । "कामं तु व्रीहियवतिलैः" इति चौपासनपरं नैमित्तिकं-विधिनिषेधातिक्रमनिमित्तककृच्छ्रचान्द्रायणादि,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्वहोमश्चाग्रयणं* साग्नेरिष्टिश्च पर्वणि ।
नित्याग्निहोत्रहोमश्च देवताऽतिथिपूजनम् ॥
स्नानं च स्नानविधिनाऽप्यभक्ष्यापेयवर्जनम् ।
तर्पणं च निमित्तस्य नित्यत्वादुभयत्र च ॥ इति ।

*एतौ—पुंसवनसीमन्तौ । एतच्च गर्भाधानाद्यन्नप्राशनान्तसंस्कारोपलक्षणम् । तदुक्तं दीपिकायाम्—

स्थितनिमित्तप्रयुक्तश्रौतस्मार्त्तप्रायश्चित्तम् । एवंजातीयकमन्यदपि ।
*आग्रयणम् । "पर्व चाग्रयणं तथा" इति विधिः पुराणान्नालाभे । तल्लाभे तु "षष्ठीष्ट्याग्रयण" इति निषेधः । *एताविति ।

रोगे चालभ्ययोगे च सीमन्ते पुंसवेऽपि च ।
यद्दानादि समुद्दिष्टं पूर्वत्रापि न दुष्यति ॥

इति । अत्र सीमन्तपुंसवशब्दावुपलक्षणम् ।

गर्भे वार्द्धुषिके भृत्ये श्राद्धकर्मणि मासिके ।
सपिण्डीकरणे नित्ये नाधिमासं विवर्जयेत् ॥

इति यमोक्तेः । गर्भे—गर्भसंस्कारे ।

जातकर्म च पुंसूतिः सीमन्तोन्नयनं रतम् ।
मलिम्लुचे ऽपि कर्त्तव्यं निमित्तं यदि जायते ॥

इत्युक्तेः । वस्तुतस्तु—

अधिमासे न कर्त्तव्यं श्राद्धमभ्युदयं तथा ।

इति वाक्ये आभ्युदयिकस्याङ्गत्वेन तन्निषेधात्तदङ्गकस्य चौलादेरिव सीमन्तादेरपि निषेधे प्राप्ते यद् "वत्सरात्प्रथमादृते" इत्यभिधानं, तत् प्रथमवर्षसम्बन्धित्वेन मासविशेषनियतानां गर्भजन्मसम्बन्धिनामन्नप्राशनान्तानां प्रतिप्रसवार्थम् ।

नामान्नप्राशने चौलं विवाहं मौञ्जिबन्धनम् ।
निष्क्रमणं जातकर्म काम्यं वृषविसर्जनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'गर्भाधानमुखं च चौलविधितः प्राग्जातयागं(१) वि
कृच्छ्रेष्वाग्रयणं *गजेन्द्रपुरतश्छाया मघानङ्गयो
तीर्थेन्दुक्षययोश्च पित्र्यमधिके मास्येवमाद्याचे
इति । अलभ्ययोगे ऽर्धोदयपद्मकादौ* काम्यान्यपि
तादीनि कार्याणीत्यर्थः । पूर्वे परत्र-मले शुद्धे वेत्यर्थ

अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत् ॥

इति तु अतिपन्नजातकर्मनामकर्मान्नप्राशननिष्क्रमणपर
"जातकर्म च पुंसूतिः"इत्यत्र चकारेण नामकर्मादिग्रहः । ए
पुंसूत्यादेरिव मलमासादिव्यतिरेकेण विहितादिनलाभे तत्रै
सूचनाय 'निमित्तं यदि'इत्यादि । केचित्तु जातकर्मनामकर्मणोः
पदोक्तप्रसववशात्तथात्वेऽपि निष्क्रमान्नप्राशनयोर्नातिपन्नविषय
मिति नित्यानिषेधमाहुः । जातकर्मादेः प्रतिप्रसवेनाऽऽभ्युद
कस्यापि तदङ्गतयैव प्रतिप्रसवो बोध्यः । वार्द्धुषिके—तत्
वृद्धिग्रहणे । भृत्ये—तत्कृत्ये भृतिग्रहणे । मासिकम् —अमावा
श्राद्धम् । नित्यम्—अहरहर्दानादि, सन्ध्योपासनादि चेति ।

*गजेन्द्रेति । इयं च—

परमान्नं च यो दद्यात् पितॄणां मधुना सह ।
छायायां तु गजेन्द्रस्य पूर्वस्यां दक्षिणामुखम् ॥

इति यौगिकी ग्राह्या । "यदेन्दुः"इति पारिभाषि
स्तस्या मलेऽसम्भवात् । अमावास्याप्रत्यासन्नायां कृष्ण
त्रयोदश्यां मघायोगे रवेरवस्थानं चेत्तर्हि तत्सम्बन्धिशुक्लादि
कन्यासंक्रान्तेरवश्यंभावेन तस्य मलत्वासम्भवात् । *पद्मका
विति । आदिना कपिलाषष्ठ्यादिग्रहः । "महालयाष्टकाश्रा

---

(१) जातयागं-जातेष्टिमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*महालयशब्देन मघात्रयोदश्युच्यते इति माधवः। दर्शश्राद्धं मलेऽपि कार्यम् । यत्तु—ऋष्यशृङ्गः

संवत्सरातिरेकेण मासो यः स्यान्मलिम्लुचः ।
तस्मिंस्त्रयोदशे श्राद्धं न कुर्यादिन्दुसंक्षये ॥

इति, तत् *काम्यदर्शश्राद्धविषयम् । 'काम्यं नैवकदाचन' इति वचनात् । दर्शे च काम्यं श्राद्धं 'कन्यां कन्यावेदिनश्च' इत्यादिना याज्ञवल्क्येनोक्तम् । नित्यं तु मलेऽपि भवत्येव ।

दर्शेऽप्यहरहःश्राद्धं, दानं च प्रतिवासरम् ।
गोभूतिलहिरण्यानां मासेऽपि स्यान्मलिम्लुचे ॥

इति मात्स्योक्तेरिति हेमाद्र्यादयः । दिवोदासीयेऽपि—

इत्यादिपूर्वोक्तनिषेधादाह— *महालयेति ।

मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम् ।
अनन्यगतिकत्वेन कर्त्तव्यं स्यान्मलिम्लुचे ॥

इत्युक्तेः । अत्रेदमरुचिबीजम् । महालयशब्दस्य मघात्रयोदश्यां लक्षणा व्यर्था ।

वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घिते ।

इतिभृगूक्तनिषेधस्य स्वकालातिपन्नमहालयविषयकत्वात् । यतः संसर्प आश्विनादिषट्के एवेति मतेऽतीतो महालयस्तत्रप्राप्तोऽपि न कार्यः, किं तु तदुत्तरगौणतत्काल एवेति । यदि तु भाद्रपदोऽपि संसर्प इति मतं, तदा प्रत्याब्दिकादिवत्स्वकालप्राप्तो महालयो भवत्येव । एवमेव "तथाऽधिमाससंसर्पमलमासादिषु द्विजे । प्रथमोपाकृतिर्न स्यात्" इतिसंसर्पपदोपादानसंगतिः । आश्विनस्यैव संसर्पत्वे तत्रोपाकर्माप्राप्तेरेव निषेधानुपपत्तेरिति । *काम्येति । एतेनामावास्यामृतस्य मासिकं मासवृद्धौ न वर्द्धनीयमित्येवमर्थमित्यपास्तम् । मासिकपदासत्त्वेन तथा व्याख्याने मानाभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनिन्दुरिन्दुपूर्णा च हरिवारो बुधाष्टमी ।
नाधिमासे परित्याज्याः सीमन्तान्नाशने शिशोः
इति । अनिन्दुः—दर्शः ।
द्विविधमप्यमाश्राद्धं न कार्यमित्यपरार्कः ।
तत्र यद्विहितं कर्म उत्तरे मासि कारयेत् ।
इत्युक्तेः 'षष्ट्या तु दिवसैर्मासः' इति शुद्धम
सकरणेऽपि शास्त्रार्थोपपत्तेर्दर्शश्राद्धं मले न कार्यमि
प्राचीनगौडाः, शूलपाणिश्च । संवत्सरप्रदीपेऽपि-
एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत् ।
दर्शश्राद्धं तदाऽऽदौ स्यात् *न परत्र मलिम्लुचे ।
*अत्रापि *प्राग्वद्व्यवस्था । यद्यपि कालादर्शे सर्व
वार्षिकं मासद्वये कार्यमित्युक्तं, *तथापि हेमाद्रिम
धवापरार्कादिमतात् प्रथमवार्षिकं मलमासे, द्वितीय
याब्दिकं तु शुद्धमासे एव कार्यम् ।
असंक्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं* द्विजैः ।
तथैव मासिकं श्राद्धं सपिण्डीकरणं तथा ॥
इति हारीतोक्तेः ।
आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ।

---

*न परत्रेति ।
मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः ।
चैत्राद्यः स ज्ञेयः पूर्त्तिद्वित्वे ऽधिमासोऽन्त्यः ॥
इति मेषाद्यधिकरणकदर्शान्तत्वरूपचैत्रादिलक्षणाभिप्रायक
अपरार्कादिमतं निरस्यति-*अत्रापीति ।अपिना "तत्र यद्विहित
इत्यस्य समुच्चयः ।*प्राग्वत्-नित्यकाम्यभेदेन । तथा च मले नि
ल एव नित्यामावास्याश्राद्धनिषेध इति भावः । *सर्वमिति । उभ
त्र चेति शेषात् । अभिमानं निराकरोति-*तथापीत्यादि । *प्र
मभिति । अब्दादौ क्रियमाणमाब्दिकमिति समाख्यया तस्य द्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१)त्रयोदशे तु संप्राप्ते कुर्वीत पुनराब्दिकम् ॥
इति स्मृत्यन्तरोक्तेश्च । *पुनराब्दिकं *द्वितीयादिवार्षिकं त्रयोदशे मासेऽतीते चतुर्दशाद्यदिने कुर्यादित्यर्थः । यत्तु सत्यव्रतः–

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथा ॥

इति, तद् द्वितीयादिवार्षिकविषयम् ।

*आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ।

इति पूर्वोक्तवचनात् । तेन यत्र द्वादशं मासिकं शु-

याब्दिकत्वेऽपि महैकोद्दिष्टश्राद्धोत्तराब्दिकानां मध्ये प्राथम्यमभिप्रेत्य तस्य तत्त्वम् । मासादौ क्रियमाणं मासिकम् । तच्च मलमासमृतस्य एकादशेऽह्नि मले, शुद्धे वा मासे । 'आद्यमेकादशेऽहनि' इत्यस्याऽऽदौ क्रियमाणमाद्यमित्यर्थात् । तेनैव 'अधिके त्वधिकं भवेत्' इतिवचनानुग्रहात् । ऊनमासिकोत्तरं शुद्धतन्मासीयमृततिथौ च, 'तत्र यद्विहितं कर्म' इत्यादिवचनात् । एवं क्रमेण मासिकद्वयं मिलितमाद्यमासिकं, तदुत्तरं द्वितीयमासिकादि । अधिकमग्रे वक्ष्यामः । सम्प्राप्ते इत्यस्य प्रारब्धे इत्यर्थमभिप्रेत्याऽऽह–*पुनरिति । *द्वितीयादिवार्षिकमिति ।

अधिमासे न कर्त्तव्यं श्राद्धं सांवत्सरादिकम् ।

इतिकौथुमिनिषेधश्च उक्तरीत्या प्रथमाब्दिकविषयकत्वासम्भवाद् द्वितीयाब्दिकविषयक इति भावः ।

*आब्दिकमिति । आद्याब्दिकं द्वादशे मासे पूर्णे सति मलिम्लुचे त्रयोदशे एव कुर्वीतेति तदर्थः । "एतच्च शुद्धमासमृते । मलमासमृते तु सौरम् । अधिकमृतस्य" इत्यादिपाठान्तराभिप्रायं चोपरिष्टाद्वक्ष्यामः ।

---

(१) चतुर्दशे इत्यपि क्वचित् पुस्तके पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धमासे भवति, तत्र त्रयोदशेऽधिके एवाऽऽब्दिकं कार्यम् । यत्र त्वधिकमध्ये द्वादशं मासिकं, तत्र तस्य द्विरावृत्तिं कृत्वा चतुर्दशे शुद्धे एव प्रथमाब्दिकमिति निष्कर्षः । तेन द्वितीयादि शुद्धमासे एव । पृथ्वीचन्द्रोदये दिवोदासीये मदनपारिजाते चैवम् ।

मलमासमृतानां तु यदा स एवाधिकः स्यात्तदा तत्रैव प्रतिसांवत्सरिकं कार्यम् । यथाऽऽह पैठीनसिः-

मलमासे मृतानां तु श्राद्धं यत्प्रतिवत्सरम् ।
मलमासेऽपि कर्तव्यं नान्येषां तु कथं चन ॥ इति ।

हेमाद्रौ व्यासोऽपि-

मलमासमृतानां तु सौरं मानं समाश्रयेत् ।
स एव दिवसस्तस्य श्राद्धपिण्डोदकादिषु(१) ॥

---

(१) "अत्राधिकमृतस्य न द्वितीयाद्यब्देऽपि सौरविधिः। द्वितीयादावन्याधिके वाऽपूर्वनियमविधिवैरूप्यात् । किन्तु प्रथमाब्दिकस्य मलनियमात् सत्यव्रतेन तद्भिन्नस्य सर्वस्याधिके निषेधे प्राप्ते प्रतिप्रसवमात्रं, लाघवात् । अतो न द्वितीयादौ सौरमासप्रसङ्गः । 'चान्द्रमिति तथाऽऽब्दिके' 'मासपक्षतिथिस्पृष्टे' इत्यादिविरोधाच्च" इति कांचिपुस्तके ऽधिकः पाठः । ।

अस्यार्थः । वैशाखादावधिके मृतस्य यदा पुनः परिवर्तनक्रमेणाधिको वैशाखो भवेत् तदाऽऽब्दिकश्राद्धाद्यर्थं सौरं मानं समाश्रयेत् मेषादिस्थे सवितरि अधिके एव तस्याब्दिकश्राद्धादि कुर्यात्, नतु वृषादिस्थे सवितरि शुद्धवैशाखादौ इति यावत् ।

वैशाखाद्यधिके मृतस्य (संवत्सरे पूर्णे) द्वितीयवर्षादौ, वैशाखाद्यधिकपाते तत्र च आब्दिकश्राद्धार्थं सौरं मानं समाश्रयेत् इत्यविशेषेण सौरविधिर्नास्ति । तथा सति द्वितीयवर्षादौ आब्दिकश्राद्धार्थं सौरमानस्य केनापि वचनेनाप्राप्तस्य विधानेऽपूर्वविधित्वम्, वैशाखाद्यधिकपाते तत्र आब्दिकश्राद्धार्थं सौरमानस्य "मलमासे मृतानां तु श्राद्धं यत्प्रतिवत्सरम्। मलमासेऽपि कर्तव्यम्" इति वचनेन मलमासे कर्तव्यताबोधनेन प्राप्तस्य "सौरं मानमेवाश्रयेत्" इत्येवं नियमेन 'मलमासेऽपि' इति अपिशब्दस्वारस्येन प्राप्तस्य शुद्धमासस्य निवृत्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति नियमविधित्वमिति वैरूप्यप्रसङ्गात् । किं तु "असङ्क्रान्तेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः" इति हारीतेन "आब्दिकं प्रथमं यत्स्यात् तत्कुर्वीत मलिम्लुचे" इति स्मृत्यन्तरवचनेन च प्रथमाब्दिकस्य मले नियमनात् अधिकमृतस्यान्यत्र मृतस्य च द्वितीयादेर्वार्षिकस्य "वर्षेवर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि । मलमासे न तत्कार्यम्" इति सत्यव्रतवचनेन अधिके निषेधे प्राप्ते वैशाखाद्यधिकमृतस्य वैशाखाद्यधिकपाते तत्रैव वार्षिकश्राद्धं कार्यं "सौरमानाश्रयेणेति प्रतिप्रसवमात्रं क्रियते लाघवात् । अतः अधिकमृतस्य द्वितीयवर्षादौ क्रियमाणे प्रथमाब्दिकादौ सौरमासप्रसङ्गो न । "चान्द्रमिष्टं तथाऽऽब्दिके" "मासपक्षतिथिस्पृष्टे" इत्यादिवचनविरोधाच्च "सौरमानं समाश्रयेत्" इत्यनेन न अविशेषात् द्वितीयाद्यब्देऽपि प्रथमादिवार्षिकार्थं सौरमानविधिरिति ॥

केचित्तु—"मलमासमृतानां तु यदा स एवाधिक" इति उपक्रमग्रन्थार्थमनवगच्छन्तः "मलमासमृतानान्तु सौरं मानं समाश्रयेत्" इति वचनं "यदा स एवाधिकः स्यात्तावन्मात्रविषयम्" इति सांवत्सरिकश्राद्धप्रकरणोक्तं निर्णयसिन्धुग्रन्थं तत्रत्यकृष्णभट्टीयव्याख्याग्रन्थं चापर्यालोचयन्तः कृष्णादिमानमविविच्यैवाङ्गीकुर्वन्तः वैशाखाद्यधिककृष्णमृतस्य सांवत्सरिकश्राद्धं कृष्णादिमानेन वैशाखकृष्णादौ आचरन्ति । तदुपष्टम्भकतया च मलमासमृतानामिति वचनमुपन्यस्यन्ति, अत्राधिकमृतस्येत्यादिप्रक्षिप्तपाठं च ।

ते तु अधिकमृतस्य अविशेषात् सौरमानाश्रयणे वैशाखाद्यधिकशुक्लमृतस्य चैत्रशुक्ले प्रथममार्षिकापत्त्यादिदूषणगणग्रासेन, पूर्वोक्तनिर्णयसिन्धुग्रन्थविरोधात्, तत्रत्यटीकाग्रन्थविरोधात्, अत्राधिकमृतस्येत्यादिग्रन्थेन तदर्थस्यास्पर्शनाच्च सर्वथोपेक्ष्याः । कृष्णादिमानाश्रयणं तु अधिकविषये न केनापि गौडेन दाक्षिणात्येन वा निबन्धारेणाश्रितम् । तस्य कृष्णादित्वासम्भवात् ।

अत एव वाचस्पतिमिश्रैः नरहरिमिश्रैश्च द्वैतनिर्णये वैशाखाद्यधिककृष्णमृतस्य शुक्लादिमानेन वैशाखकृष्णे सांवत्सरिकं प्रतिवर्षमनुष्ठेयम् उल्लेखश्च तस्य कृष्णादिमानेन ज्येष्ठत्वेऽपि वैशाखत्वेनैव कार्य इत्युक्तम् । श्राद्धप्रकरणीयकृष्णभट्टीयेऽप्येवम् ।

तुल्यन्यायात् वैशाखाद्यधिककृष्णजन्मनो जन्मतिथ्युत्सवश्च शुक्लादिमानेन वैशाखकृष्णे एव कार्य इति चैत्राधिमासनिर्णये विनायकशास्त्र्यादयः । तस्मात् वैशाखाद्यधिककृष्णमृतस्य शुक्लादिमाने-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तु वृद्धवसिष्ठः—

श्राद्धीयाहनि संप्राप्ते अधिमासो भवेद्यदि ।
मासद्वयेऽपि कुर्वीत श्राद्धमेवं न मुह्यति ॥

यच्च व्यासः-

*उत्तरे देवकार्याणि पितृकार्याणि चोभयोः ॥ इति

तन्मासिकादिविषयम् ।

यौगादिकं मासिकं च श्राद्धं चा*परपक्षिकम् ।
मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च ॥

इति स्मृतिचन्द्रिकोक्तेः । तैर्थिकं—*तीर्थश्राद्धम्
*तच्च दैवात्तीर्थप्राप्तौ मासद्वयेऽपि कार्यमिति त्रिस्थली
सेतौ भट्टाः ।

केचित्तु—

प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरम् ।
मन्वादौ च युगादौ च तन्मासोरुभयोरपि ॥

इति मरीचिवचनात्,

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।

---

*उत्तरे इति ।

द्वौ मासावेकनामानावेकस्मिन् वत्सरे यदि ।

इति पूर्वार्द्धम् ।

*आपरपाक्षिकं-कृष्णपक्षप्रयुक्तं, दर्शश्राद्धं, वा ।
*तीर्थश्राद्धमिति । अपूर्वे एव गयादिरूपे तीर्थे । तत्प्रयुक्त
स्नानश्राद्धपिण्डदानापूर्वदेवतादर्शनजपयात्रादेरुपलक्षणमिदम्
"पूर्वदृष्टेषु तीर्थेष्वेव" इति कालादर्शस्तु अपूर्वतीर्थमुद्दिश्य गमननि
पर इति व्यक्तमग्रे । *तच्चेति । निमित्तस्य नित्यत्वादिति भा

न वैशाखकृष्णे सांवत्सरिकश्राद्धं प्रतिवर्षमनुष्ठेयत्वेन गौडप
णात्योभयनिबन्धकाराणां संमतम् । कृष्णादिमानमाश्रित्य तदड
नं तु भ्रान्तिमूलकान्धपरम्पराप्राप्तमेवेति दिक् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मासद्वयेऽपि तत्कुर्याद्व्याघ्रस्य वचनं यथा ॥

इति गालवोक्तेश्च प्रत्याब्दिकं मासद्वये कार्यमित्याहुः । तत्तुच्छम् * । *"प्रतिमासं मृताहे क्रियमाणं मासिकम्, प्रतिवत्सरं क्रियमाणं कल्पादिश्राद्धम्" इति मरीचिवचसो मदनरत्नेन व्याख्यानात् । गालवीयस्य च मासद्वयात्मके क्षयमासे इति माधवेन* व्याख्यानात् ।

यच्च कैश्चिदुक्तं प्रथमाब्दिकं मासद्वये कार्यम्—

*आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ।
त्रयोदशे च संप्राप्ते कुर्वीत पुनराब्दिकम् ॥

इति यमोक्तेरिति । तदपि चिन्त्यम्(१) । पुनराब्दिकं द्विती-

---

*तत्तुच्छमिति । प्रत्याब्दिकावृत्तौ मानाभावादिति हेतुरूह्यः ।

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृते ऽहनि ।
मलमासे न तत्कार्यं व्याघ्रस्य वचनं यथा ॥

इति सत्यव्रतेन मलमासे द्वितीयाब्दिकादिनिषेधात्, प्रथमाब्दिकस्य च हारीतादिभिर्मलमास एव विधानादिति भावः । एवं सति उक्तवाक्यादेरावृत्तिविधायकत्वप्रसङ्गं वारयितुं प्रकारान्तरेण योजनामाह—*प्रतिमासमिति । कल्पादयश्चाग्रे । *माधवेनेति । वस्तुतस्तु प्रथमाब्दिकं मलमासमृताब्दिकं च मलमासे एव, अन्यत्तु शुद्धमासे एवेति रीत्योभयत्राऽऽब्दिकं कार्यमिति गालवार्थः । तेन स्वाभाविकगतिमाश्रित्य यत्संज्ञकः क्षयस्तन्मासीयाब्दिकस्य तत्रैव सिद्धावपि न क्षतिः ।

*आब्दिकं—वार्षिकश्राद्धम् । रूढेर्योगापहारित्वात् ।

---

(१) एवं सति यत् केषां चित् शिष्टम्मन्यानां वार्षिकश्राद्धस्य मलमासेऽपि सङ्क्षेपेण स्वयमनुष्ठानम्, अज्ञान् प्रति तथोपदेशेन तथाऽऽचारप्रवर्तनं च, तदतिसाहसमिति कालतत्त्वविवेचने स्पष्टम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यादिवार्षिकं त्रयोदशेऽतीते चतुर्दशे कुर्यात्। अन्यथा

सांवत्सरं न वर्धेत* श्राद्धं तत्र मृतेऽहनि।

इति पैठीनसिविरोधः स्यादिति हेमाद्रौ पृथ्वी चन्द्रोदये च। एतेन 'न वर्धेत न च्छिन्द्यात्, शुद्धेऽ कुर्यादेव' इत्यनन्तभट्टव्याख्या मानाभावात्परास्ता। पृ व्याख्यायां तु हारीतीये प्रथमग्रहणमेव मानम्।

यदपि निर्णयामृते *पूर्वोक्तकालादर्शवचनात् लमासे श्राद्धदिनस्य वन्ध्यत्वनिरासार्थं पित्रुद्दे *ब्राह्मणान् भोजयित्वा शुद्धमासे सपिण्डकं श्रा द्धं कुर्यात्।

पिण्डवर्जमसंक्रान्ते संक्रान्तौ पिण्डसंयुतम्।
प्रतिसंवत्सरं श्राद्धमेवं मासद्वयेऽपि च॥

इति वृद्धपराशरोक्तेरिति। तदपि चिन्त्यम्

---

*न वर्द्धेत—नातिवर्त्तेत। "असंक्रान्तेऽपि कर्त्तव्यमाद्ध प्रथमम्" इतिहारीतवाक्ये वत्सरान्तरीयवार्षिकश्राद्धस्य शु भागमात्रकर्त्तव्यत्वे एवाऽऽब्दिकस्य प्रथमत्वविशेषणं युज्यते न च 'असंक्रान्तेऽपि'इत्यपिना शुद्धभागसमुच्चयः सुवचः। तस्य शु द्धभागरूपस्वाभाविकस्थानिकत्वलाभद्वारा तत्र कर्त्तव्यतानिर कत्वात्। यथा "भ्रस्जो रोपधयो रमन्यतरस्याम्" इत्यत्र स्थान ष्ठीनिर्देशाद्रोपधयोर्निवृत्तिस्तद्वत्। एवं च मसंक्रान्तस्य प्रथमाद्ध कमसंक्रान्ते कार्यमित्यर्थ इति, द्विःकर्त्तव्यतायां न साधकमिति भा

*पूर्वोक्तेति। निमित्तनित्यतानिबन्धनं द्विष्कर्त्तव्यत्वं स रसिकतदर्थः। यदाब्दिकं तन्मलिम्लुचे प्रथममाद्यं कुर्वीत त्रयोदशे संप्राप्ते सम्पूर्णे ऽतीते सति पुनश्चतुर्दशे मासि पुनर्द्वितीयं कुर्वीतेति हारीतवाक्यार्थोऽङ्गीकार्य इत्यभिमानः। *ब्राह्मणा ति। मलमासे श्राद्धनिषेधानां सपिण्डकश्राद्धपरत्वमित्याश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वोक्तवचनस्य क्षयपूर्वभाव्यधिकमासविषयत्वात् । तत्र हि मासद्वये श्राद्धमुक्तम् । तदाह सत्यतपाः–

एक एव यदा मासः संक्रान्तिद्वयसंयुतः ।
मासद्वयगतं श्राद्धं मलमासेऽपि शस्यते ॥ इति ।

मासद्वयगतं—पूर्वासंक्रान्तगतं, क्षयगतं च । मलमासे—क्षयमासे, अपिशब्दात् तत्पूर्वाधिमासे चेति हेमाद्रिः । दीपिकाऽपि

*तत्प्राक्सङ्ग्यधिमासको यदि भवेत्तत्रत्यसांवत्सरं
तस्मिन् शुद्धतया क्षये च वचनात्कुर्याद्द्वयोः कोविदः।

इति । *कालादर्शोऽप्येतद्विषय* एवेत्यलं बहुना । मलमासे वर्ज्यान्युक्तानि कालादर्शे–

अनित्यमनिमित्तं च *दानं च महदादिकम् ।

मलमासमृतानां मृतिमासे ऽधिके श्राद्धद्वये प्राप्ते "वर्षे वर्षे तु यच्छ्राद्धम्"इति शातातपवाक्यं शुद्धपरिसंख्यार्थम् । तेन तत्र तस्य सपिण्डकत्वमिति बोध्यम् ।

*चिन्त्यमिति । तद्बीजं च यदाब्दिकं तन्मले प्रथमं कुर्वीतेति नार्थः । "संक्रान्तिद्वयसंयुतः" इत्यग्रे विशेषाभिधानविरोधात् । अन्यासंक्रान्तसाधारण्येन तत्रापि द्विःकर्त्तव्यतासिद्धेरिति । एवं च वृद्धपराशरवचनार्थमाह–*पूर्वोक्तेति ।

क्षयगतस्य संसर्पसामान्यकर्त्तव्यताभ्रमं निरस्यति–*तत्प्राक्सङ्गीति । क्षयसमनन्तरपूर्वः संसर्प इत्यर्थः । "नास्तिवचनस्यातिभारः" इति न्यायादिति भावः । एतावता नित्यनिमित्तकतया सर्वं वार्षिकं मासद्वये कार्यमिति यथाश्रुतकालादर्शः–प्रथमाब्दिकं मलमासे, द्वितीयाद्याब्दिकं शुद्धे इति योजितः। परं तु निमित्तस्य नित्यत्वादुभयत्रेत्यत्र न स्वरस इत्यत आह–*कालादर्शोऽपीति । *एतद्विषय इति । क्षयमासे उभयत्रेत्यस्य स्वारस्यादिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*दानं चेति । काम्यत्वेन वर्ज्यत्वेऽपि—

न कुर्यान्मलमासे तु महादानव्रतानि च ।

इति पुनर्निषेधः प्रत्यवायाधिक्यार्थः । अन्ये तु—

तुला, हिरण्यगर्भश्च, ब्रह्माण्डं, कल्पपादपः ।
गोसहस्रं, हिरण्याश्वो, हिरण्याश्वरथो, धरा(१) ॥
हिरण्यकामधेनुश्च, हेमहस्तिरथस्तथा ।
पञ्चलाङ्गलकं(२), विश्वचक्रं(३), कल्पलता तथा ॥
सप्ताब्धी, रत्नधेनुश्च, महाकलश एव च ।

इति षोडशमहादानानि मुख्यानि । कुण्डमण्डपादीतिकर्त्तव्यताकलापनियमेन तत्र महादानत्वस्य मुख्यत्वात् तेषामेव

---

(१) धरा चात्र हैमी बोध्या ।

कारयेत् पृथिवीं हैमीं जम्बुद्वीपानुकारिणीम् ।
मर्यादापर्वतवतीं मध्ये मेरुसमन्विताम् ॥
लोकपालाष्टकोपेतां नववर्षसमन्विताम् ।
नदीनदशतोपेतामन्ते सागरवेष्टिताम् ॥

इति हेमाद्रौ मात्स्योक्तेः ।

(२) पञ्चलाङ्गलकदानं च-

पुण्यां तिथिमथासाद्य युगादिग्रहणादिकाम् ।
भूमिदानं नरो दद्यात् पञ्चलाङ्गलकान्वितम् ॥

इत्यादिना हेमाद्रौ स्पष्टम् ।

(३) विश्वचक्रं च-

तपनीयस्य शुद्धस्य विषुवादिषु कारयेत् ।
ज्येष्ठं पलसहस्रेण, तदर्धेन तु मध्यमम् ॥
तस्यार्धेन कनिष्ठं स्याद्विश्वचक्रमुदाहृतम् ।
अन्यद्विंशपलादूर्ध्वमशक्तोऽपि निवेदयेत् ॥
षोडशारं ततश्चक्रं भ्रमन्नेम्यष्टकावृतम् ।
नाभिमध्ये स्थितं विष्णुं योगारूढं चतुर्भुजम् ॥
शङ्खचक्रेऽस्य पार्श्वे तु देव्यष्टकसमावृतम् ।

इति । अरो—नाभ्यन्तोपक्रमान्तगामी शलाकाकृतिरवयवविशेषो योगारूढं—हृद्देशावस्थापितहस्तद्वयमित्यादिना हेमाद्रौ मत्स्यपुराणे च स्पष्टम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्न्याधानाध्वरापूर्वतीर्थयात्रा(१)ऽमरेक्षणम् ॥
देवारामतडागादिप्रतिष्ठा *मौञ्जिबन्धनम् ।
आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः ॥
*राजाभिषेकः प्रथमश्चूडाकर्म व्रतानि च ।
अन्नप्राशनमारम्भो गृहाणां च प्रवेशनम् ॥
स्नानं विवाहो नामातिपन्नं देवमहोत्सवः ।

निषेधः, न तु

कनकाश्वतिला नागा दासीरथमहीगृहाः ।
कन्या च कपिला धेनुर्महादानानि वै दश ॥

इति कौर्मोक्तानाम् । तत्र कुण्डमण्डपाद्यसत्त्वेन महादानत्वस्य गौणत्वादित्याहुः, तन्न। "काम्यं नैव कदाच न" इत्यनेन विरोधात् ।

*मौञ्जीति । वटाश्वत्थादेरपि । *राजाभिषेक इति ।

वर्षवृद्ध्यभिषेकादि कर्त्तव्यमाधिके न तु ।

इति कौथुम्युक्तेरपि —

राज्ञो ऽभिषेकः प्रथमः शुद्धं कालं प्रतीक्षते ।
प्रत्याब्दिकस्य नित्यत्वात्कालमात्रेऽपि वा भवेत् ॥

इति वाक्येन व्यवस्थापनात्। यत्तु वर्षवृद्धिः—राजजन्मदिनोत्सवः, अभिषेकसाहचर्यात् । तयोश्चाधिके निषेधः । अन्यवर्णजन्मदिनोत्सवस्त्वधिके एव । यत्तु 'उपाकर्म तथोत्सर्गः प्रसवाह' इति वचनं, तद् "दशहरासु नोत्कर्षः" इति वाक्ये उपाकर्मोत्सर्जनयोः सौरस्यैव नियमितत्वात्तत्सहचरिते प्रसवाहेऽपि सौरे ध्रु-

(१) अयं निषेधो गयातिरिक्ते तीर्थे ।
गयायां सर्वकाले च पिण्डं दद्याद्विचक्षणः ।
अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः ॥
न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ ।
इति वायुपुराणात् । अत्र श्राद्धस्य यात्रापूर्वकत्वाद्यात्रायामपि न निषेध इति पुरुषार्थचिन्तामणौ । दैवात्तत्तीर्थप्राप्तौ गयाश्राद्धं न त्यक्तव्यमित्यर्थो मम भाति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रतारम्भसमाप्ती च कर्म *काम्ये च पाप्मनाम्।
प्रायश्चित्तं तु *सर्वस्य मलमासे विवर्जयेत्।
उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ॥
अवरोहश्च हैमन्तः सर्पाणां बलिरष्टकाः।
ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम् ॥
दुर्गेन्द्रस्थापनोत्थाने ध्वजोत्थानं च वज्रिणः।
पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम् ॥ इति।

अत्र मूलवचनानि हेमाद्रिमाधवादिभ्यो ज्ञेयानि। दिवोदासीयेऽपि-

यात्रोत्सवं च देवादिशपथं दिव्यमेव च।
मलमासे न कुर्वीत व्यासस्य वचनं यथा ॥ इति।

अयं निर्णयः क्षयमासेऽपि ज्ञेयः।

*रविसंक्रमहीने यो वर्ज्यावर्ज्यविधिः स्मृतः।
स एव तु द्विसंक्रान्ते मलमासेऽप्युदीरितः ॥

इति काठकगृह्योक्तेः। क्षयमासमृतानां प्रत्यब्दि विशेषो हेमाद्रौ-

---

वे यत्र सौरमासस्यैव वृद्धिवशात्त्रिंशत्तिथित आधिक्यं, तत्रो कर्मादितिथिद्वैधेन परतिथिपरमिति, तदसत्। राजजन्मदिनोत्स स्यातिरिक्तस्यासत्त्वेनैतादृशार्थस्याशुद्धत्वात्। राजतदितरकर्तृक रूपाविशेषस्य कविकल्पितत्वात्। "आरभ्य जन्मदिवसम्" इत्यादि क्तस्य जन्ममासस्य चान्द्रत्वात्तन्मासकर्त्तव्यजन्मदिनोत्सवस्य न्तरेणापि पूर्वकर्त्तव्यताया अत्यन्तायुक्तत्वाच्च।

*काम्ये इति-द्विवचनातं पूर्वान्वयि। *सर्वस्य-पाप मित्यन्वयः। आसन्नमृत्युकस्य तु मलमासेऽपि सर्वप्रायश्चित्तं भव शुद्धमासासम्भवेन निषेद्धुमशक्यत्वात्।

*रवीति। रविसंक्रमहीनत्वेन संसर्पाधिमासयोरनुगमः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिथ्यर्धे प्रथमे पूर्वो द्वितीयेऽर्द्धे तथोत्तरः ।
मासाविति बुधैश्चिन्त्यौ क्षयमासस्य मध्यगौ ॥

यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
संसर्पाहस्पती मासावधिमासश्च निन्दितौ ॥

इत्युक्तेः । तत्र क्षयसंसर्पयोर्निन्द्यत्वं विवाहयज्ञोत्सवमङ्गलेष्वेव ।

एकत्र वर्षे ऽधिकमासयुग्मं यत्कार्त्तिकादित्रितये क्षयाख्यः ।
तद्वर्जनीयं त्रितयं प्रयत्नाद् विवाहयज्ञोत्सवमङ्गलेषु ॥

इति वचनात् । तत्र मङ्गलम्—

चूडां मौञ्जीबन्धनं च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च न कुर्याद्भानुलङ्घिते ॥

इति वचनोक्तं चूडादि । भानुलङ्घितः—संसर्पः ।

चूडां मौञ्जीबन्धनं च अग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च मलमासे विवर्जयेत् ॥

इत्यधिकमासे पुनर्वचनात् मौञ्जीनिषेधो वैश्यपरः । संसर्पे दक्षिणायनान्तःपातेन विप्रक्षत्रयोस्तदप्रसक्तेः । महालयनिषेधश्च स्वकालातिपन्नतद्विषय इत्युक्तम् । एवं च

कार्त्तिकादिषु मासेषु यदि स्यातां मलिम्लुचौ ।
सर्वकर्महरः प्रोक्तः पूर्वस्तत्र मलिम्लुचः ॥

इति संसर्पस्य सर्वहरत्वस्मृतिर्व्याख्याता । यानि मासविशेषसापेक्षाणि चौलोपनयनविवाहमन्त्रदीक्षादीनि, यानि च तन्निरपेक्षाणि ऋत्वयनमात्रापेक्षाणि संसर्पाहस्पत्यतिक्रमेण कृतान्यपि स्वकालकृतान्येव, यानि चानावश्यकत्वाद्वत्सरान्तरीयतन्मासे सुकराणि व्रतविशेषतदुद्यापनादीनि तेषामधिमासे इव संसर्पेऽप्यकर्त्तव्यत्वात्, तयोश्च न काम्यस्य प्रथमारम्भः । वत्सरान्तरे सुकरत्वात् । अत एव मासविशेषसापेक्षाणां प्रत्याब्दिकादीनां शुद्धमासे सम्भवत्कर्त्तव्यताकतया ऽधिमासे ऽकरणेऽपि न संसर्पाहस्पत्योरकरणं तद्वद् भागद्वयाभावात् । एवं चाऽऽश्विनस्य संसर्पत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*आब्दिकवद्धधार्पनेऽपि ज्ञेयम्। यन्मलमासे वर्ज्यं
क्तं, तच्छुक्रगुर्वोरस्तादिष्वपि ज्ञेयम्। तदाह-बृहस्पति
बाले वा यदि वा वृद्धे शुक्रे वाऽस्तंगते गुरौ।

तत्र कार्त्तिकस्नानं कार्त्तिकस्य क्षयत्वे तत्र चातुर्मास्यव्र
मासिः, पौषस्य क्षयत्वे तत्र माघस्नानं च न वारयितुं शक्य
संसर्पे च नाधिकमासिकम्। कालस्यानाधिक्यात्। तथा च
यसंसर्पाधिमासानां त्रयाणां समानविषयकनिषेधसिद्ध्यर्थं क
वर्ज्यविधिरित्यस्य भानुलङ्घितसाधारणविधिनिषेधविषयकत्वमे
इति न कश्चिद्दोषः।

*आब्दिकवदिति। तिथ्यर्द्धवृत्तेर्मार्गशीर्षादेः कदाचि
त्रिपाते ऽष्टकाश्राद्धादिलोपप्रसङ्गः। एवं तन्मासीयतिथिपूर्वार्द्धे
स्य ऊनमासिकं तत्तिथिप्राकृतिथ्युत्तरार्द्धे प्राप्स्यति। हि
यमासिकं तु प्रागाद्यमासिकात्तत्तिथ्युत्तरार्द्ध एव प्राप्नुयात्
अकरणे तु स्वोत्तरस्य मलत्वात्तत्साहित्येन सप्तदशानामनद्ध
नापत्तिरित्यत आब्दिकवद्धापनयोरेवैतद्वचनं वाच्यम्। अन्यत्र

एकस्मिन् मासि मासौ द्वौ यदि स्यातां तयोर्द्वयोः।
ता एव पक्षौ ता एव तिथयस्त्रिंशदेव हि॥

इति वाक्यात्सर्वतिथीनां मासद्वयात्मकत्वमिति मदनरत्न
रोधिनः। संसर्पे उक्तरीत्या कालाधिक्याभावान्नाष्टकादि
पापत्तिः। तिथ्यर्द्धवाक्यं त्वेकमासलोपभ्रान्तस्य कस्य चिदा
कस्यैव। परं तु क्षयमासजातवद्धापने तन्मृतप्रत्याब्दिकादे
यौक्तिकतया तदुपयुज्यते। यत्तु-गतवर्षीयमार्गशीर्षपौषोभयक्ष
मेकस्मिन् क्षये कार्यमुक्तवचनादिति, तदशुद्धम्। क्षयोत्थ
पौषत्वोपपादनात्क्रमेणैव तद्वयौचित्यात्। यत्तु—

मासः संक्रान्तिहीनोऽधिक इति कथितः शीघ्रमन्दप्रचारैः
संसर्पोऽहस्पतिः स्यात्समविषमतया चालनं तत्क्षयस्य।
पूर्वैश्चन्द्रार्कयोगैर्विरहविहितसंक्रान्तितश्चालनं स्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मलमास इवैतानि* वर्जयेद्देवदर्शनम् ॥ इति ।

अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे ।

मलमासेऽप्यनावृत्ततीर्थयात्रां विवर्जयेत् ॥

आवृत्ततीर्थे दोषाभावमात्रं, न तु फलमिति वाचस्पतिमिश्राः । तन्न । असति बाधके फलहेतुत्वाक्षतेः । लल्लोऽपि–

*नीचस्थे वक्रसंस्थेऽप्यतिचरणगते बालवृद्धास्तगे वा

द्वक्रस्यार्कस्य मासे यदि च न चलति वै मासयुग्मं विचिन्त्यम् ॥

इति वटेश्वरसिद्धान्ते मासयुग्मचिन्ताभिधानं, तत्त्वशुद्धमेवेति निष्कर्षानुसारिणः । *एतानि—अग्न्याधेयादीनि ।

ननु सामान्यतः कथं देवदर्शननिषेधः ।

अनादिदेवतार्चासु कालदोषो न विद्यते ।

नित्यास्वभ्यासयोगेन तथैवैकादशीव्रते ॥

इति ज्योतिःपराशरविरोधादित्यत आह–*अनादीति । अत्र निन्दापेक्षितविधेराक्षेपमपेक्ष्य लाघवेन विवर्जयेदित्यनुर्त्यम् । एवं च 'अरुणया एकहायन्या' इत्यादौ अरुणयेत्यस्य कारकपदत्वात्प्रथमं क्रीणातिनाऽन्वयः, पश्चादेकहायन्याऽन्वय इतिवत् अनावृत्तामित्यस्य द्वितीयान्तत्वात्तदन्वितस्य वर्जनेऽन्वयाद्देवतादर्शनेऽप्यनावृत्तत्वं लभ्यते । यदि च दातृप्रदात्रादिपदवदनावृत्तपदस्य यौगिकत्वात्प्रथमतो विशेष्यपदार्थान्वयात् पश्चाद्वर्जने ऽन्वयो वाच्यः । स च न सम्भवति । तदन्वययोग्यदर्शनपदाभावादित्युच्यते; तदा अपिना अनावृत्तदेवतादर्शनं समुच्चित्य निन्दोपपाद्या । अनावृत्तेति समस्तपाठेऽपि तत्समुच्चय इति न ज्योतिःपराशरविरोधः । *नष्टभार्गवे इति । नष्टेति बालादेः, भार्गवे इति गुरोश्चोपलक्षणम् ।

सर्वेषामेकधर्माणामेकस्यापि यदुच्यते ।

सर्वेषां तद्भवेत् कार्यमेकरूपा हि ते स्मृताः ॥

इति न्यायात् । तदेतदाह–*नीचस्थे इति । नीचो–मकरः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधस्तु दीक्षा
मौञ्जीबन्धोऽङ्गनानां प्रतियमनविधिर्वास्तुदेवप्रति
वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते
इति। दीक्षा–यागदीक्षा, *न त्वागमदीक्षा। तथा–

उद्यानचूडाव्रतबन्धदीक्षा–
विवाहयात्राश्च वधूप्रवेशम्।
तडागकूपत्रिदशप्रतिष्ठा
बृहस्पतौ सिंहगते न कुर्यात्॥

दिवोदासीये–

गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे।
गृहकर्म व्रतं यात्रां मनसाऽपि न चिन्तयेत्॥

अस्यापवादस्तत्रैव ब्राह्मे—

मुण्डनं चोपवासश्च गौतम्यां सिंहगे गुरौ।
कन्यागते तु कृष्णायां न तु तत्तीरवासिनाम्॥

तथा—

आद्या सा गौतमी गङ्गा, द्वितीया जाह्नवी स्मृता
सर्वतीर्थफलं स्नानाद् गौतम्यां सिंहगे गुरौ॥

संहिताप्रदीपे—

स्यात्सप्तरात्रं गुरुशुक्रयोश्च
बालत्वमह्नां दशकं च वार्ध्यम्।
वृद्धौ सितेज्यावशुभौ शिशुत्वे
शस्तौ यतस्तावुपचीयमानौ॥

वसिष्ठः—

अतिचारगते जीवे वर्जयेत्तदनन्तरम्।
व्रतोद्वाहादिकार्येषु अष्टाविंशतिवासरान्॥

बाल्यादिलक्षणमुक्तं ब्रह्मसिद्धान्ते—

*न त्वागमदीक्षा। तस्याः श्रौतस्मार्त्तकर्मान्तःप्रवेशायोगात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रविणाऽऽसत्तिरन्येषां ग्रहाणामस्त उच्यते ।
ततोऽर्वाग्वार्धकं प्रोक्तमूर्ध्वं बाल्यं प्रकीर्तितम् ॥
इति ।

बाल्यादिपरिमाणं च वृत्तशते—

बालः शुक्रो दिवसदशकं, पञ्चकं चैव वृद्धः,
पश्चाद् अह्नां त्रितयमुदितः, पक्षमैन्द्र्यां क्रमेण ।
जीवो वृद्धः शिशुरपि तथा, पक्षमन्यैः शिशू तौ,
वृद्धौ प्रोक्तौ दिवसदशकं, चापरैः सप्तरात्रम् ॥

पश्चिमत उदये दशदिनानि बालः, अस्ते पञ्चदिनानि वृद्धः, पूर्वतो दिनत्रयं बालः, पक्षं च वृद्ध इत्यर्थः । जीवो—गुरुः । अन्यत्र त्वन्यथोक्तम्—

प्राक्पश्चादुदितः शुक्रः पञ्चसप्तदिनं शिशुः ।
विपरीते तु वृद्धत्वं, तद्वदेव गुरोरपि ॥ इति ।

एषां च पक्षाणां व्यवस्थामाह मिहिरः—

बहवो दर्शिताः काला ये बाल्ये वार्धकेऽपि वा ।
ग्राह्यास्तत्राधिकाः, शेषा देशभेदादुतापदि ॥ इति ।

देशभेदश्च मदनरत्ने गार्ग्यः—

शुक्रो गुरुः प्राक्च पराक्च बालो
विन्ध्ये दशावन्तिषु सप्तरात्रम् ।
वङ्गेषु हूणेषु च षट् च पञ्च

कालान्तरस्य वक्तव्यत्वात् । गुर्वादित्यादि विवाहे वक्ष्यामः । केचित्तु—

सिंहस्थौ गुरुशुक्रौ च सर्वारम्भेषु वर्जयेत् ।

इति पठन्ति ।

सिंहस्थेऽपि मघासंस्थं गुरुं यत्नेन वर्जयेत् ।
अन्यत्र सिंहभागे तु सिंहस्थोऽपि न दुष्यति ॥

इति केचित् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषे च देशे त्रिदिनं वदन्ति ॥ इति ।

अस्तादेरपवादः काशीखण्डे—

*न ग्रहास्तोदयकृतो दोषो विश्वेश्वरालये ।

त्रिस्थलीसेतौ वायवीये-

गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये ।
सुरासुरगुरूणां च मौढ्यदोषो न विद्यते ॥

ग्रहणद्वये—तन्निमित्तककुरुक्षेत्रयात्रा-दानादावि-
र्थः । तदाह त्रिस्थलीसेतौ लल्लः—

उपप्लवे शीतलभानुभान्वो-
रर्धोदये वै कपिलाख्यषष्ठ्याम् ।
(१)सुरासुरेज्यास्तमयेऽपि तीर्थे
यात्राविधिः संक्रमणे च शस्तः ॥
इत्यलं बहुना ।

मलमासे च व्रतविशेष उक्तो हेमाद्रौ पाद्मे—

अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च ।
त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने ॥
साज्यानि गुडमिश्राणि अधिमासे नृपोत्तम ।
अधिमासे तु संप्राप्ते (२)त्रयस्त्रिंशत्तु देवताः ॥
उद्दिश्यापूपदानेन पृथ्वीदानफलं लभेत् ।
त्रयस्त्रिंशदपूपान्नं कांस्यपात्रे निधाय च ॥

---

*न ग्रहेति । काशीस्तुतिरिति केचित् ॥ इति मलम
सटिप्पणी ॥

---

(१) न मूढदोषो न च रात्रिदोषो न चाधिमासे न मृतिर्न सूति
एवमुत्तरार्धं केचित् पठन्ति ।

(२) "अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च
वषट्कारश्च" इति श्रुत्युक्तास्त्रयस्त्रिंशत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सघृतं साहिरण्यं च ब्राह्मणाय निवेदयेत् ।
विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः ॥
अपूपान्नप्रदानेन मम पापं व्यपोहतु ।
नारायण जगद्बीज भास्करप्रतिरूपक ॥
व्रतेनानेन पुत्रांश्च संपदं चाभिवर्धय ।
यस्य हस्ते गदाचक्रे गुरुडो यस्य वाहनम् ॥
शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु ।
कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥
यो वञ्चयति भूतानि, तस्मै कालात्मने नमः ।
कुरुक्षेत्रमयं देशः, कालः पर्व, द्विजो हरिः ॥
पृथ्वीसममिदं दानं गृहाण पुरुषोत्तम ।
मलानां च विशुद्ध्यर्थं पापप्रशमनाय च ॥
पुत्रपौत्राभिवृद्ध्यर्थं तव दास्यामि भास्कर ।
मन्त्रेणानेन यो दद्यात् त्रयस्त्रिंशदपूपकान् ॥
प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः ॥ इति ।
इति निर्णयसिन्धौ मलमासनिर्णयः ॥

पक्षनिर्णयस्तु—

दैव मुख्यः शुक्लपक्षः, कृष्णः पित्र्ये विशिष्यते ।

इति माधवेनोक्तः ।

अथ तिथिनिर्णयः । तत्र *तिथिर्द्वेधा । शुद्धा वि-

*तिथिरिति ।

अमा षोडशभागेन देवि प्रोक्ता महाकला ।
संस्थिता परमा माया देहिनां देहधारिणी ॥
अमादिपौर्णमास्यन्ता या एव शशिनः कलाः ।
तिथयस्ताः समाख्याताः षोडशैव वरानने ॥

इति प्रभासखण्डे । अमानाम्नी सर्वानुस्यूता नित्यकला । तदन्याः प्रतिपदादयः पञ्चदशकलाः । तत्रैकैकस्याः कलायाः चन्द्रमण्डलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्धा च। *दिने तिथ्यन्तरसम्बन्धरहिता शुद्धा। तत्र
हिता विद्धा॥ तत्र शुद्धायामसन्देहा*द्विद्धा निर्णीयते
सूर्यमण्डलेन सह परमसन्निकर्षानन्तरं विप्रकर्षः, परमवि
कर्षानन्तरं सन्निकर्षो वा यावता कालेन भवति, तावान्स
लक्षणया शुक्लकृष्णपक्षयोः प्रतिपदादितिथिपदार्थः।

तत्र पक्षावुभौ मासे शुक्लकृष्णौ सदैव हि।
चन्द्रवृद्धिकरः शुक्लः, कृष्णश्चन्द्रक्षयात्मकः॥
पक्षत्याद्यास्तु तिथयः क्रमात्पञ्चदश स्मृताः।
दर्शान्ताः कृष्णपक्षे ताः, पूर्णिमान्ताश्च शुक्लके॥

इति षट्त्रिंशन्मतात्। *दिने—दिवसे, न त्वहोरा
तेन यथा—

प्रतिपत्प्रभृतिः सर्वा उदयादोदयाद्रवेः।
संपूर्णा इति विख्याता हरिवासरवर्जिता॥

इत्युक्तसंपूर्णाया ग्रहः, तथा अहोरात्ररात्रिमात्रान्यतरसाध्य
न्यकर्मसु उदयास्तमयव्यापिन्या अपि।

अहःसु तिथयः पुण्याःकर्मानुष्ठानतो दिवा।
नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते॥

इति वाक्यात्—अहःसु यास्तिथयस्ताः पुण्याः। दि
कर्मणामनुष्ठानमित्युत्सर्गात्। "पूर्वाह्णो वै देवानां, मध्यं दि
मनुष्याणाम्, अपराह्णः पितॄणाम्" इत्यहर्भागेष्वेव दैवादिकर्मा
धानात् सूर्योदयं विना नैव स्नानादिकक्रम इति।

स्नानं दानं जपः श्राद्धमनन्तं राहुदर्शने।
आसुरी रात्रिरन्यत्र, तस्मात्तां परिवर्जयेत्॥

इति सामान्यतो रात्रिनिषेधाच्च।

प्रातः संध्यां बुधः कृत्वा संकल्पं तत आचरेत्।

इति सामान्यतो दिनारम्भे एव संकल्पविधानाच्च। *अ
देहादिति। अयं भावः—विधिष्वनुष्ठीयमानस्य विधेयस्याप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र सामान्यतो वेधमाह माधवीये पैठीनसिः—

यहेतुत्वं प्रमेयं तिथिद्वैधे क ?, सकृत्करणेनैव शास्त्रार्थसिद्धेर्गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वादिति सन्देहः । न चैष पूर्णायां तिथौ । तस्या एकत्वादिति । निषेधेषु तु कालविशेषे कर्मकरणस्यानर्थहेतुत्वं प्रमेयम् । यदा कदापि तत्काले कर्मकरणेऽनर्थप्रसङ्गानपायेन सर्वदैव तत्काले तद्वर्ज्यत्वाद्यावत्तिथिनिवृत्तिसिद्धेः । तदुक्तम्—

निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः ।
विधिः पूज्यतिथौ तत्र, निषेधः कालमात्रकः ॥
तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता ।
निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥ इति ।

नन्वेवमपि विधौ कथं सन्देहः ?। कालस्य निमित्ततया प्रकृतानुपयोगात् । यदा कदाचित्तत्काले निमित्ते कर्मणोऽनुष्ठातुं शक्यत्वात् । सत्यम् । तस्याङ्गतया तत्प्रतीक्षया सन्देहः । तिथीनां विधिनिषेधाङ्गत्वं च तत्र तत्र सप्तम्यैव । न च सा निमित्तसप्तमी । उपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात् । "वसन्ते वसन्ते" इत्यादौ तु प्रतिनिमित्तं नैमित्तिकावृत्तिसिद्ध्यर्थं निमित्तसप्तमी । अन्यथा वसन्तादेः केवलाङ्गत्वे सकृदेव तत्कर्मकरणं स्यादिति वीप्सावैयर्थ्यात् । तत्र च न केवलनिमित्तत्वम् । तस्मिन्काले निमित्ते विदिते कालाकाङ्क्षायां विशेषासत्त्वादुपस्थितत्वाच्च तस्यैवाङ्गत्वस्यापि उपेयत्वात् । संक्रान्त्यादिकालस्य तु केवलनिमित्तत्वम् । तस्य सूक्ष्मत्वाद् दीर्घकालव्यापिश्राद्धादिकर्माङ्गत्वासम्भवेन तत्पूर्वोत्तरकालस्यैवाङ्गत्वात् । एवं रविवारादिनिमित्तकस्नानादौ निमित्तभूतसूर्योदयपूर्वकालस्य, करणनिमित्तोपवासप्रतिनिध्येकभक्ते निमित्तोत्तरकालस्य च वचनादङ्गत्वं बोध्यम् । नन्वेवं वचनान्न्यायतश्च सर्वनिषेधानां तात्कालिकत्वे

अभ्यङ्गे चोदधिस्नाने दन्तधावनमैथुने ।
जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम्।
त्रिभिर्मुहूर्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः।

इति। हेमाद्रिमदनरत्नादौ तु द्विमुहूर्तोऽप्युक्तः—

*उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ।
द्विमुहूर्तं त्रिरहश्च सा तिथिर्हव्यकव्ययोः॥

मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया॥

इत्यभ्यङ्गमैथुनदन्तधावननिषेधेषु तात्कालिकत्वं व्यर्थम्। न
साकल्यवचनात्तत्तिथिरुदयास्तमयवर्त्तिनीति तद्वर्त्तितत्तिथिस्तु
रतिथावपि तत्तिथिनिषिद्धानां तेषामननुष्ठानं स्यादिति तथो
मिति वाच्यम्। यतस्तत्तत्कर्मकालभूताहर्भागविशेषे तत्तिथ्यभावे
तत्तत्कर्मानुष्ठानार्थं साकल्यवचनम्। न च तस्य निषेधेषु प्रव
रिति। तादृशेतरतिथौ निषेधाप्रसक्तेः। सत्यम्। साकल्यवचने
"स्नानदानजपादिषु" इति आदिशब्देन "दानाध्ययनकर्मसु" इति
वचनेन चानुष्ठेयानामेव कर्मणां ग्रहणम्। एवं च तदपवादे एतद्
अभ्यङ्गादित्रयस्योपादानं सकलनिषेध्यानामुपलक्षणम्। जनन
णयोस्तु तद् दृष्टान्तविधया। न ह्यननुष्ठेययोस्तयोः साकल्यस्य
प्रवर्त्तते। न च जननमरणाभ्यां तन्निमित्तकं कर्म गृह्यताम्। तथा
साकल्यस्येष्टत्वात्। जननादिग्रहणं च तत्तत्तिथिविशेषाधिकरण
त्पादनादेरुपलक्षणम्। तन्निमित्तककर्मणः साकल्यस्येष्टत्वात्।

*पक्षद्वयेऽपीति। अत्र पूर्वया तिथ्योदयादुत्तरम्
त्तरया चोदयात्पूर्वं त्रिमुहूर्त्तया वेध इति नार्थः। वे
दिनमात्रसाध्यत्वभङ्गापत्तेः। तस्य तादृशसाध्यत्वे मान
"उदिते दैवतं भानौ" इत्येव।

*उदिते इति। उदिते भानौ यद् द्विमुहूर्त्तं तद्दैवतं—
कर्मार्हम्। अस्तमिते—अस्तं गन्तुमारब्धे यदहस्त्रिमुहूर्त्तं
पित्र्यं—पितृकर्मार्हमित्यर्थः। अह इत्यत्रवयादस्तमिते इति अ

Nepal Sanskrit University, Bamdeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति विष्णुधर्मोक्तेः । *द्विमुहूर्तत्वं चानुकल्पः* ।
*द्विमुहूर्ताऽपि कर्तव्या या तिथिर्वृद्धिगामिनी ।

कर्मणि क्तः । "पक्षद्वयेऽपि" इतिवेधिकात्रिमुहूर्त्तसंबन्धेन वेधोक्तेस्तस्यास्त्रिमुहूर्त्तसत्त्वं वाचनिकम् । वेध्यायास्तु तदार्थिकं न्यायसाम्यादिति । द्विमुहूर्त्तसत्त्वस्य कथं निवेश इत्यत्राह—*द्विमुहूर्त्तत्वं चेति । *अनुकल्पः—स्नानदानादिविषय इति तदर्थः । न च वेध्यायास्त्रिमुहूर्त्तत्वस्यार्थिकत्वे मानाभावाद् द्विमुहूर्त्तत्वं नानुकल्प इति वाच्यम् ।

पौर्वाह्णिकास्तु तिथयो दैवे कार्ये फलप्रदाः ।

इति वृद्धयाज्ञवल्क्येनाह्नः पञ्चभागेष्वाद्यभागरूपपूर्वाह्णभवत्वोक्तेः । "प्रातः संकल्पयेद्विद्वान्" इति त्रिमुहूर्त्तात्मकोपक्रमकालावच्छिन्नायास्तिथेरेव "यो यस्य विहितः कालः" इत्यनेनाङ्गत्वोक्तेश्च । माधवाचार्या अपि पञ्चधा विभागो बहुस्मृत्युक्तत्वात्सर्वत्र ग्राह्य इति बहुसमयकर्त्तव्यव्रतदानादौ त्रिमुहूर्त्ता तदनुकल्पतया पौर्वाह्णिकत्वमितरपक्षोपग्रहार्थमिति रीत्या त्रिमुहूर्त्तत्वं मुख्यं वदन्ति ।

वस्तुतस्तु पक्षद्वयेऽपीति यदि पूर्वा तिथिमुत्तरास्तिथयस्त्रिभिर्मुहूर्त्तैर्युक्ता एव सत्यः (१)स्पृष्टाश्चेद्विद्धा इति व्यवहार्याः, तदोत्तरां तिथिं पूर्वा अपि मुहूर्त्तत्रयावच्छिन्ना एव स्पृश्या इत्यर्थः । तथा सत्येव युग्मखर्वसाकल्यादिशास्त्रप्रवृत्त्युपयोगितया त्रिमुहूर्त्तत्वविशिष्टतिथिद्वयसम्बन्धस्य वेधत्वसिद्धेः त्रिमुहूर्त्तोनवेधिकासम्बन्धस्य त्रिमुहूर्त्तोनवेध्यासम्बन्धस्य च किंचिन्न्यूनतिथिद्वयसम्बन्धतया प्रकृतानुपयोगात् ।

*द्विमुहूर्त्ताऽपीति ।

---

(१) स्पृष्टा इत्यस्य विध्यन्ति इत्यनेनाऽन्वयः । स्पृष्टाः सत्यः पूर्वां तिथिं विध्यन्ति चेद् विद्धाः । एवमुत्तरत्रापि मुहूर्तत्रयावच्छिन्ना एव स्पृश्याः सत्य उत्तरां तिथिं विध्यन्ति चेद् विद्धा इति व्यवहार्या इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति दक्षेणापि*शब्दोक्तेः। अयं वेधः प्रातरेव। ये तु त्रिमुहूर्तो वेध एव

*यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीपतिः।
सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्तैव या भवेत्॥

इति स्कान्दोक्तेः। दीपिकापि—'त्रिमुहूर्तगा तु सा ला सायम्" इति। यानि तु—

व्रतोपवाससस्नानादौ घटिकैकापि या भवेत्।
उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके॥

इत्यादीनि स्कान्दादिवचनानि *तानि वैश्वानरा

त्रिमुहूर्ता न कर्तव्या या तिथिः क्षयगामिनी।

इति पूर्वार्धम्। *अपिशब्देति। तथा च पूर्वार्धेऽप शब्दान्वयान्न त्रिमुहूर्तत्यागे द्विमुहूर्तग्रहणे च तात्पर्यं, न्तु द्विमुहूर्तत्वस्यानुकल्पत्वे इति। अयं निषेधो न त्रिमुहूर्त प्रतिबाधनाय, किन्तु चतुर्थमुहूर्तस्पर्शित्वविधित्सयेति त्रिमुहूर्त सेर्मुख्यत्वमित्यन्ये। क्षयिण्यां त्रिमुहूर्तग्राह्यतानिषेधस्तदन्य तद्ग्राह्यतासाधकः, निषेधस्य प्राप्तिपूर्वकत्वादिति तस्यामुख्य मितीतरे।

ननूदितवाक्ये यथासंख्यान्वयस्यानिर्बीजत्वात् सा द्विमुहूर्तत्वमनुकल्पोऽस्तु इत्यत्राह—*यामिति। त्रिमुहूर्ते वकाराद्,

यां प्राप्यास्तमुदेत्यर्कः सा चेत् स्यात्त्रिमुहूर्तगा।
धर्मकृत्येषु सर्वेषु सम्पूर्णा तां विदुर्बुधाः॥

इति विष्णुरहस्ये उद्देश्यविधेयभावेन त्रिमुहूर्तवत्तयैव त्वोक्तेर्द्विमुहूर्तत्वनिवेशासम्भवाच्च।

*वैश्वानरेति। "वैश्वानरं द्वादशकपालं निर्वपेत् जाते" इत्याम्नाय "यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मव पुनाति, यन्नवकपालो भवति त्रिवृतैवास्मिंस्तेजो दधाति" इत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करणन्यायेनावयव*स्तुत्या त्रिमुहूर्तप्रशंसापराणि।
तिथिविशेषे वेधविशेषः स्कान्दे—

नागो द्वादशनाडीभिर्दिक् पञ्चदशभिस्तथा।
*भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम्॥ इति।

अयं चो*पवासातिरिक्तविषय इति वक्ष्यते॥ इति वेधः॥

तत्र सर्वा तिथिर्यदहःकर्मकाल*व्यापिनी, सैव ग्राह्या।
कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः।
*तया कर्माणि कुर्वीत, ह्रासवृद्धी न कारणम्॥

फलवदष्टाकपालाद्युक्तम्। तत्रोत्पत्तिशिष्टद्वादशकपालावरुद्धे उत्पन्नशिष्टानामष्टाकपालादीनां निवेशे वाक्यभेदः स्यादतो ऽवयवद्वाराऽवयविभूतद्वादशकपालस्तुतिराश्रीयते तद्वदित्यर्थः। *अवयवः-एकघटिका। *नागः—पञ्चमी। *दिक्—दशमी। *भूतः—चतुर्दशी। *उपवासातिरिक्तेति। "सर्वप्रकारवेधोऽयम्" इति वाक्यात्।

*कर्मकालेति। कर्म षड्विधम्। उपवास—एकभक्त—नक्त—अयाचित—व्रत—दानभेदात्। अत्रोपवासे अहोरात्रस्तत्कालः। तस्याहोरात्राभोजनसङ्कल्परूपत्वात्। तदहोरात्रावच्छिन्नद्वितीयभोजनाभावविशिष्टं मध्याह्नभोजनमेकभक्तम्। तादृशं प्रदोषभोजनं नक्तम्। अयाचितलब्धस्य तादृशं सकृद्भोजनमयाचितम्। तेष्वपि विशेष्यांशे मध्याह्नादिः, विशेषणांशे चाहोरात्र एव कालः। एवं दानव्रतयोरपि प्रातरादिः। तत्तत्कर्मणि तत्तद्व्यापिनीत्यर्थः।

*तया कर्माणीति। तत्र कालस्यानुपादेयत्वाद् यथा तत्तत्तिथिपरित्यागेन कर्म दुष्करं, तथा तत्तदहर्भागपरित्यागेनापि। अन्यथा "यावज्जीवमग्निहोत्रं जुहोति" इति यावज्जीवकालात् प्रातरादिभागं विहायापि अग्निहोत्रं हूयेतेति भावः। कर्मकालव्याप्तिर्द्वेधा। साकल्येन एकदेशेन वा। सापि पुनर्द्वेधा। पूर्वेद्युरेव, परेद्युरेवेति। एषु पक्षेषु सैव ग्राह्या। दिनद्वये तद्व्याप्त्यादौ त्वाह—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति विष्णुधर्मोक्तेः। *दिनद्वये तद्व्याप्तावव्याप्तौ देशव्याप्तौ वा *युग्मवाक्यान्निर्णयः। *तस्य पूर्वाऽ नोपपत्तेः। कर्मकालस्य प्रधानाङ्गत्वाच्च। युग्मवाक्य निगमः।

---

*दिनद्वये इति। *युग्मवाक्यात्, खर्वादिवाक्यात्, शुद्ध वाक्याच्च। नन्वस्तु कर्मकालशास्त्राद् ह्रासवृद्धिशास्त्रं(१)दुर्बलम्। प दिन एव तत्सत्त्वेनासन्देहात्, 'ह्रासवृद्धी न कारणम्'इत्युक्तेः। न युग्मशास्त्रम्। तथा च तेन कर्मकालशास्त्रबाधो दुर्वार इत्यत्राह- *तस्येति। अयं भावः—तत्तत्कर्मसु विहितायां तत्तत्तिथौ ण्डायां संदेहे सति निर्णयार्थं युग्मवाक्यादित्रयप्रवृत्तिः। तिथ दिविधिप्रवृत्तिसमकालमेव च प्रातरादिभागविधिप्रवृत्तिः। प्र गाविधिना कालस्योपादेयत्वात्। एवं च तेषां प्रथमावगतत तत्तत्कालीनातिथिलाभे तस्यां तत्तत्कर्मणि न संदेहः। एतं कर्मकालशास्त्रेण वाचो भङ्ग्या बोध्यते। ततश्च कर्मकाल प्रवर्त्तको, न तु ह्रासवृद्ध्यादि। दानव्रतयोरपि "पौर्वाह्णिका तिथयः" इति कालविशेषसत्त्वेन स एव कर्मकालः प्रवर्त्तक 'ह्रासवृद्धी न कारणम्'इत्यत्र ह्रासवृद्धिपदस्य युग्माद्युपलक्ष तया युग्मादिशास्त्रं खर्वादिशास्त्रं च न कुत्रापि पुरस्ता वृत्तिप्रयोजकम् असंदेहादिति। यत्र कर्मकालानुरोधेन निर्णयो ष्करः दिनद्वये कर्मकालव्याप्तौ, साम्येनैकदेशव्याप्तौ च वर्तितेऽपि कर्मकालशास्त्रे सन्देहानपायात्, दिनद्वये तदव्या कर्मकालशास्त्रौदासीन्येन संदेहतादवस्थ्यात्; तत्रैव विषये रशास्त्राणि निर्णायकानीति युग्मशास्त्रादेरुपरिष्टादेव प्रवृत्ति वैषम्येणैकदेशव्याप्तौ तु आधिक्यानुगृहीतकर्मकालशास्त्रादेव सं यानिरास इति। एवं च

---

(१) "खर्वो दर्पः" इति मूले वक्ष्यमाणं शास्त्रम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः ।
रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा ॥
प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम्* ।
एतद्व्यस्तं* महादोषं, हन्ति पुण्यं पुराकृतम् ॥ इति ।

अत्र रन्ध्रान्ताः शब्दा द्वितीयादिनवम्यन्ततिथिवाचकाः । रुद्रः—एकादशी । द्वितीया तृतीयायुता, सा च द्वितीयायुतेति *सप्तयुग्मानीत्यर्थः । इदं च शुक्लपक्षे *अमाप्रतिपद्युग्मस्य पूर्णिमायाश्च तत्रैव सत्त्वादिति के-

दिवारात्रिव्रतं यच्च एकमेव तिथौ गतम् ।
तस्यामुभययोगिन्यामारभेत्तद् व्रतं व्रती ॥ इति ।
त्रिसन्ध्यव्यापिनी या स्यात्सैव पूज्या सदा तिथिः ।

इत्यादिकं कर्मकालशास्त्रसिद्धार्थकमेव । यदा तिथिरेकत्र दिने अहोरात्रयोगिनी, अन्यस्मिंश्चाहर्मात्रयोगिनी, रात्रिमात्रयोगिनी वा; तदा ऽहोरात्रसाध्ये उपवासादौ अन्यतरमात्रयोगिनीं त्यक्त्वोभययोगिन्या एव(१)। न्यायतः कर्मकालशास्त्राच्च प्राप्तेः । *महाफलं—तत्तत्तिथिकृततत्तत्कर्मफलदातृ । *व्यस्तम्—अन्यथा कृतम् । महादोषम्—कर्मवैगुण्यकारि ।

*सप्तेति । युग्मगता पूर्वा तिथिरुत्तरविद्धा उदयव्यापिनी, उत्तरा च पूर्वविद्धा अस्तमयव्यापिनी ग्राह्येत्यत्र तात्पर्यम् । *अमेति । द्वितीयादिकयुग्मस्य पक्षद्वयवर्त्तित्वात् त्यागः । अत्र साहचर्यस्य नियामकत्वमयुक्तम् । तस्य सन्निधिरूपतया स्थानावान्तरभेदत्वान्मुख्यवृत्त्या पक्षद्वयवर्त्तितिथिवाचिद्वितीयादिपदश्रुत्या बाधात् । तदुक्तं—"श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यम्" इति । (अ० ३ पा० ३ सू. १९ जै०) अत एव ताण्डिशाखायां "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्यने-

(१) ग्रहणम् इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्। *तत्त्वं त्वमा*प्रतिपद्युग्मात् कृष्णपक्षलिङ्गात् प
द्वयपरमिदं *तत्तद्विशेषवाक्यैः *कृष्णे तिथिविशेषः
द्यते इति। दशमी तूक्ता पुराणसमुच्चये—

*संपूर्णे दशमी कार्या मिश्रिता, पूर्वयाऽथवा। इ
संपूर्णे—शुक्लपक्षे। त्रयोदशी तु सुमन्तुनोक्ता—

कतच्छाखोक्तगुणैरुद्गीथाख्यभक्त्युपासनं, सन्निधिविशेषात्स
खोद्गीथस्य वेति पूर्वपक्षो मुख्यवृत्त्या सामान्यवाचकोद्गीथप
त्या तत्सामान्योपस्थितेस्ताण्डिशार्दूलादिसर्वशाखोद्गीथोपासनमु
निरस्तो ब्रह्ममीमांसायामित्यभिप्रायवानाह—*तत्त्वं त्विति
*अमेति। पूर्णिमामात्रं च शुक्लपक्षलिङ्गं द्रष्टव्यम्। *तत्तद्विशेषो
"प्रतिपत्सद्वितीया स्यात्" इत्यादिभिरित्यर्थः। यदि च तेषा
सामान्यवाक्यत्वमुच्यते, तदा तत्तत्कर्मकालशास्त्रोत्तरप्रवृत्तिकेनै
क्येन संकष्टचतुर्थ्यादेर्दिनद्वयसत्त्वे प्राप्तं परविद्धत्वं "चतुर्थी गणप
स्य" इत्यादिनाऽपोद्यते इत्यर्थः। *कृष्णे इति शुक्लोपलक्षण

*संपूर्णे इति। अत्र हेमाद्रिः संपूर्णेति पाठः। संपूर्णे
संपूर्णे शुक्लपक्षे इति च प्रमादात्। अन्यथा कृष्णपक्षे तिथि
लाभापत्तेः। न च शुक्लपक्षे इत्युक्तमप्यतन्त्रम्।

युक्ता न दूषिता यस्मादिति सा सर्वतो मुखी।

इतिवाक्यशेषात्। यतः सा सर्वतोमुखी अतोऽविशेषेण
परा वेत्यर्थादिति वाच्यम्। "शूर्पेण जुहोति, तेन ह्यन्नं क्रि
इत्यत्र हेतुवाचिहिशब्दाद् यस्मादन्नसाधनमतः शूर्पेण होतव्यमि
शूर्पत्वाद्यविवक्षया पिठरादेः प्राप्तमपि होमसाधनत्वमानुमानिकी
विभक्तिश्रुत्यवगतशूर्पसाधनत्वाद् दुर्बलत्वादुज्झितं, तद्वद् अ
ऽपि सप्तमीविभक्तिश्रुत्या शुक्लपक्षावच्छिन्नदशम्या एव पूर्व
विद्धात्वं स्यात्। तस्मात्संपूर्णेति पाठः। तत्र मूलाग्रयोरुभयो
मुख्यत्वोक्तेरविशेषबोधनद्वारा व्रीहियववद्विकल्प इति। वस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने । इति ।

कृष्णपक्षे त्वापस्तम्बः—

*प्रतिपत्सद्वितीया स्यात्, द्वितीया प्रतिपद्युता ।
चतुर्थीसंयुता या च सा तृतीया फलप्रदा ॥
पञ्चमी च प्रकर्तव्या षष्ठ्या युक्ता तु नारद ।
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ॥

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥

इतिशुक्लकृष्णवाक्यमेव तत्र व्यवस्थापकं न तु तुल्यवद्विकल्पः ।

उदासीने तु शास्त्रार्थे पुरुषेच्छा नियामिका ।

इति पुमिच्छाश्रयणानौचित्यात् । एवं च संपूर्णे इति पाठोऽपि सुयोज्यः । शुक्लपक्षे दशमी परविद्धा, अथ वा-पक्षान्तरे कृष्णपक्षे सा पूर्वविद्धेत्यर्थात् इति ।

*प्रतिपदिति । इदं च सामान्यवचनं तत्तद्विशेषैरपोद्यम् । एवं च यत्र परस्परविरुद्धं युग्मवाक्यद्वयं प्राप्नोति, यथा तृतीयायाम् । तत्र "रम्भाख्यां वर्ज्जयित्वा तु"इत्यादिकं प्रबलं व्यवस्थापकम् । यत्र च तादृशं न व्यवस्थापकं किञ्चिदस्ति, तत्र पूर्वोक्तं शुक्लकृष्णवाक्यं व्यवस्थापकम् । विरुद्धयुग्मवाक्यद्वयाविषय इव तद्विषयेऽपि तस्य निष्प्रत्यूहं प्रवृत्तेः । न च शुक्लकृष्णवाक्यं युग्मवाक्यप्रवृत्तिसमये तत्तद्विशेषवाक्यप्रवृत्तिसमये वा कुतो न प्रवर्त्तते ? । (१)युग्माग्नियुगादौ पूर्वस्या उत्तरविद्धाग्राह्यत्वेन (२)परस्य, उत्तरस्याः पूर्वविद्धाग्राह्यत्वेन पूर्वस्य च विरोधात् । एवं "प्रतिपत्सद्वितीया"इत्येतत्प्रवृत्तिसमयेऽपि । अत एव

---

(१) 'युग्माग्नियुगभूतानाम्' इत्यत्रेत्यर्थः ।

(२) 'कृष्णपक्षे तिथिर्ग्राह्या, इत्यस्येत्यर्थः । एवं पूर्वस्येत्यस्य 'शुक्लपक्षे तिथिर्ग्राह्या' इत्यस्येत्यर्थो बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वविद्धा प्रकर्तव्या, पराविद्धा न कुत्रचित् ।
दशमी च प्रकर्तव्या सदुर्गा द्विजसत्तम ॥
षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ।
एताः परयुताः पूज्याः, पराः पूर्वेण संयुताः ॥ इति

*यत्तु व्याघ्रः—

खर्वो दर्पस्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
खर्वदर्पौ परौ पूज्यौ, हिंसा स्यात् पूर्वकालिकी
इति । खर्वः-साम्यं, दर्पो-वृद्धिः, तयोः परा
हिंसा—क्षयस्तत्र पूर्वेत्यर्थः । एतच्छ्राद्धादि*विषयम्

दैवपित्र्यसाधारण्येन प्राप्तमौदयिकत्वं

दैवे कर्मणि संप्राप्ते यस्यामभ्युदितो रविः ।
सा तिथिः सकला ज्ञेया पित्र्यर्थे चापराह्णिकी ॥

इतिपरिसंख्यातमिति कथं दैवेऽस्तमयतिथिग्रह इत्यपाकृतम्।
क्तरीत्या दैवेऽप्यस्तमयतिथिध्रौव्ये शुक्लकृष्णसामान्येन
आपराह्णिकत्वं तेन विधीयते, तत्स्तुत्यर्थं च दैवौदयिकत्वोक्तिर
पगमात्। त्रिदोषपरिसंख्याऽनुपगमात्।"उत्तरेऽहन्द्विरात्रस्य गृह
इत्यौत्तराहिकस्य षोडशिग्रहस्य आङ्गिरसां द्विरात्रे"वैखानसं पूर्वे
साम भवति, षोडश्युत्तरे" इति परिसंख्यानान्न सर्वद्विरात्रे षोड
ग्रह इति प्राप्तस्य त्रैदोष्यादेव वैखानसस्य विध्यर्थवादत्वमु
निरासात्। न च 'कृष्णपक्षे तु' इत्यसङ्गतं युग्माग्निवाक्यवत् 'प्रति
त्सद्वितीया'इत्यादेरपि शुक्लकृष्णपक्षसाधारण्यादिति वाच्यम्।
रिशेष्यात्तस्य कृष्णपक्षविषयत्वात् । एतच्चाग्रे वक्ष्यते ।

*यत्त्विति । यदा युग्मवाक्यं प्रवर्त्तते, तदैवास्य प्र
सन्देहो दुर्वार इत्याशयः । *श्राद्धादीति । कर्म द्विविधं-
पित्र्यं च । तत्र खर्वादिवाक्यं पित्र्यविषयमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*द्वितीयादिकयुग्मानां पूज्यता *नियमादिषु ।
एकोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्ध्यादिचोदना ॥

इति व्यासोक्तेः । नियमादिषु–व्रतदानादिदैव*कर्मसु । *एकोद्दिष्टादितिथिवृद्ध्यादावित्यर्थः ।

युग्मादिवाक्यस्य दैवविषयकत्वं ध्वनितम् । तदाह—*द्वितीयादिकेति । नियमो–व्रतम् । आदिपदं सादृश्यात्सर्वदैवकर्मपरमित्याह—*दैवेति । ह्रासवृद्ध्यादिचोदना—खर्वादिवाक्यम् । ननु वृद्ध्यादाविति वृद्धिपदमयुक्तं वृद्धिश्राद्धस्य तिथ्यप्रयुक्तत्वादत आह–*एकोद्दिष्टादीति । अथ ह्रासवृद्धी चन्द्रह्रासवृद्ध्युपलक्षितकृष्णशुक्लपक्षौ तच्चोदना—शुक्लकृष्णवाक्याधीनः–शुक्लपक्षतिथिः (१)उत्तरा, कृष्णपक्षतिथिः पूर्वेति निर्णयः तत्र एकोद्दिष्ट्यादिमाध्याह्निकं पित्र्यं, वृद्ध्यादि–पौर्वाह्णिकं पित्र्यं विषय इत्यर्थो ऽस्तु; आपराह्णिकपित्र्ये तु पक्षद्वयेऽप्यस्तमयव्यापिनी तिथिर्ग्राह्या ।

ययाऽस्तं सविता याति पितरस्तामुपासते ।
तिथिं, तेभ्यो ऽपराह्णो हि स्वयं दत्तः स्वयंभुवा ।

इतिहेतुमन्निगदरूपवाक्यशेषादिति चेन्न । यतो दैवेषु युग्मवाक्यमेव निर्णायकमिति नार्थः । तदविषये शुक्लकृष्णवाक्यप्रवृत्तेः, किन्तु युग्मवाक्यं दैवविषयमेवेति । अत एव पश्चार्द्धेऽपि शुक्लकृष्णवाक्यमेव पित्र्ये एव निर्णायकमिति नार्थः, तस्य दैवेऽपि प्रवृत्तेरिति । ह्रासवृद्ध्यादिचोदनाशब्दे लक्षणापत्तेश्च ।

वस्तुतस्तु अव्यवस्थाप्राप्तौ पूर्वोत्तरतिथिव्यवस्थापकं शुक्लकृष्णपक्षवाक्यम् । तच्च पित्र्ये न प्रवर्त्तते । एकैकदिने कर्मकालव्याप्तौ तथैव, वैषम्येण तद्व्याप्तावाधिक्येन, साम्येन तद्व्याप्तौ—उभयत्र तद्व्याप्तौ—तदस्पर्शे वा अस्तमयापराह्णव्याप्तिभ्यां खर्वादि-

---

(१) उत्तरतिथिविद्धेत्यर्थः । एवं पूर्वेत्यत्रापि बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*कर्मकालव्याप्त्यभावे तु कर्मोपक्रमकालगैव ग्राह्य
कर्मोपक्रमकालगा तु कृतिभिर्ग्राह्या, न युग्मादि
इति दीपिकोक्तेः। यानि तु—

वाक्यवशेन व्यवस्थासत्त्वात्। नापि "ययाऽस्तं सविता या
इत्यादेरापराह्णिकपित्र्यविषयत्वात् माध्याह्निकादिपित्र्येऽव्यव
पत्तिः। "उदिते दैवम्"इत्यादिसामान्यवाक्यवशादपराह्णे
ऽपरभाग इति कुतपपूर्वार्द्धोपक्रमिण एकोद्दिष्टस्यापि तादृशा
समाप्यत्वेन सङ्ग्रहात्। अन्यथा शुक्लपक्षे कुतपपूर्वार्द्धोपक्रमि
पार्वणस्याप्यसङ्ग्रहात्।

शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः।
कृष्णपक्षापराह्णे तु रौहिणं तु न लङ्घयेत्॥

इत्युक्तेः। उपक्रमे रौहिणलङ्घनं निषेधता चानेनोपक्रम
एवोच्यते, न तु रौहिणे समाप्यत्वम्। येन

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः।

इतिवदेकोद्दिष्टमात्रविषयकत्वं स्यात्। अत एव वृद्ध्यादौ-
द्ध्यादिप्रयुक्ते संशये ह्रासवृद्ध्यादिचोदना—शुक्लकृष्णवाक्यवि
नार्थः। तिथिखण्डत्वभिन्नस्य वृद्ध्यादेः सन्देहोत्थापकताया
कान्तिकत्वाच्च। वृद्ध्यादीत्यादिना क्षयसाम्यग्रहः। एतच्च कर्म
शास्त्राबाधेन खर्वादिशास्त्रप्रवृत्तिः युग्मादिशास्त्रवदिति बोधन
एकोद्दिष्टादीत्यादिना पार्वणस्य यज्ञोपवीतित्वादिदैवधर्मकस्य
वश्राद्धादेश्च पित्र्यस्य ग्रहः। एतेन वृद्धिः—लक्षणया पुत्रोत्पत्ति
मित्तकश्राद्धं तदादिः प्रकृतिर्यस्येत्यतद्गुणसंविज्ञानबहुव्रीहिणा
वश्राद्धग्रह इत्यपाकृतं, लक्षणापत्तेः। *कर्मकालेति। एवं
कर्मकालेनानिर्णये यद्युग्मशास्त्रस्य निर्णायकत्वमुक्तं, तत् तद्
स्य निर्णायकत्वासंभवे एव, नान्यथा। तस्य कर्मकालसम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यां तिथिं समनुप्राप्य उदयं याति भास्करः ।
सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ॥

इत्यादीनि*, तानि *त्रिमुहूर्तादिस्तुतिरिति निर्णयशैली ॥

यो यस्य विहितः कालः कर्मणस्तदुपक्रमे ।
विद्यमानो भवेदङ्गं नोदितोपक्रमेण तु ॥

इति बौधायनवाक्याच्चेति सूचितम् । यथा साम्येन एकदेशव्याप्तौ यत्कर्म मध्याह्नादावेवोपक्रम्य समाप्यते, तत्रैव कर्मोपक्रमयोगिनी युग्मशास्त्रबाधश्चेत्यर्थः । दिनद्वये कर्मकालव्याप्तौ तदस्पर्शे वा पूर्वमेवोपक्रम्य मध्याह्नादावनुष्ठीयमाने कर्मणि साम्येन तदेकदेशस्पर्शेऽपि युग्मवाक्यात् खर्वादिवाक्याद्वा निर्णयः । तत्र कर्मकालशास्त्रेण निर्णेतुमशक्यत्वात्, यो यस्येत्युपक्रम्य तदुपक्रमे इत्युक्तेरावृत्त्या तस्मिन्काले, तस्य कर्मण उपक्रमे—तत्कालीनतत्संकल्पे इत्यर्थात्तदप्रवृत्तेश्च । उपक्रमः—सङ्कल्पः । "सङ्कल्पो व्रतसत्रयोः" इत्युक्तेः । *इत्यादीनीति । आदिना

यां तिथिं समनुप्राप्य अस्तं याति दिवाकरः ।
सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥

इत्यादिसङ्ग्रहः । *त्रिमुहूर्त्तादीति । आदिना केवलौदयिकगौरीव्रतादिरूपतन्न्यूनसंग्रहः । वस्तुतस्तु त्रिमुहूर्त्तादिस्तुतिरित्यसङ्गतम् । एतद्वचनयोरुदयास्तमयगततिथेः साकल्यप्रतिपादकत्वात् । तत्प्रतिपादनं च प्रमाणान्तरेण त्रिमुहूर्त्तायास्ततो न्यूनाया वा पूर्वस्या उत्तरस्या वा तिथेर्ग्राह्यत्वे सिद्धे तत्तदहर्भागे तिथेरभावेऽपि तत्रैव कर्मानुष्ठानार्थम्, न तु युग्मादिवाक्याविषयिण्या अपि तिथेरेतद्वाक्यवशाद्ग्रहः । त्रिमुहूर्त्तादिवेधवैयर्थ्यात् । एवं च यत्राङ्गभूतायास्तिथेः कर्मसङ्कल्पकालेऽभावस्तत्रापि कर्मतिथिमत्तयैवोल्लेखः सङ्कल्पतिथेस्तदधिकरणत्वस्य तत्तिथियोगमयुक्तत्वात् । नैमित्तिके तु कर्मणि न निमित्ततिथेरुल्लेखः । तस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनङ्गत्वात् । अनेकदिनसाध्ये कर्मणि तु अद्य प्रभृत्येतावद्दि
र्यन्तमित्येव । मध्यवर्त्तितिथेः शास्त्रतोऽङ्गत्वाभावेऽपि अनाय
ङ्गत्वोपगमात् । साकल्यवचनात्तत्काले एव तिथ्यभावेऽपि य
र्मानुष्ठानं, तत् मन्वादिकर्त्तव्यस्नानश्राद्धादिव्यतिरिक्ताविषयम्

अभ्यङ्गे चोदधिस्नाने दन्तधावनमैथुने ।
जाते च मरणे चैव तत्कालव्यापिनी तिथिः ॥
मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥

इति स्कान्दात् । तस्माद् यानि

आदित्योदयवेलायां या ऽल्पापि च तिथिर्भवेत् ।
पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विना ॥
व्रतोपवासस्नानादौ घटिकैका यदा भवेत् ।

इत्यादीनि मुहूर्त्तत्रयन्यूनाया अपि सम्पूर्णात्वप्रतिपाद
नि, तानि कैमुतिकन्यायेन त्रिमुहूर्त्तस्तुतिरिति दिक् । के
युग्मवाक्यमुपवासमात्रपरम् । यतः त्रिमुहूर्त्तया पूर्वतिथ्या
सती या उत्तरदिने त्रिमुहूर्त्ता तदधिका वा यद्युत्तरैव
तदा युग्मवाक्यमेव निर्णायकम् । तद्वशादहोरात्रोभयस
पूर्वाह्णे या उदयवाक्यं चोत्तरस्या अङ्गत्वयोग्यतारूपमौ
रिकं साकल्यं बोधयति तत् यदि एकभक्तादौ मध्याह्न
मात्रकर्त्तव्ये तत्कालस्पर्शिन्या अपि तिथेः साकल्यं
पादयेत्, तदोपवासेऽपि तद् द्रढयेत् । "प्रातः सङ्कल्पयेत्
वचनेनाहोरात्रस्य कर्मकालत्वलाभात् । अत एव न प्रातः
नाकालः येनाकाले प्रक्रान्तस्य समाप्तिरङ्गीक्रियेत । नापि
कालोऽत्र गौणः, येन गौणकाले समाप्तिरुपगन्तव्या स्यात् ।
यदि सा तिथिः पूर्वैव युग्मा तदाऽपि युग्मवाक्यमेव निर्णाय
उक्तं चेहाप्यस्तमयवाक्यस्य सङ्कल्पकाले तत्तिथेरभावेऽपि सा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथैकभक्तम् । तत्कालः पाद्मे-

मध्याह्नव्यापिनी ग्राह्या एकभक्ते सदा तिथिः । इति ।

मध्याह्नश्च *पञ्चधाविभक्तदिनतृतीयांशः । तेन यद्यपि द्वादशदण्डानन्तरं प्राप्यते, तथाऽपि—

प्रापकत्वम् । इत्थं च या शुद्धा सती परेऽहनि त्रिमुहूर्त्ताऽपि, तत्र पूर्वा । कर्मकालशास्त्रस्य प्रागेव प्रवृत्तेः । या च विद्धा सती क्षयेण परेद्युर्नास्ति, त्रिमुहूर्त्तन्यूना वा, सापि पूर्वैव । युग्मशास्त्राप्रवृत्तेः । तत्प्रवृत्तेस्त्रिमुहूर्त्तसत्ताया आवश्यकत्वात् । नाप्यौदयिकशास्त्रं तत्र प्रवर्त्तते । तत्प्रवृत्तेरपि तथात्वात् । अथ

उदये तूपवासस्य, नक्तस्यास्तमये तिथिः ।

इत्यादिवाक्यात् परा स्यात् । न स्यात् । तेषां कैमुत्यन्यायेन त्रिमुहूर्त्तस्तावकत्वात् । न च या त्रिमुहूर्त्तन्यूनया पूर्वया युक्ता सती परदिने किञ्चिद्वर्त्तते, सा परैव स्यात् ।

द्वितीया पञ्चमीवेधाद्दशमी च त्रयोदशी ।
चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी ।

इति विशेषतो वचनादिति वाच्यम् । उपवासभिन्ने त्रिमुहूर्त्तयोगे दोषः, उपवासे त्वल्पयोगे स इति वैरूप्यवारणायास्तमयवर्तिन्यास्त्रिमुहूर्ताया एव पूर्वतिथिदूषकत्वम्, उदयवर्तिन्यास्तादृश्या एवोत्तरतिथिदूषकत्वमित्यर्थोपगमादित्याहुः ।

अत्रेदं वक्तव्यम् । अस्त्वीदृशउपोष्यतिथिनिर्णयः । परं तु युग्मवाक्यं सकलदैवकर्मविषयमेव । "एतद्व्यस्तं महादोषम्" इति निन्दाश्रवणात् । अधिकमन्यतो ऽवगन्तव्यम् ॥

*पञ्चधेति ।

मुहूर्त्तत्रितयं प्रातस्तावानेव तु सङ्गवः ।
मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोऽपि तादृशः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*दिनार्धसमयेऽतीते भुज्यते नियमेन यत् ।
एकभक्तमिति प्रोक्तमतस्तत्स्यादिवैव हि ॥

सायाह्नस्त्रिमुहूर्त्तः स्यात्सर्वधर्मबहिष्कृतः ।

इति व्यासेन

लेखाप्रभृत्यथादित्ये त्रिमुहूर्त्तगते रवौ ।
प्रातस्तु स स्मृतः कालो भागश्चाह्नः स पञ्चमः ॥
सङ्गवस्त्रिमुहूर्तस्तु मध्याह्नस्तत्समः स्मृतः ।
ततस्त्रयो मुहूर्त्तास्तु अपराह्णो विधीयते ॥
पञ्चमो दिनभागो यः स सायाह्न इति स्मृतः ।

इति पराशरेण चोक्तेः । *दिनार्द्धेति । भुज्यते—भावे लकारः भोजनं तदर्थः । यदिति क्रियाविशेषणं, न तु कर्म । तथा च भोजनं तदेकभक्तमित्यर्थः । एकं द्वितीयभोजनाभावविशिष्टं भोजनं व्रतस्वरूपं भक्तपदे तद्भोजने लक्षणोपगमात् । द्वितीयभोजनाभावः न नियमपदार्थः । तस्यैककेवलाद्यर्थत्वात् । नापि ब्रह्मचर्यादिसाधारणविधिनैव तल्लाभात् । किं तु ग्रासत्रयन्यूनत्वम् । नैयके भोजनं

अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः ।
द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ।
वक्त्रप्रमाणपिण्डांस्तु ग्रसेदेकैकशः पुमान् ॥

इत्यास्यप्रमाणसंख्यायां

दिनार्द्धसमये ऽतीते भुज्यते नियमेन यत् ।
एकभुक्तं तु तत्प्रोक्तं न्यूनं ग्रासत्रयेण तु ।

इति देवलेन तदुक्तेः । एकभक्तपर्याय एकभुक्तम् । एकं भोजनमिति व्युत्पत्तेः । तत्र नियमो ब्रह्मचर्यादिः सामान्यविधिलभ्यः । वस्तुतस्तु अयाचितवत् पाक्षिकोपवासस्तम्भावः भोजनोपवासान्यतरस्यैतद्व्रतस्वरूपता स्यादतो नियमपदम् । वासावृत्तिधर्मवत्त्वं तदर्थः । तादृशभोजनस्याटव्यादिफलादिभि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्कान्दोक्तेः *षोडशसप्तदशादिदण्डा मुख्यः कालः। दीपिकायां तु–*'मध्याह्नान्त्यदले त्रिभागदिवसे स्यादेकभक्तम्'इति। ततः सूर्यास्तपर्यन्तं गौणः। 'दिवैव हि' इत्यस्य *वैयर्थ्यापत्त्यैतत्परत्वात्। अत्र पूर्वेद्युर्व्याप्तिः*, परेद्युः, उभयेद्युर्व्याप्तिः, *तदभावः, अंशव्याप्तिः। तत्रापि साम्यं वैषम्यं चेति षट् पक्षाः। तत्राद्ययोरसंदेह एव, तृतीये तु पूर्वेऽह्नि गौणमुख्यव्याप्तेः सत्त्वात् पूर्वा इति माधवः। *युग्मवाक्यान्निर्णय इति हेमाद्रिः।

सम्भवेन न प्रतिग्रहानुज्ञाप्रसङ्गः। ब्रह्मचर्यवत्तन्निवृत्तेरपि सामान्यविहित एव सिद्धेः। *षोडशसप्तदशादिदण्डा इति। सप्तदशाष्टादशदण्डाविति त्वपपाठः। सन्ध्याभोजननिषेधस्य रागप्राप्तभोजनरतयेहाप्रवृत्तेः। *मध्याह्नेति। "पूर्वाह्णो वै देवानां, मध्यन्दिनो मनुष्याणाम्, अपराह्णः पितॄणाम्"इत्युक्तेस्त्रेधा विभागो ग्राह्यो न पञ्चधा। नापि

पूर्वाह्णः प्रहरं प्रातर्मध्याह्नः प्रहरं तथा।
आतृतीयादापराह्णः सायाह्नश्च ततः परम्।

इति गोभिलोक्तश्चतुर्धा। अह्नो मध्यं मध्याह्न इति व्युत्पत्तिविरोधात्। तुना च एवं सति पञ्चधा पक्षस्य वैयर्थ्यं स्यादतो ऽन्यत्र बहुस्मृत्युक्तत्वेनेहापि स एव ग्राह्यो नान्य इत्यरुचिः।

*वैयर्थ्येति। न ह्यनेन नक्तं व्यावर्त्यम्। तस्य व्यपदेशान्तरेणैव व्यावर्त्तितत्वात्, तत एव च दिवाभोजनसिद्धेः। अथ चिन्मुख्यकालाशये प्रधानस्य लोपवारणाय गौणकालो धीयते "अङ्गगुणाविरोधे च तादर्थ्यात्"इति सूत्रात् प्रधानासारेण गुणस्य नेतव्यत्वादिति तदर्थः। *व्याप्तिः–मध्याह्नोदलव्याप्तिः, न तु मध्याह्नव्याप्तिः। तत्पूर्वदलस्य एकभक्तकालाभावात्। *तदभावः–उभयेद्युस्तदस्पर्शः। *युग्मेति। अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्थपक्षे पूर्वैव*। गौणकालव्याप्तेः सत्त्वात्। वैग
णांशव्याप्तौ याऽधिका, सा ग्राह्या। साम्ये पूर्वा।
च *स्वतन्त्रैकभक्तनिर्णयः। *अन्याङ्गे *उपवास

स्वकालादुत्तरः कालो गौणः सर्वस्य कर्म्मणः।

इति मध्याह्नोत्तरकाले प्राप्ते "दिवैव हि" इति पुनर्विधिर्
मतः सायाह्नस्यापि संग्राहकतया निर्णायकं न युग्मवाक्यमि
चिः। *पूर्वैवेति। मुख्यकाले तत्तिथ्यभावेऽपि तत्रैवैकभक्तं का

तिथ्यादौ च भवेद्यावान् ह्रासो वृद्धिः परेऽहनि।
तावान् ग्राह्यः स पूर्वेद्युरदृष्टोऽपि स्वकर्मणि॥

इति कृत्स्नह्रासप्रक्षेपोक्तेः। यत्तु

तिथेः परस्या घटिकास्तु या स्युर्न्यूनास्तथैवाभ्यधिकाश्च ता
अर्द्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने

इत्यर्द्धप्रक्षेपवाक्यं, तदुपसंहारेणेष्ट्यङ्गसन्धिनिर्णयपरम्। स
श्च सर्वेषु पक्षेषु प्रातः।

प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकम्।

इत्युक्तेः, तत्र साकल्यवचनापादिततिथिसत्त्वाच्च। *स्वतन्त्र

प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रद।

इत्यादि। स्वातन्त्र्यं च हेतुगर्भम्। कर्मणः प्रधानत्वात्तदेव नि
र्थमनुसर्त्तव्यं न त्वङ्गं तिथ्यादीत्यर्थः। एतेन "पौर्वाह्णिकास्तु ति
इति कर्मांशे सामान्यं यथा 'उपोष्याः परसंयुताः' इति तदंशे वि
तिथ्यंशे सामान्यमिदं 'प्रतिपत्संमुखी कार्या' इति तदंशे विशेषे
ध्यते, तथा मध्याह्नःप्रतिपद्वचनादिना कुतो न बाध्यते इत्यपा
*अन्याङ्गे—दशम्यादौ प्रधाने निर्णीतायां तिथौ तत्पूर्वदि
तदुचितत्वात्। *उपवासेति। तच्च

एकभक्तेन नक्तेन तथैवायाचितेन च।
उपवासेन दानेन न निर्द्वादशिको भवेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निधौ च *तदनुसारेण निर्णयः ॥

अथ नक्तम् । *तच्च दिनानशनपूर्वं रात्रिभोजनम् । तत्र प्रदोषव्यापिनी ग्राह्या ।

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।

इति वत्सोक्तेः । प्रदोषस्तु–

त्रिमुहूर्तं प्रदोषः स्याद्भानावस्तं गते सति ।

नक्तं तत्र तु कर्तव्यमिति शास्त्रविनिश्चयः ॥

इति मदनरत्ने व्यासोक्तेः । तत्रापि त्रिदण्डोत्तरं कार्यम् ।

इत्यादिनोक्तम् । *तदनुसारेणेति ।

तिथिर्यथोपवासे स्यादेकभक्तेऽपि सा तथा ।

इति सौमन्तवमपि उपवासप्रतिनिध्येकभक्तपरम् । तेनाष्टौ तानीति गुर्वाज्ञा कृतैकभक्तमुपोष्यादिन एव ।

"नक्तं निशायां कुर्वीत"इत्यादौ नक्तपदं न कालार्थकं, विधातुमशक्यत्वापत्तेरित्यत्राह—*तच्चेति । न च नक्तं नक्तसाध्यमित्येवार्थः, तावता कथं भोजनलाभ इति वाच्यम् । प्राजापत्यादिषु भूयस एकभक्तायाचितोपवासादिभिः साहचर्यात् प्रायिकप्रतीतिकस्य भोजनस्य सिद्धेः । अत एव"नक्ताशी"इत्यादौ भोजनार्थकपदप्रयोगो न व्यर्थः । तावतैवार्थतो दिनाभोजनं विशेषणं लभ्यते । एवं च

मार्गशीर्षे सिते पक्षे प्रतिपद् या तिथिर्भवेत् ।

तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत् ॥

इत्यादौ पृथक् क्रियानिर्देशादेव प्रायिकप्रतीतिकं भोजनं रात्रौ लभ्यते । तदनुरोधेन चाङ्गभूतपूजादेर्दिवानुष्ठानमेव । अत एव नवरात्रस्य नक्तव्रतत्वं माधवाचार्यैरुक्तं संगच्छते । भोजनस्य प्रायिकप्रतीतिकतया तदप्रत्ययेऽप्यक्षतेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः।
इति स्कान्दोक्तेर्दण्डत्रयस्य संध्यात्वात्। तत्र
चत्वारीमानि कर्माणि सन्ध्यायां परिवर्जयेत्।
आहारं, मैथुनं, निद्रां, स्वाध्यायं च चतुर्थकम्॥

इति मार्कण्डेयेन भोजननिषेधात्।

*मुहूर्तोनं दिनं नक्तं प्रवदन्ति मनीषिणः।
*नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप॥

इति माधवीये भविष्योक्तेश्च। गौडास्तु-

प्रदोषो *ऽस्तमयादूर्ध्वं घटिकाद्वयमिष्यते॥

इति वत्सोक्तः प्रदोषः। सन्ध्या च दिनरात्र्योः स
मुहूर्तः।

इति स्कान्दाच्च। यत्यादीनामपि सायाह्ने-

ननु निषेधो वास्तविकसन्ध्यापर एवास्त्वित्यत आह-*मुहू
नमिति। नक्षत्रदर्शनादिति पूर्वत्राप्यन्वेति, काकाक्षिन्याया
नक्षत्रदर्शनावधिकं मुहूर्तोनं वास्तविकसन्ध्यारूपं नक्तं
तीत्यभिध्यानेन तस्य नक्तत्वव्युदासः नक्षत्रदर्शनमादायाह
इत्यभिमानेन तस्य पारिभाषिकसन्ध्यारूपस्य तद्व्युदासः।
स्तुतस्तु ननूक्तप्रदोषः कुतो मुख्यः कालः "न नक्तं निशि
नम्"इतिनिषेधोपबृंहितस्यात्मनो द्विगुणच्छायेत्युक्तदिनस्य मु
कालत्वेन तस्य "स्वकालादुत्तरः कालो गौण"इति वाक्येन
णत्वस्यैव सम्भवादित्यत्राह-*मुहूर्त्तोनमिति। शिवेनाहं
इति स्वाभिमतेनाभिधानात्। प्रवदन्तीत्यनेनोन्नेयनिषेधस्या
क्तस्यायोगाच्च। प्रदोषमुपजीव्य तत्प्रवृत्तेस्तस्य मुख्यत्वमिति भा
*नक्षत्रेति। ल्यब्लोपपञ्चमी। नक्षत्रदर्शनं प्राप्येत्यर्थः। *अ
मयादिति। तारकोदयादिति यावत्। सन्ध्याप्रदोषयोर्भेदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्धास्तमयात्सन्ध्या व्यक्तीभूता न तारका यावत् ।
तेजःपरि(१)हानिवशाद्भानोरर्धोदयं यावत् ॥

इति वराहोक्तेरित्याहुः, तन्न । *अस्य सन्ध्यावन्दनानध्यायादिपरत्वात् । अत एव तत्र खण्डमण्डलस्य सन्ध्यात्वमुक्तं विज्ञानेश्वरेण । यच्च मदनरत्ने नक्तस्य वैधत्वाद् रागप्राप्तभोजनगोचरो निषेध इत्युक्तम् । तन्न । *विधेर्निषेधाविरोधात् । अन्यथा *कपिञ्जलानित्यत्र

तस्यार्द्धास्तमयादित्यर्थमभिप्रेत्याह—*अस्येति । *विधेरिति । निषेधविषयपरिहारेणापि विधिचारितार्थ्यादिति भावः(२) । *कपिञ्जलो—गौरतित्तिरिः । अत्र वदन्ति नक्तभोजनस्य त्रिदण्डोत्तरत्वमयुक्तम् ।

निशानक्तं तु विज्ञेयं यामार्द्धे प्रथमे सदा ।

इति मुख्यतरकालस्य नैरर्थक्यात् । किं च दण्डत्रयं मुख्यकालः ।

---

(१) तेजःपरहानिवशादिति पाठः साधुः । तेजसः परस्य—अन्यस्य हानिवशात् । तमोहानिमारभ्येत्यर्थः ।

(२) अत एव 'मा हिंस्यात्' इतिनिषेधविषयचतुर्थादिकपिञ्जलपरिहारेण कपिञ्जलानिति बहुवचनस्य साधारण्येऽपि त्रित्वसंख्यायामेव पर्यवसानात् कपिञ्जलत्रिकमेव आलब्धव्यं, न तु ततोऽधिकमिति सिद्धान्ततमधिकरणमालायां कपिञ्जलाधिकरणे (अ० ११ पा० १ अधि० ८) तथा हि

कपिञ्जलेषु त्रित्वाद्याः पाक्षिकास्त्रित्वमेव वा ।
आद्यो बहुत्वसाम्यान्न त्रित्वेनैव कृतत्वतः ॥

अश्वमेधे "वसन्ताय कपिञ्जलानालभेत" इति त्रित्वचतुष्ट्वादिसंख्यानां बहुत्वसाम्यादिच्छया या काचिद्बहुत्वसंख्या स्वीकार्या इति चेत् । न, त्रित्वेनैव शास्त्रस्य कृतत्वात् । यो हि चतुष्ट्वादिसंख्यामुपादत्ते, तेन न तदन्तर्भूतं त्रित्वं वर्जयितुं शक्यम् । त्रित्वमुपाददानेन त्वनन्तर्भूतं चतुष्ट्वादिकं वर्जयितुं शक्यते । अतोऽवश्यंभावित्वेन प्रथमभावित्वेन लाघवेन च त्रित्वे उपात्ते शास्त्रार्थसिद्धौ ततोऽधिकपक्षिहिंसायां प्रत्यवायात् । तस्मात् त्रित्वमेवोपादेयमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमुच्यते ।

इत्युक्तेः । त्रिमुहूर्त्तं मध्यमः । "त्रिमुहूर्त्तं प्रदोषः स्यात्" इत्युक्तेः । निशीथान्तमधमः । "नक्तं निशायां कुर्वीत" इत्युक्तेः । एवं "चत्वारीमानि" इति वाक्ये सन्ध्या न पारिषिकी । मानाभावात् । परिभाषायाश्च अनध्यायप्रयोजकसंध्यार्जितादौ चारितार्थ्यात् । मदनरत्नोऽपि सम्यगेव । तथा हि-नादिसमभिव्याहारान्निषेधो रागप्राप्तभोजनपर एव न तु वैधपरः । विधितो यदर्थतया यत्प्राप्तं तदर्थतयैव तन्निषेधे विकल्पापत्तेः न च निषेधो विशेषविषयत्वेन बलीयान् । तस्य सामान्यविषयत्वादिना दुर्बलेनापि विधिनोपजीवितत्वादेव तुल्यबलत्वात् ।

यदपि कपिञ्जलत्रित्वेन विधिचारितार्थ्यान्न चतुर्थादीनां निषेधविषयत्वादालम्भनं, तदपि न । यतोऽग्नीषोमीयवत् फलार्थं विहिताया हिंसाया एव न निषेधस्पर्श इतीहापि न तत्स्पर्शः, पुनः स्वव्याप्यत्रित्वाद्यन्यतरद् बहुवचनार्थः । तत्र लाघवेन त्रित्वे विधिविषयो न चतुष्ट्वादि । द्रव्यगतसंख्याया अपि विधेयत्वसिद्धान्ततत्वादिति नातिप्रसङ्गः । अत एव पर्वरविवारादौ नक्तभोजनं रात्रौ भवत्येवेति वक्ष्यति । न च

ये त्वादित्यदिने ब्रह्मन्नक्तं कुर्वन्ति मानवाः ।
दिनान्ते तेऽपि भुञ्जीरन्निषेधाद्रात्रिभोजने ॥

इति वचनाद्गौणकाल एव तत्कर्त्तव्यमिति वाच्यम् । निषेधार्थं हेतूपन्यासवशान्निषेधस्य वैधेऽप्रवृत्तेः । वैधेऽपि तत्प्रवृत्तावन्याङ्गेऽपि प्रवर्त्तेत । तत्र प्रवर्त्तयितुमशक्यत्वात् । अन्यथा तद्द्वारा तदङ्गत्वसिद्धौ भानुसप्तम्यादिविहितनक्तादौ प्रवृत्तेः पुरुषार्थत्वम्, निषेधस्यापि क्रत्वर्थत्वपुरुषार्थत्ववैरूप्यं स्यात् । तस्मादेतत् भानुसप्तम्यादिविहितनक्तव्रतपरमेवेति ।

ननु प्रदोषमात्रस्य कर्मकालत्वमसंगतम् ।

प्रदोषव्यापिनी यत्र त्रिमुहूर्त्ता यदा दिवा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिभ्योऽधिकानां हिंसनं स्यात् । *सायंकाले नक्तं तु दिनद्वये प्रदोषास्पर्शे ज्ञेयम् ।

अतथात्वे परत्र स्यादस्तादर्वाग्यतो हि सा ।

इति जाबालिवचनात् ।

*प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ।
आत्मनो द्विगुणा छाया मन्दीभवति भास्करे ॥
तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम् ।

इति स्कान्दाच्च । *यत्यादीनामपि सायाह्ने नक्तम् ।

नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः ।
यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरम्* ॥

इति तत्रैव स्मृत्यन्तरात् । इदमपुत्रविधुरोपलक्षणम् । पुत्रवतस्तु रात्रावेव ।

अनाश्रमोऽप्याश्रमी स्यादपत्नीकोऽपि पुत्रवान् ।

इति संग्रहोक्तेः । सौरनक्तं तु दिवैव ।

*त्रिमुहूर्तस्पृगेवाह्नि निशि चैतावती तिथिः ।
तस्यां सौरं भवेन्नक्तमहन्येव तु भोजनम् ॥

तत्र नक्तव्रतं कुर्यात्स्वाध्यायस्य निषेधवत् ॥

इति वाक्येन सायमोऽपि लाभादित्यत्राह—*सायमिति "यतो हि" इति सायमो गौणत्वार्थम् । अन्यथा पौनरुक्त्यात् । सायंकाल एव नक्तानुष्ठानविधानपूर्वककालवचनमप्याह-*प्रदोषेति । *यत्यादीनामिति । यद्यपि सायंकालो गौणः "नक्तादिव्रतयोगेषु" इति वाक्यात्, तथापि यत्यादिषु स मुख्यः । *सदिवाकरमिति ।

सदिवाकरं तु तत्प्रोक्तमन्तिमं घटिकाद्वयम् ।

इति वचनं तु तस्य मुख्यतरत्वबोधकम् । पूजादिकं तु प्रधानाविरोधेन तत्रैव प्रागेव वा कार्यम् । *त्रिमुहूर्त्तेति । सायंप्रदोषव्याप्त्योः प्राक्पश्चान्निर्देशाभ्यां सायंव्याप्तेर्मुख्यत्वप्रत्ययेन दिवैवेति ला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सुमन्तूक्तेः। हरिनक्ते *विशेषः कालादर्शे स्का
उदयस्था सदा पूज्या हरिनक्तव्रते तिथिः।
इति। अन्यनक्तं तु संक्रान्त्यादावपि रात्रावे
*निषेधस्य रागप्राप्तभोजनगोचरत्वेन वैधाबाधकत्वा
दिनद्वयव्याप्तौ परा।
उभयोर्यदि वा तिथ्योः प्रदोषव्यापिनी तिथिः।
तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा यतः॥
इति कालादर्शे जाबालिवचनात्। अन्यपक्षेषु *प
भक्तवन्निर्णयः। अत्र विशेषो मदनरत्ने गारुडे-

भः। एतेन सायाह्नमुख्यकालिकनक्ते एकैकदिन एव कालस्
एकदेशेन वा व्याप्तौ सैव ग्राह्या। दिनद्वयव्याप्तौ पूर्वा। गौणमु
व्याप्त्योः सत्त्वात्। दिनद्वयास्पर्शे साम्येन वैषम्येण वा दि
द्वयस्पर्शे च पूर्वैव गौणव्याप्तेः सत्त्वादित्युक्तं भवति। *विशेषा
सायाह्नप्रदोषव्याप्त्योरपवादः। *निषेधस्य—
अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमीदिवा।
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत्॥
इत्यादिलभ्यस्य। प्रदोषमुख्यकालिकनक्ते त्वाह-*दि
येति। *परेति। तिथ्यादिषु भवेद्यावान्"इति वा
कर्मतिथेः पूर्वदिने कर्मकालासत्त्वद्योतनाच्चेत्यपि द्रष्टव्य
*एकभक्तवदिति। यथा एकभक्ते गौणमुख्यव्याप्ती नि
यिके, तथा नक्ते ऽपीत्यर्थः। तेन एकैकदिने एव व्य
मुख्यकालव्याप्तिरेव। दिनद्वयास्पर्शे गौणकालव्याप्तिरेव। तदु
वान् सायंकाले नक्तं त्वित्यादि। साम्येन वैषम्येण वांशतो व्य
परैव। गौणकालव्याप्तेराधिक्यात्। यत्र वैषम्येणांशतो व्याप्ती
बाधिका तत्र पूर्वैव, आधिक्यात्। आधिक्यस्यापि निर्णायकत्व
आधिक्यं च देवपूजा-भोजनपर्याप्तं विवक्षितमिति संप्रदायः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च निर्णयो भोजनरूपे नक्त इव पूजादिरूपे नक्तेऽपीति मत्वा त्रयोदशीप्रदोषगोवत्सद्वादश्यादौ न पृथक् निर्णयमभिप्रयन्ति माधवादयः। "प्रदोषे शिवमर्चयेत्"इत्यादिना प्रदोषस्य मुख्यकालत्वावगमे सायाह्नस्य तत्र गौणकालत्वं लभ्यते । अन्यथा 'प्रदोषव्यापिनी न स्यात्'इत्यादिना तत्र नक्तविधानानुपपत्तेरिति तदभिप्रायः । उच्छृङ्खलास्तु त्रयोदशीप्रदोषे शिवपूजाया एव प्राधान्यान्न त्रिमुहूर्त्तं प्रदोषः । 'त्रिमुहूर्त्तं प्रदोष' इत्यस्य भोजनरूपनक्तपरत्वात् । 'नक्तं निशायां कुर्वीत'इत्युक्तेः ।

अथास्तु तत्र सार्द्धसप्तनाडीरूपः प्रदोषः ।
अस्तमानं समारभ्य सार्द्धाः सप्त च नाडिकाः ।
प्रदोष इति विख्यातस्त्वर्द्धयाममतः शृणु ॥

इति वचनादिति, तन्न । एतस्य प्रकरणेन नैमित्तिकपूजाद्यङ्गत्वादत्र प्रवृत्त्यसम्भवात् । किं तु नाडीचतुष्टयमेव ।

यजनं प्रति मानं तु उत्तमं परिकीर्त्तितम् ।
उदये चैव मध्याह्ने प्रदोषे चार्द्धयामिकम् ॥

इत्यनारभ्याधीतवचनात् । यत्तु

प्रदोषो ऽस्तमयादूर्ध्वं घटिकाद्वयमुच्यते ।

इति माधवः, तत्र प्रशस्तमित्यध्याहार्यम् । यच्च

प्रदोषोऽस्तमयादूर्ध्वं घटिकाद्वयमुच्यते ॥

इति तिथितत्त्वं, तत्र प्रशस्ततरमित्यध्याहार्यम् । तत्र एकत्र दिने साकल्येन एकदेशेन वा प्रदोषव्याप्तौ न सन्देहः । दिनद्वये प्रदोषव्याप्तौ प्रदोषद्वयास्पर्शे साम्येनैकदेशव्याप्तौ च परा । संकल्पकालेऽपि भावात् । यत्र पूर्वप्रदोषेऽधिका उत्तरप्रदोषे त्वल्पा तदाप्युत्तरैव 'दिवारात्रिव्रतं च'इति स्कान्दात् । पठन्ति च

अस्तोत्तरं यत्र मुहूर्त्तयुग्मं त्रयोदशी चेत् खलु स प्रदोषः ।
दिनद्वयेऽप्यस्ति न वा समैकदेशे ऽथवा तत्र परैव कार्या ॥
व्याप्तिर्यदा स्याद्विषमांशिका तु तदा बहुत्वेन विनिर्णयः स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वयोरभावेऽप्यथ गौणकालव्याप्त्या तु पूर्वामपि केचिदाहु।
इति । पूजा च त्रयोदश्युपलक्षितप्रदोषे कार्या ।

ये नार्चयन्ति गिरिशं महिते प्रदोषे
येऽभ्यर्चितं शिवपदं प्रणमन्ति नान्ये ।
ये तत्कथां श्रुतिपुटैर्न पिबन्ति मूढा-
स्ते जन्मजन्मसु भवन्ति नरा दरिद्राः ॥

इत्यनिष्टस्मरणात् । आरम्भश्च शनिप्रदोषे कार्यः ।

यदा त्रयोदशी शुक्ला मन्दवारेण संयुता ।
आरभेत्तद्व्रतं तत्र सन्तानफलसिद्धये ॥

इति तत्रैवोक्तेरित्याहुः । तन्न । माधवादिभिरक्लृप्तस्यार्द्ध
प्रदोषस्य धार्मिकैरनादृतत्वात् । एवमन्याङ्गे उपवासप्रतिनिधौ
नक्ते तादृशैकभक्तन्याय एवैकभक्तवदित्यनेन लभ्यते ।

इदं तु बोध्यम् । यथैकभक्तं कुर्वीतेत्यादौ एकभक्तं न रा
भोजननिवृत्तिमात्रं निवृत्तेरव्रतत्वात् ।

नियमो व्रतमस्त्री तच्चोपवासादि पुण्यकम् ।

इति कोशात् । पुण्यं सुकृतं पुरुषार्थसाधनादृष्टहेतुः क्रिया,
दृशं द्रव्यं चेति तत्पर्यायव्रतपदस्यातदर्थकत्वात् । न हि
वृत्तेर्भावनावाक्यार्थवादिनो ऽदृष्टजनकत्वमुपयन्ति । तत्कुत इति
त्कालान्तरभाविफलाभावात् । नापि कार्यवाक्यार्थवादिनः
स्तत्रादृष्टोपगमेऽपि तस्य पुरुषार्थासाधनत्वोपगमात् । कथं च
क्षेतोद्यन्तमादित्यम्"इत्यादौ सङ्कल्पविधित्वसिद्धान्तः । निवृत्तेर्
भावोपक्रमाबाधेन निषेधत्वस्यैव ज्यायस्त्वात् । तस्य व्रतत्वनि
हाय रात्रिभोजनाभावसङ्कल्पे लक्षणा वा स्यात् ।

अथैवं मासव्यापिचतुर्थकालिकत्वाद्यनुष्ठाने एकादश
उपवासानापत्तिः । तद्विधिषु मत्वर्थीयठन्प्रत्ययान्तचतु
लिकादिपदानां चतुर्थकालाहार इत्याद्येकवाक्यतया भो
त्तरचतुर्थकालसम्बन्धपरत्वात् । अब्भक्षो वायुभक्ष इत्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'हविष्यभोजनं *स्नानं सत्यमाहार*लाघवम् ।

वैकपदेऽप्यवधारणगर्भार्थवशेन त्र्यादिकालगतभोजननिवृत्तेश्चतुर्थकालगतनियमस्य च प्रतीतेः । मैवम् । चतुर्थकालाहारादिपदानां तादृशनिवृत्तावेव तात्पर्यात्, न तु नियमेऽपि । तत्पदस्य कालांशे परिसंख्यात्वेन भोजनांशे नियमत्वे भिन्नप्रसरतापातात् । व्रतत्वनिर्वाहश्च 'चतुर्थकालाहारो ब्राह्मणान् भोजयेत्'इत्यादिविशेष्यभूतब्राह्मणभोजनादिनैव । चान्द्रायणादौ च चन्द्रगत्यनुवर्त्तनाद्यन्यथानुपपत्त्या इतरकालभोजननिवृत्तिविशिष्टचन्द्रोदयकालभोजनस्य व्रतत्वम् । तथा 'नक्तं कुर्वीत'इत्यादौ न दिनभोजननिवृत्तिमात्रमित्यभिप्रेत्यैकभक्तवदिति, पूर्वं रात्रिभोजनमिति चोक्तम् । अत एव 'एकभक्तं कुर्वीत''नक्तं कुर्वीत'इत्यादौ 'चान्द्रायणं कुर्वीत' इत्यादौ च न उपवासेन तत्सिद्धिः, नापि सङ्कल्पलक्षणापत्तिः । *स्नानमिति । पूजादेः प्राक् कर्माङ्गं प्रधानकालम् । *आहारेति । यद्यप्यत्र 'न्यूनं ग्रासत्रयेण तु' इत्येकभक्तवद्विशेषतो न वचनं दृश्यते, तथापि इह प्राजापत्यप्रकरणगता नक्तभोजनविषया ग्रासंख्या ग्राह्या । साम्यात् । एवमेव

अयाचिताशी मितभुक् परां सिद्धिमवाप्नुयात् ।

इत्यादौ मितभुक्त्वमपि तद्वदेव अयाचितभोजनविषयग्रासंख्ययोपपाद्यम् । सा चापस्तम्बेन

सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥

इति नक्ते द्वाविंशतिरुक्ता । तद्विरुद्धा च नक्ते पराशरेण

सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः ।
चतुर्विंशतिरायाच्याः परे निरशनास्त्रयः ॥ इति ।

तद्विरुद्धा च नक्तायाचितयोश्चतुर्विंशतिमते

प्रातस्तु द्वादश ग्रासा नक्तं पञ्चदशैव तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अग्निकार्यमधःशय्यां नक्तभोजी षडाचरेत् ॥ अग्निकार्यं व्याहृतिहोमः । इति नक्तम् ॥

अयाचिते तु*विशेषवचनाभावात्पक्षे*उपवासे उपवासवन्निर्णयः ॥

अथ नक्षत्रव्रतकालः । विष्णुधर्मे-

उपोषितव्यं नक्षत्रं यस्मिन्नस्तमियाद्रविः ।

अयाचिते तु द्वौ चाष्टौ प्राजापत्यो विधिः स्मृतः ॥ इति।

अत्र शक्ताशक्तभेदेन व्यवस्था ।

*अग्निकार्यमिति। यन्नक्ते विशेषतस्तन्नोक्तं, तत्राह-*अग्नि हृतिहोम इति । विशेषतो यदुक्तं तस्योपसंहारो ऽयमित्यर्थः व्यस्तसमस्तव्याहृतिः । समस्तव्याहृतिरेवेति केचित् ।

*अयाचिते त्विति। अयाचितान्नभोजनं यदैव लाभस्तदैव दिने वा रात्रौ वा निषिद्धकालं विहाय इति तद् अहोरात्रसाध्यं न तु कालविशेषापेक्षापि। पराधीनत्वात् । तत्र च 'दिवारात्रि यच्च'इति सामान्यमेव प्रवर्त्तते । यदा तु तत्तिथिरेकदा दिने एव, परदिने रात्रावेव, तदाऽहर्व्यापिनी ग्राह्या । 'अह तिथयः' इति सामान्यवचनात् । तदुक्तं *विशेषवचनाभा दिति । वस्तुतस्तु

एकभक्तायाचितयोर्या विंशद्घटिका तिथिः ।

सा तिथिः सर्वदा ज्ञेया नक्ते सायाह्नसंगता ॥

इति शार्ङ्गधरीये नारदोक्तेर्निर्णयः । सम्भावितपक्षान्तरेष्वा *पक्ष इति ।

अथायाचितव्रतम् । अथापरं त्र्यहं न कं च न याचेतेत्या अत्र नञो याचितमदनीयं न भोक्ष्ये इति सङ्कल्पे लक्षणा। भावो मेण 'नेक्षेतोद्यन्तम्'इतिवन्निषेधरूपत्वाभावात् । तत्रोपवासेन वपि 'त्र्यहमद्यादयाचितम्' 'अयाचिताशी मितभुक्'इत्यादौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*युज्यते यत्र वा तारा निशीथे शशिना सह ॥ इति ।
माधवीये स्कान्दे—

नञ्श्रवणाद् व्रतविहितणिनिश्रवणाच्च याचितभिन्नमद्यादेवेत्येवं साधनविशेषविशिष्टभोजननियमरूपवाक्यार्थप्रत्ययाद् याचितभिन्नमदनीयं भोक्ष्ये इत्येवंरूपस्यायाचितस्य कथमुपवासेन सिद्धिः ? । नैवम् । समस्तनञ्वाक्येष्वपि लाघवेन—प्राप्ते भोजने याचितभिन्नरूपसाधनविशेषनियम एवायं, न त्वशनरूपधात्वर्थनियमोऽपि गौरवात् । "ऋतौ भार्यामुपेयात्" इत्यादौ तु केवलधात्वर्थनियम एव । अगौरवात्, ऋतोर्निमित्तत्वेनाविधेयत्वात् । अधिकमन्यत्रानुसंधेयम् । दिनान्तरे याचितस्यापि तद्दिने भार्यादि प्रति विना यानं भोजने व्रतभङ्गवारणाय तद्दिनाधिकरणकयाचितभिन्ननियमः, तादृशयाच्ञावर्जनसङ्कल्पो वा व्रतमिति । गौणकालमाह—* युज्यते इति । एवं च परेद्युरेवास्तमययोगे निशीथयोगिनीं पूर्वां विहायोत्तरैव ग्राह्या । अस्तमयस्य मुख्यकालत्वात् । दिनद्वयेऽस्तमयायोगे पूर्वैव । निशीथस्य गौणकालत्वात् ।

यत्रार्द्धरात्रादर्वाक् तु नक्षत्रं प्राप्यते तिथौ ।
तत्र ऋक्षव्रतं कुर्यादतीते पारणं भवेत् ॥

इति वचनाच्च । यत्तु

सा तिथिस्तच्च नक्षत्रं यस्यामभ्युदितो रविः ।
तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् ॥

इति, तद् अहोरात्रासाध्यदानादिविषयम् ।

तन्नक्षत्रमहोरात्रं यस्मिन्नस्तङ्गतो रविः ।
यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं भवेत् ॥

इति मार्कण्डेयं तु स्पष्टमेव तत्साध्यविषयकम् । औदयिकत्वं च त्रिमुहूर्त्तत्वसहितमेव, न तु केवलम् । तिथौ तथा दर्शनात् । एवं च दिनद्वये तथात्वे पूर्वमेव पूर्णत्वात् । श्राद्धे त्वपराह्णादेः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तत्रैवोपवसेदृक्षे यन्निशीथादधो भवेत् ।
उपवासे यदृक्षं स्यात्तद्धि नक्तैकभक्तयोः ॥

अथ व्रतपरिभाषा ॥ तत्राधिकारिणो मदनरत्ने भवि

*अनग्नयस्तु ये विप्रास्तेषां श्रेयो विधीयते ।
व्रतोपवासनियमैर्नानादानैस्तथा नृप ॥

अनग्निग्रहणमुपवासविषयम् । अत एव देवलः-

*आहिताग्निरनङ्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नताम् ।

प्रतिपदोक्तत्वान्नक्षत्रस्य तद्व्याप्तिरेवाऽऽदर्त्तव्या । कर्मकालस्य तिथिपदस्य नक्षत्रोपलक्षणत्वात् ।

नक्षत्रे खण्डिते येन व्याप्तः कालस्तु कर्मणः ।
नक्षत्रकार्याण्यत्रैव तिथिकर्म तथैव तु ॥

इति माधवोक्तेश्च । नक्तैकभक्तयोरुक्तरीत्या प्रतिपदोक्त त्काले प्राप्तेऽपवादमाह—*तत्रैवेति । उत्तरार्द्धेनोपवासन्यायो देशादस्तमयव्याप्तिलाभेऽपि दिनद्वये तदभावे तिथिवत्प्रदोषम न्हयोः प्राप्तौ तदपवादार्थं निर्णीतोपवासकालानुवादकं पूर्वार्द्ध

फलभोक्तृत्वे सति कर्मकर्तृत्वमधिकारः । तद्वन्तः सर्वे अधिकारिणः । सामान्यतो

निजवर्णाश्रमाचारनिरतः शुद्धमानसः ।

इत्यादिस्कान्दाद्युक्तेः । तत्र शूद्रादेरध्ययनाभावाद्वेदमन्त्राण सम्भवेन तद्वाराऽङ्गिन्यप्यनधिकारे प्राप्ते वक्ष्यति—शूद्रस्यापीत्यादि *अनग्नय इति । विप्रत्वमविवक्षितमुद्देश्यगतत्वात्, नापि "रा राजसूयेन यजेत" इत्यादिवदधिकारसंकोचकम् । अन्येषामप्य कारात् । *आहिताग्निरिति । यत्तु "अश्नन्त एव सिध्यन्ति इत्युक्तावपि पञ्चाहुतिमात्रमेवोपवासदिने कार्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गृहस्थो ब्रह्मचारी च योऽनश्नंस्तु तपश्चरेत् ।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः ॥

इत्यादौ प्राणाग्निहोत्रलोपे एव दोषोक्तेरिति, तन्न । तावता "अश्नन्त एव सिध्यन्ति" इति (१) तदसाधारणकार्यासिद्धेः, अनडुद्दृष्टान्तेन तथैव प्रतीतेः । किं च यदि 'यद्यदन्नं प्रथममागच्छेत् तत्तद्धोमीयम्' इत्युपासनाविशेषरूपे परिषेचनादिपूर्वक 'प्राणायस्वाहा' इत्यादिभोजनाङ्गपञ्चाहुतिरूपे वा प्राणाग्निहोत्रविधौ भोजनं विधीयेत, तदा तल्लोपे स्यादप्यवकीर्णित्वम् । रागप्राप्तभोजनमाश्रित्य गुणविशेषविधाने चोपवासविधिवशान्निषेधवशाद्वा भोजनरूपाश्रयाभावेन तदननुष्ठाने को दोषः । यदि तु प्राणाग्निहोत्रपदेन तदाश्रयीभूतं भोजनमेवोच्यते । तच्च नियमितमेव "सायं प्रातर्द्विजातीनाम्" इत्यनेन । तत्रोत्तराश्रमिणोश्चतुर्थकालिकैकभुक्तादिविधानेन पूर्वाश्रमिपरमिति तल्लोपे दोषोक्तिसङ्गतिरिति, तदाऽपि सामान्यरूपस्य तस्य विधिनिषेधाभ्यां काम्यविधिना वा बाध एव । इत्थं च "प्राणाग्निहोत्रलोपेन" इति "तेन ह्यन्नं क्रियते" (२) इतिवद्धेत्वर्थवादः । "अनश्नन्" इति तु अविच्छिन्नानुष्ठीयमानमासोपवासादिपरम् । "कौटसाक्ष्यं तु कुर्वाणान्" इतिवद् वर्त्तमानकालवाचिप्रत्ययेनाभ्यासप्रतीतेः । अयमपि निषेधः

---

(१) पञ्चाहुतिमात्रभक्षणेऽपि अशननिष्पाद्यनित्याग्निहोत्रहोमादिकरणक्षमशक्त्यसिद्धेरित्यर्थः ।

(२) "तेन ह्यन्नं क्रियते" इत्यादौ हिशब्दश्रुत्या हेतुत्वावगमात् तस्य च 'येन येनान्नं क्रियते, तेन तेन होतव्यम्' इतिव्याप्तिवचनोत्थापकतया सर्वान्नकरणविधिकल्पकत्वेन प्रयोजनवत्त्वाद् हेतुपरत्वम् । तथा च शूर्पवद् दर्वीपिठरादीनामप्यन्नसाधनत्वाविशेषादिच्छया शूर्पेण सह दर्व्यादीनां विकल्पः इति चेत् । न, 'शूर्पेण जुहोति' इत्यत्रान्यानपेक्षतृतीयाश्रुत्या शूर्पस्य होमकरणत्वं, दर्वीपिठरादिकानां तु कल्पितव्याप्तिवचनेनेति प्रबलश्रुतेः शूर्पस्यैव सर्वत्र प्रवेशाद् विकल्पानुपपत्तेर्हेतोर्व्यर्थत्वात्प्ररोचनायाऽर्थवादत्वम् । तद्वत् प्रकृतेऽपि, इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकादश्यादौ तु *वचनाद्भवतीति वक्ष्यामः। स्याप्यधिकारः।

शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति।
वेदमन्त्रस्वधास्वाहावषट्कारादभिर्विना॥

श्रौताधिकारिण एव। मासोपवासादिविधेर्निरवकाशतापत्त्या प्रवृत्त्यसम्भवात्।

मासपक्षोपवासेन मन्यन्ते यत्तपो जनाः।
आत्मतन्त्रोपघातस्तु न तपस्तत्सतां मतम्॥

इति वाक्याच्च। प्रधानकमर्थकतन्त्रपदेन बलवत्तरश्रौतग्रह मासपक्षेत्युपलक्षणम्। संलग्नोपवासत्रये तात्पर्यम्। तेन ब्रह्मच श्रौताधिकारिणोः प्राजापत्यादावपि दण्डकलितवत्पक्ष एव, तु स्वस्थानवृद्धिमत्पक्षः; संलग्नोपवासत्रयापातादिति बोध्यम्। चित्तु प्राणलोपेनाग्निहोत्रलोपेन चेत्यर्थः। अयं च पूर्वाश्रमिणो मरणान्तिकानशनरूपतपसि दोषो नोत्तराश्रमिणोः कर्माशक्ति विरक्त्यादिना तदनुत्थानादिति व्याचख्युः।

*वचनादिति। नित्यस्य काम्यस्य वा स्मार्त राणिकान्यतरस्योपवासस्यानुष्ठाने ब्रह्मचार्याहिताग्न्योरध्ययनाग्निहोत्रादिस्वकर्मलोपस्तस्य प्रतिनिधिद्वारकत्वं वा स्व दतोऽयं तन्निषेधो देवलेनोक्तः। स च न सर्वथा नि त्यस्य (१)गौणपक्षसम्भवात्, किं तु काम्यस्यैव तदभावात् न च काम्यस्य प्राबल्यम्। विरोधाभावेन श्रौताद् दुर्बलत्वात् निषेधपालनं तु तत्र द्वयोरपि 'गृहस्थो ब्रह्मचारी च आहिताग्नि

(१) नित्योपवासस्य—
उपवासनिषेधे तु भक्ष्यं किञ्चित् प्रकल्पयेत्।
न दुष्यत्युपवासेन उपवासफलं लभेत्॥
इतिवायवीयवचनेन विहितानुकल्पफलादिभिरपि सिद्धेर्बाधनेन षेधाविरोधादिति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति व्यासोक्तेः । प्राच्यास्तु वैश्यशूद्रयो*द्विरात्रा-
धिकोपवासनिषेधः ।

वैश्याः शूद्राश्च ये मोहादुपवासं प्रकुर्वते ।
त्रिरात्रं *पञ्चरात्रं वा तेषां *व्युष्टिर्न विद्यते ॥
चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते ।
त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिः ॥

इति हेमाद्रौ वचनादित्याहुः । *यावदुक्तनिषेध इत्येके ।
प्रकरणात् *महातपोविषय इति युक्तम् ।
एवं स्त्रीणामपि* । यत्तु—स्कान्दे

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
भर्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि ॥
यद्देवेभ्यो यच्च पित्रादिकेभ्यः
कुर्याद्भर्ताऽभ्यर्चनं सत्क्रियां च ।
तस्यार्थे वै सा फलं नान्यचित्ता
नारी भुङ्क्ते भर्तृशुश्रूषयैव ॥

आदित्यपुराणे—

इत्यग्रिमवचनादित्यर्थः । *द्विरात्रेति । द्विरात्राधिककालव्यापिन
उपवासस्य निषेध इत्यर्थः । *पञ्चरात्रमिति तु कैमुतिकन्यायेन
त्रिरात्रनिषेधस्तुतिः । *व्युष्टिः—फलम् । *यावदुक्तेति ।
यावदंशे निषेधवाक्यं, तावदंशे निषेध इत्यर्थः । एतन्मते

चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते ।
त्रिरात्रं तु न धर्मज्ञैर्विहितं ब्रह्मवादिभिः ।

इत्येतन्नास्ति । नन्वेवं पञ्चरात्रनिषेधो व्यर्थः कैमुतिकन्याया-
वलम्बस्यागतिकगतित्वादत आह—*महातप इति । त्रिरात्राद्य-
ङ्गनिषेधोऽङ्गिनिषेधार्थ इत्याशयः । *स्त्रीणामपीति । अधिकार इति
वर्त्तते ।'निजवर्णाश्रमाचारनिरत' इत्यादौ पुंस्त्वमतन्त्रमिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारी खल्वननुज्ञाता भर्त्रा वापि सुतेन वा।
विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदेहिकम् ॥

इति। और्ध्वदेहिकं—पारलौकिकम्। तद् भर्त्रननुज्ञ विषयम्।

*भार्या पत्युर्मतेनैव *व्रतादीनाचरेत्सदा।

इति कात्यायनोक्तेः। अत्र विशेषो हरिवंशे—

---

*भार्येति। "नास्ति स्त्रीणाम्" इति निषिद्धोऽधिकारो ज प्रति प्रसूयत इति भावः।

नन्वेवं विधवायाः कुतोऽधिकारः ?। भर्त्तुरभावेन तदनुज्ञ अप्यभावात्। न च 'सुतेन वा' इति सुतानुज्ञयाऽधिकारः। 'यत्क त्यौर्ध्वदेहिकम्' इत्यस्य लेड्रूपत्वकल्पने मानाभावादिति चेन्न। 'न स्त्रीणाम्' इत्यादेर्न व्रतादिनिषेधे तात्पर्यं, किन्त्वनुज्ञामात्रे यतः। व्रतादिकमनुज्ञया कुर्यादिति कात्यायनवाक्यार्थः। *पत्युरि पितृपुत्रादेरुपलक्षणं, 'न स्वातन्त्र्यं क्वचित्स्त्रियः' इत्युक्तेः। क्वचिदि प्रशस्त-ब्राह्मणादिसङ्ग्रहार्थम्। अत एव प्रशस्ता विधवा ब्राह्म द्यभावे दासीदासादि अनुज्ञाप्य व्रतमारभन्ते। 'सुतेन वा' इति तत्सापेक्षतदीयधनाद्यभिप्रायकं, पित्रादेरुपलक्षणं च। अननुज्ञ तु याज्ञवल्क्यः

प्रातिकूलं गुरोः कृत्वा प्रसाद्यैव विशुद्ध्यति। इति।

स्मृत्यन्तरे च

अथ वा यद्गुरुर्ब्रूयात्तत्कार्यमविशङ्कया।
निग्रहेऽनुग्रहे वापि गुरुः सर्वत्र कारणम् ॥ इति।

अवमाने त्वधिकम्। 'भर्तृव्यतिक्रमे कृच्छ्रम्' इत्यापस्तम्बोक्तेः *व्रतादीनिति। आदिना पुष्पालङ्कारधारणादिस्वधर्मपरिग्रहः अनुज्ञातायामपि श्रौते नाधिकारः। वेदाध्ययनाद्यभावात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*स्नानं चेति

*स्नानं च कार्यं शिरसस्ततः *फलमवाप्नुयात् ।
*स्नात्वा स्त्री प्रातरुत्थाय पतिं विज्ञापयेत्सती ॥

*तथा–

गृहीत्वौदुम्बरं पात्रं सकुशं साक्षतं तथा ।
गोशृङ्गं दक्षिणं सिञ्च्य(१) प्रगृह्णीयाच्च तज्जलम् ॥

औदुम्बरं—ताम्रमयम्* ।

ततो भर्तुः सती दद्यात्स्नातस्य प्रयतस्य च ।
आत्मनश्चाभिषेक्तव्यं ततः शिरसि तज्जलम् ॥

अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् ।

इत्यादिस्नानान्तरवारणाय । किं च

नित्यमभ्युदयात्पूर्वं स्नातव्यं शुद्धिमिच्छता ॥
एष साधारणो धर्मश्चतुर्वर्णस्य नित्यशः ।
स्त्रीभिः शूद्रैश्च कर्त्तव्यं मन्त्रवर्जं विगाहनम् ॥

इति स्नाने प्राप्ते पुनर्विधानं ज्ञापयति—सुवासिनीनामशिरस्कमेव प्रातः स्नानमिति । तत्र व्रताङ्गसशिरस्कताविधानार्थमेतत् । *फलं–व्रतवैगुण्यराहित्यम् । तेन नित्यव्रतसङ्ग्रहः । नियमान्तराह–*स्नात्वेति । *सतीति ।

उपवासार्थमथवा व्रतकार्थं धृतव्रता ।
स्पृष्ट्वा कराभ्यां चरणौ सततं सक्तमस्य च ॥

इत्युत्तरश्लोकः । सक्तम्–अनुरक्तम् । चकाराद् विज्ञापना व्रतवैगुण्यहान्यर्थवत् स्वब्रह्मचर्यादिसंरक्षणार्थम्(२) । सङ्कल्पप्रकारमाह—

---

(१) सिक्त्वा इति पाठः क्वचित्पुस्तके ।

(२) प्रातरुत्थाय स्नात्वा धृतव्रता सती—पतिव्रता स्त्री अस्य—पत्युः चरणौ कराभ्यां स्पृष्ट्वा उपवासार्थं व्रतार्थं विज्ञापयेत्, सततं—निरन्तरं सक्तम्–अनुरक्तं पतिं तु स्वब्रह्मचर्यादिसंरक्षणार्थं च विज्ञापयेदित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपवासेषु कर्तव्यमेतद्धि व्रतकेषु* च । इति।
सर्वव्रतेषु संकल्पविधिश्च भारते-

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः।
उपवासं तु गृह्णीयाद्यद्वा *संकल्पयेद्बुधः॥

हस्तेनैवेत्यर्थः(१)।

अथ व्रतारम्भकालः। मदनरत्ने गार्ग्यः-

अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे।
उद्यापनमुपारम्भं व्रतानां नैव कारयेत्॥

रत्नमालायाम्—

*सोमसौम्यगुरुशुक्रवासराः
सर्वकर्मसु भवन्ति सिद्धिदाः।
भानुभौमशनिवासरेषु च
प्रोक्तमेव खलु कर्म सिध्यति॥

तथा

*विरुद्धसंज्ञा इह ये च योगा-
स्तेषामनिष्टः खलु पाद आद्यः।

---

*तथेति। *ताम्रमयमिति। 'उदुम्बरं स्मृतं ताम्रम्'इति विश्व
*व्रतकेष्विति गोबलीवर्दन्यायेन। ताम्राभावे त्वाह-*यद्वे
*संकल्पयेत्—हस्तेन जलं संगृह्य संकल्पयेत्। यद्वा 'वार्येव
येत्'इति पाठेऽप्ययमेवार्थः। 'यथा संकल्पयेत्'इति पाठे यत्
मिच्छेदित्यर्थः।

*सोमेति। 'उदयादुदयं वार' इति वचनात् तत्र न
योऽपेक्षितः। *विरुद्धसंज्ञाः-विष्कम्भा-ऽतिगण्ड-

---

(१) यद्यपि पुस्तकान्तरे एतदुत्तरं 'यथेति पाठे यत्फल
दित्यर्थ'इत्यधिकः पाठो दृश्यते, तथापि स टीकायामपि
स्माभिर्मूले उपेक्षितः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सवैधृतिस्तु व्यतिपातनामा
सर्वोऽप्यनिष्टः, परिघस्य चार्धम् ॥
*तिस्रस्तु योगे *प्रथमे, सवज्रे,
व्याघातसंज्ञे नव, पञ्च शूले।
गण्डेऽतिगण्डे च षडेव नाड्यः
शुभेषु कार्येषु विवर्जनीयाः ॥

संग्रहे—

कृष्णेऽग्निदिशयोरूर्ध्वं सप्तमीभूतयोरधः* ।
शुक्ले वेदेशयोरूर्ध्वं भद्रा प्राग्वसुपूर्णयोः ॥

गण्ड-व्याघात-वज्राः । पक्षान्तरमाह-*तिस्रस्त्विति । *प्रथमे-विष्कम्भे । अयं च निषेधो योगोपवासे न प्रवर्त्तते । तथा सति तद्विधेरानर्थक्यापातात् । उपवासस्याहोरात्रसाध्यत्वेन तद्घटितकालवर्जनासम्भवाच्च । तत्र पूर्वविद्धतिथिवत्पूर्वविद्ध एव योगो ग्राह्यो, न तु नक्षत्रवदस्तमयव्याप्तो निशीथव्याप्तो वा । रात्रौ पारणानिषेधे परेऽह्नि तदप्राप्तेश्च ।

दानव्रतयोरौदयिकः, श्राद्धे त्वापराह्णिकः ।
नक्षत्रे खण्डिते येन व्याप्तः कालस्तु कर्मणः ।
नक्षत्रकार्याण्यत्रैव तिथिकर्म तथैव तु ॥

इति न्यायात् । करणेषु भद्रापरिमाणमाह-*कृष्णे इति । करणान्तरं तु भद्रावत्तिथ्यर्द्धपरिमितम्। भद्रायां भविष्योत्तरे स्मर्यते।

यस्मिन्दिने भवेद्भद्रा तस्मिन्नहनि भारत ।
उपवासस्य नियमं कुर्यान्नारी नरोऽपि वा ॥
यदि रात्रौ भवेद्दृष्टिरेकभक्तं दिनद्वये ।
कार्यं तेनोपवासः स्यादिति पौराणिको विधिः ॥
प्रहरस्योपरि यदा स्याद्दृष्टिः प्रहरत्रयम् ।
उपवासस्तदा कार्य एकभक्तं ततो ऽन्यथा ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीपतिः-

न सिद्धिमायाति कृतं च विष्ट्यां
विषारिघातादिकमत्र सिद्धम् ॥

व्यवहारसमुच्चये-

*दशम्यामष्टम्यां प्रथमघटिका पञ्चमपरं
*हरिद्यौ सप्तम्यां द्विदशघटिकान्ते त्रिघटिकम्।
तृतीयाराकायां खयम(२०)घटिकाभ्यः परभवं
शुभं विष्टेः पुच्छं शिवतिथिचतुर्थ्योस्तु विरमे॥

तत्रैव-

सर्पिणी तु सिते पक्षे कृष्णे चैव तु वृश्चिकी।
सर्पिण्यास्तु मुखं त्याज्यं वृश्चिक्याः पुच्छमेव च।

माधवीये-

विष्टिर्यदाऽहनि तिथेरपरार्धजाता
पूर्वार्धजा निशि तदा शुभदा च पुच्छे।

ब्रह्मयामले-

*दिनभद्रा यदा रात्रौ रात्रिभद्रा यदा दिवा।
न त्याज्या शुभकार्येषु प्राहुरेवं पुरातनाः॥

प्रहरस्येत्युदाहरणम्। उदयोत्तरं किञ्चित्काले गते विष्टि
तात्पर्यम्। अत्र दिनरात्र्योः सत्त्वेनोपवासैकभक्तयोरेकतरस्य
निगन्तुमशक्यत्वात्तदर्थमुक्तम्। ईदृशस्थले च भद्रापूजा तत्
शात्प्रागेव। तद्रहिते काले भोक्तुं शक्यत्वात्।

प्रातः संपूज्य तामेव ब्राह्मणं च स्वशक्तितः।
ततो भुञ्जीत राजेन्द्र यावद्भद्रा प्रवर्त्तते॥

इति भविष्योत्तरात्। करणान्तरे च भद्रान्यायात्तस्य
मात्रव्याप्तित्वे दिनद्वये एकभक्तमित्यादि। *ऊर्ध्वम्-उत्तरा
*अधः-पूर्वार्द्धे। अथ यत्कर्म सर्वथा विष्टिं परित्यज्य दुष्करं त
*दशम्यामिति। *हरिद्युः-एकादशी। *दिनभद्रेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीपतिः-

षट् पौष्णतो द्वादश शाङ्कराच्च
पौरन्दराद्धानि नव क्रमेण ।
पूर्वार्धमध्यापरभागयुञ्जि
चिरंतनज्यौतिषिकैः स्मृतानि ॥

व्रतारम्भे विशेषो मदनरत्ने सत्यव्रतेनोक्तः-

*उदयस्था तिथिर्या हि न भवेद्दिनमध्यभाक् ।
सा खण्डा न व्रतानां स्यादारम्भश्च समापनम् ॥

इति । देवलः—

भद्रा-तिथेः पूर्वार्द्धभद्रा । रात्रिभद्रा-उत्तरार्द्धभद्रा । अत्र केषां चित्पुस्तके श्रीपतिः—

षट् पौष्णतो द्वादश शाङ्कराच्च पौरन्दराद्धानि नव क्रमेण ।
पूर्वार्द्धमध्यापरभागयुञ्जि चिरन्तनज्यौतिषिकैः स्मृतानि ॥

इति लिख्यते । तत्र

पूर्वभागयुजि भे पतिः प्रियो योषितामपरभागयोगिनि ।
स्त्री नृणां भवति, मध्ययोगिनि प्रेम नूनमुभयोः परस्परम् ॥

इत्युत्तरश्लोको रत्नमालायामेव दृश्यते । तदुत्तरं च

स्त्रीग्रहैर्वल्लभा नारी, पुंग्रहैर्वल्लभो वरः ।
सबलैरुभयोः प्रीतिरुभयोः स्यात्करग्रहे ॥

इति क्षेपकं च । टीका च—अन्तःपुरस्त्रीणां वारवधूनां राजसङ्गमे येषु नक्षत्रेषु यत्फलं तदाह—षडिति । रेवत्यादीनि षट् पूर्वभागयोगीनि । आर्द्रादीनि द्वादश मध्ययोगीनि । ज्येष्ठादीनि नवापरभागयोगीनि । फलमाह—पूर्वेति । वधूवरयोर्नवसङ्गमेऽपीदम् । शेषं स्पष्टम् । तत्र प्रकृतसङ्गत्यर्थं धार्मिकाः प्रष्टव्याः ॥

*उदयस्थेति । यथा विद्धैकादशीं निषिध्य परेद्युर्व्रतस्य विधानेऽपि न तत्र तदुपक्रमः । एवंजातीयकेष्वन्येषु व्रतेष्वपि एषैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अभुक्त्वा प्रातराहारं स्नात्वाऽऽचम्य समाहि

रीतिः । *अभुक्त्वेति । पूर्वदिने प्रातराहारमभुक्त्वा एक
व्रतं कृत्वेत्यर्थः ।

सायमाद्यन्तयोरह्नोः सायं प्रातश्च मध्यमे ।
उपवासफलं प्रेप्सुर्जह्याद् भुक्तचतुष्टयम् ॥

इत्यादौ तथा दर्शनात् । अत एव व्रतशब्दस्य श्राद्धे
लक्षणत्वात्तत्पूर्वदिने एकभक्तं वदन्ति । (१)आचम्येत्यादि तु
दिनाभिप्रायमित्येके । पूर्वदिने एव सायंसन्ध्योत्तरं व्रतं
वारव्रतवत् । प्रातरित्यस्य स्नात्वेत्यनेनान्वय इत्यपरे । व्रत
प्रातराहारमभुक्त्वेत्यर्थः । न चैवम्—

स्नानसन्ध्यातर्पणादि जपहोमामरार्चनम् ।
उपवासव्रता कार्यं सायंसन्ध्याहुतीर्विना ॥

इत्यनेन पौनरुक्त्यमिति वाच्यम् । यथा "नानृतं वदेत्"
निषेधद्वयम् । तत्रैकस्य वैयर्थ्यवारणाय दुरदृष्टद्वयमङ्गीकृत्य एक
पुरुषार्थविरोधित्वमपरस्य क्रतुविरोधित्वमित्युक्तं,(२) तथा प्रात

(१) अत्र स्नात्वेत्यादि तु इति पाठः सम्यक् ।

(२) "नानृतं वदेत्" इति श्रुतौ दर्शपूर्णमासप्रकरणेऽनृतप्रतिषे
पुरुषार्थः । वदनस्य तदर्थत्वात् । तथा हि–आख्यातात् कर्ता प्रतीय
"लः कर्मणि च" (पा० सू० ३-४-६९) इति चकारात् कर्तरि त
स्मरणात्, 'देवदत्तः पचति' इति सामानाधिकरण्याच्च । ततश्च त
प्रत्ययार्थतया प्राधान्येन तद्विशेषणतया गम्यमानं वदनं तच्छेषा-
भिलषितसाधनम् । प्रतिषेधोऽपि तद्विपरीतमर्थं बोधयंस्तस्यैव बल
निष्टसाधनतां बोधयतीति तत्प्रतिषेधस्य पुरुषार्थत्वमाशङ्क्य आख्यात
भावनाभिधायकतया कर्तुश्चाक्षेपादेवावगमोपपत्तौ न तत्र शक्तिक
म् । "लः कर्मणि" (पा० सू० ३-४-६९) इति सूत्रं, "द्व्येकयोः"
सू० १-४-२२) इति सूत्रैकवाक्यतया कर्तुरेकत्वे लकारैकवचन
त्याक्षेपलभ्यकर्तृसंख्याभिधानपरं, सामानाधिकरण्यं च गौः
इतिवल्लाक्षणिककर्त्रभिप्रायमिति न कर्तुराख्यातवाच्यत्वं, येन व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूर्याय देवताभ्यश्च निवेद्य व्रतमाचरेत्* ॥

मदनरत्ने भविष्ये—

*क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः ।

हारे दुरदृष्टद्वयम् । तत्र एकस्य नित्यकर्मविरोधित्वमपरस्य व्रतविरोधित्वमित्यपौनरुक्त्याद् इतीतरे । *व्रतमाचरेत्—संकल्पयेदिति केचित् ।

इक्षूनपः फलं मूलं ताम्बूलं पय औषधम् ।
भक्षयित्वापि कर्त्तव्याः स्नानदानादिकाः क्रियाः ॥

इति चतुर्विंशतिमतादावभ्यनुज्ञातानामिक्ष्वादीनां निषेधार्थमिदमिति तु वस्तुगतिः । 'सूर्याय'इत्यादिनिवेदनमन्त्रो जन्माष्टम्यां वक्ष्यते । *क्षमेति । पुरुषार्थतया विहितानामप्येषां व्रताङ्गतया पुनर्विधानं संयोगपृथक्त्वन्यायेन(१) पुरुषार्थविद्विष्टस्यापि व्रते आव-

---

तन्निषेधयोः श्रुत्या तच्छेषता स्यात् । ततश्चायं निषेधः क्रत्वर्थः । अनारभ्याधीतस्मृतिवचनबोधितनिषेधस्तु पुरुषार्थ इति तदुल्लङ्घने पुरुषः प्रत्यवेयान्न तु क्रतुवैगुण्यमिति । एतद्व्यतिक्रमे तु क्रतोरेव वैगुण्यमिति सिद्धान्तितं जैमिनिना (अ० ३-पा० ४-) नवमाधिकरणे ।

(१) "खादिरे पशुं बध्नाति" "खादिरं वीर्यकामस्य यूपं करोति"इति श्रुतिभ्यां खादिरस्य नित्याङ्गत्वं काम्याङ्गत्वञ्च बोधितम् । काम्यञ्च कामनासापेक्षत्वादनियतम् । तथा च सति अनित्यसंयोगविरोधः । संयोगः—सम्बन्धः । प्रकृते तादात्म्यमिति यावत् । न च खादिरः काम्य एव, तथा च काम्यत्वेन प्राप्ते खादिरे पशुबन्धनाश्रयत्वमात्रं "खादिरे पशुं बध्नाति"इत्यनेन विधीयते, तेन यत्र कामनाविरहाद् यूपाभावः तत्र पशुबन्धनाभाव एव इति वाच्यम् । खादिरे इत्यस्य सप्तम्यन्तस्य वैयर्थ्यापत्तेः । सान्निध्यादेवाश्रयलाभात् । यस्यानियताङ्गत्वं तत्र नित्याङ्गत्वं नास्त्येव । यथा "चमसेनापः प्रणयेद्, गोदोहेन पशुकामस्य"इति । चमसो-काष्ठनिर्मितं प्रणीतार्थं पात्रम् । गौर्दुह्यतेऽत्रेति व्युत्पत्त्या गोदोहो-दोहनपात्रम् । गोदोहेनापां प्रणयनं कामनासत्त्वे एवेति तस्यानियताङ्गतेति । तथा च खादिरे नियतत्वमनियतत्वञ्च विरुद्धमित्यत्र सूत्रम्—"एकस्य तू-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*देवपूजाग्निहवनं संतोषः स्तेयवर्जनम् ॥
सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः ॥
अग्निहोमस्तद्दैवत्यः, व्याहृतिहोमो वेति वर्धमानः।
यत्तु तेनोक्तम्-
'सर्वपदमेतत्पुराणोक्तप्रकृतव्रतपरम् । *व्रतान्तरे तु विध्यन्तरसत्त्वे होमोऽन्यथा न। अत एवैकादश्यां शिष्टानां होमानाचरणम्' इति, तन्न । 'जपो होमश्च' इति*वक्ष्यमाणैकवाक्यत्वेनास्य काम्यव्रतसमाप्ति*परत्वात् । *तत्त्वं तु सासदश्यस्य पशुमिश्रविन्दादिप्रकरणस्थेनेव तत्तद्व्रतविशेषहोमविधिभि*स्योपसंहार इति । विष्णुधर्मे-

श्यकत्वार्थम् । *देवपूजा—व्रतदेवताकार्यम् । व्याहृतिहोमो वेति वाकारादरुचिः । सर्वव्रताङ्गत्वेनापूर्वतद्विधाने मानाभावात् । *व्रतान्तरे त्विति । तस्य पुराणान्तरोक्तत्वेनाप्रकृतत्वात् । *वक्ष्यमाणेति । तद्वचनं काम्यविषयम् । अतस्तत्र सर्वाङ्गोपसंहार आवश्यक इति भावः । *समाप्तीति दानान्तानामावश्यकत्वार्थम् । नन्वेतावता काम्यैकादश्यादौ होमापत्तिरित्यत्राह—*तत्त्वित्विति । *अस्येति । अनारभ्याधीतत्वाविशेषादिति शेषः

भयत्वे संयोगपृथक्त्वम्" (जै० सू० ४-३-३-५) इति। एकस्य-अ
स्य, उभयत्वे-नित्यत्वकाम्यत्वोभयत्वे संयोगयोः प्रयोजकधर्मसम्ब
योः पृथक्त्वं द्वित्वं प्रयोजकमिति । नियताङ्गत्वप्रयोजकं यागं प्र
नियतपूर्वसत्त्वं, काम्याङ्गत्वप्रयोजकं (यस्याङ्गत्वप्रयोजिका कामना त
यागं प्रति नियतपूर्वासत्त्वम्, एतदुभयसम्बन्धयोः पृथक्त्वमस्यैव
अयम्भावः-यूपे पशुं निबध्याथ प्रोक्षयेत्-आलभेत् । तत्र परिभा
यूपे पशुनिबन्धनमावश्यकम् । ततः खादिरयूपस्य नियतत्वमेव । त
यूपे काम्यत्वं बोधितम् । अपिना नियतत्वं कर्तुं समर्थम् । अतोऽन
नित्यत्वकाम्यत्वयोर्विरोधः । तेन यस्य न कामना तेनापि खादि
कर्तव्य एवेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तज्जप्यजपनध्याने तत्कथाश्रवणादिकम्।
तदर्चनं च तन्नामकीर्तनश्रवणादयः॥
उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः॥

कौर्मे—

*बहिर्ग्रामाऽन्त्यजान् सूतिं पतितं च रजस्वलाम्।

इयांस्तु विशेषः—साप्तदश्यं स्वतोऽपूर्वासम्बन्धित्वात्सामिधेनीलक्षणं द्वारमपेक्षते, होमस्तु स्वत एव तत्सम्बन्धित्वान्न द्वारमित्यभेद एवोपसंहारः। अत एव सर्वशब्दस्य न सामान्यवाचित्वं, किं तु 'विष्णुर्घृतं, पाण्डुरङ्गो दधि, रामो दुग्धं, कृष्णस्तेमनं(१) भुङ्क्ते, हरिस्तु सर्वमेव'इतिवत् तत्तद्विशेषवाचित्वमिति मतेऽपि नासङ्गतिः। 'व्रतोपवासनियमैः'इत्यत्रोपवासपदं निराहारावस्थाने रूढमेव। तत्र च फलसाधनतायां के च न नियमा अप्युक्ताः।

उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयः सर्वभोगादिवर्जितः॥

इत्यादि। सर्वो वायुपर्यन्तः भोगोऽभ्यवहारः। आदिपदाद् अदनीयस्मरणादि च।

स्मृत्यालोकनगन्धादिस्वादनं परिकीर्त्तितम्।
अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकाङ्क्षणम्॥

इत्युक्तेः। तत्र पापाः—व्रते निषिद्धा मैथुनानृतादयोऽतिविस्तृता इति तान्विहाय गुणानाह—*तज्जप्येति। कतिपयान् पापानाह—*बहिरिति। बहिष्पदं दोषाधिक्यार्थम्। हारीतः—पतितपाषण्डिनास्तिकादिसम्भाषणा—ऽनृता—ऽश्लीलादिकमुपवासादिषु वर्जयेत्। आदिपदात् पुरुषार्थनिषेधेऽपि पुनर्व्रताङ्गतया निषेधो लभ्यते। अत एव व्रतमधिकृत्य सुमन्तुः—

(१) तेमनं दध्यादिनिष्पन्नव्यञ्जनमित्यर्थः। तिमत्यार्द्रीभवति अन्नमनेन तेमनम् इति व्युत्पत्तेः सूपाद्यपि तेमनमुच्यते इति बोध्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥

पृथ्वीचन्द्रोदये आग्निपुराणे-

स्नात्वा व्रतवता सर्वव्रतेषु व्रतमूर्तयः ।
पूज्याः सुवर्णमय्याद्याः शक्त्या वै भूमिशायिना ॥
जपो होमश्च सामान्यं व्रतान्ते दानमेव च ।
चतुर्विंशद् द्वादश वा पञ्च वा त्रय एव वा ॥
विप्राः पूज्या* यथाशक्ति तेभ्यो दद्याच्च दक्षिणाम्

अत्र विप्रा इति पुंलिङ्गनिर्देशात् पुमांस एव *भो
ज्याः, न तु स्त्रियः । एवं सहस्रभोजनादावपि
*विरूपैकशेषस्य प्रमाणान्तरं विनाऽयुक्तत्वात्
अत एव 'द्वयोर्यजमानयोः *प्रतिपदं कुर्यात्, बहुभ्यो
यजमानेभ्यः' इत्यादौ विरूपैकशेषायोगात् पत्न्यभिप्रा
द्वित्वं बहुत्वं वा न संभवति इत्युक्तमाचार्यैः, पार्थसा

विहितस्याननुष्ठानमिन्द्रियाणामनिग्रहः ।
निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः ॥

पतितादिदर्शने विष्णुपुराणे—

तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः ।

स्पर्शादौ तु विष्णुधर्मे—

संस्पर्शे च नरः स्नात्वा शुचिरादित्यदर्शनात् ।
सम्भाष्य तैः शुचिपदं चिन्तयेदच्युतं बुधः ॥

'जपो होमश्च'इत्युक्तार्थमुपसंहारे लाघवात् । *पूज्या इति।पू
भोजनान्तेत्यभिप्रेत्याह-*भोज्या इति । विप्रो विप्रा चेत्
कशेषात्कुतो न स्त्रियो भोज्या इत्यत आह-*विरूपेति। 'शि
नमस्कुर्यात्'इत्यत्र शिवाया ग्रहणे दुर्गापूजाप्रकरणमेव प्रमाणमित्य
दि। *प्रतिपद्-ऋक्षभेदः। ननु चतुर्विंशदित्यादीनां क्रियान्वयः
भवति, एवं 'सहस्रं ब्राह्मणान्भोजयेत्'इत्यादौ सहस्रादेरपीत्यत आ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथिना च । *एतेनैकस्य ब्राह्मणस्यावृत्त्या भोजनं

*एतेनेति । ननु महाभाष्ये कर्मविशेषे सहस्रगोदक्षिणा दानरूपक्रियायां सहस्रत्वान्वयेनोपपादिता एकगोमता यजमानेन तत्कर्माचरणे वैगुण्यनिरासार्थं(१), तद्वदिहाप्येकब्राह्मणस्यावृत्त्या

(१) तथा च भाष्यम्–"ऋषिसहस्रमेकां कपिलामेकैकशः सहस्रकृत्वो दत्त्वा तया ते सर्वे सहस्रदक्षिणाः सम्पन्नाः" इति । अस्य कैयटः–ऋषिसहस्रमिति प्रतीकमुपादाय वित्तेन क्रीत्वा प्रत्येकं दत्त्वा सहस्रदक्षिणा ऋषयः सम्पन्ना इत्यर्थं व्याचष्टे । सहस्रदक्षिणाः–सहस्रदक्षिणादानजन्यफलभाज इत्यर्थः । वस्तुतस्तु येन प्रतिगृहीता कपिला तेनान्यस्मै दत्ता सती तां तेन तस्मात् प्रतिगृह्यान्यस्मै दीयते इति दानप्रतिग्रहमालासहस्रेण सहस्रदक्षिणोपपादनं युक्तम् । स्मृतिप्रतिषिद्धगोविक्रयकल्पनाया अन्याय्यत्वादिति तत्त्वम् । यत्तु "तैलं न विक्रेतव्यं, मांसं न विक्रेतव्यमिति व्यपवृक्तं न विक्रीयते, अव्यपवृक्तं गावः सर्षपाश्च विक्रीयन्ते" इति "एओङ्"सूत्रस्थभाष्येणाव्यपवृक्तगोविक्रये दोषाभावप्रतिपादनेन 'न हि कर्मणि कर्मारम्भ"इति न्यायेन यदा यस्य यजमानत्वेन दातृत्वं, तदेतरेषामृत्विक्त्वेन प्रतिग्रहीतृत्वमिति, दक्षिणातः पूर्वतने स्वस्वकर्मण्येवानुष्ठानाधिकारवद् दक्षिणायामपि तथैवौचित्येन युगपद् दानप्रतिग्रहयोरभावाच्च क्रयेणैव स्वत्वं सम्पाद्याऽन्यस्मै दानमिति सहस्रदक्षिणा सम्पाद्येति, तन्न । युगपद् दानप्रतिग्रहयोरुक्तन्यायेनाधिकाराभावेऽपि यजमानाद्गां प्रतिगृह्य तदनन्तरमन्यस्मै ऋत्विजे ददातीति दानप्रतिग्रहयोरेककालिकत्वाभावेनायौगपद्याद्विरोधाभावेन तत्राधिकारप्रतिबन्धस्य वक्तुमशक्यत्वात् । अन्यथा स्वसङ्कल्पितसहस्रगोदानरूपकर्मसमाप्तितः पूर्वं क्रयोऽपि कथं तव सङ्गच्छते इति विभावनीयम् । तस्मात् "न हि कर्मणि"इत्यस्य प्रधानकर्मणि प्रारब्धे सति फलान्तरसाधकान्यकर्मप्रारम्भो न करणीय इत्येवार्थ इति तस्याङ्गभूते प्रतिग्रहेऽनवसरः । "अव्यपवृक्तं गावः सर्षपाश्च विक्रीयन्ते"इति गोविक्रयस्य प्रत्यवायजनकत्वाभावप्रतिपादनपरं भाष्यं तु पुङ्गोव्यक्तिविक्रयस्य तत्प्रतिपादनपरं न तु स्त्रीगोव्यक्तीनामपि । अत एव बलीवर्दा एव वाह्यन्ते विक्रीयन्ते च लोके इति तत्प्रसिद्ध्या तदर्थं पुंसां निष्कासने कृते स्त्रिय एव गावोऽवशिष्यन्ते इत्यर्थकं "गाव उत्कालि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परास्तम् । बहुत्वस्यै*कपदश्रुत्या ब्राह्मणान्वित
भोजनान्वयाभावादित्यन्यत्र विस्तरः । *'शूद्रस्य तु
ष्ठादिवद्विप्रद्वारा व्याहृतिहोमः' इति वर्धमानः । ब्र
र्तयो—व्रतदेवताप्रतिमाः । प्रतिमास्वरूपं च मद
भविष्ये-

अनुक्तद्रव्यतत्संख्या* देवताप्रतिमा नृप ।
सौवर्णी राजती ताम्री वृक्षजा मार्तिकी तथा
चित्रजा पिष्टलेखोत्था निजवित्तानुरूपतः ।

भोजनेन सहस्रभोजनं सम्पाद्यमिति चेत् । मैवम् । ईदृशरीत्या "
ब्राह्मणं भोजयेत्" इत्यत्रापि तत्सिद्धिः स्यादिति ब्राह्मणपदोत्तर
नवैयर्थ्यापत्तेः । तत्र बहुवचनार्थबहुत्वस्य क्रियान्वयभ्रमं निरा
*बहुत्वस्येति । *एकेति । सुब्विभक्तीनां प्रकृत्यर्थान्वित
बोधकत्वव्युत्पत्तेः । यद्वा पदं—विभक्त्यन्तं, ततः प्रकृत्य
स्थितिः, विभक्त्यर्थोपस्थितिश्च ; तावतैव तत्संभृतसामग्रीकं न
र्थोपस्थितिमपेक्षते इत्यर्थः ।

*शूद्रस्येति । अत्रेदमरुचिबीजम् । सर्वत्र व्याहृति
नाङ्गमित्युक्तमेव । किं च तत्तद्धोमोऽपि न सर्वत्र । व्रत
ऋत्विजोऽनावश्यकत्वात् । नापि प्रतिनिधित्वेन विप्र आवश्य
विप्रे शूद्रप्रतिनिधित्वाभावस्य वक्ष्यमाणत्वादिति । *तत्संख्या

तपुंस्का वाहाय च विक्रयाय च स्त्रिय एवावशिष्यन्ते" इति "त
दीनि सर्वैर्नित्यम्" (पा० सू० १-२-७२) इति सूत्रस्थं भाष्यं
च्छते । एवं च स्त्रीगवीणां विक्रयस्य प्रत्यवायजनकत्वेन तत्क
या प्रकृतभाष्यलापनमत्यन्तमसङ्गतम् । "स्त्रीणां दानविक्रया
र्गा विद्यन्ते" (३-४-३) इति निरुक्तं शौनःशेपदृष्टान्तेन मनुष्य
यस्त्रीणामेव तत्प्रतिपादनपरं, "त्यदादीनि" इतिसूत्रभाष्य
वरणे प्रायेणेति पदं च लोकव्यवहारपरमिति न तत्स्वारस्येन
गवीविक्रयः प्रामाणिक इति दिक् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*आमाषात्पलपर्यन्तं कर्तव्या शाठ्यवर्जितैः ॥

तत्रैव ब्राह्मे–

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ।

*मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥

मन्त्रानुक्तौ समस्तव्याहृतिरूपो मन्त्रः, प्रजापतिश्च देवतेति कल्पतरुः । वर्धमानधृतदेवीपुराणे–

होमो ग्रहादिपूजायां शतमष्टाधिकं भवेत् ।

अष्टाविंशतिरष्टौ वा यथाप्राप्ति विधीयते ॥

मदनरत्ने–

*अनुक्तसंख्या यत्र स्याच्छतमष्टोत्तरं स्मृतम् ।

वर्धमानधृतवृद्धशातातपः–

उपवासं द्विजः कृत्वा ततो ब्राह्मणभोजनम् ।

कुर्यात्तेनास्य सगुण उपवासोऽभिजायते ॥

व्रतोद्यापनानुक्तौ तु पृथ्वीचन्द्रोदये नन्दिपुराणे–

*कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरितम् ।

उद्यापनं विना यत्तु तद् व्रतं निष्फलं भवेत् ॥

*यदि चोद्यापनं नोक्तं *व्रतानुगुणतश्चरेत् ।

दुरुत्वम् । *आमाषादिति । "अङ्गुष्ठपर्वादारभ्य" इति तु प्रतिष्ठापरम् । *मन्त्रेति । मन्त्रस्यानादेशे(१)प्रजापतिः–प्राजापत्यो मन्त्र इत्याद्यन्वयः । *अनुक्तेति । यत्रेत्यस्य जपे होमे चेत्यर्थः । *कुर्यादिति

आदौ मध्येऽथ वाऽप्यन्ते व्रतस्योद्यापनं भवेत् ॥

इत्यनेन विकल्पते । यद्वा—व्रतोद्यापनानुक्ताविवावतारिकादर्शनात्तस्य व्रतस्य समाप्तौ उद्यापनं कुर्यात् । कीदृशम् ?, कार्यतयोदीरितमिति । अनुक्तोद्यापने कालमभिधायेतिकर्त्तव्यतामाह–यदि चेतीति व्याख्येयम् ।

*व्रतेति । एतदुक्तं भवति–यत्र व्रते या देवता, तां–सर्वतो

---

(१) अनुक्तावित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वित्तानुसारतो दद्यादनुक्तोद्यापने व्रते ॥
गाश्चैव काञ्चनं दद्याद्व्रतस्य परिपूर्तये ॥
*अशक्तौ तु नारदीये-
*सर्वेषामप्यलाभे तु यथोक्तकरणं विना ।
विप्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्तये ॥
वृथा विप्रवचो यस्तु गृह्णाति मनुजः शुभम् ।
अदत्त्वा दक्षिणां पापः स याति नरकं ध्रुवम् ॥
भारते—
वेदोपनिषदे चैव सर्वकर्मसु दक्षिणा ।
*सर्वत्र तु मयोद्दिष्टा भूमिर्गावोऽथ काञ्चनम् ॥
बैजवापः—
*शिवनेत्रोद्भवं यस्माद्रजतं पितृवल्लभम् ।
अमङ्गलं तद्यत्नेन देवकार्येषु वर्जयेत् ॥
टोडरानन्दे देवीपुराणे-
व्रते च तीर्थेऽध्ययने श्राद्धेऽपि च विशेषतः ।

भद्रमण्डले(१)तद्देवतास्थापनं कृत्वा कुम्भे विधानस्थापिते अधिवास तद्देवताको होमः कार्यः । रुद्रव्रते तु लिङ्गतोभद्रमण्डले इति विशेष तत्राद्यं नवरात्रे । द्वितीयं शिवरात्रौ । तदन्ते शय्यादि दद्यादिति विस्तरः । *अशक्तौ—उद्यापनाकरणे । *सर्वेषाम्—उद्यापन वस्तूनाम् । संपूर्णताविधिश्च भविष्योत्तरे जन्माष्टम्यां वक्ष्यते *सर्वत्र—वेदोपनिषदे इत्यन्वयः । वेदान्तश्रवणेऽपि याज्ञवल्क्य जनकेन दक्षिणादानोक्तेः । *शिवेति ।
सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते ।
सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते ॥
इति त्वनाकरम् । दक्षिणायां तु न दक्षिणा । अनवस्थानात्(२

---

(१) सर्वतोभद्रमण्डलदेवतानां स्थापनं पूजनं च कृत्वेत्यर्थः ।
(२) दक्षिणायां दीयमानदक्षिणाया अपि सदक्षिणात्वावश्यक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*परान्नभोजनाद्देवि यस्यान्नं तस्य तत्फलम् ॥

पृथ्वीचन्द्रोदयेऽग्निपुराणे–

नित्यस्नायी मिताहारो गुरुदेवद्विजार्चकः ।
क्षारं *क्षौद्रं च लवणं मधु* मांसानि वर्जयेत् ॥

*क्षारास्तु तत्रैवोक्ताः–

तिलमुद्गादृते शिम्ब्यं सस्ये गोधूमकोद्रवौ ।
धान्यकं देवधान्यं च शमीधान्यं तथैक्षवम् ॥
स्विन्नधान्यं तथा पण्यं मूलं क्षारगणः स्मृतः ॥

गोधूमानां तु तत्रैव प्रतिप्रसवः—

---

*परान्नेति ।

श्वशुरान्नं गुरोरन्नं मातुलान्नं तथैव च ।
पितृव्यभ्रातृपुत्राणां परान्नं नैव दोषकृत् ॥

इति तु निर्मूलम् । *क्षौद्रं–मधु । *मध्विति दोषाधिक्यार्थम् । मद्यादिनिषेधस्य सर्वदा सिद्धत्वात् । उन्मादकसामान्यं वा तदर्थः । अनुज्ञातमद्यानामपि व्रताङ्गो निषेध इति वा । ननु 'क्षारं-क्षौद्रं च लवणम्'इत्यत्र क्षारं लवणमिति नार्थः क्षौद्रं चेत्यनेन व्यवधानादतः क्षारानाह–*क्षारास्त्विति । धान्यावरणं सूक्ष्मं, शमी-स्थूलं शिम्बा । धान्यकं–कुस्तुम्बुरु । देवधान्यं–देवशालितण्डुलम् । ऐक्षवं–गुडफाणितादि, न तु सितादि । 'अगुडमैक्षवम्'इत्युक्तेः । स्विन्नं जलाग्न्यादिना धान्यं पृथुकादि । पण्यं–तद्दिनक्रीतम् । सम्भवे तु दिनान्तरक्रीतमपि । मूलं—मूलकं प्रसिद्धम् । 'मूलकं केमुकेतरत्'इति तु केमुकस्य सर्वथैवाग्राह्यत्वार्थम् । यद्वा मूलं कन्दफलशाकादेरुपलक्षणम् । अग्रिमगौतमवचने फलादिसमभिव्याहारात् । तत्र पण्येतिविशेषणम् । 'मूलकं केमुकेतरत्'इत्यत्र च स्वा-

---

तत्रापि दक्षिणादानप्रसक्तेस्तस्या अपि दानरूपत्वेन दक्षिणान्तरप्रसक्तिरितिरीत्यानवस्थापत्तेरित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रीहिषष्टिकमुद्गाश्च* कलायाः सतिलं पयः।
श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः॥
कूष्माण्डालाबुवार्ताकपालङ्कीज्योत्स्निकास्त्यजेत्
*चरुर्भैक्षं सक्तुकणाः शाकं दधि घृतं मधु।
श्यामाकाः शालिनीवारा यावकं मूलतण्डुलम्॥
हविष्यव्रतनक्तादाव*ग्निकार्यादिके हितम्।
मधु मांसं विहायान्यद् व्रते च हितमीरितम्॥ इति
शमीधान्यं माषादि। पालङ्की मध्यदेशे 'पोई' इति प्रसि
द्धा। ज्योत्स्निका पटोलिका (कोशातकी)। मिताक्षरा
गौतमः-'चरु-भैक्ष-सक्तुकण-यावक-शाक-पयो-दधि
घृत-मूल-फलोदकानि हवींष्युत्तरोत्तरप्रशस्तानि। प

र्थे कप्रत्ययान्मूलमर्थः। तत्र च केमुकसंज्ञकमूलेतरत्वान्वयः। प्रसि
मूलकं शाक इति तत्र विहितत्वविशेषणाच्च तस्य ग्राह्यत्वप्रसङ्ग
*कलाया इति। शमीधान्यानां सामान्यतो निषेधान्निरवकाश
या हविष्यशास्त्रैकवाक्यतया च हविष्यसंकल्पे सतीनका ग्राह्या
नीवाराश्च देवधान्यभिन्नत्वात्। यत्र त्वकृष्टपच्यं स्मर्यते तत्र दे
धान्यादि ग्राह्यं तथैवाकाङ्क्षाशान्तेः। अत एव च सामान्यवि
निषेधौ तत्र न प्रवर्तेते। गोधूमानां तु विहितप्रतिषिद्धत्वाद्ग्रहणा
णवद्विकल्पः। इयाँस्तु विशेषः-पक्षत्र ग्रहणस्याभ्युदयार्थत्वाद्
न क्रतुवैगुण्यम्, इह तु इतरासत्त्व एव गोधूमे व्रतसाद्गुण्यमि
सत्त्वे च तद्वैगुण्यमिति। एतेन 'गोधूमादीनामिति वाच्यम्। कला
नीवारयोर्विहितप्रतिषिद्धत्वात्' इति प्रत्युक्तम्। मधु-मधुरं सितादि
क्षौद्रस्यापि निषिद्धत्वात्। चरुः-हुतशेषः पुरोडाशादेरुपलक्षणम्
मूलतण्डुलं-मूलोद्भवास्तण्डुलाः। भर्जितमूलविशेषात्तण्डुला
निःसरन्तीति प्रसिद्धम्। *अग्निकार्यादिके इति। तेन ताद
आहिताग्नेरधिकारः सूचितः। मधु-क्षौद्रम्, औषधाद्यर्थं गुर्वेद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दधि घृतं च गव्यम्' इति। अन्ये च विशेषा एकादशी-
*चातुर्मास्यादिप्रकरणे वक्ष्यन्ते।
गृहीतव्रतत्यागे तु मदनरत्ने छागलेयः-
पूर्वं व्रतं गृहीत्वा यो नाचरेत् *काममोहितः।
जीवन् भवति चण्डालो, मृतः श्वा चाभिजायते॥
*तत्र प्रायश्चित्तमुक्तं पृथ्वीचन्द्रोदये अग्नि-गरुड-
पुराणयोः-
क्रोधात्प्रमादाल्लोभाद्वा व्रतभङ्गो भवेद्यदि।
दिनत्रयं न भुञ्जीत *मुण्डनं शिरसोऽथवा॥

तमपि। *चातुर्मास्यादीति। आदिना व्रताङ्गतया विहितना-
न्दीमुखस्य सङ्ग्रहः।
नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किञ्चित्समारभेत्।
इति शातातपोक्तेः श्राद्धे वक्ष्यमाणत्वात्। *कामेति।
व्याध्यादिनाऽनाचरणे तु न दोषः। "सर्वभूतभयं व्याधिः" इत्येका-
दश्यां स्कान्दात्। असकृत्त्यागे त्वाह-*तत्र प्रायश्चित्तमित्या-
दि। *मुण्डनमिति। प्रायश्चिताङ्गं मुण्डनं रात्रावपि कार्यम्।
क्षौरं नैमित्तिकं कार्यं निषेधे सत्यपि ध्रुवम्।
पित्रादिमृतिदीक्षासु प्रायश्चित्ते च तीर्थके॥
इत्यग्रिमवचनात्। गयादिदेशे रात्र्यपराह्णादिकाले च
निषेधः। मृतिनिमित्तं तु दिने एव। "श्वस्तनी वपनक्रिया" इति
विशेषात्। दिनत्रयोपवासश्चार्द्धप्राजापत्यरूपः। एवं च मुण्डनपक्षे
दक्षिणा नास्ति।
कृच्छ्राणां व्रतरूपाणां श्मश्रुकेशादि वापयेत्॥
इति वासिष्ठे कृच्छ्रपदादर्धकृच्छ्रादौ न वपनमिति मुक्तावली-
लिखनेन वपनेऽर्द्धकृच्छ्रव्यतिरेकलाभात्। सधवानां तु न मुण्ड-
नम्। तत्राङ्गुलत्रयादिकेशकर्तनपक्षसम्भवात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति *प्रायश्चित्ताज्ञानादतिक्रान्तव्रतानुष्ठानं नास्ति गम्यते । यत्तु-

प्रायश्चित्तं ततः कृत्वा पुनरेव व्रती भवेत्।

इति वचनादतिक्रान्तमपि* व्रतं कार्यमेवेति शूलपाणिः, तत् मध्ये व्रतलोपे व्रतशेषसत्त्वे ज्ञेयम् । *एतच्च शक्तविषयम् ॥

अशक्तौ तु कालहेमाद्रौ पुराणान्तरे-

उपवासासमर्थश्चेदेकं* विप्रं तु भोजयेत् ।

तावद्धनादि वा दद्याद् भुक्तश्चेद् द्विगुणं तथा॥

भुक्तः कृतभोजनः । ब्राह्मणभोजनं विनेति शेषः।

सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्।

कुर्याद्द्वादशसंख्याकान् *यथाशक्त्यातुरो नरः॥ इति

शुद्धितत्त्वे मात्स्ये-

विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।

ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥

इति निषेधाच्च । *प्रायश्चित्ताज्ञानादित्यादिरभ्युपगमवादः व्रतभङ्गार्थस्य प्रायश्चित्तस्य तत्संपूर्णतार्थत्वासम्भवात् ।

प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत् ।

इति स्कान्दाच्च । तदाह-*अतिक्रान्तमपीति । *एतच्च-दिनत्रयोपवासविधानं च । *एकमिति । दिनत्रयोपवासे ब्राह्मणभोजनम्। एवं क्रमेण तावदित्यादावपि द्रष्टव्यम्। तावदित्यत्र दिनदित्यपेक्षिते आह-*भक्तस्येति । 'भुक्तश्चेद् द्विगुणम्'इति पाठे ब्राह्मणभोजनमकृत्वा भुक्तश्चेदित्यर्थः। द्विगुणं-ब्राह्मणद्वयं, तावद्द्विगुणधनं वा । *यथाशक्तीति यथाशक्त्योक्तकल्पविकल्पाभ्यां आतुरो-व्रतभङ्गेन व्याकुलः । व्रतभङ्गेऽपि धृष्टस्य धार्ष्ट्यातुरो द्विगुणत्रैगुण्यादि कल्प्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।

मदनरत्ने वायवीये–

द्रव्यदातोपवासस्य फलं प्राप्नोत्यसंशयम् ।

तथाऽपरार्के देवलः–

ब्रह्मचर्यं तथा शौचं *सत्यमामिष*वर्जनम् ।

व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥

मात्स्ये–

तस्मात्कृतोपवासेन स्नानमभ्यङ्गपूर्वकम् ।

वर्जनीयं प्रयत्नेन रूपघ्नं तत्परं नृप ॥

*अन्ये च नियमास्तत्र तत्रान्वेषणीयाः ।

अथ स्त्रीव्रतेषु विशेष उच्यते । तत्र हेमाद्रौ व्रतकाण्डे गारुडे–

गन्धालंकारताम्बूलपुष्पमालानुलेपनम् ।

उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥ इति ।

इदं च सभर्तृकोपवासविषयम् ।

अथ वा विप्रमुख्येभ्यो दद्याद्दानं च शक्तितः ।

इति स्मृतेर्यथाशक्तिदानपक्षोऽपि द्रष्टव्यः ।

ब्रह्मचर्यं व्याख्यास्यते । शौचमतिविस्तृतत्वान्नेह प्रस्तूयते । *सत्यं–

प्राणात्यये, दारपरिग्रहे च पञ्चानृतान्याहुरपातकानि ।

इति वचनोक्तानि पञ्चानृतानि,

(स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ।

गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥

इत्युक्तानि च तानि)

वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ॥

इत्यादि चानृतं, तदन्यानृताभावः । *आमिषं–मांसं चातुर्मास्ये वक्ष्यमाणं, पारिभाषिकमामिषं च । *अन्ये चेति । अत्र शरीरसाधनापेक्षं नित्यं यत्कर्म, तद् यमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अञ्जनं च सुताम्बूलं कुङ्कुमं रक्तवाससी*।
धारयेत्सोपवासाऽपि अवैधव्यकरं यतः॥
विधवा *यतिमार्गेण, कुमारी वा यदृच्छया॥
इति तत्रैव भविष्योक्तेः। तथा विष्णुधर्मे-
सर्वेषु तूपवासेषु पुमान्वाऽथ सुवासिनी।
धारयेद्रक्तवस्त्राणि कुसुमानि सितानि च॥
विधवा शुक्लवसनमेकमेव हि धारयेत्॥
मनुरपि-
पुष्पालङ्कारवस्त्राणि गन्धधूपानुलेपनम्।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम्॥
मदनरत्ने व्यासः—
दन्तधावनपुष्पादि व्रतेऽप्यस्या न दुष्यति। इति।
यद्यपीदं* सर्वोपवासविषयं प्रतीयते, तथापि हि
ष्टाचारात्सौभाग्याद्यर्थं क्रियमाणनवरात्रत्रिरात्रादु
वासविषयमेव, न त्वेकादश्यादिविषयम्।

नियमस्तु स, यत्कर्म नित्यमागन्तुसाधनम्॥
इतियमानियमयोर्भेदादिह तादृशा वस्त्रग्रहणादयो नियमा ग्राह्या
तेन स्थलत्रयमालम्ब्य व्रताङ्गानां नियमानां लिखनादन्ये तादृशा
क्व सन्ति?,इति परास्तम्। *रक्तवाससी—रञ्जितवाससी। हि
वचनं कञ्चुकाभिप्रायम्। दक्षः—
श्रुतिस्मृतिप्रमाणेन वस्त्रं ग्राह्यं च धारयेत्। इति।
"अश्रीरा तनूर्भवति रुशती पापयाऽमुया। पतिर्यद्वध्वो वास
स्वमङ्गमभिधित्सते" इति दाशतयीश्रुतिः। स्मृतयश्च तत्र तत्र प्र
द्धाः। एवं यज्ञोपवीतोपवस्त्रादि बोध्यम्। *यतिमार्गेणेत्युपमा
पादानात्फलाद्यनुकल्पानां निवृत्तिः। एवं यतिचान्द्रायण
विधवानामधिकारो न तु यवमध्यादौ इत्यादि बोध्यम्। *इ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात्।
उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥

इत्यपरार्के देवलेन तन्निषेधात्। न चास्य पुंविषयत्वेन सावकाशत्वात् स्त्रीणां ताम्बूलादि प्राप्नोतीति वाच्यम्। ताम्बूलादिप्रापकस्यैवैकादशीतरविषयत्वेन *वैपरीत्यस्यापि सुवचत्वात्। यत्तु हरिवंशे-

अञ्जनं रोचनं चैव गन्धान्सुमनसस्तथा।
व्रते चैवोपवासे च नित्यमेव विवर्जयेत्॥
शिरसोऽभ्यञ्जनं *सौम्ये नैवमेतत्प्रशस्यते।
न पादयोर्न गात्रस्य स्नेहेनेति स्थितिः स्मृता॥ इति,

तत्तत्रैवोक्तपुण्यकव्रतविषयं न तु सर्वत्र, पूर्वोक्तविरोधादिति मदनरत्ने उक्तम्। तत्रैव-

अश्रुप्रपातो रोषश्च कलहस्य कृतिस्तथा।
उपवासाद्व्रताद्वापि सद्यो भ्रंशयति स्त्रियम्॥

स्त्रियमित्युपलक्षणम्। मदनरत्ने शिवधर्मे-

दानं व्रतानि नियमा ज्ञानं ध्यानं हुतं जपः।
यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत्॥

अथ सूतकादौ निर्णयः-'तत्र शावसूत्याशौचयोः सर्वस्मार्तकर्मनिवृत्तिर्निबन्धेषु *स्पष्टैव। गौडास्तु क्षताशौचादावपि तामाहुः-

जानूर्ध्वं क्षतजे जाते नित्यकर्म न चाचरेत्।
नैमित्तिकं च तदधः स्रवद्रक्तो न चाचरेत्॥

दन्तधावनताम्बूलचर्वणादिकर्त्तव्यतावाक्यम्। *वैपरीत्यस्यापीति। सुभगाचिह्नानां सौभाग्यार्थव्रत एवौचित्याच्चेत्यपि द्रष्टव्यम्। *सौम्ये इति सम्बुद्धिः। *स्पष्टैवेति।
स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*लोतके च समुत्पन्ने ज्वरकर्मणि मैथुने।
धूमोद्गारे तथा वान्तौ नित्यकर्माणि संत्यजेत्॥
द्रव्ये भुक्ते त्वजीर्णे च नैव भुक्त्वापि किञ्चन।
कर्म कुर्यान्नरो नित्यं सूतके मृतके तथा॥

इति कालिकापुराणात्। वस्तुतस्तु पूर्वं देवीपूजोप
मात्तन्मात्रविषयत्वमस्येति युक्तं प्रतीमः। तथा हे
द्रौ पाद्मे—

गर्भिणी *सूतिकादिश्च कुमारी वाऽथ रोगिणी।
यदाऽशुद्धा तदाऽन्येन कारयेत्,*प्रयता स्वयम्॥

पुंसोऽप्येष विधिः। लिङ्गस्याविवक्षितत्वात्। तेन 'यदि
न्व्रते यत्पूजाद्युक्तं तदन्येन कारयेत्, शारीरनियमा
स्वयं कुर्यात्' इति हेमाद्रिर्व्याचख्यौ। 'न व्रतिनां व्र
इति विष्णूक्तेश्च। *आरम्भस्तु न भवत्येव।

तदाह—शुद्धितत्त्वे विष्णुः—

बहुकालिकसङ्कल्पो गृहीतश्च पुरा यदि।
सूतके मृतके चैव व्रतं तन्नैव दुष्यति॥

एतत्काम्यव्रतपरम्। नित्यं त्वनारब्धमपि कार्यमि
गौडाः। मदनरत्ने—

इत्युक्तेः। *लोतकं—(१)लूतासंपर्कजः स्फोटभेदः। *सूतिका
रिति। आदिना रजस्वलाग्रहः। सूतिकापदं विंशत्यादिदिनपर
परम्। *प्रयतेति। (२)प्रयता तु स्वयं कुर्यादित्यर्थः। *आरम्
स्त्विति। स्वस्याशुद्धेः, तत्र प्रतिनिध्यभावाच्च। अत्राधिकः पा
"तदाह—शुद्धितत्त्वे विष्णुः। 'बहुकालिकसङ्कल्पो गृहीतश्च

---

(१) लूता—तन्तुवायो जन्तुविशेषस्तन्मूत्रसंपर्कजन्यः स्फोट
इत्यर्थः।

(२) शुद्धेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वसङ्कल्पितं यच्च व्रतं सुनियतव्रतैः ।
तत्कर्तव्यं नरैः शुद्धं *दानार्चनविवर्जितम् ॥

माधवीये कौर्मे—
काम्योपवासे प्रक्रान्ते त्वन्तरा मृतसूतके ।
तत्र काम्यव्रतं कुर्याद्दानार्चनविवर्जितम् ॥ इति ।

एतेन साङ्गेऽधिकाराद् व्रताङ्गदेवपूजादि कार्यमिति व-र्धमानोक्तिः परास्ता *प्रारब्धं पूजादि कार्यमेव । नव-रात्रे तु तत्रैव विशेषं वक्ष्यामः । *एवं रजस्वलाऽपि ।

यत्तु सत्यव्रतः—

आदि । सूतके मृतके चैव व्रतं तत्रैव दुष्यति' । एतत्काम्यव्रतपरम् । नित्यं त्वनारब्धमपि कार्यमिति गौडाः" इति । अथ व्याख्या गौडमतमाह—एतदिति । अत्र नित्ये शौचरूपाङ्गबाधापत्तिरि-त्यरुचिः । दानेति । अनन्यसाध्यजपहोमाद्युपलक्षणम् । *प्रारब्धं पूजादीति । 'न व्रतिनां व्रते'इति विष्णूक्तेः 'पूजामन्येन कारयेत्' इति निषेधस्य प्रारब्धपूजाशेषपरत्वासम्भवात् । तत्र दानं सूतकान्ते कार्यमिति वक्ष्यति । अर्चनं त्वन्येनैव कारणीयम् ।

सूतके तु नरः स्नात्वा प्रणम्य शिरसा हरिम् ।
इति तु स्वयं पूजां विनाऽशनाकरणव्रतपरम् । "प्रणम्य मनसा हरिम्"इति पाठे कायिक्याः पूजाया अन्येनैव कर्त्तव्यत्वार्थम्(१) । पठन्ति च

सूतकात्प्राक् समारब्धमनेकाहं तु यद् व्रतम् ।
कायिकं तत्तु कुर्वीत, न तु दानार्चनं जपम् ॥
सूतकाहे तु यत्किञ्चिद्दानाद्यन्तरितं भवेत् ।
सूतकानन्तरे त्वद्धि तत्कर्तव्यमतन्द्रितैः ॥ इति ।

न हीदं प्रारब्धपूजाद्यर्द्धत्यागं बोधयति, किं तु दानादेरप्रारम्भ-म् । 'दानाद्यन्तरितम्'इत्येवोक्तेः । यत्र पूजायामन्यः कर्त्ता न लभ्य-

---

(१) मनःपदमिति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्।
न तत्रापि व्रतस्य स्यादुपरोधः कदाचन ॥ इति,
तत् *प्रतिनिधिना कारयेदित्येतत्परम् । तद्
मदनरत्ने मात्स्ये-
अन्तरा तु रजोयोगे पूजामन्येन कारयेत् । इति।
प्रतिनिधयश्च निर्णयामृते पैठीनसिः—
भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतम्।
असामर्थ्ये परस्ताभ्यां व्रतभङ्गो न जायते ॥
स्कान्देऽपि—
पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा।
एषामभाव एवान्यं ब्राह्मणं वा नियोजयेत् ॥
कात्यायनः-
पितृमातृभ्रातृपतिगुर्वर्थे च विशेषतः।
उपवासं प्रकुर्वाणः *पुण्यं शतगुणं लभेत् ॥
मातामहादीनुद्दिश्य एकादश्यामुपोषणे।

ते, कर्त्रन्तरेण दुष्करश्च पूजाविशेषस्तत्र सूतकान्ते इत्यर्थः। *एत
मिति। दानादिकमन्ते कुर्यात्, इतरत्स्वयं कारयेदित्यर्थः। *प्र
तिनिधिनेति। यद्यपीदं दीर्घकालव्यापिमासोपवासादावेव ए
विधिविषये प्रवर्त्तते इति प्रतीयते, तथापि वर्षादिपर्यन्तमभ्या
फलसाधनेष्वपि योजयितुं शक्यत्वात्तत्रापि प्रवर्त्तते इति भाव
*पुण्यमिति। अगृहीतव्रतः प्रतिनिधिरित्यादिः।
कर्त्ता शतगुणं पुण्यं प्राप्नोत्यत्र न संशयः।
यमुद्दिश्य कृतं सोऽपि सम्पूर्णं फलमाप्नुयात् ॥
इत्युक्तेः। गृहीतव्रतस्य तु तस्य स्वोपवासफलमपि।
उपवासफलं ताभ्यां समग्रं समवाप्यते।
इत्युक्तेः। अनयोश्च दक्षिणा न देया पुण्यप्राप्तेः सत्त्वात्।
तृमातृस्वसृ'इत्याद्युपक्रम्य—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतं ते तु फलं विप्राः समग्रं समवाप्नुयुः ॥

मदनरत्ने प्रभासखण्डे–

भर्ता पुत्रः पुरोधाश्च भ्राता पत्नी सखाऽपि च।
यात्रायां धर्मकार्येषु जायन्ते प्रतिहस्तकाः ॥
एभिः कृतं महादेवि स्वयमेव कृतं भवेत्।

तत्रैव वायवीये–

स्वयं कर्तुमशक्तश्चेत्कारयीत पुरोधसा।

इदं च सर्ववर्णसाधारणम्। अविशेषात्। यत्तु काश्चिन्म-
हाक्ष आह–'शूद्रस्य ब्राह्मणादिरेव प्रतिनिधिर्युक्तो न
शूद्रः।

जपस्तपस्तीर्थसेवा प्रव्रज्या मन्त्रसाधनम्।
विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलम् ॥

इति मरीचिवचनात्' इति, तत्तुच्छम्। प्रव्रज्यादीनां
शूद्रेऽसंभवात, 'विशये प्रायदर्शनात्'इति न्यायेनास्य
ब्राह्मणादिगोचरत्वात्। यदापि–

दक्षिणा नात्र दातव्या शुश्रूषा विहिता हि सा।

इति वचनाच्च। अत्र कनिष्ठस्वस्रादेः कन्यादेः पुत्रादेश्च ज्येष्ठ-
भ्रात्रादिः प्रतिनिधिर्भवत्येव भार्यायाः पतिरिव। तत्र क्वापि न द-
क्षिणा। 'शुश्रूषा विहिता हि सा'इति हेतुपन्निगदात्। यत्तु 'स्वयं
कर्तुमशक्तश्चेद्'इत्युपक्रम्य

हिरण्यं दक्षिणां दद्यात्स्वशक्त्या चानुरूपतः।

इति पुरोधसे दक्षिणादानमुक्तं, तत् तदर्थिने द्रष्टव्यम्। *विशये
इति। विशये संशये प्रायः पदान्तरसमभिव्याहारस्तस्य दर्शना-
नियामकत्वोपगमादित्यर्थः(१)। तथा च प्रव्रज्यासाहचर्येण ब्राह्म-

---

(१) अग्निहोत्रदोहाधिकारे "वत्समालभेत"इति श्रुतम्। तत्र
किमनेन वाक्येनाग्निहोत्राङ्गतया पशुयागो विधीयते उत पशु-
स्पर्शमात्रमिति संशयः। अत्रोच्यते–वत्सालम्भो यज्ञिकर्म प्राणिद्रव्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपवासो व्रतं होमस्तीर्थस्नानजपादिकम् ।

णाधिकारिकप्रातिनिध्यमेव तद्विषय इति भावः । *होम इति

स्त्रीणां होमो न दातव्यः पञ्चगव्यं तथैव च ।

इति (१)ब्रह्मकूर्चहोमनिषेधोऽपि साक्षादेव । विप्रद्वारा स्त्रीशूद्रयोः

कालम्भत्वाद् वायव्यवदित्यनुमानेन यागत्वाध्यवसाये याग एव क
लम्भ इति । यदि च यागस्य द्रव्यदेवतास्वरूपत्वेन वायव्यादि
देवतासंयोगाभावान्न यागत्वाध्यवसायः । न च "आज्यं द्रव्यम
शे देवता मान्त्रवर्णिकी" इति "पूषासीति वत्समुपसृजति" इति
स्सालम्भे 'पूषासि' इति-मन्त्रविधानात्तत्रत्यपूषदेवतायाः प्रकृते
गोऽस्त्येवेति वाच्यम् । उपसृजतेः समीपधारणार्थकतयाऽऽलम्भ
कत्वाभावेन तेन वाक्येनोक्तमन्त्रस्य वत्सालम्भे विनियो
विधातुमशक्यत्वात् । असिशब्दसामानाधिकरण्येन पुष्टि
च पूषशब्दस्य वत्सपरतया देवतापरत्वाभावाच्च इत्युच्यते, त
"वायव्यं श्वेतमालभेत भूतिकामः" इत्यत्रालभतेर्यागार्थत्वाव
नात्रापि प्राणिकर्मतया प्रयुज्यमानत्वाविशेषात्पूर्वं यागार्थे तस्या
रिते चोदकेनाग्नीषोमीयस्य विध्यन्तातिदेशाद्देवतालाभसिद्धेर्या
ध्यवसाय इति पूर्वपक्षे सिद्धान्तसूत्रम् "विशये प्रायदर्शनात्"
सू० २-३-६-१६) । विशये-संशये, यागविधिः संस्कारविधिर्वेति
शये प्राये-दोहनादिसंस्कारप्रकरणे दर्शनात्-पाठात् संस्कारविधि
वेत्यर्थः । अयं भावः "वायव्यमालभेत" इत्यत्र यागार्थतया "अध्व
लभेत" इत्यत्र स्पर्शार्थतया च दृष्टस्य आलभतेः प्रकरणात् स्प
कत्वमेव । न चोक्तानुमानेन यागार्थत्वाध्यवसायः । सामा
दृष्टानुमानस्य वैदिकार्थे प्रवृत्त्यसम्भवात्, "अध्वर्युमालभेत"
व्यभिचाराच्च । न च स्पर्शो दोहनबलाद् "वत्समुपावसृजति" इत्यु
सर्जनबलाद्वा सिद्ध एवेति तद्विध्यानर्थक्यमिति वाच्यम् । उ
क्येन चाटुकरणात्मकस्पर्शविशेषलक्षणसंस्कारविधानात्तस्य चा
रेरिति वत्सालम्भस्तत्संस्कार एवेति सिद्धान्तः ।

(१) ब्रह्मकूर्चहोमः—पञ्चगव्यहोमः । स च "सप्तावरास्तु
अच्छिन्नाग्राः शुकत्विषः । एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि"
इत्यादिनेतिकर्तव्यताविशिष्टः पराशरस्मृतावेकादशाध्याये स्पष्ट
एवावगन्तव्यः । पञ्चगव्यद्रव्याण्यपि "गोमूत्रं गोमयं क्षीरं दधि
कुशोदकम् । निर्दिष्टं पञ्चगव्यं तु पवित्रं पापशोधनम्" इति तत्रैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पूर्वार्धस्तदापि स एव दोषः।

"*स्त्रीशूद्रपतनानि षट्"इति(१) मानवीये जपनिषेधात्।

वचनेन होमोक्तेरिति केचित्। द्विजस्त्रीणां पञ्चगव्यविकल्पः।

स्त्रीशूद्रस्य तु शुद्ध्यर्थं प्राजापत्यं समाचरेत्।
पञ्चगव्यं च कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत्॥

इति पराशरोक्तेः। उत्तरार्द्धे च स्त्रीमात्रान्वयो न शूद्रस्य(२)।

पञ्चगव्यं पिबेत् शूद्रो ब्राह्मणस्तु सुरां पिबेत्।
उभौ तौ पापकर्माणौ पूयाख्ये नरके वसेत्॥

इति निषेधात्।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
पञ्चगव्यं पिबेदेतत् श्वपाकमपि शोधयेत्॥

इति तु यस्य पञ्चगव्येऽधिकारः तत्परं, न त्वपूर्वाधिकारं बोधयति। 'श्वपाकम्'इत्यर्थवादात्(३)। *स्त्रीशूद्रेति।

जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम्।
देवताराधनं चेति स्त्रीशूद्रपतनानि षट्॥ इति।

---

(१) अत्र यद्यपि लिखितपुस्तकेषु समग्रः श्लोकोऽयमुपलभ्यते, तथापि टीकायां तस्योपलम्भादस्माभिर्मूले उपेक्षितः।

(२) वस्तुतस्तु उत्तरार्द्धे शूद्रस्याप्यन्वयो भवत्येव, तस्य प्रायश्चित्ताङ्गपञ्चगव्यप्राशनेऽधिकारादेतद्वचनेन तदङ्गभूतस्यैव पञ्चगव्यस्य बोधनात्। अत एव "शूद्राणां नोपवासः स्यात् शूद्रो दानेन शुद्ध्यति। ब्रह्मकूर्चमहोरात्रं श्वपाकमपि शोधयेत्"॥ इति पराशरस्मृतौ-"मृतपञ्चनखात् कूपादत्यन्तोपहतमुदकं पीत्वा ब्राह्मणस्त्र्यहमुपवसेद्, द्व्यहं राजन्य, एकाहं वैश्यः, शूद्रो नक्तं, सर्वे चान्ते पञ्चगव्यं पिबेयुः"इति विष्णुस्मृतौ च शूद्रस्य पञ्चगव्यपानं सङ्गच्छते। अनुपदोक्तात्रिवचनं तु स्वतन्त्रपञ्चगव्यपानस्यैव निषेधकं विप्रस्य सुरापानवदिति न तद्विरोध इति बोध्यम्।

(३) एतत्पञ्चगव्यपानं श्वपाकमपि शोधयेत् किं पुनरन्येषामित्यर्थात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणो हीनवर्णस्य यः कुर्यात् कर्म किं च न।
स तां जातिमवाप्नोति इह लोके परत्र च॥

इति कालहेमाद्रौ मरीचिनिषेधाच्च।

यद्यपि स्त्रियाः शूद्रस्य च तीर्थयात्रा वर्त्तते, भारते पुष्करमाहा

जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषस्य वा।
पुष्करे गतमात्रस्य सर्वमेव प्रणश्यति॥ इति।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम।
न वियोनिं व्रजन्त्येते स्नात्वा तीर्थे महात्मनः॥

इति च लिङ्गात्, तथापि सधवायाः स्त्रियः

नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्।
पतिं संसेवते या तु तेन स्वर्गे महीयते॥
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम्।
भर्तृशुश्रूषयैवैता लोकानिष्टान् व्रजन्ति हि॥

इत्यादौ यज्ञादीनामुपलक्षणत्वात्तीर्थयात्रादावपि भर्त्रा विना, पतिशुश्रूषात्यागे च नाधिकारः। विधवायास्तु

बाल्ययौवनवत्या वा वृद्धया वाऽपि योषिता।
न स्वातन्त्र्येण कर्त्तव्यं किञ्चित्कार्यं गृहेष्वपि॥

इति मनूक्तेः,

रक्षेत्कन्यां पिता, (१)विन्नां पतिः, पुत्रास्तु वार्द्धके।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित् स्त्रियाः॥ (या० १-८

इति याज्ञवल्क्योक्तेश्च पुत्रज्ञात्याद्यनुमतिं विना नाधिकारः।

शूद्रस्तु द्विजशुश्रूषाविरुद्धं धर्ममाचरन्।
नरके पच्यते तद्वद्वेदश्रवणकीर्त्तनात्॥

इति भारतोक्तेः,

निरन्तरं तीर्थसेवा संन्यासो मन्त्रसाधनम्।
देवताराधनं ध्यानं तेषां पापावहं परम्॥

(१) पाणिगृहीतीम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*वस्तुनस्तु संपूर्णतावाचनमात्रमत्रोच्यत इति प्रतिनिधेः का *वार्तेत्यलम्।

अत्र विशेषमाह त्रिकाण्डमण्डनः-

*काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः।
*काम्येऽप्युपक्रमादूर्ध्वं केचित् प्रतिनिधिं विदुः॥
न स्यात्प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु।
स देशकालयोर्नास्ति नारणेरग्निरेव सा(१)॥
नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥

हिरण्यकेशिसूत्रेऽपि-'न स्वामित्वस्य भार्यायाः पुत्र-इति शातातपोक्तेश्च विप्रसेवाविरोधेन निरन्तरं च तीर्थयात्रादौ शूद्रस्य नाधिकारः। एवं सति अनधिकारिस्त्रीशूद्रकृततीर्थसेवायां पातित्यं मनुना बोध्यते। शातातपवाक्ये च "तेषाम्" इतिशब्देन शूद्राः प्रतिलोमजाश्च परामृश्यन्ते। तेन प्रतिलोमा यथा धर्महीनास्तथा निरन्तरं तीर्थयात्रापराः शूद्रा इत्यर्थः।

ब्राह्मणो हीनवर्णस्य यः कुर्यात्कर्म किं च न।
स तां जातिमवाप्नोति इह लोके परत्र च॥

इति वाक्यस्य विप्रश्चेत् क्षत्रियादेः प्रतिनिधिस्तदा तस्य(२) सम्पूर्णफलावाप्तिरस्त्येव, विप्रस्य तु दोष इत्यर्थः। एतेन 'शूद्रस्य शूद्रस्य ब्राह्मणादेश्च नाधिकारः। होमानधिकारात् शूद्रस्य। दत्तके च नाधिकारः। दत्तकत्वप्रयोजकहोमानधिकारात्' इति प्रत्युक्तम्। स्पष्टं चैतदग्रे। यत्र शूद्रप्रतिनिधिस्तत्र विप्रेण कथं सम्पादनमित्यत्राह-*वस्तुनस्त्विति। *वार्त्तेति। तादृशसम्पादनरूपमङ्गसाङ्गुण्यमेवानेन बोध्यते न तु प्रतिनिधिरित्यर्थः।

*काम्ये इति। सामर्थ्यं परीक्ष्यैव काम्यस्यारम्भादिति भावः। अ-

(१) सा-अरणिः अग्निरेव, तत्सम्पादकत्वात्। अग्नेश्च प्रतिनिधिनिषेधादित्यर्थः।

(२) हीनजातीयस्येत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य देशस्य कालस्याग्नेर्देवतायाः कर्मणः *शब्दस्य च प्रतिनिधिर्विद्यते' इति(१) ॥

अथ व्रतादिसन्निपाते निर्णयः । तत्र तिथिद्वयसन्निपाते तत्रोक्तं दानहोमादि *क्रमेणानुष्ठेयम्, अविरोधात् । इदं पूर्वारब्धेष्वेव । एकमध्येऽन्यकाम्यकर्मारम्भस्तु न भवत्येव गुणफलादृते । "यस्य यज्ञे प्रततेऽन्तरा यज्ञस्तायते तं यज्ञं निर्ऋतिर्गृह्णाति" इतिराणकपुराणश्रुतेः । यज्ञः-व्रतादिकर्ममात्रम् । अनङ्गेन व्यवधानदोषस्य सर्वत्र साम्यात् । शिष्टास्तु माघकार्त्तिकस्नानादिमध्ये लक्षहोम-तुला-भारतश्रवणाद्याचरन्ति, तन्निमध्येऽस्तु. काम्यमध्ये तु चिन्त्यम् । यत्र तु नक्तैकभक्तादौ विरोधस्तत्र प्राथम्यादेकभक्तं कार्यम् । नक्तं तु परेऽन्तरा सामर्थ्याभावे त्वाह-*काम्येऽपीति । *शब्दस्य-मन्त्रस्य *क्रमेणेति । यत्रोपवासद्वयमेकभक्तादिद्वयं वा तत्राङ्गिनस्तन्त्रभिन्नदैवत्यत्वादिना विरुद्धं पूजाहोमाद्यङ्गं सहैव कार्यम् ।

पाकयज्ञान् समासाद्य एकाज्यानेकबर्हिषः ।
एकस्विष्टकृतः कुर्यान्नानापि सति दैवते ॥

इति न्यायात् । इदं पूर्वारब्धेष्वेव । पूर्वारब्धकर्ममध्ये च कर्मारम्भो न भवति । "यस्य यज्ञे प्रततेऽन्तरा यज्ञस्तायते तं यज्ञं निर्ऋतिर्गृह्णाति"इति श्रुतेः । यज्ञे इति व्रतादिकर्मोपलक्षणम् । अनङ्गेन व्यवधानरूपदोषस्य तुल्यत्वात् । तत्रापि गुणफलकमनङ्गस्य

(१) वस्तुतस्तु पिण्डोदकाकर्यादौ पुत्रस्य प्रतिनिधिर्भवत्येव "क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीन् क्रियालोपान्मनीषिणः ॥" इत्यादिवचनात् । हिरण्यकोशिसूत्रीयनिषेधस्तु "तत्तन्तवे ज्योतिष्मतीं तामाशिषमाशास्ते" इत्याशीराशंसने, तृतीये सामनि "अमुकस्य पिता यजते" इतिवाचने च पुत्रप्रतिनिधिकरणस्य बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवत्येव । तत्र "गोदोहनेन पशुकामस्य प्रणयेत्" इत्यादौ पुरुषार्थस्यैव क्रत्वर्थत्वात्(१) ।

यत्तु शिष्टानां माघकार्तिकस्नानादिमध्ये लक्षहोम-तुलादान-भारतश्रवणाद्याचरणं, तन्नित्यमध्ये, न तु काम्यमध्ये । वस्तुतस्तु यथोः पुरुषार्थयोर्व्रतादिकर्मणोर्न विरोधस्तयोरेकमध्येऽपरानुष्ठानं युगपदारम्भो वा भवत्येव । यथा काम्यकार्त्तिकादिस्नान-काम्यतद्व्रतयोः । तत्र सर्वाङ्गोपसंहारेण स्वयं तादृशद्वयस्य सुकरत्वात् । अन्यत्र च प्रथमोपक्रान्तमेव कार्यं प्राथम्याद्—अनुपसञ्जातविरोधित्वात्(२) ।

---

(१) दर्शपूर्णमासयोः श्रूयते "चमसेनापः प्रणयेद्, गोदोहनेन पशुकामस्य" इति । गावो दुह्यन्ते यस्मिंस्तद् गोदोहनं-दोहनपात्रं तेनेत्यर्थः । तत्र गोदोहनस्य क्रतुपुरुषोभयार्थत्वमुत पुरुषार्थत्वमेवेति संशयः । अत्रोच्यते कामसमभिव्याहृतषष्ठ्याः शेषित्वार्थकतया तच्छ्रुत्या पुरुषार्थत्वावगतेः क्रतूपकारकतया क्रत्वर्थतावगतेश्चोभयार्थत्वमिति । न चोपकारकत्वरूपशेषत्वस्य तृतीये निराकृतत्वात् श्रुतिश्च क्रत्वर्थत्वानवगतेः कथं तदर्थत्वमिति वाच्यम् । उपकारकत्वे सति सर्वपदार्थग्राहिणा प्रयोगविधिना गोदोहनस्य क्रतूपकारायाप्यवश्यावधेयतया क्रत्वर्थत्वोपपत्तेः, इति पूर्वपक्षे सिद्धान्तसूत्रम्—"यस्मिन् प्रीतिः पुरुषस्य, तस्य लिप्सार्थलक्षणाऽविभक्तत्वात्" इति (जै० सू० ४-१-२) । यस्मिन्-स्वर्गादावनुभूयमाने पुरुषस्य तृप्तिर्भवति तस्य स्वर्गादिफलस्य लिप्सा अर्थलक्षणा-स्वारसिकी, फलस्य प्रीत्याऽविभागादित्यर्थः । अयं भावः-यस्मिन् वाक्ये फलश्रुतिस्तस्य पुरुषार्थत्वबोधकत्वमेवेति श्रुत्या पुरुषार्थत्वमेव । न चोपकारकत्वेन प्रयोगविधिना क्रत्वर्थतयाऽप्यस्य विधानात् क्रत्वर्थत्वमपीति । क्रत्वर्थप्रयोगविधिना गोदोहनस्य क्रत्वर्थत्वाविधानात् । पुरुषार्थेनैव गोदोहनेन प्रसङ्गात् क्रतूपकारसिद्धेः । तस्माद् गोदोहनस्य पुरुषार्थत्वमेवेति । एवं च तस्य क्रत्वनङ्गत्वे फलप्रयुक्तत्वेऽप्यनुष्ठानम् ।

(२) अयं च न्यायो लघुपूर्वमीमांसाधिकरणकौमुदीपारिशिष्टाधिकरणेषु विस्तरेण प्रतिपादितो मयेति तत एवावगन्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तत्तिथौ *गौणकाले कार्यम्। *समकालीनविरुद्धव्रत
तु 'एकं स्वयं कृत्वाऽन्यद्भार्यादिना कारयेत्' इति मा
वः। यत्र तु शिवरात्र्यादौ तिथिमध्ये पारणयाऽहि
जनं प्राप्तम्,

भूताष्टम्योर्दिवा भुक्त्वा रात्रौ भुक्त्वा च पर्वणि
एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत्॥

इति तन्निषेधश्च, तत्र पारणाया वैधत्वाद्दिवैव
जनम्। निषेधस्तु रागप्राप्तभोजनविषयः। एवमष्टम्
दिनक्तव्रते संक्रान्त्यादौ रवौ संकष्टचतुर्थ्यां च रा
भोजनम्। यत्र त्वष्टम्यादौ दिवा भुजिनिषेधः, संक
च रात्राविति निषेधद्वयं तत्रोपवास एव कार्यः।
यपि पुत्रिण उपवासोऽपि निषिद्धस्तथापि-

उपवासनिषेधे तु भक्ष्यं किंचित्प्रकल्पयेत्।

इति वचनात्किंचिद्भक्षयित्वोपवासः कार्यः। च
न्द्रायणमध्ये एकादश्यादौ तु ग्राससंख्यानियमेन भो
जनं कार्यमेव। चान्द्रायणस्य काम्यत्वेन नित्यवा
कत्वात्। *अबाधेन गत्यसंभवाच्च। एकादश्यामेकान्त
रोपवासादिपारणायां जलपारणां कृत्वोपवसेत्। "अ

---

*गौणकाले—गौणकालसम्भवे। कालस्यात्यन्तबाधाभा
दिति शेषः। तदसम्भवे त्वाह—*समेति। एतेन

तिथिद्वयोदितं कर्म तद् व्रतं पृथगारभेत्।
तिथ्योर्वेधे तु स्नानादि सकृदाह्निकमाचरेत्॥

इति मरीचिवाक्यं व्याख्यातम्। पृथगाचरेदिति पाठे एकं स्वय
अन्यद्भार्यादिनेत्यर्थः। नैमित्तिकं चान्द्रायणादि संगृह्याऽऽह—अ
बाधेनेति। चान्द्रायणादिवाक्येषु चन्द्रोदयकाले ग्राससङ्ख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पो वा अशितमनशितं च" इति श्रुतेः। एवं *द्वा-
दश्यां मासोपवासश्राद्धप्रदोषादिषु ज्ञेयम्। एवं *काम्य-
नैमित्तिकनित्यत्वादिकृतं बलाबलं स्वयमूह्यमिति दि-
क्॥ इति कमलाकरभट्टकृते निर्णयसिन्धौ व्रतप-
रिभाषा समाप्ता॥

अथ प्रतिपदादिनिर्णयः। शुक्ला प्रतिपद् अपराह्ण-
व्यापित्वे पूर्वा ग्राह्या। *युग्मवाक्यात्।

*प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी।

मासवच्छुक्लकृष्णपक्षोभयकालविशिष्टभोजनविधेरुपगमात्। *द्वा-
दश्यामिति। द्वादश्यां प्रातः पारणा, मासोपवासे उपवासः,
श्राद्धादौ सायाह्नभोजनादि, तत्र पारणालोपः कार्यः। *काम्ये-
ति। यत्र काम्ये कृते नित्यनैमित्तिकयोरर्थतः सिद्धिस्तत्र काम्यं
बलीय इत्यर्थः।

*युग्मेति। 'प्रतिपद्यप्यमावास्या' इत्यादि। नन्वेवं सायाह्नमात्र-
व्यापाऽपि पूर्वाविद्धा भवतीति किमपराण्हव्याप्त्येत्यत्राह-*प्रति-
पदिति। विवृतं च संमुखीत्वं

संमुखी नाम सायाह्नव्यापिनी दृश्यते यदा।

इति पूर्वार्द्धेन। इदं च प्रतिपदः प्राप्ते पूर्वविद्धत्वरूपे सांमुख्ये
आपराह्णिकत्वरूपं तद्विशेषं विधत्ते, प्रातःकालिके प्रधानाङ्गनिर्वापे
प्रातःकालसामान्ये प्राप्ते "पुरा वाचः प्रवदितोर्निर्वपेत्" इति तद्वि-
शेषविधिवत्, नत्वापराण्हिक्याः सांमुख्यं गौरवात्। यच्चिदमा-
पराण्हिकपित्र्यविषयमिति, तन्न।

प्रतिपत्सैव विज्ञेया या भवेदापराण्हिकी।
दैवकर्म तया ज्ञेयं पित्र्यं च मनुरब्रवीत्॥

इति माधवीयवचने दैवकर्मपदस्य एकभक्त-नक्त-प्रतिपदिष्टीनां
एकनिर्णयसत्त्वेन उपवासपरत्वात्। पित्र्यं—मृताहश्राद्धम्। एको-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्कान्दोक्तेः । *शुक्ला स्यात्प्रतिपत्तिथिः प्र
मतश्चेत्साऽपराह्णे भवेत्' इति दीपिकोक्तेश्च । अपरा
श्च पञ्चधा भक्ते दिने चतुर्थो भागः । *तदभावे स
याह्नव्यापिनी ग्राह्या ।

तदभावे तु सायाह्नव्यापिनी परिगृह्यताम् ।

इति माधवोक्तेः । कृष्णा तु परा* । कृष्णा तू
तोऽखिला' इति दीपिकोक्तेः । *कृष्णाऽपि पूर्वैवेत्यन
भट्टाः । सर्वतिथिषु वर्ज्यान्युक्तानि मुहूर्तदीपिकाया
द्विष्टादेः "आमश्राद्धं तु" इत्यादिना विशिष्यकालोक्तेः । *शुक्ले
दिनान्तरवदेवापराण्हिकत्वे प्राप्ते पुनर्वचनं प्रतिपदोक्तापरा
स्पर्शेऽपि पूर्वदिनग्राह्यत्वार्थमित्यभिमानः । अत्रापराण्हव्याप्तेरनि
यकत्वापत्तिररुचिः । *तदभावे इति । कथंचित्पूर्वदिनान्ता
परेऽण्हि भवत्येव शेषिलोपस्यान्याय्यत्वात् । *परेति । "प्र
पत्सद्वितीया स्यात्" इत्यस्य कृष्णपक्षे प्रवृत्तेः । *कृष्णाऽपीति

प्रतिपत् पञ्चमी चैव उपोष्या पूर्वसंयुता ।

इतिजाबाल्युक्तेः,

पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिः ॥

इतिपैठीनस्युक्तेश्च,

प्रतिपत्पञ्चमी चैव सावित्रीभूतपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥

इति ब्रह्मवैवर्त्ते उपवासे परविद्धानिषेधाच्च । 'उदये तु
सस्य' इति सामान्यवचनं तु बाध्यते । 'प्रतिपत्सद्वितीया स्या
इत्यापस्तम्बवाक्यं तु उपवासेतरदैवकर्मविषयं सामान्यवाक्य
स्योपवासविषयैः पूर्ववाक्यैः संकोचात्, उपवासेऽप्यनापरा
प्रतिपद्विषयं च । उपवासेतरदैवकर्मसु शुक्ला पूर्वविद्धा ग्राह्या । "
पद्यप्यमावास्या' इति युग्मवाक्यात् । सा तु पूर्ववदापराह्णिकी । तद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तूत्तरैव । 'प्रतिपत्सद्वितीया स्यात्' इत्युक्तेः । इदं च वचनं सामान्यविषयत्वाद् विशेषविषयेण युग्मवाक्येनापराह्णिकपूर्वविद्धशुक्लप्रतिपद्विषये बाधितमपि युग्मवाक्यानिर्णयपक्षेषु प्रवर्त्तते । "बाधकाभावे बाध्यस्य निरपवादत्वात्" इति न्यायात् । अत एव तादृशदैवकर्मसु कृष्णोत्तरविद्धा ग्राह्या पूर्वोक्तसामान्यवचनादिति परिष्कुर्वन्ति । अत्रेदमरुचिबीजम्—अस्तु उपवासेतरदैवकर्मणि भवदुक्तमेव, उपवासे तु कथं पूर्वा ?, तद्विधायकानां शुक्लपक्षपरतया संकोचसम्भवात्, 'प्रतिपत्सद्वितीया' इत्यस्य सामान्यतः कृष्णपक्षपरत्वादिति । उपवासश्च सर्वतिथिषु नारदेनोक्तः ।

शुक्लान् वा यदि वा कृष्णान् प्रतिपत्प्रभृतींस्तिथीन् ।
उपोष्यैव बलिं दत्त्वा विधिना ह्यपरे दिने ॥
ब्राह्मणान्भोजयित्वा तु सर्वपापैः प्रमुच्यते । इति ।

उपवासोत्तरदिने च पारणं कार्यं, तच्च भोजनम् ।

उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् ।
अन्यथा तु फलस्यार्द्धं धर्ममेवोपसर्पति ॥

इतिदेवलोक्तेः । धर्मो—यमः । पारणं—कर्मसमाप्तिः, अभोजनात्मकोपवाससमाप्तिश्च भोजनमेव । न च रागप्राप्तं भोजनमनूद्य पूर्वाह्णमात्रं विधीयताम् । शास्त्रीयकर्मसमाप्तेरुद्यापनादिवच्छास्त्रीयत्वावश्यंभावात् । "भोक्ष्येऽहं पुण्डरीकाक्ष" इति सङ्कल्पविषयत्वादप्राशनरूपप्रतिनिधिविधानाच्च । तच्च पारणं तद्दिने उपोष्य तिथ्यनुवृत्तौ दिवा तिथ्यन्तप्रतीक्षया भोजनकालश्चेल्लभ्यते तदा तिथ्यन्ते कार्यम् ।

पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना ।
उपोष्य विधिवत्कुर्यात्तत्तदन्ते च पारणम् ॥

इति निगमवचनात् । यदा दिवा तादृशः पारणकालो न लभ्यते, तदा तिथ्यन्तो न प्रतीक्ष्यः, किं तु दिवैव पारणं कार्यम् ।

सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।
अन्यथा पुण्यहानिः स्यादृते धारणपारणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कूष्माण्डं (१)बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा
तैलं चामलकं *दिवं प्रवसता शीर्षं कपालान्त्रकम्।
निष्पावांश्च मसूरिकान् फलमथो वृन्ताकसंज्ञं मधु
द्यूतं स्त्रीगमनं क्रमात्प्रतिपदादिष्वेवमा षोडश ॥

शीर्षं-नारिकेलम्। कपालम्-अलाबु। अन्त्रं-पटोलम्।

भूपालः-

कूष्माण्डं बृहतीं क्षारं *मूलकं पनसं फलम्।
धात्री शिरः कपालान्त्रं नखचर्मतिलानि* च ॥
क्षुरकर्माङ्गनासेवां प्रतिपत्प्रभृति त्यजेत् ॥

नखं-*शिम्बी। चर्म-मसूरिका ॥

'द्वितीया तु *कृष्णा पूर्वा, शुक्लोत्तरा' इति हेमाद्रिः।

इति ब्रह्मवैवर्त्तात्। धारणमाहारं विना शरीरस्य, तदुत्तरादिः चपारणं-तत् चतुर्थकालभोजनविधिना विहितं, तद्विहायेत्यर्थः।

न रात्रौ पारणं कुर्याद्दते वै रोहिणीव्रताव।
तत्र निश्यपि कुर्वीत वर्जयित्वा महानिशाम् ॥

इति भविष्योत्तरे रात्रिपारणनिषेधाच्च।

यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम्।

इति वाक्यं तु निर्मूलमिति विवेचनकृतः। *दिवं प्रवसता-स्वर्गेच्छुना। *मूलकं-गूलकमिति पाठे शाकभेदः। *तिलाः-जर्तिलाः, प्रसिद्धतिला वा। *शिम्बी-तदुद्भवा निष्पावादयः। *कृष्णेति। "द्वितीया प्रतिपद्युता" इत्यापस्तम्बवाक्यं "युग्मायां" इति युग्मवाक्यं चानयोः शुक्लकृष्णवाक्यं च व्यवस्थापकम्। नन्वेवं सर्वकर्मसु व्यवस्थासिद्धौ

तृतीयैकादशी षष्ठी तथा चैवाष्टमी तिथिः।
वेधादधस्ताद्धन्युस्ता उपवासे तिथीस्त्विमाः ॥

---

(१) 'रिङ्गणी' इति महाराष्ट्रभाषायां ख्यातानीत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'कृष्णा द्वितीयाऽऽदिमा। पूर्वाह्णे यदि सा सिता तु परतः सर्वा' इति दीपिकोक्तेः। माधवानन्तभट्टमते तु* सर्वापि द्वितीया परा। तथा च माधवः-

पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्तगा।
सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा॥ इति।

इति उपवास एव तृतीयाविद्धद्वितीयानिषेधः,

एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी।
त्रयोदशी अमावास्या उपोष्याः स्युः परान्विताः॥

इति तत्रैव तद्विधिश्च व्यर्थः, तयोरपि शुक्लकृष्णवाक्याभ्यां व्यवस्थितत्वादिति चेन्न। सामान्यतः सर्वकर्मसु व्यवस्थाया उपवासे निषेधेन बाधो मा प्रसाङ्क्षीदिति रीत्याऽर्थवत्त्वात्। एतेन प्रतिपद्विद्धत्वं यमद्वितीयादिव्रतविषयमित्यपास्तं, मानाभावात्।

*मते त्विति। तुनाऽरुचिः। सा च—

प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी।
पौर्वाह्णिकी च कर्त्तव्या द्वितीया तादृशी विभो॥

इति स्कान्दे तादृशीति दृष्टान्तेन यथा प्रतिपत् शुक्ला पूर्वा, तथा द्वितीया शुक्लोत्तरेत्यस्य, यथा कृष्णा प्रतिपदुत्तरा तथा कृष्णा द्वितीया पूर्वेत्यस्यार्थतश्च लाभात्, न तु प्रतिपत् शुक्लकृष्णभेदेन द्वितीया तु वेधभेदेनेति। वैषम्यात्। विवेचनकृतस्तु या कृष्णद्वितीयोपवासेऽन्यत्र वा पूर्वविद्धोक्ता, सा-पूर्वदिने चेत्पूर्वाह्णप्रविष्टा भवति, तदैव। नो चेत्परैव।

प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी।
पौर्वाह्णिकी च कर्तव्या द्वितीयापि च तादृशी॥

इति स्कान्दात्। तादृशी—संमुखी पूर्वविद्धेत्यर्थः। पूर्वाह्णस्तु अहः पूर्वो भाग इति योगेऽपि न द्वेधाभक्तादिनाद्यभागः। तथा सति तत्रैवापरोऽह्न इति योगेनापराह्णो द्वेधाभक्तादिनान्त्यभाग एव स्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीया तु सर्वमते. रम्भाव्यतिरिक्ता परैव । ने
न युग्मवाक्यं रम्भाव्रतविषयम् ।

रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ।
अन्येषु *सर्वकार्येषु गणयुक्ता प्रशस्यते ॥

इति ब्रह्मवैवर्तात् । *गौरीव्रते तु विशेषमाह माधवः-

*मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे ।

न चेष्टापत्तिः । सायाह्नमात्रव्याप्तावनापराह्णिकत्वानापत्तेः । अतएव
पञ्चधा विभागेनापराह्णवत् पूर्वाह्णः पञ्चधा विभागेन प्रातरात्मकः
तत्र प्रविष्टा पूर्वा । इदं च वचनं कृष्णद्वितीयाविषयमेव । तत्र प्रा
पूर्वविद्धत्वे पौर्वाह्णिकत्वरूपविशेषमात्रविधाने लाघवात् । तेन
पूर्वेद्युः सर्वं प्रातःकालं परित्यज्य प्रवृत्ताऽपरेद्युस्त्रिमुहूर्ता तदपि
का वा, सा कृष्णाऽपि परैव। पूर्वेद्युः पौर्वाह्णिकत्वाभावात्, त्रिमुहूर्त
सत्त्वेन च परविधायकवचनानां प्रवृत्तेः । या तु पूर्वेद्युः सर्वं प्रातः
कालं परित्यज्य प्रवृत्ताऽपि परदिने नास्त्येव, त्रिमुहूर्तन्यूना
सा पूर्वैव । एवं या शुक्ला द्वितीया परदिने नास्त्येव त्रिमुहूर्तन्यू
ना वा, साऽपि पूर्वैव, परेद्युस्त्रिमुहूर्तासत्त्वादिति हेमाद्रिमाधव
योर्मतमेकीचक्रुः ।

*सर्वकार्येष्विति ।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इति चोपवासे(१)ऽवयुत्यानुवादः । गणो-गणेशः,तद्दैवत्या चतुर्थी
त्यर्थः । रम्भाख्यां वर्जयित्वेति पर्युदासाद् रम्भासदृशीत्यर्थः
लभ्यते । तत्सादृश्यं च त्रिमुहूर्तवेधवत्त्वेनेति गौरीव्रतव्याख्यातृभिः
तत्र कलादिवेधस्यापि परविद्धत्वप्रयोजकत्वादित्यभिप्रायेणाह
*गौरीव्रते त्विति । *मुहूर्तेति कलाकाष्ठादिपरं त्रिमुहूर्त

---

(१) अवयुत्य-पृथक्कृत्य, तृतीयामित्यर्थः । एकदेशानुवाद इति याव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् ॥ इति । चतुर्थ्यपि सर्वमते *गणेशव्रतातिरिक्ता परैव । *युग्मवाक्यात् ।

एकादशी तथा षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥

इति माधवीये वृद्धवसिष्ठोक्तेश्च । 'नागचतुर्थी तु मध्याह्नव्यापिनी पञ्चमीयुता च ग्राह्या' इति निर्णयामृते माधवीये चोक्तम् ।

युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान् ।
क्षीरेणाप्याय्य पञ्चम्यां पूजयेत्प्रयतो नरः ॥
विषाणि तत्र नश्यन्ति न तान् हिंसन्ति पन्नगाः ।

सद्भावानावश्यकत्वाभिप्रायम् ।

चतुर्थीसहिता या च सा तृतीया फलप्रदा ।
अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी ॥

इति विधेः अवैधव्यार्थगौरीव्रते एव शेषरूपसाहित्यप्रतीतेः ।

द्वितीयाशेषसंयुक्तां या करोति विमोहिता ।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः ॥

इति शेषनिषेधवत् । यदि किंचिदपि परेद्युर्न लभ्यते, तदा पूर्वैव ग्राह्या ।

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धापि कर्त्तव्या यदि न स्यात्परेऽहनि ॥

इतिवृद्धवासिष्ठात् । व्रतान्तरे च मुहूर्त्तायाश्चतुर्थीयुताया ग्रहणं, त्रिमुहूर्त्तद्वितीयाविद्धाया एव वर्जनम् । यदि परेद्युस्त्रिमुहूर्त्ता न लभ्यते तदा विद्धापि पूर्वैव कालानुरोधेन प्रधानत्यागायोगात् । *गणेशव्रतेति–गौरीव्रतोपलक्षणं तदन्यदेवताके उपवासे व्रतान्तरे वेत्यर्थः । *युग्मेति । "युगभूतानाम्" इत्यादि । गणेशव्रते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति माधवीये देवलोक्तेः । युगं-चतुर्थी । पूर्वत्र । ध्याह्नव्यासौ पूर्वा, अन्यपक्षेषु परैव; पञ्चम्यां पूजोक्ते *गणेशव्रते तु तृतीयायुतैव चतुर्थी ।

चतुर्थी तु तृतीयायां महापुण्यफलप्रदा ।
कर्तव्या व्रतिभिर्वत्स *गणनाथसुतोषिणी ॥

त्वाह*गणेशव्रते त्विति । *गणनाथेति । "संदिग्धेषु वाक्यशेषात्" इति(१) न्यायेनास्य गणेशव्रतपरता । न च तद्गणेश

(१) "अक्ताः शर्करा उपदधाति" इति श्रूयते, "तेजो वै घृतम्" इति च । शर्कराः-मृत्तिकामिश्राः क्षुद्रपाषाणाः । तेजः-तेजोजनकमित्यर्थः । तत्र तेजःशब्दस्य "आयुर्वै घृतम्"इतिवल्लक्षणास्वीकारात् तत्रायं संशयः-किं विधिवाक्येऽक्तत्वमात्रश्रवणेनाक्तत्वस्य च द्रव्यमात्रसाध्यत्वात् तदाकाङ्क्षायां यस्य कस्यापि घृत-तैल-वसादीनामन्यतमस्य ग्रहणं, किं वाऽर्थवादश्रुतघृतस्यैवेति ?। यद्यप्यञ्जनस्य विधिर्नास्तीति तदुपजीव्योक्तसंशयो नोपपद्यते, तथापि अक्तत्वविशिष्टशर्करोपधानविधानादञ्जनं विना शर्कराणां तत्त्वासम्भवान्नाञ्जनक्रियाक्षेपात्तद्विधिः कल्प्यते इति न दोषः।

अत्रोच्यते-यद्यर्थवादानुसारेण तत्साधनघृतमात्रस्य ग्रहणं, तर्हि "अक्ताः शर्कराः"इति विधिवाक्येऽक्तशब्दस्य घृताक्ते लक्षणा स्यादिति विधेरर्थवादापेक्षया निरपेक्षत्वाद्, उपक्रमस्थत्वेनासञ्जातविरोधित्वाच्च प्राधान्येन गुणानुसारिप्रधानलक्षणाया अन्याय्यत्वाद्विध्यनुसारेण द्रवद्रव्यमात्रसाध्याञ्जनक्रियाविधौ कल्पिते यस्य कस्यापि द्रवद्रव्यस्य ग्रहणम् । ततश्च "तेजो वै घृतम्" इत्यत्र विध्यनुसारिणी घृतशब्दस्य घृताघृतसाधारणाञ्जनसाधकद्रवद्रव्यमात्रे लक्षणेति पूर्वपक्षे-

सिद्धान्तसूत्रम्-"सन्दिग्धेषु वाक्यशेषात्"इति (जै० सू० १-४-६) अयमर्थः-विधिषु सन्दिग्धेषु सत्सु अर्थवादरूपवाक्यशेषाद्निर्णयः कर्तव्य इति । अर्थवादसमर्पिते विशेषे नान्यग्रहणं प्रामाणिकमिति वक्तुं । एवं च विधिवाक्यश्रुताक्तत्वान्यथानुपपत्तिप्रतिपन्नाञ्जनसाधनद्रवद्रव्यसामान्यस्याननुष्ठेयतया तद्विशेषाकाङ्क्षायामर्थवादसमर्पितघृतेनैव तस्याः शाम्यतया घृतस्यैवोपादानम् । न चैवमुक्तरीत्या लक्षणापत्तिः । घृतेऽपि द्रवद्रव्यत्वपर्याप्त्या लक्षणाऽनङ्गीकारात् तत एव च न विरोधोऽपि, इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति हेमाद्रौ ब्रह्मवैवर्तात् । माधवीये तु गणेश-
व्रते मध्याह्नव्यापिनी मुख्या ।

चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि ॥

इति बृहस्पतिवचनात् ।

*प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप ।

इति तत्कल्पेऽभिधानाच्च । तेन 'परदिने तत्त्वे परा,
अन्यथा *पूर्वा' इत्युक्तम् । *वस्तुतस्तु यत्र भाद्रशुक्ल-
चतुर्थ्यादौ गणेशव्रतविशेषे मध्याह्नपूजोक्ता तद्विष-
यण्येव प्रागुक्तवचनानि, न तु सार्वत्रिकाणि ।
*संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेः । तेन

नास्येव यत्र तृतीयायुक्ताया ग्राह्यत्वं स्यादिति वाच्यम् । दूर्वा-
गणपतिव्रतादेः सत्त्वात् । *चतुर्थीति । अग्रे भाद्रशुक्लचतुर्थी
वरदचतुर्थीत्युच्यते ।

सुरासुरानाप्नुवती गणेशं भक्तिपूर्वकम् ।
तस्यां प्रादाद्वरं यस्मात्तस्माद्वरचतुर्थिका ॥

इतिवाक्यात् । तद्व्रत-सिद्धिविनायकव्रतयोर्भेदेऽपि निर्णयो न
व्यते । अतश्च वरदचतुर्थीप्रकरणस्थप्रमाणमुक्त्वा सिद्धिविनाय-
कव्रतस्थप्रमाणमाह—*प्रातरिति । *पूर्वेति । मातृविद्धाप्राश-
स्त्यादिति भावः । गणेशव्रतसामान्ये माधवोक्तं निर्णयं तद्विशेषे
व्यवस्थापयति—*वस्तुतस्त्विति । *सङ्कष्टेति ।

श्रावणे बहुले पक्षे चतुर्दश्यां विधूदये ।
तस्मिन् दिने व्रतं कार्यं सङ्कष्टाख्यं सुरेश्वरि ॥
गणेशं पूजयित्वा तु चन्द्रायार्घ्यं च दीयते ।

इति विधूदयस्य कर्मकालत्वोक्तेः ।

चन्द्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वत्र गणेशव्रते *पूर्वैवेति सिद्धम् । संकष्टचतुर्थी चन्द्रोदयव्यापिनी ग्राह्या । दिनद्वये तत्त्वे *मातृयोगस्य सत्त्वात्पूर्वेति केचित् । *अन्ये तु दिने मुहूर्त्त्रयादिरूपस्य तृतीयायोगस्याभावात् परदिने तु धवोक्तमध्याह्नव्यापिसत्त्वात्संपूर्णत्वाच्च परेत्याहुः ते । दिनद्वये तदभावे तु परैव । *गौरीव्रते तु पूर्वैव*

गणेशगौरीबहुलाव्यतिरिक्ताः प्रकीर्तिताः ।
चतुर्थ्यः पञ्चमीविद्धा देवतान्तरयोगतः ॥

इतिवाक्याच्च । अत्रामान्तो मासः । "व्रते शुक्लादिमेव च" वचनात् । *मातृयोगस्येति । न च "मातृविद्धा प्रशस्यते" इत्यतः कथमिह प्रवृत्तिः ?, दिवा त्रिमुहूर्त्तवेधे हि तत्प्रवर्तते, न रात्राविति वाच्यम् ।

अहःसु तिथयः पुण्याः कर्मानुष्ठानतो दिवा ।
नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यते ॥

इति वाक्याद्रात्रिवेधस्यापि रात्रिसाध्यकर्मसु हेमाद्रिमाधवादिभिरुक्तत्वात् । दिनद्वये तदभावे पूर्वैव मातृयुक्तत्वात् । "गणेशगौरीबहुला व्यतिरिक्ताः" इत्यग्रिमवचनोपलक्षणमेतत् । *अन्ये त्विति । अत्रारुचिः । तथा हि—वेधवचांसि दिवावेधे एव प्रवर्त्तन्ते इत्यत्र मानाभावः । जन्माष्टम्यादौ रात्रिवेधस्यापि माधवादिभिरुक्तेः । महालक्ष्मीव्रतसमाप्तौ दिनद्वये चन्द्रोदयकालेऽष्टमीसत्त्वे "कृष्णपक्षेऽष्टमी चैव" इति पूर्वविद्धवाक्यस्य रात्रिवेधेऽपि प्रवृत्तेर्हेमाद्र्यादिभिरुक्तेरिति । *गौरीव्रते इति । तच्च—

माघशुक्लचतुर्थ्यां तु गौरीमाराधयेद्बुध ।

इत्यादिनोक्तम् । *पूर्वैवेति ।

जया च यदि सम्पूर्णा चतुर्थी ह्रसते पुनः ।
जया सैव हि कर्त्तव्या नागविद्धां न कारयेत् ॥

इति वाक्यस्य कैमुत्यन्यायेन तृतीयायुक्ताया ग्राह्यत्वार्थत्वात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मदनरत्ने ब्रह्मवैवर्तात् ।(१)

पञ्चमी तु माधवमते सर्वाऽपि पूर्वा ।

चतुर्थीसंयुता कार्या पञ्चमी परया न तु ।

*दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथाऽसिते(२) ॥

इति हारीतोक्तेः । हेमाद्रिमते तु *कृष्णा पूर्वा, सिता परा । 'कृष्णा पूर्वयुता, सिता परयुता स्यात्पञ्चमी' इति दीपिकोक्तेः । *वस्तुतस्तु हारीतोक्ति*रुपवासविषया ।

प्रतिपत्पञ्चमी चैव *सावित्रीभूतपूर्णिमाः ।

---

*दैवे इति–"पूर्वाह्णो वै देवानाम्" इत्यादेरपवादार्थम्, पित्र्ये इति दृष्टान्तः । *कृष्णेति । "एकादशी तथा षष्ठी" इति पूर्वविद्धत्वं "पञ्चमी तु प्रकर्त्तव्या षष्ठ्या युक्ता" इत्युत्तरविद्धत्वं च शुक्लकृष्णवाक्येन(३) व्यवस्थाप्यम् । अत्र "शुक्लपक्षे तथाऽसिते" इत्यनेन विरोध इत्यत आह–*वस्तुतस्त्विति । *उपवासेति । न च—

प्रायः प्रातरुपोष्या हि तिथिर्दैवफलेप्सुभिः ॥

इत्यनेन विरोधः, तेनोपवासे उत्तरविद्धाविधानादिति वाच्यम् । प्रायःपदोक्त्या तस्य विधायकत्वाभावात् । *सावित्री—वटामा ।

---

(१) संकष्टचतुर्थी उभयेद्युश्चन्द्रोदयकाले सत्त्वेऽसत्त्वे वा परैव । मातृयोगस्य भाद्रशुक्लचतुर्थीपरत्वात् । रात्रिवेधस्य कृष्णाष्टमीचतुर्दश्योर्विधानात्तत्रैव पूर्वविद्धत्वं न चन्द्रोदयात्पूर्वकाले तृतीयायोगेन तद्विद्धत्वं चतुर्थ्या उपलक्षणत्वे प्रमाणाभावात् । अपि तूदये त्रिमुहूर्तात्मकतृतीयावेधे सत्येव तृतीयाविद्धत्वम् । तस्मात्परैव चतुर्थी युक्तेति पुरुषार्थचिन्तामणिः ।

(२) असिते–कृष्णे इत्यर्थः ।

(३) शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥
इत्यनेनेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवमी दशमी चैव नोपोष्याः परसंयुताः ॥
इति ब्रह्मवैवर्तात् । यत्तु-

पञ्चमी तु प्रकर्तव्या षष्ठ्या युक्ता तु नारद ।
इत्यापस्तम्बीयं, तत्स्कन्दव्रतपरम् ।

स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता ।
इति वाक्यशेषादिति माधवः । नागपूजाविषय-
मित्यनन्तभट्टनिर्णयामृतादयः । चमत्कारचिन्तामणौ-

पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता ।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ॥ इति

*तेन नागपूजादौ परैव । यत्तु-मदनरत्नादिवोदास-
ययोः श्रावणपञ्चम्यतिरिक्ता पूर्वेत्युक्तम् ।

श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी ।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ॥
इति संग्रहोक्तेः,—

गणेशस्कन्दयोगाभ्यां क्रमान्नागः शुभाशुभः ।
अरिमित्रे तयोः पत्रे नागानामाखुबर्हिणौ(१) ॥
इति षट्त्रिंशन्मताच्च श्रावणपञ्चम्यतिरिक्ताया नागपञ्च-
म्याश्चतुर्थीयुतत्वमुक्तं, तद् *उपवासादिविषयम् । पत्रं-
वाहने ॥

भूतं-चतुर्दशी । पूर्णिमा-वटपूर्णिमा । उपवासातिरिक्त-
परेति लभ्यते; तदाह-*तेनेति । *उपवासादीति । आदि-
सम्पातायातम्, उपवासपूर्वकपूजाग्रहणार्थं वा । उपवासे प्रयो-
निर्णीतायास्तिथेस्तत्सहचरपूजायां ग्राह्यत्वात् । अत्र स्कन्दोप-
परा कार्या ।

---

(१) चतुर्थीयुक्ता पञ्चमी शुभफलप्रदा, षष्ठीयुक्ता चाशुभफलप्र-
तयोश्चतुर्थीयुक्तपञ्चम्या नागस्य मित्रमाखुर्वाहनं, षष्ठीयुक्तपञ्च-
तच्छत्रुर्मयूरश्च वाहनमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षष्ठी सर्वमते *स्कन्दव्रतातिरिक्ता परैव । *युग्मवाक्यात्,

*नागविद्धा न कर्तव्या षष्ठी चैव कदाचन ।

इति स्कान्दाच्च ।

स्कन्दोपवासे स्वीकार्या पञ्चमी परसंयुता ।

इति विशेषवचनात् । श्रावणपञ्चम्यपि उपवासे परा "श्रावणे पञ्चमी शुक्ला सम्प्रोक्ता नागपञ्चमी । तां परित्यज्य"इति वचनात् । तथा च परेद्युस्त्रिमुहूर्त्ता नागपञ्चम्यादिः पराऽन्यथा पूर्वेति । परे तु या पञ्चमी परा स्वीकार्या सा स्कन्दोपवासे नागपूजायां चेति (१)व्यवस्थयाऽन्या सर्वापि सर्वव्रते पूर्वैव, 'इतरा सचतुर्थिका' इति स्मरणात् । विशेषवाक्येषु उपोष्यादिपदान्युपलक्षणम् । "दैवे कर्मणि"इतिवचनादिति प्राहुः । मयूखे विवेचने चैतन्मतमेव दृश्यते । ग्रन्थकृता चोपवासादिपदानामुपलक्षणत्वं न मन्यते इति बोध्यम् । *स्कन्देति ।

षष्ठी तिथिर्महाराज सर्वदा सर्वकामदा ।

उपोष्या सा प्रयत्नेन कार्त्तिकेयप्रिया सदा ॥

इति सर्वमासीयशुक्लषष्ठ्याम्,

आषाढशुक्लषष्ठ्यां तु तिथिः कौमारिकी स्मृता ।

इति आषाढशुक्लषष्ठ्यां च, स्कदोपवासे

कृष्णाऽष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्दशी ।

एताः पूर्वयुता कार्यास्तिथ्यन्ते पारणं भवेत् ॥

इति स्कान्देन पूर्वविद्धत्वोक्तेः । कृष्णाष्टमी—कृष्णपक्षाष्टमी रुद्रदेवत्या व्रतकाण्डोक्ता कृष्णाष्टमीसमाख्यातव्रतसम्बन्धिनी वा । कृष्णजन्माष्टमीति केचित् । *युग्मेति । "षण्मुन्योः"इत्यादिः । *नागेति ।

---

(१) व्यवस्थया—नियमेनेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तमी पूर्वैव *युग्मवाक्यात्,

*षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदा।

इति स्कान्दाच्च ॥ निर्णयामृते-

षष्ठी च सप्तमी चैव वारश्चेदंशुमालिनः।

योगोऽयं पद्मको नाम सूर्यकोटिग्रहैः समः॥

(१)नागविद्धा न षष्ठी स्यात्पक्षयोरुभयोरपि।

दैवे कर्मणि तां कुर्यात् पित्र्ये पूर्वेण संयुताम्॥

इति स्पष्टमपि सौभन्तवं स्मर्यते।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी।

अमावास्या तृतीया च ता उपोष्याः परान्विताः॥

इत्यादावुपोष्यग्रहणं व्रतसामान्योपलक्षणम्। "नागोद्वादशरुद्रैः"इति नागवेधः। तेन षण्मुहूर्त्तन्यूनपञ्चमीयोगे पूर्वैव तिथिक्षये तु-

एकादशी तृतीया च षष्ठी चैव त्रयोदशी।

पूर्वविद्धाऽपि कर्त्तव्या यदि न स्यात्परेऽहनि॥

इति वासिष्ठं स्मर्त्तव्यम्। *युग्मेति "षण्मुन्योः"इत्यादि। *षष्ठ्या युतेति। या पूर्वेद्यूरात्रिमारभ्य प्रवृत्तौ तिथिक्षयादष्टमीविद्धा सा,सैव ग्राह्या। गुणानुरोधेन प्रधानलोपस्यान्याय्यत्वात्। अत

नागविद्धा तु या षष्ठी रुद्रविद्धो दिवाकरः।

कामविद्धो भवेद्विष्णुर्न ग्राह्यास्ते तु वासराः॥

इति निषेधोऽपि तत्र न प्रवर्त्तते। नागः—पञ्चमी। रुद्रः-अष्टमी दिवाकरः-सप्तमी। कामः-त्रयोदशी। विष्णुः-द्वादशी।

ननु—

षष्ठ्या युता सप्तमी च कर्त्तव्या तात सर्वदा।

षष्ठी च सप्तमी यत्र तत्र सन्निहितो रविः॥

इति स्कान्दात्,

(१) नागः-पञ्चमी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टमी तु *सर्वमते कृष्णा पूर्वा, सिता परा ।
व्रतमात्रेऽष्टमी कृष्णा पूर्वा, शुक्लाऽष्टमी परा ।
इति माधवोक्तेः, 'परयुक् शुक्लाऽष्टमी, पूर्वयुक् कृष्णा' इति

षष्ठीसमेता कर्त्तव्या सप्तमी नाष्टमीयुता ।
पतङ्गोपासनायेह षष्ठ्यामाहुरुपोषणम् ॥
इति भविष्याच्च सौरोपवास एव पूर्वा युज्यते न सर्वत्र, इति चेन्न। "सप्तमी नाष्टमीयुक्ता न सप्तम्या युताऽष्टमी । सर्वेषु व्रतकल्पेषु" इति ब्रह्मवैवर्त्तात् । एवं च
षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाऽष्टमी ।
सप्तमी परविद्धा च नोपोष्यं तिथिपञ्चकम् ॥
इति वाक्ये उपोष्यशब्दस्य सर्वव्रतोपलक्षणत्वं द्रष्टव्यम् । केचित्तु यत्र यत्र प्रधानलोपापत्तिभयेन विद्धा गृह्यते तत्र स्वस्योपवासनिषेधात् पुत्रादिप्रतिनिधिना ब्राह्मणभोजनादिप्रतिनिधिना वोपवास इत्याहुः । *सर्वेति ।
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धा तु कर्त्तव्या परविद्धा न कर्हिचित् ॥
उपवासादिकार्येषु एष धर्मः सनातनः ।
शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी ॥
पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुता ।
उपवासादिकार्येषु एष धर्मः सनातनः ॥
इति निगमोक्तेः । यत्तु "वसुरन्ध्रयोः" इति युग्मवाक्यं, यच्च—
नागविद्धा तु या षष्ठी भानुविद्धो(१)महेश्वरः ।
चतुर्दशी कामविद्धा तिस्रस्ता मलिनाः स्मृताः ॥
इत्यादिः तत्सर्वं शुक्लपक्षमात्रपरम् । यत्तु—

---

(१) भानुः-सप्तमी । महेश्वरः-अष्टमी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीपिकोक्तेश्च । *शिवशक्त्युत्सवे च कृष्णाऽप्युत्तरा
पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवे ।
इति माधवोक्तेः । दिवोदासीये भविष्ये-

शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ।
कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः ॥

इति, तत्तु नेह प्रवर्तते । सामान्यतः प्रसक्तयोर्व्यवस्थापकं तत्, न चेह तथा प्रसक्तिरस्तीति । नन्वस्तु उपवासे कृष्णाऽप्युत्तरा

एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः ॥

इति स्मरणादिति चेन्न । कृष्णाष्टम्याः पूर्वविद्धत्वबोधकोक्तिभवाक्यान्ते

उपवासादिकार्येषु एष धर्मः सनातनः ।

इत्याहत्योपवासोक्तेः । न चेदं रुद्रोपवासपरम् ।

रुद्रव्रतेषु सर्वेषु कर्त्तव्या संमुखी तिथिः ।
अन्येषु व्रतकल्पेषु यथोद्दिष्टामुपावसेत् ॥

इति स्मरणादिति शङ्क्यम् । 'एष धर्मः सनातनः' इत्यनेन सर्वविषयकत्वस्य स्पष्टं प्रतीतेः । रुद्रव्रतेष्विति च व्रतमात्रपरं, न तूपवासमात्रपरमिति समानविषयत्वाभावान्न तेनोपसंहारसंभव इति भावः । *शिवशक्तीति मिलितशिवशक्तिदेवत्यः पूजोपवासादिः उत्सवः-व्रतम् ।

अष्टम्या नवमी विद्धा नवम्या चाष्टमी युता ।
अर्द्धनारीश्वरप्राया उमामाहेश्वरी तिथिः ॥
अष्टमीनवमीयुग्मे महोत्साहे महोत्सवः ।
शिवशक्त्योः शिवक्षेत्रे पक्षयोरुभयोरपि ॥

इति पाद्मे विहितः । अत्र शिवस्य शक्तेश्च य उत्सवः पक्षद्वयगतायामष्टम्यां नवम्यां वा विहितः, स नवमीयुताष्टम्यां अष्टमीयुतनवम्यां च कार्य इत्येतावद्विवक्षितं, शिवक्षेत्रे इत्यनुवादः । शिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*यदा यदा सिताष्टम्यां बुधवारो भवेत्क्वचित्।
तदा तदा हि सा ग्राह्या एकभक्ताशने नृप॥
*संध्याकाले तथा चैत्रे प्रसुप्ते च जनार्दने।
बुधाष्टमी न कर्तव्या हन्ति पुण्यं पुराकृतम्॥
अन्त्यं पद्यं हेमाद्रौ न धृतम्।
नवमी तु सर्वमते पूर्वा युग्मवाक्यात्,
न कुर्यान्नवमीं तात दशम्या तु कदाचन।
इति स्कान्दाच्च।
दशमी तु पूर्वा परा वेति हेमाद्रिः।
कृष्णा पूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता।
इति माधवः। *वस्तुतस्तु मुख्या नवमीयुतैव ग्राह्या।
दशमी तु प्रकर्तव्या सदुर्गा द्विजसत्तम।
इत्यापस्तम्बोक्तेः। यत्तु—

त्सवस्य तत्रैव करणात्। शेषोऽर्थवादः। एवं च—
उपवासे सप्तमी तु वेधाद्धन्त्युत्तरं दिनम्।
पक्षयोरुभयोरेष उपवासविधिः स्मृतः॥
इति वाक्यं शिवशक्त्युत्सवाभिप्रायम्, अन्योपवासाभिप्रायकत्वा-
सम्भवादिति द्रष्टव्यम्।

*यदा यदेति। बुधयुक्तायां शुक्लाष्टम्यां बुधाष्टमीव्रतं विधी-
यते, तस्य तदुद्यापनस्य च विस्तरो व्रतार्के द्रष्टव्यः। *सन्ध्या-
काले इति—शुक्लाष्टमीत्वात्परा ग्राह्या। तत्र यदि परादिने बुधवारो
नास्ति पूर्वदिने च सायंकाले नास्ति किं तु सन्ध्याकाले वर्तते,
तत्र प्रधानं कार्यमिति प्राप्तावयं निषेधः पूजापर्याप्तसायंकाले सत्त्वे
बुधाष्टमी कार्या नान्यथेत्येतत्परम्।

मतान्तरमाह—*वस्तुतस्त्विति। अत्रेदमरुचिबीजम्—
युक्ता न दूषिता यस्मादतः सा सर्वतोमुखी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संपूर्णा दशमी कार्या पूर्वया परयाऽथ वा। इत्यङ्गिरसोक्तं, तन्नवमीयुक्तालाभे औदयिकी ग्राह्येत्येवं ज्ञेयम् ॥

अथैकादशी। *तत्रैकादश्युपवासो द्वेधा-*निषेधरिपालनात्मको व्रतरूपश्च। तत्राऽऽद्यः-

न शङ्खेन पिबेत्तोयं न खादेत् *कूर्मसूकरौ।
एकादश्यां *न भुञ्जीत पक्षयोरुभयोरपि ॥

इति कौर्मदेवलाद्युक्तेः। अग्निपुराणेऽपि-

इति सर्वतोमुखत्वोक्तिविरोधात् माधवमतमेव सम्यक्। आस्तम्बवाक्यं तु कृष्णपक्षपरम्।

नन्दाविद्धा तु या पूर्णा द्वादशी मकरे सिता।
भृगुणा नष्टचन्द्रा च एता वै निष्फलाः स्मृताः ॥ इति।
नागविद्धा तु या षष्ठी शिवविद्धा तु सप्तमी।
दशम्येकादशीविद्धा नोपोष्याः स्युः कथं च न ॥

इति निषेधश्च तथैव। उपवासपदं तूपलक्षणम्।

उपवासे एकादशीं निर्णेतुमाह- *तत्रेति। *निषेधेति।

विधेर्यत्राप्रधानत्वं प्रतिषेधे प्रधानता।
प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ॥ इति।

निषेधस्वरूपं निवृत्तिः। *कूर्मसूकरौ—महाराष्ट्राणां 'कन्गे'इति प्रसिद्धः कन्दः कूर्मः। 'गोडारु'इति 'कोन'इति वा प्रसिद्धः कन्दः सूकरः। *न भुञ्जीतेति। न च भोजनमभ्यवहारविशेषः फलादिभक्षणं दुर्वारमिति वाच्यम्। धातोः सकलादनीयार्थत्वात्। अन्यथा कृष्णायां विद्धायां चैकादश्यां व्रतरूपोपवासनिषेधे जननिषेधादेव फलादिभक्षणप्राप्तेः

उपवासनिषेधे तु भक्ष्यं किञ्चित्प्रकल्पयेत्।

इति फलादिभक्षणविधिवैयर्थ्यात्। एवम् "अन्नमाश्रित्य पापा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च।
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि॥ इति।
*न चात्र *पर्युदासेन व्रतविधिः। *तद्धेतुव्रतादि-
शब्दाभावात्। व्रतरूपस्तु ब्रह्मवैवर्ते-
प्राप्ते हरिदिने सम्यग्विधाय नियमं निशि।
*दशम्यामुपवासस्य प्रकुर्याद्वैष्णवव्रतम्॥ इति।
*इदं च शिवभक्तादिभिरपि कार्यम्।
वैष्णवो वाऽथ शैवो वा कुर्यादेकादशीव्रतम्।
इति शिवधर्मोक्तेः।
वैष्णवो वाऽथ शैवो वा सौरोऽप्येतत्समाचरेत्।

इति निन्दादौ "न पचेदन्नमात्मनः" इत्यादिवदन्नशब्दोऽदनीयपर
इति। निषेधपालने सर्वेषामधिकारमाह-*गृहस्थ इति *न
चात्रेति। एकमूलकल्पनालाघवादिति शेषः। *पर्युदासः—
विधेर्यत्र प्रधानत्वं प्रतिषेधेऽप्रधानता।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्॥
इति रीत्या नञः संकल्पलक्षणया। उत्तरपदेन—स्वोत्तरनाम-
पात्वर्थान्यतरान्वितार्थकतया। *तद्धेत्विति। यथा "नेक्षेतोद्यन्त-
मादित्यम्" इत्यादौ "तस्य व्रतम्" इत्युपक्रमे व्रतशब्दोऽस्तीति
संकल्पे लक्षणा, न चेह तथाऽस्तीत्यर्थः। ननु व्रतविध्यन्यनिषेधो
नोपगम्यते, तद्वचनयोरेकवाक्यतायां लाघवादिति चेन्न। तथा
सति संक्रान्तिरविवारादिवदुपवासनिषेधे भोजनस्यैव सम्भवात्
किञ्चिद्भक्षणविधानवैयर्थ्यात्। सति तु पृथक्निषेधे तत्पालनाय प्र-
वृत्तस्य निवृत्तेः संकल्पाविनाभावात्। संकल्पे चोपवासनिषेधाति-
क्रमशङ्कानिवृत्तये किंचिद्भक्षणविधेरर्थवत्त्वात्।
*दशम्यां निशि उपवासस्य नियममित्यन्वयः। व्रते सर्वे-
षामधिकारमाह-*इदं चेति। निषेधपालनस्य केवलनित्यत्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सौरपुराणाच्च । *सोऽपि द्वेधा-*नित्यः काम्यश्च

उपोष्यैकादशीं नित्यं पक्षयोरुभयोरपि ।

इति गारुडोक्तेः,

पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणम् ।

इति नारदोक्तेश्च नित्यता ।

यदीच्छेद्विष्णुसायुज्यं श्रियं सन्ततिमात्मनः ।

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥

इति कौर्मादिषु फलश्रुतेश्च काम्यता । उभयैकादशीव्रतं गृहस्थातिरिक्तानामेव नित्यम् । गृहस्थस्य तु शुक्लायामेव व्रतं नित्यं, न कृष्णायाम् ।

दाह-*सोऽपीति । व्रतरूपोऽपीत्यर्थः । *नित्य इति । नित्यत्वसाधकानि सङ्ग्रहे—

नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।

इत्युक्त्याऽकरणे(१)दोषश्रुतेरत्यागचोदनात् ॥

फलाश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितम् । इति ।

तत्राद्यन्तद्वयं ग्रन्थकारेणोक्तम्(२) । सदाशब्द उक्तः सनत्कुमारसंहितायाम्—

एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः ।

यावदायुःशब्दो विष्णुपुराणे—

द्वादशी न प्रमोक्तव्या यावदायुः सुवृत्तिभिः ।

अतिक्रमनिषेधः कण्वेनोक्तः—

एकादश्यामुपवसेन्न कदाचिदतिक्रमेत् ।

विष्णुरपि-

---

(१) अत्र केषुचित्पुस्तकेषु 'इत्युक्त्याऽतिक्रमे" इति पाठः ।

(२) नित्यंवीप्सेति द्वयम् 'उपोष्यैकादशीं नित्यम्' 'पक्षे पक्षे च कर्तव्यम्' इति वचनद्वयेनोक्तमतः सदेत्यारभ्य फलाश्रुतिपर्यन्तं स्पष्टीक्रियते इति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ।
*वनस्थयतिधर्माऽयं, शुक्लामेव सदा गृही ॥

इति देवलोक्तेः । न चानेन निषेधपालनमेव वनस्थयतिविषये उपसंह्रियते, न तु व्रतामिति वाच्यम् । अस्य *पर्युदासेन व्रतविधिपरत्वात् । *अन्यथा पूर्वोक्ताग्निपुराणवचने निषेधपालने गृहस्थस्याधिकारोक्त्या विरोधः स्यात् । *निषेधस्य निवृत्तिमात्रफलत्वेन *विशेषा-

---

एकादश्यां न भुञ्जीत कदाचिदपि मानवः । इति ।
अकरणे दोषः सनत्कुमारेणोक्तः—
न करोति यदा मूढ एकादश्यामुपोषणम् ।
स नरो नरकं याति रौरवं तमसावृतम् ॥
अत्यागचोदना विष्णुरहस्ये—
परमापदमापन्नो हर्षे वा समुपस्थिते ।
सूतके मृतके चैव न त्यजेद्द्वादशीव्रतम् ॥
फलाश्रुतिः कात्यायनादिवाक्ये—
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । इति ।
*वनस्थेति ब्रह्मचारिविधवयोरुपलक्षणमित्यग्रे स्फुटम् ।
*पर्युदासः—न भुञ्जीतेत्यत्र भोजनाभावसंकल्पार्थकत्वम्(१)।
*अन्यथा—पर्युदासाऽनुपगमे । नन्वाग्निपुराणे एकादशीसामान्ये गृहस्थस्याधिकारः प्रतीयते, स च शुक्लायामुपसंह्रियते ।
सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।
इत्युक्तेः । तथा च वर्णिगृहिव्रनियतीनां रण्डायाश्च निषेधपालने शुक्ला, गृहिभिन्नानां तु तत्र कृष्णेत्याग्नेयदेवलवाक्ययोर्निष्टङ्कार्थ इत्यत्राह—*निषेधस्येति । *विशेषः—अधिकारिविशेषो वनिस्त्वादिः । नन्वेवमपि नञः प्रधानीभूताख्यातान्वये लाघवान्निषेध

---

(१) तेनेति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नपेक्षणादुपसंहारायोगात् । *अभावस्य धर्मत्वाभा
च्च । *तस्मादनेन सर्वेषामेकादशीव्रतविधायिनां सा
न्यवाक्यानां वनस्थयतिविषये *उपसंहारान्न गृह
स्य कृष्णायां नित्यव्रतप्राप्तिः । कथं तर्हि-

संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे ।
चन्द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही ॥

इति नारदादिवचनेषु कृष्णानिषेधः ?, *प्राप्तयभा
दिति चेच्छ्रूयताम् ।

शयनीबोधिनीमध्ये या कृष्णैकादशी भवेत् ।
सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ॥

एवार्थो न पर्युदासः । वनस्थत्वादिकं तूदाहरणमात्रमित्यत्राह-*अ
भावस्येति । तथा च यथा "नेक्षतोद्यन्तमादित्यम्" इत्यादौ प्र
क्तोऽपि नञः प्रधानान्वयो व्रतान्वयार्थं त्यज्यते, तथा प्रकृते प
त्वान्वयार्थं स त्याज्य इति भावः । नन्वेवं—

यथा शुक्ला तथा कृष्णा विशेषो नास्ति कश्चन ।

इत्यादिसामान्यवाक्यानां का गतिरित्यत्राह—*तस्मा
दिति । *उपसंहारादिति । ननु उभयैकादशीवि
यवाक्यानां देवलादिवाक्यैर्वनस्थादिविषयत्वेनोपसंहारे गृहि
सामान्यवाक्यैः शुक्लाया अप्राप्तेः "शुक्लामेव सदा गृही" इत्यस्या
थग्विधायकत्वापत्तिः । इष्टापत्तौ चैवकारवैयर्थ्यं, वाक्यभेदश्च
अनुपसंहारे तु सामान्यवचनैरेव गृहिणः शुक्लाप्राप्तेः 'शुक्लामे
इत्येवकारस्य परिसंख्यार्थत्वापत्तिः । परिसंख्यायां त्रयो दोषाः

स्वार्थत्यागः, परार्थस्य क्लृप्तिः, प्राप्तस्य बाधनम् ।

इति वाक्यादिति चेन्न । विधिशक्तिकुण्ठकैवकारदर्शनाच्च
तवावयस्यानुवादत्वार्थं पक्षद्वयोपादानवशाच्छुक्ला सर्वैरुपोष्या कृ
गृहिभिन्नेनोपोष्येत्युपसंहारोपगमात् । *प्राप्त्यभावादिति । ह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पाद्मे गृहस्थस्य आषाढीकार्तिकीमध्यस्था या कृष्णा विहिता, सा पुत्रवतो निषिध्यते । अन्यकृष्णायां तु न विधिः । सर्वविधीनां वनस्थयतिषूपसंहारात् । न निषेधः, प्राप्त्यभावात् । शयन्यादिवाक्यं त्वपुत्रगृहिगोचरमित्यनन्तभट्टहेमाद्यादिग्रन्थाः । दीपिकाऽपि-'असिता तु शयनीबोधान्तरस्थाऽप्यथो न स्यात्सा*ऽऽत्मवतोऽपि' इति । मदनरत्ने भविष्ये—

यथा शुक्ला तथा कृष्णा द्वादशी मे सदा प्रिया ।
शुक्ला गृहस्थैः *कर्तव्या भोगसन्तानवर्धिनी ।
*मुमुक्षुभिस्तथा कृष्णा न *ते तेनोपदर्शिता ॥(१)

इति ।

निषेधपालनं काम्यव्रतं च सर्वकृष्णायां सर्वगृहिणां भवत्येव ।

तत्तु नैते शास्त्रप्राप्तार्थनिषेधा विकल्पप्रसङ्गात् । सामान्यरूपस्यापि हि विधेर्विशेषरूपेणापि विधिनोपजीव्यत्वे तुल्यबलत्वं दुर्वारं किं तु पर्युदासः । नञः पुत्रवद्गृहिपदान्वयात्पुत्रवद्गृहिभिन्नः संक्रान्त्यादावुपवसेदित्यर्थात् । 'शुक्लामेव सदा गृही'इत्यत्र च गृहिपदं पुत्रवद्गृहिपरम् । एवं च पुत्रवद्गृहिणः कृष्णायामुपवासाप्राप्तौ तद्विशेषे शयन्यादिवाक्येन विधीयते इति सारम् । वस्तुतस्तु संक्रान्त्यादौ पुत्रवद्गृहिण उपवासनिषेधो व्यर्थः । गृहिणस्तन्निषेधादेव सिद्धेः । अतो गृहिपदस्यातन्त्रत्वात्पुत्रवतां (२)विधुरविधवादीनां तन्निषेधः । एवमेवानुपदमग्रे 'पुत्रवांश्च सभार्यश्च'इति पृथग्द्वयोपादानं सङ्गच्छते इति । *आत्मवतः—पुत्रवतः(३) *कर्त्तव्येति व्रतादेशः । *मुमुक्षुभिरिति । गृहस्थानां मुमुक्षापवादार्थम् । गृहिभिन्नैः

---

(१) कृष्णेति सम्बध्यते । (२) विधुरो मृतपत्नीकः ।
(३) "आत्मा वै पुत्रनामासि" इति निरुक्तात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुत्रवांश्च सभार्यश्च बन्धुयुक्तस्तथैव च ।
उभयोः पक्षयोः काम्यव्रतं कुर्यात्तु वैष्णवम् ॥
इति नारदोक्तेः । एतत् सर्वं कालादर्शे उक्तम्-
विधवाया वनस्थस्य यतेश्चैकादशीद्वये ।
उपवासो, गृहस्थस्य शुक्लायामेव पुत्रिणः ॥
भुजेर्निषेधः कृष्णायां, सिद्धिस्तस्य ततो व्रते ॥ इति
*प्राच्यास्तु वैष्णवगृहस्थानां कृष्णाऽपि नित्या ।
नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः ।
*पक्षे पक्षे च कर्तव्यमेकादश्यामुपोषणम् ॥
सपुत्रश्च सभार्यश्च सजनो भक्तिसंयुतः ।
एकादश्यामुपवसेत् *पक्षयोरुभयोरपि ॥

कृष्णोपोष्येति पूर्वोक्तार्थस्याक्षरारूढत्वं सूचितम् । निषेधपक्षे गृहिणामधिकारो 'गृहस्थो ब्रह्मचारी च'इत्यनेन दर्शितः । *ते-तव । पूर्वमतेऽरुचिं व्यञ्जयन् स्वसिद्धान्तमाह-*प्राच्यास्त्विति *पक्षे पक्षे चेति व्रतस्य नित्यत्वार्थम् । सपुत्रश्चेत्यादि पुत्रादेरुपवासाधिकारार्थम् । बहुव्रीहिणा च पुत्रवदपुत्रगृहस्थयोर्निषेधोऽपि बाध्यते । अवैष्णवगृहस्थेषु पुत्रवद्गृहस्थनिषेधो दोषाधिक्यार्थः *पक्षयोरुभयोरपीति कृष्णालाभः ।

यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा ।
तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते ॥
इति वैष्णवलक्षणं भगवद्भक्तत्वमेवेत्याविष्कर्तुं विष्णुपरायणैरिति ।

रविवारेऽर्कसंक्रान्त्यामेकादश्यां सितेतरे ।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही ॥
इति रविवारादौ पुत्रवद्गृहिण उपवासनिषेधस्तु नेह प्रवर्तते तन्निमित्तोपवासस्येत्युक्तेः । व्यतीपातादावुपवासनिषेधस्तु काम्यो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति नारदोक्तेरित्याहुः । *पुत्रशब्दश्चापत्यमात्रवचनः । नारायणवृत्तौ–'पुमांस एव मे पुत्रा जायेरन्' इत्यत्रापत्यमात्रवाचित्वोक्तेः(१)। 'जनयेद्बहुपुत्राणि'इति लिङ्गात् । 'पौत्री मातामहस्तेन'इति मनूक्तेः। पुत्र्या अपत्यमित्यर्थे तु "स्त्रीभ्यो ढक्"(पा०सू० ४-१-१२) इति पौत्रेय इत्यापत्तेः। 'पुमान् पुत्रो जायते' इति च ॥ उपवासनिषेधे विशेषो वायवीये उक्तः—

पत्रासपर इति । *पुत्रशब्दश्चेति । इदमापाततः । नारायणस्यादौ विशिष्टवाचिशब्दानां पृथग्विशेषणसमभिव्याहारे विशेष्यमात्रपरत्वमिति न्यायादेव तदुक्तेः । इतरथा 'न कुर्यात् पुत्रवान् एही'इत्यादौ पुत्रशब्दः कथमपत्यमात्रवचनः ? 'पौत्री मातामहः' इत्यत्र च पौत्रो दौहित्रः । पुत्रपदस्य स्त्रीलिङ्गस्य दुहित्रर्थत्वात् । तथा चामरः—

आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी ।
आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ॥ इति ।

अत्रात्मजादिशब्दानां पुत्रदुहित्रादिः पृथगर्थो, ऽपत्यादेस्तदुभयसाधारणोऽर्थ इति स्पष्टम् । "जनयेद्बहुपुत्राणि"इत्यनेकान्यपत्यानीत्यर्थः । तत्र पुमपत्यानामेव पुत्रपदार्थत्वे अजातपुमपत्यकजातकन्यकथनादेर्दुहितृदौहित्रादिगामित्वानुशासनबाधापत्तेः । अत्र चानेकापत्यानि न विधीयन्ते । एकपुत्रस्य दत्तकादिसंपादनापत्तेः। किं तु सकृत् कृते कृतः शास्त्रार्थ इति न्यायो निवर्त्यते । एवं च एकौरसस्यौरसान्तरवद्दत्तकादेरेकदत्तकस्य वा दत्तकान्तरसत्त्वे न शास्त्रविरोधः ।

अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च ।

---

(१) स्त्र्यपत्यव्यावृत्त्यर्थतया 'पुमांस' इति विशेषणोपादानेन पुत्रशब्दस्यापत्यमात्रवाचित्वोक्तेरित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*उपवासनिषेधे तु भक्ष्यं किंचित् प्रकल्पयेत्।
न दुष्यत्युपवासेन उपवासफलं लभेत् ॥

भक्ष्यं च तत्रैवोक्तम्-

नक्तं हविष्यान्नमनोदनं वा
फलं तिलाः क्षीरमथाम्बु चाज्यम्।
यत्पञ्चगव्यं यदि वाऽपि वायुः
*प्रशस्तमत्रोत्तरमुत्तरं च ॥ इत्यलम्।

तत्र दशमीवेधो द्वेधा-अरुणोदयवेधः सूर्योदयवेधश्चेति। आद्यो गारुडे-

---

इत्यत्रापुत्राद्युपादानं प्रायिकत्वार्थम्। 'एष्टव्या बहवः पुत्राः' इत्यत्राप्येवमेवेति। *उपवासनिषेधे त्विति। ननु सत्रायागुरुर्य विश्वजिता सत्रफलमिव(१) किंचिद्भक्षणेऽपि व्रतरूपोपवासफलं पापक्षयादिकं प्राप्नोतीत्यर्थः स्यात्। एवं च सर्वथा व्रतरूपोपवासनिवृत्तिर्दुर्भेति चेन्न। कृष्णविद्धादौ ह्युक्तरीत्या तादृशोपवासस्यैवाप्राप्तेः, प्राप्तो वा न दुष्यतीत्यनेन विरोधः, निषिद्धत्वे तदतिक्रमे दोषः स्यात्, किं तु सर्वपुरुषसाधारणः सकलैकादशीसाधारणो यो व्रतातिरिक्तो निषेधस्तं पालयितुकामस्य 'इति विज्ञाय कुर्वीत' इत्यादिवचनादनुषङ्गतो विशेषनियमरहितभोजनद्वयवर्जनसंकल्परूपव्रतप्राप्तेरुपवासनिषेधातिक्रमः शङ्क्येतेति तन्निवृत्त्यर्थं किंचिद्भक्षणविधिः। तथा चोपवासेन निषेधेऽनुष्ठीयमाने आनुषङ्गिकी

---

(१) "यः सत्रायागुरते स विश्वजिता यजेत" इति श्रुतौ सत्रसंकल्पपूर्वं तदनुष्ठानप्रवृत्ताप्रवृत्तयोरुभयोरपि विश्वजियागानुष्ठानमावश्यकम्। संकल्पमात्रस्यैव विश्वजित्पूर्वकालिकतायाः क्त्वाप्रत्ययेन प्रतीतेः संकल्पस्य चोभयत्रापि विद्यमानत्वादिति पूर्वपक्षीकृत्य सत्रसंकल्पस्य निमित्तत्वेन श्रुतत्वात् संकल्पं कृत्वा तदनुष्ठानाभावे प्रायश्चित्तार्थं विश्वजियागो विधीयते इति सिद्धान्तितं जैमिनिना 'विश्वजित्त्वप्रवृत्ते भावः कर्मणि स्यात्" इति सूत्रेण (जै० सू०६-४-१) एवं च विश्वजियागेन सत्रसंकल्पजन्यफलस्य सिद्धिरिति स्पष्टम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः।
नैवोपोष्यं वैष्णवेन तद्धि नैकादशीव्रतम्॥ इति।

अरुणोदयस्वरूपं च माधवीये स्कान्दे-

*उदयात्प्राक् चतस्रस्तु घटिका अरुणोदयः। इति।

यदपि-

उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता।
संपूर्णैकादशी नाम तत्रैवोपवसेद् गृही॥

इतिगारुडसौरधर्मादिवचनम्, यच्च भविष्ये-

आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता।
एकादशी तु संपूर्णा विद्धाऽन्या परिकीर्तिता॥

इति, तदप्युपसंहारन्यायेन दण्डचतुष्टयपरमेव। हेमाद्रावप्येवम्। *यत्तु ब्रह्मवैवर्ते-

चतस्रो घटिकाः प्रातररुणोदयनिश्चयः।
चतुष्टयविभागोऽत्र वेधादीनां किलोदितः॥
अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयम्।
अतिवेधो द्विघटिकः प्रभासंदर्शनाद्रवेः॥
महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते।

स्यव्रतात्मकोपवासानुष्ठानेन निषेधातिक्रमात्प्रसक्तं दोषं न प्राप्नोति। उपवासफलं भोजननिवृत्तिरूपं निषेधफलं च प्रत्यवायपरिहारं लभेदित्युत्तरार्द्धार्थः। कृष्णाविद्धादिनिषेधानां विद्धादिभिन्नां गृहस्थादिभिन्नो वोपवसेदिति पर्युदासत्वमते तु तुल्यफलत्वान्निषेधत्वोक्तिसङ्गतिरिति तु बोध्यम्। *प्रशस्तमिति नक्तादेः समुच्चयवारणाय। *उदयादिति। उदयात्प्राक् चतुर्दण्डत्वमरुणोदयशब्दप्रवृत्तिनिमित्तं घटिकाशब्दात्। मुहूर्त्तद्वयं क्वचिद्दण्डचतुष्टयात् न्यूनं, क्वचित्त्वधिकमिति विरोधः। नित्योपवासवर्ज्यवेधवचोविरोधं शङ्कते-*यत्त्विति। उदयात्प्राक्तनचतुर्दण्डान्तःपातिप्रथमदण्डत्वमरुणोदयत्वम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तुरीयस्तत्र विहितो योगः सूर्योदये बुधैः ॥
इति, तदपि *अवयवद्वाराऽरुणोदयवेधविशेषपरमेवेति माधवीये मदनरत्ने च । अन्त्यस्तूदयवेधः* ।
*तथान्येऽपि वेधा हेमाद्रौ माधवीये च गारुडे-

उदयात्प्राग् द्विदण्डान्तःपातिप्रथमदण्डत्वमतिवेधत्वम् । उदयमत्र सन्नतत्पूर्वकालत्वं महावेधत्वम् । उदयवत्कालत्वं योगत्वमिति भेदः । *अवयवेति । अतिवेधादेररुणोदयवेधावयवत्वादरुणोदयवेधत्वमित्यर्थः । *उदयवेध इति ।

अतिवेधादयः सर्वे ये वेधास्तिथिषु स्मृताः ।
सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये मतः ॥

इति वचनादुदयात्प्राक् चतुर्दण्डत्वमरुणोदयशब्दप्रवृत्तिनिमित्तम् अत एव काम्योपवासवर्ज्यवेधवाक्ये घटिकाशब्दोपादानमित्युक्तं द्वलकं दर्शयति-*तथेति । एकादशी त्रेधा-पूर्णा खण्डा विद्धा चेति भेदात् । तत्र या द्वात्रिंशन्मुहूर्त्तव्यापिनी, सा पूर्णा ।

प्रतिपत्प्रभृतिः सर्वा उदयादोदयाद्रवेः ।
सम्पूर्णा इति विख्याता हरिवासरवर्जिता ॥

इति स्कान्दे हरिवासरपर्युदासात् तत्र—

उदयात्प्राग्यदा विप्र मुहूर्त्तद्वयसंयुता ।
संपूर्णैकादशी नाम तत्रैवोपवसेद् गृही ॥

इति गारुडात् । अत्र विशेषापेक्षायाम्—

आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः ।
सम्पूर्णैकादशी नाम कार्या धर्मफलेप्सुभिः ॥

इति गारुडं द्रष्टव्यम् । अरुणोदयव्यापिन्याः परदिने न्यूना खण्डा । अरुणोदयाव्यापिनी तु विद्धा ।

आदित्योदयवेलायाः प्राक् मुहूर्त्तद्वयान्विता ।
एकादशी तु सम्पूर्णा विद्धाऽन्या परिकीर्तिता ॥

इति भविष्यात् । विद्धाऽपि द्वेधा-सन्दिग्धा संयुक्ता च । तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*उदयात् प्राक् त्रिघटिका व्यापिन्येकादशी यदा ।
संदिग्धैकादशी नाम वर्ज्येयं धर्मकाङ्क्षिभिः ॥
*उदयात् प्राङ् मुहूर्तेन व्यापिन्येकादशी यदा ।
संयुक्तैकादशी नाम वर्ज्येयं धर्मवृद्धये ॥
*हेमाद्रौ रात्रेरन्त्योऽष्टमो भागोऽप्यरुणोदय उक्तः-
निशः प्रान्ते तु यामार्धे देववादित्रवादने ।
सारस्वतानध्ययने चारुणोदय उच्यते ॥
इति स्मृतेः । *अत्रैके-'एषां सर्वपक्षाणां मुहूर्तद्वयेन क्रोडीकारात्, 'निशः प्रान्ते' इति वचनाच्च रात्रिमानवशात्सार्धत्रिदण्डादयोऽनेकेऽरुणोदयाः । तदाह हेमाद्रिः-सार्धघटिकात्रयोक्तिरष्टाविंशतिघटीमितरात्रिविषया । महत्तरास्तु रात्रीरपेक्ष्य चतस्रो घटिका इत्युक्तमिति'

पुत्रराज्यप्रसिद्ध्यर्थं द्वादश्यामुपवासयेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ।
इति विहितं काम्योपवासं सन्दिग्धां लक्षयित्वा तत्र निषेधति-*उदयादिति ।
पुत्रपौत्रप्रसिद्ध्यर्थं द्वादश्यामुपवासयेत् ।
तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥
इति काम्योपवासं संयुक्तां लक्षयित्वा तत्र निषेधति-*उदयादिति । एतच्च वाक्यद्वयं वैष्णवेतरविषयम् । वैष्णवान् प्रति तन्निषेधवैयर्थ्यात् । "नैवोपोष्यं वैष्णवेन" इति सामान्यत एव नित्यसाधारण्येन निषेधसत्त्वात् । इदं च द्वादश्यां काम्योपवासविधानप्रक्रान्तसंवत्सरव्यापिकाम्यप्रयोगविषयं, न तूपक्रमविषयम् । तस्य तिथ्यन्तरकाम्यव्रतवत् संपूर्णायामेवौचित्यात् । प्रक्रान्तविषयत्वेनाप्येतादृशोपपत्तेः । रात्रेरष्टमभागत्वं तत्प्रवृत्तिनिमित्तमिति हेमाद्रिमतमाह-*हेमाद्रावित्यादिना । एतन्मतं दूषयितुमुत्थापयति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्याहुः। तन्न। अरुणोदयशब्दस्यानेकार्थत्वापत्तेः। *न च मुहूर्त्तद्वयमर्थः। दण्डद्वयैकमुहूर्तादिवेधानां तथाऽप्यनुपपत्तेः। न हि तेषां यामार्धत्वमरुणोदयत्वं चास्ति। मुहूर्तद्वयस्य यामार्धस्य च 'चतस्रो घटिकाः' इत्यनेनोपसंहारात् न तदर्थः*। न च 'सार्धं तु घटिकात्रयम्' इत्यनेनापि तदापत्तिः* शङ्क्या। तेन चतुर्दण्डवेधस्यैवोक्तेः। चतुर्दण्डाऽर्धघटीदशमीसत्त्वे हि वेधस्तदर्थः। द्विघटिकादौ *तदयोगाच्च। यत्तु मतम्-कियताऽरुणोदयवेध इत्यपेक्षायां सार्धघटिकात्रयनियमादरुणोदयेऽर्धघटिकातो न्यूनदशमीसत्त्वे न दोषः' इति। तत्तुच्छम्। *द्विदण्डादावपि तदापत्तेः*।

*दशमीशेषसंयुक्तो यदि स्यादरुणोदयः।
नैवोपोष्यं वैष्णवेन तद्धि नैकादशीव्रतम्॥

इति गारुडे भविष्ये च योगमात्रनिषेधात्। नारदीयेऽपि-

लववेधेऽपि विप्रेन्द्र दशम्यैकादशीं त्यजेत्।
सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम्॥

स्कान्देऽपि-

कलाकाष्ठादिगत्यैव दृश्यते दशमी विभो।

---

*अत्रैके इति। *न चेति प्रवृत्तिनिमित्तैक्यान्न नानार्थत्वापत्तिरिति भावः। *तदर्थो-मुहूर्त्तद्वयमर्थः। *तदापत्तिः-मुहूर्त्तद्वयलाभः। अष्टाविंशतिघटीरात्र्यां मुहूर्त्तद्वयं सार्धघटीत्रयं तत्र दशमीप्रवेशमात्रेण विद्धत्वात्। *तदयोगात्-मुहूर्त्तद्वयालाभात्। इदमपातत्तः। चतुर्दण्डापत्त्यभावस्यापि सम्भवात्। सार्द्धघटिकात्रयव्यापकत्वे दोषमाह-*द्विदण्डादावपीति *तदापत्तेः-विद्धत्वापत्तेः। तस्य व्याप्यत्वेऽर्द्धदण्डतो न्यूनदशमीसत्त्वेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकादश्यां न कर्तव्यं व्रतं राजन्कदाचन ॥ इति ।
माधवोऽप्याह—'सोऽयं कलादिवेधोऽरुणोदयवेधे पूर्वोदयवेधे च समानः' इति । निगमेऽपि-
सर्वप्रकारवेधोऽयमुपवासस्य दूषकः । इति ।
अत एव माधवेन-'अरुणोदयाद्यदण्डेऽल्पदशमीस्पर्शे संपृक्ता, कृत्स्नघटीयोगे संदिग्धा, मुहूर्तव्याप्तौ संयुक्ता, उदये संकीर्णा' इत्युक्त्वा
अरुणोदयवेलायां दशमी यदि संगता ।
संपृक्तैकादशी तां तु मोहिन्यै दत्तवान्प्रभुः ॥
इति गोभिलाद्युक्तेः *पूर्वोक्तगारुडादेश्च सामान्यतो विशेषतश्चारुणोदयवेधो निषिद्धः । *यत्तु-'अष्टमभागोऽरुणोदयः' इति हेमाद्रिणोक्तम्, यच्च 'महत्तरास्तु रात्रीः' इति, तत्परमतं स्वयमेव*दूषितम् । *अन्तेऽप्युक्तम्-

---

प्यत्वानपायाद्दोषमाह-*दशमीति । *पूर्वोक्तेति ।
उदयात्प्राक् त्रिघटिका व्यापिन्येकादशी यदा ।
सन्दिग्धैकादशी नाम वर्ज्येयं धर्मकाङ्क्षिभिः ॥
इति पूर्वोक्तेत्यर्थः । आदिना
उदयात् प्राक् मुहूर्त्तेन व्यापिन्येकादशी यदा ।
संयुक्तैकादशी नाम वर्ज्येयं धर्मकाङ्क्षिभिः ॥
इति ग्रहः । इयमतिविद्धा ।
आदित्योदयवेलाया आरभ्य षष्टिनाडिकाः ॥
संकीर्णैकादशी नाम त्याज्या धर्मफलेप्सुभिः ।
इति च ग्रहः । वेला-तत्प्रत्यासन्नकालः । उदये संकीर्णेति वाक्येऽप्युदयस्तत्प्रत्यासन्नः कालः । इयं महाविद्धा । अतिवेधमहावेधौ ग्रन्थे दर्शितौ । रात्र्यन्ताष्टमभागत्वमरुणोदयत्वमिति हेमाद्रेरभिप्रायमाह-*यत्त्वित्यादि । *दूषितमिति । रात्र्यन्ताष्टमभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'वेधतारतम्यं च दोषतारतम्यादुपपद्यते' इति । दोषतारतम्यं च प्रायश्चित्ततारतम्यादवगम्यते । तच्चोक्तं हेमाद्रौ स्मृत्यन्तरे-

अज्ञानाद्यदि वा मोहात्कुर्वन्नेकादशीं नरः ।
दशमीशेषसंयुक्तां प्रायश्चित्तमिदं चरेत् ॥
कृच्छ्रपादं नरश्चीर्त्वा गां च दद्यात्सवत्सकाम् ।
सुवर्णस्यार्धकं देयं तिलद्रोणसमन्वितम् ॥

विधानान्तरं तत्रैव—

गरूपारुणोदयस्य कदाचिद्घटिकाचतुष्टयरूपत्वात्तदुपलक्षणत्वे सर्ववेधानामैक्यसंभवादिति शेषः । अथैवं वेधतारतम्योक्तिर्व्यर्थमित्यत्राह—*अन्तेऽपीति । वेधतारतम्यादित्यादि ।

दशमीशेषसंयुक्ता गान्धार्या समुपोषिता ।
तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् ॥
दशम्यनुगता यत्र तिथिरेकादशी भवेत् ।
तत्रापत्यविनाशः स्यात् परेत्य नरकं व्रजेत् ॥

इत्याद्यनिष्टस्मरणात् । तत्र

दशमीशेषसंयुक्तां न तु कुर्यात्कथंचन ।
जम्भस्येयं पुरा दत्ता दशमीशेषसंयुता ॥
उपोष्य तां प्रमादेन प्रायश्चित्तं चरेद्बुधः ।

इति वाक्यात् ।

प्रायश्चित्तमकुर्वाणस्तत्फलेन विनाशितः ।
स गच्छत्यन्धतामिस्रं नरकं भृशदारुणम् ॥

इति फलानुत्पत्तिप्रत्यवायोत्पत्त्योरुक्तेश्च वेधनिषेधातिक्रमे कर्मणि पापं स्वीकार्यम् । वेधतारतम्यान्यथानुपपत्त्या च पापतारतम्यं, तत्तारतम्याच्च प्रायश्चित्ततारतम्यम् । यद्वा श्राद्धदिने मैथुनादिनिषेधवत् एतन्निषेधानामपि कर्माङ्गत्वं तदतिक्रमे प्रायश्चि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणान्भोजयेत्त्रिंशद्गां च दद्यात्सवत्सकाम्।
*धरणस्यार्धकं देयं तिलद्रोणमथापि वा॥ इति।

करणे कर्त्तुरनिष्टोत्कीर्त्तनं तु न हि निन्दान्यायेन व्रतं स्तोतुमेव। तत्र व्रतवैगुण्यं तद्वशान्नित्यकाम्यान्यतरतत्फलस्य पापक्षयस्वर्गविष्णुप्रीत्यादेरसिद्धिः।

प्रायश्चित्तं तु कर्त्तव्यं शुद्ध्यर्थं तु व्रतस्य वै।
निश्छिद्रं जायते येन धर्मः संतानमेव च॥

इत्यर्थवादेन स्पष्टं तथा प्रतीतेः। प्रायश्चित्तमपि अतिक्रम्यमाणनिमित्तभूतनिषेधोपस्थापितव्रताङ्गतया तत्समाधानार्थम्। तदाचरणे फलश्रुतिश्चाङ्गे फलश्रुतित्वात् प्रधानस्तुत्यर्थैव। एवं च वैगुण्यरूप कर्मदोष एव वेधातिवेधाख्यः तत्तारतम्याच्च तदतिक्रमनिमित्तकस्य तारतम्यमिति। *धरणं—सुवर्णं हेमचत्वारिंशन्माषाः।

तुल्या यवाभ्यां कथिताऽत्र गुञ्जा
वल्लस्त्रिगुञ्जो धरणं च तेऽष्टौ।
गद्याणकस्तद्द्वयमिन्द्रतुल्यै—
र्वल्लैस्तथैको घटकः प्रदिष्टः॥

इति ज्योतिषं तु नेह प्रवर्त्तते धार्मिकसंप्रदायभङ्गापत्तेः। कृच्छ्रपादसवत्सगोदानोभयं केवलमेकत्रिंशद्ब्राह्मणभोजनेन वैकल्पिकतिलद्रोणसुवर्णार्द्धाभ्यां वा समुच्चितद्वयेन वाऽधिकेन युक्तमिति चत्वारः पक्षा वेधातिवेधमहावेधयोगेषु क्रमेण योज्याः। ननु

यातुधानव्रतं योगे महावेधे तु बाष्कलेः।
जम्भासुरस्यातिवेधे मोहिनी वेधलेशिनी॥

इति जम्भासुरवेधत्वेनोक्तेऽतिवेध एवैतत्प्रायश्चित्तं स्यात्।

दशम्याः प्रान्तमादाय यदोदेति दिवाकरः।
तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अत्र वेधतारतम्याद्व्यवस्थेति हेमाद्रिः । *'निशा प्रान्ते' इत्यपि दोषाधिक्यार्थमेव । *तस्माच्चतुर्घटिकात्मक एवारुणोदय इति सिद्धम् । तेन षट्पञ्चाशद्घटिकानन्तरं दशमीप्रवेशेऽरुणोदयवेध उक्तो भवति । अन्त्योऽपि तत्रैव कण्वेनोक्तः—

उदयोपरिविद्धा तु दशम्यैकादशी यदि ।
दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनः ॥ इति

स्मृत्यन्तरेऽपि—

*दशम्याः प्रान्तमादाय यदोदेति दिवाकरः ।
तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तत् ॥ इति

तत्रारुणोदयवेधो वैष्णवविषयः । तद्वाक्येषु वैष्णवग्रहणात् । तत्स्वरूपं तु माधवीये स्कान्दे-

परमापदमापन्नो हर्षे वा समुपस्थिते ।
नैकादशीं त्यजेद्यस्तु यस्य दीक्षाऽस्ति वैष्णवी ।
विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते ॥ इति

*यद्यपि पित्रादेरागमदीक्षायां तन्मात्रस्य वैष्णवत्व

इत्यग्रिमवचनादित्यत्राह—*अत्रेति उच्चावचानां पक्षाणां व्यवस्थयैव निवेशाद्वाक्यशेषस्तु निन्दामात्रमिति भावः । ननु दोषतारतम्येन वेधतारतम्यमयुक्तम्, अरुणोदयवेधे दोषतारतम्याभावादित्यत्राह—*निशा इति । *तस्मादिति । एतच्च सर्वं जयकथायां ग्रन्थकृताऽभिहितम् । वस्तुतस्तु महत्तरह्रस्वतरत्रिघटिकोदयसाम्यस्याशुद्धत्वान्मुहूर्त्तद्वयमरुणोदय इति सिद्धान्तः । घटिकादिपदानि च मुहूर्त्तार्द्धपराणि । वेधतारतम्यं च मुहूर्त्तमुपजीव्यैव शिष्टानां हेमाद्रिमतमेव सम्यगिति । *दशम्या इति । जम्भपदं त्वप्रधानकयातुधानपरम् । उदेतीतिदर्शनात्तद्वाक्येषु दशमीशेषत्वा[illegible] वाक्येषु विष्णुमन्त्रदीक्षावत्त्वं वैष्णवत्वमालोच्य शङ्कते-*यद्यपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तु पुत्रादेः, तथापि स्वपारम्पर्यप्रसिद्धमेव वैष्णवत्वं स्मार्तत्वं च मन्यन्ते वृद्धाः । तत्त्वसागरे भविष्ये—

यथा शुक्ला तथा कृष्णा, यथा कृष्णा तथेतरा ।
तुल्ये ते मन्यते यस्तु स वै वैष्णव उच्यते ॥

कैचित्तु दशम्यां नवमीवेधमपि त्यजन्ति । तत्र मूलं मृग्यम् । उदयवेधस्तु *परिशेषात् स्मार्तगोचरः । तदाह माधवः—

अरुणोदयवेधोऽत्र वेधः सूर्योदये तथा ।
उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्तयोः क्रमात् ॥

हेमाद्रिस्तु केषांचिदर्धरात्रेऽपि दशमीवेधमाह—

अर्धरात्रे तु केषांचिद्दशम्या वेध इष्यते ।
कपालवेध इत्याहुराचार्या ये *हरिप्रियाः ॥
न *तन्मम मतं यस्मात्त्रियामा* रात्रिरिष्यते ॥

इति ब्रह्मवैवर्तात् ।

---

*परिशेषादिति ।

अतिवेधादयः सर्वे ये वेधास्तिथिषु स्मृताः ।
सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये स्मृतः ॥

इत्युक्तेर्वैष्णवान् प्रति अतिवेधादीनां वेधत्वनिराकरणबाधादित्यर्थः।

*हरिप्रिया इति ।

अयमर्थः—अतीतरात्रेः पश्चार्द्धेनागामिरात्रेः पूर्वार्द्धेन सह दिवसोऽद्यतनः, स एकादश्यामुपोष्यः । तत्र दशमीप्रवेशे निद्रा सा त्याज्येति । एतन्निराकरोति—*न तन्मम मतमिति । *त्रियामेति । प्रथमप्रहरार्द्धस्य चतुर्थप्रहरार्द्धस्य च दिनकर्मसंबन्धितया तदन्या कथंचित्त्रियामा रात्रिः रात्रिकर्माणि ग्राह्यानित्यर्थः । एवं चोपवासे दिनकर्माणि अरुणोदयमारभ्य ग्राह्या । तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्यार्थः-'अनद्यतने लङ्'(पा०सू०३-२-१११)इत्यत्र 'अतीतायां रात्रेः पश्चिमयामद्वयमागामिन्या रात्रेः पूर्वयामद्वयं दिवसश्च सकल एषोऽद्यतनः कालः'इत्युक्तं महाभाष्ये । स एष वर्तमानः काल एकादशमहोरात्र उपोष्यः । तन्मध्ये दशमीप्रवेशे विद्धा । सा त्याज्या अत एव हेमाद्रौ-

दशम्याः सङ्गदोषेण अर्धरात्रात्परेण तु ।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदा ॥

इति दोष उक्तः । चतुरो यामान् दिवसस्येत्यर्थः । स्वमते तु रात्रेस्त्रियामत्वात् प्रहरत्रयं पूर्वशेषः । तेन चतुर्थप्रहर एव वेधो युक्तः । सोऽप्यरुणोदय एव

सूर्योदयं विना नैव स्नानदानादिकः क्रमः ।

इति मार्कण्डेयपुराणात् । 'प्रत्यूषोऽहर्मुखं कल्यम्' इति कोशादरुणोदयमारभ्य सूर्यांशुप्रवृत्तेस्तत्रैव निषेधः । तेन मतभेदाद्व्यवस्थेति केचित् । कैमुतिक न्यायेनारुणोदयवेधस्यैवेयं स्तुतिरिति तु माधवः ।

विद्धा हेया । यस्तु कपालवेधो नामार्द्धरात्रवेधः, स परेऽहनि उपवासे न त्याज्यः, किं तु दिवा संकल्पे एव ।

दशम्याः सङ्गदोषेण अर्द्धरात्रात्परेण तु ।
वर्जयेच्चतुरो यामान् संकल्पार्चनयोः सदा ॥

इति हेमाद्रौ वचनादिति । ये तु-रात्रेस्त्रियामत्वात्प्रहरत्रयं पूर्वशेषः । तेन चतुर्थप्रहर एव वेधो युक्त इति वदन्ति, तदाशयं न एव जानन्ति । अन्ये तु—

सूर्योदयं विना नैव स्नानदानादिकः क्रमः ।

इति वचनात् 'प्रत्यूषोऽहर्मुखं कल्यम्'इति कोशादरुणोदयमारभ्य सूर्यांशुप्रवृत्तेः तत्रैव निषेध इति न तन्मम मतमित्यस्यार्थमाहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'दिक्पञ्चदशभिस्तथा' इति वेधः, स उपवासातिरिक्तविषय इति माधवः ।

सर्वप्रकारवेधोऽयमुपवासस्य दूषकः ।
सार्धसप्तमुहूर्तस्तु योगोऽयं बाधते व्रतम् ॥

इति निगमादित्यलम् । तत्र माधवमते *वैष्णवैररुणोदयविद्धा त्याज्या । यदा त्वेकादश्येव शुद्धा सती वर्धते, द्वादशी वा, उभयं वा, तदा परोपोष्या ।

*एकादशी द्वादशी वाऽधिका चेत्त्यज्यतां दिनम् ।
पूर्वं, ग्राह्यं तूत्तरं स्यादिति वैष्णवनिर्णयः ॥

इति माधवोक्तेः । स्मार्तैस्तु सूर्योदयविद्धा त्याज्या । यदा त्वेकादशी शुद्धा सती वर्धते, द्वादशी च समा

---

*वैष्णवैरिति ।

दशमीशेषसंयुक्तो यदि स्यादरुणोदयः ।
नैवोपोष्यं वैष्णवेन तद्दिनैकादशीव्रतम् ।

इति वचनात् । इदमुपलक्षणं वैष्णवेतरैरपि काम्यव्रते अरुणोदयविद्धायास्त्याज्यत्वात् । माधवमते इत्यभिधानं च केषांचिद्ग्रन्थे वैष्णवमधिकृत्योपवासो न लिखितस्तद्व्यावर्तनाय ।

*एकादशीति । नारदः—

संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।
द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम् ॥

संपूर्णा च—"उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता । संपूर्णैकादशी नाम" इत्युक्ता । भागवततन्त्रे—

संपूर्णैकादशी त्याज्या परतो द्वादशी यदि ।
उपोष्या द्वादशी शुद्धा त्रयोदश्यां च पारणम् ॥

यत्तु—व्यासः ।

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यूना वा, तदा *गृहस्थैः पूर्वा, यतिभिरुत्तरा कार्या।

प्रथमेऽहनि संपूर्णा व्याप्याहोरात्रसंयुता।
द्वादश्यां च तथा तात दृश्यते पुनरेव च॥
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो॥

इति स्कान्दोक्तेः। वर्धमानोऽप्येवमाह। उभयपृ
तु शुद्धा विद्धा वा सर्वेषां परैव।

उपोष्या द्वादशी शुद्धा यदीच्छेत्परमां गतिम्॥

इति, तत्तु न शुद्धाधिकद्वादश्यां प्रवर्तते। लोपो हि सूर्योदयास्पर्शि
तस्यावमदिन एव सत्त्वेन विद्धाया एव लाभात्। न च लोपो=द्वि
यसूर्योदयास्पर्शित्वम्। "लुप्तादौ दशमीमिश्रितत्वात्" इतिवि
प्रस्तावगतमाधवविरोधादिति। हेमाद्रौ—

संपूर्णैकादशी यत्र द्वादशी च परेऽहनि।
तत्रोपोष्या द्वादशी स्याद्द्वादश्यामेव पारणम्॥ इति॥

*गृहस्थैरिति। यत्तु—

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा।
पूर्वामुपवसेत्कामी निष्कामस्तु परां वसेत्॥

इति। तत्र कामी=गृहस्थः, निष्कामो=यतिरित्येके, तन्न।

निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा।
प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तमा॥

इति स्कान्दे निष्कामगृहिणोऽपि परैवेति गृहिसामान्ये पूर्वो
वासाभावात्। एतदेवाभिप्रेत्य सकामैः पूर्वा निष्कामैरुत्तरेति स
मान्यतो वक्ष्यति। अत एव—

पुनः प्रभातसमये घटिकैका यदा भवेत्।
अत्रोपवासो विहितो वनस्थस्य यतेस्तथा॥
विधवायाश्च तत्रैव परतो द्वादशी न चेत्॥

इत्यादौ वनस्थादिशब्दानां निष्कामोपलक्षणत्वान्न वा
भेदः। अत्र 'उदयात्प्राक्' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि ॥

इति नारदोक्तेः । द्वादशीमात्रवृद्धौ तु शुद्धायां *पूर्वैव ।

न चेदेकादशी विष्णो द्वादशी परतः स्थिता ।
उपोष्यैकादशी तत्र यदीच्छेत्परमं पदम् ॥

इति नारदोक्तेः ।

द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते ।
शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृशः ॥

इति माधवोक्तेश्च । मदनरत्नेऽप्येवम् । यत्तु—

विद्धाऽप्यविद्धा विज्ञेया परतो द्वादशी न चेत् ।
अविद्धाऽपि च विद्धा स्यात्परतो द्वादशी यदि ॥

परिभाषिता न ग्राह्या । नाडीपञ्चकात्मकतिथिवृद्ध्या विना परेद्यु-
र्घटिकासत्त्वासम्भवात् तत्रत्तिथिवृद्धौ चाकस्मिकह्रासस्य ज्योतिः-
शास्त्रविरुद्धत्वादित्युदयद्वयमात्रव्यापिन्येव वाच्या । प्रभातपदं तु
द्वितीयदिनप्रातःपरमिति । 'प्रथमेऽहनि संपूर्णा'इत्युक्ते 'संपूर्णैकाद-
शी'इत्याग्रिमे च 'उदयात्प्राक्'इति परिभाषितैव । तादृशपदसत्त्वात् ।
एवं चैतद्वाक्यद्वयं स्मार्तपरमेव, न वैष्णवपरं तेषां विद्धत्वमात्रेण
परत्वादिति । *संपूर्णेति । स्मार्त्तपरतावीजमुक्तम् । विद्धानिषे-
धात्परेति स्मर्त्तव्यम् । *पूर्वैवेति ।

संपूर्णैकादशी शुद्धा द्वादश्यां नैव किञ्चन ।
द्वादशी च त्रयोदश्यामपि तत्र कथं भवेत् ॥
पूर्वा गृहस्थैः कार्या स्यादुत्तरा यतिभिस्तिथिः ।

इति तु निर्मूलम् । 'विद्धाऽपि'इति स्मार्त्तपरम् । वैष्णवानां
विद्धानिषेधात् । 'अविद्धाऽपि च'इति स्मार्त्तपरं,न वैष्णवपरं; तेषां
द्वादश्यामेवोपवासविधानात् । किं तु स्मार्त्तपरं परं तु तेषामविद्धै-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति हेमाद्रौ पाद्मवचनं, तदेकादश्या* वृद्धौ ज्ञेयम्
तदुक्तं माधवेन-

एकादशी द्वादशी चेत्युभयं वर्धते यदा ।
तदा पूर्वं दिनं त्याज्यं स्मार्तैर्ग्राह्यं परं दिनम् ॥ इति
विद्धैकादश्यां द्वादशीमात्रवृद्धौ च सर्वेषां *परैव
*तत्र चैकादशीमात्रवृद्धौ गृहिणः पूर्वा, यतेरुत्तरा
*पूर्वोक्तपाद्मोक्तेः ।

एकादशी विवृद्धा चेच्छुक्ले कृष्णेऽविशेषतः ।
उत्तरां तु यतिः कुर्यात् पूर्वामुपवसेद् गृही ॥

इति प्रचेतसोक्तेः *एतच्छुद्धाविद्धातुल्यमिति माधवः

कादशीत्यागो न युज्यते इत्यभिमानः । *एकादश्या इति
तथा च तत्र स्मार्त्तानामविद्धैकादशीत्यागो न युक्तः । *परैवेति
उपवासदिनं विद्धं यदा भवति पूर्वया ।
द्वितीयेऽह्नि यदा न स्यात्स्वल्पाऽप्येकादशी तिथिः ॥
तत्रोपवासो विहितः कथं तद्वद सूतज ।
सूत उवाच—
यदा न प्राप्यते विप्रा द्वादश्यां पूर्ववासरः ।
रविचक्रार्द्धमात्रोऽपि तत्रोपोष्यं परं दिनम् ॥
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारयेत् ।

इति नारदीयात् । पारणपर्याप्तद्वादश्या लाभे तस्यामेव । अन्या
तु तामुल्लङ्घ्यापि पारणं कार्यमित्यर्थः । *तत्र च=विद्धैकादश
च । *पूर्वोक्तेति । 'विद्धाऽप्यविद्धा विज्ञेया' इत्यादिः । *एत
दिति । अविशेषत इत्युक्तेः । ननु इदं प्रचेतोवाक्यं शुद्धाविषयमे

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद् गृही ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वचने संपूर्णापदात् । विद्धा तु सर्वेषां परैव ।

द्वादशीमिश्रिता कार्या सर्वत्रैकादशी तिथिः ॥

द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा ।

इति पाद्मोक्तेः । उपोषणस्य प्राधान्यात्तत्रान्त्यकालावच्छिन्नतिथिरपेक्षिता । पारणे त्वङ्गत्वादेव तादृशद्वादश्यलाभे न दोष इति । एवम् । तथा सति—

संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी ।

द्वादश्यां लङ्घनं कार्यं त्रयोदश्यां तु पारणम् ॥

इत्याद्येकवाक्यतयोक्तपाद्मस्यापि शुद्धाविषयत्वापत्तेः । यदि च तस्य शुद्धाधिकायां वैष्णवान् प्रति, विद्धाधिकायां स्मार्तान् प्रतीत्यधिकारिभेदेन प्रवृत्तिरुपेयते, तदा एकाधिकारिणं स्मार्तं प्रति शुद्धाविद्धासाम्येन प्रचेतोवाक्यप्रवृत्तिर्दुर्वारेति । नन्वेवमप्यत्र गृहिणः कथं पूर्वा ? ।

दिनत्रयमृते देवि नोपोष्या दशमीयुता ।

सैवोपोष्या सदा पुण्या परतश्चेत्रयोदशी ॥

इत्यादिदिनत्रयातिरिक्तदशमीविद्धायामुपवासनिषेधात् । दिनत्रयं हि दशम्येकादशीद्वादशीरूपं, न तु एकादशीद्वादशीत्रयोदशीरूपम् ।

यदि दैवात्तु संसिध्येदेकादश्यां तिथित्रयम् ।

तत्र क्रतुशतं पुण्यं द्वादशी पारणे भवेत् ॥

इत्येकवाक्यत्वात् । इत्थं च सैवेति तच्छब्देन "सा वैश्वदेवी" इत्यादौ सदधिपयस इव दिनत्रययुतदशमीविद्धाया एव परामर्शो न दशमीमात्रस्येत्ययमेव विधिः "एरं कृत्वोद्देयम्" इतिवत् । 'नोपोष्या दशमीयुता' इति तु "न गिरागिरा" इतिवदनुवादः । न च नोपोष्येति विधिरेव, सैवेति त्वनुवादः । एवकारस्य विधिशक्तिकृप्तकत्वादिति वाच्यम् । द्वादश्यवृद्ध्यर्थस्य परतश्चेदित्यस्य व्यवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रयोदश्यां न लभ्येत द्वादशी यदि किञ्चन।
उपोष्यैकादशी तत्र दशमीमिश्रिताऽपि च॥

इति स्कान्दात्।

अविद्धानि निषिद्धैश्च न लभ्यन्ते दिनानि तु।
मुहूर्तैः पञ्चभिर्विद्धा ग्राह्यैवैकादशी तिथिः॥

इत्यृष्यशृङ्गोक्तेश्च। मुहूर्तपञ्चकमरुणोदयमारभ्य ज्ञेयम्। अन्यथोत्तरेऽह्नि एकादश्यभावासम्भवात्। तदुक्तं च स एव।

सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः।
प्रातर्भवतु वा मा भूद्यस्मान्नित्यमुपोषणम्॥ इति।

यदपि हेमाद्रिणा-'शुद्धसमा शुद्धन्यूना वा अधिकद्वादशिका चेत्सर्वेषां परैव' इत्युक्तं, तदपि वैष्णवविषयम्, स्मार्तानां तु पूर्वैवेत्यविरोधः*।

हितान्वयापत्तेः। मैवम्। कालादर्शादौ—

सर्वत्रैकादशी कार्या दशमीमिश्रिता नरैः।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम्॥

इत्यृष्यशृङ्गवचसो विद्धाधिकैकादशिकायां विद्धोपवासविधायकत्वेनार्थवत्त्वात्। अन्यथा प्रातर्भवत्वित्यस्यासङ्गतेः। न च त्रयोदश्यां द्वादशी प्रातर्भवत्विति तदर्थः। दशमीमिश्रितेत्युक्तेस्तदव्यवहितोत्तरप्रातर्लाभात्। अत्र संकल्पकाले एकादश्यसत्त्वेऽपि संकल्पं वक्ष्यति। तथा च "दिनत्रयमृते देवि" "सर्वत्रैकादशी कार्या" इत्याद्योर्विरोधभङ्गाय गृहिणां पूर्वा यतेरुत्तरेति व्यवस्था स्वीकार्या। त्रयोदश्यामिति वाक्यद्वयं विद्धसमापरं तस्यां यतीनां परा भविष्यतीत्याशङ्कावारणार्थम्। अविरोध इति प्रतिज्ञानिर्वाह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*हेमाद्रिमते तूच्यते । तत्र—

*शुद्धा विद्धा द्वयी नन्दा, त्रेधा न्यूनसमाधिकैः ।
षट्प्रकारा पुनस्त्रेधा द्वादश्यूनसमाधिकैः ॥

इत्यष्टादशैकादशीभेदाः । तत्र *शुद्धाऽधिका न्यूनद्वादशिका, शुद्धाऽधिका समद्वादशिका च सकामैः पूर्वा, निष्कामैरुत्तरा कार्या । *'प्रथमेऽहनि सम्पूर्णा' इति पूर्वोक्त-

---

स्मार्तान् प्रति हेमाद्रिजालमाह—

*हेमाद्रीति । हेमाद्रिमाधवयोः स्मार्तान् प्रति न शास्त्रभेद इति स्मर्तव्यम् । *शुद्धेति । शुद्धन्यूना न्यूनद्वादशिका १, शुद्धन्यूना समद्वादशिका २, शुद्धन्यूनाऽधिकद्वादशिका ३, शुद्धसमा न्यूनद्वादशिका ४, शुद्धसमा समद्वादशिका ५, शुद्धसमाऽधिकद्वादशिका ६, शुद्धाऽधिका न्यूनद्वादशिका ७, शुद्धाऽधिका समद्वादशिका ८, शुद्धाऽधिकाऽधिकद्वादशिका ९, एवं विद्धाऽपीत्यष्टादशभेदा इत्यर्थः । परादिनसूर्योदयात्प्राक् समाप्तिर्न्यूनत्वं, सूर्योदयात्किञ्चिदूनत्वं समत्वं, सूर्योदयोत्तरसत्त्वमाधिक्यम् । तत्र—

आद्यासु षट्सु पूर्वैव व्यवस्थाऽनन्तरद्वये ।
गृहमेधियतीनां स्यान्नवम्यां स्यात्परेऽहनि ॥
शुद्धाधिका न्यूनसमोत्तरा चेत् पूर्वा गृहस्थैर्यतिभिः परैव ।
सा चेत्पराधिक्यवती परैव, शेषास्तु शुद्धाः प्रथमा उपोष्याः ॥
विद्धात्रये तु पूर्वा स्याद्व्यवस्थाऽनन्तरद्वये ।
अपरेऽहनि शेषाः स्युः सप्तमी तु व्यवस्थया ॥
विद्धासमा न्यूनसमोत्तरा चेद्विद्धाधिका न्यूनपरा च तत्र ।
सैव व्यवस्था, यदि विद्धहीना ग्राह्योपवासे प्रथमैव सर्वैः ॥
विद्धासमा यद्यधिकोत्तरा स्याद्विद्धासमा विद्धसमोत्तरा स्यात् ।
तदा परैव प्रतिमुक्तशङ्कैरेकादशी सर्वजनैरुपोष्या ॥

इति कारिकाऽनुसारेणाह—*शुद्धेत्यादि । *प्रथमे इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्कान्दात् ।

ऊनद्वादशिकायां तु विष्णुप्रीतिकामैरुपवासद्वयं कार्यम् ।

प्रथमेऽहनि सम्पूर्णा व्याप्याहोरात्रसंयुता ।
द्वादश्यां च तथा तात दृश्यते पुनरेव च ॥
पूर्वा कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो ।

इति स्कान्दादित्यर्थः । अत्र गृहस्थयतिपदे सकामनिष्कामपरे ।

सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा ।
पूर्वामुपवसेत्कामी निष्कामस्तु परां वसेत् ॥

इति मार्कण्डेयवाक्यैकवाक्यत्वात् । न च सकामनिष्कामशब्दयोरेव गृहियतिपरत्वमस्तु, प्रायशो गृहिणां सकामत्वाद्यतीनां निष्कामत्वादिति वाच्यम् ।

निष्कामस्तु गृही कुर्याद्दुत्तरैकादशीं सदा ।
प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तमा ॥

इति स्कान्दे गृहस्थस्यापि निष्कामस्योत्तरोपवासविधानात् । इदं च हेमाद्रेर्जालमात्रमिति । शुद्धाऽनधिकाऽनधिकद्वादशिका, शुद्धानधिकाऽधिकद्वादशिका २, शुद्धाऽधिकाधिकद्वादशिका ३, शुद्धाधिकानधिकद्वादशिका ४ इति चत्वार एव भेदाः । तत्रायं चतुर्थो भेदः । द्वितीयसूर्योदयसमाया एव तिथेर्ज्योतिषे प्रसिद्धेर्द्वित्रिपलान्तरेण समा तदधिकान्तरेण न्यूना चेत्युभयथा एवानधिकत्वेन सङ्ग्रहात् ।

*उपवासद्वयमिति । न चैकाधिकारिकमुपवासद्वयं कथं विधीयते ?, एकनिमित्तकस्यावृत्तेरयुक्तत्वात् किन्त्वयं गृहियतिभेदेन विहितस्यानुवादोऽस्तु, तथा सति अधिकार्यन्तरमपि न कल्प्यमिति वाच्यम् । 'तिथी' इति द्वन्द्वसमासार्थकैकशेषेणेतरेतरयोगप्रतीतेस्तदनुरोधेनाधिकार्यन्तरादेरपि युक्तत्वात् । अत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्पूर्णैकादशी यत्र प्रभाति पुनरेव सा।
लुप्यते द्वादशी, तस्मिन्नुपवासः कथं भवेत्॥
उपोष्ये द्वे *तिथी तत्र विष्णुप्रीणनतत्परैः॥
इति वृद्धवसिष्ठोक्तेः।

शुद्धन्यूना शुद्धाधिका शुद्धसमा विद्धन्यूना विद्धसमा वाऽधिकद्वादशिका चेत्सर्वैर्वा परैवेति हेमाद्रिः। *मदनरत्ने तु *शुद्धाधिका परा। *'संपूर्णैकादशी यत्र' इति पूर्वोक्तेः। *अन्या पूर्वा।

लुप्यते इत्यस्योनेत्यर्थः।

सम्पूर्णैकादशी यत्र परतः पुनरेव सा।
त्रयोदशी उषःकाले उपोष्या तत्र का भवेत्॥
उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः।

इति स्कान्दे 'त्रयोदशी उषःकाले'इत्युक्तेस्तदेकवाक्यत्वादित्याशयेनोनद्वादशिकायामित्युक्तम्। वस्तुतः समद्वादशिकायामपि विष्णुप्रीतिकामस्योपवासद्वयं युक्तम्। लोपो द्वितीयसूर्योदयास्पर्शित्वमपीति तस्या अपि संग्रहात्। 'त्रयोदशी उषःकाले'इति त्वतन्त्रमिति नवीनाः।

शुद्धन्यूनेत्यादित्रयेऽधिकद्वादशिकाऽन्वयः। एतच्च वैष्णवाभिप्रायम्। स्मार्त्तान् प्रति त्वाह—*मदनेति। *शुद्धाधिकेति। अधिकद्वादशिकेति शेषः। अयं च शुद्धाधिकाऽधिकद्वादशिकारूपस्तृतीयो भेदः। *संपूर्णेति।

संपूर्णैकादशी यत्र प्रभाते पुनरेव सा।
सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि॥

इत्यर्थः।

पूर्णाऽप्येकादशी त्याज्या वर्द्धते द्वितयं यदि॥

इत्यपि द्रष्टव्यम्। *अन्येति। शुद्धन्यूना शुद्धसमा वाऽधिकद्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*शुद्धा यदा समा हीना समा हीनाऽधिकोत्तरा।
एकादशीमुपवसेन्न शुद्धां वैष्णवीमपि ॥

इति स्कान्दात्। शुद्धा=एकादशी। उत्तरा=द्वादशी। 'न चेदेकादशी विष्णौ' इति नारदोक्तेश्च। यत्तु-'अविद्धाऽपि च विद्धा स्यात्' इति पाद्मं तच्छुद्धाधिकापरम्। यत्तु-

संपूर्णैकादशी त्याज्या परतो द्वादशी यदि।
उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम् ॥

इत्यादि, *तद्वैष्णवपरम्। स्मार्तानां तु* पूर्वैवेत्युक्तम्

दशिकेत्यर्थः। अयं च शुद्धानधिकाधिकद्वादशिकेति द्वितीयो भेदः। *शुद्धेति। एकादशी यदि शुद्धा सती समा द्वितीयसूर्योदयपर्यन्ता ततो न्यूना वा, द्वादशी ततो न्यूना समाऽधिका वा तदा शुद्धामेव उपवसेत् न वैष्णवीं=द्वादशीमित्यर्थः। एतेन शुद्धानधिकानधिकद्वादशिकेति प्रथमभेदोऽपि संगृहीतः। तत्राविवादात्स ग्रन्थे नोद्दिष्टः। *वैष्णवेति। वैष्णवग्रन्थान्तर्गतत्वात्। *पूर्वैवेति। यत्तु-

उदयात्प्राग्यदा विप्रा मुहूर्त्तद्वयसंयुता।
संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही ॥

इति वचनाद् गृहिणां पूर्वा।

संपूर्णैकादशी यत्र द्वादशी चापरेऽहनि।
तत्रोपोष्या द्वादशी स्याद् द्वादश्यामेव पारणम् ॥
न गर्भे विशते जन्तुरित्याह भगवान् हरिः।

इति वाक्याद्यतीनां परेति; तन्न। प्रथमवाक्यस्थ उत्तरीत्या गृही सकामोऽवैष्णवः। तस्यारुणोदयविद्धायां काम्योपवासनिवर्त्तकत्वात्। तत्रैवेत्येवकारवशात्तद्भिन्ने उपवासो नेत्यर्थात्, द्वितीयवाक्यस्य च गृहिणामेवोभयाधिक्यविषयत्वात्। तत्र पराया एव "न गर्भे विशते जन्तुः" इत्यर्थवादसूचितगर्भावेशवशाद्दुःखविशेषनिवर्त्तकत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्धाऽपि एकादशी नवधोक्ता । तस्या विद्धाऽनधिकाऽनधिकद्वादशिका १, विद्धाऽनधिकाऽधिकद्वादशिका २, विद्धाधिकाधिकद्वादशिका ३, विद्धाधिकाऽनधिकद्वादशिका चेति चत्वारो भेदाः । तत्र विद्धन्यूना विद्धसमा वाऽधिकद्वादशिका चेत्सर्वेषां परा ।

एकादशी यदा लुप्ता परतो द्वादशी भवेत् ।
उपोष्या द्वादशी शुद्धा यदीच्छेत्परमां गतिम् ॥

इत्युक्तेः । लुप्ता दिनद्वये सूर्योदयास्पर्शेन क्षयं गता । न चेदं मुमुक्षुपरं परमां गतिं=मुक्तिमित्यर्थात्, अन्येषां तु पूर्वा "अविद्धानिषिद्धैश्च"इत्युक्तेरिति वाच्यम् ।

एकादशी यदा विद्धा द्वादश्यां न प्रतीयते ।
द्वादशी च त्रयोदश्यामस्ति तत्र कथं भवेत् ॥
उपोष्या द्वादशी शुद्धा सर्वैरेव न संशयः ।

इति नारदीये सर्वैरेवेत्युक्तेः । "न चेदेकादशी विष्णौ"इति तु शुद्धापरम् । 'अविद्धानि'इत्यादीनि विद्धाग्रहवाक्यानि परत एकादश्यभावे द्वादश्यवृद्धावेव प्रवर्तन्ते ।

एकादशी दिशा युक्ता परतोऽपि न वर्तते ।
गृहिभिर्यतिभिश्चैव सैवोपोष्या क्षये तिथिः ॥

इति वाक्यवत् "त्रयोदश्यां न लभ्येत"इत्यादिवाक्यादिति । उक्तं-'विद्धन्यूना विद्धसमाऽधिकद्वादशिका सर्वेषां परा'इति । अयं विद्धानधिकाधिकद्वादशिकारूपो द्वितीयो भेदः । पारणपर्याप्तद्वादश्यलाभे तामुल्लङ्घ्य पारणं भवतीत्युक्तम् । यश्च विद्धानधिकानधिकद्वादशिकारूपः प्रथमभेदः, स चतुर्द्धा । एकादशीन्यूनत्वे-द्वादशीसाम्ये १, तन्न्यूनत्वे वा २ । एकादशीसाम्ये—द्वादशीसाम्ये ३, तन्न्यूनत्वेन वा ४ । तत्राद्ये आह—*विद्धेति । *मुमुक्षूणामिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*विद्धन्यूना समद्वादशिका तु *मुमुक्षूणां *पुत्रवतां परा। *अन्येषां *पूर्वा। पुत्रवतोऽपि पूर्वेति मदनरत्ने विद्धन्यूना न्यूनद्वादशिका च सैव *सर्वैः कार्येति माद्रिः। मुमुक्षूणां पराऽन्येषां पूर्वेति मदनरत्ने।

दिनक्षये तु शुद्धैव द्वादशी मोक्षकाङ्क्षिभिः।
उपोष्या, दशमी विद्धा नोपोष्यैकादशी सदा॥

इति सौमन्तभात्। अत्र दिनक्षयो न तिथित्रयस्पृक्त्वं, विद्धत्वादेकादश्याः सूर्योदयास्पर्शमात्रम्। *पुत्रवतामिति

एकादश्यां यदा वत्स दिनक्षयातिथिर्भवेत्।
अत्रोपोष्या द्वादशी स्यात्त्रयोदश्यां तु पारणम्॥

इति पितामहोक्तेः।

दिनक्षये तु संप्राप्ते उपोष्या द्वादशी भवेत्।
दशमीशेषसंयुक्ता न कुर्वीत कदाचन॥

इति कौर्मनिषेधाच्च। यद्यप्यत्रोभयत्र पुत्रवत्पदं न तथापि-

एकादशीषु नष्टासु रविसंक्रमणे तथा।
पारणं चोपवासं च न कुर्यात्पुत्रवान् गृही॥

इति वाक्येन

एकादशीदिनक्षये उपवासं करोति यः।
तस्य पुत्रा विनश्यन्ति मघायां पिण्डदो यथा॥

इत्यर्थवादेन च पूर्वोपवासनिषेधेऽपेक्षितपुत्रवदधिकारिणि तु। पिण्डद इति आदन्तात् षष्ठ्येकवचने "आतो धातोः" (पा० ४-१४०) इत्यालोपः। *अन्येषां=पुत्रवद्भिन्नगृहिणाम्। *पूर्वेति। पुत्रवतः पूर्वोपवासनिषेधवशेनापुत्रस्य तदुपवाससिद्धेः। पुत्रवतोऽपीत्यत्रारुचिः उक्तरीत्या स्पष्टा। द्वितीये विद्धन्यूनेति तृतीयार्थयोर्विद्धसमेत्यादि। *सर्वैरिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समा समद्वादशिकोनद्वादशिका च मुमुक्षुभिः परा-
र्थः पूर्वा कार्या।
दशमीमिश्रिता पूर्वा द्वादशी यदि *लुप्यते।
शुद्धैव द्वादशी राजन्नुपोष्या मोक्षकाङ्क्षिभिः॥
इति व्यासोक्तेः। मोक्षकाङ्क्षिग्रहणादन्येषां पूर्वैव।
सर्वत्रैकादशी कार्या द्वादशीमिश्रिता नरैः।
प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम्॥
इति पाद्मोक्तेः। विद्धाधिका समद्वादशिका सर्वै-
पूर्वैव।

एकादशी दशाविद्धा परतोऽपि न वर्द्धते।
पतिभिर्गृहिभिश्चैव सैवोपोष्या क्षये तिथिः॥
इति पाद्मात्। 'अत्र परतोऽपि न वर्द्धते' इत्यनेनैकादश्याः
म्यमपि गृह्यते। क्षयोऽपि तस्याः साम्येऽपि यद्यपि सम्भवति एका-
श्याः सूर्योदयास्पर्शात् तथापि पृथक् क्षयशब्दानर्थक्यापत्तेः क्षयः
न्यूनत्वरूपो ग्राह्यः। स च यत्यर्थम्। साम्ये मुमुक्षूणामुत्तरत्रोपवा-
विधानात्। तथा च क्षये यतिभिर्गृहिभिश्च सैवोपोष्या, साम्ये तु
हिभिः सैवोपोष्येत्यन्वयः।

लुप्यते=वृद्धिं न प्राप्नोति। "पूर्णा च द्वादशी परा"-
ति पाठान्तरात्। परा=परदिनगतैव न तु पूर्वाहोरात्रप्रविष्टे-
त्या एकादश्याः सूर्योदयपर्यन्तत्वलाभः। अन्यथा परशब्दवैय-
त्यात्। एतत्पाठे यद्यपि द्वादश्या अनाधिक्यं न लभ्यते तथापि
दिनत्रयमृते देवि नोपोष्या दशमीयुता।
सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी॥
इति स्कान्दे,
यदि दैवात्तु संसिध्येदेकादश्यां तिथित्रयम्।
तत्र क्रतुशतं पुण्यं द्वादशी पारणे भवेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*पारणाहे न लभ्येत द्वादशी कलयाऽपि चेत्।
तदानीं दशमीविद्धाऽप्युपोष्यैकादशी तिथिः॥
इति ऋष्यशृङ्गोक्तेश्च। *माधवमते तु अत्र गृहि
पूर्वा, यतेरुत्तरा। *विद्धाधिका न्यूनद्वादशिका मोक्ष

इति नारदीये च तथैवाभिधानात्। विद्धायां तु
अविद्धानामलाभे तु पयोदधिफलानि तु।
सकृदेवान्नमश्नीयादुपवासस्त्वसौ भवेत्॥
इति भक्ष्यनियमो बोध्यः।

अत्र विवेचनकाराः। "दिनक्षये तु सम्प्राप्ते" कौर्मे दिनक्षयो दिनत्रयस्पृक्त्वं तेन तत्रैव पुत्रवद्गृहिणामुपव निषेधः परत्रोपवासश्च; साम्ये तु तेषामपि पूर्वत्रैवोपवासः निषेधाप्रवृत्तेः। "दिनक्षये तु शुद्धैव" इति सुमन्तुवाक्ये च दि क्षयो न प्रोक्तः किं तु विद्धत्वात्सूर्योदयास्पर्शित्वम्। तथा च ए द्वितीयसूर्योदयपर्यन्तत्वरूपसाम्यपरमेव। "न्यूनत्वविषये या ति हिभिश्चैव" इति वचनविरोधात् गृहिभिन्नपरम्। तेषामेकादशीदि उपवासनिषेधोऽग्रे। तेन विद्धन्यूनानधिकद्वादशिकायां पुत्रवद्गृ भिन्नानां सर्वेषां पूर्वत्रैवोपवासः, पुत्रवतामेव परेद्युः। विद्धसमाऽन कद्वादशिकायां सर्वेषां गृहिणां पूर्वेद्युः, यतीनां तूत्तरेद्युरिति प्राहु

विद्धाधिका—समद्वादशिका ऽधिकद्वादशिका च सर्वेषां वेति पाठः। पूर्वैवेत्यपपाठः। अधिकत्वात्। अधिकद्वादशिकाम त्याह—*पारणाहे इति। पारणाहे द्वादशीलाभे तु विद्धा नोप ष्येत्यत्र तात्पर्यम्। *माधवमते त्विति। तुनाऽरुचिः। स

दशम्यनुगता यत्र तिथिरेकादशी भवेत्।
तत्रापत्यविनाशः स्यात्परेत्य नरकं व्रजेत्॥
इत्यादिना पुत्रवतः परत्वसूचनात्। अयं च विद्धाधिका कद्वादशिकारूपस्तृतीयो भेदः। *विद्धेति। विद्धाधिकानधिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोक्षपविष्णुप्रीतिकामैः परा कार्या । गृहस्थेन तु *नक्तं कार्यम् ।

एकादशी द्वादशी च रात्रिशेषे त्रयोदशी ।
उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः ॥

इति कौर्मे दिनक्षये उपवासनिषेधात् ।

दशम्यैकादशी विद्धा द्वादशी च क्षयं गता ।
क्षीणा सा द्वादशी ज्ञेया नक्त तु गृहिणः स्मृतम् ॥

इति वृद्धशातातपोक्तेश्च *गृहिणः पूर्वत्रोपवासः । *एकादश्याः शुद्धन्यूनत्वे शुद्धसमत्वे वा द्वादश्या न्यूनसमत्वयोरेकादश्यामुपवासः । यानि तु-

दशम्यनुगता हन्ति द्वादशं द्वादशीफलम् ।
धर्मापत्यधनायूंषि त्रयोदश्यां तु पारणम् ॥

इति कौर्मादीनि दशमीवेधत्रयोदशीपारणयोर्निषेधकानि तानि विहितभिन्नपराणि । अत्र मूलवचनानि व्यवस्था चाऽऽकरे ज्ञेया ।

पत्तु कालहेमाद्रौ—

बहुवाक्यविरोधेन सन्देहो जायते यदा ।
द्वादशी तु तदा ग्राह्या त्रयोदश्यां तु पारणम् ॥

इति मार्कण्डेयोक्तेः,

सन्दिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत् ।

तथा—

विवादेषु च सर्वेषु द्वादश्यां समुपोषणम् ।
पारणं च त्रयोदश्यामाज्ञेयं मामकी मुने ॥

विकल्पश्चतुर्थभेदोऽयम् । *नक्तं=नक्तभोजनम् । *गृहिणः पूर्वत्रोपवास इति । नक्तकाले किञ्चिद्भक्षणेनेति शेषः, "उपवासनिषेधे तु" इति वचनात् । *एकादश्या इति । शुद्धत्वेनासंदेहात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति पाद्मोक्तेश्च वेधसन्देहे ज्योतिर्विदां विप्रतिप
या परा कार्येत्युक्तम्, तद् *वैष्णवविषयमित्यलं बहु

अथात्रोपयुक्तं किञ्चिदुच्यते । तत्र दशम्यामेका
शीयोगे *दशमीमध्य एव भोजनं कार्यम् । 'एका
दश्यां न भुञ्जीत' इति तस्या एव निमित्तत्वात् ।

निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते ॥

इति देवलोक्तेश्च । केचित्तु एकादशीव्रताङ्गत्वेन पु
*रेकभक्तविधानाद्विधिस्पृष्टे च निषेधानवकाशा
काम्यव्रताङ्गे भोजननिषेधः प्रवर्तते । तेनैकादशीमध्ये
पूर्वदिने भोजनमित्याहुः* ।

अत्राधिकारी माधवीये कात्यायनेनोक्तः—

---

*वैष्णवेति । संदेहे स्मार्त्तोपलक्षणम् ।

*दशमीमध्य एवेति । एकभक्तविधौ चानृतवदनादि
वृत्तिवद्व्रताङ्गतया द्वितीयभोजननिवृत्तिरेव विधीयते लाघवात्, न
तद्विशेष्यं भोजनमपि गौरवात् । तेन शुद्धाधिकद्वादश्यामुपवासः
भवति । *एकभक्तेति ।

दशम्यामेकभक्तस्तु मांसमैथुनवर्जितः ।
एकादशीमुपवसेत्पक्षयोरुभयोरपि ॥
देवतास्तस्य तुष्यन्ति कामितं चास्य सिध्यति ।

इत्युक्तेः । कामितं चेत्यतः काम्य इव नित्येऽप्येकभक्तं कार्यम्
"शक्तिमांस्तु पुनः कुर्याद्" इत्युक्तेः । *आहुरित्यरुचिः । तद्
तु एकभक्ते विशेष्यं भोजनं नार्थः ।

सायमाद्यन्तयोरह्नोः सायंप्रातश्च मध्यमे ।
उपवासफलं प्रेप्सुर्जह्याद्भक्तचतुष्टयम् ॥

इति जह्यादित्येवाभिधानात् । निषेधस्य सर्वैः पाल्यत्वाभि
विज्ञसऽधिकायां निषेधपालकस्य प्रातर्माध्याह्निकापकर्षविध्यभाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः ।
एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥ इति ।

भविष्ये—
ब्रह्मचारी च *नारी च शुक्लामेव सदा गृही । इति ।

यत्तु विष्णुः—
पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।
आयुष्यं हरते भर्तुर्नरकं चैव गच्छति ॥
इति, तद्भर्त्रननुज्ञाविषयमिति प्रागुक्तम् ।
उपवासासामर्थ्ये तु मार्कण्डेयकौर्मयोः—

दुपर्याप्तदशमीस्थले कथं भोजनमिति विभावनीयम् । *अष्टवर्षेति । उपनयनोपलक्षणम् । "अपि वा वेदतुल्यत्वादुपायेन प्रवर्तेरन्" इति न्यायात् । न चैवमष्टवर्षग्रहणं व्यर्थं, किं च तदंशे न्यायप्राप्तानुवादित्वम्, अन्यांशे चाप्राप्तविधायकत्वमिति वैरूप्यमिति वाच्यम् । "जातपुत्रः कृष्णकेश" इतिवदिहापि पदद्वयेनोपवासयोग्यावस्थाविशेषलक्षणयाऽशीतेरूर्ध्वमपि अष्टवर्षात्प्रागपि समर्थस्योपवासं वदतस्तवाप्युक्तवैरूप्यस्य दुर्वारत्वात् । तेनैव रूपेणाष्टानष्टसाधारणस्योपवासस्य विधानान्न वैरूप्यमिति चेत् तर्हि उपनीतत्वमात्रेणैव तद्विधाने वैरूप्यासम्भवात्, लाघवाच्च, तवापि च तादृशस्य समर्थस्याकृतोपनयनस्याप्यधिकारप्रसङ्गेन तद्रूपस्योपनयघटितत्वावश्यकत्वाच्च । मम त्वनष्टवर्षीयादेरुपनीतस्याशक्तस्यानुकल्पेनापि संख्याऽधिकारनिर्वाहात् । यद्वक्ष्यति शक्तिमांस्त्विति । *नारी चेति । नारी सधवा । तस्याः शुक्लायामेवोपवासः ।

एकादश्या विना रण्डा पतिश्च सुमहामते ।
पच्यते अन्धतामिस्रे यावदाभूतसंप्लवम् ॥

इति नारदीये रण्डापदात् । नित्योपवासासामर्थ्येऽनुकल्पः । तत्र प्रथमं क्रियाऽनुकल्पः, पश्चात्कर्त्रनुकल्प इति क्रियानुकल्प-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन *दानेन न निर्द्वादशिको भवेत् ॥

अत्र—

एकभक्तेन यो मर्त्य उपवासव्रतं चरेत् ।

इत्येकभक्तादिषूपवासशब्दस्तद्धर्मातिदेशार्थः । तेन तत्प्रयुक्ताः सर्वे धर्माः तत्स्थानापन्नेऽपि भवन्ति । तेन कल्पमन्त्रे चैकभक्तादिपदेनोहः कार्य इति मदनरत्ने

माह—*एकभक्तेनेति । "नक्तं हविष्यान्नम्" इति नक्तमुक्तं तदसंभवे अयाचितमेकभक्तं वा कार्यमित्यत्र तात्पर्यम् । अत्र

एकभक्तेन नक्तेन बालवृद्धातुरः क्षिपेत् ।
पयोमूलफलैर्वाऽपि न निर्द्वादशिको भवेत् ॥

इत्यादौ च खलेकपोतन्यायेनैव एकभक्तादेरुक्तिः, न तु क्रमः। "प्रशस्तमत्रोत्तरमुत्तरं च" इत्येव तदुक्तेः । क्रमवाक्ये च फलमूलादेः, क्षीरग्रहणं च दध्यादेरुपलक्षणम् । उपवासेनेति च तत्तुल्यत्वार्थम् । *दानेनेति । "तावद्धनादि वा दद्यात्" इत्याद्युक्तम् । *तद्धर्मेति । एषां चैकभक्तनक्तायाचितदानानामुपवासप्रतिनिधितया तत्तिथावनुष्ठानं निर्णीतम् । यानि त्विमानि स्वतन्त्राणि तानि दशमीविद्धा त्याज्या । दशमीवेधश्च पञ्चदशनाडीरूपः "दिनं पञ्चदशभिस्तथा" इति वचनात् ।

पूर्णाविद्धां दिनार्द्धेन नन्दां पूर्णामपि त्यजेत् ।
एकभक्तं च नक्तं च दानं चायाचितं च न ॥
नन्दायां पूर्णविद्धायां कुर्याद्वैश्वर्यमीहितः ।

इत्यभियुक्तोक्तेश्च । तद्धर्मो मुख्योपवासधर्मः । एवम् 'उपवासे समर्थश्च' इत्यादावुपवासशब्दः एकभक्तादेर्ग्रहणार्थः । तेन यथा 'स्वर्यातस्य मपुत्रस्य' इत्यादेर्गौणपुत्रस्य दत्तकादेरभावे पुत्रानुकल्पविधिवद् गौणस्याप्युपवासस्य स्वयं कर्तुमसामर्थ्ये कर्त्रनुकल्प

Nepal Sanskrit University; Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तथाऽसामर्थ्ये प्रतिनिधिना कारयेदिति प्रागुक्तम् ।
व्रताकरणे प्रायश्चित्तमाह माधवीये कात्यायनः—
अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा ।
एकादश्यामहोरात्रं भुक्त्वा *चान्द्रायणं चरेत्॥ इति।
अथ काम्यव्रतविधिः लघुनारदीये—
*दशम्यादि महीपाल त्रिदिनं परिवर्जयेत् ।
गन्धताम्बूलपुष्पादि स्त्रीसंभोगं महायशाः ॥
तत्र दशम्यां विधिः कौर्मे—
*कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान् ।
शाकं मधु परान्नं च त्यजेदुपवसन् स्त्रियम् ॥

त्याह—*तथेति । *चान्द्रायणमिति । एतच्च तत्स्थानिकस्य
वक्ष्यमाणद्वादश्युपवासस्याकरणे बोध्यम् । तत्र प्रमादादिनाऽकरणे
पवमध्यं, नास्तिक्यादिना तु पिपीलिकामध्यं, प्रतिनिमित्तं नैमि-
त्तिकाद्यत्तिश्च । अशक्तस्याकामतश्चार्द्धं कल्प्यम् । दक्षिणा तु शक्तस्य
कामतो वा त्यागेऽष्टगावः, अशक्तादेश्चतस्रः । न च रविवारादिसा-
दृश्यान्निषेधातिक्रम एवेदम् । व्रतातिक्रमस्यापि 'भुक्त्वा'इत्यनेन
वाच्यत्वात् । व्रतनिषेधयोर्द्वयोरपि पुरुषार्थतया नैमित्तिकस्यापि
नियात्वात् । *दशम्यादीति । सामान्यतः । *कांस्यमिति ।
मधु=क्षौद्रम् । येषां क्षौद्रादीनां पुरुषार्थो निषेधोऽस्ति तेषां
क्रत्वर्थोऽयं बोध्यः ।

कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणम् ।
व्यायामं च प्रवासं च दिवास्वापं च मैथुनम् ॥

अथाञ्जनमिति वा पाठः ।

तिलपिष्टं मसूरं च दशम्यादि विवर्जयेत् ॥

इति मात्स्यं च द्रष्टव्यम् । उपवसन्निति वर्त्तमानसामीप्ये । ते-
नानन्तरदिने उपोष्यन्नित्यर्थः । *अत्यम्बुपानमिति । अशनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा—

शाकं मांसं मसूरांश्च पुनर्भोजनमैथुने ।
द्यूत*मत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत् ॥

मदनरत्ने नारदीये—

अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः ।
अधनीतल्पशयनाः प्रियासंगमवर्जिताः ॥

व्रतघ्नान्याह हेमाद्रौ देवलः—

असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात् ।
उपवासः प्रणश्येत दिवास्वापाच्च *मैथुनात् ॥

च बोध्यम् । कैमुतिकन्यायात् ।

पुनर्भोजनमत्याशं दशम्यां परिवर्जयेत् ।

इत्युक्तेश्च । अक्षाराळवणा इति पाठेऽक्षाराश्चालवणाश्चेति द्वि ग्रहः । अक्षारलवणा इति पाठेऽपि क्षाराश्च लवणानि चेति सम सानन्तरं नञ्समासः । समान एवार्थः । क्षारलवणं खारीति प्र सिद्धम् । तन्निषेधोऽयमिति केचित् । तन्न, क्षारलवणपदयोः एक वैयर्थ्यात् । सकृत्पानं=पात्रं शुद्धावनाधाय पानम् ।

पानीयादि पिबेद्येन तत्पात्रं द्विजसत्तम ।
अनुच्छिष्टं भवेत्तावद्यावद् भूमौ न निक्षिपेत् ।

इति शातातपवचनात् । यत्तु शातातपेन—

पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित् ।
त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः ।

इत्युक्तं, तत्प्रात्याहिकजलपानपरम् । तथा च तादृशं जलपानमे वासदिने सकृत् अन्यदा त्वसकृदित्यर्थः । *मैथुनादिति

अयं पुंश्चलीषु

स्मरणं कीर्त्तनं केलिः प्रेक्षणं गुह्यभाषणम् ।
संकल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अशक्तौ तु मदनरत्ने देवलः—

अत्यये चाम्बुपानेन नोपवासः प्रणश्यति।

अत्यये=कष्टे।

विष्णुरहस्ये—

गात्राभ्यङ्गं शिरोभ्यङ्गं ताम्बूलं चानुलेपनम्।

व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतम्॥

एषु प्रायश्चित्तमुक्तं निर्णयामृते संग्रहे—

स्तेनाहिंस्रकयोः सख्यं कृत्वा स्तैन्यं च हिंसनम्।

प्रायश्चित्तं व्रती कुर्याज्जपेन्नामशतत्रयम्॥

एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः।

इत्यष्टाङ्गस्यापि निषेधः, न तु सतीषु। "प्रेक्षणालम्भने मैथुनशङ्कायाम्" इति गौतमेन शङ्कोक्त्या तासु तदभावात्। स्वदारेषु तु क्रियानिवृत्तिमात्रस्य।

स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः संकथनादपि।

विपद्यते ब्रह्मचर्यं स्वदारेषु तु संगमात्॥

इति देवलोक्तेः। न दारेष्वृतुसंगमादिति वा पाठः। *अन्यत्रेति। पुरुषार्थनिषिद्धस्य सर्वस्याप्ययं क्रत्वर्थो निषेधः। यच्चान्यत्रेति रागकृदिति वा पाठः। स्तैन्यं तुषादेरपि। हिंसनं कीटादेरपि। नाम्नां=विष्णुनाम्नां शतत्रयं न त्वेकमेव नाम शतत्रयवारम्। संख्यायाः पृथक्त्वनिवेशात्।

व्रतलोपो न चेत्कुर्यात्कृष्णावद् भुजिवर्जनम्।

इति। व्रतलोप इति पूर्वान्वयः। तत्र भुजिवर्जनम्=उपवासं न कुर्यात्, किं तु कृष्णावत्=किंचिद्भक्षणमित्यर्थः। अत्र प्रायश्चित्तं—

व्रतलोपो भवेत्कुर्यादष्टाक्षरमनोर्जपम्।

इति पाठे बोध्यम्। संभोगः स्वदारेषु, परदारेषु तु स्मार्तप्रायश्चित्तेन समुच्चयः। एतत्प्रायश्चित्तं भक्ष्यमांसे। अभक्ष्यमांसभक्षणे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिथ्यावादे दिवास्वापे बहुशोऽम्बुनिषेवणे।
अष्टाक्षरं व्रती जप्त्वा शतमष्टोत्तरं शुचिः॥
प्रणवं पूर्वमुच्चार्य नमो नारायणः पदम्।
चतुर्थ्यन्तं वदेत्पश्चान्मनुरष्टाक्षरो मतः॥

तत्रैव पैठीनसिः--

ताम्बूलचर्वणे स्त्रीसंभोगे मांसनिषेवणे।
व्रतलोपो न चेत्कुर्यात्कृष्णावद्भुजिवर्जनम्॥ इति

कृष्णैकादशीवद्भोजननिषेधमात्रपरिपालने तु ताम्बूलचर्वणादावपि न दोष इत्यर्थः। संभोगे ऋतुकालादन्यत्र

*रेतःसेकात्मसंभोगमृतेऽन्यत्र क्षयः स्मृतः।

इति कात्यायनोक्तेः।

हेमाद्रौ वसिष्ठः—

*उपवासे तथा श्राद्धे न कुर्याद्दन्तधावनम्।

ऽहिंस्याहिंसने च स्मार्तप्रायश्चित्तेन समुच्चयः। *रेत इति। रेतःसेकात्मसंभोग ऋतुकालः। क्षयो=व्रतभ्रंशः। 'रेतःसंक्रमणाद्भोगाद्' इति पाठे रेतसः संक्रमणं=गर्भकोशे तद्योग्यं गमनं ऋतुकालगमनमेव तदात्मकात् स्त्रीसम्भोगादन्यत्र स्त्रीसम्भोगे इति स एवार्थः। ऋतुगमनाभ्यनुज्ञाऽपि प्रागसन्निहितस्य षोडश्यामेव रात्रौ सन्निहितस्यानन्यगतिकत्वात् श्राद्धे तदनुज्ञावत्। अत्रानुक्तप्रायश्चित्तकायिकेषु ऋतुसंभोगस्य न प्रवेशः। तेन—

जपोऽष्टाक्षरमन्त्रस्य नामशतत्रयस्य वा।

इति उत्तरार्द्धोक्तं विकल्पितप्रायश्चित्तं कायिकसामान्ये सिध्यति। जपे संख्या त्वष्टशत्येव पूर्वोक्ता। *उपवासे इति। अत्र

दशम्यामेकभक्तं तु कुर्वीत नियतेन्द्रियः।
आचम्य दन्तकाष्ठं तु खादेत तदनन्तरम्॥
ततश्चानन्तरं विप्रो ब्रह्मचारी जितेन्द्रियः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥
*काष्ठग्रहणान्मृ*ल्लोष्टाद्यानषेध इति हेमाद्रिः ।
विष्णुरहस्ये—
श्राद्धोपवासदिवसे खादित्वा दन्तधावनम् ।
गायत्र्या शतसंपूतमम्बु प्राश्य विशुध्यति ॥
निर्णयामृते व्यासः—
*वर्जयेत्पारणे मांसं व्रताहेऽप्यौषधं सदा । इति ॥

रात्रिं नयेत्ततः पश्चात् प्रातः स्नात्वा समाहितः ।
उपवासं तु सङ्कल्प्य मन्त्रपूतं जलं पिबेत् ॥
इति वाक्येन पूर्वेद्युरेकभक्तानन्तरं काष्ठेन दन्तधावनमुक्तं स्मर्त्तव्यम् । *काष्ठेति । "अक्ताः शर्करा उपदधाति, तेजो वै घृतम्" इत्यादौ विधेरिव निषेधस्यापि विशेषपरत्वे वाक्यशेष एव बीजम् । तथा च न कुर्यात्काष्ठेन दन्तधावनमित्यर्थ इति विशेषनिषेधः शेषाभ्यनुज्ञाफलक इति भावः । *लोष्टादीति । आदिना
अलाभे वा निषेधे वा काष्ठानां दन्तधावने ।
पर्णादिना विशुध्येत जिह्वोल्लेखः सदैव हि ॥
इति पैठीनस्युक्तम् । दन्तपदोपादानात्काष्ठेन जिह्वोल्लेखो दर्शितः ।
अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ॥
इति व्यासेन यदुक्तं, तत् मृदादिसहितमसहितं वा द्रष्टव्यम् । "तृणपर्णोदकेनाङ्गुल्या वा दन्तान् धावेत् प्रदेशिनीवर्जम्" इति पैठीनस्युक्तेः,
पश्चाद् द्वादशगण्डूषैर्विदध्याद्दन्तधावनम् ।
स्मृत्वोङ्कारं च गायत्रीं निबध्नीयाच्छिखां ततः ॥
इति शौनकोक्तेश्च । मांसनिषेधणे इति यदुक्तं, तदुपवासदिने तद्भक्षणमसत्यभावात्कथमित्यत्राह—*वर्जयेदिति । पारणदिनमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*एकादश्यां श्राद्धप्राप्तौ माधवीये कात्यायन आह-
उपवासो यदा *नित्यः श्राद्धं नैमित्तिकं भवेत्।
उपवासं तदा कुर्यादाघ्राय पितृसेवितम् ॥

व्रताहः। "पारणान्तं व्रतं ज्ञेयम्"इत्युक्तेः। तथा च तत्र मांसभक्ष
व्रतलोप इति तदर्थः। औषधरूपं च "अष्टौ तान्यव्रतघ्नानि
इत्यभ्यनुज्ञातमपि मांसं मुख्यव्रताहेऽपि वर्जयेदित्यर्थः। मांस
ल्यानां वसारुधिरादीनां तद्वदेव वर्जनं "बहूनामेकधर्माणाम्"
न्यायात्। *एकादश्यामिति।

श्राद्धं कृत्वा तु यो मर्त्यो न भुङ्क्ते पितृसेवितम्।
हविर्देवा न गृह्णन्ति कव्यानि पितरस्तथा ॥

इति वाक्येन सामान्यतः

व्यतीपाते कृते श्राद्धे पुत्री नोपवसेद् गृही ॥

इत्यादिना विशेषतश्च श्राद्धशेषभोजनं विहितम्। तत्र पुरुषार्थ
पवासस्य क्रत्वर्थेन श्राद्धशेषभोजनेन बाधः स्यादित्यर्थः। *नि
इति नैमित्तिकोपलक्षणम्। काम्योपवासे तु शेषभोजनं, तत्स
नापन्नं तदाघ्राणं वा न कार्यम्। काम्यस्य नित्यबाधकत्वात्
तद्विधिः स्कान्दे—

यस्मिन् दिने पितुः श्राद्धं मातुर्वाऽथ भवेद् गुह।
तस्मिन्नेव दिने तात भवेदेकादशीव्रतम् ॥
अन्यद्वाऽपि व्रतं स्कन्द तदा कार्यं तु तच्छृणु।
तदा कृत्वा तु वै श्राद्धं भुक्तशेषं तु यद्भवेत् ॥
तत्सर्वं दक्षिणे पाणौ गृहीत्वाऽन्नं शिखिध्वज।
अवजिघ्रेदनेनाथ तेन श्राद्धं शिखिध्वज ॥
पितॄणां तृप्तिदं जातं व्रतभङ्गो न विद्यते। इति।

एतच्च मुख्योपवासपरम्। कन्दमूलाद्यनुकल्पे तु देवपित
तत्परिवेषणेन शेषभक्षणं कार्यम्। सर्वजातीयशेषभोजनं विना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*मातापित्रोः क्षये प्राप्ते भवेदेकादशी यदि।
अभ्यर्च्य पितृदेवांश्च आजिघ्रेत्पितृसेवितम्॥ इति।
हेमाद्र्यादिसर्वनिबन्धेष्वप्येवम्। एतेनैकादशीनिमित्तकं श्राद्धं द्वादश्यां कार्यमिति वदन्तः परास्ताः।
किंच महालये—
स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति।
इति श्रुतं(१) षोडशत्वं, पौषैकादश्यां च मन्वादिश्राद्धं, क्षयाहापरिज्ञाने च तत्पक्षैकादश्यां विहितं श्राद्धं बाधितमेव स्यात्। यदपि स्मृतिचन्द्रिकास्थं पठन्ति—
अन्नाश्रितानि पापानि तद्भोक्तुर्दातुरेव वा।
मज्जन्ति पितरस्तस्य नरके शाश्वतीः समाः॥ इति।
तस्यापि(२) रागप्राप्तभुजिगोचरस्य वैधं श्राद्धं गोचरयतां महत्साहसमित्यलम्*। योऽपि—
अकृतश्राद्धनिचया जलपिण्डं विना कृताः।
इति लघुनारदीये एकादश्यां श्राद्धादिनिषेधः स मातापितृभिन्नविषयः। पूर्ववाक्ये तद्ग्रहणात्। यद्वा-

---

श्राद्धवैगुण्यस्याग्रे स्पष्टत्वात्। *मातापित्रोरिति भ्रात्राद्युपलक्षणम्। मातापितृभिन्नेत्यस्य मातापितृभ्रात्रादिभिन्नेत्यर्थः। श्राद्धं नैमित्तिकमित्यस्याऽऽवश्यकमित्यर्थात्।

सूतके मृतके श्राद्धं सूतकान्ते विधीयते।
तथैवैकादशीश्राद्धं द्वादश्यामेव कारयेत्॥

इति तु प्रलाप एवेत्याह—*अलमिति।

---

(१) तस्मिन् पक्षे प्रतिपदारभ्य नवरात्रप्रतिपदन्तं प्रतितिथि श्राद्धस्य विधानादिति भावः।

(२) निषेधस्येत्यर्थः। रात्रिसत्रन्यायेन निन्दाऽर्थवादान्निषेधकल्पनमिति तात्पर्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धनिचयः=श्राद्धे प्रतिग्रहः(१) ॥

अव्रतघ्नान्याह मदनरत्ने देवलः—

*सर्वभूतभयं व्याधिः प्रमादो गुरुशासनम् ।
अव्रतघ्नानि पठ्यन्ते *सकृदेतानि शास्त्रतः ॥

स्कान्देऽपि—

अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

*इदं चातिसङ्कटविषयम् । नारदीये-

अनुकल्पो नृणां प्रोक्तः क्षीणानां वरवर्णिनि ।
मूलं फलं पयस्तोयमुपभोग्यं भवेच्छुभे ॥
नत्वेव भोजनं कैश्चिदेकादश्यां बुधैः स्मृतम् ॥ इति

अस्यापवादः—

शयने च मदुत्थाने मत्पार्श्वपरिवर्तने ।

---

*सर्वेति । सर्वेभ्यो भूतेभ्यः सकाशाद् व्रतकर्तुर्भयम् । मदनरत्ने तु भूतमयेभ्यः सर्पादिभ्यो भयम् । तेन सर्पादिभयाद् व्रतार्थं कल्येऽपि न व्रतहानिरित्युक्तम् । *सकृदिति । असकृत्तु "कामाद् क्रोधात्" इत्यादिनोक्तं प्रायश्चित्तम् । *इदं चेति । यथा हेमाद्रौ-

व्रतस्थं व्याधितं दृष्ट्वा मुमूर्षुं च तपोधनम् ।
दृष्ट्वा तु ब्राह्मणस्तस्य कुर्यात् सम्यगनुग्रहम् ॥
अमृतं पायसं क्षीरमिच्छमाने सकृन्निशि ।
यथेह न वियुज्येत प्राणैः क्षुत्पीडितो व्रती ॥
पाययित्वाऽमृतं क्षीरं रक्षेद्दत्वा फलानि च ।
एवं मासोपवासस्थमारूढप्राणसंशयम् ॥

इति मासोपवासव्रतपरं संकष्टविषयं, तद्वत् 'अष्टौ तानि'

---

(१) तेन श्राद्धप्रतिग्रहीतुरयं तद्दिने निषेधो न तु श्राद्धकर्तुरिति भावः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*नरो मूलफलाहारी हृदि शल्यं समार्पयेत् ॥

इदं चातिसंकष्टविषयम्(१) ।

एते चाविरोधिनो निर्णयाः सर्वव्रतेषु ज्ञेयाः ।

तत्रैकादश्यां *सङ्कल्पः—

गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।

उपवासं तु गृह्णीयाद्यद्वा वार्येव धारयेत् ॥

इति माधवीये वाराहोक्तेः ।

मन्त्रस्तु विष्णुः—

एकादश्यां *निराहारः स्थित्वाऽहमपरेऽहनि ।

भोक्ष्यामि पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ इति ।

शैवादीनां तु हेमाद्रौ सौरपुराणे—

सावित्र्याऽप्यथ वा नाम्ना सङ्कल्पं तु समाचरेत् ।

*शिवादिगायत्र्यो यजुर्वेदे प्रसिद्धाः । वाराहे—

सर्वव्रतपरमपि सङ्कष्टविषयमित्यर्थः । *नरो मूलेति । 'पयोमूल' इति युक्तः पाठः । पयःपदं दध्यादेरुपलक्षणम् । *सङ्कल्प इति । प्रातः सङ्कल्पश्च प्रातः सन्ध्योत्तरं कार्यः ।

प्रातःसन्ध्यां बुधः कृत्वा सङ्कल्पं तत आचरेत् ।

इति वचनात् । सायमादिसङ्कल्पा अपि सायमादिसन्ध्याऽनन्तरमेव ।

संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।

इति वचनात् । *निराहार इति । फलाहार इत्याद्यूहो बोध्यः । देशकालौ संकीर्त्य विष्ण्वनुज्ञया एकादशीव्रतमहं करिष्ये इति पठित्वेमं श्लोकं पठेत् । "भोक्ष्यामि"इत्यत्र चाहंपदमनुवर्त्तते अध्याहार्यं वा । सर्वथाऽहंपदाभावे पाणिनिस्मृत्या कथंचित् प्रयोगसम्भवेऽपि क्रतुवैगुण्यात्(२) । *शिवादीति । "तत्पुरुषाय

---

(१) इयं पङ्क्तिर्मुद्रितपुस्तके नास्ति ।

(२) वस्तुतस्तु अहंपदानुवृत्तेरध्याहारस्य वा नात्रापेक्षा । 'एका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*इत्युच्चार्य ततो विद्वान् पुष्पाञ्जलिमथार्पयेत्।
*ततस्तज्जलं पिबेत्।
अष्टाक्षरेण मन्त्रेण त्रिर्जप्तेनाभिमन्त्रितम्।
*उपवासफलं प्रेप्सुः पिबेत्पात्रगतं जलम्॥
इति कात्यायनोक्तेः। मध्यरात्रे उदये वा दशमीविद्धे रात्रौ सङ्कल्प इति माधवः।

विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्" इति शिवगायत्री। अन्या विस्तरभयान्नोच्यन्ते(१)। श्लोकमन्त्रस्तु तासां सम्भवेऽसम्भवे च। श्लोकमन्त्रासम्भवेऽपि संकल्पो भवत्येव। संकल्पानन्तरकृत्यमाह-*इत्युच्चार्येति। *तत इति। पात्रे हस्ते वा संकल्पवाक्योच्चारणसहितं वारिणो धारणं सङ्कल्पः। तत्र पात्रस्थं जलं पिबेत्, हस्तस्थं तु भूमौ त्यजेत्। *उपवासफलमिति। व्रतसामान्यं

दश्यां निराहारः स्थित्वाऽपरेऽहनि अहं भोक्ष्यामि' इत्यन्वयेन गतार्थत्वात्। निराहारस्थितिकर्तृत्वमहमर्थस्य समानकर्तृकतायां विहितेन क्त्वाप्रत्ययेनैव लब्धमिति चिन्त्यम्।

(१) ताश्च तैत्तिरीयशाखायां नारायणोपनिषद्युक्ताः-'ॐ पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि। तन्नो रुद्रः प्रचोदयात्॥१॥ ॐतत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥२॥ ॐतत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि। तन्नो दन्तिः प्रचोदयात्॥३॥ ॐतत्पुरुषाय विद्महे महासेनाय धीमहि। तन्नः षण्मुखः प्रचोदयात्॥४॥ ॐनारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्॥५॥ ॐवज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि। तन्नो नारसिंहः प्रचोदयात्॥६॥ ॐभास्कराय विद्महे महद्द्युतिकराय धीमहि। तन्नो आदित्यः प्रचोदयात्॥७॥ ॐवैश्वानराय विद्महे लालीलाय धीमहि। तन्नो अग्निः प्रचोदयात्॥८॥ ॐकात्यायनाय विद्महे कन्याकुमारि धीमहि। तन्नो दुर्गिः प्रचोदयात्॥९॥' इति क्रमेण परमपुरुष-शिव-गणपति-षडानन-विष्णु-नृसिंह-भास्कर-अग्नि-दुर्गाणां ज्ञेयाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*दशम्याः सङ्गदोषेण अर्धरात्रात्परेण तु।
वर्जयेच्चतुरो यामान्सङ्कल्पार्चनयोः सदा॥
*विद्धोपवासेऽनभ्रंस्तु दिनं त्यक्त्वा समाहितः।
रात्रौ संपूजयेद्विष्णुं सङ्कल्पं च तदाऽऽचरेत्॥
इति नारदीयोक्तेः। तत्रैव पूजामभिधाय—
देवस्य पुरतः कुर्याज्जागरं नियतो व्रती।

पूर्वम्। *दशम्या इति विद्धोपवासे इति च—
प्रातः सम्पूजयेद् विद्वानुपवासव्रतादिकम्।
इत्यस्यापवादः। पूजाप्रकारश्च ब्राह्मे—
एकादश्यामुभे पक्षे निराहारः समाहितः।
नानापुष्पैर्मुनिश्रेष्ठ विचित्रं मण्डपं शुभम्॥
कृत्वेति शेषः।
स्नात्वा सम्यग्विधानेन सोपवासो जितेन्द्रियः।
सम्पूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः॥
पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैः परैः।
उपचारैर्बहुविधैर्जपहोमैः प्रदक्षिणैः॥
स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः।
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः॥
एवं सम्पूज्य विधिवद्रात्रौ कृत्वा प्रजागरम्।
याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः॥ इति।
निराहार इति फलाहारादेरुपलक्षणम्।
सताम्बूलमताम्बूलं सभोजनमभोजनम्।
साहारं च निराहारं चतुर्विधमुपोषणम्॥
इत्यनेनैकधर्मिणामेव विभागात्। इयं च पूजा नित्यपूजातः पृथक्, अशक्तावपृथक्कार्या, अत्यशक्तौ नित्यपूजाङ्गानां द्रव्यमन्त्रादीनां लोपः। सोपवासः=कृतोपवाससङ्कल्पः। विशेषो नारदीये—
पञ्चामृतेन संस्नाप्य एकादश्यां जनार्दनम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादश्यां पयसा स्नाप्य हरिसारूप्यमश्नुते ॥

एतेन द्वादश्यां स्नानोपचारो नेत्यग्रिमं परास्तम् । एकादशी विशेषपूजा च भविष्ये—

पृथक् जलं पृथक् पुष्पं मासे मासे पृथक् पृथक् ।
मार्गशीर्षे सिते पक्षे हरेरेकादशी प्रिया ॥
जयन्ती नाम विख्याता सर्वपापप्रणाशिनी ।
केशवं स्थापयेद्देवं विशालाक्ष्या समन्वितम् ॥
पूजयेन्मालतीपुष्पैर्नैवेद्यं मोदका मताः ।
नारङ्गेण ददेदर्घ्यं सप्तधान्यं प्रदीयते ॥

मोक्षा एकादशी । शेषं पूर्ववदित्यन्यत्र । अर्घ्यमन्त्रः—

स्मृतो हरसि पापानि सत्यमेतज्जनार्दन ॥
दुःस्वप्नं दुर्मतं चैव मनसा दुर्विचिन्तितम् ।
नारकं च भयं देव भयं दुर्गतिसम्भवम् ॥
भयमेतत् सुरेशान ऐहिकं पारलौकिकम् ।
तेन सत्येन मे नौमि गृहाणार्घ्यं जनार्दन ॥ इति ॥ १ ॥

कृष्णपक्षे च विख्याता विमलैकादशी शुभा ।
न्यसेत् संकर्षणं देवं सहितं च सुनन्दया ॥
पूजयेद्विमलैः पुष्पैः शृणु राजन्नगस्त्यकैः ।
रम्भाफलेन चैवार्घ्यं नैवेद्यं गणकाः स्मृताः ॥
सुवर्णं दीयते दानं द्विजेभ्यो नृपसत्तम ।

अन्यत्र फला एकादशी, पक्वान्नं नैवेद्यम् ॥ २ ॥

पौषस्यैकादशी शुक्ला सा नन्दा नाम भूपते ।

पुत्रदेत्यन्यत्र ।

न्यसेन्नारायणं देवं लक्ष्म्या चैव समन्वितम् ॥
पूजयेत्पद्मपुष्पैश्च दाडिमं चार्घ्यमुत्तमम् ।
चूर्णमुक्तं तु नैवेद्यं रूप्यपात्रं प्रदीयते ॥

चूर्ण=चूर्मा इति गुर्जरभाषा । रूप्यपात्रं घृतपूर्णमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदायः ॥ ३ ॥

कल्याणी कृष्णपक्षे तु न्यसेद्देवं हरिं शुभम् ।

षट्तिलेत्यन्यत्र ।

सहितं श्रीसुप्रियया कह्लारेण प्रपूजयेत् ।

ददेदर्घ्यं शुभां द्राक्षां नैवेद्यं घृतरं वर ॥

घृतरं=घेवरमिति भाषा, घृतपूरमिति केचित् ।

दानानि दीयते दुग्धं द्विजेभ्यो नृपपुङ्गव ॥ ४ ॥

माघे कामप्रदा चैव शुक्ले माधवदेवता ।

जयाभिधेत्यन्यत्र ।

रुक्मिण्या सहितो देवः पूजयेत्कुन्दकैः शुभैः ॥

कुब्जकैरित्यन्यत्र ।

बीजपूरं ददेदर्घ्यं नैवेद्यं मण्डकास्तथा ।

द्विजाय तिलधेनोश्च कथितं दानमुत्तमम् ॥

गुडतिलपिष्टयुता धेनुः, तद्युतस्तान्निष्क्रयो वा देय इति संप्रदायः ॥ ५ ॥

एकादशी जया कृष्णे अच्युतं पूजयेत् सुरम् ।

धात्र्या च सहितं देव्या पूजयेत् तुलसीदलैः ॥

सोमालिका च नैवेद्यं जम्बीरेणार्घ्यमुत्तमम् ।

उपानद्दीयते दानं द्विजाय विष्णुवत्सलैः ॥

विजया एकादशी, खर्जूरीफलं नैवेद्यं, पक्वान्नहोम इत्यन्यत्र ॥६॥

फाल्गुनैकादशी शुक्ला सा धात्री नाम भूपते ।

गोविन्दं पूजयेद्देवं चन्द्रकान्त्या समन्वितम् ॥

पूजयेच्चम्पकैः पुष्पैरक्रोटेनार्घ्यमुत्तमम् ।

कंसारकं च नैवेद्यं तिलपात्रं प्रदीयते ॥ ७ ॥

सौम्या चैकादशी कृष्णे अनिरुद्धं प्रपूजयेत् ।

सहितं मित्रविन्दाया कुसुमैर्मुचुकुन्दकैः ॥

अर्घ्यं चैवोन्नती दद्यान्नैवेद्यं शेवकां शुभाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिलधेनुः प्रदातव्या द्विजाय कृष्णरूपिणे ॥
खर्जूरी अर्घ्यं, वटकं नैवेद्यमन्यत्र ॥ ८ ॥
चैत्रे च दमना नाम विख्यातैकादशी शुभा ।
विष्णुं संपूजयेद्देवं विशालाक्ष्या समन्वितम् ॥
पूजयेच्चूतपुष्पैश्च चिर्भिटनार्घ्यमुत्तमम् ।
नैवेद्यं सक्तुकं चैव कर्पूरागुरुचन्दनम् ॥
कामदा एकादशी एलाऽर्घ्यं ऐक्षवो रसो दण्डो वा नैवेद्यम्॥९॥
बहुला कृष्णपक्षे च वासुदेवं सुरं नृप ।
शैव्यया सहितं देव्या मरुपुष्पैश्च पूजयेत् ॥
अर्घ्यं जातीफलं चैव नैवेद्यं वटकानि च ।
दीयते वस्त्रयुग्मं च द्विजाय विष्णुरूपिणे ॥
वरूथिनी एकादशी, सक्तु नैवेद्यम् ॥ १० ॥
एकादशी नरश्रेष्ठ वैशाखे मधुसूदन ।
मधुसूदनदेवं च माधव्या च समन्वितम् ॥
पूजयेद्दमनैः पुष्पैरर्घ्यं तु पनसं स्मृतम् ।
उपानद्युगलं दानं पायसं शर्करान्वितम् ॥
मोहिनी एकादशी, राजनीकफलार्घ्यं, गुलाबशक्री नैवेद्यं दुग्ध
दानम् ॥ ११ ॥
सिद्धा चैकादशी कृष्णे प्रद्युम्नं देवमर्चयेत् ।
कालिन्द्या सहितं देव्या अर्घ्यं चूतफलं नृप ॥
नैवेद्यं कथितं दुग्धं गोदानं द्विजसूनवे ।
अपारानमनाम एकादशी,बकुलं पुष्पं,कर्कटी अर्घ्यं छत्रोपानद्दानम्॥१२॥
ज्येष्ठे त्रिविक्रमा शुक्ले देवं चैव त्रिविक्रमम् ।
पूजयेद्यूषिकापुष्पैः पद्माख्या या तयाऽन्वितम् ॥
करणेन ददेदर्घ्यं नैवेद्यं घृतशालिजम् ।
दानं च दीयते छत्रं द्विजायानन्तरूपिणे ॥
निर्जला एकादशी, दध्योदनं नैवेद्यं, जलघटदानं परमाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाद्यं च ॥ १३ ॥
एकादशी कृष्णपक्षे विख्याता पापनाशिनी ।
नृसिंहं स्थापयेद्देवं क्षेमकान्त्या समन्वितम् ॥
पूजयेद् भृङ्गराजेन अर्घ्यमात्रफलं स्मृत ।
करम्बकैश्च नैवेद्यं जलधेनुर्द्विजाय च ॥
योगिनी एकादशी, क्षेमंकरी देवी, पक्वान्नं नैवेद्यं, यष्टिकाचन्दनदानम् ॥ १४ ॥
एकादशी शुक्लपक्षे आषाढे सुगतिप्रदा ।
पूजयेद्वामनं देवं देव्या कमलयाऽन्वितम् ॥
नारिकेलं ददेदर्घ्यमपामार्गेण पूजयेत् ।
खण्डमीकां च नैवेद्यं भूमिं छत्रं च दीयते ॥
पद्मा एकादशी, मधुमती देवी, पक्वान्नं नैवेद्यम्, इक्षुदानम् ॥१५॥
एकादशी च विख्याता ह्यसिते चारिनाशिनी ।
युक्तं विजयया देव्या पूजयेत्पुरुषोत्तमम् ॥
सुगन्धैर्बहुलैः पुष्पैरर्घ्यं बिल्वफलं स्मृतम् ।
नैवेद्यं पूपकैः कार्यं नवनीतं प्रदीयते ॥
कामिका एकादशी, मल्लिका पुष्पं, मालपुवा नैवेद्यं, कांस्यपात्रदानं नवनीतदानं मिष्टान्नभोजनम् ॥ १६ ॥
श्रावणस्य सिते पक्षे ललितैकादशी नृप ।
श्रीधरं स्थापयेद्देवं कान्तिमत्या समन्वितम् ॥
पूजयेच्छतपत्रैश्च अर्घ्यं पनसकं वरम् ।
नैवेद्यं पोलिका श्रेष्ठा पुस्तकं दीयतेऽनघ ॥
पुत्रदा एकादशी, पक्वान्नं नैवेद्यं, छत्रताम्बूलदानम् ॥ १७ ॥
धर्मप्रदाभिधा कृष्णेऽधोक्षजं पूजयेत् सुरम् ।
रुक्मिण्या सहितं भूप पुष्पैः पाटलजैर्वरैः ॥
अर्घ्यं पूगीफलं चैव नैवेद्यं पूरिका मता ।
दीयते घृतपात्रं तु विप्राय विष्णुरूपिणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अजा एकादशी, शेवयाजिलबी नैवेद्यं तिलपिष्टरूप्यपात्रदानम्।

एकादशी भाद्रपदे शुक्ले च हरिवल्लभा।
स्थापयेच्च हृषीकेशमपराजितया सह॥
पूजयेत्काशपुष्पैश्च कूष्माण्डेनार्घ्यमुत्तमम्।
तिलक्षोदं च नैवेद्यं दानं ब्रह्मपुरी मता॥

कामिका एकादशी, रतिकरी देवी, कुशपुष्पं पुष्पं, खाद्य नैवेद्यं, कृतपात्रदानम्॥ १९॥

रौद्रा चैकादशी कृष्णे पूजयेच्च जनार्दनम्।
देवं सुभगया सार्धं दूर्वाङ्कुरवरैः शुभैः॥
शिवाफलं ददेदर्घ्यं नैवेद्यं खण्डमण्डकाः।
विधिवद्दीयते कन्या सजातीयवराय च॥

इन्दिरा एकादशी, सुप्रभा देवी धात्रीफलार्घ्यं, पक्वान्नं नैवेद्यं गोदानं, सक्तुदानम्॥ २०॥

एकादशी विशोका च आश्विने प्रथिता सिता।
स्थापयेत्पद्मनाभं तु पद्मावत्या समन्वितम्॥
पूजयेच्च शमीपुष्पैरर्घ्यं मदनजं फलम्।
शालिपिष्टेन नैवेद्यं शर्करासहितेन वै॥
दीयन्ते मोदका भूप गुडेन सर्पिषाऽन्विताः॥

पापाङ्कुशा एकादशी, कमलफलार्घ्यं, कदलीफलं नैवेद्यं, लड्डुकदानम्॥ २१॥

एकादशी च विख्याता असिते सुखवर्धिनी।
कृष्णं संपूजयेद्देवं सुदेव्या सत्यया सह॥
मुचुकुन्दैर्वरैः पुष्पैरर्घ्यं रम्भाफलं वरम्।
नैवेद्यं गुडसर्पिर्भ्यां सुवर्णं दीयतेऽनघम्॥

रमा एकादशी, नागकेसरमुचुकुन्दौ पुष्पम्, अशोकफलार्घ्यं मुद्गलड्डुकं नैवेद्यं, गुडधेनुदानम्॥ २२॥

एकादशी च विख्याता ज्ञानदा शुक्लकार्त्तिके।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादश्यां निवेदनमन्त्र उक्तः कात्यायनेन—
*अज्ञानतिमिरान्धस्य व्रतेनानेन केशव ।

न्यसेद्दामोदरं देवं सहितं राधया वरम् ॥
पूजयेत्कुम्भिकापुष्पैरर्घ्यं तु पद्मिनी फलम् ।
मुद्गचूर्णं तु नैवेद्यं सुखशय्या च दीयते ॥
प्रबोधिनी एकादशी, होमो दीपाश्च कार्याः, घेवरपेढा नैवेद्यं,
दाडिमीफलार्घ्यं, गुडधेनुदानम् ॥ २३ ॥
अभया चासिते पक्षे उपेन्द्रं पूजयेत्सुधीः ।
सुगन्धया च सहितं तिलपुष्पैश्च पाण्डव ॥
इक्षुदण्डं ददेदर्घ्यं नैवेद्यं गुणसर्पिषी ।
भूमिदानं च विधिवद्विधिश्च कथितो मया ॥
उत्पत्तिका एकादशी, सत्या देवी, मोदका नैवेद्यम् ॥ २४ ॥
एवं द्वादशवर्षाणि कृत्वा संवत्सरं तु वा ।
पश्चादुद्यापनं कुर्यात् सुव्रती व्रतसिद्धये ॥
कार्त्तिके मार्गशीर्षे वा माघे भीष्मतिथौ तु वा ।
फाल्गुनैकादशी चैत्रे वैशाखे मधुसूदनी ॥
कर्त्तव्यं तत्र वा राजन्नेकादश्यां विसर्जनम् ॥ इति ।
उद्यापनप्रकारोऽन्यत्र बोध्यः । एकादशीव्रतोद्यापनाकरणे दो-
षो विष्णुरहस्ये—
समादाय विधानेन द्वादशीव्रतमुत्तमम् ।
व्रतभङ्गं नरः कृत्वा रौरवं नरकं व्रजेत् ॥
परिगृह्य व्रतं सम्यगेकादश्यादिकं नरः ।
न समापयते यस्तु तस्य पापीयसी गतिः ॥
व्रतभङ्गे प्रायश्चित्ताद्यनन्तरं,तदभङ्गे च केवलमुद्यापनमित्यर्थः ।
*अज्ञानेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव ॥ इति।
नारदीये—

*ब्राह्मणान् भोजयेच्छक्त्या दद्याद्वै दक्षिणां ततः।
स्कान्दे—

कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥
द्वादश्यां च वर्ज्यान्याह बृहस्पतिः—

दिवा निद्रां परान्नं(१) च पुनर्भोजनमैथुने।

प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत्।
इति पूर्वम्। *ब्राह्मणानिति।

ततः स्वबन्धुभिः सार्द्धं नारायणपरायणः।
कृतपञ्चमहायज्ञः स्वयं भुञ्जीत वाग्यतः ॥
इत्युत्तरार्द्धोक्तं पारणं कार्यम्। तत्र वर्ज्यानि ब्रह्माण्डे—

कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम्।
व्यायामं च प्रवासं च दिवास्वापमथाञ्जनम् ॥
तिलपिष्टं मसूरं च द्वादशैतानि वैष्णवः।
द्वादश्यां वर्जयेन्नित्यं सर्वपापैः प्रमुच्यते ॥
तथा—

कांस्यं मांसं सुरां द्यूतं व्यायामं क्रोधमैथुने।
हिंसामत्यन्तलौल्यं च तैलं निर्माल्यलङ्घनम् ॥
द्वादश्यां द्वादशैतानि वैष्णवः परिवर्जयेत्।
द्वादश्यां पारणं कुर्याद्वर्जयित्वा ह्युपोदकीम् ॥
उपोदकी=पोई इति महाराष्ट्रप्रसिद्धा।

कांस्यं मांसं मसूरं च चणकं कोरदूषकाः ॥

---

(१) अत्र-'श्वशुरान्नं गुरोरन्नं मातुलान्नं तथैव च। पितृव्यपुत्राणां परान्नं नैव दोषकृत् ॥' इत्यपि नोपयुज्यते। तस्य व्रतादिदिनपरान्नग्रहणविषयत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षौद्रं कांस्यामिषं तैलं द्वादश्यामष्ट वर्जयेत् ॥
हेमाद्रौ ब्रह्माण्डपुराणे—
पुनर्भोजनमध्याह्नो भार आयासमैथुने ।
उपवासफलं हन्युर्दिवा निद्रा च पञ्चमी ॥
स्कान्दे—
परान्नं कांस्यताम्बूले लोभं वितथभाषणम् ।
वर्जयेदिति शेषः । विष्णुधर्मे—
*असम्भाष्यान्हि संभाष्य तुलस्यतासिकादलम् ।

शाकं मधु परान्नं च हन्युरष्टाविमे फलम् ।
*असंभाष्यानिति । असम्भाष्याश्च—
बहिर्ग्रामाऽन्त्यजान् सूतिं पतितं च रजस्वलाम् ।
न स्पृशेन्नाभिभाषेत नेक्षेत व्रतवासरे ॥
इत्यादिनोक्ताः । हारीतोऽपि—"पतितपाषण्डिनास्तिकादिस-
म्भाषणानृतात्मश्लाघादि उपवासादिषु वर्जयेत्" इति । अस्यापवादः—
स्त्रीषु नर्म विवाहे च वृत्त्यर्थे प्राणसङ्कटे ।
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितम् ॥
स्त्रीष्वनृतं नर्मेत्याद्यन्वयः । हिंसायां=गोब्राह्मणहिंसायां प्रसक्ता-
यां गोब्राह्मणजीवनार्थे, यद्वा गोब्राह्मणार्थे=तज्जीवनार्थे । हिंसायां=
हिंसासामान्ये वा ।
अथ वाऽन्यदेव प्रायश्चित्तं कार्यं शास्त्रान्तरात् । तथा हि—
सम्भाष्यैतान् शुचिपदं चिन्तयेदच्युतं बुधः ।
इदं चोदाहरेत्सम्यक् कृत्वा तत्प्रवणं मनः ॥
शारीरमन्तःकरणोपघातं
वाचश्च विष्णुर्भगवानशेषम् ॥
शमं नयत्वस्तु ममेह शर्म
यायादनन्ते हृदि सन्निविष्टे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तःशुद्धिं बहिःशुद्धिं शुद्धो धर्ममयोऽच्युतः ।
स करोतु ममैतस्मिन् शुचिरेवास्मि सर्वदा ॥
बाह्योपघातानघान् बौद्धांश्च भगवानजः ।
शमं नयत्वनन्तात्मा विष्णुश्चेतसि संस्थितः ॥
एतत्संभाष्य जप्तव्यं पाषण्डिभिरुपोषितैः । इति ॥

पाषण्डिभिरिति बहुवचनात्तत्सदृशानां ग्रहः । यद्यपीदं सं
पघाते प्रतीयते तथापि संभाषण एव । "एतत्संभाष्य जप्त
व्यम्"इत्युपसंहारात् । हारीतः—

चण्डालैः सह संभाष्य द्विजसंभाषणाच्छुचिः ।
गायत्रीं व्याहरेद्वाऽपि इति धर्मो व्यवस्थितः ॥

अनेन सामान्यप्रायश्चित्तेन समुच्चयः । चण्डालादिदर्शने
विष्णुपुराणे—

तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः ।

इति सूर्यावलोकनं च शुचिपदपाठोत्तरं कार्यम् ॥

नमः शुचिपदेत्युक्त्वा सूर्यं पश्यते दीक्षितः ।

इति विष्णुधर्मात् । दीक्षितः=कृतनियमः । रात्रिस्पर्शे
पराशरः—

अस्तं गते यदा सूर्ये चण्डालं पतितं स्त्रियम् ।
सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते ॥
जातवेदः सुवर्णं च सोममार्गं तथैव च ।
ब्राह्मणानुगतिश्चैव स्नानं कृत्वा विशुध्यति ॥

रात्रिस्नानीयं तोयमाह देवलः—

दिवाऽऽहृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः ।
प्रक्षिप्य च सुवर्णं च सन्निधाप्य च पावकम् ॥

सुमन्तुः—

साक्षात् स्पर्शे तु यत्प्रोक्तं तद्वस्त्रान्तरितेऽपि च ।

दिवास्पर्शे तु तत्रैव—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आमलक्याः फलं वाऽपि पारणे प्राश्य शुध्यति ॥

बृहन्नारदीये—

रजस्वलां च चण्डालं महापातकिनं तथा ।
सूतिकां पतितं चैव उच्छिष्टं रजकादिकम् ॥
व्रतादिमध्ये शृणुयाद्यद्येषां ध्वनिमुत्तमम् ।
अष्टोत्तरसहस्रं तु जपेद्वै वेदमातरम्* ॥

एतद्व्रतं सूतकेऽपि कार्यम् ।

सूतके मृतके वापि न त्याज्यं द्वादशीव्रतम् ।

इति विष्णुक्तेः । तत्र त्यक्तं दानादि सूतकान्ते कार्यम् ।

सूतकान्ते नरः स्नात्वा पूजयित्वा जनार्दनम् ।
*दानं दत्त्वा विधानेन व्रतस्य फलमश्नुते ॥

इति मात्स्योक्तेः । रजोदर्शनेऽपि कार्यम् ।

संस्पर्शे च नरः स्नात्वा शुचिरादित्यदर्शनात् ॥ इति ।

मौनलोपे योगियाज्ञवल्क्यः—

यदि वाग्यमलोपः स्याज्जपादिषु कथं च न ।

'स्नानदानादिकर्मसु' इति वा पाठः ।

व्याहरेद्वैष्णवं मन्त्रं स्मरेद्वा विष्णुमव्ययम् ॥

इत्यादि । मानसे तु—

मानसे नियमे लुप्ते स्मरेद्विष्णुमनामयम् ॥

इति यमोक्तं द्रष्टव्यम् । एवं व्रताधिकारे—

विहितस्याननुष्ठानमिद्रियाणामनुग्रहः ।
निषिद्धसेवनं नित्यं वर्जनीयं प्रयत्नतः ॥

इति सुमन्तूक्तौ,

जपोऽष्टाक्षरमन्त्रस्य नामशतत्रयस्य वा ।

इति प्रायश्चित्तं स्मार्तप्रायश्चित्तेन समुच्चितं बोध्यम् ।

*वेदमाता=गायत्री । *दानमिति । ब्राह्मणभोजनमपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*एकादश्यां न भुञ्जीत नारी दृष्टे रजस्यपि।
इति पुलस्त्योक्तेः। यदा द्वादश्यां श्रवणर्क्षं त
शुद्धामप्येकादशीं त्यक्त्वा तत्रैवोपवासः कार्यः।
शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणाऽन्विता
तयोरेवोपवासश्च त्रयोदश्यां च पारणम्॥
इति नारदीयोक्तेः। एते च नियमाः काम्यव्रते नि
यताः*। नित्यव्रते सति संभवे कार्याः।
शक्तिमांस्तु पुनः कुर्यान्नियमं साविशेषणम्।
इति कात्यायनोक्तेः। अशक्तौ तु माधवीये ब्रह्मवैवर्ते
इति विज्ञाय कुर्वीतावश्यमेकादशीव्रतम्।
विशेषनियमाशक्तोऽहोरात्रं भुजिवर्जितः॥ इति
अथाष्टौ महाद्वादश्यः। तत्र शुद्धाधिकैकादशीयु
द्वादशी उन्मीलिनीसंज्ञा१। द्वादश्येव शुद्धाधिका वर्ध
चेत्सा वञ्जुली२। वासरत्रयस्पर्शिनी त्रिस्पृशा३। अ
पर्वणः संपूर्णाधिकत्वे पक्षवर्धिनी४। पुष्यर्क्षयुता जया
श्रवणयुता विजया६। पुनर्वसुयुता जयन्ती७। रोहिणीयु
ता पापनाशिनी८। अत्र *मूलं हेमाद्रौ ज्ञेयम्। *एत

ग्राह्यमन्नदानत्वात्। *एकादश्यां न भुञ्जीतेति।
संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम्
इति व्रतमपि द्रष्टव्यम्। *नियता इति। "सायमाद्यन्तयो
रह्नोः" इत्यादौ "पुनर्भोजनम्" इत्यादौ च फलपदोक्तेः।
*मूलमिति। ब्रह्मवैवर्ते—
उन्मीलिनी वञ्जुली च त्रिस्पृशा पक्षवर्द्धिनी।
जया च विजया चैव जयन्ती पापनाशिनी॥
द्वादश्योऽष्टौ महापुण्याः सर्वपापापहा द्विजाः।
तिथियोगेन जायन्ते चतस्रश्चापरास्तथा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नक्षत्रयोगात्प्रबलं पापं प्रशमयन्ति ताः ।
एकादशी तु संपूर्णा वर्द्धते पुनरेव सा ॥

तयुता द्वादशीत्यर्थः ।

उन्मीलिनी भृगुश्रेष्ठ कथिता पापनाशिनी १ ॥
द्वादश्यामुपवासश्च द्वादश्यामेव पारणम् ।
वञ्जुली नाम सा प्रोक्ता हत्यायुतविनाशिनी ॥ २ ॥
अरुणोदय आद्या स्याद्दादशी सकलं दिनम् ।
अन्ते त्रयोदशी प्रातस्त्रिस्पृशा सा प्रकीर्त्तिता ॥

आद्या=एकादशी । अरुणोदये=सूर्योदये ।

"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्र्यहस्पृक् त्र्यहोरात्रम्" इति पाद्मेऽहोरात्रे तिथित्रययोगोक्तेः ॥ ३ ॥

कुहू राके यदा वृद्धिं प्रयाते पक्षवर्द्धिनी ।
विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ॥ ४ ॥
पुष्यश्रवणपुष्याघरोहिण्या संयुतास्तथा ।

पुष्याघः=पुनर्वसुः ।

उपोषिताः समफला द्वादश्योऽष्टौ पृथक् पृथक् ॥ इति ।

समफला इति आसां काम्यत्वं, न तु नित्यत्वम् ।

न करिष्यन्ति ये लोके द्वादश्योऽष्टौ ममाऽऽज्ञया ।
तेषां यमपुरे वासो यावदाभूतसंप्लवम् ॥

इत्यकरणे दोषस्मरणं त्वनाकरमित्याशयेनाऽऽह—*एता इति । मुक्त्याद्यर्थस्य स्वर्गाद्यर्थत्वं पुराणादौ निरूढमेव । अत्र तिथियुक्तासु न संदेहः । यत्तु—

विहायैकादशीं तत्र द्वादशीं समुपोषयेत् ।

इति, तदुपवासद्वयासमर्थं प्रति, श्रवणद्वादशीवत् । नक्षत्रयोगयुक्तासु श्रवणद्वादशी निर्णेष्यते । तादृशीष्वितरद्वादशीषु परेऽह्नि नक्षत्रऋक्षयोगेऽपि तत्प्रयुक्तमुपवासादि कार्यम् । "तिथिनक्षत्रयोगे"इत्याग्रिमवचनात् । यत्तु क्वचिच्छ्रवणरोहिण्योरभिधानं तद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पापक्षयमुक्तिकाम उपवसेत् । *एकादशीद्वादश्योरेकतन्त्रेणोपवासः । *पार्थक्ये तु शक्तस्योपवासद्वयम् ।

वयुत्याऽनुवाद इति प्राञ्चः । नव्यास्तु-सूर्योदयादारभ्य द्वितीयसूर्योदयपर्यन्तमस्तमयपर्यन्तं वा श्रवणान्यऋक्षयोगोऽपेक्षितः उपवासस्याहोरात्रसाध्यत्वेन

प्रातः संकल्पयेद्विद्वानुपवासव्रतादिकम् ॥

इति संकल्पस्य सूर्योदयानन्तरकालत्वेन—

यो यस्य विहितः कालः कर्मणस्तदुपक्रमे ।
तिथिर्याऽभिमता सा तु कार्या नोपक्रमोज्झिता ॥

इति वचनात् ॥

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।
दिवारात्रिव्रतं यच्च एवमेव तिथौ गतम् ॥

इत्यादिवचनेभ्यश्च

कृत्तिकादिभरण्यन्तं तारा वा वारसप्तकम् ।
नैते संयोगमात्रेण पुनन्ति सकलां तिथिम् ॥

इति शङ्करगीतानिषेधवाक्याच्च श्रवणरोहिणीयोगवदल्पस्यापि ग्राह्यत्वे मानाभावात् "तिथिनक्षत्रयोर्योग" इति श्रवणद्वादशीपरणगतत्वेन सामान्यवचनत्वाभावाच्चेति प्राहुः । *एकादशीति । "द्वादशी त्वेकादशीयुता" इति वक्ष्यति । तत्र खण्डतिथित्वादेकादशीद्वादश्युपवासयोरुपक्रमप्रभृति तन्त्रमित्यर्थः । *पार्थक्ये त्विति प्रक्रान्तद्वादश्युपवासस्य प्रधानभूतद्वादश्युपवासानुरोधेनैकादश्युपवासाङ्गपारणबाध इत्यर्थः । अनुपक्रान्तद्वादश्युपवासेन तत्र द्वादश्युपवासो नोपक्रमितव्यः । "आपो वाऽशितमनाशितं च" इति श्रुतेरपां प्राशनस्याशितत्वेन पूर्वोपवाससमाप्तिरनाशितरूपत्वेनोत्तरोपवासारम्भाद्यात इति, तत्र जलपारणं कृत्वोपक्रान्तोऽनुपक्रान्तो वा द्वादश्युपवासः कार्य इति तु माधवः । अन्यतिथिषूपवासद्वयस्य नैरन्तर्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।
इति विष्णुरहस्यात् । अशक्तौ तु द्वादश्यामेव ।
एवमेकादशीं *भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥
इति तत्रैवोक्तेः । *यदा त्वल्पा द्वादशी तदोक्तं मात्स्ये-
यदा भवति अल्पाऽपि द्वादशी पारणादिने ।
उषःकाले द्वयं कुर्यात्प्रातर्माध्याह्निकं तदा ॥
नारदीयेऽपि—
अल्पायामथ विप्रेन्द्र द्वादश्यामरुणोदये* ।
स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः ॥ इति ।
*संकटे तु माधवीये देवलः—
संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम् ।
अद्भिस्तु पारणां कुर्यात्पुनर्भुक्तं न दोषकृत् ॥ इति ।
संकटे=*त्रयोदशीश्राद्धप्रदोषादौ* ।

प्रमाणवयमेव निर्णयः । *भुक्त्वेति फलाहारपरम् । त्यक्त्वेति
पाठेऽपि तत्परमेव । एकादशीपारणायां माधवीये स्मृत्यन्तरे—
फलाद्वयं त्रयं वाऽपि द्वादशीं न त्वतिक्रमेत् ।
पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ॥
इति । तत्राऽऽह्निकापकर्षमाह—*यदा त्विति । *अरुणोदये
इति तदधिककालसाध्यत्वात्त्रयकं सन्ध्यादि संकोचेनापि कार्यम् ।
महाहानिकरी ह्येषा द्वादशी लङ्घिता नरैः ।
करोति धर्महरणमस्नातेव सरस्वती ॥
इति द्वादशीलङ्घने दोषोक्तेः । अस्नातेति स्नातमत्रेत्यधिकरणेऽर्श-
आद्यच् । *संकटे=कथं चित्पारणाया असंभवे । *त्रयोदशी-
श्राद्धं=मृततिथि-गजच्छाया-वारुण्याद्यलभ्ययोगनिमित्तकम् ।
प्रदोषादाविति । आदिना स्नानदानादिकमन्यद्वा किञ्चिद्ब्राह्म-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र केचिदाहुः-*'अपकर्षवाक्यानि अनाहिताग्नि-
विषयाणि। अग्निहोत्रादीनां *श्रौतत्वेनापकर्षायोगात्'
इति। द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्यम्।

म्। सकलधार्मिकग्रन्थेषु जलपारणां कृत्वा श्राद्धाद्यनुष्ठानलि-
नान्न तल्लोपो युक्तः,नापि श्राद्धापकर्ष इति भावः। सर्वथा द्वादश्य-
भावे नारदीये—

त्रयोदश्यां तु शुद्धायां पारणं पृथिवीफलम्।
शतयज्ञाधिकं वाऽपि नरः प्राप्नोत्यसंशयम्॥

तच्च प्रातरेवेति द्रष्टव्यम्। यत्तु भोजनापकर्षे तत्पूर्वभाविनि-
सर्गिकनित्यकृत्यमात्रापकर्षः।

क्रमवत्सु च कृत्येषु यद्ययमपकृष्यते।
तदा सर्वापकर्षः स्यादन्यथा क्रमबाधनात्॥

इति कातीयवाक्यादिति मतं, तदसत्। वैश्वदेवादेरत्र संस्कार-
रत्वेन भोजनार्थत्वात् अतथात्वेऽपि वा दर्शपूर्णमाससोमयागवद्यान-
निकपौर्वापर्यात्तदपकर्षे तदपकर्षो भवतु प्रातरौपासनदेवपूजादेरेव-
अतथाभावात्कथं प्रोक्तन्यायादपकर्षः कालपौर्वापर्यकृतस्यापि-
कपौर्वापर्यस्यानुष्ठानानङ्गत्वेनानपकर्षेऽपि तल्लोपनिमित्तप्रकृतवैगु-
ण्याभावात्, प्रत्युतापकर्षे काललोपेन वैगुण्यापाताच्च। अन्यथा-
पशूनां सहत्वे अग्नीषोमीयसवनीययोः प्रकृतौ पौर्वापर्येऽपि सवनी-
यस्यैव प्रथममुपाकरणं आश्विनग्रहग्रहणोत्तरकालानुरोधात् अग्नी-
षोमी यानुबन्ध्ययोरग्नीषोमीयप्राथम्यं तु कस्याप्यवैगुण्यादि-
सिद्धान्तो भज्येत। तस्माद्वाचानिक एवायमपकर्षो वाच्यः। यच्च
च 'प्रातर्मध्याह्नकर्त्तव्ये नित्य एव'इति तत्रैवापकर्षो न सर्वत्र। अ-
एव 'संकटे विषमे प्राप्ते'इति संकटपदसङ्गतिः। अन्यथा त्रयोदश्या-
श्राद्धादेरप्यपकर्षुं शक्यत्वेनासंकटादिति। *अपकर्षवाक्या-
नीति। होमादीत्यस्य सारूप्याद्धोमः औपासनहोमवैश्वदेवादि-
स्मार्तश्च ग्राह्यइत्यर्थः *श्रौतत्वेनेति। पौराणधर्माणां दौर्बल्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः ।
*तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परैः ॥

इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः । अत्र केचित्सङ्गिरन्ते–'यदा भूयसी द्वादशी तदाऽपि प्रातर्मुहूर्तत्रये पारणं कार्यम् ।

सर्वेषामुपवासानां प्रातरेव हि पारणम् ।

इति वचनात्' इति ।

अस्मद्गुरवस्तु—'बहूनां कर्मकालानां विना कारणं बाधापत्तेः प्रागुक्तवचनैश्च अल्पद्वादश्याभवापकर्षविधानादपराह्ण एव कार्यम् । प्रातःशब्दस्तु–

सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।

इतिवदपराह्णवाचित्वेऽप्युपपन्नः । नच वाक्यवैयर्थ्यं, पुनर्भोजनसायंपारणनिवृत्त्यर्थत्वात्तस्य;–इत्याहुः ।

प्रमादेन एकादश्युपवासातिक्रमे अपरार्के वाराहे—

एकादशी विप्लुता चेद् द्वादशी परतः स्थिता ।
उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम् ॥ इति ।

कैश्चित्तु विष्णुना चेदिति पठितम् । अत्राविरोधिनो नियमाः सर्वव्रतेषु बोद्धव्याः । अन्ये च नवरात्रे वक्ष्यन्ते इति दिक् ।

इति श्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिन्धौ एकादशीनिर्णयः ।

उदितादिहोमिनामिदम् । अनुदितहोमिनां तु उषसि माध्याह्निकापकर्षः ततो होम इति भवति । *तमतिक्रम्येति प्रातः पारणापवादः ।

(१)इति श्रीकृष्णभट्टकृतौ निर्णयसिन्धुव्याख्यायामेकादशी निर्णयः समाप्तः ॥

---

(१) इमे न पङ्क्ती ग्रन्थकारस्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ शुद्धाविद्धादिभेदेन स्मार्तवैष्णवयोः स्फुटज्ञानार्थं श्रीवासुदेवोपाध्यायविरचितो धर्माब्धिस्थोदाहरण-सहितश्चैकादशीनिर्णयपट्टो लिख्यते ।

श्रीकाशिनाथोपाध्यायैरेकादश्या विनिर्णयः ।
कृतोऽष्टादशभेदात्मा स्मार्तवैष्णवयोः पृथक् ॥१
संलक्ष्योदाहृतेः सिद्धिं संशोध्य ग्रन्थपट्टयोः ।
विभाव्यैक्यं च पट्टेऽस्मिन्स यथामति लिख्यते ॥२
श्रीरामचन्द्रनामा नामप्रागर्धघृष्टजिह्वाग्रः ।
स ब्रह्मवित्पिता मे जयतितरामेष जानकीजानिः
नामस्मृत्या यस्य च विबोधितो धर्मशास्त्रदुर्बोध
निर्णयमेकादश्या निःसंदिग्धं सुखेन विलिखामि

अत्र समत्वं सूर्योदयाद्यक्षणाव्यवहितपूर्वक्षणा
तिथिसत्त्वं षष्टिघटिकारूपम् । न्यूनत्वं तु किञ्चिन्
नषष्टिघटिकावद्धि शुद्धाविद्धाभेदेषु तिथिक्षयवृद्धि
विलक्षणम् । यथा वैष्णवशुद्धैकादशीप्रथमभेदे दशमी
५५।५९, एकादशी-४९।५९, द्वादशी-४३।५९। एवं
मक्षये पलोनचतुश्चत्वारिंशद्घटीमितं न्यूनत्वम् । एवं
स्मार्तवैष्णवयोः शुद्धाविद्धाभेदैर्विलक्षणत्वमूह्यम् ।

एते वैष्णवानामेकादश्याः शुद्धाभेदाः ।

अत्रारुणोदयवेधरहिता शुद्धा सा चतुर्विधा सा

दाहरणेषु प्रदर्श्यते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धन्यूना न्यूनद्वादशिका।	५५	५९	५८	०	५९	५९	इयमनुभयाऽधिक्यवती शुद्धा। अत्र स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः। भेदः २।
धर्माब्धिस्थमुदाहरणम्।	५५	०	५७	०	५८	०	
शुद्धन्यूना समद्वादशिका।	५५	५९	५८	०	६०	०	इयमप्यनुभयाऽधिक्यवती शुद्धा। अत्रापि स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः। भेदः २।
धर्माब्धिस्थमुदाहरणम्।	५५	०	५७	०	५८	०	
शुद्धन्यूनाऽधिकद्वादशिका।	५५	५९	५८	०	६०	१	इयं द्वादशीमात्राऽधिक्यवती शुद्धा। अत्र स्मार्तानामेकादश्यां, वैष्णवानां द्वादश्यामेवोपवास इति माधवमतं, सर्वेषां द्वादश्यामेवेति हेमाद्रिमतम्। भे० ३।
धर्माब्धिस्थमुदाहरणम्।	५५	०	५८	०	६०	१	
शुद्धसमा न्यूनद्वादशिका।	५५	५९	६०	०	५९	५९	इयमनुभयाधिक्यवती शुद्धा। अत्र स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः।
धर्माब्धिस्थमुदाहरणम्।	५५	०	५७	०	५८	०	इदमुदाहरणं विचार्यम्। भे० ४।
शुद्धसमा समद्वादशिका।	५५	५९	६०	०	६०	०	इयमप्यनुभयाधिक्यवती शुद्धा। अत्र स्मार्तानां वैष्णवानां चैकादश्यामेवोपवासः। भे० ५।
धर्माब्धिस्थमुदाहरणम्।	५५	०	५७	०	५८	०	
शुद्धसमाऽधिकद्वादशिका।	५५	५९	६०	०	६०	०	इयं द्वादशीमात्राधिक्यवती शुद्धा। अत्र स्मार्तानामेकादश्यां, वैष्णवानां द्वादश्यामेवोपवास इति माधवमतं, सर्वेषां द्वादश्यामेवोपवास इति हेमाद्रिमतम्। भे० ६।
					३	१	
धर्माब्धिस्थमुदाहरणम्।	५५	०	५८	०	६०	१	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धाऽधिका न्यूनद्वादशिका ।	५५	५९	६०	०	५९	५८	इयमेकादशीमात्राधिक्यवती शुद्धा । अत्र स्मार्तगृहस्थानां पूर्वैकादश्यां, यतीनां वैष्णवानां चोर्वरितैकादश्यामेवोपवास इति माधवमतं, कामाद्वा अकामाद्वा वैष्णवो द्वयमुपवसेदिति हेमाद्रिमतम् ।
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम् ।	५५	०	६०	१	५८	०	इदमुदाहरणं विचार्यम् । भे० ७।
शुद्धाऽधिका समद्वादशिका ।	५५	५९	६०	०	५९	५९	इयमप्येकादशीमात्राधिक्यवती शुद्धा । अत्रापि स्मार्तगृहस्थानां पूर्वैकादश्यां, यतीनां वैष्णवानां चावशिष्टैकादश्यामेवोपवास इति माधवमतं, कामाद्वा अकामाद्वा वैष्णवो द्वयमुपवसेदिति हेमाद्रिमतम् भे० ८।
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम् ।	५५	०	६०	१	५८	०	
					क्ष	यः	
शुद्धाऽधिकाऽधिकद्वादशिका ।	५५	५९	६०	१	३	५५	इयमुभयाधिक्यवती शुद्धा । अत्र स्मार्तैर्वैष्णवैश्च परैर्वैकादश्युपोष्यत्युभयमतम् । भे० ९।
धर्माब्धिस्थमुदाहरणम् ।	५५	०	६०	१	५	०	

इति वैष्णवानां शुद्धैकादशीभेदाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एते वैष्णवानां विद्धैकादशीभेदाः ।

अत्र विद्धत्वमरुणोदये दशमीसत्त्वम् । अरुणोदयस्तु सूर्योदयात्प्राक् चतुर्घटिकात्मकः ।

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
विद्धन्यूना न्यूनद्वादशिका । धर्माब्धिस्थमुदाहरणम् ।	५६	१	५८	०	५९	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वात् द्वादश्यामुपवासः । भेदः १।
	५७	०	५८	०	५९	०	
विद्धन्यूना समद्वादशिका धर्माब्धिस्थमुदाहरणम् ।	५६	१	५८	०	६०	०	इयमप्यनुभयाधिक्यवती विद्धा । अत्रापि स्मार्तानामेकादश्यामेवोपवासो, वैष्णवानां विद्धत्वाद् द्वादश्यामुपवासः । भे० २।
	५७	०	५८	०	५९	०	
विद्धन्यूनाऽधिकद्वादशिका । धर्माब्धिस्थमुदाहरणम् ।	५६	१	५८	०	६०	०	द्वादशीमात्राऽधिक्यवती विद्धेयम् । अत्र स्मार्तैरेकादश्युपोष्या, वैष्णवैर्द्वादश्युपोष्या । हेमाद्रिमते तु सर्वैर्द्वादश्येवोपोष्या । भे० ३।
					१	१	
	५८	०	५९	०	६०	१	
विद्धसमा न्यूनद्वादशिका । धर्माब्धिस्थमुदाहरणम् ।	५८	५९	६०	०	५९	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वाद् द्वादश्यामुपवासः । भे० ४।
	५७	०	५८	०	५९	०	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
विद्धसमा समद्वादशिका।	५९	१	६०	०	६०	०	इयमप्यनुभयाधिक्यवती विद्धा। अत्र स्मार्तानामेकादश्यामेवोपवासो वैष्णवानां विद्धत्वाद् द्वादश्यामुपवासः। भे० ५।
धर्माब्धिस्थमुदाहरणम्।	५७	०	५८	०	५९	०	
विद्धसमाऽधिकद्वादशिका।	५७	१	६०	०	६०	०	इयं द्वादशीमात्राऽधिक्यवती विद्धा। अत्र स्मार्तैरेकादश्युपोष्या, वैष्णवैर्द्वादश्युपोष्या। हेमाद्रिमते तु सर्वैर्द्वादश्येवोपोष्या। भे० ६।
					१	०	
धर्माब्धिस्थमुदाहरणम्।	५८	०	५९	०	६०	१	
विद्धाधिका न्यूनद्वादशिका।	५९	१	६०	०	५९	५८	इयमेकादशीमात्राधिक्यवती विद्धा। अत्र स्मार्तैर्गृहस्थैः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं कार्यमिति केचित्। भे० ७।
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	१	५८	०	
					क्ष	यः	
विद्धाधिका समद्वादशिका।	५९	१	६०	०	५९	५९	इयमप्येकादशीमात्राधिक्यवती विद्धा। अत्र स्मार्तैर्गृहस्थैः पूर्वैकादश्युपोष्या यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या। विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं कार्यमिति केचित्। भे० ८।
			०	१	क्ष	यः	
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	१	५८	०	
					क्ष	यः	
विद्धाधिकाऽधिकद्वादशिका	५६	१	६०	०	५	०	इयमुभयाधिक्यवती विद्धा। अत्र सर्वैः स्मार्तैर्वैष्णवैश्चावशिष्टा परैवैकादश्युपोष्या। भे० ९।
			१	०			
धर्माब्धिस्थमुदाहरणम्।	५८	०	६०	१	४	०	

इति वैष्णवानां विद्धैकादशीभेदाः।

शुद्धत्वं नाम क्षयोदये दशम्यसम्पर्कम्। तत् चतुर्विधम्। तेषां चोदाहरणं मदन्वेति।

	दशमी		एकाद.		द्वादशी		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति वैष्णवानां विद्धैकादशीभेदाः ।

शुद्धत्वं नाम सूर्योदये दशम्यसत्त्वम् । सा चतुर्विधा । सो चोदाहरणैः प्रदर्श्यते ।

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धन्यूना न्यूनद्वादशिका।	५९	५९	५९	०	५९	०	इयमनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो न द्वादश्यां, वैष्णवानां तु विद्धत्वाद्
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	द्वादश्यामुपवासः । भे० १
शुद्धन्यूना समद्वादशिका ।	५९	५९	५९	४५	६०	०	इयमप्यनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो न द्वादश्याम् । वैष्णवानां तु विद्धत्वाद्
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	द्वादश्यामुपवासः । भे० २।
शुद्धन्यूनाऽधिकद्वादशिका ।	५९	५९	५९	५९	६०	०	इयं द्वादशीमात्राऽऽधिक्यवती शुद्धा । अत्र शुद्धत्वात् स्मार्तानामेकादश्यामेवोपवासो न द्वादश्यामिति माधवमतम् ।
धर्माब्धिस्थमुदाहरणम् ।	५८	०	५९	०	१	०	हेमाद्रिमते तु सर्वैर्द्वादश्येवोपोष्या । केचित्तु मुमुक्षुभिः
					६०	०	स्मार्तैः परोपोष्येत्याहुः । भे० ३।
					०	१	
शुद्धसमा न्यूनद्वादशिका ।	५८	५९	६०	०	५९	५९	इयमनुभयाधिक्यवती शुद्धा । अत्र स्मार्तानामेकादश्यामेवोपवासो न द्वादश्याम् । वैष्णवानां तु विद्धत्वाद् द्वादश्यामेवोपवासः । भे० ४।
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	
शुद्धसमा समद्वादशिका ।	५८	५९	६०	०	६०	०	इयमप्यनुभयाधिक्यवती शुद्धा । अत्रापि स्मार्तानामेकादश्यामेवोपवासो न द्वादश्याम् । वैष्णवानां तु विद्धत्वाद्
धर्माब्धिस्थमुदाहरणम् ।	५७	०	५८	०	५९	०	द्वादश्यामेवोपवासः । भे० ५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
शुद्धसमाऽधिकद्वादशिका ।	५९	५९	६०	०	६०	०	इयं द्वादशीमात्राऽऽधिक्यवती शुद्धा । अत्र शुद्धत्वात्स्मार्तानामेकादश्यामेवोपवासो न द्वादश्यामिति माधवमतम् । हेमाद्रिमते तु सर्वैः परा द्वादश्येवोपोष्या । केचित्तु मुमुक्षुभिः स्मार्तैः परोपोष्यत्याहुः । भे० ६।
धर्माब्धिस्थमुदाहरणम् ।					१	०	
	५८	०	५९	०	६०	०	
					०	१	
शुद्धाऽधिका न्यूनद्वादशिका ।	५९	५९	६०	०	५८	५९	इयमेकादशीमात्राऽऽधिक्यवती शुद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैरुपवासद्वयं कार्यमिति केचित् । भे० ७।
			१	०	क्ष	यः	
धर्माब्धिस्थमुदाहरणम् ।	५८	०	६०	१	५८	०	
					क्ष	यः	
शुद्धाऽधिका समद्वादशिका ।	५९	५९	६०	०	५९	०	इयमप्येकादशीमात्राऽऽधिक्यवती शुद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैरुपवासद्वयं कार्यमिति केचित् । भे० ८।
			१	०	क्ष	यः	
धर्माब्धिस्थमुदाहरणम् ।	५८	६०	६०	१	५८	०	
					क्ष	यः	
शुद्धाधिकाऽधिकद्वादशिका ।	५९	५९	६०	०	३	०	इयमुभयाधिक्यवती शुद्धा । अत्र सर्वैः स्मार्तैर्वैष्णवैश्चावशिष्टा परैवैकादश्युपोष्या । भे० ९।
धर्माब्धिस्थमुदाहरणम् ।	५८	०	६०	०	४	०	
			१	०			

इति स्मार्तानां शुद्धैकादशीवेदाः ।

अत्र विद्धत्वं सूर्योदये दशमीसत्त्वम् । सूर्योदयस्तु षष्टिघटिकान्त्यक्षणाव्यवहितोत्तरक्षणत्वादिकालावच्छिन्नः ।
इयमपि विद्धा चतुर्विधा, सा चोदाहरणेषु प्रदर्श्यते—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्मार्तानां [illegible] भेदाः ।

अत्र विद्धत्वं सूर्योदये दशमीसत्त्वम् । सूर्योदयस्तु षष्टिघटिकान्त्यक्षणाव्यवहितोत्तरक्षणत्वादिकालावच्छिन्नः ।

इयमपि विद्धा चतुर्विधा, सा चोदाहरणेषु प्रदर्श्यते—

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
विद्धन्यूना न्यूनद्वादशिका ।	२	०	५७	५९	५७	०	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामुपवासः । वैष्णवानां द्वादश्यामुपवासः । भेदः १।
धर्माब्धिस्थमुदाहरणम् ।	२	०	क्ष ५६	य: ०	५५	०	
विद्धन्यूना समद्वादशिका ।	२	०	५७	५९	६०	०	इयमप्यनुभयाधिक्यवती विद्धा । अत्रापि स्मार्तानामेकादश्यामुपवासः । वैष्णवानां द्वादश्यामुपवासः । भेदः २।
धर्माब्धिस्थमुदाहरणम् ।	२	०	क्ष ५६	य: ०	५५	०	
विद्धन्यूनाधिकद्वादशिका ।	१	०	५८	५९	६०	०	इयं द्वादशीमात्राधिक्यवती विद्धा । अत्रैकादश्या विद्धत्वाद् द्वादश्यामेव स्मार्तानामप्युपवासः । तत्र किमु वक्तव्यं वैष्णवानामिति । एवं चोभयाधिक्ये द्वादशीमात्राधिक्ये च स्मार्तानां विद्धायास्त्यागो नान्यत्र । भे० ३।
धर्माब्धिस्थमुदाहरणम् ।	१	०	५८	०	१	०	
					६०	०	
					०	१	
विद्धसमा न्यूनद्वादशिका ।	२	०	५८	०	५८	५९	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामुपवासः । वैष्णवानां द्वादश्यामुपवासः । भे० ४।
धर्माब्धिस्थमुदाहरणम् ।	२	०	क्ष ५६	य: ०	५५	०	
			क्ष	य:			

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

	दशमी		एकाद.		द्वादशी		
	घ०	प०	घ०	प०	घ०	प०	
विद्धसमा समद्वादशिका ।	२	०	५८	०	६०	०	इयमनुभयाधिक्यवती विद्धा । अत्र स्मार्तानामेकादश्यामुपवासः । वैष्णवानां द्वादश्यामुपवासः ।
धर्माब्धिस्थमुदाहरणम् ।	२	०	क्ष ५६	यः ०	५५	०	भे० ५।
विद्धसमाऽधिकद्वादशिका ।	२	०	क्ष ५८	यः ०	६०	०	इयं द्वादशीमात्राऽऽधिक्यवती विद्धा । अत्रैकादश्या विद्धत्वाद् द्वादश्यामेव स्मार्तानामप्युपवासः । तत्र किमु वक्तव्यं वैष्णवानामिति । पूर्ववदत्र स्मार्तानां विद्धायास्त्यागः ।
धर्माब्धिस्थमुदाहरणम् ।	१	०	क्ष १	यः ०	१	०	भे० ६।
विद्धाधिका न्यूनद्वादशिका ।	७	०	२	०	५५	०	इयमेकादशीमात्राऽऽधिक्यवती विद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वैकादश्युपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं कार्यमिति केचित् ।
धर्माब्धिस्थमुदाहरणम् ।	४	०	क्ष ५८	यः ०	५८	०	भे० ७।
विद्धाऽधिका समद्वादशिका ।	५	०	२	०	क्ष ५८	यः ०	इयमेकादशीमात्राऽऽधिक्यवती विद्धा । अत्र स्मार्तैर्गृहिभिः पूर्वोपोष्या, यतिभिर्निष्कामगृहिभिर्वनस्थैर्विधवाभिर्वैष्णवैश्च परैवोपोष्या । विष्णुप्रीतिकामैः स्मार्तैरुपवासद्वयं कार्यमिति केचित् ।
धर्माब्धिस्थमुदाहरणम् ।	४	०	२	०	क्ष ५८	यः ०	भे० ८।
विद्धाधिकाऽधिकद्वादशिका ।	७	०	४	०	३	०	इयमुभयाधिक्यवती विद्धा । अत्र सर्वैः स्मार्तैर्वैष्णवैश्चावशिष्टा परैवैकादश्युपोष्या । एतदुदाहरणेऽपि स्मार्तानां विद्धायास्त्यागः ।
धर्माब्धिस्थमुदाहरणम् ।	२	०	३	०	४	०	भे० ९।

इति स्मार्तानां विद्धैकादशीभेदाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादशी तु पूर्वैव *युग्मवाक्यात्—

द्वादशी तु प्रकर्तव्या एकादश्या युता प्रभो।

इति स्कान्दाच्च॥

त्रयोदशी तु *सर्वमते शुक्ला पूर्वा, कृष्णोत्तरा।

---

*युग्मेति। रुद्रेण द्वादशीयुक्तेत्यादिः। सर्वकार्यपरमिदम्।

उपवासे तु विशिष्यापि।

एकादशी तथा षष्ठी अमावास्या चतुर्थिका।

उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः॥

इति गार्ग्येण पूर्वविद्धाविधानात्।

द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी।

चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी।

इति वासिष्ठेन तत्रोत्तरविद्धानिषेधाच्च। *सर्वमते इति। "एकादश्यष्टमी षष्ठी" इति सामान्यत उत्तरा विहिता। 'द्वितीया पञ्चमी वेधात्' इति निषिद्धा च। एवं च—

षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी।

एताः परयुताः पूज्याः पराः पूर्वयुतास्तथा॥

इति निगमवचनात्कृष्णपक्षे परा, शुक्लपक्षत्रयोदशी तु पूर्वा इति। सामान्यविशेषन्यायात्। एवं च—

त्रयोदशी तु कर्त्तव्या द्वादशीसहिता मुने॥

इति ब्रह्मवैवर्त्ते सामान्यवचनाच्छुक्लत्रयोदश्यामेव प्रवर्तते। या तु पूर्वा सा त्वपराह्णिकी।

त्रयोदशी तु कर्त्तव्या या भवेदापराह्णिकी॥

इति स्कान्दात्।

या शुक्ला गृह्यते पूर्वा गृह्यतां साऽपराह्णिकी॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'त्रयोदशातिथिः पूर्वः सितोऽथाऽसितः *पश्चात्'इति दीपिकोक्तेः ।

शुक्ला त्रयोदशी पूर्वा, परा कृष्णा त्रयोदशी ।
इति माधवाच्च ।

इति माधवाच्च । *पश्चादिति । परदिने लाभे तु पूर्वैव "एकादशी तृतीया च"इति वचनात् । "यदि न स्यात्परेऽहनि" इति दर्शनात् । अत्र प्रदोषव्रतं ब्रह्मोत्तरखण्डे—

पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा ।
घटीत्रयादस्तमयात्पूर्वं स्नानं समाचरेत् ॥
शुक्लाम्बरधरो भूत्वा वाग्यतो नियमान्वितः ।
कृतसंध्याजपविधिः शिवपूजां समारभेत् ॥

इति व्रतमभिधाय

एवमाराधयेद्देवं प्रदोषे गिरिजापतिम् ।
ब्राह्मणान् भोजयेत्पश्चाद् दक्षिणाभिश्च तोषयेत् ॥

इति दिनेऽनाहारकर्तृकं शिवपूजाप्रधानकं व्रतं स्मर्यते । अत्र प्रदोषव्यापिनी ग्राह्या । तत्रैव पूजाविधानात् । प्रदोषस्त्रिमुहूर्त्तमित्यभिप्रायः । दिनद्वये प्रदोषव्याप्तावव्याप्तौ वा पूर्वा ।

त्रयोदशी तु कर्त्तव्या द्वादशीसहिता मुने ।

इति सुमन्तूक्तेरिति मयूखकृतः । दिनद्वये प्रदोषव्याप्तौ तदव्याप्तौ साम्येन तदेकदेशस्पर्शे वा उत्तरा । संकल्पकाले सत्त्वात् । वैषम्येणैकदेशस्पर्शे तदाधिक्यवती ग्राह्येति विवेचनानुसारिणः । अधिकमुक्तं नक्तव्रते । इदं च मन्दवारे कृष्णपक्षेऽतिप्रशस्तम् ।

मन्दवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम् ।
तत्रापि दुर्लभस्तस्मिन् कृष्णपक्षे समागतः ॥

इति तत्रैवोक्तेः । आरम्भश्च शनिप्रदोषे कार्यः—

यदा त्रयोदशी शुक्ला मन्दवारेण संयुता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्दशी तु सर्वमते *कृष्णा पूर्वा,*शुक्लोत्तरा ।
*उपवासे तु *द्वय्यपि परेति मदनरत्ने ।

आरभेत्तद् व्रतं तत्र सन्तानफलसिद्धये ॥

इति तत्रैवोक्तेः । पृथक्कृशानिप्रदोषव्रते तु एतदेवमिति प्रकाशः ।

*कृष्णेति ।

कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्त्तव्या पराविद्धा न कुत्रचित् ॥
उपवासादिकार्येषु एष धर्मः सनातनः ॥

इत्यापस्तम्बवाक्यात् । *शुक्लेति । "चतुर्दश्या च पूर्णिमा" इति पुराणवाक्यात् ।

सदा कार्या त्रयोदश्या न तु युक्ता चतुर्दशी ।
पौर्णमासीयुता सा स्याच्चतुर्दश्या च पूर्णिमा ॥

इति भविष्याच्च । *उपवासे त्विति । रुद्रोपवासभिन्ने इति शेषः । *द्वय्यपीति ।

एकादश्यष्टमी षष्ठी उभे पक्षे चतुर्दशी ।
अमावास्या तृतीया च ता उपोष्याः परान्विताः ॥

इति वासिष्ठात् । रुद्रोपवासे तु पक्षद्वयगताऽप्यापराह्णिकी चेत् पूर्वा ।

चतुर्दशी तु कर्त्तव्या त्रयोदश्या युता प्रभो ।
मम भक्तैर्महाबाहो भवेद्या चापराह्णिकी ॥
दर्शविद्धा न कर्त्तव्या राकाविद्धा तथा मुने ॥

इति स्कान्दे "मम भक्तैः" इतीश्वरोक्तिलिङ्गेन रुद्रव्रतविषयत्वप्रतीतेः । आपराह्णिक्या अलाभे तु परा । "ता उपोष्याः परान्विताः" इति दर्शितवासिष्ठात् । यदि कृष्णा पूर्वा न लभ्यते तदा परा ।

अष्टम्येकादशी षष्ठी कृष्णपक्षे चतुर्दशी ।
अमावास्या तृतीया च कर्तव्या परसंयुता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे ग्राह्ये।
*भूतविद्धे न कर्तव्ये दर्शपूर्णे कदाचन।
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम्॥

इति ब्रह्मवैवर्तात्। अमायां योगविशेषमाहाऽपरार्के शातातपः—

अमावास्यां भवेद्वारो यदा भूमिसुतस्य वै।
जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत्॥
अमा वा सोमवारेण रविवारेण सप्तमी।
चतुर्थी भौमवारेण विषुवत्सदृशं फलम्॥

तत्रैव व्यासः—

सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्।
गोसहस्रफलं दद्यात्स्नानं चेन्मौनिना कृतम्॥

हेमाद्रौ बृहन्मनुः—

श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तकैः।
पञ्चमा रविवारेण व्यतीपातः स उच्यते॥

नागदैवतम्=आश्लेषा, मस्तको=मृगशिरःप्रथमपादः इत्यन्ये। स च सर्वेषाम्॥

इति ब्रह्मवैवर्तात्। *भूतविद्धे इति। तथा च "चतुर्दश्या च पूर्णिमा" इति युग्मवाक्यम्—

दर्शं च पूर्णमासं च पितुः सांवत्सरं दिनम्।
पूर्वविद्धमकुर्वाणो नरकं प्रतिपद्यते॥

इति पूर्वविद्धाविधानं—

पूर्णिमा परविद्धा च नोपोष्यं तिथिपञ्चकम्॥

इति परविद्धानिषेधश्च सावित्रीव्रतविषयः।

एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी।
अमावास्या तृतीया च ता उपोष्याः परान्विताः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथेष्टिकालः । गोभिलः-'पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः' इति । उपवासोऽन्वाधानम् ।

इति विष्णुधर्मोत्तरं—

षष्ठ्यष्टमी तथा दर्शः कृष्णपक्षे चतुर्दशी ।
एताः परयुताः पूज्याः पराः पूर्वेण संयुताः ॥

इति पाद्मे—

नागविद्धा च या षष्ठी सप्तम्या च तथाऽष्टमी ।
दशम्यैकादशी विद्धा त्रयोदश्या चतुर्दशी ॥
भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुङ्गव ।
उत्तरोत्तरविद्धास्ताः कर्तव्याः काठकी श्रुतिः ॥

इति प्राचेतसं च तत्सावित्रीव्रतेतरव्रतविषयमिति भावः । अन्वाधानं यत्र क्रियमाणे यागदेवता यजमानसन्निधौ तिष्ठन्ति तदग्नीध्मादिसंपादनरूपप्रयोगप्रारम्भः । "पूर्वेद्युरग्निं गृह्णाति, उत्तरमहर्यजति"इति, "पूर्वेद्युरिध्मावर्हिः करोति, यज्ञमेवारभ्य दीक्षित्वोपवसति"इति श्रुतेः उपवास क्रत्वङ्गयमनियमः । इत्थं च "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत"इति श्रुतिरुपक्रमपरा । अथ वा संधिपार्श्ववर्त्तिपर्वप्रतिपत्समुदायलक्षणया कृत्स्नप्रयोगकालविधायिनी । "संधौ यजेत"इत्यादावपि लक्षणैव । अन्यथा संधेर्दुर्लक्ष्यत्वेन तत्र एकस्याप्यनुष्ठातुमशक्यत्वात् "संधिमभितो यजेत" इत्याद्येकवाक्यत्वाच्च । तदुक्तं बौधायनेन—

सूक्ष्मत्वात्संधिकालस्य संधेर्विषय उच्यते ।
सामीप्यं विषयं प्राहुः पूर्वेणाह्ना परेण च ॥ इति ।

तत्राखण्डपर्वाणि पर्वप्रतिपदोरुदयास्तमयस्पृक्त्वे पर्वण एवास्तादूर्ध्वं समाप्तौ वा न कोऽपि विचारः । "त्रीनंशानौपवस्तस्य" इत्यादिवक्ष्यमाणयागान्वाधानकालयोरबाधात् । खण्डपर्वाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तत्र मध्याह्ने तत्पूर्वं वा पर्वप्रतिपत्सन्धौ तद्दिने यागः।
पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते।
उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते॥
इति लौगाक्षिवचनात्। अत्र च द्वेधा विभागः-
आवर्तनात्तु पूर्वाह्णो ह्यपराह्णस्ततः परः।
मध्याह्नस्तु तयोः सन्धिर्यदावर्तनमुच्यते॥

तु आह—*तत्रेति। पर्वण आद्यमंशत्रयमन्वाधानस्य कालः। तच्चतुर्थांशसहितं प्रतिपदोंऽशत्रयं प्रातरवच्छिन्नं तु यागस्य।
त्रीनंशानौपवस्तस्य यागस्य चतुरो विदुः।
द्वावंशावुत्सृजेदन्त्यौ यागे च व्रतकर्मणि।
इति लौगाक्ष्युक्तेः। न ह्ययं स्वतन्त्रो यागविधिः। वाक्यभेदापत्तेः।
पर्वणो यश्चतुर्थोंश आद्याः प्रतिपदस्त्रयः।
यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः॥
इति वचनान्तरवशादंशान्तरे प्रसक्त्यभावाच्च, किं तु पर्वान्त्यचतुर्थांशभिन्नांस्त्रीनिति पर्युदासविधया पूर्वशेषः। एवं प्रतिपदन्त्यचतुर्थांशभिन्नाश्चतुर इत्यर्थः।
न यष्टव्यं चतुर्थेऽशे यागैः प्रतिपदः क्वचित्।
रक्षांसि तद्विलुम्पन्ति श्रुतिरेषा सनातनी॥
इति कातीयं तु पर्युदाससिद्धार्थानुवादः। 'आद्याः प्रतिपदस्त्रयः' इत्येतावन्मात्रोक्तेः। न चाद्याः प्रतिपदस्त्रय इत्येव पर्युदाससिद्धार्थानुवादः, प्राप्ते कर्मणि पर्वचतुर्थांशप्रतिपदाद्यत्रयांशप्रातःकालरूपानेकार्थविधायकत्वासम्भवादिति वाच्यम्। "अर्द्धमन्तर्वेदि अर्द्धं बहिर्वेदि मिनोति" इति न्यायेन एकस्य सन्धिपार्श्वद्वयवर्तिस्थूलकालविशेषस्य विधानात्। न हि पर्वचतुर्थांशप्रतिपदाद्यभागत्रययोः विशिष्य विधेयत्वम्। तथा सति एकवाक्योपादानात् कालद्वयसमुच्चये सति "सायं च प्रातश्च जुहोति" इति "यदाग्नेयोऽष्टाकपालोऽमावास्यायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मदनरत्ने वचनात् । मध्याह्नादूर्ध्वं सन्धौ *माधवमते परेऽह्नि यागः ।

अपराह्णेऽथ वा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥

इति लौगाक्षिणोक्तेः । *हेमाद्रिस्त्वपराह्णसन्धावपि* परदिने प्रतिपच्चतुर्थांशे चन्द्रोदये च सति द्वितीयादिष्वत्यन्तक्षये सति पूर्वेद्युर्यागः ।

पर्वणोंऽशे द्वितीये तु यष्टव्यं तु द्विजातिभिः ।
द्वितीयासहितं यस्माद् दूषयन्त्याश्वलायनाः ॥ इति ।

द्वितीये त्विति कैमुतिकन्यायेन तुर्यांशपरम् । तुर्यांशे त्विति शूलपाणौ पाठः स्पष्टार्थ एव । तथा—

भूता पञ्चदशी पूर्णा द्वितीया क्षयगामिनी ।
चतुरिष्टिरमायां स्याद्भूते कव्यादिकी क्रिया ॥

इति बौधायनवचनाच्चत्युचिवान् । मदनरत्नेऽपि—

णमास्यां च" इतिवदश्रुतकर्मावृत्त्यापत्तेः । प्रातरिति तु वाक्यदिन, पौरुषेयवाक्यं तस्यादोषत्वात् अवच्छेदकं वा प्रातरवच्छिन्नं स्यात् । अधिकमन्यतोऽवगन्तव्यम् । *माधवमते इति । तन्मतेऽमायां द्वितीया त्रिमुहूर्त्ता चेदित्यादि दर्शयिष्यति । तत्र हेमाद्रिमतं दर्शयति—*हेमाद्रिस्त्विति । *अपराह्णसंधावपीति । "द्वितीया त्रिमुहूर्ता चेत्" इत्यादीन्यावर्त्तनसन्निकृष्टापराह्णेऽमाप्रतिपत्सन्धिपराणीति तन्मतम् । *परदिने इति । अयमर्थः—द्वितीया त्रिमुहूर्त्ता चेदित्यग्रिमवाक्याद् द्वितीयैव यागनिवर्त्तिका न चन्द्रदर्शनं, मेघादिना व्यभिचारात् । "परतः सोमदर्शनात्" इति हेतूक्तितस्तु चन्द्रोदयो लभ्यते । स च प्रतिपदष्टमांशे भवतीति चन्द्रदर्शनयोग्यतारक्षणायात्यन्तक्षयानुधावनम् । *तृतीये त्विति । तृतीयांशस्यापूर्वविधिः । द्वितीये त्विति पाठे तु कैमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चतुर्दशी चतुर्यामा अमावास्या न दृश्यते।
द्वयोर्भूते प्रतिपच्चेत्स्यात्* पूर्वा तत्रैव कारयेत्॥

तिकन्यायेन तृतीयांशे तात्पर्यम्। द्वितीयायाः क्षीणत्वं कोक्तमित्यत
ह—*भूतामिति। भूतस्य पूर्णत्वं नियतं, न पञ्चदश्या इत्याह—*च
तुर्दशीति। अमावास्या चतुर्यामा न दृश्यते इत्यन्वयः।*पूर्वामि
अयं च प्रधानकालः। तदनुरोधेन चतुर्दश्यामन्वाधानं कार्यम्। 'पू
कव्यादिकी' इत्यादिपदात्। अत्रेदमरुचिबीजं—हेमाद्रिमते प्रतिपद
प्राह्णिकीत्यपराह्णशब्दस्य द्वेधाविभक्तदिनान्त्यदलवाचित्वात्त
सूर्यास्तात्प्राक् त्रिमुहूर्त्ताद्वितीयाप्रवेशेन चन्द्रदर्शने सति पर्वप्रतिपद
रात्रिसन्धावपि परदिने यागनिषेधापत्तिः। न चापराह्णसन्धिशास्त्रे
कैमुतिकन्यायेन रात्रिसन्धावपि परदिने यागसिद्धौ "अपराह्णे
वा रात्रौ" इति रात्रिशास्त्रं व्यर्थं स्यादतश्चन्द्रदर्शननिषेधबाधक
यैव रात्रिसन्धिशास्त्रं सार्थकमिति वाच्यम्। अपराह्णशब्देन योगेन
हर्वत्यावर्त्तनोत्तरदलाभिधाने कैमुतिकन्यायेन तच्छास्त्रप्रवृत्तेरि
त्रिमुहूर्तशास्त्रं पञ्चधाभक्तदिनचतुर्थभागरूपापराह्णव्यापिद्वितीयाविष
यम्। एवं च सोमदर्शनादिति हेतूक्तिः सङ्गच्छते, न तु सायाह्ने त्रि
हूर्तमात्रसत्त्वे। तत्र चन्द्रदर्शनस्य व्यभिचारात्। एतच्च दिवासन्धावे
व प्रवर्त्तते न रात्रिसन्धौ। परेद्युस्तावतः क्षयस्यासम्भवात्। यदु
तत्रापराह्णो दिनद्वितीयभाग इति, तन्न। यौगिकपारिभाषिकयो
परिभाषासार्थक्याय पारिभाषिकस्यैव ग्राह्यत्वात्। सन्धिनिर्णये
तु द्वेधाविभक्तदिनभागार्थतया पूर्वाह्णापराह्णशब्दौ मध्याह्नशब्द
यौगिका एव।

आवर्तने यदा सन्धिः पर्वप्रतिपदोर्भवेत्।
तदहर्याग इष्येत परतश्चेत्परेऽहनि॥
पर्वप्रतिपदोः सन्धिरर्वागावर्तनाद्यदि।
तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः॥

Népal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्तु माधवः—

यस्तु वाजसनेयी स्यात्तस्य सन्धिदिनात्पुरा ।
*न क्वाप्यन्वाहितिः, किं तु सदा सन्धिदिने हि सा ॥

इत्याह ।

*यच्च कालादर्शेऽप्युक्तम्—

आवर्तनादधः सन्धिर्यद्यन्वाधाय तद्दिने ।
परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः ॥ इति ।

यच्च मदनरत्ने—

मध्यन्दिनात्स्यादहनीह यस्मिन्
प्राक्पर्वणः सन्धिरियं तृतीया* ।
सा खर्विका वाजसनेयिमत्या
तस्यामुपोष्याऽथ परेद्युरिष्टिः ॥ इति ।

एतत्पौर्णमासीपरमिति तत्रैव । *आवर्तनोर्ध्वमर्वा-
गस्ताद्रात्रौ वा समासौ द्वे मध्याह्नादर्वाक् समासौ तृती-

आवर्तनात्परः सन्धिर्यदि तस्मिन्नुपक्रमः ।
परेद्युरिष्टिरित्येष पर्वद्वयविनिर्णयः ॥

इति गोभिलवचने 'अर्वागावर्तनात्' 'आवर्त्तनात्पर' इति शब्दस्वरसात् 'आवर्त्तनात्तु पूर्वाह्ण' इति ग्रन्थस्थवाक्यमपि यौगिकार्थानुवादो, न तु परिभाषा । येन तद्बलात्तत्रापराह्णो द्वेधाविभक्तादिनापरभागो भवेत् । तस्माद् दिनसन्धौ परदिने पञ्चधाविभक्तादिनचतुर्थभागरूपसकलापराह्णव्यापिद्वितीयासत्त्वे चतुर्दश्यामन्वाधानं, सन्धिदिने याग इति । 'पर्वणोऽशे तृतीये तु'इत्यादिवचनमयं चात्रानुकूलमेव । *न क्वापीति । तस्य पर्वद्वयेऽपि चतुर्दश्यामन्वाधानकालत्वबाध इत्यभिमानः । *यच्चेति । चन्द्रदर्शननिषेधबाधापत्तिरित्यभिमानः ।तृतीयेति पूरणप्रत्ययसङ्गत्यर्थमाह—*आवर्त्तनोर्ध्वमिति । पौर्णमास्यामेव वाजसनेयिनामेव एतद्वाक्येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

येत्यर्थः। *तत्कर्कभाष्य-देवजानी-श्रीअनन्तभाष्यादि-सकलतच्छाखीयग्रन्थविरोधाद् *वृद्धानादराद्यापेक्षयम्।

पौर्णमास्यां विशेषमाह कात्यायनः—

*सन्धिश्चेत्सङ्गवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः।
सा पौर्णमासी विज्ञेया सद्यस्कालविधौ नरैः॥

अमायां विशेषमाह बौधायनः—

पूर्वाह्णसन्धिशास्त्रं सद्यस्कालत्वं चापोद्यते परेद्युः प्रतिपत्तृतीयांशरूप-यागकाललाभादिति भावः। माधवादिमतं दूषयति-*तदिति। वाजसनेयिनामपि पौर्णमास्यां तद्याज्ञिकग्रन्थेषु आवर्त्तनात्प्राक् सन्धौ तद्दिन एव यागोक्तेरिति भावः। कर्कभाष्येत्यादिसकल-वाजसनेयियाज्ञिकग्रन्थोपादानं माधवादिवचसां निर्मूलत्वव्यञ्जकम्। समूलत्वेऽप्याह-*वृद्धेति। इदानींतनाचारस्तु अनादेय इति भावः। विवेचनकृतस्तु "मध्यंदिनात्स्यादहनीह यस्मिन्" इति भाष्यार्थसंग्रहवाक्यम् आवर्त्तनादूर्द्ध्वमस्तात्पूर्वं समाप्ता पौर्णमासी प्रथमा खार्विका, सूर्यास्तोत्तरं समाप्ता द्वितीया, आवर्तनात्पूर्वं समाप्ता तृतीया। सर्वाऽपि अल्पत्वात् खार्विकेत्युच्यते। अयं च वाजसनेयिनां संधिशास्त्रप्राप्तनिर्णयस्य सद्यस्कालत्वस्य चापवादः। तृतीयखार्विकायां वाजसनेयिभिन्नानां यागः। वाजसनेयिनां तु पूर्वेद्युरन्वाधानं, परेद्युर्यागः। स च परेद्युस्तृतीयांशलाभे, न तु चतुर्थांशलाभे; तस्यापराह्णसंधावेव यागकालत्वात् इति समर्थयन्ते। *संधिश्चेदिति। एतच्च वैकल्पिकम्-

अन्वाहितिश्चास्तरणोपवासौ पूर्वेद्युरेते खलु पौर्णमास्याम्।
आवर्त्तनात्प्राक् यदि पर्वसंधिः सद्यस्तदा वा क्रियते समस्तम्॥

इति संग्रहवचनादिति विवेचने। सद्यस्तदैवेति पाठान्न विकल्प इति मयूखाद्याशयः। *परत इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्यापराह्णिकी ।
अन्वाधानं चतुर्दश्यां *परतः सोमदर्शनात् ॥

कात्यायनश्च—

*यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते ।
तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद् द्विजातये॥इति ।

एतच्च*बौधायनवाजसनेयिविषयम् ।

*तैत्तिरीयश्रुतौ तु चन्द्रदर्शनेऽपि याग उक्तः-
'एषा वै सुमनानामेष्टिर्यमद्येजानं पश्चाच्चन्द्रमा

अर्वागस्तमयाद् यत्र द्वितीया तु प्रदृश्यते ।
तत्र यागं न कुर्वीत विश्वेदेवाः पराङ्मुखाः ॥

इति तत्र यागनिषेधात् । द्वितीया च त्रिमुहूर्ता वाक्यान्तरात् । यतो विश्वेदेवाः पराङ्मुखा अतस्तत्र यागं न कुर्वीतेत्यर्थः । तर्हि तत्र क्व याग इत्यत्राह-परत इति । तत्र यागनिषेधादित्यर्थः । वसिष्ठः—

आदित्येऽस्तमिते चन्द्रः प्रक्षीण उदियाद्यदि ।
प्रतिपद्यतिपत्तिः स्यात्पञ्चदश्यां यजेत्तदा ॥

अस्तमिते=अस्तमयप्रत्यासन्ने। अतिपत्तिः=अननुष्ठानम् । चन्द्रदर्शनदिने यागकरणे प्रायश्चित्तमाह-*यजनीये इति । वारुणीसोमदर्शनवदहश्चेत् यजनीयं=यागसम्बन्धि मोहाच्चेत् तत्र यजेतेति यावत् । अत्र चेच्छब्दोपजनितं निमित्तत्वं विशेषणं यागे एव 'हविरार्त्तिमार्च्छेत्'इत्यत्र हविश्चेदार्त्तिप्राप्तिमत् स्यादित्यत्रार्त्तावेव । एतेन दर्शनस्य चेच्छब्देन न निमित्तत्वमायाति तस्यानिषिद्धत्वात् । निर्निमित्तकस्य व्याहृतिहोमादेर्यागाङ्गतापत्त्या तत्र यागो दुर्वार इत्यपास्तम् । तस्य यागनिमित्तकतया तद्वैगुण्यपरिहारार्थतया यागाङ्गत्वाभावात् । *बौधायनेति । बौधायनवाक्यात् कात्यायनवाक्याच्चेति शेषः । तैत्तिरीयाश्वलायनयोश्चन्द्रदर्शनदिनेऽपि यागं ध्वनयन्नाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्युदेत्यस्मिन्नेवास्मै लोकेर्धुकं भवति' इति । *श्रुत्यन्तरेऽपि—'यदहः पश्चाच्चन्द्रमा अभ्युदेति तदहर्यजमानाँल्लोकानभ्युदेति' इति । इदं बह्वृचापस्तम्बविषयम् । मदनरत्नेऽप्येवम् । *आपस्तम्बभाष्यार्थसङ्ग्रहेऽप्येवम् । *अतः पक्षद्वयस्य स्वस्वसूत्राद्व्यवस्थेति तत्त्वम् । *'दूयन्त्याश्वलायनाः' इति तु *पूर्वाह्णसन्धिविषयमिति माधवः ।

---

*तैत्तिरीयेति । *श्रुत्यन्तरे=ऐतरेयब्राह्मणे । *आपस्तम्बेति । तत्र च कारिकाः ।

अपराह्णेऽथ वा रात्रौ यदि पर्व समाप्यते ।
उपोष्या तत्र राका स्यात् सा पूर्णोत्सर्पिलक्षणा ॥
पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते ।
उपोष्याऽनुमतिस्तत्र सा श्वःपूरितलक्षणा ॥
अपराह्णे क्षपायां वा यदि पर्व समाप्यते ।
उपोष्या तु कुहूस्तत्र यदहर्नेति लक्षणा ॥
पूर्वाह्णे वाऽथ मध्याह्ने पर्वसन्धिर्यदा भवेत् ।
तत्रोपोष्या सिनीवाली श्वो न द्रष्टारलक्षणा ॥ इति ।

पौर्णमासीवदेवामावास्यानिर्णयकरणादेतन्मते चन्द्रदर्शनेऽपि अमावास्यायां न निषेध इति ज्ञायते । *अत इति । तैत्तिरीयब्राह्मणादेर्विधित्वोपगमाच्चन्द्रदर्शनादिने यागनिषेध आश्वलायनापस्तम्बाभिन्नविषय इति भावः । नन्वन्वाधानेऽपि "यदहस्सेव चन्द्रमा न दृश्येत तामामावास्यां कुर्वीत" इति चन्द्रदर्शनस्य पर्युदस्तत्वात्कथं तत्र तदनुष्ठानम् ? । सत्यम् । द्वयोरपि चन्द्रदर्शनरहितं दिनमपेक्षितम् । अखण्डपर्वणि पूर्णायां प्रतिपदि च तत्संभवति । यदा त्वेकस्मिन्नेव दिने चन्द्रादर्शनं तदा द्वयोः स्वकालत्वासम्भवादङ्गगुणविरोधन्यायेन चन्द्रादर्शनादिने यागः, पूर्वस्मिंश्चन्द्रदर्शनादिने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषपर्वणीष्टौ विशेषमाह माधवीये गार्ग्यः—
प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते ।
पुनः प्रणीय कृत्स्नेष्टिः *कर्तव्या यागवित्तमैः ॥
*गृह्याग्नेर्नायं नियम इति मदनपारिजातः । *एवं

चान्वाधानं कार्यम् । 'दृश्यमानेऽप्येके" इति गोभिलोक्तेः । "तद्वैके दृष्ट्वोपवसन्ति" इति श्रुतेश्च । एके दृष्ट्वोपवसन्ति तदयुक्तमिति तदर्थः । "एके" इति न पाक्षिकाभिप्रायं, किं तु परदिने यागानुष्ठानाभिप्रायम् । तस्मात् "यदैवैनं न पुरस्तान्न पश्चात्पश्येत्तर्ह्येवोपवसेत्" इति श्रुतिश्च पर्वप्रतिपदोः पूर्णताविषयिकेति ।

नवीनास्तु तैत्तिरीयादिश्रुतिश्चन्द्रदर्शने प्रत्यक्षतो न यागं विधत्ते किं तु स्तौति । स्तुत्या तु न विधिः कल्पयितुं शक्यते । चन्द्रादर्शने यागविधायकप्रत्यक्षश्रुतिविरोधात् । स्तुतिश्च तादृशप्रत्यक्षविधिशेषतयैव अतिप्रशस्तमपि चन्द्रदर्शनादिनं चन्द्रादर्शनदिनाद् हीनमेवेति पयोविधिशेषतया जातिलिंगवेधुकस्तुतिवत् । अस्तु वा विधिः, परं तु रात्रिसन्धौ श्वोभूते चन्द्रदर्शनादिने याग इति तद्विषयक इत्याहुः ।

प्रकृतमनुसराम्यः—ननु चन्द्रदर्शनेऽपि यागानुष्ठाने ।
द्वितीयासहितं यस्माद् दूषयन्त्याश्वालायनाः ॥

इत्यसङ्गतं स्यादित्यत्राह—*दूषयन्तीति । *पूर्वाह्णेति । आवर्त्तने तत्पूर्वसन्ध्योस्तौ विहाय परेद्युः पूर्वचतुर्थांशे याग इदमित्यर्थः । न त्वपराण्हसन्धौ परेद्युर्याग दोष इति भावः । इष्टौ समाप्तायां विशेषं प्रायश्चित्तं—प्रणीय अग्निम् । *कर्त्तव्येति । एतद्भयेन ब्राह्मणभोजनादिः कश्चन पदार्थः प्रतिपदि कार्य इति रहस्यमनुसन्धेयम् । ततो माध्यान्हिकाद्युपक्रम इति स्मर्त्तव्यम् । *गृह्याग्नेरिति । इष्टिपदस्वारस्यात् । अत्रेयमरुचिः—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्वान्त्यांशः प्रतिपदश्च त्रयोंऽशा यागकाल उक्तः। *क्वचित्प्रतिपत्तुर्यांशेऽपि यागः।

सन्धिर्यद्यपराह्णे स्याद्यागं प्रातः परेऽहनि।
कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दुष्यति॥

इति वृद्धशातातपोक्तेः। *एतत् पूर्णिमापर्वमिति मदनरत्ने। पर्वणि प्रतिपदः क्षयस्य वृद्धेश्चाप्रक्षिप्य संधिर्ज्ञेयः। तदाह माधवः-

वृद्धिः प्रतिपदो याऽस्ति तदर्धं पर्वणि क्षिपेत्।

पक्षादावेव कुर्वीत सदा पक्षादिकं चरुम्।
पूर्वाह्ण एव कुर्वन्ति विद्धेऽप्यन्ये मनीषिणः॥

इति परिशिष्टे पक्षादिप्रतीक्षाविरोधात्। विद्धे=दर्शविद्धे। *एवमित्यादि। एतेनैतदुक्तं भवति-पूर्णिमाऽमावास्ययोर्मध्यात्तत्पूर्वं वा सन्धौ सन्धिशास्त्रमेव निर्णायकं, दिनद्वये प्रातर्नियमविषययागकालसत्त्वेन तच्छास्त्रस्यौदासीन्यात्। एवमावर्त्तनविप्रकृष्टापराह्णसन्धावपि तदेव निर्णायकम्। द्वितीयादिनेऽपि प्रातर्नियमविषयप्रतिपत्तृतीयांशरूपयागकालसत्त्वेन तच्छास्त्रस्यौदासीन्यादिति। नन्वेवमावर्त्तनसन्निकृष्टापराह्णसन्धौ परेद्युर्वृद्ध्यभावेन न प्रतिपत्तृतीयांशः किं तु तच्चतुर्थांशस्तत्र कथं सन्धिशास्त्रं प्रवर्त्तेत ?। परेद्युर्नियमविषयप्रातःकालाभावात्,

न यष्टव्यं चतुर्थांशे यागैः प्रतिपदि क्वचित्।

इति निषेधाच्च। न च तत्र पूर्वेद्युरेवास्तु यागः तस्य नियमविषयत्वाद् दर्शितनिषेधागोचरत्वाच्चेति वाच्यम्। संधिशास्त्रविरोधादिति इत्यत्राह-*क्वचिदिति। न यष्टव्यमिति न निषेधो विकल्पापत्तेः। किं तु "अयज्ञिया वै माषाश्चणकावरकाः कोद्रवाः" इति प्रतिनिधिवर्जनवद् "द्वावंशावुत्सृजेदन्त्यौ" इत्युक्तपर्युदासानुवादः। नन्वेवं यत्र परदिने चन्द्रदर्शनं तत्र परदिने यागापत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्षयस्यार्धं तथा क्षिप्त्वा संधिर्निर्णीयतां सदा ॥ इति ।
कात्यायनोऽपि—
*परेऽह्नि घटिका न्यूनास्तथैवाभ्यधिकाश्च याः ।
तदर्धकल्पत्या पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत् ॥ इति ।
एवं स्मार्तस्थालीपाकेऽपि ज्ञेयम् । तत्रेष्टिस्थाली-
पाकाधानगृहप्रवेशनीयहोमानन्तरभाविन्यां पौर्णमा-
स्यां प्रारम्भणीयौ न तु दर्शे । यद्यारम्भे मलमासपौष-
मासगुरुशुक्रास्तादि भवति तदाप्यारम्भः कार्यः ।
यानि तु—
उपरागोऽधिमासश्च यदि प्रथमपर्वणि ।
तथा मलिम्लुचे पौषे नान्वारम्भणमिष्यते ॥
गुरुभार्गवयोर्मौढ्ये चन्द्रसूर्यग्रहे तथा ॥
इति संग्रहवचनानि, तानि आलस्यादिनाऽतिक्रान्त-
शुद्धकालप्रारम्भविषयाणि ।

न दुष्यतीत्युक्तेरत आह—*एतदिति । अपराह्णसंधौ वृद्ध्यादिना
रादिने चन्द्रदर्शनासत्त्वे तु अमायामपि प्रतिपच्चतुर्थांशे याग इति
वर्तव्यम् । *परेऽह्नीति । विवृतं चैतत् "वृद्धिः प्रतिपदो याऽस्ति"
ति माधवेन । यत्र चतुर्दशी दशदण्डा, पर्व पञ्चदशदण्डं, प्रतिपत्तु
एकोनविंशतिदण्डा, तत्र प्रतिपद्वृद्धेरर्द्धं दण्डद्वयं पर्वणि क्षिपेत् ।
अथ सप्तदशदण्डा संधिः । एवं यत्र चतुर्दशी पञ्चविंशतिदण्डा, पर्व
एकोनविंशतिदण्डं, प्रतिपच्चतुर्दशदण्डा तत्र प्रतिपद्ध्रासार्धं सार्ध-
दण्डद्वयं पर्वणि क्षिपेदित्यर्थः । अत्र लौगाक्षिः—
तिथेः परस्ताद् घटिकास्तु या स्यु-
र्न्यूनास्तथैवाभ्यधिकास्तु तासाम् ।
अर्द्धं वियोज्यं च तथा प्रयोज्यं
ह्रासे च वृद्धौ प्रथमे दिने तत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नामकर्म च दर्शेष्टिं यथाकालं समाचरेत् ।
अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे ॥

इत्यपरार्के गर्गवचनादिति प्रयोगपारिजाते । उक्तं चैतत् प्रयोगरत्ने भट्टैः । कालादर्शे तु-'नामकर्म च जातेष्टिम्' इति पाठः ।

*याज्ञिकास्तु—

आधानानन्तरा पौर्णमासी चेन्मलमासगा ।
तस्यामारम्भणीयादीन्न कुर्वीत कदाचन ॥

इति त्रिकाण्डमण्डनवचनाच्छुद्धकाल एव विभ्रष्टेष्टिं कृत्वाऽऽरम्भं कुर्यादित्याहुः । कालादर्शे स्मृतिसंग्रहेऽपि-

आरम्भं दर्शपूर्णेष्टयोरग्निहोत्रस्य चादिमम् ।
प्रतिष्ठाः पञ्च कूर्माद्या मलमासे विवर्जयेत् ॥ इति

अत्र चतुर्दशीतो यावत्यः पर्वघटिकाः प्रतिपदस्ततो न्यूनत्वे आधिक्ये वा ह्रासवृद्धी इति रीत्या ते अवधिसापेक्षे, न तु निरपेक्षे। घटिकान्यूनाधिकभावे ह्रासवृद्ध्योरसंभवात् । तथा च प्रथमोदाहरणे ह्रासो, द्वितीयोदाहरणे तु वृद्धिरिति । यत्तु—

षोडशेऽहन्यभीष्टेष्टिर्मध्या पञ्चदशेऽहनि ।
चतुर्दशे जघन्येष्टिः पापा सप्तदशेऽहनि ।

इति आपस्तम्बवाक्यं, तन्न प्रधानयागपरम् । पूर्वेष्टिदिनमारभ्य गणनायां वृद्धौ कदाचित् सप्तदशे दिनेऽपि यागस्य प्राप्तेस्तत्र तात्पर्यानौचित्यात् । अधिकमन्यतोऽवगन्तव्यम् । *याज्ञिकास्त्वत्यरुचिः-पुरुषापराधकृतविहितकालातिक्रमरूपनिमित्ताभावेन विभ्रष्टेष्टेरनौचित्यात् । यदीत्यादिविधेयकालगतमेकत्वं विवक्षितम् । तेनैकस्यां पौर्णमास्यामेकस्यामवास्यायां वा साङ्गप्रयोगसिद्धेः सद्यस्कालीनत्वं लभ्यते । वाशब्दोपादानात् । पौर्णमासीकालीनोपांशुयाजाग्नीषोमीयाविकाराणां पौर्णमास्यामेवावाम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ विकृतीष्टिः । तत्रापस्तम्बः-'यदीष्ट्या यदि पशुना यदि सोमेन यजेत सोऽमावास्यायां पौर्णमास्यां च' इति । *अत्र प्रकृतितः काले सिद्धेऽपि सायंकालता विधेया । तृतीयया साङ्गत्वेनोक्तेः । अत्र पौर्णमास्यमावास्याशब्दाभ्यां तदन्त्यक्षणो गृह्यते । तेन तद्वत्यहोरात्र इत्यर्थमाह रामाण्डारः । माधवोऽपि—

इष्ट्यादिविकृतिः सर्वा पर्वण्येवेति निर्णयः । इति ।

अत्र विशेषमाह त्रिकाण्डमण्डनः, कात्यायनश्च—

आवर्तनात्प्राग्यदि पर्वसन्धिः
कृत्वा तु तस्मिन्प्रकृतिं विकृत्याः ।
तदैव यागः, परतो यदि स्यात्
*तस्मिन्विकृत्याः प्रकृतेः परेद्युः ॥ इति ।

धूर्तस्वाम्यादयोऽप्येवमाहुः । *'यदीष्ट्या' इति साक्षाद्या विकृतेः पर्वकालत्वादा*वर्तनात् प्राक् सन्धौ 'स-

---

मावास्याकालीनसान्नाय्यादिविकाराणां चामावास्यायामेवेति नाव्यवस्थाप्रसङ्गः । न च वाक्यभेदः इष्टिपशुसोमेष्वनुगतस्य यागस्योद्देश्यतावच्छेदकत्वात् पौर्णमास्यमावास्ययोरनुगतस्य पर्वत्वस्य विधेयतावच्छेदकत्वात् । *अत्रेति । तथा च पर्वान्त्यक्षणवदहोरात्र इत्यर्थात् 'आवर्त्तनात् प्राक्' इति वचनमनावश्यकमित्यभिमानः । वस्तुतस्तु पौर्णमास्यमावास्याशब्दयोस्तिथिवाचिनोर्न लक्षणा युक्ता । 'न विधौ परः शब्दार्थः' इति न्यायात् । *तस्मिन्निति । प्रातःकालस्यातिदेशात् प्राप्तेस्तत्र विकृतिः, ततः प्रकृतेरुपक्रमः, तस्यां चाङ्गत्वात्प्रातःकालबाधः । आवर्त्तनादितिवाक्यस्य याज्ञिकसंप्रदायेनार्थं सूचयित्वा मीमांसकसंप्रदायेनार्थमाह—*यदीष्ट्येति । *आवर्त्तनात्प्राक् सन्धाविति । अयं भावः-आवर्तनात्प्राक् सन्धेः प्रकृत्यधिकरणतया पर्वणो विकृत्यधिकर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्धिमभितो यजेत'इति*प्रकृतेः प्रतिपदि समाप्तिनियमात्। प्रकृत्यनन्तरं प्रतिपदि विकृत्ययोगात् पूर्वेद्युर्विकृतिरित्युक्तं तन्त्ररत्ने पार्थसारथिना। यच्चि *'प्रकृतेः पूर्वत्वादपूर्वमन्ते स्यात्'इत्यापस्तम्बेनोक्तम्,

---

णत्वश्रुतेः,

कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः।

इति स्मृतेश्च प्रकृतिविकृतिपर्याप्तपर्वसत्त्वेन तद्दिन एवोभयोः कर्त्तव्यत्वसिद्धौ क्रमाकाङ्क्षायां पूर्वार्द्धेन क्रमो विधीयते, न त्वेतत्प्रयोगद्वयाव्यापिपर्वसत्त्वे प्रवर्त्तते; श्रुतपर्वाधिकरणत्वबाधापत्तेः। किं तु तत्रावर्तनप्राक्सन्धावपि पूर्वदिन एव विकृतिः,सन्धिदिने तु प्रकृतिमात्रमिति। *प्रकृतेरिति। न च प्रयोगद्वयाव्यापिपर्वण्यपि "कृत्वा तु तस्मिन् प्रकृतिं विकृत्याः" इति प्रकृतिसमाप्त्यनन्तरं विकृतेः कर्त्तव्यत्वावगमात् प्रतिपदधिकरणकप्रकृत्यन्त्यपदार्थोत्तरं विकृतिरस्तु, न तु ततः प्रागिति वाच्यम्। श्रुतपर्वाधिकरणत्वबाधापत्तेः। तदुक्तं-'प्रतिपदि विकृत्ययोगात्'इति। वस्तुतस्त्वन्त्यपदार्थव्यतिरिक्ताया एव प्रकृतेः पर्वाधिकरणकत्वेन विकृत्येककालत्वात्तादृश्या एव क्रमविधिराकाङ्क्षितः। न च प्रकृतेः प्रतिपदि समाप्तिनियमात्तन्मध्ये कथं विकृतिः?, 'न कर्मणि कर्मारम्भा'इत्युक्तेरिति वाच्यम्। न हि न कर्मणीत्यत्र श्रुतिर्मूलं, किं तु प्रयोगप्राशुभावभङ्गप्रसङ्गः। स चात्र प्रतिपत्प्रतीक्षया विकृत्यननुष्ठानेऽप्यावश्यकः। अन्यथा दर्शस्य पौर्णमासस्य वा प्रयोगस्य मध्येऽग्निहोत्रस्यानुष्ठानं न स्यात्, न स्याच्चान्ततः पर्वद्वयसाध्यतन्महाप्रयोगमध्ये काम्यादीनामन्येषामपि कर्मणाम्। तस्मात्प्रयोगद्वयव्यापिपर्वणि तादृशप्रकृतिविकृत्योरेवायं क्रमविधिर्नान्यत्रेति भावः। *प्रकृतेरिति। तथा चावर्त्तनपूर्वसन्धावपि प्रकृत्यनन्तरं वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाऽपि हेतुवादेन श्रुतिमूलत्वाभावादङ्गं* वा सम-
भिव्याहारादितिवदप्रामाण्यमिति तदाशयः । आग्र-
यणे तु विशेषं वक्ष्यामः । 'अन्वारम्भणीया तु चतुर्दश्यां
लार्या' इति हिरण्यकेशिवृत्तौ मातृदत्तीये । *अन्येषां
पर्वण्येव ।

पशौ सोमे च कालान्तरमप्याह बौधायनः—'अ-
मावास्येन वा हविषेष्ट्वा नक्षत्रे वा' इति । शुक्लपक्षे कृत्ति-
कादिविशाखान्तेषु देवनक्षत्रेष्विति केशवस्वामी
व्याचख्यौ । चातुर्मास्येष्वपि *द्वादशाहयथाप्रयोगपक्ष-
पौर्णक्षत्रेष्वप्यारम्भः । यावज्जीवसांवत्सरप्रयोगयोस्तु
फाल्गुन्यां चैत्र्यां वाऽऽरम्भः । पशौ तु विशेषमाह-
कात्यायनः—

अर्धादह्नो भवति नियतं पर्वसन्धिः परस्तात्
कृत्वा तस्मिन्नहनि तु पशुं सद्य एव त्र्यहं वा ।

क्रत्वनुष्ठानमित्यभिमानः । *अङ्गं वेति । "पितृयज्ञः स्वकालविधा-
नादनङ्गं स्यात्"(जै० सू० ४ । ४ । १९)इति सिद्धान्तसूत्रात् ।
*अन्येषामिति । नित्यक्रत्वर्थत्वेन प्रधानपरतन्त्रत्वात् । तदवि-
रोधेन पर्वापेक्षणात् । गृहदाहेष्ट्यादीनां तु निमित्तानन्तरमनुष्ठाने च
नपर्वापेक्षा । तदसम्भवे तु जातेष्टिवत् । जातेष्टिश्च शेषविरोधेन नि-
मित्तानन्तरमसम्भवादुचितकालप्रतीक्षायां पितुर्मातुश्च दशविंश-
तिरात्रातिक्रमे पर्वणि अनुष्ठेया । हविर्दोषादिनिमित्तकक्रत्वर्थे-
ष्टयस्तु स्विष्टकृदनन्तरं समिष्टयजुषः प्राङ् निमित्तस्मृतौ तन्त्र-
मुपजीव्य निर्वापप्रभृति तदानीमेव, समिष्टयजुषोऽनन्तरं स्मरणे
तु तत्प्रयोगं समाप्येति । *द्वादशाहेति । आद्येऽहि वैश्वदेवं
पर्व, चतुर्थे वरुणप्रघासम्, अष्टमनवमयोः साकमेधं, द्वादशे शुना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आरभ्याऽथ प्रकृतिरथ चेत्पर्वसन्धिः पुरस्तात्
कृत्वा तस्मिन् प्रकृतिमथ तु स्यात्पशुः सद्य एव ॥
'अधिकारपशुस्त्वग्नीषोमीयेण सवनीयेन वा समानतन्त्रः कार्यः' इति त्रिकाण्डमण्डनः ।

सोमे त्वाहाऽऽपस्तम्बः-'अमावास्यायां दीक्षापजनीये वाऽमावास्यायां *यजनीये वा सुत्यमहः, पौर्णमास्यां दीक्षायजनीये वा पौर्णमास्यां यजनीये वा सुत्यमहः'इति । लाट्यायनसूत्रेऽपि-'पूर्वपक्षस्य प्रथमेऽहनि दीक्षेत दृष्ट्वा वा नक्षत्रयोगम्(१)'इति । पूर्वपक्षः=शुक्लपक्षः । नक्षत्रयोगे चेति । अयमर्थः-चैत्र्यादिपूर्णिमायाश्चित्रादिनक्षत्रयोगे दीक्षेतेति । आधानं तु पर्वणि नक्षत्रेषु चोक्तम् । तत्र पर्व 'नक्तं गार्हपत्यमादधाति'इत्यादिकर्मकालव्यापि ग्राह्यम् । दिनद्वये तत्त्वे परं ग्राह्यम् । सङ्कल्पस्य पर्वणि लाभात् । पूर्वनक्षत्रयोगे तदेव ग्राह्यम् । 'यत्र त्रीणि सन्निपतितान्यृतुर्नक्षत्रं

सीरीयमित्येकः पक्षः । क्रमेण पर्वचतुष्टयमिति द्वितीयः । फाल्गुन्या पौर्णमास्यामारभ्य चतुर्षु मासेषु क्रमेणैकैकं पर्वेत्येवं यावज्जीवमिति तृतीयः । एकवर्षं तथा कृत्वा सवनेष्टिपशुसोमान्यतमेन यजेदिति तुरीयः । एकाहचातुर्मास्यप्रयोगोऽपि शाङ्खायनेनोक्तः-'अपि वाऽप्येकपर्वणि'इति । *यजनीये वेति । यदीष्ट्येत्यादिवाक्यगतामावास्यादिपदस्य संधिमदहोरात्रवाचित्वमिति याज्ञिकमते आवर्त्तनतत्पूर्वसंध्योस्तत्रैव । तथा च त्रिकाण्डमण्डनः-

खण्डपर्वणि सोमश्चेत्प्रतिपन्मिश्रपर्वणि ।
सोमसुत्या प्रयोक्तव्येत्याह कौषीतकी श्रुतिः ॥ इति ।

मीमांसकमते तु पूर्वेद्युः तिथेरेवाङ्गत्वेन विधानात्तस्याश्च प्रोक्त-

---

(१) मुम्बापुरीस्थमुद्रितपुस्तके 'नक्षत्रयोगे च' इति पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वं च, तत्समृद्धं, विप्रतिषेधे ऋतुर्नक्षत्रं च बलीयः' इति हिरण्यकेशिसूत्रात् । ऋतुः 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिः । रेणुककारिकायां तु—

माघादिपञ्चमासेषु श्रावणे चाश्विने तथा ।
मार्गशीर्षे शुक्लपक्षे आधानमथ कारयेत ॥

इत्युक्तम् । अत्र मूलं मृग्यम् । आधाननक्षत्राणि आपस्तम्बसूत्रे 'कृत्तिका-रोहिणी-मृगशीर्ष-पुनर्वसु-पूर्वोत्तरा फाल्गुनी-हस्त-चित्रा-विशाखा-ऽनुराधा-श्रवणो-त्तराभाद्रपदा' इति । सोमपूर्वाधाने विशेषमाहाऽऽपस्तम्बः—'सोमेन यक्ष्यमाण आदधानो नर्तूनृक्षेन्न नक्षत्रम्' इति । अत्र प्रकरणादा*धानकालबाधः । *तेन सोमस्य वसन्तकालता न बाध्यते' इति रुद्रदत्तवृत्तौ नारायणवृत्तौ चोक्तम् । *तन्त्ररत्ने वार्तिके च-'ते वा एते उभये अपहतपाप्मानो ऋतवः । एष वा उद्यन्नादित्य एषां पाप्मनोऽपहन्ता । यदैवैनं कदाचन यज्ञ उपनमेदथादधीत' इत्यत्रोत्तरायणरूपं दैवं, दक्षिणायनरूपं च पित्र्यमित्युभयमृतुत्रयं सोमाधाने शतपथे विशिष्य विहितम् । तदेकवाक्यतया शाखान्तरेऽपि 'नर्तूनृक्षेत्' इत्यत्र सोमकालबाध एव । आधानकालबाध-

---

पिपूर्वेयुरेव भूयः प्रयोगैकदेशव्याप्तेरिति । *आधानकालः=पर्वनक्षत्रादिः । ननु ऋतुनियमो रुद्रदत्तादिभिराश्रित इत्यत्राह—*तेनेति । मीमांसकानामपि ऋत्वनियमः सम्मत इत्याह—*तन्त्ररत्ने चेति । तत्र हि 'ते वा एते अपहतपाप्मान ऋतवः । एष वा उद्यन्नादित्य एषां पाप्मनोऽपहन्ता, यदैवैनं कदाचन यज्ञ उपनमेदथादधीत' इति शतपथे उत्तरायणरूपं दैवं, दक्षिणायनरूपं पित्र्यमित्युभयमृतुत्रयमपहतपाप्मत्वं परीक्ष्याङ्गतया सोमाधाने विहितम् । तदेकवाक्यतया शाखा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्य 'यदैवैनं श्रद्धोपनमेत्तदादधीत' इति तस्यां शाखायां वाक्यान्तरेण सिद्धत्वात्सोमकालबाधार्थमेवेदमित्युक्तम् धूर्तस्वामी तु सोमस्यापि य ऋतुस्तस्यापि 'न सूर्क्षेत'इति लिखनादुभयकालबाधं मन्यते। श्रीरामाण्डारस्तु काला-

---

न्तरेऽपि 'न ऋतून् सूर्क्षेत्'इत्यादौ सोमकालबाधः। 'यदैवैनं श्रद्धोपनमेदथादधीत'इति तच्छाखास्थवाक्यान्तरेणाधानकालबाधस्य सिद्धत्वादेतस्य सोमकालबाधार्थत्वमिति। दिगर्थस्तु उदगयनात् प्राशस्त्यमात्रम्। न चाग्निहोत्रं दर्शपूर्णमासावप्युत्तरायणे

उपक्रम्य यथाकालमुपासीरन् द्विजातयः।
सोमं च पशुबन्धं च सर्वाश्च विकृतीरपि॥
सौम्यायने यथाकालं विदध्युर्गृहमेधिनः॥

इतिवचनादुदगयननियम इति वाच्यम्। तद्यथा पशौ काम्यपक्षे अन्यथा 'पशुः प्रत्ययनं तथा'इत्यनेन विरोधात्; तथा सोमांशेऽपि तत्सहचारात्। अत एवाग्निहोत्रादिकमपि काम्यमेव,न तु नित्यमपि। ब्राह्मणाधिकारिकस्य तस्य नित्यप्राप्तत्वात्, वैश्याद्यधिकारिकस्य च यावज्जीवश्रुत्याऽनन्तरसायङ्कालादावेव प्राप्तेर्बाधात्। उपक्रम्येति तु द्वितीयादिप्रयोगेऽनियमार्थम्। केचित्तु आधानानन्तर्यमनपेक्ष्यापि सर्वसोमानुष्ठाने कालबाधमाहुः। 'वसन्ते ब्राह्मणोऽग्निमादधीत'इति सूत्रोत्तरं 'कृत्तिकास्वादधीत'इति सूत्रम्। तथा च विकल्पः,न तु समुच्चयः। तथा सति 'वसन्ते कृत्तिकास्वादधीत'इत्येव सूत्रयेत्। एवं सोमेऽपि ऋतुनक्षत्रयोर्विकल्प इति श्रीकुमारः। 'सोमेन यक्ष्यमाणो नर्तून् सूर्क्षेन्न नक्षत्रमिति, तदेतस्यार्तस्यातिवेलं वा श्रद्धायुक्तस्य'इति सूत्रम्, तदार्तस्येव विशिष्टश्रद्धालोरप्यधिकारार्थं वाशब्दात्। तत्र केवलाधानेऽपि ऋतोर्नादरः 'यदहरेव विरजेत्' इतिवत् 'यदैवैनं श्रद्धोपनमेदथादधीत'इति श्रुतौ यदैवैनमित्युक्तेः श्रद्धायाः सामान्यतोऽङ्गत्वेऽपि इहाधिकारितावच्छेदकत्वं 'यदेव श्रद्धया करोति'इत्यादा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरविधानं वा सर्वकालानादरो वेति पक्षद्वयमुक्तवान् । तत्राद्ये कृत्तिकादिकालान्तरस्य यथा आधाने वसन्ता-दयबाधेन विधानम्, तथा 'सोमेऽप्युदगयनपूर्वपक्षपु-रोडाहसन्निपाते यज्ञकालो नादेशः' इति च्छन्दोगसूत्रो-क्तोदगयनाबाधेन सोमाभिसन्धिरूपकालान्तरविधानादु-दगयनं त्वपेक्ष्यत इत्युक्तम् । द्वितीयपक्षे तु 'यदैवैनं यज्ञ उपनमेत्' इति सर्वकालानादर उक्त इति भारद्वा-जसूत्रात्सर्वशब्दस्य च विश्वजित्सर्वपृष्ठइतिवद्बहुयो-गप्रयोगात् सर्वकालबाध इति । तेन दक्षिणायनेऽपि भवतीत्युक्तम् । षड्गुरुभाष्ये देवत्रातभाष्ये तन्त्ररत्ने च षट्स्वपि ऋतुषु भवतीत्युक्तमिति दिक् ॥

श्राद्धे त्वमावास्या त्रेधाविभक्तदिनतृतीयांशे यो-ऽपराह्णभागस्तद्व्यापिनी *साग्निकैर्ग्राह्या ।

तिव । आर्तस्येति तु सद्यस्कालाधानपक्षपरम् । 'तदहर्विदधीत तीर्णमास्यां सद्यस्कालम्' इति कर्मान्तसूत्रात् ।

प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा ।
कर्त्तव्याऽऽग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥
एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः ।

इति वैश्वानरी तु प्रत्याम्नायत्वात्तत्तत्कर्मकाल एव । संस्था-वाजपेयस्य तु वसन्तः कालः । आश्रयकाल एव गुणानां प्रवृत्तेः । अन्यस्य तु तस्य शरदादिरित्यन्यत्र विस्तरः । *साग्निकैरिति । अन्वाधानपिण्डपितृयज्ञश्राद्धान्येकदिने अनुष्ठातृभिरिति शेषः ।

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥

इति वचनात् । एतेषामन्वाधानादित्रयस्यैकदिनकर्त्तव्यत्वार्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*पिण्डान्वाहार्यकं श्राद्धे *क्षीणे राजनि शस्यते।

दीर्घापराह्णापेक्षणात् । एवं च तृतीयांशे योऽपराह्णभाग इत्यस्य सतिसप्तमीवशात्तृतीयांशापराह्णभागयोरैक्ये तात्पर्यं, पञ्चधाभाग स्याप्रवेशात् । *पिण्डान्वाहार्यकं=पिण्डपितृयज्ञोत्तरक्रियमाणं दार्शम् । तच्च तत्प्रख्यन्यायेन कर्मनामधेयम् ।

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥

इति मानवेन तथैव प्राप्तेः । मासानुमासिकं=मासे मासे भा वीप्सापर्यायत्वात् । तेनावश्यकर्त्तव्यतासिद्धिः । यत्तु-

पितृयज्ञं तु निर्वर्त्य तर्पणाख्यं द्विजोऽग्निमान् ।
पिण्डान्वाहार्यकं कुर्याच्छ्राद्धमिन्दुक्षये सदा ॥

इति मात्स्यं, तद्बलिदानरूपपितृयज्ञासमर्थस्यानुकल्पेन तर्पण रूपतत्परम् । न चेह—

एकमप्याशयेद्विप्रं पित्रर्थं पाञ्चयज्ञिये ।

इत्युक्तं ब्राह्मणभोजनमेव पितृयज्ञोऽस्त्विति वाच्यम् । तत्र दार्शेन प्रसङ्गसिद्धेः पृथगसत्त्वात् । न च-पिण्डाः=पितरः

तत आरभ्य पितरः पिण्डसंख्यां तु लेभिरे ।

इति मात्स्यात् । तेषामन्वाहार्यं=तत्सम्बन्धिपिण्डभक्षणमिति कुतो नार्थ इति वाच्यम् । सर्वस्मृतिषु पिण्डैकदेशभक्षणविध्यदर्श नात् । अत एव—

यस्मादन्वाहृता मात्रा भक्षयन्ति द्विजातयः ।
अन्वाहार्यकमित्युक्तं तस्मात्तच्चन्द्रसंक्षये ॥

इति मात्स्यम् ।

पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्वशः ।
तानेव विप्रानासीनान्विधिवत्पूर्वमाशयेत् ॥

इति मनूक्तप्रकारविशेषानुष्ठातृपरमित्युक्तमाकरे । *क्षीण इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वासरस्य तृतीयांशे*नातिसन्ध्यासमीपतः ॥
इति कात्यायनोक्तेः ।
*दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितम् ।
अपराह्णे पितॄणां च तत्र दानं प्रशस्यते ॥
इति शातातपोक्तेश्च । *दिनद्वये तत्र सत्त्वे सर्वा-
पराह्णव्यापी दर्शो ग्राह्यः । 'यद्युभयेद्युरेव विहितः सर्वा-
ऽपराह्णस्थितः' इति दीपिकोक्तेः ।

चन्द्रक्षयकालः प्रशस्तः । क्षयोऽग्रे । *नातीति ।
सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेत् ।
राक्षसी नाम सा प्रोक्ता गर्हिता सर्वकर्मसु ॥
इति निषेधात् । ततश्चैकादशद्वादशमुहूर्तयोरेव पिण्डान्वाहार्यं तीव्र-
प्रयत्ने पितृयज्ञं कृत्वा श्राद्धोपक्रमात् । शिथिलप्रकृतेस्तु तत्पूर्वभावि-
दशममुहूर्तेऽपि तदुपक्रम इत्याशयेनाह—*दर्शेति । अपराह्णः पञ्चधा-
विभक्तदिनचतुर्थो भागः । वस्तुतस्तु पितृयज्ञादित्रयानुष्ठानार्थं
त्रिभसृतीयभागरूपापराह्णोऽपेक्षितः । तत्रान्त्यमुहूर्त एव नाती-
त्यनेन पर्युदस्यते । सायाह्न इति वाक्यं त्वीदृशविषये हेय-
एव । एवं च दशममुहूर्तादिरपराह्ण इत्यसंगतमिति दिक् ।
यत्रोक्तदीर्घापराह्णे न षट्पक्षाः त्रिमुहूर्त्ताधिकक्षयवृद्ध्योरभावेन
कृत्स्नकालव्याप्तितदस्पर्शपक्षयोरसंभवात्, किं तु चत्वार एव ।
तत्रैकस्मिन् दिने कार्त्स्न्येन व्याप्तिर्द्विविधा—तदितरदिनेऽपराह्ण-
स्पर्शेन तदस्पर्शेन च । उभयथापि द्विधा-पूर्वेद्युरेव कृत्स्न-
व्याप्तेः, परेद्युरेव वा । तत्र या पूर्वेद्युरेव कृत्स्नकर्मकालव्यापिनी
उत्तरदिने तदेकदेशमपि न स्पृशति सा पूर्वैवासंदेहात् । या च
पूर्वेद्युरेव कृत्स्नकर्मकालव्यापिनी उत्तरदिने तदेकदेशं स्पृशति, सा
द्विधा-परदिने चन्द्रस्य दर्शनात्, तददर्शनाद्वा । तत्राद्यामभिप्रेत्याह—
*दिनद्वये इति । अन्त्यायां तु परदिने चन्द्रादर्शनात् प्रतिपद्येव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*यत्तु कार्ष्णाजिनिः—

भूताविद्धाममावास्यां मोहादज्ञानतोऽपि वा।
श्राद्धकर्मणि ये कुर्युस्तेषामायुः प्रहीयते ॥ इति।

तदपराह्णे* चतुर्दशीवेधपरमिति श्राद्धहेमाद्रिः। *अपराह्णाव्याप्तिपरमिति माधवः। *दिनद्वयेऽपराह्णव्या-

---

यागस्तदाऽन्वाधानानुरोधेन श्राद्धमप्येकदेशव्याप्तिदिन एव कार्यम्, त्रयाणामेककालत्वनियमात्। तथा हि—'पक्षान्ता उपवस्तव्याः' इत्याद्युपक्रमकं "यदहस्त्वेव चद्रमा न दृश्यते ताममावास्यां कुर्वीत" 'गताध्वा भवति" इति सूत्रद्वयम्।

संमिश्रा या चतुर्दश्या अमावास्या भवेत् क्वचित्।
खर्विकां तां विदुः केचिद् गताध्वामिति चापरे ॥

इति गताध्वालक्षणम्। तत्राद्यस्य दर्शाङ्गभूतोपवासपरत्वे तदधिकारिकश्राद्धविषयत्वमिति गोभिलगृह्यभाष्यकारादयः। या तु उत्तरेद्युरेव कृत्स्नकर्मकालव्यापिनी पूर्वेद्युस्तदस्पर्शिनी सोत्तरैव, उत्तरस्यां कालव्याप्तिलाभात्। पूर्वेद्युरेकदेशस्पर्शस्याप्यभावात्, अहिदर्शप्रवेशाभावाच्च। या तु तादृशी पूर्वेद्युरेकदेशस्पर्शिनी तामप्युत्तरां छलतो दर्शयति—*यत्त्विति। *अपराह्णे इति। एतेन पूर्वेद्युरेकदेशस्पर्श उक्तः। एवं च तत्रोत्तरा कार्या उत्तरदिने प्रातिपत्प्रवेशाभावेन यागासंभवात्। अन्वाधानादेरेव तत्रानुष्ठातुमुचितत्वात्।

वर्द्धमानाममावास्यां लक्षयेदपरेऽहनि।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ॥

इति परिशिष्टाच्च। *अपराह्णाव्याप्तीति। तन्मते पञ्चधाविभक्तदिनचतुर्थो भागोऽपराह्णः। तद्व्याप्त्या च निर्णयः। तत्र पूर्वद्युरेव तद्व्याप्तौ सैव ग्राह्या। कर्मकालशास्त्रात्। तस्याश्च निषेद्धुमशक्यत्वात्। अतस्तदभावपरमित्यर्थः। अपराह्णव्याप्ति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्त्यभावेंऽशतो व्याप्तौ च तिथिक्षये पूर्वेति हेमाद्रिः ।

*यदा चतुर्दशी यामं तुरीयमनुपूरयेत् ।
अमावास्या *क्षीयमाणा तदैव श्राद्धमिष्यते ॥

इति कात्यायनोक्तः ।

चतुर्दश्याश्चतुर्थं यामं दर्शः पूरयेत् । चतुर्दशी यामत्रयं स्यादित्यर्थः । *क्षीयमाणा=परदिनेऽ*पराह्न-व्यापिनी नेत्यर्थः । व्यतिरेकमाह-

---

ति पाठे परेद्युरिति शेषः । तदा पूर्वेद्युर्निन्दाया औचित्यात् । *दिनद्वयेऽपराह्नव्याप्त्यभावे इति । अत्र व्याप्तिपदोपसंहारात् या पूर्वेद्युरेवैकदेशं स्पृशति सा पूर्वेत्यर्थः । कुत इत्यत आह-*यदेति । चतुर्दशीदिनस्य चतुर्थं याममममावास्याऽनुपूरयेत्=तत्र प्रविशेदित्यर्थः । *क्षीयमाणा=यागदिने चन्द्रदर्शनप्रयोजकक्षयवती । अंशतो व्याप्तौ च तिथिक्षये इति । दिनद्वयेऽपि क्षयेण समैकदेशव्याप्तौ च पूर्वेत्यर्थः । चन्द्रदर्शनप्रयोजकक्षयसत्त्वात् । नन्वत्र पूर्वस्यां श्राद्धानुष्ठानेऽन्वाधानमपि तत्रैव कर्त्तव्यं, तदनुपपन्नम् । पूर्वस्यां चन्द्रदर्शनावकाशाभावात् तत्सत्त्वे च 'यदहस्त्वेव चन्द्रमा न दृश्यते तामावास्यां कुर्वीत'इति वचनविरोध इति; सत्यम् । तस्य चन्द्रक्षयपरत्वात् । यदुक्तं 'यदहस्त्वेव दर्शनं नैति चन्द्रमाः' तत् क्षयापेक्षया ज्ञेयं, 'क्षीणे राजनि चेत्यपि'इति वचनात् । या तूत्तरेद्युरेवैकदेशव्यापिनी सोत्तरैव, पूर्वेद्युर्दर्शप्रवेशाभावात् । वैषम्येणैकदेशव्याप्तौ त्वाधिक्यवती ग्राह्या । तत्र पूर्वस्यास्तथात्वे पूर्वैवेत्यत्र वचनं योजयति-*क्षीयमाणेति । *अपराह्नव्यापिनी नेति । आधिक्येनापराह्नव्यापिनी नेत्यर्थः । पूर्वेद्युरेवाधिक्येनापराह्नस्पृशति यावत् । तदाधिक्यवती पूर्वेत्यर्थः । इतरथोत्तरामवतारयति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्धमानासमावास्यां लक्षयेदपरेऽहनि ।
यामांस्त्रीनधिकान् वाऽपि पितृयज्ञस्ततो भवेत् ॥

ततः श्राद्धं च। *दिनद्वयेऽपराह्णव्याप्त्यादौ *तिथिवृद्धौ च हारीतः—

*त्रिमुहूर्ता च कर्तव्या पूर्वा खर्वा च बह्वृचैः।
कुहूरध्वर्युभिः कार्या *यथेष्टं सामगीतिभिः ॥

*त्रिमुहूर्ताभावे तु *पूर्वा नेत्यर्थः ॥

---

*दिनद्वये इति। दिनद्वये वैषम्येण एकदेशेनापराह्णव्याप्तौ इत्यर्थः। *तिथिवृद्धौ इति। पूर्वेद्युरिति शेषः। इदं च पूर्वेद्युस्तदाधिक्यमुत्तरत्र यागादिनगतचन्द्रादर्शनप्रयोजकं ग्राह्यम्। तदैव वर्द्धमानावाक्यादुपवासानुरोधाच्चोत्तराया ग्राह्यत्वात्। *त्रिमुहूर्त्ता चेति। यद्यपि पञ्चधाविभागपक्षेणेदं प्रतीयते, तथाऽपि त्रेधाविभागपक्षेऽपि सुयोजम्। या दशमैकादशद्वादशमुहूर्ततया त्रिमुहूर्ता सा त्रेधाविभागपक्षे पूर्वैव। या खर्वा सर्विका च, (खर्विकालक्षणमुक्तम्) साऽपि पूर्वैव। कुहूः परा। 'बह्वृचैरध्वर्युभिः'इत्याद्युपादानं पूजार्थम्। चन्द्रदर्शने पूर्वा तददर्शने तु परेति यावत्। अत एवाह—*यथेष्टमिति। अत्रैवाभिप्रायान्तरं सूचयति-त्रिमुहुर्त्ताभावे त्विति। दिनद्वये वैषम्येणैकदेशव्याप्तौ उत्तरस्या आधिक्ये त्विति यावत्। *पूर्वा नेति। उत्तरेत्यर्थः। यद्युत्तरदिने चन्द्रदर्शनं न भवतीति शेषः। उत्तरदिने चन्द्रदर्शने तु पूर्वैवेत्यर्थः। तिथिवृद्धौ चेति चकारात् साम्यसमुच्चयः। तेन तिथेः साम्येनापि कालैकदेशस्य वैषम्येण व्याप्तौ चन्द्रदर्शनप्रयुक्तोऽधिकाग्रहणस्यापवादो बोध्यः। एतेन या दिनद्वयेऽपि साम्येन एकदेशव्यापिनी, सा-यदि क्षयेण तदा पूर्वा, क्षीयमाणावाक्यात्; यदि वृद्ध्या तदा परा; वर्द्धमाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यात् । तत्रापि चन्द्रादर्शनतद्दर्शनप्रयुक्तस्तयोरपवादः प्राग्वत् । यदि साम्येन, तदा यागदिने चन्द्रादर्शने परा; तद्दर्शने पूर्वेति सूचितं भवति । एवं क्रमेणान्वाधानादित्रयस्यैकदिनकर्तव्यता-वतः प्रतिनिर्णयमनुसृत्यायं ग्रन्थो योजितः ।

तन्नियमरहिताश्चाश्वलायनापस्तम्बास्तैः कदाचिद्यागदिने ऽपि पितृयज्ञकरणात् सौत्रस्यामावास्यापदस्य सन्धिमदहोरात्रपरत्वेन तद्भाष्यकारादिभिर्व्याख्यानात्तान् प्रत्ययं ग्रन्थो योज्यते-त्रेधावि-भक्तेति । संपूर्णदर्शोऽयमेवेत्यभिप्रायः । तत्रान्वाधानादित्रयं सु-लभमित्यग्रे स्पष्टम् । वस्तुतस्तु पञ्चधाभक्तदिनचतुर्थभाग एव तत् प्रत्यपराह्णः श्राद्धकालः प्रशस्त इत्याह-दर्शश्राद्धं त्विति । एवं चामावास्या तद्व्याप्त्यैव निर्णेया । "कर्मणो यस्य यः कालः" इति वचनात् । एवं च पूर्वैवापराह्णव्यापिनी सा पूर्वैव ।

यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते ।
अपराह्णे तु या तस्यां पिण्डानां करणं ध्रुवम् ॥

इति हारीतोक्तेश्च । या चोत्तरैवापराह्णव्यापिनी सोत्तरैव कर्म-कालशास्त्रात् ।

अपराह्णः पितॄणां तु याऽपराह्णानुयायिनी ।
सा ग्राह्या पितृकार्ये तु न पूर्वास्तानुयायिनी ॥

इति हारीताच्च । एतदेव हेमाद्रिसंवादेन द्रढयति-दिनद्वये इति । माधवसंवादेनाप्याह-अपराह्णव्याप्तीति । उत्तरस्या इत्यादिः । अपराह्णव्याप्त्यभावे=अपराह्णास्पर्शिन्यामिति यावत् । अत्र साग्न्यनग्निभेदेन व्यवस्था ।

अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ॥

इति जाबालिवचनात् ।

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति लौगाक्षिवचनाच्च । सिनीवालीकुहूः स्वरसतः सम्पूर्णापराह्णमाश्रित्य मग्रे । एतन्मते यः पञ्चधाविभक्तदिनचतुर्थभागरूपापराह्णमाश्रित्य दित आरभ्य सान्तो निर्णयः स एव निराग्निकान् स्त्रीशूद्रादींश्च प्रति बोध्यः । तथापि स्वयं साग्निकैरित्युपक्रमात्तदनुसारेणाह-क्षयेपूर्वेति । सिनीवालीत्यर्थः । यामं तुरीयमनु इति तुरीयभागोत्तरमित्यर्थः । अपराह्णव्यापिनी=अपराह्णस्पृक् नेत्यर्थः । तेन दिनद्वयेऽपराह्णास्पर्शित्वलाभः । अंशतो व्याप्ताविति । दिनद्वये साम्येनैकदेशव्याप्तौ ग्राह्यतिथेः क्षयसाम्यवृद्धिसम्भवात् क्षये पूर्वा साम्यवृद्ध्योः परेत्यर्थः । खर्वादिवाक्यात् ।

तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ।
साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥

इत्युक्तेश्च । दिनद्वयेऽपराह्णव्याप्त्यादाविति । दिनद्वयेऽपराह्णव्याप्तौ उत्तरतिथेः क्षये पूर्वा, वृद्धिसाम्ययोस्तु परा ।

अमावास्या तु या हि स्यादपराह्णद्वयेऽपि सा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥

इति शिवराघवसंवादात् । अत्र च क्षयादिर्न ग्राह्यतिथिगतः । तस्याः क्षयेऽपराह्णद्वयव्याप्तेरसम्भवात् । एकदेशपदानुपादाने स्वरसतस्तथा प्रतीतेः । तथा च तिथिवृद्धौ इत्यस्य उत्तरतिथेर्वृद्धौ साम्ये चेत्यर्थः । एवं च त्रिमुहूर्त्ता चेति वाक्यमेतदनुसारेण कुशलमतिभिर्योज्यम् । दिनद्वये वैषम्येणैकदेशव्याप्तौ अधिकतद्व्यापिनी ग्राह्या

अपराह्णद्वयव्यापिन्यमावास्या यदा भवेत् ।
अत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणि ॥

इति वचनात् अधिका ग्राह्येत्यर्थः । स्वरसतः सम्पूर्णापराह्णप्रत्ययेऽपि अल्पत्वाद्युक्त्या एकदेशलाभः । एतच्च सम्पूर्णोऽपराह्णः श्राद्धकाल इति विवेचनमतेन अपराह्णेऽप्येकादशद्वादशमुहूर्त्तः पार्वणे मुख्यः काल इति मयूखमतेन व्याख्यायते-त्रेधाविभक्तेति । अपराह्णभाग एकादशद्वादशमुहूर्त्तरूपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सायाह्नस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेत् ॥

इति सायाह्ननिषेधात् । एतच्च पार्वणे । एकोद्दिष्टे तु कुतपाद्ये अष्टमे आरम्भः, नवमे रौहिणे समाप्तिः ।

कुतपं प्रथमे भागे एकोद्दिष्टमुपक्रमात् ।
आवर्त्तनसमीपे वा तत्रैव नियतात्मवान् ॥

इति व्यासोक्तेः ।

आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः ।
विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत् ॥

इति गौतमोक्तेश्च । यत्तु नारदः—

मध्येह्नस्त्रिमुहूर्त्तस्तु यदा चलति भास्करः ।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥

इति नारदेन कुतपो मुहूर्त्तत्रयात्मक उक्तस्तत्र मुहूर्त्तत्रयात्मकमध्याह्नस्यैकोद्दिष्टकालतया विधानेऽष्टमनवममुहूर्त्तयोस्तत्कालतया विनियोगेऽत्राशिष्टस्य दशमस्य गौणकालताविधानार्थम् ।

ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयम् ।
मुहूर्त्तपञ्चकं ह्येतत् स्वधाभवनमिष्यते ॥

इति तु एकोद्दिष्टपार्वणयोः क्रोडीकाराभिप्रायम् । साग्निकैरिति । एतन्मते निरग्निकस्त्रीशूद्रोपलक्षणमेतत् । ग्रन्थकृन्मते तु तदुपलक्षणं कुतपव्यापिन्या वाच्यत्वात् । पार्वणे एकादशद्वादशमुहूर्त्तयोरेव मुख्यकालत्वं दर्शितम् । तत्र वैषम्येणैकदेशव्याप्तावधिका ग्राह्या 'अपराह्णद्वयव्यापिनी'इत्युक्तवचनात् । एकदेशसमव्याप्तावुभयापराह्णव्याप्तौ च क्षये पूर्वा वृद्धिसाम्ययोः परा 'अमावास्या तु या हि स्यात्'इति शिवराघवसंवादात् । क्षयादिश्राद्धे तत्तिथिगतः, अन्त्ये परतिथिगतः । दिनद्वये कालाभावे तु आहिताग्नेः, सिनीवाली, निरग्न्यादेः कुहूः । 'अपराह्णद्वयव्यापिनी'इति जाबालिवचनात् । "सिनीवाली द्विजैः कार्या"इति लौगाक्षिवचनेन स्त्रीशूद्रनिरग्निकानामपि ग्रहादिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डपितृयज्ञस्तु कात्यायनैर्यागदिनात्पूर्वेद्युः कार्यः 'पूर्वो वाऽङ्गत्वात् पिण्डपितृयज्ञः' इति तत्सूत्रात्। व्याख्यातं चैतत् कर्काचार्यैः-'पूर्व एव दर्शात् पिण्डपितृयज्ञो न पश्चात्। कुतः *अङ्गत्वात्। *तथा च श्रुतिः 'तस्मात् पूर्वेद्युः पितृभ्यः क्रियत उत्तरमहर्देवान्यजते' इति। 'पूर्वेद्युः पितृभ्यो यज्ञं निपृणीय प्रातर्देवेभ्यः यज्ञं तनुते' इति च। तेन तन्मते अङ्गमेवासौ। तदुक्तम्-'अङ्गं वा समभिव्याहारात्' इति। तेन कर्कमते *चतुर्दशीयुक्तदर्शे पिण्डपितृयज्ञ इति। श्रीअनन्तभाष्ये तु *परेद्युरित्युक्तम्। अत्र द्वेधाऽप्याचारो दृश्यते।

आपस्तम्बानां तु परदिने मुहूर्तमपि दर्शसत्त्वे तत्रैव पितृयज्ञः। *तदाह आपस्तम्बः-'अमावास्यायां यदहश्चन्द्रमसं न पश्यति तदहः पिण्डपितृयज्ञं कुरुते' इति। अत्र रुद्रदत्तीया व्याख्या-'पिण्डैर्युक्तः पितृयज्ञः=पिण्डपितृयज्ञः। स च कर्मान्तरं न तु दर्शशेषः। यथा वक्ष्यति-'पितृयज्ञः स्वकालविधानादनङ्गं स्यात्' इति। तं च यदहश्चन्द्रमसं न पश्यति पञ्चदश्यां प्रतिपदि वा तदहः कुरुते। यदहः

ग्रन्थस्तु योजितः। *अङ्गत्वात्-दर्शयागं प्रतीति शेषः। अमापुक्तापराह्णनियमं निराकर्तुमाह-*तथा चेति। अमावास्यायामपराह्णे पिण्डपितृयज्ञ इत्यमावास्यापदं च कर्मपरमिति तदभिप्रायः। *चतुर्दशीयुक्तेति। चतुर्दशीयोगेन गतोऽध्वा यस्याः सा गतार्थेति व्युत्पत्तेः। अध्वा=स्थानम्। चन्द्रक्षयवदपराह्णः। *परेद्युरिति अमावास्यायामपराह्ण इत्यमावास्यापदं पर्वसंधिमदहोरात्रपरम्। तस्मात्पूर्वेद्युरित्यादिश्रुतिस्तु काचित्काभिप्रायेति तदाशयः। नन्वेवम् "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरति" इति श्रुतिविरोध इत्यत्राह-*तदाहेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तयोः सन्धिस्तदहरित्यर्थः इति । श्रीरामाण्डारोऽप्या-
ह-'पिण्डपितृयज्ञस्तु पर्वसन्धिमदहोरात्रापराह्णे'इति ।
अतः पर्वसन्धिदिने पितृयज्ञः । शतपथश्रुतिरपि—
"यदैवैष न पुरस्तान्न पश्चाद् ददृशेऽथ पितृभ्यो ददा-
ति" इति । पर्वसन्धिदिने हि पूर्वतः पश्चाद्वा चन्द्रो न
दृश्यत एवेत्यर्थः । सत्याषाढोऽपि पितृयज्ञं प्रक्रम्य 'दृ-
श्यमाने तूपोष्य श्वोभूते यजते' इत्याह । हेमाद्रि-
स्तु-'अमावास्याशब्दस्तिथिवचन एव । पूर्वोक्तापस्त-
म्बसूत्रे यदुक्तं 'न पश्यति'इति, तत्र क्षयोऽभिप्रेतः ।
अतश्चतुर्दश्यां चन्द्रस्य क्षीणत्वात्तद्युक्तदर्शे पितृयज्ञः ।

पितृयज्ञं तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् ।

इति मनूक्तेः । यदुक्तं 'यदहस्त्वेव दर्शनं नैति च-
न्द्रमाः—' तत्क्षयापेक्षया ज्ञेयम् । 'क्षीणे राजनि चेत्यपि'
इति, 'यदुक्तं दृश्यमानेऽपि, तच्चतुर्दश्यपेक्षया' इति च
कात्यानोक्तेः । 'दृश्यमानेऽप्येके' इति गोभिलोक्तेश्च ।

यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते ।
अपराह्णे क्षयस्तस्यां पिण्डानां करणं ध्रुवम् ॥

इति हारीतोक्तेश्च । चन्द्रक्षयकालश्चोक्तः कात्यायनेन—

अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चन्द्रमाः ।
अमावास्याष्टमेंऽशे तु पुनः किल भवेदणुः ॥ इति ।

तेन पूर्वेद्युरेव पितृयज्ञ इत्यूचिवान् । कर्काचार्यैर-
पि-'अपराह्णे पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायाम्'
इति कात्यायनसूत्रेऽदर्शनेन क्षय एवोक्तः । 'तस्मि-
न्क्षीणे ददाति' इति श्रुतेः । अतस्तन्मते चतुर्दशीयुक्त-
दर्शे पितृयज्ञे सति परदिने यागोऽर्थात्सिद्धः । तदेतत्
*सर्वोत्कृष्टमपि हेमाद्रिकर्कादिव्याख्यानमापस्तम्बैरन-

*सर्वोत्कृष्टमिति । अमावास्याशब्दस्य तिथिवाचित्वाल्ल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्युपगमात्कातीयबौधायनादिविषयम् ।

*आश्वलायनानामपि शेषपर्वणि पिण्डपितृयज्ञः। तथा च सूत्रम्-'अमावास्यायामपराह्णे पिण्डपितृयज्ञः' इति ।

अत्र नारायणवृत्तिः-'अमावास्याशब्दः प्रतिपत्पञ्चदश्योः संधिवचनोऽप्यत्रापराह्णशब्दसमन्वयात्तद्दत्यहोरात्रे वर्तते । तस्यापराह्णेऽह्नश्चतुर्थे भागे पिण्डपितृयज्ञः कार्यः । औपवसथ्ये यजनीये वाऽहनि । यदा त्वहोरात्रसंधौ तिथिसंधिः स्यात्तदौपवसथ्ये एवाहनि क्रियते इति । अत एव

मुहूर्तमप्यमावास्या प्रतिपद्यपि चेद्भवेत् ।
तदहत्तमक्षयं पर्व ज्ञेयं शेषं तु पर्ववत् ॥

इति हेमाद्रौ वचनं पिण्डपितृयज्ञपरमित्युक्तं प्रयोगपारिजाते । अयं च स्मार्ताग्निमता संपूर्णे दर्शे *श्राद्धव्यतिषङ्गेण कार्यः । व्यतिषङ्गो नामोभयोः सहानुष्ठानम् । *एतच्च 'स्थालीपाकेन सह पिण्डार्थमुद्धृत्य' इतिसूत्रे वृत्तिकृतोक्तम् ।

खण्डपर्वाणि तु केचिदाहुः । पूर्वेऽहि पिण्डपि-

क्षणाविरहाच्च । *आश्वलायनानामिति । शाङ्खायनानां त्वन्वाधानानन्तरं पितृयज्ञः । तथैव तत्सूत्रात् । *श्राद्धव्यतिषङ्गेणेति । पितृयज्ञाधीनं परमापूर्वमेकं, श्राद्धे पिण्डदानाधीनं च तदपरमुभयमपि अग्नौकरणरूपाङ्गाधीनम् । अतः खण्डपर्वणि प्रधानयोर्भिन्नकालत्वात्तादृशमङ्गं भिद्यते, अखण्डपर्वणि तु स्थालीपाकभुक्तशेषाभ्यामेकस्मादेव पिण्डदानात्तादृशपरमापूर्वद्वयं जायते तत्रोभयत्राप्येकमेवाग्नौकरणमङ्गं न तु स्वेच्छया पितृयज्ञश्राद्धयोः पृथगनुष्ठानं कार्यं सूत्रविरोधादित्याह-*एतच्चेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृयज्ञव्यतिषङ्गेण श्राद्धं कृत्वा परेऽह्नि केवलः पिण्डपितृयज्ञः कार्यः । वृत्तिकृता तु—

आन्वष्टक्यं च पूर्वेद्युर्मासि मास्यथ पार्वणम् ।
काम्यमाभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम् ॥

इत्युदाहृत्य पूर्वेषु चतुर्षु स्थालीपाकादुद्धृत्याग्नौकरणमित्युक्तेर्दर्शश्राद्धे स्थालीपाको नियत इति गम्यते । स्थालीपाकश्च पितृयज्ञ एवेति पूर्वदिने व्यतिषङ्गः सिद्धः । प्रयोगपारिजाते तु *वार्षिकश्राद्धादेरपि व्यतिषङ्ग उक्तः, किमुत दर्शश्राद्धस्य ।

न्यायविदस्त्वाहुः—*सूत्रस्य वृत्तेश्च संपूर्णदर्शविषयत्वात् खण्डपर्वणि *पूर्वदिने केवलं श्राद्धं परदिने च केवलः पितृयज्ञः कार्यः । अत एवोक्तं वृत्तिकृता—*'नात्रापूर्वस्थालीपाकश्चोच्यते, सर्वश्राद्धेषु प्रसङ्गात्' इति । प्रयो-

*वार्षिकेति । "यद्यदन्नमुपभुक्तं तत्तत्स्थालीपाकेन सह पिण्डार्थमुद्धृत्य" इति सूत्रं सहोद्धरणे स्थालीपाकोऽङ्गं करणतृतीयाबलात्, उपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात् । ततश्च स्थालीपाकः पिण्डार्थः, वार्षिके च पार्वणविकृतित्वात्तत्प्राप्तिरित्यभिप्रायः । *सूत्रस्येत्यादि । "सह शाखया प्रस्तरं प्रहरति" इतिवत्सहार्थे तृतीया । सा चोद्धरणे एव कर्मत्वेनान्नसाहित्यबोधिका, अतो न पिण्डार्थत्वसम्भवः । पिण्डदाने चोपभुक्तजातीयस्यैवान्नस्य करणत्वान्न तत्त्वश्रपणापेक्षेति भावः । *पूर्वदिने इति । कालभेदेन तन्त्रन्यायाप्रवृत्तेः । *नात्रेति । सिद्धस्थालीपाकानुवाद इति न "उपपदविभक्तेः" इति न्यायप्रसङ्गः, नापि खण्डपर्वणि पूर्वेद्युः स्थालीपाकप्राप्तिः । न च—

पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ।

इति वचनात्तत्प्राप्तिरिति वाच्यम् । तस्य एकादिनीयेष्वाका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गपारिजातोक्तिरप्ये*तद्विषयैव। पूर्वदिने च श्राद्धेऽग्नौ करणमेव, न पाणिहोमः।

चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते।
पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि॥

इति परिशिष्टे नियमात्। न च लौकिकाग्नौ पक्वस्य कथं गृह्याग्नौ होमः। 'नान्याग्नौ पक्वमन्याग्नौ जुहुयात्' इति निषेधात्। मैवम्। श्राद्धस्य गृह्यत्वेन स्मार्ताग्नौ *पचनाग्नौ वा कर्तव्यत्वात्। तस्मात् पूर्वेद्युः केवलं श्राद्धं, न व्यतिषङ्गः। *इदमेव च युक्तम्। आहिताग्निना

ङ्क्षितक्रमविधायकत्वेनोपपत्तेरनाकाङ्क्षिताभिन्नादिनीयापूर्वविधायकत्वे मानाभावात्। *एतद्विषया=आर्थिकस्थालीपाकविषया। अयं विस्तरः। *पचनाग्नाविति। लौकिकाग्नौ श्राद्धानुष्ठाने च पाणिहोम एव। आश्वलायनभिन्नानां तु अखण्डपर्वणापि न व्यतिषङ्गः तत्सूत्रानुक्तेः। तैत्तिरीयाणां पृथक्श्राद्धेऽपि न पाणिहोम इति स्मर्तव्यम्। अधिकमग्रे। *इदमेव चेति। तथा च वृत्तिः—यत्र स्थालीपाको विहितः तत्र तेन भुक्तशेषेण च पिण्डनिपरणम्। यत्र स्थालीपाकविधिर्नास्ति तत्र केवलेन भुक्तशेषेणैव पिण्डनिपरणम्। आचार्येणाष्टौ श्राद्धान्युक्तानि- "आन्वष्टक्यं च पूर्वेद्युः" इत्यादि। तत्र पूर्वेषु चतुर्षु स्थालीपाकादन्नमुद्धृत्याग्नौकरणम्, अग्निसमीपे भुक्तशेषेण स्थालीपाकेन च पिण्डनिपरणं पिण्डपितृयज्ञकल्पस्य तेषु विद्यमानत्वात्। उत्तरेषु चतुर्षु भोजनार्थादन्नमुद्धृत्य घृताक्तं कृत्वा पाणिहोमः, ब्राह्मणसमीपे भुक्तशेषमात्रेण पिण्डनिपरणं तेषु स्थालीपाकविध्यभावात्, पिण्डपितृयज्ञकल्पप्राप्त्यभावाच्चेति। स्थालीपाकेनेति करणतृतीयावादिनामुत्तरेषु चतुर्ष्वपि स्थालीपाकप्राप्त्यापत्तेः। किं च सर्वश्राद्धेषु अतिप्रणयनादिपितृयज्ञेतिकर्त्तव्यता न प्राप्नोति। "आन्वष्टक्यं च पूर्वेद्युः" इत्याद्युक्त्वा आचार्येण—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वाधानिनाऽर्धाधानिना* वा संपूर्णे खण्डे वा दर्शे *श्रौताग्नौ पृथगेव पितृयज्ञः कार्यो न तु दर्शश्राद्धव्यतिषङ्गेणेति विस्तरभीतेर्विरमामः । संपूर्णे दर्शे च विशेषमाह लौगाक्षिः—

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥ इति ।

पक्षान्तं कर्म=अन्वाधानम् । अन्वाहार्यकं=दर्शश्राद्धम् । अयमेव साग्नेर्जीवत्पितृकस्य पिण्डपितृयज्ञकालो ज्ञेयः । तस्यापि कात्यायनेन "होमान्तमनारम्भो वा" इत्याम्नानात् । पिण्डपितृयज्ञाकरणे *प्रायश्चित्तमाह पाराशरमाधवीये कात्यायनः—

पितृयज्ञात्यये चैव वैश्वदेवात्ययेऽपि च ।
भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् ॥

इत्यलम् ।

चतुर्ष्वाद्येषु साग्नीनां वह्नौ होमो विधीयते ।

इति पितृयज्ञातिदेशप्रसज्यमानाग्नेः श्राद्धान्तरे परिसंख्यानात् ।

पित्र्यब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि ।

इति त्वनुवादकं विधाने वाक्यभेदादित्याद्यन्यत्र विस्तरः । दर्शश्राद्धे पाणिहोमः । *अर्द्धाधानिना वेति । अत्र मयूखः—"पर्व=अमावास्या तत्र भवं पार्वणम् । तद् आहिताग्निः पिण्डपितृयज्ञं कृत्वा करोति । अनाहिताग्निस्तु तद् इतरेण व्यतिषज्य" इति परिशिष्टम् । तत्राहिताग्निः=सर्वाधानी, अनाहिताग्निस्तु अर्द्धाधानी, केवलस्मार्त्ताग्निमांश्च । अर्धाधानेऽपि व्यतिषङ्गानुरोधादिति । ग्रन्थकारस्तु *श्रौताग्नौ दक्षिणाग्नौ । निर्भरान्तरग्रस्तोऽनुपदमग्रे साग्निकादीन् दर्शयिष्यति । तदनुसारेणानुष्ठाने संप्रदायविरोधः । *प्रायश्चित्तमिति । अथ वा श्रौतग्रन्थोक्तं प्रायश्चित्तान्तरं सप्तहोमहोमो बोध्यः । साग्निकान् प्रत्यमावास्या निर्णीता । अन्वाधाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतमनुसरामः । *निरग्निकादिभिस्त्वमावास्या-
पराह्णव्याप्त्यलाभे कुतुपकालव्यापिनी ग्राह्या ।

भूतविद्धाऽप्यमावास्या प्रतिपन्मिश्रिताऽपि वा ।
पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतुपकालिकी ॥

इति हारीतोक्तेः । इदं च निरग्निकादिविषयम् ।

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनात् । अत्र *साग्निरौपासनाग्निरपीति मदनपारिजाते उक्तम् । *कुतुपश्चा*पराह्णव्याप्त्यलाभेऽनुकल्पः ।

अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये ।
आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता ॥

इति जाबालिना विधानात् । तेन साग्नीनां निरग्नीनां चापराह्णव्यापिन्येव मुख्या* । *तिथिसाम्यवृद्धिक्षयैः *समव्याप्तौ खर्वादिना निर्णयः । वैषम्ये-

---

दित्रयस्यैककाल्यनियमतद्रहितान्प्रति यथामतं ग्रन्थोऽपि योजितः । तत्प्रस्तावे च निरग्निकादीन् प्रति माधवमतं दर्शितम् । इदानीं हेमाद्रिमतमनुरुध्याह-*निरग्निकादिभिरिति । आदिना स्त्रीशूद्रग्रहः । *साग्निरिति ।

य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य तु ।

इति वचनात् । हेमाद्रिमाधवयोर्विशेषं सूचयितुं माधवमतं स्मारयति-*कुतुपश्चेति । *अपराह्णेति । दिनद्वयेऽपराह्णस्पर्शाभावे इति यावत् । *मुख्येति । पूर्वेद्युरेवापराह्णव्याप्ती पूर्वा । उत्तरेद्युरेव तद्व्याप्तावुत्तरा, कर्मकालशास्त्रात् । "यस्यां संध्यागतः" इत्यादिविशिष्यापि वाक्यद्वयं पूर्वमुक्तम् । *तिथिसाम्येति । प्रकृततिथीत्यर्थः । *समव्याप्ताविति । एतेन "तिथिसाम्ये सिनीवाली" इत्यग्रिमम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धिका *। दिनद्वयेऽपराह्णस्पर्शे कुतुपव्यापिनीति मा-
धवः । *इदमेव च युक्तम् । *हेमाद्रिमते कुतुपव्यापि-
त्वेव निरग्न्यादेर्मुख्या । सिनीवाली=दृष्टचन्द्रा । तथा
च व्यासः-

दृष्टचन्द्रा सिनीवाली, नष्टचन्द्रा कुहूः स्मृता। इति।

पूर्वदिने परदिन एव वा तद्व्यापित्वे सैव ग्राह्या ।
अंशव्यापित्वे वैषम्येऽधिककालव्यापिनी ग्राह्या । दिन-
द्वयेऽशतः समव्यासौ तिथिक्षये पूर्वा, वृद्धौ साम्ये
च परा ।

तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूः स्मृता ।
साम्येऽपि च कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः ॥

इति प्रचेतोवचनात् । दिनद्वये संपूर्णकुतुपव्यापिस्तु
तिथिवृद्धावेव भवतीत्यनन्तरवचनात् परैवेति ।

कुतुपस्तु-

अमावास्या तु या हि स्यादपराह्णद्वये समा ।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता ॥

इत्युक्तं च स्मर्तव्यम् । *आधिकेति । "अपराह्णद्वयव्यापि" इति
रावराघवसंवादात् । ननु कुतपस्य मुख्यकालत्वं युक्तम् ।
अन्यथा-

सिनीवाली कुहूश्चैव श्रुत्युक्ते श्राद्धकर्मणि ।
स्यातां ते यदि मध्याह्ने श्राद्धादि स्यात्कथं तदा ॥

इत्युपक्रम्य "तिथिक्षये सिनीवाली" इति प्रचेतोवाक्यस्य निर्वि-
षयत्वं स्यात्; इत्यत्राह-*इदमेव चेति। "स्यातां ते यदि मध्या-
ह्ने" इति प्रामाणिकपाठान्न कुतपो मुख्य इति भावः । प्रकृतं हे-
माद्रिमतमनुसृत्याह-*हेमाद्रिमते इति । तद्व्यापिनी=कुत-
पव्यापिनी । तिथिवृद्धीति । वृद्ध्यविनाभावादित्यर्थः । अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अह्नो मुहूर्ता विज्ञेया *दश पञ्च च सर्वदा।
तत्राष्टमो मुहूर्तो यः स कालः कुतुपः स्मृतः॥

इति मात्स्योक्तेः। तुलादानपितृदेवप्रीत्यर्थोपवासादौ तु *परा ग्राह्येत्यन्यत्र विस्तरः॥

दर्शे च मासिकवार्षिकादिश्राद्धप्राप्तौ कालादर्शे विशेष उक्तः—

दर्शस्य चोदकुम्भस्य दर्शमासिकयोरपि।
नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि॥

नवीनाः—यत् माधवेन हेमाद्रिणा वा दिनद्वये संपूर्णपराह्णव्याप्तौ संपूर्णकुतपव्याप्तौ वा परेत्युक्तं, तदयुक्तम्; स्वरसतो दिवाक्ये "तिथिक्षये सिनीवाली" इति वाक्ये च क्षयादीनां ग्राह्यतिथिगतत्वाद् दिनद्वयगतसमैकदेशव्याप्तिविषयकत्वेनेहाप्रवृत्तेः। किं तूत्तरतिथेः क्षये पूर्वा, वृद्धिसाम्ययोस्तूत्तरा।

अमावास्या तु या हि स्यादपराह्णद्वयेऽपि वा।
क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता॥

इत्युक्तेः। न चेदं दिनद्वयगतसमैकदेशव्याप्तिपरं, स्वरसतोऽपराह्णव्याप्तेरेव प्रतीतेः। एवं कुतपव्याप्तिवादिनामपीति वदन्ति।

*दशेति।

रौद्रः श्वेतस्तथा मैत्रस्तथा सारभटः स्मृतः।
सावित्रो वैश्वदेवश्च गान्धर्वः कुतपस्तथा॥
रौहिणस्तिलकश्चैव विभवो निर्ऋतिर्जयः।
शम्बरो विजयश्चैव भेदाः पञ्चदश स्मृताः॥

तत्रासंभवे तु—

कुतपाद्यान् मुहूर्तांस्त्रीन् यदाचरति भास्करः।
स कालः कुतपस्तत्र पितॄणां दत्तमक्षयम्॥

इत्युक्तो गौणः कुतपो ग्राह्यः। *परेति। दानादिकर्मकालपर्यन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्त्वा

संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् ।
निमित्ता नियतिश्चात्र पूर्वानुष्ठानकारणम् ॥ इति ।

निर्णयदीपेऽपि—

नष्टचन्द्रे यदा काले क्षयाहादिवसो भवेत् ।
वैश्वदेवं क्षयश्राद्धं कुर्यात्प्राग्दर्शकर्मणः ॥

अमाश्राद्धं चानुपनीतोऽपि कुर्यात् । श्राद्धशूलपाणौ—

अमावास्याष्टकाकृष्णपक्षपञ्चदशीषु च ।

इत्युपक्रम्य

एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु पर्वसु ।
श्राद्धं साधारणं नाम सर्वकर्मफलप्रदम् ॥
भार्याविरहितोऽप्येतत्प्रवासस्थोऽपि नित्यशः ।
शूद्रोप्यमन्त्रवत्कुर्यादनेन विधिना बुधः ॥

इति मात्स्योक्तेः । अमाश्राद्धातिक्रमे प्रायश्चित्तमुक्तमृग्विधाने—

न्यूषुवाचं जपेन्मन्त्रं शतवारं दिने दिने ।
अमाश्राद्धं यदा नास्ति तदा संपूर्णमेति तत् ॥

अत्र पूर्वोक्तसाग्निपदेनाऽऽहिताग्निः स्मार्ताग्निमांश्च गृह्यते । विच्छिन्नाग्निकादिश्च निराग्निकः । तथा च हेमाद्रिरग्नौकरणप्रकरणे—

साग्निरग्नावनग्निस्तु द्विजपाणावथाप्सु वा ।
कुर्यादग्नौ क्रियां नित्यं लौकिकेनेति निश्चितम् ॥

इति स्मृतिवाक्यमुदाहृत्य 'यस्त्वस्वीकृतौपासनतयासमुच्छिन्नाग्नितया भार्याविधुरतया वाऽग्निरहितस्तस्य द्विजपाणौ जलादौ वा होमः' इति व्याचचक्षे । मदन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पारिजातेऽप्येवम् । इदमेव साग्निकानग्निकस्वरूपं *सर्वत्र ज्ञेयम् ॥

अथ ग्रहणं निर्णीयते । तत्र चन्द्रग्रहणे यस्मिन्यामे ग्रहणं तस्मात्पूर्वं प्रहरत्रयं न भुञ्जीत । सूर्यग्रहे तु प्रहरचतुष्टयं न भुञ्जीत ।

सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना ॥

इति माधवीये वृद्धगौतमोक्तेः ।

*ग्रहणं तु भवेदिन्दोः प्रथमादधि यामतः ।
भुञ्जीतावर्तनात्पूर्वं प्रथमे प्रथमादधः ॥

इति मार्कण्डेयोक्तेश्च । अधि=ऊर्ध्वम् । ननु चन्द्रग्रहे यामचतुष्टयनिषेध उचितो नतु सूर्यग्रहे, सूर्योदयात्प्राग्भोजनाप्राप्तेः । मैवम् । वचनस्य प्रथमयामे सूर्यग्रहे सति पूर्वेद्युः पूर्वरात्रे भोजननिषेधपरत्वात् । चन्द्रग्रहे विशेषमाह माधवीये वृद्धवसिष्ठः—

ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् । इति ।

द्वयोर्ग्रस्तास्ते तु माधवीये व्यासः-

अमुक्तयोरस्तगयोरव्याद् दृष्ट्वा परेऽहनि । इति ।

विष्णुधर्मेऽपि-

मुहूर्तमात्राऽपीति भावः । *सर्वत्रेति । साग्निकानग्निकभेदेन व्यवस्थापेक्षायां मतान्तरं तु प्रागुक्तं स्मर्तव्यम् ॥ यामत्रयादौ ग्रहणयामोऽवधिर्न ग्रहणमित्याह-*ग्रहणं त्विति । प्रथमाद्यामतोऽधि=रात्रिद्वितीयप्रहरे ग्रहणं चेन्मध्याह्नात् पूर्वं भुञ्जीत, रात्रिप्रथमयामे चेत्तदा प्रथमादधः=प्रथमयाममध्ये ।

रवेस्त्वावर्तनादूर्ध्वमर्वागेव निशीथतः ।
चतुर्थप्रहरे चेत्स्याच्चतुर्थप्रहरादधः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अहोरात्रं न भोक्तव्यं चन्द्रसूर्यग्रहो यदा।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम्॥
*अहोरात्रनिषेधः सूर्यग्रस्तास्ते। मदनरत्ने*गार्ग्यः-
संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ।

इति च द्रष्टव्यम्। *अहोरात्रमिति। इदमर्थाद् ग्रस्तास्तपरं, मुक्तिस्नानं च तत्र परेद्युरित्यर्थः। ब्रह्माण्डेऽपि—

नाश्नीयादथ तत्काले ग्रस्तयोश्चन्द्रसूर्ययोः।
मुक्तयोश्च कृतस्नानः पश्चाद् भुञ्ज्यात्स्ववेश्मनि॥

इति परान्ननिषेधः। मुक्तावपि भोजनं महानिशातः प्रागेव।

मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा॥

इति शातातपोक्तेः। महानिशा च घटीद्वयम्।

महानिशा द्वे घटिके रात्रिमध्यमयामयोः।

इति मार्कण्डेयोक्तेः। घटिकाचतुष्टयं तु युक्तं, तथा कल्पतरूक्तेः। चन्द्रग्रस्तास्ते यावत्तदुदयमभोजनेन स्थातुमशक्तानां शास्त्रावगतमुक्तिकालभूताहर्भागानन्तरं भागद्वयमेकभागं वा हित्वा भोजनं भवतीत्युक्तं विवेचने। ग्रहणकाले च स्वापादि निषिद्धम्।

सूर्येन्दुग्रहणं यावत्तावत्कुर्याज्जपादिकम्।
न स्वपेन्न च भुञ्जीत स्नात्वा भुञ्जीत मुक्तयोः॥

इत्युक्तेः।

निद्रायां जायते रोगो मूत्रे दारिद्र्यमाप्नुयात्।
पुरीषे कृमियोनिः स्यान्मैथुने ग्रामसूकरः॥
अभ्यङ्गे च भवेत्कुष्ठी भोजने स्यादधोगतिः।
वचने च भवेत् सर्पो वधे च नरकं व्रजेत्॥

इति निन्दोक्तेश्च। अहोरात्रम्=अह्नः पूर्वा रात्रिरित्याशयेनाह-अहोरात्रमिति। वस्तुतोऽहश्च रात्रिश्चेत्यर्थः, तेन चन्द्रग्रस्तास्तस्यापि लाभः, तदाह-*गार्ग्य इति। *स्नानेति। स्नानं च नित्यं मोक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदहर्नैव भोक्तव्यं रात्रावपि कदाचन ॥

सायंसंध्यायां सूर्यग्रस्तास्ते पूर्वेऽह्नि रात्रौ च न भोक्तव्यम्। प्रातःसंध्यायां चन्द्रस्य ग्रस्तास्ते पूर्वरात्रावुत्तरेऽह्नि च न भोक्तव्यमित्यर्थः। चन्द्रग्रस्तास्ते उत्तरदिने संध्याहोमादौ न दोषः। तदाहोशनाः-

ग्रस्ते चास्तंगते त्विन्दौ ज्ञात्वा मुक्त्यवधारणम्।
*स्नानहोमादिकं कार्यं भुञ्जीतेन्दूदये पुनः॥

एतदनाहिताग्निविषयम्। 'अपराह्णे व्रतोपायनीयमश्नीत' इति कात्यायनोक्तेर्व्रतस्य श्रौतत्वेन विहितत्वेन च प्रबलत्वात्। अद्भिर्व्रतं कुर्यादिति निर्णयदीपः। रागप्राप्तभोजने कालनियमोऽयम्। तेन ज्वरादाविव न भोजनमिति कर्कानुसारिणः। बालवृद्धातुराणां तु ग्रहणयामात्पूर्वमेकयामो निषिद्धः।

*सायाह्णे ग्रहणं चेत्स्यादपराह्णे न भोजनम्।
अपराह्णे न मध्याह्णे, मध्याह्णे न तु सङ्गवे॥
भुञ्जति सङ्गवे चेत्स्यान्न पूर्वं भोजनक्रिया॥

इति मार्कण्डेयोक्तेः। इदं च *बालादिविषयम्। 'बा-

स्नानस्यौदयिकत्वात्। मोक्षस्नानानन्तरं च भोजनम्, उक्तब्रह्माण्डात्। संवत्सरदीपे तु स्नानपाकादिकमिति पाठः। तत्र "शास्त्रावगतमुक्त्युत्तरमुदयात्पूर्वमपि पाकादि कार्यं, भोजनं तूदयोत्तरमित्यर्थ"इत्युक्तम्। शिष्टास्तूदयोत्तरमेव सर्वं कुर्वन्तीति विवेचने। *सायाह्णे इति स्पष्टं भागपञ्चकं, तच्च रात्रावपि उपलक्षणम्। तेन चन्द्रसूर्यग्रहलाभः। एवं चावतारिकायां यामपदद्वयं भागार्थकम्। यद्वाऽवतारिकारूपधार्मिकव्याख्यादर्शनात्सायाह्णादिपदमेव यामार्थकं चतुर्थयामे ग्रहणं चेत् तृतीययामे न भोजनमित्यादिरर्थः। तत्र सङ्गवे चेदिति दृष्टान्तः। *बालादीति। असमर्थेत्यर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तद्वृद्धातुरैर्विना' इति पूर्वोक्तेः । वेधकाले ग्रहणे वा पक्वमन्नं त्याज्यम् ।

सर्वेषामेव वर्णानां *सूतकं राहुदर्शने ।
स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेत् ॥

इति हेमाद्रौ षट्त्रिंशन्मतात् । शृतमिति तदन्तरितस्योपलक्षणम् ।

नवश्राद्धेषु यच्छिष्टं ग्रहपर्युषितं च यत् ।

इति मिताक्षरायां वचनात् । भार्गवार्चनदीपिकायां ज्योतिर्निबन्धे मेधातिथिः—

*आरनालं पयस्तक्रं दधि स्नेहाज्यपाचितम् ।
मणिकस्थोदकं चैव न दुष्येद्राहुसूतके ॥

मन्वर्थमुक्तावल्याम्—

अन्नं पक्वमिह त्याज्यं स्नानं सवसनं ग्रहे ।
वारि तक्रारनालादि तिलदर्भैर्न दुष्यति ॥

जले त्वदोषो गाङ्गविषयः—

ग्रहोषितं जलं पीत्वा पादकृच्छ्रं समाचरेत् ।

इति तत्रैव चतुर्विंशतिमतेऽन्यजलस्य दोषोक्तेः ।

---

*सूतकमिति । तद्विहितेतरकर्मानाधिकारार्थम् । *आरनालमिति प्रतिप्रसवः । अन्यश्च स स्मृत्यन्तरे—

आरनालं तथा क्षीरं किलाटं दधिसक्तवः ।
स्नेहपक्वं च तैलं च न कदाचित्प्रदुष्यति ॥

अत्र विशेषः ।

आरनालं च तक्रं च ह्यादेयं घृतपाचितम् ।
उदकं च कुशच्छन्नं न दुष्येद्राहुसूतके ॥

स्मृत्यन्तरे—

जले घृते तथा तैले सन्धाने गोरसेषु च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेधकाले ग्रहणे वा भोजने प्रायश्चित्तमुक्तं माधवीये कात्यायनेन—

चन्द्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुद्ध्यति ।
तस्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यति ॥ इति

ग्रहणे च*त्रिरात्रमेकरात्रं वोपवासः श्रेयोऽर्थिना कार्यः

एकरात्रमुपोष्यैव स्नात्वा दत्वा च शक्तितः ।
कञ्चुकादिव सर्पस्य निवृत्तिः पापकोशतः ॥
त्रिरात्रं समुपोष्यैवं ग्रहणे चन्द्रसूर्ययोः ।
स्नात्वा दत्वा च विधिवन्मोदते ब्रह्मणा सह ॥

इति हेमाद्रौ लैङ्गोक्तेः । इदं च पुण्यातिरिक्तविषयम् ।

आदित्येहनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः ।
पारणं*चोपवासं च न कुर्यात्पुत्रवान् गृही ॥

इति जैमिनिवचनात् । *यदा रवेर्ग्रस्तास्तस्तदा पु

कुशान्तरायं कुर्वीत ग्रहणे चद्रसूर्ययोः ॥

आरनालं=काञ्जिकं, घृतपाचितं=द्रोणाढकादिमितं कठिनतरं वा बद्धपक्वान्नमिति वाक्यात् । प्राजापत्यं=षडुपवासतुल्यं, तदर्द्धं त्रिरात्रोपवासः । ग्रस्तास्तोत्तरनिषिद्धकालभोजनेऽपि स एव कार्यः । "तस्मिन्नेव दिने"इत्यविशेषोक्तेः । "स्त्रीबालवृद्धानां तत्तदर्धम्"इति विवेचने । *त्रिरात्रमित्यादि । एकरात्रोपवासो ग्रहणवत्यहोरात्र एव । तथैव प्रतीतेः शिष्टाचाराच्च । क्त्वाप्रत्ययः समानकर्तृकत्वे 'मुखं व्यादाय स्वपिति'इतिवत् । त्रिरात्रोपवासेऽपि तृतीयमहोरात्रं ग्रहणवदेव । यद्वोपवासद्वयमपि क्त्वाप्रत्ययवशात्पूर्वदिने एव, ग्रहणे पारणानिषेधात् । *पारणं चेति । पुत्रिणः ग्रहणे पारणोपवासयोर्निषेधात् तदन्यस्य ग्रहणदिने तत्पूर्वदिने चोपवास इति गम्यते । *यदा त्वित्यादि । मार्कण्डेये एकप्रहरवर्जनं 'सायाह्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिणः *प्रहरद्वयं हित्वा बालादिवद्भोजनं, न तूपवासः । सायाह्ने ग्रहणं चेत्स्यात्' इति पूर्वोक्तमार्कण्डेयवचनात् ।

सायाह्ने सङ्गवेऽश्नीयाच्छारदे सङ्गवादधः ।
मध्याह्ने परतोऽश्नीयान्नोपवासो रविग्रहे ॥

इति स्मृतेश्चेति हेमाद्रिः । शारदोऽपराह्णः । माधवमते तु पुत्रिणोऽपि तत्रोपवास एव । 'अहोरात्रं न भोक्तव्यम्' इति पूर्वोक्तनिषेधस्य तेनापि पालनीयत्वात् । उपवासनिषेधस्तु व्रतरूपोपवासपरः कृष्णैकादशीनिषेधवदिति । मदनरत्नेऽप्येवम् । *इदमेव च युक्तम् । वर्धमानस्तु 'अहोरात्रं न भोक्तव्यम्' इति मातातपीयाग्रे ।

सूर्याचन्द्रमसोर्लोकानक्षयान्याति मानवः ।

इति फलश्रुतेर्मुक्त्यदर्शने उपवासः काम्यः *न त्वयं निषेध इत्याह । तन्न । अत्र व्रतत्वेपि*प्रागुक्तविष्णुधर्मे निषेधावश्यंभावात् । तथा च व्यासः-

रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा ।
चूडामणिरिति ख्यातस्तत्र दत्तमनन्तकम् ॥
वारेष्वन्येषु यत्पुण्यं ग्रहणे चन्द्रसूर्ययोः ।

त्रिणे' इत्यत्र प्रहरद्वयवर्जनं, तत्र बालादीनां प्रहरद्वयवर्जनं मुख्यं, एकप्रहरवर्जनं त्वनुकल्पः । *पुत्रिण इति । पुत्री बालादिवत् "नोपवासो रविग्रहे" "न कुर्यात्पुत्रवान् गृही" इत्यनयोरेकवाक्यत्वलाभात् । समर्थे च पुत्रिणि नैकप्रहरवर्जनं, किं त्वसमर्थे तत्रेत्यर्थः । *इदमेव चेति । बालादिभिस्तु सर्वं दिनं नक्तं वा भोजनं विना स्थातुमशक्यत्वान्निषेधो न पालनीयः, किं तूक्तकल्पाकल्पौ कार्याविति भावः । *न त्वयमिति । न हि निन्दान्यायादिति भावः । *प्रागुक्तेति । तथा च काम्य इव नित्योऽप्युप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्पुण्यं कोटिगुणितं योगे चूडामणौ स्मृतम् ॥
अत्र चाद्यन्तयोः स्नानं कुर्यात् ।
*ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते ।
मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते ॥
इति हेमाद्रौ वचनात्,
स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनम् ।
इति ब्रह्मवैवर्ताच्च ।
सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।
सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेत् ॥

वासो भवत्येवेति भावः । *ग्रस्यमाने इति । एतच्च स्नानादि रात्रावपि ।

तथोपरागपातादौ स्नाने दाने निशा शुभा ।
इत्युक्तेः,
स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने ।
आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्जयेत् ॥
इत्युक्तेश्च । दानं चात्यावश्यकम् ।
अयनादौ सदा देयं द्रव्यमिष्टं गृहेषु यत् ।
षडशीतिमुखे चैव विमोक्षे चन्द्रसूर्ययोः ॥
इति शातातपोक्तसदाशब्दात् । अत एव मलमासेऽपि कार्यमित्युक्तम् । दानं चापात्रायापि ।
अश्रोत्रियः श्रोत्रियो वा पात्रं वाऽपात्रमेव वा ।
विप्रब्रुवो वाऽपि विप्रो ग्रहणे दानमर्हति ॥
इति बौधायनोक्तेः । श्रोत्रियः=संस्कारवेदाध्ययनोभययुक्तः । अश्रोत्रियः=तदन्यतरहीनः । पात्रं—
न विद्यया केवलया तपसा वाऽपि पात्रता ।
यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥
इति याज्ञवल्क्योक्तं विद्यातपोयुक्तम् । विप्रब्रुवः=सुसंस्कृतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति वृद्धवसिष्ठोक्तेश्च । *सचैलत्वं मुक्तिस्नानपरामिति
दनरत्ने उक्तम् । भार्गवार्चनदीपिकायां चतुर्विंशतिमते-
*मुक्तौ यस्तु न कुर्वीत स्नानं ग्रहणसूतके ।
स सूतकी भवेत्तावद्यावत्स्यादपरो ग्रहः ॥
इदं च स्नान*ममन्त्रकं कार्यमिति स्मृतिरत्नावल्याम् ।
त्र तीर्थविशेषो भारते-
गङ्गास्नानं प्रकुर्वीत ग्रहणे चन्द्रसूर्ययोः ।
महानदीषु वाऽन्यासु स्नानं कुर्याद्यथाविधि ॥
महानदीष्वपि मासविशेषे काश्चिच्छ्रेष्ठाः ।
प्रयागं देविका रेवा सन्निहत्या च वारणम् ।
सरस्वती चन्द्रभागा कौशिकी तापिका तथा ॥
सिन्धुर्गण्डकिका चैव शरयूः कार्तिकादितः ॥
*मूलं हेमाद्रौ स्पष्टम् । व्यासः-

ध्ययनादिरहितः ।
नाध्यापयति नाधीते स भवेद् ब्राह्मणब्रुवः ॥
इति चतुर्विंशतिमतात् । सूतकान्नं=ग्रहणकाले ततः प्राग्वा
कमन्नम् । *सचैलत्वमिति ।
ग्रहणे शावमाशौचं विमुक्तौ सौतिकं स्मृतम् ।
तयोः संपत्तिमात्रेण उपस्पृश्य क्रियाक्रमः ॥
इति ब्रह्माण्डे स्पर्शे मोक्षे च सपिण्डमृतमृतिवदशुचित्वो-
क्त्या तयोरिव अनयोरपि सचैलमेव स्नानं कार्यं, तदुत्तरं च क-
र्माधिकारः । एवं—
यत्र पुंसः सचैलं स्यात् स्नानं तत्र सुवासिनी ।
कुर्वीतैवाशिरः स्नानं शिरोरोगी जटी तथा ॥
इत्यपि न प्रवर्त्तते शावाद्यभिधानात् इत्यभिप्रायः । मुक्ति-
स्नानं चावश्यकमित्याह-*मुक्ताविति । *अमन्त्रकमिति ।
न्त्रा णामविधानाद् विकृतेरभावेनातिदेशाप्रवृत्तेश्च । *मूल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिति । हेमाद्रौ-

इन्दोर्लक्षगुणं पुण्यं रवेर्दशगुणं ततः ॥
गङ्गातोये तु संप्राप्ते इन्दोः कोटी रवेर्दश ॥
गवां कोटिसहस्रस्य यत्फलं लभते नरः ।
तत्फलं लभते मर्त्यो ग्रहणे चन्द्रसूर्ययोः ॥

*असंभवे तु माधवीये शङ्खः-

वापीकूपतडागेषु गिरिप्रस्रवणेऽपि च ।
नद्यां नदे देवखाते सरसीषूद्धृताम्बुनि ॥
उष्णोदकेन वा स्नायाद् ग्रहणे चन्द्रसूर्ययोः ॥

अत्र तारतम्यमाह मार्कण्डेयः-

शीतमुष्णोदकात्पुण्यमपारक्यं परोदकात् ।
भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ॥
ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् ।
तीर्थतोयं ततः पुण्यं महानद्यम्बु पावनम् ॥
ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यंस्ततोऽम्बुधिः ॥ इति

कार्तिके ग्रहणं श्रेष्ठं गङ्गायमुनसङ्गमे ।
मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने ॥
पौषे तु नर्मदा पुण्या माघे सन्निहिता शुभा ।
फाल्गुने वरणा पुण्या चैत्रे पुण्या सरस्वती ॥
वैशाखे तु महापुण्या चन्द्रभागा सरिद्वरा ।
ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी ॥
श्रावणे सिन्धुनामा तु तथा भाद्रे तु गण्डकी ।
आश्विने शरयूः श्रेष्ठा तथा पुण्या तु नर्मदा ॥

इति देवीपुराणम् । *असम्भवे त्विति ।

सर्वे भूमिसमं दानं सर्वे ब्रह्मसमा द्विजाः ।
सर्वे गङ्गासमं तोयं राहुग्रस्ते दिवाकरे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*उष्णोदकमातुरविषयम् । तथा-
गोदावरी महापुण्या चन्द्रे राहुसमन्विते।
सूर्ये च राहुणा ग्रस्ते तमोभूते महामुने ॥
नर्मदातोयसंस्पर्शे कृतकृत्या भवन्ति ते।
पृथ्वीचन्द्रोदये प्रभासखण्डे-
गावो नागास्तिला धान्यं रत्नानि कनकं मही।
संप्रदाय कुरुक्षेत्रे यत्फलं लभते नरैः ॥
तदिन्दुग्रहणेऽम्भोधौ स्नानाद्भवति षड्गुणम् ॥
तत्रैव सौरपुराणेऽम्बुधिस्नानमुपक्रम्य-
दानानि यानि लोकेषु विख्यातानि मनीषिभिः।
तेषां फलमवाप्नोति ग्रहणे चन्द्रसूर्ययोः ॥
देवीपुराणे—
गङ्गा कनखलं पुण्यं प्रयागे पुष्करं तथा।
कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे ॥
स्नानासंभवे स्मरणं कार्यम् ।
स्मृत्वा शतक्रतुफलं दृष्ट्वा सर्वाघनाशनम्।
स्पृष्ट्वा गोमेधपुण्यं तु पीत्वा सौत्रामणेर्लभेत् ॥

इत्यत्र समशब्दोपादानात्।
मृते जन्मनि संक्रान्तौ ग्रहणे चन्द्रसूर्ययोः।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥
इत्यत्राह-*उष्णोदकमिति ॥
आदित्यकिरणैः पूतं पुनः पूतं च वह्निना।
अतोव्याध्यातुरः स्नायाद्ग्रहणेऽप्युष्णवारिणा ॥
इति व्याघ्रोक्तेः। अपिनाऽस्पृश्यस्पर्शनादीनां। ग्रहः उष्णो-
दकायोग्यरोगिणस्तु—
आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्नात्वा वाजिमखं पुण्यं प्राप्नुयादविचारतः।
रविचन्द्रोपरागे च अयने चोत्तरे तथा॥

इति मार्कण्डेयोक्तेः। अत्र*श्राद्धमाह ऋष्यशृङ्गः—

चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत्।
तेनैव सकला पृथ्वी दत्ता विप्रस्य वै करे॥

भारते—

*सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने।
अकुर्वाणस्तु नास्तिक्यात्*पङ्के गौरिव सीदति॥

विष्णुः—

राहुदर्शनदत्तं हि श्राद्धमाचन्द्रतारकम्।

इदं चामान्नेन हेम्ना वा कार्यं, न त्वन्नेन।

आपद्यनग्नौ तीर्थे च चन्द्रसूर्यग्रहे तथा।

इत्यादि अग्रिमक्रमेण स्नातव्यं, गोरजःस्नानादिकमपि वा कार्यम्। *श्राद्धमिति। श्राद्धं तर्पणं च स्पर्शे कार्यम्॥

त्रिदशाः स्पर्शसमये तृप्यन्ति पितरस्तथा।
मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः॥

इति वासिष्ठात्। *सर्वस्वेनापीति। यदि सङ्क्लेपेणापि सामग्रीसम्पादने सर्वस्य व्ययो भवति तदाऽपीत्यर्थः।

विशिष्टे ब्राह्मणे प्राप्ते सूर्येन्दुग्रहणेऽयने॥
जन्मर्क्षग्रहपीडासु श्राद्धं कुर्वीत चेच्छया।

इत्यत्र इच्छया चेति "श्राद्धं प्रति रुचिश्चैव" इत्येतत्समानार्थम्। अतश्चाकरणे प्रत्यवायमाह—*पङ्के इत्यादि। *घृतस्येति। घृतस्य प्राचुर्यं बोध्यम्। तेन न पाकानुपपत्तिः। तथा च अन्ननिवेदनवाक्ये 'इदमन्नम्' इत्यत्र पिण्डदानवाक्ये च 'अयं पिण्डः' इत्यत्र 'इदं घृतम्' इति प्रयोग इत्यर्थः। 'गृहीते राहुणा श्राद्धभोक्तु' इति ग्रहणकालीन-श्राद्धतर-भोजन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आमश्राद्धं प्रकुर्वीत हेमश्राद्धमथापि वा ॥
इति शातातपोक्तेरिति हेमाद्रिमाधवादयः ।
*अपरार्कस्तु एतद्द्विजातीनां पाकाभावे द्रष्टव्यं तीर्थश्राद्धवत् ।
पाकाभावे द्विजातीनामामश्राद्धं विधीयते ।
इति सुमन्तूक्तेः ।
सैंहिकेयो यदा सूर्यं ग्रसते पर्वसन्धिषु ।
गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥
*घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेत् ॥
इति वायवीयोक्तेश्चेत्याह । विज्ञानेश्वरोऽप्याह-'ग्रहणे श्राद्धे *भोक्तुर्दोषो दातुस्त्वभ्युदयः'इति ।
मृतके मृतके भुङ्क्ते गृहीते शशिभास्करे ।
छायायां हस्तिनश्चैव न भूयः पुरुषो भवेत् ॥
इत्यापस्तम्बेन भोजननिषेधात् । अयं च निषेधः *श्राद्धभोक्तृहस्तिच्छायासाहचर्यात् । अत्र *ग्रहणनिमित्तक-

---

व्युदासार्थम् । तत्र गजच्छायायां श्राद्धभोजने यत्प्रायश्चित्तं तत्कार्यं "न भूयः पुरुषो भवेत्"इति दोषसाम्यात् । *अपरार्कस्त्विति । तुनाऽरुचिः । सा चाऽऽमहेमश्राद्धमेव कार्यं विधानात् । पाकाभावे इत्यस्य यत्र पाकसम्भवस्तत्राऽऽमश्राद्धमिति नार्थः, किन्तु यत्र पाको विहितोऽपि केनचिद्धेतुना न सम्भवति तत्र श्राद्धं न त्याज्यं, किं तु आमश्राद्धं कार्यमित्यर्थः । ग्रहणे तु पाको न विहित इति न पाकश्राद्धप्राप्तिः । *घृतेनेति । आमश्राद्धे बहुघृतस्य हेमश्राद्धे च तद्द्रव्यस्य दानार्थं, घृतमिति तु आमहेमश्राद्धयोः प्रचुरघृतद्रव्यकपिण्डदानार्थम् । *भोक्तुरिति । विज्ञानेश्वरोऽपि ब्राह्मणात्प्रतिगृह्य भोजनार्थकः क्षत्रियादेः प्रतिगृह्य यथेष्टविनियोगोपलक्षणम् । *श्राद्धभोक्तुरिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्राद्धेनैवामासंक्रान्त्यादिनैमित्तिकानां सिद्धिः । 'दर्शिकालभ्ययोरपि' इति कालादर्शोक्तेः।

अत्राशौचमध्येऽपि स्नानश्राद्धादि कार्यमेव।

सूतके मृतके चैव न दोषो राहुदर्शने।

*तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते॥

इति माधवीये वृद्धवसिष्ठोक्तेः।

*स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके।

इति व्याघ्रपादोक्तेश्च । कालादर्शे आङ्गिराः-

सर्वे वर्णाः सूतकेऽपि मृतके राहुदर्शने।

स्नात्वा श्राद्धं प्रकुर्वीरन्दानं शाठ्यविवर्जितम्॥

मदनपारिजातेऽप्येवम् । तेन

स्नानमात्रं प्रकुर्वीत दानश्राद्धविवर्जितम्।

इति *निर्मूलं वदन्तो गौडाः परास्ताः । इयं च शु-

अस्य श्राद्धीयं प्रतिग्रहीतुरित्यर्थः। तस्यैव "न भूयः पुरुषो भवेत्" इति दोष इति। *ग्रहणेति। देशकालाद्यविशेषे,न तु तद्विशेषे। *तावदेवेति। ग्रहणविहितसकलकर्मसु इति शेषः। स्नानमात्रे तद्वैयर्थ्यात्। अत एवानुपदमियं चेत्यादि। *स्मार्त्तेति। सूतके-आशौचे राहोस्तदुपरागादन्यत्र तदन्यनिमित्तकानां स्मार्त्तकर्मणां परित्यागो न तु तन्निमित्तकानामित्यर्थः। जननमरणनिमित्तकाशौचप्रयुक्तानाधिकारः अविशेषेण ग्रहणनिमित्तककर्मसामान्ये नास्तीति यावत्।

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतके तथा।

इत्यादिविशेषविधिस्तु स्नानाकरणेऽनिष्टविशेषबोधनार्थ इति हेमाद्रिः। एतन्मते स्मार्त्तः सायंहोमादिः नवघटिकादिगौणकाले ग्रहणानन्तरं कार्यः। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इत्यादिश्रुत एव स्वर्गे "सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ" इति तदतिरिक्तविष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विरविशेषान्मन्त्रदीक्षापुरश्चरणादिसर्वस्मार्तकर्मविष-
या । मदनरत्नेऽप्येवम् । रजस्वलायास्तु भार्गवार्चनदीपि-
कायां सूर्योदयनिबन्धे—

न सूतकादिदोषोऽस्ति ग्रहे होमजपादिषु ।
ग्रस्ते स्नायादुदक्यापि तीर्थादुद्धृत्य वारिणा ॥ इति ।

अत्र—

स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रान्तरितनीरेण स्नानं कृत्वा व्रतं चरेत् ॥

इति मिताक्षरोक्तो विधिर्ज्ञेयः ।

तथा ग्रहणे रात्रावपि श्राद्धादि कार्यम् ।

ग्रहणोद्वाहसंक्रान्तियात्रार्तिप्रसवेषु च ।
*दानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते ॥

इत्यपरार्के व्यासोक्तेः,

चन्द्रग्रहे तथा रात्रौ स्नानं दानं प्रशस्यते ।

इति देवलोक्तेश्च । यदा तु ज्योतिःशास्त्रगम्ये दिने
चन्द्रग्रहो रात्रौ सूर्यग्रहस्तदा दानस्नानादि न कार्यम् ।

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् ॥

यदयं स्नानान्यविषयक इत्यन्ये । सूतके यः स्मार्तकर्मत्यागः स
राहुसूतकादन्यत्र । अत्र तु तत्कालप्राप्तानां तेषां न त्याग इत्यर्थ इति ।
इदानीन्तनास्ते तु ग्रहणमध्येऽपि तमनुतिष्ठन्ति ।

*निर्मूलामिति । परासहेतुगर्भम् । नैमित्तिके इत्य-
नेन-सोमयागप्रारम्भानन्तरं रजस्वलाया न स्नानं, किं तु
तद्वस्त्रत्यागयोनिशोधनादिकमेवेति श्रौतग्रन्थसंमतं लभ्यते, व्रतं
रजस्वलाया विहितम् । *दानमिति । श्राद्धस्य विप्रापेक्षया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति षट्त्रिंशन्मतात् । ग्रहणदिने वार्षिकश्राद्धमाहुः तु प्रयोगपारिजाते गोभिलः—

दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् ।
अन्नेनासम्भवे हेम्ना कुर्यादामेन वा सुतः ॥ इति ।

अत्र रविपितृसुतशब्दाः प्रदर्शनार्थाः, न्याय्यसाम्यात् । तेन चन्द्रग्रहणेऽपि सपिण्डादिवार्षिकमन्वादिना तद्दिने एव कार्यमिति मदनपारिजाते व्याख्यातम् । पृथ्वीचन्द्रोदयेऽप्येवम् । तेन यानि—

आमश्राद्धं प्रकुर्वीत मासंवत्सरादृते ।
अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचित् ॥

इति मरीचिलौगाक्ष्यादिवचनानि, तानि ग्रहणादिनातिरिक्तविषयाणि । निर्णयामृतेप्येवम् । यानि तु—

ग्रहणात्तु द्वितीयेऽह्नि रजोदोषात्तु पञ्चमे ।
ग्रस्तोदये यदा चन्द्रे प्रत्यब्दे समुपस्थितम् ॥
तद्दिने चोपवासः स्यात्प्रत्यब्दं तु परेऽहनि ।

तथा—

ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतो यदि ।
प्रत्यब्दं तु तदा कार्यं परेऽहन्येव सर्वदा ॥
चन्द्रसूर्योपरागे च तथा श्राद्धं परेऽहनि ।

इत्यादि वचनानि, तानि महाविबन्धेषु क्वाप्यनुपलम्भान्निर्मूलानि, प्रत्युत पूर्वोक्तनिबन्धेषु तद्दिन एव श्राद्धमुक्तमित्यलम् ।

दानत्वात् सङ्ग्रहः । श्राद्धं च दिवाभोजनमकृत्वा कार्यं न तु भोजनं कृत्वा । श्राद्धात्प्राक् तद्दिनभोजननिषेधस्येहापि निष्प्रत्यूहं प्रवृत्तेः । तर्पणं तु भुक्त्वाऽपि कथं चिन्नित्यतर्पणवदिति सम्प्रदायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रहणादिसप्तदिनपर्यन्तं रामगोपालागमदीक्षोक्ता शिवार्चनचन्द्रिकायां ज्ञानार्णवे—

*मन्त्राद्यारम्भणं कुर्याद्ग्रहणे चन्द्रसूर्ययोः ।
ग्रहणाद्वाऽपि देवेशि कालः सप्तदिनावधि ॥ इति ।

रत्नसागरे—

*(१)सत्तीर्थेऽर्कविधुग्रासे *तन्तुदामनपर्वणि ।
*मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत् ॥

---

*मन्त्रादीनि । आदिना पुरश्चर्यादिग्रहः *सत्तीर्थे इत्यादि । अङ्गत्वे सप्तमी न तु निमित्तत्वे । तेन तेषु तदकरणेऽपि न दोषः । एवं तुलादिमहादानादावपि ग्रहणस्याङ्गत्वमेव न निमित्तमित्यूह्यम् । *तन्त्विति । पवित्रारोपणदमनारोपणकालयोः ।

*मन्त्रदीक्षा=मन्त्रोपदेशः ।

महादीक्षा तथा दीक्षा उपदेशस्तथा परः ।
युगे युगे च कर्त्तव्य उपदेशः कलौ युगे ॥

इत्युक्तः ।

चन्द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥

इत्युपदेशस्वरूपम् । गुर्वलाभे तु मन्त्रशास्त्रे—

गुरोरभावे विप्रेन्द्र मन्त्रग्रहणमुच्यते ।
कृष्णपक्षे त्रयोदश्यां दक्षिणामूर्तिसन्निधौ ॥
ताडपत्रे (२)मनुं लिख्य स्थापयीत तदग्रतः ।
क्षीरखण्डादि नैवेद्यं स्थापयीत ततः शिवे ॥
ताडपत्रं समालोच्य पठेदष्टोत्तरं शतम् ।
एवं गृहीतो मन्त्रश्चेद्गुरोरपि विशिष्यते ॥

---

(१) 'चन्द्रसूर्यग्रहे तीर्थे महापर्वादिके तथा' इति क्वचित्पाठः ।
(२) मनुं=प्राणमन्त्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र सूर्यग्रहणमेव *मुख्यम् ।

सूर्यग्रहणकाले तु नान्यदन्वेषितं भवेत् ।
सूर्यग्रहणकालेन समो नान्यः कदाचन ॥
न मासतिथिवारादिशोधनं सूर्यपर्वणि ।

इति तत्रैव कालोत्तरवचनात् ।

*चन्द्रग्रहे तु या दीक्षा या दीक्षा व्रतचारिणाम् ।
वनस्थस्य च या दीक्षा दारिद्र्यं सप्तजन्मसु ॥

इति तत्रैव योगिनीतन्त्रे निषेधाच्च ॥

ग्रहणं च जन्मराश्यादौ निषिद्धम् । तदुक्तं ज्योतिषे-

त्रिषट्दशाऽऽयोपगतं नराणां
शुभप्रदं स्याद्ग्रहणं रवीन्द्वोः ।
द्विसप्तनन्देषुषु मध्यमं स्या-
च्छेषेष्वनिष्टं कथितं मुनीन्द्रैः ॥ इति ।

आयः=एकादश, नन्दाः=नव, इषुः=पञ्च । म
दनरत्ने गर्गः-

जन्मसप्ताष्टरिःफाङ्कदशमस्थे *निशाकरे ।
दृष्टोऽरिष्टप्रदो राहुर्जन्मर्क्षे निधनेऽपि च ॥

रिःफं=द्वादश, अङ्काः=नव, निधनं=सप्तमतारा ।
पृथ्वीचन्द्रोदये विष्णुधर्मे-

यन्नक्षत्रगतो राहुर्ग्रसते शशिभास्करौ ।
तज्जातानां भवेत्पीडा ये नराः शान्तिवर्जिताः ॥

गुरौ संभाविता दोषाः प्रायेण तु कलौ युगे ।
एवं गृहीते मन्त्रस्य सिद्धिर्भवति पार्वति ॥ इति ।

*मुख्यमिति । सूर्यग्रहदीक्षायाः प्राशस्त्यार्थमिदम् । अन्यथा
ज्ञानार्णवधृतचन्द्रपदवैयर्थ्यात् । *चन्द्रग्रहे त्विति । निन्दाऽपि
स्तुत्यर्थैवेति द्रष्टव्यम् । *निशाकरे इति । दिवाकरोऽपि ग्राह्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रैव पुराणान्तरे—

सूर्यस्य संक्रमो वाऽपि ग्रहणं चन्द्रसूर्ययोः।
*यस्य त्रिजन्मनक्षत्रे तस्य रोगोऽथ वा मृतिः।
*तस्य दानं च होमं च देवार्चनजपौ तथा।
उपरागाभिषेकं च कुर्याच्छान्तिर्भविष्यति॥
स्वर्णेन वाऽथ पिष्टेन कृत्वा सर्पस्य चाकृतिम्।
ब्राह्मणाय ददेत्तस्य न रोगादिश्च तत्कृतः॥

जन्मनक्षत्रं तत्पूर्वोत्तरे च त्रिजन्मनक्षत्रमित्युच्यते। जन्मदशमैकोनविंशतितारा इति केचित्। सर्पस्य=तदाकारस्य राहोरित्यर्थः। अद्भुतसागरे भार्गवः—

यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते।
राज्यभङ्गं सुहृन्नाशं मरणं चात्र निर्दिशेत्॥

राज्यस्य नक्षत्रम्=अभिषेकनक्षत्रमिति तत्रैव व्याख्यातम्। भार्गवार्चनदीपिकायां ज्योतिःसागरे—

*सौवर्णं कारयेन्नागं पलेनाथ पलार्धतः।
तदर्धेन तदर्धेन फणायां मौक्तिकं न्यसेत्॥
ताम्रपात्रे निधायाथ घृतपूर्णे विशेषतः।
कांस्ये वा कान्तलोहे वा न्यस्य दद्यात्सदक्षिणम्॥
चन्द्रग्रहे तु रूप्यस्य बिम्बं दद्यात्सदक्षिणम्।

---

*यस्येति। होरायां ग्रहणे तु—

होरायां गृह्यते यस्य स वा मरणमृच्छति।

इति द्रष्टव्यम्। *तस्य दानं चेति। विभवे दानहोमौ, तदभावे एकैकं; चकारद्वयात्। होमदेवार्चनजपेषु विशेषस्तत्रैव।

मण्डलाधिपदैवत्यैर्मन्त्रैर्मृत्युञ्जयादिभिः।
होमं कुर्यात्प्रयत्नेन तत्तन्मन्त्रान् जपेत्सुधीः॥ इति।

मण्डलानि=तत्तन्नक्षत्रगणात्मकानि, तदधिपाः=अश्विवरुणवाय्विन्द्राः। नागमात्रदानमशक्तस्य। शक्तस्य त्वाह—*सौवर्णमिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नागं रुक्ममयं सूर्यग्रहे बिम्बं च हेमजम् ॥
*तुरङ्गरथगोभूमितिलसर्पिश्च काञ्चनम् ॥

कालविवेकेऽपि—

सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनम् ।
सदक्षिणं सवस्त्रं च ब्राह्मणाय निवेदयेत् ॥
सौवर्णं राजतं वाऽपि बिम्बं कृत्वा स्वशक्तितः ।
उपरागभवक्लेशच्छिदे विप्राय कल्पयेत् ॥

मन्त्रस्तु—

तमोमय महाभीम सोमसूर्यविमर्दन ।
हेमताराप्रदानेन मम शान्तिप्रदो भव ॥
विधुन्तुद नमस्तुभ्यं सिंहिकानन्दनाच्युत ।
दानेनानेन नागस्य रक्ष मां वेधजाद्भयात् ॥ इति ।

अत्र शान्तिरप्युक्ता हेमाद्रौ मात्स्ये-

यस्य राशिं समासाद्य भवेद्ग्रहणसम्भवः ।
स्नानं तस्य प्रवक्ष्यामि मन्त्रौषधिसमन्वितम् ॥
चन्द्रोपरागं सम्प्राप्य कृत्वा ब्राह्मणवाचनम् ।
संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः ॥
पूर्वमेवोपरागस्य समानीयौषधादिकम् ।
स्थापयेच्चतुरः कुम्भानव्रणान्सलिलान्वितान् ॥
गजाश्वरथ्यावल्मीकसङ्गमाद् ह्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥

---

*तुरङ्गेति । गजादेर्दानसामान्यस्य चोपलक्षणम् । राज्याभिषेकनक्षत्रोपरागे च दानहोमादिवत्तुरङ्गादिदानमप्यत्यावश्यकं, शान्तिश्च कार्या । पुरश्चरणचन्द्रिकायां—

अथान्येन प्रकारेण पुरश्चरणमिष्यते ।
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः । इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चगव्यं पञ्चरत्नं पञ्चत्वक् पञ्चपल्लवम् ।
रोचनं पद्मकं शङ्खं कुङ्कुमं रक्तचन्दनम् ॥
शुक्तिस्फटिकतीर्थाम्बुसितसर्षपगुग्गुलान् ।
मधुकं देवदारुं च विष्णुक्रान्तां शतावरीम् ॥
बलां च सहदेवीं च निशाद्वितयमेव च ।
गजदन्तं कुङ्कुमं च तथैवोशीरचन्दनम् ॥
एतत्सर्वं विनिक्षिप्य कुम्भेष्वावाहयेत्सुरान् ।
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥
आयान्तु यजमानस्य दुरितक्षयकारकाः ।
योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥
सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु ।
मुखं यः सर्वदेवानां सप्तार्चिरमितद्युतिः ॥
चन्द्रोपरागसम्भूतामग्निः पीडां व्यपोहतु ।
यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः ॥
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।
रक्षोगणाधिपः साक्षान्नीलाञ्जनसमप्रभः ॥
खड्गहस्तोऽतिभीमश्च ग्रहपीडां व्यपोहतु ।
नागपाशधरो देवः सदा मकरवाहनः ॥
स जलाधिपतिर्देवो ग्रहपीडां व्यपोहतु ।
प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः ॥
वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ।
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः ॥
चन्द्रोपरागकलुषं धनदोऽत्र व्यपोहतु ।
योऽसाविन्द्रधरो देवः पिनाकी वृषवाहनः ॥
चन्द्रोपरागपापानि स नाशयतु शंकरः ।
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥
ब्रह्मविष्ण्वर्करुद्राश्च दहन्तु मम पातकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवमावाहयेद्देवान्मन्त्रैरेभिश्च वारुणैः ॥
एतानेव तथा मन्त्रान्स्वर्णपट्टे विलेखयेत् ।
ताम्रपट्टेऽथ वाऽऽलिख्य नववस्त्रे तथैव च ॥
मस्तके यजमानस्य निदध्युस्ते द्विजोत्तमाः ।
कलशान् द्रव्यसंयुक्तान्नानारूपसमन्वितान् ॥
गृहीत्वा स्नापयेद् गूढं भद्रपीठोपरि स्थितम् ।
पूर्वैरेव तु मन्त्रैश्च यजमानं द्विजोत्तमाः ॥
अभिषेकं ततः कुर्यान्मन्त्रैर्वारुणसूक्तकैः ।
आचार्यमर्चयेत्पश्चात्स्वर्णपट्टं निवेदयेत् ॥
आचार्यदक्षिणां दद्याद्गोदानं च स्वशक्तितः ।
होमं वाऽपि प्रकुर्वीत तिलैर्व्याहृतिभिस्तथा ॥
दानं च शक्तितो दद्याद्यदीच्छेदात्मनो हितम् ।
सूर्यग्रहे सूर्यनामयुक्तान्मन्त्रांश्च कीर्तयेत् ॥
अनेन विधिना यस्तु ग्रहणे स्नानमाचरेत् ।
न तस्य ग्रहणे दोषः कदाचिदपि जायते ॥
इति ग्रहणशान्तिः ॥

भार्गवार्चनदीपिकायां ब्रह्मसिद्धान्ते—

सर्वैः पटस्थितं वीक्ष्यं खस्थं तैलाम्बुदर्पणैः ।
ग्रहणं गुर्विणी जातु न पश्येत पटं विना ॥

तथा मङ्गलकृत्येषु विधिविशेषो हेमाद्रौ—

त्रयोदश्यादितो वर्ज्यं दिनानां नवकं ध्रुवम् ।
माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ॥

प्रकारान्तरं तत्रैवोक्तम्—

द्वादश्यादितृतीयान्तो बेध इन्दुग्रहे स्मृतः ।
एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्तितः ॥

इदं च पूर्णग्रासे । *त्र्यहं खण्डग्रहे तयोः' इति त-

*त्र्यहमिति।तदुक्तं दीपिकायां-"खण्डग्रहे त्वेतयोः प्राक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वोक्तेः । इदं च *ग्रस्तास्ते त्रिदिनं पूर्वम्' इति नारदेन ग्रस्तास्ते विशेषोक्तेर्ग्रस्तास्तभिन्नग्रहणपरम् । ज्योतिर्निबन्धे व्यवनः—

ग्रहणोत्पातभं त्याज्यं मङ्गलेषु ऋतुत्रयम् ।
यावच्च रविणा भुक्त्वा भुक्तं भं दग्धकाष्ठवत् ॥

अन्यानि चाग्नेयादिमण्डलानि तत्फलं वर्णविकारादिफलं च दैवज्ञेभ्यो ज्ञेयम् । पुरश्चरणचन्द्रिकायाम्—

*चन्द्रसूर्योपरागे च स्नात्वा प्रयतमानसः ।
*स्पर्शादिमोक्षपर्यन्तं जपेन्मन्त्रं समाहितः ॥

वाच दिनं तथा ग्रहणदिनं निन्द्यम्''इति *ग्रस्तास्ते इति । 'ग्रस्तोदये तूत्तरं त्रिदिनम्'इति केचित् । आग्नेयादीनि=आग्नेयवारुणवायव्येन्द्राणि । अत्राथर्ववेदोक्ताः शान्तयो राजभिः कारणीयाः ।

आग्नेयीं कारयेच्छान्तिं शान्तिं कुर्याच्च वारुणीम् ।
वायवीं च तथा कुर्यान्माहेन्द्रीं तत्र कारयेत् ॥

इति कात्यायनोक्तेः । एवं राजभिस्तदितरैश्च नाडीदोषवारणाय स्नानादि कार्यम् ।

ग्रहपरिपीडितनाडीनक्षत्रदोषशमनाय ।
सह शतपुष्पैः स्नायात्फलिनीचन्दनोशीरैः ॥
ताम्रपात्रं तिलैः पूर्णं पूर्णं वा गव्यसर्पिषा ।
भास्करग्रहणे दद्यान्नाडीदोषोपशान्तये ॥
घृतकुम्भोपरि निहितं शङ्खं नवनीतपूरितं दद्यात् ।
नाड्यादिदोषशान्त्यै द्विजाय दोषाकरग्रहणे ॥

इत्यादिवाक्यात् । *चन्द्रसूर्योपरागे चेति ।

यद्वा पुण्योदके स्नात्वा शुचिः पूर्वमुपोषितः ।

इति पाठान्तरात् पूर्वोपवासानन्तरं नाभिमात्रोदके स्थितः इत्यनुसंधेयम् । *स्पर्शादीति । अतश्च ग्रस्तोदये ग्रस्तास्ते च न पुरश्चरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जपाद्दशांशतो होमस्तथा होमात्तु*तर्पणम् ।
तर्पणस्य दशांशेन मार्जनं कथितं किल ॥
तत्रैव देवतारूपं ध्यात्वात्मानं प्रपूज्य च ।
नमोन्तं *मन्त्रमुच्चार्य तदन्ते देवताभिधाम् ॥
द्वितीयान्तामहं पश्चादभिषिञ्चाम्यनेन तु ।
तोयैरञ्जलिना शुद्धैरभिषिञ्चेत्स्वमूर्धनि ॥
मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत् ।
जपोऽर्चापूर्वको होमस्तर्पणं चाभिषेचनम् ॥
भूदेवपूजनं पञ्चप्रकारोक्ता पुरस्क्रियाः ॥

तथा—

होमाशक्तौ जपं कुर्याद्धोमसंख्या*चतुर्गुणम् ।
एवं कृते तु मन्त्रस्य जायते सिद्धिरुत्तमा ॥

ग्रहणप्रसङ्गात्कुरुक्षेत्रप्रतिग्रहे प्रायश्चित्तमुच्यते ।
तत्रारुणस्मृतौ—

काम्यपुरश्चरणेन च नैमित्तिकस्य बाधः वैश्यकर्त्तृकप्रयोगे सामदश्यस्य काम्यैकविंशतिसंख्यया बाधवत् । अतः स्नानदानादि न कार्यमिति केचित् । संख्याकार्यं सामिधेनीपरिच्छेदस्तस्य संख्योत्तरेण सिद्धेर्युक्तस्तत्र बाधः, न त्वत्र । काम्येन नैमित्तिकस्नानादिकार्यस्य प्रत्यवायपरिहारस्यासिद्धेः । अतः पुरश्चरणोत्तरमतिक्रान्तं नैमित्तिकं कार्यमित्याहुः । वस्तुतस्तु तदर्थं भार्यादिप्रतिनिधिनैव कार्यम्, एकभक्तनक्तादिवत् गौणकालविधिभावात् 'यावद्दर्शनगोचरः" इत्युक्तेश्चातिक्रान्तस्य दुष्करत्वादिति

*तर्पणमिति । तत्प्रकारश्च—

मूलमन्त्रं समुच्चार्य तदन्ते देवताभिधाम् ।
द्वितीयान्तामहं *पश्चात्तर्पयामि नमोन्तक ॥

इति बोध्यः । *मन्त्रं=मूलमन्त्रम् । *चतुर्गुणमिति विप्रपरम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रतिग्राही कुरुक्षेत्रे न भूयः पुरुषो भवेत् ।
तथाऽपि मनसः शुध्द्यै प्रायश्चित्तं समाचरेत् ॥
तप्तकृच्छ्रद्वयं कुर्यादैन्दवेन समन्वितम् ।
सत्रेण वा यजेताथ जपेद्वा लक्षसप्तकम् ॥
वापीकूपतडागादिखननैर्विसृजेद्धनम् ॥ इति ।

*एतच्च—

यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् ।
तस्योत्सर्गेण शुद्ध्यन्ति दानेन तपसैव च ॥

इति मनूक्तेरुत्सर्गोत्तरं ज्ञेयमिति दिक् । ग्रहणान्त-
रितस्य पूर्वसंकल्पितद्रव्यस्य द्वैगुण्यं भवतीति शिष्टाः ।
पठन्ति च ब्रह्मवैवर्ते—

अन्येषां तु—

षड्गुणं चाष्टगुणितं यथासंख्यं द्विजातयः ।
तेषां स्त्रीणां तु विज्ञेयस्तेषामेव समो जपः ॥
यं वर्णमाश्रितः शूद्रस्तज्जपस्तस्य कीर्तितः ।

इत्यपि द्रष्टव्यम् ।

यद्यदङ्गं विहीयेत तस्य स्याद् द्विगुणो जपः ।

इति मन्त्रशास्त्रं तु अशक्तपरम् । तप्तकृच्छ्रं=तत्प्रत्याम्नायः
प्राजापत्यत्रयम् । ऐन्दवं=चान्द्रायणं, प्राजापत्याष्टकम् ।

यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम् ।
प्राजापत्येन कृच्छ्रेण शोधयेत्तान्न संशयः ॥

इति वचनात् । तदुभयोत्तरं सत्रं कार्यम्, अथ वा तदुभयोत्तरं स-
प्तलक्षगायत्रीजपः ।

प्रजप्य भोजयेद्विप्रान् शतं साग्रमतन्द्रितः ।

इत्युत्तरार्द्धम् । वाप्याद्यकरणे तु विप्रेभ्यो देयमित्याह—*एतच्चे-
ति । ग्रहणभोजनेऽप्येतदेव प्रायश्चित्तम् "न भूयः पुरुषो भ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दातव्यमिति नो कार्य्यां वक्तव्यं कुत्रचित्क्वचित्।
अहोरात्रमतिक्रम्य तद्दानं द्विगुणं भवेत् ॥
दशोत्तरं पर्वसु स्याच्छतं चन्द्रग्रहे भवेत्।
सूर्यग्रहे सहस्रं तन्मरणेऽनन्तकं स्मृतम् ॥ इति।

अत्र मूलं चिन्त्यम् ॥ अत्र केचिद्बौद्धतुल्या आहुः-"ग्रहणस्य निमित्तत्वेन तन्निश्चयस्य प्रयोजकत्वात् ज्योतिःशास्त्रादिना जातस्य ज्ञानस्य निमित्तत्वे प्राप्तेऽपि-

स्नानं दानं तपः श्राद्धमनन्तं राहुदर्शने।
चन्द्रसूर्योपरागे तु यावद्दर्शनगोचरे ॥

इति जाबाल्यादिवचनेषु *दृशिप्रयोगाच्चाक्षुषज्ञानस्यैवोपसंहारन्यायेन निमित्तत्वम्। अन्यथा दृशौ लक्षणा स्यात्। *तेन मेघाच्छादनेऽन्धादीनां जन्मसप्ताष्टेत्यादिनिषिद्धदर्शनानां च स्नानश्राद्धादौ नाधिकारः" इति। कल्पतरुरप्याह-'दर्शनशब्देन चाक्षुषज्ञानं गृह्यते, न ज्ञानमात्रम्। अज्ञातस्य निमित्तत्वासंभवान्निमित्तत्वमहिम्नैव ज्ञानलाभेन दर्शनपदवैयर्थ्यापत्तेः। तेन चाक्षुषधीयोग्यकालः पुण्यः। योग्यत्वं च प्रयत्नानपनेयचाक्षुषज्ञानप्रतिबन्धकराहित्यम्। *तेन मेघच्छन्ने योग्यताऽभावान्न स्नानादि' इति। निर्णयामृतेऽप्येवम्। तदेतत्तुच्छम्। यदि चाक्षुषज्ञानं निमित्तं स्यात्तदा

सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहस्तथा।
तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित् ॥

इति वाक्यं व्यर्थं स्यात्। चाक्षुषज्ञानाभावेन प्राप्यवेत्"इत्युक्तेः। *दृशीति। राहुदर्शन इत्यस्य कृदभिहितत्वेन दृश्यमाने राहावित्यर्थः। *तेनेति। "दृष्ट्वा स्नायात्" "भुक्त्वा दृष्ट्वा तु भुञ्जीत" इत्यादौ च स्नानादिकर्तृगतस्यैव दर्शनस्य यादृसम्बन्धाधिकारविहितक्त्वाप्रत्ययाद्विशेषणत्वप्रतीतेः स्नानादावप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावात्। तत्पूर्वकत्वाच्च निषेधस्य। न चेदं* ग्रस्तास्तपरम्। रविचन्द्रयोरस्तानन्तरं रात्रिदिवाग्रहणत्वादिति वाच्यम्। तत्रपदस्य ग्रहपरत्वेऽधिकरणत्वायोगान्निमित्तपरत्वे च तद्ग्रहनिमित्तकस्नानदानादेरस्तात्प्रागप्यभावापत्तेः। अथ तत्रेति रात्रिदिने उच्येते *सा वैश्वदेवीतिवद्गुणभूते अपि। तन्न। *तादृशमन्त्रलिङ्गाभावात्। तयोर्निमित्तत्वे अधिकरणत्वे वाऽन्यप्रयुक्तस्नानाद्यभावापत्तेश्च। *किं च

नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन।
नोपरक्तं न वारिस्थं न मध्यं नभसो गतम्॥

इति मनुवचनं बाध्येत*, 'दृष्टोऽरिष्टप्रदो राहुः' इत्यादि च। न चात्र विहिते दर्शने निषेधाप्रवृत्तिवत्पर्युदसनीयताऽपि न युक्तेति वाच्यम्। दर्शनस्य निमित्तत्वानुवादेन *विधेयत्वाभावात्। एतच्चाग्रे वक्ष्यामः।

वयः। अन्यथा दर्शनापगमादौ स्नानापत्तेरिति भावः। दर्शनोत्थानविशेषे एकस्यापि कर्मणस्तत्काले कर्तुमशक्यत्वाद्योग्यतानिवेशः। *इदमिति। तावताऽपि तद्वैयर्थ्यपरिहारात्। *सेति। "तमे पयसि दध्यानयति सा वैश्वदेवी" इति श्रुतौ गुणीभूतं यस्तच्छब्दार्थः। *तादृशेति। वैश्वदेवीशब्दार्थान्वयेन मन्त्रवर्णिकदेवतासंबन्धिनि यागे विनियोगलाभात्पयोलाभः, न त्विह तथा किञ्चिदस्तीत्यर्थः। ननु अन्यनिमित्तकस्नानादि भविष्यति तन्निमित्तकन्यायादित्यत आह—*किं चेति। *बाध्येतेति। उपरक्तेक्षणस्यासिद्धेः। *विधेयत्वेति। येन "मा हिंस्यात्" इत्यस्याग्नीषोमीयादिविधिनेव प्रकृते दर्शनविधिना निषेधस्य प्राप्तिप्राप्तगोचरत्वं स्यात्तदेव तु नेत्यर्थः। ननु—

एकरात्रमुपोष्यैव राहुं दृष्ट्वाऽक्षयं नरः।
पुण्यमाप्नोति कृत्वा च स्नानश्राद्धे विधानतः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*तत्त्वे वा दर्शनस्य विधौ तत्र स्नानविधौ च *वि-
रुद्धत्रिकद्वयापत्तेः। अस्तु *सकृद्दर्शनविधानेन संकोच
इति चेन्न। 'मुक्तिं दृष्ट्वा ततः स्नायात्' इति मुक्तिस्नानेऽपि
चाक्षुषज्ञानस्य निमित्तत्वापत्तेः। अस्तु किं नश्छिन्नमिति
चेत्। न, ग्रस्तास्ते

तयोः परेद्युरुदये दृष्ट्वाऽभ्यवहरेच्छुचिः।

इति दर्शनोत्तरं भोजनविधानादन्धस्य पूर्ववेधकाल
इव यावद्दर्शनं भोजननिषेधापत्तिः। मध्येऽन्धीभूतस्य
सुतरां यावच्चक्षुःप्राप्त्युपवासप्रसङ्गश्च। अथान्नलोलुप
तया तत्र ज्ञानमात्रं विवक्ष्यते। तत्तत्पूर्वमपि निर्लज्जे

इति वाक्येन उपवासदर्शनोभयपूर्वकस्नानश्राद्धे विधाय तत्राक्षय्य
ण्यरूपफलसंबन्धो बोधनीयः, न तूपवासदर्शनयोस्तादृशफलसंबन्धः
बहुषु वचनेषु स्नानश्राद्धयोरेव फलसंबन्धश्रवणात्। दर्शनोपवासयो
स्त्वफलत्वादङ्गतया विधिरस्त्वत आह—*तत्त्वे वेति। *विरुद्धेति
दर्शनस्य विधौ तत्र स्नानादिविधौ च दर्शनस्य उपादेयत्वविधेयत्व
गुणत्वानि त्रीणि उद्देश्यत्वानुवादत्वमुख्यत्वानि त्रीणि इति विरुद्धे
त्यर्थः। यथा "वाजपेयेन स्वाराज्यकामो यजेत" इत्यत्र वाजपेयेन
यागं कुर्यात् यागेन स्वाराज्यं संपादयेदित्यर्थमाशङ्क्य यजेरुपादे
यत्वविधेयत्वगुणत्वानि उद्देश्यत्वानुवादत्वमुख्यत्वानीति विरुद्ध
त्रिकद्वयमापादितम्। तदुक्तं माधवेन—

उपादेयविधेयत्वगुणत्वाख्यं त्रिकं यजेः।
उद्देश्यानूक्तिमुख्यत्वं त्रिकं तस्य गुणं प्रति॥ इति।

*सकृदिति। सर्वनैमित्तिकार्थं तन्त्रेण सकृद्दर्शनं विधेयम्
तत्र न विरुद्धत्रिकद्वयम्, अनुवादत्वानुपगमात्, "दृष्टोऽरिष्टप्रद" इति
"नोपरक्तम्" इत्यादि च रागप्राप्तेक्षणनिषेधपरम्। न च नोपरक्त
मित्येतदस्तु तथा, "अरिष्टप्रदः" इति तु वैधविषयमिति वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वीक्रियताम्* । एतेन यत्केनचिदुक्तं स्पर्शस्नानं मुक्तिस्नानं च यस्य दर्शनं तेनैव कार्यं नान्येन कृत्वाप्रत्ययेन समानकर्तृकत्वावगतेरिति, तन्निरस्तम् । का तर्हि

त्वम् । चन्द्रांशे सार्थक्यात् । अङ्गत्वमते च उपरागनिमित्तकाशौचस्यापि दर्शनोत्तरकालत्वेन "नाशुची राहुतारकाः" इति निषेधोऽपि प्रवर्त्तेत, ऐहिकानिष्टविशेषार्थो वा स्यात् । यत्तु-"जन्मादिस्थोपरागकान्यः 'दृष्ट्वा स्नायात्' इतिदर्शनविशेषोऽयं विशेषतःपुरुषगतानिष्टविशेषसङ्कीर्त्तनरूपानिन्दोन्नीतः पर्युदासः, तादृशोपरागकाणां च वैधदर्शनाभावान्न सर्वथा स्नानादीति, तदुच्छम् । तेषामपि प्रमादादितः स्नानजन्याभ्युदयलाभेन वाऽनिष्टमङ्गीकृत्यापि दर्शने इष्टं स्नानादि न स्यात् । पर्युदस्तकर्तृकदर्शनस्यावैधत्वेनाधिकारासम्पादकत्वात्, अवैधाध्ययनवत् । किं च वैधदर्शनशेषपर्युदासातिक्रमे तत्कार्यासम्पत्तिमात्रं न तु द्रष्टॄणां कश्चिदनर्थ इति शान्तिविशेषविध्यनुपपत्तेश्च । न च नायं शान्तिविधिः पर्युदासातिक्रमविषयः, किं तु यः सामान्यरूपो रागप्राप्तदर्शननिषेधस्तदतिक्रमविषयः । यथा ऋतुगमननियमविधौ पर्ववर्जमिति पर्युदासेऽपि रागप्राप्तगमनसामान्यगोचरपर्वनिषेधातिक्रमप्रायश्चित्तविधिस्तद्वदिति वाच्यम् । सामान्यतो दर्शननिषेधस्येहासन्निधानात् । तस्मादयं राशिविशेषगतोपरागे रागप्राप्तदर्शननिषेध एव, अस्तु वा पर्युदासः । ऋतुगताद्यनिशाचतुष्टयगमनादिषु नञ्युक्तस्नातकव्रतातिक्रमे च शतशः पर्युदासविषयेषु च प्रायश्चित्तविधिदर्शनाद्वर्जनप्रतीत्यविशेषाच्च तदतिक्रमेऽपि प्रायश्चित्तमपेक्षणीयमेव । तत्र निषेधवाक्यस्यर्थपर्युदासातिक्रमे क्रतुवैगुण्यपरिहारार्थत्वेन क्रत्वर्थं, पुरुषार्थपर्युदासातिक्रमे च पुरुषगतानिष्टपरिहारार्थत्वेन पुरुषार्थम् । तस्माद्राशिविशेषोपरागवतामपि प्रमादादिना दर्शने स्नानादि भवत्येवेति भावः ।

*स्वीक्रियतामिति । तथा च 'यावद्दर्शनगोचरे' इति वाक्येऽन्धा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्य गतिः ? । दृशे*रुद्देश्यविशेषणत्वाद् ग्रहैकत्ववत्
*विवक्षयाऽर्थतः सिद्ध*ज्ञानमात्रानुवादत्वे सर्वं सु
स्थम् । अङ्गुल्याद्यनादेश्यग्रहव्यावृत्त्या वा दर्शनस्यार्थ
वत्त्वम् । *न चोक्तयोग्यताऽपि साध्वी, दर्शनोत्ता
मेघच्छन्ने योग्यताऽभावापत्त्या दानाद्यभावापत्तेः । *तेन
तत्तद्रेखावच्छेदेन ज्योतिःशास्त्रावेद्यत्वमेव योग्यता
किं च—

रजसो दर्शने नारी त्रिरात्रमशुचिर्भवेत् ।
इत्यत्राप्यन्धस्त्रीणामा*शौचाभावप्रसङ्गः ।

दिसाधारण्यार्थं व्यधिकरणस्यापि दर्शनस्य निमित्तावच्छेदकत्वेना
न्वयाच्चन्द्रसूर्योपरागः यस्मिन् देशे यावत्कर्मपर्याप्तश्चाक्षुषज्ञानयोग्य
स तद्देशे तावत्कर्मसु निमित्तमिति निष्कर्षः । देशलाभश्च "सूर्यग्र
यदा रात्रौ" इत्यादिद्वीपान्तरस्थपर्युदासात्, द्वीपान्तरस्थान् प्रति तथा
द्रष्टुं योग्यत्वात् । अतिसूक्ष्मतयाऽनादेश्यं तु न निमित्तमयोग्यत्वात्

रात्रौ सूर्यग्रहः स्याच्चेद्दिवा चन्द्रग्रहस्तथा ।
नादेश्यमुभयं राज्ञे यत्र सूक्ष्मतमं भवेत् ॥

इति गणकैः पाठाच्च । तस्य च शास्त्रतो ज्ञानमेवानुष्ठानमयो
जकं, तत्कालश्च तादृशः न तु संक्रान्ताविव पूर्वापरकालः । तथा च
चाक्षुषज्ञानयोग्येऽल्पकालीनेऽपि ग्रहणे स्नानदानादि स्नानमेव
यावत्कर्तुं शक्यं तावत्कुर्यात् । वर्तमानमेव हि ग्रहणं निमित्तं
त्वतीतं भावि वेति वक्तुं यावत्पदमिति निष्कर्षः । *उद्देश्यं
ग्रहणम् । *अविवक्षया चाक्षुषत्वस्येत्यादिः । *ज्ञानमात्रेति
तदुक्तं—चाक्षुषज्ञानयोग्य इति शास्त्रतो ज्ञानमात्रेति वाऽर्थः । इदानी
प्रयत्नानपनेयचाक्षुषज्ञानप्रतिबन्धकराहित्यरूपां तद्योग्यतां दूषयति
*न चेति । स्वयं योग्यतामाह—*तेनेति ।
*आशौचाभावेति । तत्रापि रजोदर्शनस्याशौचाङ्गतापा
तदङ्गासम्भवात् । यदि तु भावलक्षणसप्तमी तर्हीहापि तुल्यैव प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्तु वर्धमानेनोक्तम्—*ज्ञानोत्तरं ह्यधिकारो *न ज्ञानकाले । स्नानकाले *ज्ञानाभावात् । एवं *दर्शनोत्तरं मुक्तिपर्यन्तमस्त्येव योग्यतेति, तदपि *प्रतिज्ञामात्रम् । *किञ्च अस्तास्ते

तयोः परेद्युरुदये दृष्ट्वाऽभ्यवहरेच्छुचिः ।

इत्यादिवाक्यवैयर्थ्यापत्तिः । चाक्षुषज्ञानान्यथानुपपत्त्यार्थादुदये स्नानसिद्धेः । ननु मुक्तिस्नाने शास्त्रीयत्वेनैवेक्षणत्वात् । तथा च श्रौतोऽपि विधिसम्बन्धो विहन्यते । यथा 'दृष्टे स्नायात्' इत्यत्रापि तद्विघात एव । 'दृष्ट्वा स्नायात्' इत्यादौ तु कैमुतिकन्यायेनैव, तत्र तस्य वाक्यीयत्वादिति भावः ।

ज्ञानोत्तरं=चाक्षुषज्ञानोत्तरम् । *न ज्ञानकाले=न चाक्षुषज्ञानकाले । चाक्षुषज्ञानरूपस्याङ्गस्याधिकारसम्पादकत्वाभावेन भावः । *ज्ञानाभावात्=ज्ञानरूपाङ्गाभावान्नान्धाधिकारः *दर्शनोत्तरमिति । योग्यतावशाज्जातस्य सकृद्दर्शनस्यैव दानादिप्रयोजकत्वोपगमादित्याशयः । *प्रतिज्ञामात्रमिति । ज्ञानमात्रस्य प्राप्तत्वाद्दर्शनं नियम्यते, न त्वपूर्वं विधीयते, अन्धातवत् । तथा चान्धादीनामशक्यत्वेन तदङ्गासम्भवेऽपि यथाशक्त्युपबन्धेनैव नैमित्तिकेऽधिकारो दुर्वारः । नन्वशक्याङ्गहानेऽप्यधिकारे तत्सम्पादकाग्निविद्याद्यभावेऽपि अधिकारः स्यात् । कर्मप्रयोगविध्यप्रयोज्ये हि न यथाशक्तिन्यायविषयत्वम् । यथा स्वतः सिद्धतया कर्मानुरोधेन कर्तुमशक्येषु देशकालकर्त्रादिषु ब्राह्मणत्वराजत्वादिषु यथा वा विध्यन्तरसिद्धतया तादृशेषु आश्रमविधिसिद्धेष्वग्निषु, अध्ययनविधिसिद्धायां विद्यायां च नह्येतादृशो नियम इति भवति यथाशक्त्युपबन्धविषयः । तस्मादन्धादेस्तदभावेऽपि स्नानं दुर्वारमिति भावः । एतच्च दर्शनस्य स्नानेऽङ्गत्वमुपेत्य प्रपञ्चितम् । इदानीं वस्तुतस्तस्याङ्गत्वमेव न सम्भवतीत्याह—*किं चेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेव ज्ञानं निमित्तं न चाक्षुषम् ।

चन्द्रसूर्यग्रहे नाद्यास्तस्मिन्नहनि पूर्वतः ।

राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनम् ॥

इति वृद्धगौतमेन विज्ञायेति ज्ञानमात्रोक्तेः । यत्तु—

मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम् ।

इति तदपि ज्ञानमात्रपरम् ।

*मेघमालादिदोषेण यदि मुक्तिर्न दृश्यते ।

आकलय्य तु तं कालं स्नात्वा भुञ्जीत वाग्यतः ॥

इति गौडनिबन्धे वचनात् । मैवम् । अज्ञातस्य *निमित्तत्वाभावेन निमित्तमहिम्नैव ज्ञानलाभे वाक्यवैयर्थ्यात्, ग्रस्तास्तेऽपि तदापत्तेश्च । किञ्च दर्शनं पुंसो *विशेषण*मुपलक्षणं वा ? । नाद्यः । दर्शनावच्छिन्ने काले स्नानतुलादानादेर्बाधात् । दर्शनविच्छेदे कृतमपि स्नानादि न ग्रहणनिमित्तं स्यात् । नान्त्यः । 'यावद्दर्शनगोचरे' इति *यावत्पदवैयर्थ्यप्रसङ्गात् । *दृष्टग्रह-

---

दर्शनं मुक्तिस्नानाधिकारसम्पादकमिति निरस्यति—*मेघेति । तं कालमित्यस्य मुक्तिकालमित्यर्थः ।

यदैवास्तङ्गतश्चन्द्रो राहोराननगोचरः ।

आकलय्य तु तं कालं क्रिया कार्या विचक्षणैः ॥

इत्यादिवचनेष्वेव तं कालमित्यस्य चन्द्रोदयकालमित्यर्थः । अन्यथा 'तयोः परेद्युरुदये' इत्यनेन विरोधात् ।

*निमित्तत्वाभावेन=अनुष्ठानहेतुत्वरूपतदसम्भवेन । *विशेषणं=विद्यमानं सद् व्यावर्त्तकम् । *उपलक्षणम्=अविद्यमानं सत्तादृशम् । *यावदिति । संक्रान्तौ पूर्वोत्तरकालयोः पुण्यत्वात्तद्वयस्यलाभार्थमिदं यावत्पदम् । उपलक्षणत्वे त्विहापि तत्कालयोः प्राप्तेस्तद्वैयर्थ्यमित्यर्थः । ननु भाविग्रहणमादाय स्नानवारणाय तदिति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

[illegible]रमपि स्नानाद्यापत्तेश्च । ज्ञानपक्षेऽप्येष दोषस्तुल्य[illegible]ति चेत् मूर्खोऽसि । यदि ज्ञानवाचकं पदं श्रूयेत, [illegible]तस्तस्यान्वयो विचार्येत । दृशिस्तु श्रूयत इति वैष[illegible]म् । कथं तर्हि ज्ञानं लभ्यते ? । 'संक्रान्तौ स्नायात्' [illegible]तिवद*र्थादित्यवेहि । अश्रुतत्वादेव नोद्देश्यविशेष[illegible]विवक्षाकृतो वाक्यभेदोऽपि । *अस्तु तर्हि दृष्टं ग्रह[illegible]ं निमित्तमिति चेत् । ग्रस्तास्तेऽस्तोत्तरं स्नानापत्तेः [illegible]विशिष्टोद्देशे वाक्यभेदाच्च । तवाप्येतत्तुल्यमिति चे-[illegible]'यावद्दर्शनगोचरे' इति वचनेन *तन्निषेधात् । तव [illegible]न्यग्रह इव ग्रस्तास्तेऽपि स्यात् ।

[illegible]ह-*दृष्टे इति। *अर्थादिति। ननु संक्रान्तौ ज्ञानस्यार्थिकत्वं युक्तं [illegible]तु 'दृष्टे राहौ' इत्यादौ, दृष्टे इति श्रवणादिति चेत् । अत्राहुः-दृष्टे [illegible]ति। "यस्य च भावेन भावलक्षणम्"(पा० सू० २-३-३७)इति [illegible]लेण सप्तमी। स्नानरूपभावलक्षणभूतराहुविषयकभावान्तरापेक्षायां [illegible]स्य निमित्तत्वेन लक्षणत्वात् । तत्स्वभावलब्धो ज्ञानरूपो [illegible]वो दर्शनेन लक्ष्यः । यथा "यस्य हविर्निरुप्तं पश्चात् चन्द्रमा [illegible]भ्युदेति"इत्यादौ निरुप्तशब्देन प्रवृत्तिमात्रम्। अप्रवृत्तस्य हविषो-[illegible]भिशब्दोक्तचन्द्रोदयलक्षणत्वायोगात्। न चैवं लक्षणा। प्रधानभूत-[illegible]मस्यर्थान्वयानुरोधेन गुणभूते प्रातिपदिके तस्या अदोषत्वात् । [illegible]तिपदिकार्थानुरोधेन सप्तम्या एवार्थत्यागे तु तस्या एवासाधुता-[illegible]तेः। वस्तुतः शास्त्रीयज्ञानं दृशेरभिधेयमेव। "पश्यार्थैश्चानालोचने" [illegible]"षड् दर्शनानि"इति प्रयोगात् । तथा च क्व लक्षणाऽपि ।

[illegible]इयान् परं भेदः-"संक्रान्तौ स्नायात्"इत्यादौ निमित्तमहिम्ना [illegible]"दृष्टे राहौ स्नायात्"इत्यादौ तु लक्षणमहिम्नेति । दर्शनविशेषण-[illegible]या निमित्तान्तर्भावं शङ्कते-*अस्त्विति । *तन्निषेधादिति । [illegible]योग्यताद्वारेण निमित्तावच्छेदकत्वस्यावेदितत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्च दर्शनस्य विधिरनुवादो वा ?। आद्ये ग्रहणोद्देशेन दर्शनविधिरुत दर्शनविशिष्टस्नानविधिरुत स्नानोद्देशेन दर्शनविधिः ?। नाद्यः । ग्रहोद्देशेन स्नानविधाने दर्शनविधाने च वाक्यभेदात् । *एतेन द्वितीयोऽपि परास्तः । न तृतीयः । स्नानस्याप्राप्तेः दर्शनस्य निमित्तत्वेनाविधेयत्वाच्च । अन्यथा सोमवमनादौ प्रसञ्जनविधिः केन वार्येत । अथ *नानावाक्येषु क्वचिद्दर्शनविशिष्टस्नानविधिः, क्वचिच्च प्राप्तं दर्शनं निमित्तीकृत्य स्नानमात्रविधिः । तन्न । *स्नानस्य प्रधानस्य प्राप्तौ तदङ्गदर्शनप्राप्तिः, तस्यां च निमित्ते सति स्नानमित्यन्योन्याश्रयात् । एवं दर्शनविधौ सति तन्निमित्तकस्नानविधिः । सति च प्रधानस्नानविधौ तदङ्गदर्शनविधिः । एव*मधिकारे प्रयोजकत्वे च यो-

---

*एतेन=विशेषणविशेष्योभयस्मिन् विधेयत्वप्राप्त्या वाक्यभेदेन । *नानावाक्येष्विति निर्धारणसप्तमी । क्वचित् "दृष्ट्वा स्नायात्"इत्यादौ दर्शनस्य प्राप्तत्वमालम्ब्य दूषयति- *स्नानस्येति । नन्वस्तु 'दृष्ट्वा स्नायात्'इत्यादौ दर्शनविशिष्टस्नानविधिः "एतस्यैव वारवन्तीयमग्निष्टोमसाम कृत्वा"इति विशिष्टविधिवदिति चेन्न । "वारवन्तीयमग्निष्टोमसाम कृत्वा" इत्यादौ सर्वथैवाप्राप्तेस्तमकृत्वा तदुत्तरक्रियाकरणाशक्यतयैव विशिष्टविधिः, इह तु कथंचिदपि प्राप्ते लाघवाय न तद्विधिः । वस्तो हि न विधायकत्वं, स्नात्यादेः परस्य लिङादेस्तदर्थविधान एव च व्यापृतत्वमिति विशेषात् । *अधिकार इत्यादि । स्नानाद्यधिकारिणः सिद्धस्य दर्शनाधिकारसिद्धिः तस्य स्नाद्याद्यङ्गत्वात्, अङ्गानां च प्रधानाधिकारिकत्वाद्, दर्शनाधिकारिणश्च स्नानाद्यधिकारसिद्धिः तस्य दर्शननिमित्तकत्वात् । एवं स्नानं दर्शने प्रयोजकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नम् । *क्त्वार्थपूर्वकालत्वविधौ चास्त्येव वाक्यभेदः । अन्यथा स्नानोत्तरमपि दर्शनमङ्गं स्यात् । न द्वितीयः ।

स्नानत्वात्, दर्शनं च स्नाने निमित्तज्ञानत्वादित्यर्थः । ननु सन्त्वेते दर्शनस्य निमित्तान्तर्भावे पुम्प्रवृत्तिविधिप्रवृत्त्यधिकारप्रयुक्तिविरोधः, शुद्धमेवोपरागं निमित्तीकृत्य स्नानं विधाय पश्चात्तदङ्गतया दर्शनं विधीयतां, दोषाभावात् । तथा हि—निमित्तमेव शास्त्रीयं प्रयोजकं तदुपाधौ नैमित्तिकानां विधानात् । ज्ञानं त्वर्थतस्तथा । तथा च ज्योतिःशास्त्रादर्शनयोग्यं ग्रहणं निश्चित्य धर्मशास्त्राच्च निमित्तकं महाभ्युदयसाधनं स्नानाद्यवगत्य तत्प्रयुक्त्या दर्शनप्रयुक्तिरिति न प्रयुक्तेर्विरोधः, नापि पुंप्रवृत्तेः । शास्त्रीयायास्तस्याः शास्त्रावगतनिमित्तकत्वाद्दर्शनस्य निमित्तेऽनन्तर्भावात् । अत एव न विधिप्रवृत्तेः, नाप्यधिकारस्य । अधिकारो हि कर्तृत्वपूर्वकं फलस्वास्म्यं विधेययोरङ्गप्रधानयोरेकप्रयोजकत्वेन तदङ्गाक्षिप्तायाः प्रवृत्तिशक्तेरैक्यात् न त्वविधेयस्य दर्शनस्येत्यत्राह—*क्त्वार्थेति । निरूपितमेतत् । ननु दृश्यविशेषानालिङ्गितस्य दर्शनस्यानिरूपणत्वेनानुवादत्वायोगात् ग्रहणदर्शनं स्नानादिकं प्रति निमित्तमस्तु ।

सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।

इति वचनात्, तदेव चाशौचं प्रत्यपि तथाऽस्तु । अन्यथा "नाशौचं राहुतारकाः" इति निषेधात् निषेधपालकानां शिष्टानां स्नानाद्यनापत्तेः, अस्तु वाऽत एव निषेधात् सपिण्डजननादिना निमित्तान्तरेणाशुचेर्दर्शनाभावात्स्नानादेरभावः, अस्तु च निषेधातिक्रमजन्यप्रत्यवायपरिहारस्योपायापेक्षत्वेन तदर्थतया—

चन्द्रसूर्यग्रहे स्नायात् सूतके मृतके तथा ।

इति स्नानादिविधानं सुरापानादिनिमित्तकप्रायश्चित्तवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रापि *दर्शनग्रहयोर्निमित्तत्वे स्नानद्वयापत्तेः । दर्शनावृत्तौ नैमित्तिकावृत्तिप्रसङ्गाद्दर्शनविशिष्टग्रहस्य विशिष्टस्यानुवादे वाक्यभेदापत्तेः । न च हविरार्तिवद्विशिष्टं निमित्तमिति वाच्यम् । आर्तिमात्रस्य हि निमित्तत्वे निमेषाद्यार्तेरपि तत्त्वापत्तेर्नैमित्तिकत्वभङ्गाद् युक्तं विशिष्टोद्देश्यत्वम् । *इह तु ग्रहणमात्रस्य निमित्तत्वे न काचित्क्षतिः । तस्माद्दर्शनवाक्यानां ग्रस्तास्तविषयत्वाद*नादेश्यग्रहपरत्वाद्वा ज्ञानस्य चार्थतः प्राप्तेस्तदेव निमित्तम् । तेन मेघाद्याच्छादनेऽन्धादेश्च स्नानादि भवत्येवेत्यलं* वेदबाह्यैः सँल्लापेन । इति ग्रहणनिर्णयः ॥

अथ समुद्रस्नानम् । आश्वलायनः-

समुद्रे पर्वसु स्नायादमायां च विशेषतः ।
पापैर्विमुच्यते सर्वैरमायां स्नानमाचरन् ॥
भृगौ भौमदिने स्नानं नित्यमेव विवर्जयेत् ।

भारते-

धानवदित्यत्राह-*दर्शनेति

*इह त्विति । दृशिरहितवाक्येषु तत्पदाध्याहारकरणेन लाघवात् । प्रसह्यैव विशिष्टोद्देश्यत्वे तु विशेषणावृत्तौ स्नानाद्यावृत्तिप्रसङ्गः, उपघातादिविशिष्टाग्निं निमित्तीकृत्य श्रुतानामुपघाताद्यावृत्तिवदिति भावः । *अनादेश्येति उक्ताभिप्रायम् । ननु—

मीमांसका हि वाक्यार्थविचारे प्रस्तुते सति ।
लोकदृष्टीः प्रतिघ्नन्ति वचनव्यक्तिपांसुभिः ॥

इति दर्शनादमीमांसकाभिभवमात्रमेतत् । दर्शनं विना स्नानादि तु दुष्करमेवेत्यत्राह-*अलमित्यादि । दर्शनस्य निमि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन ।
अश्वत्थं मन्दवारे तु सागरं पर्वणि स्पृशेत् ॥
पृथ्वीचन्द्रोदये स्कान्दे-
पुनाति पर्वणि स्नानात्तर्पणैः सरितां पतिः ।
कदाचिदपि नैवात्र स्नानं कुर्यादपर्वणि ॥
अस्यापवादस्तत्रैव प्रभासखण्डे-
पर्वकाले च संप्राप्ते नदीनां च समागमे ।
सेतुबन्धे तथा सिन्धौ तीर्थेष्वन्येषु संयुते ॥
*एवमादिषु सर्वेषु मेध्योऽन्ये तु स्वकर्मणि ।
तथा-
विना मन्त्रं विना पर्व *क्षुरकर्म विना नरैः ।
कुशाग्रेणापि देवेशि न स्प्रष्टव्यो महोदधिः ॥

तदभावे नैमित्तिकेषु निमित्तवत एवाधिकारादधिकारिणश्च तदकरणे प्रत्यवायादर्शने सति स्नानाद्यकरणे प्रत्यवायः 'तदभावे च तत्प्रभाव' इति प्रत्यवायकष्टकर्मानुष्ठानान्यतरप्रयोजकं दर्शनं बुद्धिपूर्वकारी कोऽपि न कुर्यादिति तन्नियोज्यकः स्नानादिविधिर्दुःस्थितः स्यात् । न चैवमाधानाध्ययनाभ्यामग्निविद्याजनमपि न कोऽपि कुर्यात् । तस्मिन् सति अग्निहोत्रादिकर्माकरणे प्रत्यवायस्य तत्परिहारार्थं कष्टकर्मकरणस्य चापत्तेः, सिद्धाग्निविद्यस्यैव कर्माधिकारोपगमात् तयोः कर्मविध्यप्रयोज्यत्वात्, इति वाच्यम् । नित्यतया तयोः पुरुषार्थत्वेनोपगमात्, व्रात्यताजनाहिताग्नितयोरुपपातकपाठादपि विद्यावत्त्वरूपकर्माधिकारस्यापवादने प्रत्यवायकल्पनाद्वेति । *एवमादिष्विति । एवमादिषु देशकालेषु सर्वेषु कर्मसु मेध्यः, अन्ये देशादौ तु स्वकर्मणि तत्तीरवासिनां नियमिते कर्मणि मेध्य इत्यन्वयः ।
*क्षुरकर्म=समुद्रलक्षणतीर्थप्रयुक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्रापि *दर्शनग्रहयोर्निमित्तत्वे स्नानद्वयापत्तेः । दर्शनावृत्तौ नैमित्तिकावृत्तिप्रसङ्गाद्दर्शनविशिष्टग्रहस्य विशिष्टस्यानुवादे वाक्यभेदापत्तेः । न च हविरातिरिक्तविशिष्टं निमित्तमिति वाच्यम् । आर्तिमात्रस्य हि निमित्तत्वे निमेषाद्यार्तेरपि तत्त्वापत्तेर्नैमित्तिकत्वभङ्गाद् युक्तं विशिष्टोद्देश्यत्वम् । *इह तु ग्रहणमात्रस्य निमित्तत्वे न काचित्क्षतिः । तस्माद्दर्शनवाक्यानां ग्रस्तास्तविषयत्वाद*नादेश्यग्रहपरत्वाद्वा ज्ञानस्य चार्थतः प्राप्तेस्तदेव निमित्तम् । तेन मेघाद्याच्छादनेऽन्धादेश्च स्नानादि भवत्येवेत्यलं* वेदबाह्यैः सँल्लापेन । इति ग्रहणनिर्णयः ॥

अथ समुद्रस्नानम् । आश्वलायनः-

समुद्रे पर्वसु स्नायादमायां च विशेषतः ।
पापैर्विमुच्यते सर्वैरमायां स्नानमाचरन् ॥
भृगौ भौमदिने स्नानं नित्यमेव विवर्जयेत् ।

भारते-

धानवदित्यत्राह-*दर्शनेति

*इह त्विति । दृशिरहितवाक्येषु तत्पदाध्याहारकरणेन लाघवात् । प्रसह्यैव विशिष्टोद्देश्यत्वे तु विशेषणाद्दर्शस्नानाद्यावृत्तिप्रसङ्गः, उपघातादिविशिष्टाग्निं निमित्तीकृत्य श्रुतानामुपघाताद्यावृत्तिवदिति भावः । *अनादेश्येति उक्ताभिप्रायम् । ननु—

मीमांसका हि वाक्यार्थविचारे प्रस्तुते सति ।
लोकदृष्टीः प्रतिघ्नन्ति वचनव्यक्तिपांसुभिः ॥

इति दर्शनादमीमांसकाभिभवमात्रमेतत् । दर्शनं विना स्नानादि तु दुष्करमेवेत्यत्राह-*अलमित्यादि । दर्शनस्य निमित्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन ।
अश्वत्थं मन्दवारे तु सागरं पर्वणि स्पृशेत् ॥

पृथ्वीचन्द्रोदये स्कान्दे-

पुनाति पर्वणि स्नानात्तर्पणैः सरितां पतिः ।
कदाचिदपि नैवात्र स्नानं कुर्यादपर्वणि ॥

अस्यापवादस्तत्रैव प्रभासखण्डे-

पर्वकाले च संप्राप्ते नदीनां च समागमे ।
सेतुबन्धे तथा सिन्धौ तीर्थेष्वन्येषु संयुते ॥
*एवमादिषु सर्वेषु मेध्योऽन्ये तु स्वकर्मणि ।

तथा-

विना मन्त्रं विना पर्व *क्षुरकर्म विना नरैः ।
कुशाग्रेणापि देवेशि न स्प्रष्टव्यो महोदधिः ॥

तदभावे नैमित्तिकेषु निमित्तवत एवाधिकारादधिकारिणश्च तदकरणे प्रत्यवायादर्शने सति स्नानाद्यकरणे प्रत्यवायः 'तदभावे च तत्प्रभाव' इति प्रत्यवायकष्टकर्मानुष्ठानान्यतरप्रयोजकं दर्शनं बुद्धिमतां कोऽपि न कुर्यादिति तन्नियोज्यकः स्नानादिविधिर्दुःस्थितः स्यात् । न चैवमाधानाध्ययनाभ्यामग्निविद्यार्जनमपि न कोऽपि कुर्यात् । तस्मिन् सति अग्निहोत्रादिकर्माकरणे प्रत्यवायस्य तत्परिहारार्थं कष्टकर्मकरणस्य चापत्तेः, सिद्धाग्निविद्यस्यैव कर्माधिकारोपगमात् तयोः कर्मविध्यप्रयोज्यत्वात्, इति वाच्यम् । नित्यतया तयोः पुरुषार्थत्वेनोपगमात्, व्रात्यताऽनाहिताग्नितयोरुपपातकपाठादपि विद्यावत्त्वरूपकर्माधिकारस्यापादने प्रत्यवायकल्पनाद्वेति । *एवमादिष्विति । एवमादिषु देशकालेषु सर्वेषु कर्मसु मेध्यः, अन्ये देशादौ तु स्वकर्मणि तत्तीरवासिनां नियमिते कर्मणि मेध्य इत्यन्वयः ।
*क्षुरकर्म=समुद्रलक्षणतीर्थप्रयुक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः ।

सत्याख्ये निर्णयसिन्धौ

द्वितीयः परिच्छेदः ।

श्रीगणेशाय नमः ॥ अथ संवत्सरप्रतिपदमारभ्य—
*तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च ।
विवाहादौ च सौरादिं मासं कृत्ये विनिर्दिशेत् ॥
=इति ब्राह्मं *प्रायशोऽनुसृत्य तिथिनिर्णयस्तत्कृत्यं
निरूप्यते । तत्र मीनसंक्रान्तौ पश्चात्षोडश घटिकाः
पुण्यकालः । रात्रौ तु निशीथात्प्राक्परतश्च संक्रमे
सौत्तरादिनार्धं(१) पुण्यं, निशीथे तु दिनद्वयं पुण्यमिति
सामान्यानिर्णयादवसेयम् ॥

अथ तिथिनिर्णयः । तत्र चैत्रशुक्लप्रतिपदि *वत्सरा
रम्भः । तत्रौदयिकी ग्राह्या ।

श्रीगणेशाय नमः ॥

*तिथि कृत्ये चेति । यद्यप्यग्रे शुक्लादिमासेन तिथिनिर्ण-
करणाद्विरोधो भाति, तथाऽपि 'व्रते शुक्लादिना' इत्युक्तेर्न दोषः ।
तत्र तिथिकृत्यानि दीपावल्यादीनि कृष्णादिमासेनैव । शुक्लादि-
मासावलम्बनं च चैत्रादिविशेषवन्मासानां तत्र मुख्यत्वात् ।
तथाहुः 'श्रावणे बहुले पक्षे' इत्यादौ श्रावणः शुक्लादिः । 'व्रते शुक्ला-
दिमेव च' इत्युक्तेः । 'मासि भाद्रपदे' इत्यादौ तु नेत्येतदर्थं *प्रायश
इति । *वत्सरारम्भ इति । तत्र शकादिश्रवणमपि कार्यम् ।

---

(१) रात्रावर्धरात्रात्प्राक् संक्रमे पूर्वदिनस्य पश्चार्धं परतश्च संक्रमे
परदिनस्य पूर्वार्धं पुण्यमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रं तु तदा सूर्योदये सति ॥

इति हेमाद्रौ ब्राह्मोक्तेः । दिनद्वये तद्व्याप्त्यव्याप्तौ* वा पूर्वैव । तदुक्तं ज्योतिर्निबन्धे—

शकवत्सरभूपमन्त्रिणां रसधान्येश्वरमेघपतीनाम् ।
श्रवणात्पठनाच्च वै नृणां शुभतां यात्यशुभं सह श्रिया ॥
चैत्रे मासि महाबाहो पुण्या या प्रतिपत्परा ।
तस्यां वै निम्बपत्राणि प्राश्य संशृणुयात्तिथिम् ॥

तत्र (१)यष्टीप्रवेशः कार्यः । उपरिचरवसुकथायाम्—

यष्टिं च वैणवीं तस्मै ददौ वृत्रनिषूदनः ।
इष्टप्रदानमुद्दिश्य शिष्टानां प्रतिपालनीम् ॥
ततः शक्रस्य पूजार्थं भूमौ भूमिपतिस्तदा ।
प्रवेशं कारयामास गते संवत्सरे तदा ॥
ततः प्रभृति चाद्यापि यष्टेः क्षितिपसत्तमैः ।
प्रवेशः क्रियते राजन् यथा तेन प्रवर्त्तितः ॥
अपरेद्युस्ततस्तस्याः क्रियते तूच्छ्रयो नृपैः ।
अलङ्कृतायाः पिटकैर्गन्धैर्माल्यैश्च भूषणैः ॥
माल्यदामपरिक्षिप्ता विधिवत् क्रियतेऽपि च ।

इति भारतात् । पिटकः=काष्ठादिरचितपात्रभेदः ।

*अव्याप्त्याविति । तत्राऽमावास्यासत्त्वेऽपि संकल्पः प्रातरेव 'प्रातः संकल्पयेत्' इति वाक्यात्, सङ्कल्पवचनाच्च प्रतिपत्संकीर्तनम् । आपाद्यसाकल्यस्य प्रयोगाविषयत्वे संकल्पविषयत्वात् ।

केचित्तु ततोऽप्युषः कालः प्रशस्तः 'तावति कुर्वीत यत्कारी स्यात्' इति श्रुतिव्याख्याने वेदभाष्ये सूर्योदयात्प्रागारम्भस्य सतामपि शास्त्रोक्तदोषाणामुपशामकत्वोक्तेः, मीमांसकैः 'पुरावाच

---

(१) 'तत्र च गूढीकार्या' इति कचित् पुस्तके पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चैत्रे सितप्रतिपदि
यो वारोऽर्कोदये स वर्षेशः ।
उदयद्वितये पूर्वो
नोदययुगुलेऽपि पूर्वः स्यात्(१) ॥
यस्माच्चैत्रसितादेरुदयाद्भानोः प्रवृत्तिरब्दादेः ॥ इति ॥
वत्सरादौ वसन्तादौ बलिराज्ये तथैव च ।
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैः ॥
इति वृद्धवसिष्ठोक्तेः ।
चैत्रमासस्य या शुक्ला प्रथमा प्रतिपद्भवेत् ।
तदहि ब्रह्मणः कृत्वा सोपवासस्तु पूजनम् ॥
संवत्सरमवाप्नोति सौख्यानि भृगुनन्दन ॥
इति हेमाद्रौ विष्णुधर्मोक्तेः । यदा तु चैत्रो मलमासो भवति तदा दैवकार्यस्य तत्र *निषिद्धत्वाच्छुद्धे मासि संवत्सरारम्भः कार्य इति केचिदाहुः । निष्कर्षस्तु—
शुक्लादेर्मलमासस्य सोऽन्तर्भवति चोत्तरः ।
इत्यादिवचनादग्रिमवर्षान्तःपातान्मलमासमारभ्यैव वर्षप्रवृत्तेः शुक्रास्तादाविव मलमास एव कार्य इति वयं प्रतीमः ।
ननु शुक्रास्तादौ चैत्रशुक्लप्रतिपदन्तरस्याभावाद्यु-क्तं तन्मध्य एवानुष्ठानम् । मलमासे तु शुक्लप्रतिपदन्त-

---

प्रवादितो निर्वपेत्'इत्यस्य नियमविधित्वार्थमुषःकालस्यापि प्रातः-शब्दवाच्यत्वोपगमाच्च । 'अश्लीलसंज्ञस्तु भागः परं निषिद्धो न श्रीयस्येति स्वरूपात्'इत्याहुः । *निषिद्धत्वादिति ।

---

(१) यदा दिनद्वये उदयकाले चैत्रशुक्लप्रतिपत् तदा पूर्वस्मिन् दिने यो वारः स वर्षेशः । यदा दिनद्वयेऽप्युदयकाले प्रतिपन्नाऽस्ति तदा-ऽपि पूर्वस्मिन्नेव वारो वर्षेश इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रस्य सम्भवात् शुद्ध एव वत्सरारम्भो युक्त इति चेत्, भ्रान्तोऽसि*। न हि प्रतिपदन्तरसत्त्वं प्रयोजकं, द्विःकरणापत्तेः वर्षेशब्द(१)यापत्तेश्च। अपि तु वत्सरारम्भः स तु मलमासेऽपीत्युक्तं प्राक्। न हि चैत्रशुक्लादिर्मलमासः पूर्ववर्षेऽन्तर्भवतीति ब्रह्मणाऽपि सुवचम्। अत्र तैलाभ्यङ्गो नित्यः।

वत्सरादौ वसन्तादौ बलिराज्ये तथैव च।
तैलाभ्यङ्गमकुर्वाणो नरकं प्रतिपद्यते॥

इति वासिष्ठोक्तेः।

अस्यामेव नवरात्रारम्भः। तदुक्तं मार्कण्डेयपुराणे—

शरत्काले महापूजा क्रियते या च वार्षिकी*। इति।

तत्र परयुतैव ग्राह्या।

श्रौतस्मार्त्तक्रियाः सर्वा द्वादशे मासि कीर्तिताः।
त्रयोदशे तु सर्वास्ता निष्फलाः परिकीर्त्तिताः॥
तस्मात्त्रयोदशे मासि कुर्यात्ता न कथञ्चन।
कुर्वन्नानर्थमेवाशु कुर्यादात्मविनाशनम्॥

=इत्यादिना। *भ्रान्तोऽसीत्यादि।

नव्यास्तु प्रतिपदः प्राधान्याच्छुद्धातदितरसमवाये शुद्धैव ग्राह्या। किञ्च यादृशेन स्थूलोपाधिना शुद्धा भवति तादृशस्तत्सजातीयः स मलमासो न तु स एव, उत्तरमासशेषत्वविरोधात्। अत एव न तत्तत्तिथिकूटः। एवं च 'उत्तरेऽब्दे च कार्याणि' इत्युक्तेरुत्तरत्रैव वत्सरारम्भः, तत्रैवाभ्यङ्गस्नानादिश्चेति प्राहुः।

*या च वार्षिकीति। वर्षाशब्दो वर्षादिपरः। वर्षे वर्षे भवेति व्युत्पत्त्या प्रतिवर्षादिकर्त्तव्यत्वं, याचेति चकारेण तत्समुच्चयः।

---

(१) वर्षद्वयापत्तेः वर्षशब्दत्वापत्तेश्चेति प्राचीनपुस्तके पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकाऽर्चने ।
मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता ॥
इति देवीपुराणात् ।
तिस्रो ह्येताः पराः प्रोक्तास्तिथयः कुरुनन्दन ।
कार्तिकाश्वयुजोर्मासोश्चैत्रे मासि च भारत ॥
इति हेमाद्रौ ब्राह्मोक्तेः । पराः=परयुताः ।
*अत्र विशेषः पारणानिर्णयश्च शारदनवरात्रे वक्ष्यते ।
अत्र प्रपादानमुक्तमपरार्के भविष्ये—
अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे ।
पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेत् ॥
इत्युपक्रम्य—
ततश्चोत्सर्जयेद्विद्वान्मन्त्रेणानेन मानवः ।
'प्रपेयं सर्वसामान्या *भूतेभ्यः प्रतिपादिता ॥
अस्याः प्रदानात्पितरस्तृप्यन्तु हि पितामहाः' ।
अनिवार्यं ततो देयं जलं मासचतुष्टयम् ॥ इति ।
तथा—
प्रपां दातुमशक्तेन विशेषाद्धर्ममीप्सुना ।
प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः ॥
ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ॥
अत्र मन्त्रः—
'एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्सकला मम सन्तु मनोरथाः' ॥
अनेन विधिना यस्तु धर्मकुम्भं प्रयच्छति ।
प्रपादानफलं सोऽपि प्राप्नोतीह न संशयः ॥ इति ।

---

*अत्रेति । चण्डिकाऽर्चनविषयकसकलविधिनिषेधानापि प्रवृत्तिरिति भावः । *भूतेभ्य इति । पश्वादिसाधारण्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां संपूज्य दोलोत्सवं कुर्यात्। तदुक्तं निर्णयामृते देवीपुराणे—

तृतीयायां यजेद्देवीं शंकरेण समन्विताम्।
कुङ्कुमागरुकर्पूरमणिवस्त्रसुगन्धकैः॥
स्रग्गन्धधूपदीपैश्च दमनेन विशेषतः।
आन्दोलयेत्ततो वत्स शिवोमातुष्टये सदा॥ इति।

अत्र चतुर्थीयुता ग्राह्या।

मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे।

इति माधवोक्तेः। अत्र सौभाग्यशयनव्रतमुक्तं मात्स्ये-

वसन्तमासमासाद्य तृतीयायां जनप्रिये।
सौभाग्याय सदा स्त्रीभिः कार्यं पुत्रसुखेप्सुभिः॥ इति

*तत्रापि परयुतैव।

इयं च मन्वादिरपि। अत्रैव प्रसङ्गात्सर्वमन्वादिनिर्णीयते(१)। ताश्चोक्ता दीपिकायाम्—

'तिथ्यग्नी न तिथिस्तिथ्याशे कृष्णेभोऽनलो ग्रहः।
तिथ्यर्को न शिवोऽश्वोऽमातिथी मन्वादयो मधोः'॥

इति।

तिथिः=पूर्णिमा। अग्निः=तृतीया। नेति। वैशाखे नास्तीत्यर्थः। आशा=दशमी। कृष्णेभः=कृष्णाष्टमी। अनलः=तृतीया। ग्रहो=नवमी। अर्को=द्वादशी। नेति। मार्गशीर्षे नेत्यर्थः। शिवः=एकादशी। अश्वः=सप्तमी। मधोश्चैत्रादारभ्यैता मन्वादय इत्यर्थः। अत्र *मूलनक्षत्रलाभः। *तत्रापीति। गौरीव्रतत्वात्। *मूलेति।

आश्वयुक् शुक्लनवमी कार्त्तिके द्वादशी तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥

(१) मुम्बापुरीस्थमुद्रितपुस्तके 'मन्वादिनिर्णय उच्यते' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति हेमाद्र्यादेर्ज्ञेयानि। एताश्च मन्वादयो हेमाद्रिमते
क्लपक्षस्थाः पौर्वाह्णिकाः, कृष्णपक्षस्था आपराह्णिका
ज्ञाः।

पूर्वाह्णे तु सदा ग्राह्याः शुक्ला मनुयुगादयः।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः॥

ति गारुडवचनात्।

'अथो मन्वादियुगादिकर्मतिथयः
पूर्वाह्णिकाः स्युः सिते
विज्ञेया अपराह्णिकाश्च बहुले'

ति दीपिकोक्तेश्च। कालादर्शे त्वपराह्णव्यापित्वं मन्वा-
युक्तं तत्तु अयुक्तमिति युगादिनिर्णये वक्ष्यामः। अत्र
श्राद्धमुक्तं मात्स्ये—

कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु।
हायनानि त्रिसाहस्रं पितॄणां तृप्तिदं भवेत्॥ इति।
मन्वादिश्राद्धं च मलमासे सति मासद्वयेऽपि कार्यम्।
मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च॥

ति स्मृतिचन्द्रिकोक्तेः। अत्र पिण्डरहितं श्राद्धं
कुर्यात्। तदुक्तं कालादर्शे—

विषुवायनसंक्रान्तिमन्वादिषु युगादिषु।
विहाय पिण्डनिर्वापं सर्वं श्राद्धं(१)समाचरेत्॥ इति।

फाल्गुनस्य त्वमावास्या पुष्यस्यैकादशी सिता।
आषाढस्यापि दशमी माघमासस्य सप्तमी॥
श्रावणस्याष्टमी कृष्णा तथाऽऽषाढी च पूर्णिमा।
कार्त्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता॥
मन्वन्तरादयश्चैता दत्तस्याऽक्षयकारकाः॥ इति॥

(१) कंसान्तर्गतो ग्रन्थः कपुस्तके नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्वादिश्राद्धं नित्यम्। अकरणे प्रायश्चित्तदर्शनात्। तदुक्तमृग्विधाने—

त्वं भुवः प्रतिमन्त्रं च शतवारं जले जपेत्।
मन्वादयो यदा न्यूनाः कुरुते नैव वा पियः॥ इति।

एवं यत्र प्रायश्चित्तवीप्सादिदर्शनं तानि *षण्णवतिश्राद्धानि नित्यानि। तानि तु—

अमायुगमनुक्रान्तिधृतिपातमहालयाः।
अन्वष्टकं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिताः॥

इत्युक्तानि। चकारादष्टकाग्रहणम्।

चैत्रशुक्लतृतीयैव मत्स्यजयन्ती। अत्रैव प्रसङ्गाद्दशावतारजयन्त्यो निर्णीयन्ते। तत्र पुराणसमुच्चये—

मत्स्योऽभूद्धुतभुग्दिने मधुसिते कूर्मो विधौ माधवे
वाराहो गिरिजासुते नभसि यद्भूते सिते माधवे।
सिंहो भाद्रपदे सिते हरितिथौ श्रीवामनो माधवे
रामो गौरितिथावतः परमभूद्रामो नवम्यां मधोः॥
कृष्णोऽष्टम्यां नभसि सितपरे, चाश्विने यद्दशम्यां
बुद्धः, कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण।
अह्नो मध्ये वामनो रामरामौ
मत्स्यः क्रोडश्चापराह्णे विभागे।
कूर्मः सिंहो बौद्धकल्की च सायं
कृष्णो रात्रौ कालसाम्ये च पूर्वे॥ इति।

केचित्तु स्फुटान् श्लोकान् पठन्ति। तथा-

अत्र विशेषानिर्देशे शुक्लाः। *षण्णवत्य इति। यत्र वर्षमध्ये द्विर्व्यतीपातादि तत्र सप्तनवत्यादि अधिकस्यापि तस्याधिकाग्राह्यत्वात्। एवं द्वासप्ततीत्यत्रापि। हुतभुक्=तृतीया। विधुः=द्वादशी। गिरिजासुतः=चतुर्थी। भूतं=चतुर्दशी। हरिः=द्वादशी। गौरी=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चैत्रे तु शुक्लपञ्चम्यां भगवान्मीनरूपधृक्* ।
ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो हरिः* ॥
चैत्रेऽकृष्णे नवम्यां तु हरिर्वाराहरूपधृक्* ।

तृतीया । *धृगिति । ततः—
वेदस्योद्धरणार्थाय मध्याऽह्ने समुपस्थिते ॥
मध्याह्नव्यापिनी यत्र पञ्चमी मूलसंयुता ।
तत्रोपवासं कुर्वीत विष्णुसायुज्यमाप्नुयात् ॥
पञ्चमी गणसंयुक्ता नोपोष्या हि प्रयत्नतः ।
वेदस्योद्धरणार्थाय धर्मसंस्थापनाय च ॥
परित्राणाय साधूनां जातो मत्स्यः स्वयं हरिः ।
गृहाणार्घ्यं मया दत्तं जनन्या सहितो हरे ॥
देवान् पितॄन् समभ्यर्च्य अनन्तं फलमश्नुते ।
यत्किञ्चिद्दत्तं यद्दानं तद्दानं मेरुणा समम् ॥ इति ।
*हरिरिति ।
कृत्तिकाऋक्षसंयोगे सायाह्ने च विधूदये ।
द्वादश्यां पूर्वविद्धायामुपवासव्रतं चरेत् ॥
जगन्निर्वहणार्थाय विश्वसंस्थापनाय च ।
परित्राणाय साधूनां जातः कूर्मः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं गिरिणा सहितो हरे ।
स्नानं दानं प्रकुर्वीत पितॄनुद्दिश्य तर्पणम् ॥
वित्तशाठ्यं न कर्त्तव्यं विष्णुसायुज्यमिच्छता ।
जयन्ती व्रतमाहात्म्यं श्रोतव्यं च विशेषतः ॥ इति ।
*धृगिति ।
शुक्लपक्षे विशेषेण प्रभाते समुपस्थिते ।
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥
तस्मात्सर्वप्रयत्नेन दशाविद्धा प्रशस्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नरसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके* ॥
मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः* ।

दुष्टजातिविनाशाय भूभारोत्तारणाय च ॥
परित्राणाय साधूनां हरिर्वाराहरूपधृक् ।
गृहाणार्घ्यं मया दत्तं धरण्या सहितो हरे ॥
तत्रोपवासं कुर्वीत पितॄनुद्दिश्य तर्पणम् ।
यदेव दीयते किञ्चित्तद्दानं मेरुणा समम् ॥ इति ।

*पक्षके इति ।

स्वातीयोगे च संध्यायां मन्दवासरसंयुते ।
संध्याकाले समुत्पन्नो रक्षोदमनकारणात् ॥
स्तम्भात्सह समालोक्य त्रेतायामादिपूरुषः ।
जयायुक्ता न कर्त्तव्या परविद्धा प्रशस्यते ॥
हिरण्यस्य वधार्थाय प्रह्लादवरदाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥
परित्राणाय साधूनां जातो नरहरिः स्वयम् ।
गृहाणार्घ्यं मयादत्तं श्रीलक्ष्म्या सहितो हरे ॥
स्नानं दानं च कर्त्तव्यं पितॄनुद्दिश्य तर्पणम् ।
वित्तशाठ्यं न कुर्वीत विष्णुलोके महीयते ॥

*हरिरिति ।

सङ्गवे श्रवणे चैव पुण्यकालः प्रशस्यते ।
द्वादशी श्रवणोपेता मध्याह्नव्यापिनी तिथिः ॥
तत्रोपवसते कामी विष्णुसान्निध्यहेतवे ।
सङ्गमे सरितः स्नात्वा जाह्नवीस्नानजं फलम् ॥
जातो बलिविनाशाय धर्मसंस्थापनाय च ।
दानवानां विनाशाय दैत्यानां निधनाय च ॥
परित्राणाय साधूनां वामनश्च स्वयं हरिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राधशुद्धतृतीयायां रामो भार्गवरूपधृक्* ॥
चैत्रशुक्लनवम्यां तु रामो दशरथात्मजः* ।

गृहाणार्घं मया दत्तमदित्या सहितो हरे ॥
स्नानं दानमित्यादि प्राग्वत् ।
*धृगिति ।
तृतीया माधवे शुक्ला रोहिण्यामरुणोदये ।
जमदग्निकुलादित्यो जातो भृगुपतिः स्वयम् ॥
द्वितीयाशेषसंयुक्तां यः कुर्यात्स नराधमः ।
तृतीया गणसंयुक्ता सर्वकार्यफलप्रदा ॥
जातः क्षत्रवधार्थाय भूभारोत्तारणाय च ।
वृत्तिपालकधर्मज्ञद्विजसंस्थापनाय च ॥
परित्राणाय साधूनां जातो भृगुपतिः स्वयम् ।
गृहाणार्घ्यं मया दत्तं रेणुकासहितो हरे ॥
उपवासव्रतं तत्र श्राद्धशेषं नरोत्तमैः ।
यत्किंचिद्दीयते दानं तद्दानं मेरुणा समम् ॥
*दशरथात्मज इति ।
चैत्रशुक्लनवम्यां च जातो रामः स्वयं हरिः ।
पुनर्वसूक्षसंयोगे सा तिथिः सर्वकामदा ॥
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ।
नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ॥
तत्रोपवासं कुर्वीत विष्णुसायुज्यमाप्नुयात् ।
दशाननवधार्थाय भूभारोत्तारणाय च ॥
दानवानां विनाशाय दैत्यानां निधनाय च ।
परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।
स्नानं दानं प्रकुर्वन्ति पितॄनुद्दिश्य तर्पणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*चैत्रशुक्लपञ्चमी कल्पादिः। तदुक्तं हेमाद्रौ मात्स्ये—
ब्रह्मणो या दिनस्यादिः कल्पादिः सा प्रकीर्तिता।
वैशाखस्य तृतीया या कृष्णा या फाल्गुनस्य च॥
पञ्चमी चैत्रमासस्य तथैवान्त्या* तथा परा।
शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी॥
नवमी मार्गशीर्षस्य*सप्तैताः संस्मराम्यहम्।
कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः॥

गृहाणार्घ्यं मया दत्तं कृपाचार्येण हे हरे। इति।
*चैत्रशुक्लेति। ब्राह्मे—
शुक्लायामथ पञ्चम्यां चैत्रेमासि शुभानना।
श्रीब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया॥
ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुञ्चति। इति॥
*अन्त्या=अमावास्या॥ *सप्तेति। त्रिंशदमी कल्पादयः
अथ कल्पादयो राजन् कथ्यन्ते तिथयः शुभाः॥
यासु श्राद्धे कृते तृप्तिः पितॄणामक्षया भवेत्।
चैत्रशुक्लप्रतिपदि श्वेतकल्पः पुराऽभवत्॥
तस्य शुक्लत्रयोदश्यामुदानः समजायत।
कल्पस्तु नारसिंहाख्यः कृष्णायां प्रतिपद्यभूत्॥
अथ कृष्णत्रयोदश्यां गौरीकल्पोऽप्यकल्पत।
वैशाखस्य तृतीयायां शुक्लायां नीललोहितः॥
चतुर्दश्यां तु शुक्लायां संजातो गारुडाभिधः।
समानस्तु तृतीयायां कृष्णायामुदपद्यत॥
माहेश्वरश्चतुर्दश्यां कृष्णपक्षे समागमत्।
ज्येष्ठशुक्लतृतीयायां वामदेवस्य संभवः॥
पौर्णमास्यां तु तत्रैव कूर्मः प्रववृते नृप।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृष्णपक्षे तृतीयायामाग्नेयः समगच्छत ॥
पञ्चदश्यां तु कृष्णायां पितृकल्पः समागमत् ।
शुक्लां चतुर्थीमाषाढे प्राप्य नारायणोऽभवत् ॥
चतुर्थ्यां तस्य कृष्णायां सोमकल्पःसमापतत् ।
श्रावणे शुक्लपञ्चम्यां रौरवः समवर्त्तत ॥
तस्यैव कृष्णपञ्चम्यां मानवः प्रत्यपद्यत ।
षष्ठीं प्रौष्ठपदे शुक्लां प्राप्य प्राणाभिधोऽभवत् ॥
सितेतरायां षष्ठ्यां तु तस्य तत्पुरुषाह्वयः ।
बृहत्कल्पस्तु सप्तम्यां शुक्लायामाश्विनस्य च ॥
कृष्णायामपि वैकुण्ठः प्रविवेश विशांपते ।
कार्तिकस्य सिताष्टम्यां कल्पः कन्दर्पसंज्ञकः ॥
असितायां पुनर्जज्ञे लक्ष्मीकल्पस्य कल्पना ।
मार्गशुक्लनवम्यां तु कल्पसत्योऽभ्यवर्त्तत ॥
असितायां च सावित्रीकल्पः प्रारम्भमभ्यगात् ।
पौषे दशम्यां शुक्लायामीशानः प्रादुरासह ॥
असितायामघोरस्य कल्पस्योपक्रमोऽभवत् ।
एकादश्यां तु शुक्लायां माघे व्यानः प्रजज्ञिवान् ॥
तस्यामेव तमिस्रायां वाराहः प्राप भूपते ।
सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य ह ॥
कृष्णायामपि वै राज्ञो विरराज महामनाः ।
इति त्रिंशदमी कल्पास्तिथयः परमेष्ठिनः ॥
आरम्भतिथयस्तासु शुक्लाः पुण्यतमा मताः ।
आसु श्राद्धं कृतं पुण्यमाकल्पस्यापि कल्पते ॥ इति ॥

दीपिकाऽपि—

'स्युः पक्षद्वयगाः क्रमात्प्रतिपदाद्याश्चैत्रमासक्रमात्
भूतौ माधवगौ मधौ तु मदनौ ज्येष्ठस्थिते पर्वणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र सर्वोऽपि निर्णयो *मन्वादिवज्ज्ञेयः । हेमाद्रौ ब्राह्मे—

शुक्लायामथ पञ्चम्यां चैत्रे मासि शुभानना ।
श्रीर्ब्रह्मलोकान्मानुष्यं संप्राप्ता केशवाज्ञया ॥
ततस्तां पूजयेत्तत्र यस्तं लक्ष्मीर्न मुञ्चति ॥

चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः । तत्र नवमीयुता ग्राह्या ।

अष्टमी नवमीयुक्ता नवमी चाष्टमीयुता ।

इति ब्रह्मवैवर्तात् । अत्र भवानीयात्रोक्ता काशीखण्डे—

भवानीं यस्तु पश्येत शुक्लाष्टम्यां मधौ नरः ।
न जातु शोकं लभते सदानन्दमयो भवेत् ॥ इति ॥

अत्रैवाशोककलिकाप्राशनमुक्तं हेमाद्रौ लैङ्गे—

अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सितेऽष्टम्यां न ते शोकमवाप्नुयुः ॥

प्राशनमन्त्रस्तु—

त्वामशोक नराभीष्टं मधुमाससमुद्भवम् ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु ॥ इति ॥

अत्र विशेषः पृथ्वीचन्द्रोदये विष्णुः—

श्राद्धे त्रिंशदमी शुभाः शुभतराः कल्पादयः शुक्लगाः' ॥ इति ॥

*मन्वादिवदिति । आरम्भतिथित्वोक्त्या युगमन्वारम्भतिथिसादृश्यलाभादिति भावः । युगान्ताश्च ब्राह्मे—

सूर्यस्य सिंहसंक्रान्तावन्तः कृतयुगस्य तु ।
अथ वृश्चिकसंक्रान्तावन्तस्त्रेतायुगस्य तु ॥
ज्ञेयस्तु वृषसंक्रान्त्यां द्वापरान्तस्तु संख्यया ।
तथा च कुम्भसंक्रान्तावन्तःकलियुगस्य तु ॥ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनर्वसुयुतोपेता चैत्रे मासि सिताष्टमी ।
प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेत् ॥ इति ।

तिथितत्त्वे कालिकापुराणे—

चैत्रे मासि सिताष्टम्यां यो नरो नियतेन्द्रियः ।
स्नायाल्लौहित्यतोयेषु स याति ब्रह्मणः पदम् ॥
चैत्रं तु सकलं मासं शुचिः प्रयतमानसः ।
लोहित्यतोये यः स्नायात्स कैवल्यमवाप्नुयात् ॥

*लोहित्यो ब्रह्मपुत्रः । मन्त्रस्तु—

'ब्रह्मपुत्र महाभाग शन्तनोः कुलसम्भव ।
अमोघागर्भसंभूत पापं लौहित्य मे हर ॥'

चैत्रशुक्लनवमी रामनवमी । तदुक्तमगस्त्यसंहितायाम्—

'चैत्रे नवम्यां *प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ।
*उदये *गुरुगौरांशे स्वोच्चस्थे ग्रहपञ्चके ॥
मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीत्स कलया कौसल्यायां परः पुमान् ॥
तस्मिन् दिने तु कर्तव्यमुपवासव्रतं सदा ।
तत्र जागरणं कुर्याद्रघुनाथपरो भुवि* ॥ इति ।

एवं च मध्याह्नयोगिनी ग्राह्या ।

चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥

---

*लौहित्य इति ।

लोहितात्सरसो जातो लौहित्याख्यस्ततोऽर्थवत् ।
इति कालीपुराणात् ।

*प्राक्पक्षे=शुक्लपक्षे । *उदये=लग्ने । पुण्ये इत्यन्वयः । *गुरुगौरांशे=गुरुनवांशे । गौरांश्वोरिति पाठे गौरांशुश्चन्द्रः । *भु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तत्रैवोक्तेः । तथा-

चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः ।
*पुनर्वसूक्षसंयुक्ता सा तिथिः सर्वकामदा ॥
श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।

तथा-

*केवलापि सदोपोष्या नवमीशब्दसंग्रहात् ।
तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम् ॥

पूर्वेद्युरेव मध्याह्नयोगे *कर्मकालव्याप्तेः सैव ग्राह्या। दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पूर्वदिने पुनर्वसूक्षयुक्तामपि त्यक्त्वा परैव कार्या । तदुक्तं माधवीयेऽगस्तिसंहितायाम्-

नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः ।
उपोषणं नवम्यां च दशम्यां चैव पारणम् ॥ इति ।

वीति । स्रग्धरादिव्याख्यातिः । *पुनर्वसिति प्राशस्त्यार्थम् ।

तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम् ।
तस्मात्तिथिं प्रशंसन्ति न नक्षत्रं तिथिं विना ॥

इति वाक्यात् ॥

*केवलाऽपीति । तिथेरेव निर्णायकत्वान्न ऋक्षापेक्षा ।

*कर्मकालेति । कर्मकालशास्त्रापेक्षयाऽष्टमीविद्धानिषेधानां दौर्बल्यात् ।

नवमीमास्तु दिनद्वये मध्याह्नव्याप्तावव्याप्तावेकदेशस्पर्शिनि वा एकदिने पुनर्वसुमती "पुनर्वसुयुता यदि । सैव मध्याह्नयोगिन"इत्युक्तेः । दिनद्वये पुनर्वसुयुता या तादृशी सा मध्याह्ने तथैव । तारतम्यानुरोधेन ततस्तथैव प्रतीतेः । यदि च दिनद्वये मध्याह्ने पुनर्वसुमती तद्रहिता वा मध्याह्नव्यापिनी तदेकदेशस्पृग्वा तदैव परा 'नवमी चाष्टमीविद्धा'इति वाक्यादिति प्राहुः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अष्टमीविद्धा सऋक्षाऽपि नोपोष्येति माधवः।
रामार्चनचन्द्रिकायामपि—

विद्धैव चेदृक्षयुक्ता व्रतं तत्र कथं भवेत।
विद्धानिषेधश्रवणान्नवमी चेति वाक्यतः॥
वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि।
दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्यैव वैष्णवैः॥
तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चितम्॥ इति।

अत्र 'दशम्यादिषु वृद्धिश्चेत्' इति 'तदन्येषाम्' इति वचनात्(१) यदा प्रातस्त्रिमुहूर्ता नवमी, दशमी च क्षयवशात्सूर्योदयात्प्रागेव समाप्यते, तदा स्मार्तानां तत्रैव एकादशीनिमित्तोपवासात् नवमीव्रताङ्गपारणालोपः स्यात्। अतोऽष्टमीविद्धैव स्मार्तैः कार्या। वैष्णवानां त्वरुणोदयविद्धैकादश्या हेयत्वान्न पारणालोपप्रसङ्ग इति द्वितीयैव तैः कार्येति*सूचयति। दशमीवृद्ध्यभावेऽष्टमीविद्धाया एव मध्याह्नव्यापित्वे क्षये च वैष्णवैरपि विद्धैवोपोष्येत्यर्थसिद्धम्। इदं च व्रतं *संयोगपृथ-

---

*सूचयतीति। इदं तु चिन्त्यम्। विष्णुपरायणैः साद्धिरिदं व्रतं कार्यमित्युपदेशमात्रेणैवोपपत्तेरवैष्णवानामष्टमीविद्धाग्राह्यतापादककर्तृविशेषणत्वानङ्गीकारात्।

पारणं तु पूर्वविद्धोपवासे नवमीमतिक्रम्यैव। "दशम्यामेव पारणम्" इत्युक्तेः। *संयोगेति। "एकस्य तूभयत्वे संयोगपृथक्त्वम्"(जै० सू० ४-३-५)इति सूत्रम्। अत्र काम्यत्वमनित्यत्वम्। अकामे हेयत्वात्। एककर्मणो नित्यत्वकाम्यत्वाभ्यां विरुद्धे नित्यानित्यसंयोगविरोध इत्यत्रैकस्येति। "खादिरो यूपो

(१) 'तदन्येषाम्' इति च वदन्' इति मुम्बापुरीस्थमुद्रितपुस्तके पाठः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्त्वन्यायेन काम्यं नित्यं च । तदुक्तं हेमाद्रावगस्ति-संहितायाम्—

उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम् ।
तस्मिन् दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ॥
सर्वेषामप्ययं धर्मो भुक्तिमुक्त्यैकसाधनः ।
अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम् ॥
पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः ।
यस्तु रामनवम्यां तु भुङ्क्ते मोहाद्विमूढधीः ॥
कुम्भीपाकेषु घोरेषु पच्यते नात्र संशयः ॥

तथा—

भवति" इति क्रत्वर्थो नित्यः खादिरो विधीयते । "खादिरं वीर्यकामस्य यूपं कुर्वीत" इति काम्यः ।

तत्र प्रमाणद्वयसत्त्वाद् द्वैरूप्यं, तद्वदुपवासेऽपि द्वैरूप्यमङ्गीकार्यम्। यदि तु खादिरस्य क्रत्वर्थतया नित्यत्वं पुरुषार्थतया काम्यत्वम्, इह तु पुरुषार्थतयोभयमिति वैषम्यं मन्यते, तदा 'यावज्जीवमग्निहोत्रं जुहोति" "अग्निहोत्रं जुहुयात्स्वर्गकामः" इत्यादौ पुरुषार्थस्यैव द्वैरूप्यं न त्वेतत्क्रत्वर्थमित्युदाहरणं बोध्यम् । सूत्रकृताऽपि प्रमाणद्वयस्यैव द्वैरूप्यसाधकत्वमुक्तम्—एकस्य तूभयत्वे संयोगपृथक्त्वमिति ।

नन्वस्त्वग्निहोत्रस्य द्वैरूप्यं प्रमाणभेदात् । न च काम्याग्निहोत्रे कालाकाङ्क्षायां यावज्जीववाक्येन तत्समर्पणाद् गुणविधिमात्रं न तु नित्यं तदस्तीति वाच्यम् । यावज्जीवशब्दस्य प्राणधारणमात्रवाचित्वं न तु कालवाचित्वमिति तस्य पुरुषधर्मत्वान्निमित्तत्वम् । ततश्च शब्दान्तरादीनां कर्मभेदहेतूनामसत्त्वेऽपि अग्निहोत्रस्य जीवननिमित्तकप्रयोगात्कामनानिमित्तकप्रयोगो भिद्यते । प्रकृते तु तदभावात्कथं भेद इति चेत् । यथा "तमेतं वेदानुवचनेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमम् ।
व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ॥
प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः ।
उपोषणं न कुरुते कुम्भीपाकेषु पच्यते ॥

अत्र केचित्तदुपासकानामेवेदं व्रतं नित्यं;*न त्वन्ये ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन"इत्यादौ गृहस्थाद्याश्रमधर्माणां नित्यानां यज्ञादीनाम् आत्मविविदिषायां विधानात्प्रयोजनभेदाद् भेदः, तद्वदुपवासेऽपीति । तत्र काम्यप्रयोगप्रसङ्गतो नित्यसिद्धिः ।

काम्येऽपि नित्यसिद्धिः स्यात्प्रसङ्गेनोभयात्मिका ।

इति स्मृतेः । श्राद्धे निमन्त्रितब्राह्मणस्यैकस्मादेव भोजनात्स्वकर्तृकश्राद्धसिद्धिः प्रसङ्गाच्च स्वतृप्तिरितिवत् ब्रह्मविद्यार्थमनुष्ठितेन यज्ञादिना नित्यतत्सिद्धिवच्च । एतेन काम्यं परित्यज्य केवलं नित्यमनुष्ठातुं शक्यं न तु—नित्यं परित्यज्य काम्यमिति कथं प्रयोगप्रसङ्ग इत्यपाकृतम् । नन्वेवमपि सकृदनुष्ठानेन कथमनेकार्थसिद्धिः । दर्शपूर्णमासयोः षण्णां प्रधानानां मध्ये त्रींस्त्रीन्प्रति सकृत्प्रयाजादिकाऽङ्गेनोपकारवन्नित्यं काम्यं चोपवासं प्रति सकृत्सकृदङ्गानुष्ठानस्य साध्यत्वादिति चेन्न। प्रसङ्गस्वीकारात्। यथा पश्वर्थमनुष्ठितेन प्रयाजादिना तत्प्रयोगमध्यपातिपशुपुरोडाशोपकारवदिति भावः ।

*न त्वन्येषामिति । विष्णुपरायणैरित्यत्र विष्णुशब्दस्य कृतरामात्मकविष्णुपरत्वात् तत्परायणाः तन्मन्त्रदीक्षिताः तैः, नियमव्रतं तेषामेव,

तस्मिन्दिने तु कर्त्तव्यमुपवासव्रतं सदा ।

इति नित्यप्रयोगविधौ सदाशब्देन तदन्वयात् ।

सूर्यग्रहे कुरुक्षेत्रे महादानैर्मुहुर्मुहुः ।
तत्फलं समवाप्नोति श्रीरामनवमीव्रतात् ॥

इति काम्यप्रयोगश्च सर्वेषाम् । न च तद्विधौ विष्णुपरायणैरि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

षामित्याहुः। अन्ये तु अकरणे*दोषश्रवणात्

तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम्।

इति पूर्वोक्तवचनाच्च जन्माष्टम्यादिवदिदमपि सर्वेषां नित्यम्। अन्यथा जन्माष्टम्यादावपि तदुपासकानामेव नित्यतां वक्तुः को वारयितेत्याहुः।

अत्र विशेषो हेमाद्रावगस्त्यसंहितायाम्—

आचार्यं चैवसंपूज्य वृणुयात्प्रार्थयेन्निशि*।
श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम॥
भक्त्याचार्यो भव प्रीत श्रीरामोऽसि त्वमेव च।

तथा—

स्वगृहे चोत्तरे देशे दानस्योज्ज्वलमण्डपम्।
शङ्खचक्रहनूमद्भिः प्राग्द्वारे समलंकृतम्॥
गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलंकृतम्।
गदाखड्गार्ङ्गदैश्चैव पश्चिमे सुविभूषितम्॥
पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृतम्।
मध्ये हस्तचतुष्काढ्यं वेदिकायुक्तमायतम्॥
ततः संकल्पयेद्देवं राममेव स्मरन्मुने।
अस्यां रामनवम्यां च रामाराधनतत्परः॥
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि।
इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः॥

त्यस्यान्वयः। काम्यप्रयोगस्य खण्डतिथौ निषेधेन नित्यप्रयोगविधिमात्रशेषत्वे तदन्तर्गततत्पदस्यापि तच्छेषत्वौचित्यात्। * दोषेति। तद्वाक्ये मर्त्यसामान्यश्रवणात्सर्वेषामेतदन्वयात् शिष्टाचारानुगृहीतत्वात्कल्पनाया इति। वैष्णवानामेव नित्येऽधिकारः। सामान्यशब्दोऽपि वैष्णवपर इत्यपि वदन्ति। *निशि=पूर्वरात्रौ। तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीरामप्रीतये दास्ये रामभक्ताय धीमते ।
प्रीतो रामो हरत्वाशु पापानि सबुहूनि मे ॥
अनेकजन्मसंसिद्धान्यभ्यस्तानि महान्ति च ।
ततः स्वर्णमयीं रामप्रतिमां पलमात्रतः ॥
निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीम् ।
बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने ॥
वामेनाधःकरेणाराद्देवीमालिङ्ग्य संस्थिताम् ।
सिंहासने राजतेऽत्र पलद्वयविनिर्मिते ॥

तथा—

अशक्तो यो महाभागः स तु वित्तानुसारतः ।
(१)पलेनाथ तदर्धेन तदर्धार्धेन वा मुने ॥
सौवर्णं राजतं वापि कारयेद्रघुनन्दनम् ।
पार्श्वे भरतशत्रुघ्नौ धृतच्छत्रकरावुभौ ॥
चापद्वयसमायुक्तं लक्ष्मणं चापि कारयेत् ।
दक्षिणाङ्गे दशरथं पुत्रावेक्षणतत्परम् ॥
मातुरङ्कगतं रामामिन्द्रनीलसमप्रभम् ।
पञ्चामृतस्नानपूर्वं *संपूज्य विधिवत्ततः ॥

[illegible]यन्तं च यजमानाचार्ययोरभोजनं हविष्यादिभक्षणं वेत्याद्यन्य-[illegible]ऽवसातव्यम् । ज्ञानमुद्रालक्षणं तु—

तर्जन्यङ्गुष्ठकौ सक्तावग्रतो हृदि विन्यसेत् ।
वामहस्ताम्बुजं वामजानोर्मूर्द्धनि विन्यसेत् ।
ज्ञानमुद्रा भवेदेषा श्रीरामस्य सदाप्रिया ॥ इति ।

*संपूज्येति । पूजादक्षिणावतां मूलमन्त्रेण अन्येषां तु पुरुषसू-[illegible]विष्णवादिसूक्तैः नाममन्त्रेण वा । स्त्रीशूद्राणां तु नाममन्त्र एव ।

(१) 'पलेनार्धतदर्धार्धतदर्धार्धेन वा मुने' इति मुद्रितपुस्तके पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौसल्यामन्त्रस्तु—

रामस्य जननी चासि रामरूपामिदं जगत् ।
अतस्त्वां पूजयिष्यामि लोकमातर्नमोऽस्तु ते ॥
नमो दशरथायेति पूजयेत्पितरं ततः ॥

अत्र*दशावरणपञ्चावरणादिपूजा ऽन्यत्र ज्ञेया ।

उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुदिने मेषं गते पूषणि ।
निर्दग्धं निखिलाः पलाशसमिधो मध्यादयोध्यारणे-
राविर्भूतमभूदपूर्वविभवं यत्किञ्चिदेकं महत् ॥

इति जन्मभावनां कुर्वन्वाद्यानि वादयेत् ।

इन्द्रोऽग्निश्च यमश्चैव नैर्ऋतो वरुणोऽनलः ।
कुबेर ईशो ब्रह्मादिदिक्पालाः स्नापयन्तु ते ॥

इति स्नानमन्त्रः । * दशावरणेत्यादि ।

अथ प्रयोगः । आदौ प्रणवः सर्वत्र स्त्रीशूद्रवर्जम् । तत्र पद्मकोणे पूर्वादितः—राँ हृदयाय नमः, रीं शिरसे स्वाहा, रूँ शिखायै वषट्, रैं कवचाय हुँ, रौं नेत्रत्रयाय वौषट्, रः अस्त्राय फट् ॥

दयाब्धे त्राहि संसारसर्पान्मां शरणागतम् ।
भक्त्या समर्पयेत्त्वाऽहं प्रथमावरणार्चनम् ॥

इति पठेत् । द्वितीयावरणार्चनानन्तरं पाठे 'द्वितीयावरणार्चनम्'इत्यादिः । इति प्रथमावरणम् । अथाऽष्टाब्जमूले—आँ आत्मने नमः, (प्रणामानन्तरं 'सर्वविद्याक्षरं' सर्वत्रावर्त्तते) निवृत्त्यै अन्तरात्मने, प्रतिष्ठायै परमात्मने, विद्यायै ज्ञानायै शान्त्यै इति द्वितीयम् । अथ तत्पत्रे वासुदेवाय श्रियै, संकर्षणाय शान्त्यै, प्रद्युम्नाय प्रीत्यै, अनिरुद्धाय रत्यै इति तृतीयम् । पत्राग्रे हनुमते सुग्रीवाय, भरताय, विभीषणाय, लक्ष्मणाय अङ्गदाय, शत्रुघ्नाय जाम्बवते इति चतुर्थम् । अथ द्वितीयाष्टपत्रपत्रेषु मृत्यवे जयन्ताय, विजयाय सौराष्ट्रवर्त्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाय सौराष्ट्राय अकोपाय धर्मराजाय सुमन्ताय इति पञ्चमम् ॥ अथ द्वादशपत्रपत्रेषु वसिष्ठाय वामदेवाय जाबालये गौतमाय भरद्वाजाय शौनकाय वाल्मीकाय नारदाय सनकाय सनन्दनाय सनातनाय सनत्कुमाराय इति षष्ठम् । अथ षोडशपत्रपत्रेषु नीलाय नन्दाय सुषेणाय मैन्दाय शरभाय द्विविदाय वन्दनाय गवाक्षाय किरीटाय कुण्डलाय श्रीवत्साय कौस्तुभाय शङ्खाय चक्राय गदायै शराय इति सप्तमम् । अथ द्वात्रिंशत्पत्रपत्रेषु ध्रुवाय धराय सोमाय अद्भ्यः अनिलाय अनलाय प्रत्यूषाय प्रभासाय वीरभद्राय शम्भवे गिरीशाय अजैकपदे अहिर्बुध्न्याय पिनाकिने भुवनाधीश्वराय कपालिने दिक्पतये स्थाणवे भगाय वरुणाय सूर्याय वेदान्ताय मानवे इन्द्राय रवये गभस्तिने यमाय हिरण्यरेतसे दिवाकराय मित्राय विष्णवे धात्रे इत्यष्टमम् । अथ भूपूरे ॐ लँ इन्द्राय सुराधिपतये सायुधाय सवाहनाय सपरिवाराय सशक्तिकाय नमः ॥ ॐ रँ अग्नये तेजोऽधिपतये इत्यादि पूर्ववत् । एवमग्रेऽपि । यँ यमाय प्रेताधिपतये । क्षँ निर्ऋतये रक्षोऽधिपतये । वँ वरुणाय जलाधिपतये । शँ वायवे प्राणाधिपतये । सँ सोमाय नक्षत्राधिपतये । ईँ ईशानाय विद्याधिपतये आँ ब्रह्मणे लोकाधिपतये पूर्वेशानयोर्मध्ये । ह्रीं विष्णवे भूताधिपतये निर्ऋतिपश्चिमयोर्मध्ये इति नवमं तद्बहिः । वज्राय शक्त्यै दण्डाय खड्गाय पाशाय ध्वजाय गदायै शूलाय अम्बुजाय चक्राय इति दशमम् । तदुक्तं रामार्चनचन्द्रिकायाम्—

'षट्कोणे प्रथमावृत्तिः स्यादङ्गैर्हृदयादिभिः ।
द्वितीयाऽऽत्मादिभिर्देवैरष्टाब्जस्य तु मूलके ॥
तृतीया वासुदेवाद्यैरष्टपत्रे तथैव च ।
चतुर्था वायुपुत्राद्यैः पत्राग्रे पूर्वतः क्रमात् ॥
सृष्ट्याद्यैः पञ्चमावृत्तिर्द्वितीयाष्टदले तथा ।
षष्ठी द्वादशपत्रे तु वसिष्ठाद्यैर्महर्षिभिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अशोककुसुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः।
दशाननवधार्थाय धर्मसंस्थापनाय च ॥
राक्षसानां विनाशाय दैत्यानां निधनाय च।
परित्राणाय साधूनां जातो रामः स्वयं हरिः॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ।
पुष्पाञ्जलिं पुनर्दत्त्वा यामे यामे प्रपूजयेत् ॥
दिवैवं विधिवत्कृत्वा रात्रौ जागरणं ततः।
ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः॥
समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने।
ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥
पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा समाहितः।
लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः॥

सप्तमी षोडशाब्जे स्यान्नीलाद्यैः कपिपुङ्गवैः।
ध्रुवाद्यैरष्टमी ज्ञेया द्वात्रिंशद्दलपत्रके ॥
इन्द्राद्यैर्भूगृहे बाह्ये नवमावरणं भवेत्।
तदस्त्रैर्वज्रशक्त्याद्यैर्दशमावरणं भवेत् ॥' इति।

अत्र पूज्यपूजकयोर्मध्ये प्राची।

'देवा ये स्वस्य चाप्यग्रे प्राची प्रोक्ता विचक्षणैः।
प्राच्येव प्राची नोद्दिष्टा मुक्त्वा देवस्य पूजनम् ॥

इति रामार्चनचन्द्रिकावचनात्। तत्राशक्तस्य पञ्चावरणपूजा भवति। सापि तत्रैव।

पूर्वषट्कोणकोणेषु हृदयादीनि षट्क्रमात्।
दले हनूमत्प्रमुखान् सृष्ट्यादीन् दलमध्यतः॥
दलाग्रे लोकपालांश्च तदस्त्राणि ततो बहिः। इति।

अर्थो रामार्चनचन्द्रिकायां द्रष्टव्यः। *अशोकेति*।

'दत्त्वा पुष्पाञ्जलिं पूर्वं गृहीत्वा शङ्खमुत्तमम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साज्येन पायसेनैव स्मरन् राममनन्यधीः।
ततो भक्त्या सुसन्तोष्य आचार्यं पूजयेन्मुने॥
ततो रामं स्मरन् दद्यादेवं मन्त्रमुदीरयन्।
'इमां स्वर्णमयीं रामप्रतिमां समलंकृताम्॥
चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते।
श्रीरामप्रतिये दास्ये तुष्टो भवतु राघवः॥'
इति दत्वा विधानेन दद्याद्वै दक्षिणां भुवम्*।
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः'॥ इति।

र्यं मलमासे न कार्या।

'सुजप्तमप्यजप्तं स्यान्नोपवासः कृतो भवेत्'। इति,
'न कुर्यान्मलमासे तु महादानव्रतानि च।'

इति च माधवीये सङ्ग्रहवचनात्। ननु रामनवमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेऽपि कर्तव्यता स्यादिति चेत्, अत्र ब्रूमः—

फलपुष्पाम्बुसंपूर्णं युक्तं च तुलसीदलैः॥'
त्यादि॥

भुवमिति।

विप्रान्संभोज्य विधिवत् साचार्यः पारयेद्व्रतम्।
इति बोध्यम्। अथ दुर्दशाग्रस्तानां दशादित्यव्रतं हेमाद्रौ। तच्च—
आदित्यवारयुक्तायामेव शुक्लदशम्यां कार्यम्।
'रविवारेण युक्तायां दशम्यां पूजयेद्दशाः।'
त्युक्तेः। तिथिश्च मध्याह्नव्यापिनी। दिनद्वये तत्सत्त्वेऽसत्त्वे
च परा, एकदेशव्याप्तौ तु महत्त्वाल्पत्वाभ्यां निर्णयः। विधिश्च
रविवारे तादृशतिथियोगे। तत्प्रयोगः-तिथिवारकीर्त्तनान्ते
'मम दुर्दशानिवृत्तिपूर्वकसुदशाप्राप्त्यर्थं दशादित्यव्रतमहं करिष्ये' इति
सङ्कल्प्य तदङ्गतया गणपतिपूजापुण्याहवाचनवृद्धिश्राद्धान्तं कृत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः। किन्तु
'एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि।'
इत्यादिनिषेधस्य मलमासेऽपि पालनीयत्वात् कृष्णैकादश्यां पुत्रवद्गृहिण इवार्थादुपवासः प्रसज्यते। न त्विह तथेति व्रतत्वेन प्राप्तिर्वाच्या। सा च निषिद्धेत्यप्रसङ्गः।

स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले।
इति निषेधाच्च। एवं जन्माष्टम्यादावपि बोद्धव्यम्। इति रामनवमी॥

चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे-
'चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः।
आन्दोलनीयो देवेशः सलक्ष्मीको महोत्सवैः॥' इति।

चैत्रशुक्लद्वादश्यां दमनोत्सवः।
'द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः।
बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरम्॥
इति रामार्चनचन्द्रिकोक्तेः।

सूर्यं पञ्चोपचारैः सम्पूज्य प्राङ्मुखो बहिर्देशे गोमयोपलिप्ते इङ्गाललिखिता दशदुर्दशापुत्रिकाः पूजयेत्। ताश्च—
'दुर्मुखा दीनवदना मलिनाऽसत्यवादिनी।
दुर्बुद्धिदायिनी हिंस्रा दुष्टा मित्रविरोधिनी॥
उच्चाटनकरी नाम बहुचिन्ताप्रदायिनी।'
एताश्चतुर्थ्यन्तनामाभिः एकैकपुत्रिकायामावाह्य षोडशोपचारैः पूज्याः, फलानि दश, दश वराटिका दक्षिणेति। ततः—
'नित्यं पापरते पापे देवद्विजविरोधिनि।
गच्छतां दुर्दशे देवि नीतिशास्त्रविरोधिनि॥'
इति प्रत्येकं विसर्जयेत्। ततः शीतोदकेन स्नायात्। अत्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*ऊर्जे व्रतं मधौ दोला श्रावणे तन्तुपूजनम् ।
चैत्रे च दमनारोपमकुर्वाणो व्रजत्यधः ॥'
इति तत्रैव पाद्मवचनाच्च ।
शिवभक्तादिभिस्तु चतुर्दश्यादौ कार्यम् ।
'तत्र स्यात्स्वीयतिथिषु वह्न्यादेर्दमनार्पणम् ।'
इति तत्रैवोक्तेः । (ज्योतिःप्रकाशेऽपि—
स्वस्वदेवप्रतिष्ठायां मन्त्रसंग्रहणे तथा ।
पवित्रदमनारोपे ग्राह्या तत्तत्तिथिर्बुधैः ॥)(१)
तिथयस्तु—
वह्निर्विरिञ्चिर्गिरिजा गणेशः

हस्तौ पादौ च प्रक्षालयेत् ।। ततः शुचि शुभ्रं वस्त्रं परिधाय
प्रविशेत् । ततो भित्तौ काष्ठफलकेन अष्टदलं लिखित्वा तत्र
गन्धिचन्दनादिना दशपुत्रिका लिखेत् । ताश्च—
सद्बुद्धिदा सुखकरी सर्वसम्पत्प्रदायिनी ।
इष्टभोगप्रदा लक्ष्मीः कीर्त्तिदा सुखदायिनी ॥
पुत्रप्रदा च विजया दशमी धर्मदायिनी । इति ॥
लिखितसुदशापुत्रिकाणां पुरः दशग्रन्थियुतं पट्टदोरकं सूत्रदो-
रकं वा प्रतिष्ठाप्य तत्र रविं पूजयेत् । षोडशोपचारैः पूजां कृत्वा
'अशेषसम्पदां दात्रे भर्त्रे त्रिजगतां सदा ।
जगतः कामदात्रे च जगत्पूज्याय ते नमः ॥'
इति विसर्जयेत् । ततश्चतुर्थ्यन्तनामभिर्दश सुदशाः तासु पु-
त्रिकासु पूजयेत्, दश मधुरफलानि ढबुकादिदक्षिणा, नात्र विस-
र्जनम् । दशभिर्मोदकैर्वायनं, भुञ्जीयात्तैलवर्जितम् । इति संक्षिप्तो
दशादित्यव्रतप्रयोगः ॥

*ऊर्जे इति नित्यत्वम् ।

१-कंसान्तर्गतः पाठो लिखितपुस्तके नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फणी विशाखो दिनकृन्महेशः ।
दुर्गाऽन्तको विश्वहरिः स्मरश्च
शर्वः शशी चेति तिथीषु पूज्याः ॥

इत्युक्ताः ।

अथागमोक्तदीक्षाव्रतो दमनारोपणविधी रामार्चनचन्द्रिकायाम् । तत्रैकादश्यां—

'क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ।
न मे विघ्नो भवेदत्र कुरु नाथ दयां मयि ॥
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ।
उपवासेन त्वां देव तोषयामि जगत्पते ॥
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ।
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम् ॥
तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते ।

इति देवं संप्रार्थ्य दमनमादाय पञ्चगव्येन प्रोक्ष्य वारिणा प्रक्षाल्याशोकमूले देवाग्रे वा—

'अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ।
शोकार्तिं हर मे नित्यमानन्दं जनयस्व मे ॥

इत्यशोकम् ,

'त्रुट्यादिकालपर्यन्तः कालरूपो महाबलः ।
कलते चैव यः सर्वं तस्मै कालात्मने नमः ॥'

इति कालम् ,

'वसन्ताय नमस्तुभ्यं वृक्षगुल्मलताश्रय ।
सहस्रमुखसंवास कामरूप नमोऽस्तु ते ॥'

इति वसन्तम् ,

'कामभस्मसमुद्भूत रतिबाष्पपरिप्लुत ।
ऋषिगन्धर्वदेवादिविमोहक नमोऽस्तु ते ॥

इति दमनं च संपूज्य—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'नमोऽस्तु पञ्चबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ॥'
इति दमनमुपस्थाय 'ॐ कामाय नमः' इति संपूज्य
शायां देवताग्रे पञ्चवर्णैः चन्दनेन वा अष्टदलं कृत्वा
दिक्षुचतुरस्रं तद्बहिर्वर्तुलत्रयं तद्बहिर्वृत्तं चतुरस्रं च कृत्वा
कुम्भं संस्थाप्योपरि वस्त्रेऽष्टदले दमनं पूजयित्वा—
'पूजार्थं देवदेवस्य विष्णो लक्ष्मीपते प्रभो ।
दमन त्वमिहागच्छ सांनिध्यं कुरु ते नमः ॥'
ॐ क्लीं कामदेवाय नमः' 'ॐ ह्रीं रत्यै नमः' इत्यावाह्य
पूर्वादितः-क्लीं कामायनमः (बीजादिनमोऽन्तं सर्वत्र)
मशरीराय० अनङ्गाय० मन्मथाय० वसन्तसखाय०
राय० इक्षुचापाय० पुष्पास्त्राय० इति पूजयित्वा—
तत्स्वरूपाय विद्महे कामदेवाय धीमहि । तन्नोऽनङ्गः
चोदयात् ॥' इत्यष्टोत्तरशतं संमन्त्र्य पूजयित्वा 'ह्रीं
मः' इति पुष्पाञ्जलिं दत्त्वा—
'नमोऽस्तु पुष्पबाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते ॥'
इति नत्वा—
'आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ।
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥
निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभम् ।
सर्वदा सर्वथा विष्णो नमस्तेऽस्तु प्रसीद मे ॥'
इति देवं संप्रार्थ्य पुष्पाञ्जलिं दत्त्वा अस्त्रेण चक्रम-
ण वा रक्षां कुर्यात् । ततः प्रातर्नित्यपूजां कृत्वा पुन-
देवं संपूज्य गन्धदूर्वाक्षतयुक्तं दमनमादाय मूलमन्त्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पठित्वा—

'देवदेव जगन्नाथ वाञ्छितार्थप्रदायक ।
हृदिस्थान्पूरयेः कामान्मम कामेश्वरीप्रिय ॥
इदं दमनकं देव गृहाण मदनुग्रहात् ।
इमां साम्वत्सरीं पूजां भगवन्परिपूरय ॥'

इति मन्त्रान्ते पुनर्मूलमन्त्रेण देवे समर्पयेत् । ततोऽङ्गदेवताभ्यः स्वस्वमन्त्रेण दत्त्वा प्रार्थयेत्—

'मणिविद्रुममालाभिर्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज ॥
वनमालां यथा विष्णो कौस्तुभं सततं हृदि ।
तद्वद्दामनकीं मालां पूजां च हृदये वह ॥
जानताऽजानता वाऽपि न कृतं यत्तवार्चनम् ।
तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते ॥
जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥'

'मन्त्रहीनम्–' इति च संप्रार्थ्य पञ्चोपचारैः पुनः संपूज्य नीराज्य पारयेदिति । दीक्षारहितानां तु नाम्नैव समर्पणम् । अत्र च द्वादशीमतन्त्रीकृत्य पारणाहे ग्राह्यम् ।

'पारणाहे न लभ्येत द्वादशी घटिकाऽपि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे' ॥

इति तत्रैवोक्तेः । गौणोऽपि काल उक्तस्तत्रैव—

'*हरौ न दमनारोपः स्यान्मधौ विघ्नतो यदि ।
वैशाखे श्रावणे वाऽपि तत्तिथौ स्यात्तदर्पणम् ॥'

---

*हरौ=द्वादश्याम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'श्रावणावधि शुक्लास्ते कर्तव्यमिति नारदः ।'
इति पाठान्तरम् । इदं च मलमासे न कार्यम् ।
'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ।'
इति कालादर्शे मलमासवर्ज्येषु परिगणनात् ।
'उपाकर्म च हव्यं च कव्यं पर्वोत्सवं तथा ।
उत्तरे नियतं कुर्यात्पूर्वे तन्निष्फलं भवेत् ॥
इति माधवीये प्रजापतिवचनाच्च । शुक्लास्तादौ तु
कार्यमेव । पूर्वोक्तवचनात् ।
'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम् ।
ईशानस्य बलिं विष्णोः शयनं परिवर्तनम् ।
कुर्याच्छुक्रस्य च गुरोर्मौढ्येऽपीति विनिश्चयः ॥
इति ज्योतिर्निबन्धे वृद्धगार्ग्यवचनाच्च ।

इति दमनारोपः ॥

चैत्रशुक्लत्रयोदश्यामनङ्गव्रतं (हेमाद्रौ भविष्ये—
'चैत्रोत्सवे सकललोकमनोविनोदे
कामं त्रयोदशतिथौ च वसन्तयुक्तम् ।
पत्न्या सहार्च्य पुरुषप्रवरोऽथ योषित्
सौभाग्यरूपसुतसौख्ययुतः सदा स्यात् ॥')(१.)
तत्र सा *पूर्वा ग्राह्या ।

*पूर्वेति ।
'कृष्णाष्टमी बृहत्तपा सावित्री वटपौत्रिकी ।
कामत्रयोदशी रम्भा उपोष्याः पूर्वसंयुताः ॥'
इति वचनात् ।
'त्रयोदशी प्रकर्त्तव्या भवेद्या चापराण्हिकी ।'
इति स्कान्दन्तु शुक्लत्रयोदशी पौर्वाण्हिकी उत्तरविद्धा न

१—अत्रायं धनुश्चिह्नान्तर्गतो भागो बहुत्रानुपलब्ध्या प्रक्षिप्त इति गम्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'त्रयोदशातिथिः पूर्वः सितः' इति दीपिकोक्तेः चैत्रशुक्लचतुर्दशी *पूर्वा ग्राह्या।

'मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी।
सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचन॥'

इति हेमाद्रौ बौधायनोक्तेः।

*'परा पूर्वाह्णगामिनी' इति वा पाठः। अत्र केचिद्यथाश्रुतमेवार्थं वर्णयन्ति।

'निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः।
अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेत्॥'

इति ब्रह्मवैवर्तात्। हेमाद्रिमाधवादिलिखनमप्येवम्। संप्रदायविदस्त्वाहुः—

'चतुर्दशी तु कर्तव्या त्रयोदश्या युता विभो।

इति स्कान्दमुत्सर्गः। तदपवादश्च-

तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता॥'

इति नारदीयवचनं, तदपवादश्च-'मधोः श्रावणमासस्य' इति, तत्र 'अपवादाभावे पुनरुत्सर्गस्य स्थितिः' इति न्यायेन*पूर्वविद्धैव ग्राह्येति सिध्यति। ब्रह्मवैवर्तं तु सामान्यरूपमन्यत्र सावकाशमिति। तेन पूर्व-

---

ग्राह्या किन्तु आपराण्हिकी पूर्वविद्धेत्यर्थ इति केचित्। परे तु सायाह्नव्यापिनी आपराह्णिकी चेदिति सामान्यतो निर्णयः। अनङ्गत्रयोदशी तु अनापराह्णव्यापिनी सायाह्नव्यापिनीति वाक्यद्वयं सार्थकमित्याहुः॥ *पूर्वेति*। दमनपवित्रारोपादौ इति शेषः। *परा=मासान्तरवर्त्तिनी शुक्ला पूर्वाह्णगामिनी उत्तरविद्धेत्यर्थः। *पूर्वविद्धैवेति*। पूर्वविद्धात्वस्य रात्रिव्यापित्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिने मुहूर्तत्रयवेधे पूर्वा अन्यथोत्तरेति ॥

चैत्रपूर्णिमा सामान्यनिर्णयात्परैव । अत्र विशेषो निर्णयामृते विष्णुस्मृतौ–'चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति' इति ।' तथा ब्राह्मे—

'मन्दे वाऽर्के गुरौ वाऽपि वारेष्वेतेषु चैत्रिका ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेत् ॥' इति ।

अत्र सर्वदेवानां दमनकपूजोक्ता तत्रैव वायवीये–

संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् ॥ इति ।

अत्र स्वतिथ्या समुच्चय इति केचित् । *स्वीयतिथ्यामकरणेऽत्र दमनपूजनमित्यन्ये । दीक्षितस्तदितराविषयत्वेन व्यवस्थेत्यपरे । इयं मन्वादिरापि । सा च पूर्वमुक्ता ॥

*चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञो योगो गौ-

णाप्यत्वात्तथोक्तम् । एतेन 'पूर्वाह्णव्यापित्वस्यापि विधाने वाक्यभेदः । मधुश्रावणशुक्लचतुर्दशीभिन्नानां पूर्वाह्णगानां ग्रहणस्यामेरनुवादकत्वासंभवात्' इत्यपास्तम् । *स्वीयेति ॥ 'तत्र पक्षात्स्वीयतिथिषु' इत्युक्तेः ॥

*चैत्रकृष्णेति । तिथिकृत्यत्वात्कृष्णादिर्मासो न तु शुक्लादिः । चित्रातः शतभिष एकादशत्वेन पक्षह्रासेऽपि चैत्रोत्तरत्रयोदश्या असम्भवात् । गङ्गास्नानं च रात्र्यादावपि कार्यम् ।

'दिवा रात्रौ च संध्यायां गङ्गायां च प्रसङ्गतः ।
(प्रसङ्गतश्चेत्सन्वयः ।)
स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥'

इति ब्रह्माण्डात् । एवं महानिशायामपि ।

'महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'त्रयोदशातिथिः पूर्वः सितः' इति दीपिकोक्तेः चैत्रशुक्लचतुर्दशी *पूर्वा ग्राह्या।

'मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी।
सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचन॥'

इति हेमाद्रौ बौधायनोक्तेः।

*'परा पूर्वाह्णगामिनी' इति वा पाठः। अत्र केचिद्यथाश्रुतमेवार्थं वर्णयन्ति।

'निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः।
अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेत्॥'

इति ब्रह्मवैवर्तात्। हेमाद्रिमाधवादिलिखनमप्येवम्। संप्रदायविदस्त्वाहुः—

'चतुर्दशी तु कर्तव्या त्रयोदश्या युता विभो।

इति स्कान्दमुत्सर्गः। तदपवादश्च-

तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी।
पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता॥'

इति नारदीयवचनं, तदपवादश्च-'मधोः श्रावणमासस्य' इति, तत्र 'अपवादाभावे पुनरुत्सर्गस्य स्थितिः' इति न्यायेन*पूर्वविद्धैव ग्राह्येति सिध्यति। ब्रह्मवैवर्तं तु सामान्यरूपमन्यत्र सावकाशमिति। तेन पूर्व-

---

ग्राह्या किन्तु आपराण्हिकी पूर्वविद्धेत्यर्थ इति केचित्। परे तु सायाह्नव्यापिनी आपराह्णिकी चेदिति सामान्यतो निर्णयः। अनङ्गत्रयोदशी तु अनापराह्णव्यापिनी सायाह्नव्यापिनीति वाक्यद्वयं सार्थकमित्याहुः॥ *पूर्वेति*। दमनपवित्रारोपादौ इति शेषः। *परा=मासान्तरवर्त्तिनी शुक्ला पूर्वाह्णगामिनी उत्तरविद्धेत्यर्थः। *पूर्वविद्धैवेति*। पूर्वविद्धात्वस्य रात्रिव्यापित्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिने मुहूर्तत्रयवेधे पूर्वा अन्यथोत्तरेति ॥

चैत्रपूर्णिमा सामान्यनिर्णयात्परैव । अत्र विशेषो निर्णयामृते विष्णुस्मृतौ–'चैत्री चित्रायुता चेत्स्यात्तस्यां चित्रवस्त्रप्रदानेन सौभाग्यमाप्नोति' इति ।' तथा ब्राह्मे—

'मन्दे वाऽर्के गुरौ वाऽपि वारेष्वेतेषु चैत्रिका ।
तत्राश्वमेधजं पुण्यं स्नानश्राद्धादिभिर्लभेत् ॥' इति ।

अत्र सर्वदेवानां दमनकपूजोक्ता तत्रैव वायवीये-

संवत्सरकृतार्चायाः साफल्यायाखिलान् सुरान् ।
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवम् ॥ इति ।

अत्र स्वतिथ्या समुच्चय इति केचित् । *स्वीयतिथ्यामकरणेऽत्र दमनपूजनमित्यन्ये । दीक्षिततदितरविषयत्वेन व्यवस्थेत्यपरे । इयं मन्वादिरपि । सा च पूर्वमुक्ता ॥

*चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञो योगो गौ-

प्राप्यत्वात्तथोक्तम् । एतेन 'पूर्वाह्णव्यापित्वस्यापि विधाने वाक्यभेदः । मधुश्रावणशुक्लचतुर्दशीभिन्नानां पूर्वाह्णगानां ग्रहणस्यानुवादकत्वासंभवात्' इत्यपास्तम् । *स्वीयेति ॥ 'तत्र तत्स्वीयतिथिषु' इत्युक्तेः ॥

*चैत्रकृष्णेति । तिथिकृत्यत्वात्कृष्णादिर्मासो न तु शुक्लादिः । चित्रातः शतभिष एकादशत्वेन पक्षह्रासेऽपि चैत्रोत्तरत्रयोदश्या असम्भवात् । गङ्गास्नानं च रात्र्यादावपि कार्यम् ।

'दिवा रात्रौ च संध्यायां गङ्गायां च प्रसङ्गतः ।
(प्रसङ्गतश्चेत्सन्वयः ।)
स्नात्वाऽश्वमेधजं पुण्यं गृहेऽप्युद्धृततज्जलैः ॥'
इति ब्रह्माण्डात् । एवं महानिशायामपि ।

'महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

डेषु प्रसिद्धः । तदुक्तं वाचस्पतिकृतौ शूलपाणौ च स्कान्दे—

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत सूर्यग्रहशतैः समा ॥
शनिवारसमायुक्ता सा महावारुणी स्मृता ।
गङ्गायां यदि लभ्येत कोटिसूर्यग्रहैः समा ॥
शुभयोगसमायुक्ता शनौ शतभिषा यदि ।
महामहेति विख्याता त्रिकोटिकुलमुद्धरेत् ॥'

तत्रैव ज्योतिषे-

'चैत्रासिते वारुणऋक्षयुक्ता
त्रयोदशी सूर्यसुतस्य वारे ।
योगे शुभे सा महती महत्या
गङ्गाजलेऽर्कग्रहकोटितुल्या ॥' इति ।

त्रिस्थलीसेतौ ब्रह्माण्डपुराणे-

'वारुणेन समायुक्ता मधौ कृष्णा त्रयोदशी ।
गङ्गायां यदि लभ्येत शतसूर्यग्रहैः समा ॥' इति ।

कल्पतरौ ब्राह्मे—

'मधौ कृष्णत्रयोदश्यां शनौ शतभिषायुता ।
वारुणीति समाख्याता शुभे तु महती स्मृता' ॥

तत्र स्नानं न कर्त्तव्यं काम्यनैमित्तिकादृते ॥'

इति देवलोक्तेः । यत्तु-

'त्रयोदश्यां तृतीयायां दशम्यां च विशेषतः ।
शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथं च न ॥'
'स्नानं कुर्वन्ति या नार्यश्चन्द्रे शतभिषाङ्गते ।
सप्त जन्म भवेयुस्ता दुर्भगा विधवा ध्रुवम् ॥'

इति निषेधद्वयन्तु भोगार्थस्नानपरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*चैत्रकृष्णचतुर्दश्यां विशेषः पृथ्वीचन्द्रोदये ।
तथा:—
'चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
न प्रेतत्वमवाप्नोति गङ्गायां तु विशेषतः' ॥ इति ।
अत्र पूर्वा ग्राह्या कृष्णपक्षस्थत्वात् । गौडैस्त्वेतदेव
शुक्लचतुर्दश्यामित्येवं देवलीयत्वेन पठितम् ॥
इति श्रीरामकृष्णभट्टसूरिसुनुकमलाकरभट्टकृते का-
लनिर्णयसिन्धौ चैत्रमासः ॥
मेषसंक्रमे प्रागपरा दश दश घटिकाः पुण्यकालः ।
तत्रौ तु प्रागुक्तम् । अत्र धर्मघटादिदानमुक्तं पृथ्वीच-
न्द्रोदये पाद्मे—
'तीर्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणम् ।
दानं धर्मघटादीनां मधुसूदनपूजनम् ॥
माधवे मासि कुर्वीत मधुसूदनतुष्टिदम् ॥'
अथ वैशाखस्नानम् । तत्र पृथ्वीचन्द्रोदये विष्णु-
स्मृतिपाद्मयोः—
'तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्यं च महापातकनाशनम्' ॥
इति सौरमास उक्तः । अन्यत्पक्षद्वयमुक्तं तत्रैव पाद्मे—

'भोगाय क्रियते यत्तु स्नानं यादृच्छिकं नरैः ।
तन्निषिद्धं दशम्यादौ नित्यनैमित्तिके न तु ॥'
इत्युक्तेः । संकल्पे च वारुण्यादिशब्दैस्तन्मासातिथ्यादिग्रहेऽपि
मासादीनामधिकरणत्वेनोल्लेखः । मासादिशब्दैश्च वारुण्यादियोगग्र-
हेऽपि निमित्तत्वेन तत्तद्योगानाम् । दशहरादिष्वप्ययमेव ।
*चैत्रकृष्णेति । पूर्णिमान्तमानेन तिथिकृत्यत्वात् ॥
इति चैत्रः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'मधुमासस्य शुक्लायामेकादश्यामुपोषितः।
पञ्चदश्यां च भो वीर मेषसंक्रमणे तु वा॥
वैशाखस्ताननियमं ब्राह्मणानामनुज्ञया।
मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकम्'॥

तत्र मन्त्रः—

'वैशाखं सकलं मासं मेषसंक्रमणे रवेः।
प्रातः सनियमः स्नास्ये प्रीयतां मधुसूदनः॥
मधुहन्तुः प्रसादेन ब्राह्मणानामनुग्रहात्।
निर्विघ्नमस्तु मे पुण्यं वैशाखस्नानमन्वहम्॥
माधवे मेषगे भानौ मुरारे मधुसूदन।
प्रातःस्नानेन मे नाथ फलदो भव पापहन्'॥ इति।

तीर्थविशेषोऽपि तत्रैवोक्तः—

'मेषसंक्रमणे भानोर्माधवे मासि यत्नतः।
महानद्यां नदीतीर्थे नदे सरसि निर्झरे॥
देवखातेऽथवा स्नायाद्यथा प्राप्ते जलाशये।
दीर्घिकाकूपवापीषु नियतात्मा हरिं स्मरन्॥' इति।

सङ्कल्पे च *तत्तत्तीर्थनाम ग्राह्यम्। अज्ञाने तु विष्णुतीर्थमिति वदेत्।

'यदा न ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः।
तत्रेत्युच्चारणं कार्यं विष्णुतीर्थमिदं त्विति॥
तीर्थस्य देवता विष्णुः सर्वत्रापि न संशयः॥

इति तत्रैवोक्तेः।

---

*तत्तत्तीर्थनामेति। अपिः पूरणीयः। तेन विष्णुतीर्थसमुच्चयात्तत्तीर्थनाम विष्णुतीर्थमिति चेत्यर्थः। 'तीर्थस्य देवता विष्णुः सर्वत्रापि' इति सर्वत्रपदात्। एवं 'नद्यां नद्यन्तरस्मृतिः' इति गङ्गेरन्यानिषेधो गङ्गास्मरणे न प्रवर्त्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाऽन्योऽपि विशेषस्तत्रैव पाद्मे—

'तुलसी कृष्णगौराख्या तयाऽभ्यर्च्य मधुद्विषम् ।
विशेषेण तु वैशाखे नरो नारायणो भवेत् ॥
माधवं सकलं मासं तुलस्या योऽर्चयेन्नरः ।
त्रिसंध्यं मधुहन्तारं नास्ति तस्य पुनर्भवः' ॥

तथा—

'प्रातः स्नात्वा विधानेन माधवे माधवप्रियम् ।
योऽश्वत्थमूलमासिञ्चेत्तोयेन बहुना सदा ॥
कुर्यात्प्रदक्षिणं तं तु सर्वदेवमयं ततः ।
पितृदेवमनुष्यांश्च तर्पयेत्सचराचरम् ॥
योऽश्वत्थमर्चयेद्देवमुदकेन समन्ततः ।
कुलानामयुतं तेन तारितं स्यान्न संशयः ॥
कण्डूय पृष्ठतो गां तु स्नात्वा *पिप्पलतर्पणम् ।
कृत्वा गोविन्दमभ्यर्च्य न दुर्गतिमवाप्नुयात्' ॥

तथा—

'एकभक्तमथो नक्तमयाचितमतन्द्रितः ।
माधवे मासि यः कुर्याल्लभते सर्वमीप्सितम् ॥
वैशाखे विधिना स्नानं देवनद्यादिके बहिः ।
हविष्यं ब्रह्मचर्यं च भूशय्या नियमस्थितिः ॥

'स्नानकालेऽन्यतीर्थेषु कीर्त्यते जान्हवी जलैः ।
विना विष्णुपदीमन्यत्समर्थं नावशोधने ॥'

इति स्कान्देनान्यतीर्थे भागीरथीस्मरणकार्यताबोधनात् । केचित्तु गंगायमुनाशतद्रुसरस्वतीनां स्मरणे न दोषः । 'इमं गङ्गे यमुने सरस्वती'इति मन्त्रेणाघमर्षणोक्तेरिति प्राहुः । भाग्यामन्यतीर्थस्मरणं न कार्यम् । प्रयागादिमणिकर्णिकास्मरणं कुर्वन्ति । *पिप्पलतर्पणम्=अश्वत्थसेचनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रतं दानं दमो देवि मधुसूदनपूजनम् ।
आप जन्मसहस्रोत्थं पापं दहति दारुणम्' ॥

मदनरत्ने स्कान्दे—

'प्रपा कार्या च वैशाखे देवे देया *गलन्तिका ।
उपानद्व्यजनच्छत्रसूक्ष्मवासांसि चन्दनम् ॥
जलपात्राणि देयानि तथा पुष्पगृहाणि च ।
पानकानि च चित्राणि द्राक्षारम्भाफलान्यपि' ॥

तिथितत्त्वे—

'ददाति यो हि मेषादौ सक्तूनम्बुघटान्वितान् ।
पितॄनुद्दिश्य विप्रेभ्यः सर्वपापैः प्रमुच्यते' ॥ इति ।

तथा—

'वैशाखे यो घटं पूर्णं सभोज्यं वै द्विजन्मने ।
ददाति सुरराजेन्द्र स याति परमां गतिम् ॥'

एवं सम्पूर्णस्नानाशक्तौ त्र्यहं वा स्नायात् । तदुक्तं तत्रैव पाद्मे—

त्रयोदश्यां चतुर्दश्यां वैशाख्यां वा दिनत्रयम् ।
अपि सम्यग्विधानेन नारी वा पुरुषोऽपि वा ॥
प्रातःस्नातः सानियमः सर्वपापैः प्रमुच्यते ॥

यदा तु वैशाखो मलमासो भवति तदा काम्यानि तत्र समाप्तिनिषेधात्* मासद्वयं स्नानं तन्नियमाश्च कर्तव्याः । मासोपवासचान्द्रायणादि तु मलमासे एव समापयेत् । तदुक्तं दीपिकायाम्—

'नियताद्त्रिंशद्दिनत्वाच्छुभे मास्यारभ्य समापयेत् मलिने मासोपवासव्रतम्' इति ।

---

*गलन्तिका=सन्ततपतद्धारमुदकपात्रम्(१) । *निषेधादिति

(१) 'अलिञ्जरः स्यान्मणिकः कर्कर्यालुर्गलन्तिका' । इत्यमरात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र दानविशेष उक्तोऽपरार्के वामनपुराणे—
'गन्धाश्च माल्यानि तथा वैशाखे सुरभीणि च ।
देयानि द्विजमुख्येभ्यो मधुसूदनतुष्टये ॥'
एवं स्नाने कृते तस्योद्यापनं कार्यम् । तदुक्तं तत्रैव—
मासमेवं बहिः स्नात्वा नद्यादौ विमले जले ।
एकादश्यां च द्वादश्यां पौर्णमास्यामथापि वा ॥
उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः ।
मण्डलं कारयेदादौ कलशं तत्र विन्यसेत् ॥
निष्केण वा तदर्धेन तदर्धार्धेन वा पुनः ।
शक्त्या वा कारयेद्देवं सौवर्णं लक्षणान्वितम् ॥
लक्ष्मीयुक्तं जगन्नाथं पूजयेदासने बुधः ।
भूषणैश्चन्दनैः पुष्पैर्दीपैर्नैवेद्यसंचयैः ॥
एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत् ।
श्वोभूते कृत*मैत्रोऽथ ग्रहवेद्यां ग्रहान्यजेत् ॥
होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः ।
तिलाज्येन यवैर्वाऽपि सर्वैर्वाऽपि स्वशक्तितः ॥
अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा ।
प्रतद्विष्णु(१)रनेनैव इदंविष्णुरनेन वा ॥

आरब्धं कर्म यत्किञ्चित्तत्तु कार्यम्मलिम्लुचे ।
इत्यनुवृत्तिवचनाच्चेत्यपि द्रष्टव्यम् । *मैत्रं=मित्रदेवताकं स-
स्यादि । सर्वभूतसौहार्दमिति केचित् ।

---

(१) स तु मन्त्रो ऋग्वेदसंहितायां द्वितीयाष्टके द्वितीयाध्याये—'प्र
तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु
विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा' ॥ इति । अस्यार्थः—'स महा-
नुभावो विष्णुः वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण प्रस्त-
वे प्रकर्षेण स्तूयते सर्वैः । वीर्येण स्तूयमानत्वे दृष्टान्तः—मृगोन=

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रतसंपूर्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीम् ।
पादुकोपानहौ छत्रं गुरवे व्यजनं तथा ॥
शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा ।
ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्यो दद्याच्च दक्षिणाम् ॥
कलशाञ्जलसम्पूर्णांस्तेभ्यो दद्याद्यवांस्तथा ।
एवं कृते माधवस्य चोद्यापनविधौ शुभे ॥
फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात् ॥'

एतावत्यशक्तौ तत्रैवोक्तम्—

'वैशाख्यां विधिना स्नात्वा भोजयेद्ब्राह्मणान्दश ।
कृसरं सर्वपापेभ्यो मुच्यते नात्र संशयः' ॥ इति ॥

वैशाखशुक्लतृतीया अक्षय्यतृतीयोच्यते । सा*पूर्वा-

---

*पूर्वाह्णव्यापिनी=परविद्धा । गौरीव्रते तु द्वितीयावेधः कलाकाष्ठादिरूपोऽपि त्याज्यः ।

तत्र स्वल्पाऽपि परा । यदा परा न लभ्यते तदा द्वितीयाविद्धापि ग्राह्या उक्तत्वात्सिद्धात् । तदलाभे पूर्वा ।

सिंहादिरिव । यथा स्वविरोधिनो मृगयिता सिंहो भीमो=भीतिजनकः कुचरः=कुत्सितहिंसादिकर्ता, दुर्गमप्रदेशगन्ता वा । गिरिष्ठाः=पर्वतादुन्नतप्रदेशस्थायी सर्वैः स्तूयते, तद्वदयमपि मृगः=अन्वेष्टा शत्रूणां भीमः=भयानकः, सर्वेषां भीत्यपादानभूतः । परमेश्वराद्भीतिः-'भीषाऽस्माद्वातः पवते'इत्यादिश्रुतिषु प्रसिद्धा । किञ्च कुचरः=शत्रुवधादिकुत्सितकर्मकर्ता,कुषु सर्वासु भूमिषु लोकत्रयेषु संचारी वा । तथा गिरिष्ठाः=गिरिवदुच्छ्रितलोकस्थायी । यद्वा गिरि=मन्त्रादिरूपायां वाचि सर्वदा वर्तमानः । ईदृशोऽयं स्वमहिम्ना स्तूयते । किञ्च यस्य विष्णोरुरु=विस्तीर्णेषु त्रिषु=त्रिसंख्याकेषु विक्रमणेषु=पादप्रक्षेपेषु विश्वा=सर्वाणि भुवनानि=भूतजातानि अधिक्षियन्ति=आश्रित्य निवसन्ति स विष्णुः स्तूयते' । इति श्रीसायणाचार्यैर्भाष्ये उक्तः । इममर्थं मनसि निधाय कर्मानुष्ठेयं श्रद्धालुभिरिति तद्बोधनार्थमेवायमर्थो निबन्धित इति ज्ञेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यापिनी ग्राह्या । दिनद्वयेऽपि तद्व्याप्तौ परैव । तदुक्तं निर्णयामृते नारदीये—

'वैशाखे शुक्लपक्षे तु तृतीया रोहिणीयुता ।
दुर्लभा बुधवारेण सोमेनापि युता तथा ॥
रोहिणीबुधयुक्तापि*पूर्वविद्धा विवर्जिता ।
भक्त्या कृताऽपि मांधातः पुण्यं हन्ति पुराकृतम् ॥
गौरी विनायकोपेता रोहिणीबुधसंयुता ।
विनापि रोहिणीयोगात्पुण्यकोटिप्रदा सदा' ॥ इति ॥

इयं युगादिरपि । सा चोक्ता रत्नमालायाम्—

'माघे पञ्चदशी*कृष्णा नभस्ये च त्रयोदशी ।
तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः' ॥ इति ।

अन्तु गौडाः—

'माघस्य पौर्णमास्यां तु घोरं कलियुगं स्मृतम् ।'

इति ब्राह्मोक्तेः,

'वैशाखमासस्य च या तृतीया
नभस्यसौ कार्तिकशुक्लपक्षे ।
नभस्यमासस्य तमिस्रपक्षे
त्रयोदशी, पञ्चदशी च माघे ॥'

इति विष्णुपुराणे चकारेण तमिस्रपक्षानुषङ्गेऽपि पूर्वाविरोधात्पौर्णमास्येव ज्ञेया । 'द्वे शुक्ले' इत्यादिकं तु निर्मूलमित्याहुः । तन्न ।

'एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धाऽपि कर्त्तव्या यदि न स्यात्परेऽहनि ॥'

इत्युक्तत्वात् । *पूर्वविद्धेति । द्वितीयावेधस्त्रिमुहूर्तः । परदिने च त्रिमुहूर्तैव ग्राह्या ।

*कृष्णेति । काकाक्षिन्यायेनोभयान्वयि । एवं शुक्लेत्यत्रापि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम् ।'
इति *भविष्यविरोधात् ।

एतेन ब्राह्मानुसारात्पूर्णिमायामेव युगादिश्राद्धं व-दन् शूलपाणिः परास्तः । *तेन कल्पभेदाद्युगभेदाद्वा व्यवस्थेति तत्त्वम् । एतेन—

'कार्तिके नवमी शुक्ला माघमासे च पूर्णिमा ।'
इति बृहन्नारदीयं व्याख्यातम् । *निर्मूलत्वोक्तिर्नारदीयाज्ञानकृता । अत्र श्राद्धमुक्तं मात्स्ये—

'कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु ।
हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् ॥' इति ।

भारतेऽपि—

'या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः ।
स्नात्वा हुत्वा च दत्वा च जप्त्वाऽनन्तफलं लभेत् ॥'
इति ।

श्राद्धेऽपि पूर्वाह्णव्यापिनी ग्राह्या ।

'पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः ।
दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकाः ॥'
इति पाद्मोक्तेः ।

'द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः ।
शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके ॥'

---

*भविष्येति ।

'नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात्कृतम् ।
त्रेता सिततृतीयायां वैशाखे समपद्यत ॥'
इति पूर्वेण—

'कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः ॥'
इत्युत्तरेण च वचनेन संश्लिष्टकालत्वादिति भावः । दर्शे पूर्णिमायां वा युगादित्वं व्यवस्थापयति—*तेनेति । *निर्मूल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति हेमाद्रौ नारदीयवचनाच्च । दीपिकाऽपि—
'कर्मतिथयः पूर्वाह्णिकाः स्युः सिते विज्ञेया अपरा-
हिकाश्च बहुले' इति । स्मृत्यर्थसारेऽपि मन्वादिश्राद्धेषु
शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या, कृष्णपक्षेऽपराह्ण-
व्यापिनी' इति ।
देवोदासीये गोभिलः—
'वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै ।
हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा ॥' इति ॥
गोविन्दार्णवेऽप्येवम् । तेनेयं पूर्वाह्णव्यापिनी । दिन-
पे तत्त्वे*परैवेति धर्मतत्त्वविदो हेमाद्र्यादयः । अन-
भट्टस्तु—
'सवैधृतिव्यतीपातो युगमन्वादयस्तथा ।
सन्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः ॥'
त्याह । दानादाविति *श्राद्धसंग्रहः । उपवास-
वग्रे वक्ष्यते । हेमाद्रावप्येवम् । माधवस्तु व्यतीपातः
राद्धेऽपराह्णव्यापी ग्राह्य इत्याह । स्मृत्यर्थसारे तु कुतु-
कालयोगीत्युक्तम् । यत्तु मार्कण्डेयः—
'शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः ।
कृष्णपक्षापराह्णे हि रोहिणं तु न लङ्घयेत् ॥'
रोहिणो=नवमो मुहूर्तः,
*अत्र शुक्लपक्षयुगादिश्राद्धं *पूर्वाह्णे कार्यमिति शूल-

योक्तिरिति । ब्राह्मस्येत्यादि । *परैवेति । कर्मकालशास्त्रं
राधिस्वेत्यादि । *श्राद्धेति । पौर्वाह्णिकत्वेऽप्यपराह्णावच्छेदेन का-
रमिति भावः । सिद्धान्तमाह—*अत्रेति । *पूर्वाह्ण इति ।
"शुक्लपक्षस्य" इति मार्कण्डेयवाक्येन कृष्णपक्षे श्राद्धारम्भ
न शुक्लपक्षश्राद्धसमाप्तौ रोहिणस्यैवोक्तेः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिगर्थस्तु कालापाणिः । निर्णयामृतादयस्तु कालादर्शे-
ऽमापराह्णिकमुक्त्वा-'एष मन्वन्तरादीनां युगादीनां विनिर्णयः'
इत्युक्तत्वात् "द्वेशुक्ले'इत्यादिवचनं विष्णुपूजनविष-
यम् । श्राद्धं त्वापराह्णिकमेवेति व्यवस्थां जगदुः ।
सेयं पूर्वोक्तानेकवचोविरोधात् 'पूर्वाह्णे दैविकं कुर्यात्'
इत्यादिवचनादेव सिद्धे वचनवैयर्थ्याच्च स्वाच्छन्द्य-
विलसितमात्रमित्युपेक्षणीया । किञ्च कालादर्शोक्ति-
र्न्यायमूला वचोमूला वा ? । नाद्यः । युगादि-
श्राद्धस्यामाश्राद्धविकृतित्वेन न्यायतोऽपराह्णव्याप्तावप-
पि वचनेन तस्य बाधात् । नान्त्यः । अतिदेशादे-
वापराह्णप्राप्तेर्वचनवैयर्थ्यात् । 'अप्राप्ते शास्त्रमर्थवत्'
इति न्यायात् । तेन यदि कालादर्शोक्तेः कथञ्चिच्छ्रद्धा-
जाड्येन समाधित्सा, तर्हि न्यायप्राप्तकृष्णपक्षयुगादि-
विषयत्वेन सा व्यवस्थापनीयेति दिक्* ।

पूर्वाह्णस्तत्र द्वेधाभक्तदिनपूर्वार्धः ।

'द्वेधाभक्तदिनांशकोऽत्र गदितः प्राह्णापराह्णौ' इति
दीपिकोक्तेः । माधवादयोऽप्येवम् ।

अत्र विशेषो हेमाद्रौ भविष्ये—

'वैशाखे शुक्लपक्षे तु तृतीयायां तथैव च ।
गङ्गातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥
तस्यां कार्यो यवैर्होमो यवैर्विष्णुं समर्चयेत् ।
यवान्दद्याद् द्विजातिभ्यः प्रयतः प्राशयेद्यवान् ॥'इति ।

अत्र दानविशेषस्तत्रैव भविष्ये इमां प्रक्रम्य-

दिगार्थस्तु दर्शोऽश्रद्धेय एव । 'द्वे शुक्ले' इति वाक्ये युगादिशब्दे
प्रसरन्ती वृत्तिर्युगादिकार्यत्वेनैव प्रसरन्तीति श्राद्धस्यापि क्रोडी-
कारात् । सर्वग्रन्थेषु अमाक्षयाहादिपार्थक्येन युगादिश्राद्धतिथि-
निर्णयादमातिथ्यतिदेशे मानाभावादित्यप्याहुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'उदकुम्भान्सकनकान्साम्नान्सर्वरसैः सह ।
यवगोधूमचणकान्सक्तुदध्योदनं तथा ॥
ग्रैष्मिकं सर्वमेवात्र सस्यं दाने प्रशस्यते ॥' इति ।

देवीपुराणेऽपि—
'तृतीयायां तु वैशाखे रोहिण्यृक्षे प्रपूज्य तु ।
उदकुम्भप्रदानेन शिवलोके महीयते ॥'

मन्त्रस्तु—
'एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ।
अस्य प्रदानात्तृप्यन्तु पितरोऽपि पितामहाः ॥
गन्धोदकतिलैर्मिश्रं साम्नं कुम्भं फलान्वितम् ।
पितृभ्यः सम्प्रदास्यामि अक्षय्यमुपतिष्ठतु ॥' इति ।

अत्र च पिण्डराहितं श्राद्धं कुर्यात् ।
'अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
युगादिषु च सर्वासु पिण्डनिर्वपणादृते ॥'
इति हेमाद्रौ पुलस्त्यवचनात् । अत्र रात्रिभोजने
प्रायश्चित्तमृग्विधाने—
'रात्रौ भुक्ते वत्सरे तु मन्वादिषु युगादिषु ।
(१)अभिस्ववृष्टिं मन्त्रं च जपेद्दश न पातकम् ॥' इति ।

---

(१)—"अभि स्ववृष्टिं मदे अस्य युध्यतो रध्वीरिव प्रवणे सक्तयः । इन्द्रो यद्वज्री धृषमाणो अन्धसाऽभिनद्वलस्य परिधीरिव वर्तनीः ॥" इति । ऋ० अ० १ अ० ४ । अस्य व्याख्या—'ऊतयो मरुतः मदे = सोमपानेन हर्षे सति अस्य = इन्द्रस्य युध्यतो = वृत्रेण सह युध्यमानस्य वर्तनीः स्ववृष्टिं = स्वभूतवृष्टिमन्तं वृत्रम्, अभि=आभिमुख्येन सस्रुः=जग्मुः [कथंभूताः] रध्वीरिव प्रवणे । यथा गमनस्वभावा आपः निम्नदेशे गच्छन्ति । यद = यदा अन्धसा = सोमलक्षणेनान्नेन पीतेन धृषमाणः = धर्षकः सन् वज्री = वज्रवानिन्द्रः बलस्य = संवृण्वतः एतत्संज्ञमसुरम् परिधीनत् व्यदारयत्, अवधीदित्यर्थः । तत्र दृष्टान्तः—त्रितः परिधीनिव । यथा हविर्लेपनिघर्षणाय अग्नेः सकाशादप्सु एकतो द्वितीस्त्रित इति त्रयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपरार्के यमः—

'कृतोपवासाः सलिलं ये युगादिदिनेषु च।
दास्यन्त्यन्नादिसहितं तेषां लोका महोदयाः॥'इति।

वैशाखे मलमासे सति तत्रैव युगादिः कार्या। तथा च हेमाद्रौ ऋष्यशृङ्गः—

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु।
उपाकर्मणि चोत्सर्गे ह्येतदिष्टं वृषादितः॥'इति।

एतद्दशहरादिकं वृषादिसंक्रमे इष्टम्। 'कन्याचन्द्रे वृषे रवौ' इत्यादिना सौरमासोक्तेरित्यर्थः। कालादर्शेऽपि—

अब्दोदकुम्भमन्वादिमहालययुगादिषु*।

इति मलमासकर्तव्येषु परिगणनाच्च। महालयशब्देन मघात्रयोदश्युच्यत इति माधवः। स्मृतिचन्द्रिकायां तु मासद्वये कर्तव्यमित्युक्तम्।

ननु ज्येष्ठवैशाखादिशब्दाश्चान्द्रा एव मुख्याः तत्कथमनुक्तपौर्णिक्तिरित्यत्राह—*एतदिति। यद्यपि 'वृषे रवौ' इति सौरमुपजीव्यैव दशहरा न तु युगादिस्तथाऽपि 'एतदिष्टं वृषादितः' इति सिद्धवद्धेतुनिर्देशादेव युगादिवाक्येऽपि सौर एव मासो ग्राह्य इति भावः। *युगादिष्विति मन्वाद्युपलक्षणम्। युगादिकार्यं च युगादितिथिमध्ये एव कार्यम्।

पुरुषा जज्ञिरे। तथा च तैत्तिरीयैः समाम्नातम्—'सोऽङ्गारेणाप अभ्यपातयत्, तत एकतोऽजायत, स द्वितीयमभ्यपातयत् ततो द्वितोऽजायत, इति। तत्र उदकपानार्थं प्रवृत्तस्य कूपे पतितस्य प्रतिरोधायासुरैः परिधयः परिधायकाः कूपस्याच्छादकाः स्थापिताः। तान्यथा सोऽभिपत्तद्वत्।' इति श्रीमत्सायणाचार्याणाम्। अत्र यत्र यत्र मन्त्रास्तेषामर्थानिर्दिष्टाः तत्र मन्त्रनिर्देशप्रयोजनं स्फुटमेव। विशेषतोऽर्थनिर्देशप्रयोजनं च जपकाले तत्तन्मन्त्रार्थज्ञानं तावदवश्यमपेक्षितम्। अन्यथा जपस्य न सम्यक् फलनिष्पत्तिरिति तज्जपस्तदर्थभावनम्' इति श्रीमत्तञ्जलिकृतयोगसूत्रादवगम्यत इति ज्ञेयम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यौगादिकं मासिकं च श्राद्धं चापरपक्षिकम् ।

'मन्वादौ च युगादौ च ग्रहणे चन्द्रसूर्ययोः ।
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया ॥'

इति स्कान्दात् । माधव इत्यरुचिः । महालयश्राद्धं कन्याप्रयुक्तमेव । तत्रैव—

'हंसे कन्यासु वर्षास्थे शाकेनापि गृहे वसन् ।
पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोः ॥'

इति विधानात् ।

'सूर्ये कन्यास्थिते श्राद्धं यो न कुर्याद् गृहाश्रमी ।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपेष्यति ॥'

इत्यादिनिषेधाच्च । तथा च यदा सिंहोपक्रमः कन्यासमाप्यः प्रथमः स्यात्, कन्योपक्रमस्तुलासमाप्यश्चरमस्तदा पूर्वत्र पञ्चम्यादिपक्षेण परत्र वा सकृत्पक्षेण कन्याभागे श्राद्धम् । यदा तु दर्शान्त्यभाग एव कन्यासंक्रमः तदनन्तरदर्शातिक्रमेण प्रतिपदि तुलासंक्रान्त्या कन्यामधिमासस्तदा दर्शश्राद्धवेलां यावत्सिंहव्याप्तेरधिकमास एव कन्यायां येन केनापि पक्षेण श्राद्धम् । "रागे चालभ्ययोगेऽपि" इति वचनात् । तथा च महालयशब्दस्य तत्परत्वसम्भवेऽलं मघापादशीपरत्वेन । यत्तु—

'मासः कन्यागते भानावसंक्रान्तो भवेद्यदि ।
दैवं पित्र्यं तदा कर्म तुलास्थे कर्तुरक्षयम् ॥'

इति वचनं, तन्नोत्कर्षं विधत्ते मानाभावात् । किन्तु पित्र्यमिति सामान्यतः श्रवणात् व्रीहिपाकादिश्राद्धविषयम् । तस्य शरदि विधानेनाश्विनेऽप्राप्तेरिति । महालयपदं तीर्थविशेषपरमिति केचित् । महालयविधावाश्विनादिशब्दानां चान्द्रपरत्वात्तत्पदं चिन्त्यमित्यन्ये ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि*च ॥' इति। अपरपक्षः कृष्णपक्षो न तु महालयः । तस्य तत्र निषेधात् । मदनरत्नेऽपि मरीचिः—

'प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरम् ।
मन्वादौ च युगादौ च तन्मासोरुभयोरपि ॥' इति

प्रतिवत्सरं क्रियमाणं कल्पादिश्राद्धमिति स एव व्याचख्यौ ।

अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तमृग्विधाने—

(१)'नयस्यद्यावामन्त्रं च शतवारं तदा जपेत् ।
युगादयो यदा न्यूनाः कुरुते नैव चापि यः ॥' इति।

अत्र समुद्रस्नानं प्रशस्तम् । तदुक्तं पृथ्वीचन्द्रोदये सौरपुराणे-

---

*मासद्वयेऽपीति । फलविशेषार्थितया मले, तत्कालावच्छिन्नजीवनरूपनिमित्तवशाच्च शुद्धे इत्यर्थः । उपवासोऽप्युक्तः ।

'कृतोपवासाः सलिलं ये युगादिदिनेषु तु ।
दास्यन्त्यन्नादिसहितं तेषां लोका महोदयाः ॥'

इति यमोक्तेः । सान्नम्=सलिलपूर्णकुम्भादिदानम् । श्राद्ध-

---

(१) "न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः । नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् ॥" इति । ऋ० अ० १ अ० ४ । 'यस्येन्द्रस्य व्यचो व्यापनं द्यावापृथिवी द्यावापृथिव्यौ नान्वानशाते प्राप्तुमसमर्थे बभूवतुः, तथा रजसोऽन्तरिक्षलोकस्य उपरि सिन्धवः स्यन्दनशीला आपः यस्येन्द्रस्य तेजसोऽन्तमवसानं नानशुः न प्रापुः । उत अपि च सोमपानेन मदे हर्षे सति स्ववृष्टिं स्वीकृतवृष्टिं वृत्रादिं युध्यतः युध्यमानस्यास्येन्द्रस्य बलस्यान्तं वृत्रादयो न प्रापुः । अतः हे इन्द्र एकस्त्वम् अन्यत् स्वव्यतिरिक्तं विश्वं सर्वं भूतजातम् आनुषक् अनुषक्तं चकृषे । सकलमपि भूतजातं त्वदधीनमभूदिति भावः' इति । अनेन य एवमपरिमितशक्तिरीश्वरस्तस्मभ्यं विहितकर्माकरणरूपं दोषं परिहर्तुमपि समर्थोऽसीति भावोऽवसेयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ ।
गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत् ॥
तत्फलं लभते मर्त्यो भूमिदानस्य च ध्रुवम् ॥' इति ।
अयं निर्णयः सर्वयुगादिषु बोद्धव्यः ॥ इति युगादि-
निर्णयः ॥

इयमेव तृतीया परशुरामजयन्ती । सा प्रदोषव्या-
पिनी ग्राह्या । तदुक्तं भार्गवार्चनदीपिकायां स्कान्दभ-
विष्यपोः—

'वैशाखस्य सिते पक्षे तृतीयायां पुनर्वसौ ।
निशायाः प्रथमे यामे रामाख्यः समये हरिः ॥
स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते ।
रेणुकायास्तु यो गर्भादवतीर्णो हरिः स्वयम् ॥' इति ।
दिनद्वये तद्व्याप्त्यावंशतः समव्याप्तौ च परा, अन्य-
था पूर्वैव । तदुक्तं तत्रैव भविष्ये—

'शुक्ला तृतीया वैशाखे शुद्धोपोष्या दिनद्वये ।
निशायाः पूर्वयामे चेदुत्तराऽन्यत्र पूर्विका ॥' इति ।
वैशाखशुक्लसप्तम्यां गङ्गोत्पत्तिः । तदुक्तं पृथ्वीचन्द्रो-
दये ब्राह्मे—

'वैशाखे शुक्लसप्तम्यां जह्नुना जाह्नवी पुरा ।
क्रोधात्पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ॥
तां तत्र पूजयेद्देवीं गङ्गां गगनमेखलाम् ॥' इति ।
अत्र शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या । दिनद्वये
मध्याह्नावव्याप्तावेकदेशव्याप्तौ वा पूर्वा । युग्मवाक्यात् ॥
वैशाखशुक्लद्वादश्यां योगविशेषो हेमाद्रौ ज्योतिः-
शास्त्रे—

करणे तर्पणं ब्राह्मणभोजनं चार्थः । पृथक्वचनान्यन्यत्र । उपवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पञ्चाननस्थौ गुरुभूमिपुत्रौ
मेषे रविः स्याद्यदि शुक्लपक्षे।
पाशाभिधाना करभेण युक्ता
तिथिर्व्यतीपात इतीह योगः॥
अस्मिंस्तु गोभूमिहिरण्यवस्त्र-
दानेन सर्वं परिहाय पापम्।
सुरत्वमिन्द्रत्वमनामयत्वं
मर्त्याधिपत्यं लभते मनुष्यः॥' इति।

पञ्चाननः=सिंहः, पाशाभिधाना तिथिः=द्वादशी करभः=हस्तः॥

वैशाखशुक्लचतुर्दशी नृसिंहजयन्ती। सा*प्रदोषव्यापिनी ग्राह्या। तदुक्तं हेमाद्रौ नृसिंहपुराणे—

'वैशाखे शुक्लपक्षे तु चतुर्दश्यां निशामुखे।
मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्॥
वर्षे वर्षे तु कर्तव्यं मम सन्तुष्टिकारणम्॥' इति।

दिनद्वयेऽपि तद्व्याप्तावंशतःसमव्याप्तौ च परा*। विषमव्याप्तौ त्वधिकव्याप्तिमती। दिनद्वयेऽप्यव्याप्तौ परा परदिने*गौणकालव्याप्तेः सत्त्वात्पूर्वदिने च तदभावात्। यत्तु—

से तु पूर्वा।

सवैधृतिर्व्यतीपातो युगमन्वादयस्तथा।
सन्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः॥

इति वचनात्। *प्रदोषेति।

'अवतारो नृसिंहस्य प्रदोषसमये द्विजाः।'

इति स्कान्दात्। जयन्तीषु जन्मकालस्यैव पूजारूपकर्मकालत्वात्। *परेति। संकल्पकाले सत्त्वात्। *गौणकालेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'ततो मध्याह्नवेलायां नद्यादौ विमले जले' ।

इत्युपक्रम्य—

'परिधाय ततो वासो व्रतकर्म समारभेत्' ।

इति तत्रैवोक्तं, तत्संकल्परूपव्रतोपक्रमविषयम् । न तेनावता मध्याह्नव्यापिनी ग्राह्येति भ्रमितव्यम् । पूर्वोक्तवचनविरोधात् ।

'वैशाखस्य चतुर्दश्यां सोमवारेऽनिलर्क्षके ।
अवतारो नृसिंहस्य प्रदोषसमये द्विजाः' ॥

इति टोडरानन्दे स्कान्दात् । "कूर्मः सिंहो बौद्धकल्की च सायम्" इति पूर्वोक्तपुराणसमुच्चयवचनाच्चेति केचित् । तत्त्वं तु पूर्ववचसामनाकरत्वेन निर्मूलत्वात्, हेमाद्रौ नृसिंहपुराणे—

'मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम्' ।

इत्युपक्रम्य—

स्वातिनक्षत्रयोगे च शनिवारे तु महत्तम् ।
सिद्धयोगस्य संयोगे वणिजे करणे तथा ॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः ।
सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम् ॥
एतदन्यतरे योगे माहिनं पापनाशनम् ।
केवलेऽपि प्रकर्तव्यं माहिने व्रतमुत्तमम् ॥
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ ॥'

इत्युक्त्वा—

परन्तु नृसिंहपुराणे—

'वैशाखशुक्लपक्षस्य चतुर्दश्यां विवस्वति ।
अस्तंगामिनि सर्वेषां पुरस्तात्स्तम्भमध्यतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'ततो मध्याह्नवेलायां नद्यादौ विमले जले।'
इत्यादिना मध्याह्न एव व्रतविधानाच्चतुर्दश्युत्तरार्धवणिजे करणे मध्याह्ने च स्पष्टं जन्म प्रतीयते। मध्यायां जन्म तु क्वाप्यनुक्तेर्मौर्ख्यकृतं, तद्वशान्निर्णयश्च हेय एवेति। (१)इयमेव योगविशेषेणातिप्रशस्ता। तदुक्तं तत्रैव—

'स्वातिनक्षत्रयोगे च शनिवारे च मद्व्रतम्।
सिद्धयोगस्य संयोगे वणिजे करणे तथा॥
पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः।
एभिर्योगैर्विनापि स्यान्महिनं पापनाशनम्॥
सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते।
मद्भक्तैस्तु विशेषेण कर्तव्यं मत्परायणैः॥'

तथा—

'सिंहःस्वर्णमयो देयो मम सन्तोषकारकः।'

तथा—

'विज्ञाय महिनं यस्तु लङ्घयेत्पापकृन्नरः।
स याति नरकं घोरं यावच्चन्द्रदिवाकरौ॥
इदं च संयोगपृथक्त्वन्यायेन नित्यं काम्यं च। अथा

प्रबभूव महाविष्णुर्नरसिंहाकृतिर्नृप।
तस्यां व्रतं नरैः कार्यं महाविष्णोरतिप्रियम्॥'

विवस्वत्यस्तङ्गामिनीति सायाह्नलाभः। भविष्ये च—

'अवतारो नृसिंहोऽभूत् त्रेतायां चादिकल्पके।
सायंकाले सदसतो रक्षोदमनकारणात्॥' इति।

स गौणः। प्रदोषस्य मुख्यकालत्वेन तत्पूर्वस्य सायाह्नस्यैव बहुशो गौणत्वदर्शनात्। वस्तुतस्तु—

---

(१) क्वचित्पुस्तके 'तथा' इत्यधिकम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विशेषः—मध्याह्ने मृद्गोमयतिलामलकस्नानं कृत्वा—
'नृसिंह देवदेवेश तव जन्मदिने शुभे।
उपवासं करिष्यामि सर्वभोगविवर्जितः॥'
इति मन्त्रेण संकल्पं कृत्वा आचार्यं वृत्वा सायंकाले—
'हैमी तु तत्र मन्मूर्तिः स्थाप्या*लक्ष्म्यास्तथैव च।
पलेन वा तदर्धेन तदर्धार्धेन वा पुनः॥
यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जितः॥'
इत्युक्तां नृसिंहमूर्तिं शक्त्या कृतं सुवर्णसिंहं च क-
लशोपरि सम्पूज्य रात्रौ जागरणं कृत्वा प्रातः पुनः
सम्पूज्य—

त्रिमुहूर्त्तं प्रदोषः स्याद्भानावस्तङ्गते सति।
इत्युक्तः प्रदोषः। भविष्ये च सायंकालो न तु सायाह्नः।
च—
'नक्षत्रदर्शनात्संध्या सायं तत्परतः स्थितम्।'
इति लक्षितः। नक्षत्रदर्शनं च घटीत्रयात्मकः कालः।
'सायंसंध्या त्रिघटिका अस्तादुपरि भास्वतः।'
इत्युक्तेः। अस्तङ्गामिनीत्यस्यापि अयमेवार्थः। एवं च प्रदो-
सायंकालशब्दाभ्यां सायंसंध्योर्ध्वं घटीत्रयं जन्मकालः तत्पूर्वः
सायान्हस्तु पूर्वोक्तयुक्त्या गौणकाल इति। *लक्ष्म्या इति। लक्ष्मी-
नृसिंहाभिप्रायम्। प्रातःकृत्यानन्तरं सूर्यादिभ्यो जन्माष्टम्यां
वक्ष्यमाणेन मन्त्रेण व्रतं निवेद्याचम्य प्राणानायम्य सजलं ताम्रपात्रं
गृहीत्वा संकल्पं कुर्यात्।
'नियमं च प्रकुर्वीत दन्तधावनपूर्वकम्।'
इति नारसिंहात्। दन्तधावनशब्दः प्रातःकृत्योपलक्षणम्।
दन्तधावनं च तृणपर्णादिना द्वादशगंडूषैर्वा कार्यम्। उपवासदिने
काष्ठनिषेधात्। व्रतिना च मिथ्याभाषणपाखण्ड्यादिसंभाषणं नि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्चाप्रदानेन सफलाः स्युर्मनोरथाः ॥'

इत्याचार्याय दत्त्वा—

'मद्वंशे ये नरा जाता ये जनिष्यन्ति चापरे ॥
तांस्त्वमुद्धर देवेश दुस्तराद्भवसागरात् ।
पातकार्णवमग्नस्य व्याधिदुःखाम्बुवारिभिः ।
तीव्रैश्च परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीराम्बुनिधिवासिंस्त्वं चक्रपाणे जगार्दन ।
व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव ॥'

राकार्यम् ।

'व्रतस्थेन न कर्त्तव्या संगतिः पापिभिः सह ।'

इति वचनात् । संकल्पमन्त्रश्च—

'श्रीनृसिंह महोग्रस्त्वं दयां कृत्वा ममोपरि ।
अद्याहं च विधास्यामि व्रतं निर्विघ्नतां नय ॥' इति ।

ततो मध्याह्ने नद्यादौ मृद्गोमयतिलामलकैः स्नात्वा नित्यकृत्यं कृत्वा गृहमागच्छेत् ।

मध्याह्ने संकल्पालिखनं चानुकल्पः । अन्यथा 'नियमं च प्रकुर्वीत' इत्यादिना संकल्पमभिधाय व्रतस्थेनेत्यादिना मिथ्यालापादिवर्जनं च प्रदर्श्य ततो मध्याह्नवेलायामित्याद्यभिधानविरोधात् । 'नित्यकर्म समाचरेत्' इति पाठे नित्यं=मध्याह्नसंध्यादि । ततो गोमयेनोपलिप्तेऽष्टदलं कृत्वा तत्र कलशं संस्थाप्य प्रतिमां हैमीं पलतदर्धतदर्द्धार्धमितां संस्थाप्य नूतनायामग्न्युत्तारणप्राणप्रतिष्ठे कृत्वा मूलमन्त्रेण वैदिकेन नाम्ना वाऽऽवाहनादि कृत्वा पञ्चामृतेन शुद्धोदकेन च संस्नाप्य यज्ञोपवीतवस्त्रे दत्त्वा आचमनं दद्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ।'

इत्युक्तेः ।

'चन्दनं शीतलं दिव्यं चन्द्रकुंकुममिश्रितम् ।
ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर ॥'

चन्दनम् ।

'कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो ।
पूजयामि नृसिंह त्वां लक्ष्म्या सह नमोऽस्तु ते ॥'

पुष्पम् ।

'कालागुरुमयं धूपं सर्वदेवसुवल्लभम् ।
करोमि ते महाविष्णो सर्वकामसमृद्धये ॥'

धूपम् ।

'दीपः पापहरः प्रोक्तस्तमोराशिविनाशनः ।
दीपेन लभ्यते तेजस्तस्माद्दीपं ददामि ते ॥'

दीपम् ।

'नैवेद्यं सुखदं चारु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्वपापक्षयं कुरु ॥'

नैवेद्यम् । ततः फलं ताम्बूलं दक्षिणां च दद्यात् । ततोऽर्घ्यम् ।

तत्र मन्त्रः—

'नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफलाः स्युर्मनोरथाः ॥'

ततो नीराज्य पुष्पाञ्जलीन्दत्त्वा स्तोत्रादिना स्तुत्वा प्रार्थयेत् ॥

तत्र मन्त्रः—

'पीताम्बर महाबाहो प्रह्लादभयनाशकृत् ।
यथाभूतेनार्चनेन यथोक्तफलदो भव ॥'

ततो रात्रौ गीतवाद्यपुराणश्रवणादिभिर्जागरणं कृत्वा पुनः प्रातः संपूज्य ब्राह्मणान्तदुद्दिश्य भोजयित्वा मूर्तिं ब्राह्मणाय दद्यात् । मन्त्रः—नृसिंहाच्युतेति ग्रन्थे । गोभूतिलहिरण्यशय्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रार्थयेदिति संक्षेपः* ॥

वैशाखपौर्णमास्यां विशेषोऽपरार्के, जाबालिनोक्तः—

'शृतान्नमुदकुम्भं च वैशाख्यां च विशेषतः ।
निर्दिश्य धर्मराजाय गोदानफलमाप्नुयात् ॥
सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पञ्च च ।
तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्यपोहति ॥' इति ।

उदकुम्भदानमन्त्रस्तत्रैव तृतीयाप्रकरणे उक्तः भविष्येऽपि—

'वैशाखी कार्तिकी माघी तिथयोऽतीव पूजिताः
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ॥'

अत्र कृष्णाजिनदानं कार्यम् । तथा च विष्णुः—

'कृष्णाजिने तिलान्कृष्णान्हिरण्यं मधुसर्पिषी ।
ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम् ॥' इति ।

इति श्रीरामकृष्णभट्टसूरिसूनुकमलाकरभट्टकृते कालनिर्णयसिन्धौ वैशाखमासः समाप्तः ॥

दत्त्वा प्रार्थयेत् 'मद्वंशे ये नरा' इत्यादि । एवं प्रार्थ्य ततो देवं विसृज्य च यथाविधि उपहारादिकं सर्वमाचार्याय निवेदयेत् ।

'दक्षिणाभिः सुसंतोष्य ब्राह्मणांस्तु विसर्जयेत् ।
मध्यान्हे तु समायुक्तो नरो भुञ्जीत बन्धुभिः ॥' इति ॥

यत्तु मध्यान्हे नृसिंहजन्म, जयन्तीषु तत्काल एव पूजाकालः तत्कालीना च तिथिरिति, तदसत् । मध्याह्नः प्रातरेव वा व्रतोपक्रमकालः मध्याह्नस्तु व्रताङ्गस्नानाविशेषकाल इत्यभिप्रायेणाह-*संक्षेप इति । नृसिंहजयन्तीनवरात्रं महोदधौ—

'षष्ठ्यामारम्भणं कार्यं चतुर्दश्यां समापनम् ।
नवरात्रमिति प्रोक्तं नृसिंहस्य रमेशितुः ॥' इति ।

इति वैशाखः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृषसंक्रान्तौ पूर्वाः षोडश घटिकाः पुण्यकालः। तत्रौ संक्रमे सति प्रागेवोक्तम्॥

ज्येष्ठशुक्लतृतीयायां रम्भाव्रतमुक्तं माधवीये भविष्ये-

'भद्रे कुरुष्व यत्नेन रम्भाख्यं व्रतमुत्तमम्।
ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परा॥' इति।

सा पूर्वविद्धा ग्राह्या।

'*बृहत्तपा तथा रम्भा*सावित्री*वटपैतृकी।
*कृष्णाष्टमी च भूता च कर्तव्या*संमुखी तिथिः॥'

इति स्कान्दोक्तेः॥

*ज्येष्ठशुक्लदशमी दशहरा। तदुक्तं हेमाद्रौ ब्राह्मे—

ज्येष्ठशुक्लप्रतिपदि दशाश्वमेधस्नानम्।

'ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम्।
दशाश्वमेधके स्नात्वा मुच्यते सर्वपातकैः।'

इति काशीखण्डात्। *बृहत्तपा=श्रावणकृष्णद्वितीया। सावित्री=तद्व्रतसंबन्धिपूर्णिमा। *वटपैतृकी=तद्व्रतसंबन्ध्यमावास्या। *कृष्णाष्टमी=कृष्णपक्षाष्टमी। *सम्मुखी=सायाह्नव्यापिनी। त्रिमुहूर्त्ताभावे तु परा।

*ज्येष्ठेति। दशम्याः श्रीगङ्गायाश्च क्रमेण दशहरात्वमुक्तम्। दशपापानि मनुनोक्तानि—

'पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्॥
अदत्तानामुपादानं हिंसा चैवाविधानतः।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्॥
परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्।
वितथाऽभिनिवेशश्च मानसं त्रिविधं स्मृतम्॥' इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥' इति।
वाराहेऽपि—
'दशमी शुक्लपक्षे तु ज्येष्ठे मासि कुजेऽहनि।
अवतीर्णा यतः स्वर्गात् हस्तर्क्षे च सरिद्वरा ॥
हरते दशपापानि तस्माद्दशहरा स्मृता ॥' इति।
स्कान्दे तु दशयोगा उक्ताः।
*'ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
व्यतीपाते*गरानन्दे कन्याचन्द्रे वृषे रवौ ॥
दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते' ॥ इति।
अत्र बुधभौमयोः कल्पभेदेन व्यवस्था। इयं च यत्रैव योगबाहुल्यं सैव ग्राह्या। योगाधिक्ये फलाधिक्यात्। ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या न तु शुद्धे ।

---

*ज्येष्ठे इति। ज्येष्ठश्चान्द्रमानेन न तु सौरमानेन। 'वृषे रवौ' इत्यनेन पौनरुक्त्यापातात्। 'वृषे रवौ' इति पुण्यतमत्वार्थम्। नन्वेवं 'दशहरासु' इत्यनुत्कर्षवाक्यस्य का गतिः? दशहरास्वरूपस्य सौराघटितत्वादिति चेन्न। अधिमासे दशहरासु तत्तन्नक्षत्रयोगस्यैव वृषस्थरवेरपि लाभात्तत्रापि सा कार्येत्यर्थात्। अत एव दशहरास्विति अनेकसमुदायाभिप्रायं बहुवचनम्। अन्यथा तद्गतदशम्या एकत्वात्तदनुपपत्तेः। एतच्च राशिविशेषस्थरवियोगघटितालभ्ययोगस्य महापष्ठीपदं तदितरालभ्ययोगस्य युगादिपदं च मन्वादीनामुपलक्षणम्। न च बुधहस्तयोग एवानन्द इति कथं पृथक्कदुक्तम्, एवं हस्तस्य दिननक्षत्रस्य कन्याचन्द्राविनाभाव एवेति वाच्यम्। प्रवृत्तिनिमित्तभेदेन तद्भेदात्। बुधनक्षत्रयोः प्रवृत्तिनिमित्तमेकैकमात्रवृत्ति आनन्दपदन्तूभययोगि। एवं हस्तस्य शुक्लपक्षाविनाभावेऽपि। *गरं करणभेदः। 'कुजेऽहनि' इत्युक्तेराह—*अत्रेति। *न तु शुद्धे इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु' ।
इति हेमाद्रौ ऋष्यशृङ्गोक्तेः । तथा स्कान्दे—
'यां*काञ्चित्सरितं प्राप्य दद्यादर्घं तिलोकदम् ।
मुच्यते दशभिः पापैः स महापातकोपमैः' ॥
अत्र विशेषः काशीखण्डे—
'ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम् ।
दशाश्वमेधके स्नात्वा मुच्यते सर्वपातकैः ॥
एवं सर्वासु तिथिषु क्रमस्नायी नरोत्तमः ।
आशुक्लपक्षदशमीं प्रतिजन्माघमुत्सृजेत् ॥'
तथा—
'लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ ।
दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः ॥'
तथा भविष्योत्तरकाशीखण्डयोः—
'निशायां जागरं कृत्वा समुपोष्य च भक्तितः ।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसङ्ख्यया ॥
तथा दीपैश्च ताम्बूलैः पूजयेच्छ्रद्धयाऽन्वितः ।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥
दशप्रसृतिकृष्णांश्च तिलान्सर्पिश्च वै जले ।
सक्तुपिण्डान् गुडपिण्डान्दद्याच्च दशसङ्ख्यया ॥
ततो गङ्गातटे रम्ये हेम्ना रूप्येण वा तथा ।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ॥
संस्थाप्य पूजयेद्देवीं तदलाभे मृदाऽपि च ।
अथ तत्राप्यशक्तश्चेल्लिखेत्पिष्टेन वै भुवि ॥
वक्ष्यमाणेन मन्त्रेण कुर्यात्पूजां विशेषतः ।

पिष्टेऽपि' इति तु कृत्यरत्नावली । *यां कांचिदिति । श्रीगङ्गा-
असत्त्वे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारायणं महेशं च ब्रह्माणं भास्करं तथा ॥
भगीरथं च नृपतिं हिमवन्तं नगेश्वरम् ।
गन्धपुष्पादिभिः सम्यग्यथाशक्ति प्रपूजयेत् ॥
दशप्रस्थांस्तिलान्दद्याद्दशविप्रेभ्य एव च ।
दशप्रस्थान्यवान्दद्याद्दशसङ्ख्यागवीस्तथा ॥'

प्रस्थः=षोडशपलानि । पलं तु 'मुष्टिमात्रं पलं स्मृतम्' इति भट्टार्णवे उक्तम् ।

'मत्स्यकच्छपमण्डूकमकरादिजलेचरान् ।
हंसकारण्डवबकचक्राटिट्टिभसारसान् ॥
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ।
तदलाभे पिष्टमयानभ्यर्च्य कुसुमादिभिः ॥
गङ्गायां प्रक्षिपेदाज्यदीपांश्चैव प्रवाहयेत् ।
पुष्पाद्यैः पूजयेद्गङ्गां मन्त्रेणानेन भक्तितः ॥
'ॐनमः शिवायै नारायण्यै दशहरायै गङ्गायै नमो नमः'
इति मन्त्रं तु यो मर्त्यो दिने तस्मिन्दिवानिशम् ।
जपेत्पञ्चसहस्राणि दशधर्मफलं लभेत्' ॥

काशीखण्डे त्वन्यो मन्त्र उक्तः—

'नमः शिवायै प्रथमं नारायण्यै पदं ततः ।
दशहरायै पदमिति गङ्गायै मन्त्र एष वै ॥
स्वाहान्तः प्रणवादिश्च भवेद्विंशाक्षरो मनुः ।
पूजा दानं जपो होमस्तेनैव मनुना स्मृतम् ।' इति ।

अत्र गङ्गास्तोत्र(१)पाठमपि दशवारं कुर्यात् । तदुक्तं

१—तच्च स्तोत्रं तत्पाठविधिश्च उक्तो धर्मसिन्धौ । यथा-'ब्रह्मोवाच नमः शिवायै गङ्गायै शिवदायै नमो नमः । नमस्ते रुद्ररूपिण्यै शाङ्करयै ते नमो नमः ॥ नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः । सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोऽस्तु ते । स्थाणुजङ्गमसम्भूतविषहन्त्र्यै नमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भविष्ये–

'तस्यां दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः ।
यः पठेद्दशकृत्वस्तु दरिद्रो वाऽपि चाक्षमः ॥
सोऽपि तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः ॥' इति ।

ः । भोगोपभोगदायिन्यै भोगवत्यै नमो नमः । मन्दाकिन्यै नमस्तेऽस्तु
र्गदायै नमः सदा ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः । नम-
शुक्लसंस्थायै तेजोवत्यै नमो नमः ॥ नन्दायै लिङ्गधारिण्यै नाराय-
ै नमो नमः । नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥ बृहत्यै ते
मस्तेऽस्तु लोकधात्र्यै नमो नमः । नमस्ते विश्वामित्रायै नन्दिन्यै ते नमो
मः ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः । शान्तायै च व-
ष्ठायै वरदायै नमो नमः ॥ उग्रायै सुखदोग्ध्र्यै च सञ्जीविन्यै नमो
मः । ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः ॥ प्रणतार्तिप्रभञ्जिन्यै
नमात्रे नमोऽस्तु ते । सर्वापत्प्रतिपक्षायै मङ्गलायै नमो नमः ॥ शरणा-
दीनार्त्तपरित्राणपरायणं । सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥
लिपायै दुर्गहन्त्र्यै दक्षायै ते नमो नमः । परात्परतरे तुभ्यं नमस्ते
सदे सदा ॥ गङ्गे ममाग्रतो भूया गङ्गे मे देवि पृष्ठतः । गङ्गे मे पार्श्व-
रेहि त्वयि गङ्गेऽस्तु मे स्थितिः ॥ आदौ त्वमन्ते मध्ये च सर्वं त्वं गां गते
वे । त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः ॥ गङ्गे त्वं परमात्मा च
यस्तुभ्यं नमः शिवे' । य इदं पठति स्तोत्रं भक्त्या नित्यं नरोऽपि यः ॥ शृणु-
यात् श्रद्धया युक्तः कायवाक्चित्तसम्भवैः । दशधा संस्थितैर्दोषैः
र्वैरेव प्रमुच्यते ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते । ज्येष्ठे
मासि सिते पक्षे दशमी हस्तसंयुता ॥ तस्यां दशम्यामेतच्च स्तोत्रं ग-
ङ्गाजले स्थितः । यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥ सोऽपि
तत्फलमाप्नोति गङ्गां संपूज्य यत्नतः । अदत्तानामुपादानं हिंसा चै-
वाविधानतः ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् । पारुष्यम-
नृतं चैव पैशुन्यं चापि सर्वशः ॥ असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतु-
र्विधम् । परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् ॥ वितथाभिनिवे-
शश्च मानसं त्रिविधं स्मृतम् । एतानि दश पापानि हर त्वं मम जा-
हवि ॥ दशपापहरा यस्मात्तस्माद्दशहरा स्मृता । त्रयस्त्रिंशच्छतं पूर्वान्
पातृनथ पितामहान् ॥ उद्धरत्येव संसारान्मन्त्रेणानेन पूजिता ॥ नमो
भगवत्यै दशपापहरायै गङ्गायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तोत्रं च प्रतिपदादिदशमीपर्यन्तं दिनवृद्धिसंख्यया पठनीयमिति शिष्टाः। अत्र सर्वोऽपि विस्तरः स्तोत्रादि च भट्टकृतत्रिस्थलीसेतोरवधेयः। विस्तरभीतेर्न लिख्यते। एवं कुर्वतः फलमुक्तं काशीखण्डे—

'एवं कृत्वा विधानेन वित्तशाठ्यविवर्जितः।
उपवासी वक्ष्यमाणैर्दशपापैः प्रमुच्यते॥
सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते॥' इति।

अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिनत्वाद्विशेषेण पूजा कार्या। तदुक्तं स्कान्दे सेतुमाहात्म्ये—

'ज्येष्ठे मासे सिते पक्षे दशम्यां बुधहस्तयोः।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ॥
दशयोगे सेतुमध्ये लिङ्गरूपधरं हरम्।
रामो वै स्थापयामास शिवलिङ्गमनुत्तमम्॥' इति।

इति दशहरा॥

ज्येष्ठशुक्लैकादशी निर्जला। तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुम्भान्दद्यादिति निर्णयामृते उक्तम्। मदनरत्ने स्कान्दे—

'ज्येष्ठे मासि नृपश्रेष्ठ या शुक्लैकादशी शुभा।
निर्जलं समुपोष्यात्र जलकुम्भान्सशर्करान्॥
प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसन्निधौ।'

तायै विश्वरूपिण्यै नन्दिन्यै ते नमो नमः॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम्। विधिहरिहरपूर्वैरिन्दुकोटीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि॥ आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम्। भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं देवी कल्मषनाशिनी भगवती भागीरथी दृश्यते॥ गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥' इति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्येष्ठपौर्णमास्यां सावित्रीव्रतम्। तदुक्तं स्कान्दभविष्ययोः—

'ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे।'

इत्युपक्रम्य—

'व्रतं त्रिरात्रमुद्दिश्य दिवारात्रिं स्थिरा भवेत्।'

इति अन्तेऽप्युपसंहृतम्।

'ज्येष्ठे मासि सिते पक्षे पूर्णिमायां तथा व्रतम्।
चीर्णं पुरा महाभक्त्या कथितं ते मया नृप॥' इति।

दाक्षिणात्याश्चैतदेवाद्रियन्ते। एतच्चामावास्यायामयुक्तं निर्णयामृते भविष्ये—

'अमायां च तथा ज्येष्ठे वटमूले महासती।
त्रिरात्रोपोषिता नारी विधिनाऽनेन पूजयेत्॥'

मदनरत्ने त्विदं वाक्यम्—'पञ्चदश्यां तथा ज्येष्ठे' इति पठित्वा ज्येष्ठपौर्णमास्यामुक्तम्।

'अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रिया।
अयाचितं चतुर्दश्याममायां समुपोषणम्॥' इति।

तत्तु पाश्चात्या आद्रियन्ते। हेमाद्रिसमयोद्द्योतादितु भाद्रपदपूर्णिमायामुक्तम्। तत्तु नेदानीं प्रचरति। पैठीनसिस्तु—

'मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत्।
ज्येष्ठशुक्लचतुर्दश्यां सावित्रीमर्चयन्ति याः॥
वटमूले सोपवासा न ता वैधव्यमाप्नुयुः॥

इति पराशरोक्तेश्चतुर्दश्यां प्रदोषे व्रतम्। दिनद्वये तदुपवासौ परैवेत्याहुः। तन्निर्मूलम्। अत्र पूर्णिमामावास्ये विद्धे ग्राह्ये।

'भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तमम् ॥'
इति ब्रह्मवैवर्तात् । स्कान्देऽपि—

'भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ।
वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहन ॥' इति
मदनरत्ने ब्रह्मवैवर्तेऽपि—

'प्रतिपत्पञ्चमी भूतसावित्री *वटपूर्णिमा ।
नवमी दशमी चैव नोपोष्याः परसंयुताः ॥' इति ।
यदा त्वष्टादशघटिका चतुर्दशी तदा परा ग्राह्या ।

'पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः ।
नाड्योऽष्टादश भूतस्य स्युश्चेत्तच्च परेऽहनि ॥
इति माधवः । *वस्तुतस्तु—

'भूतोऽष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम् ।'
इत्यस्य ब्रह्मान्तरे सावकाशत्वाद्विशेषप्रवृत्तपूर्वविद्धा-

---

*सावित्री=तद्व्रतसंबन्ध्यमावास्या । *वटपूर्णिमा=व-
टव्रतसंबन्धिपूर्णिमा ॥ नन्वेवं षण्मुहूर्त्तपरिमितपञ्चमीविधव-
त्यां षष्ठ्यां स्कन्दव्रतमपि न स्यात् । 'नागो द्वादशनाडीभिः'
इति वाक्येन षण्मुहूर्त्तमितपञ्चम्या दूषकत्वात् । किंच स्कन्दव्रते
तिथिक्षये पूर्वेतिमाधवादिग्रन्थोऽसंगतः । त्रिमुहूर्त्ताऽधिकक्षयाभा-
वेनोत्तरदिने तादृशविद्धायास्त्रिमुहूर्त्तसत्तावश्यम्भावेन

एकादशी तृतीया च षष्ठी चैव त्रयोदशी ।
पूर्वविद्धाऽपि कर्त्तव्या यदि न स्यात्परेऽहनि ॥

इति वासिष्ठवचनाविषयत्वादित्यत्राह—*वस्तुतस्त्विति ॥
'नागो द्वादश'इत्यादेर्दूषकताऽनुवादेन नाडीविशेषविधायकत्वं लाघ-
वात् । वेधविशिष्टदूषकताविधाने गौरवात् । तथा च यत्र व्रते
पञ्चमीविद्धा षष्ठी निषिद्धा तद्विषयकमेतत् । स्कन्दव्रते पञ्चमीवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विधायकवचनेन तस्य बाधादष्टादशनाडीवेधेऽपि पूर्वैवे-
धं पन्थाः साधुः । *अत्र पूर्णिमानुरोधेनैव यथा त्रि-
रात्रसंपत्तिर्भवति तथा त्रयोदश्यादि ग्राह्यम् । तस्याः
प्रधानत्वात्* । अयं निर्णयोऽमायामपि ज्ञेयः । पारणं तु
तिथ्या ग्राह्यत्वात् तत्र पञ्चमीवेधस्यादूषकत्वात् । षण्मुहूर्त्तपञ्चमी-
तायामपि तत्कर्त्तव्यमेव तद्वत् । यत्र व्रते चतुर्दशीविद्धा निषिद्धा
द्विषयकतया सावित्रीव्रते च—

बृहत्तपा तथा रम्भा सावित्री वटपैत्तृकी ।
कृष्णाष्टमी च भूता च कर्त्तव्या संमुखी तिथिः ॥

इति पूर्वविद्धाविधानेन तस्या ग्राह्यत्वात्तत्र चतुर्दशीवेधो न दूषक
इत्यर्थः ॥ उक्तवासिष्ठं च परेऽह्नि एकभक्तादिकाले मध्याह्नादौ
तृतीयाद्यभावे सामान्यतो निषिद्धाया नागविद्धायाः प्रतिप्रसवार्थ-
मिति स्मर्त्तव्यम् । ननु केचन सोपपदाः त्रिरात्रादिशब्दाः । यथा
सावित्रीत्रिरात्र–बिल्वत्रिरात्र–गोत्रिरात्र–दुर्गानवरात्रादिमध्यगाः ।
तानि कर्मनामधेयान्येव तत्तद्देवतातत्तत्कालसंबन्धयोः प्रमाणान्तर-
गोचरत्वेन प्रवृत्तिनिमित्तसंभवात् । ननु निरुपपदास्त्रिरात्रनवरात्रादि-
शब्दाः । बहुव्रीहौ समासान्तोऽसंभवेनावश्यकसमाहारत्वेन 'न त्रिरा-
त्रमुपवसेत् नवरात्रे विशेषतः' इत्यादौ अत्यन्तसंयोगार्थकाद्वितीयया
तृतीयया वा गुणविधौ संभवति लक्षणया नामधेयत्वानौचित्यात्,
त्रयोदश्यादिवाक्यानि च प्राप्ते त्रिरात्रादिसामान्ये विशेषविधयः
गुणविधित एव त्रिरात्रादिशब्दे रात्रिशब्दस्तिथिपरः ।
एवं च यत्र चरमतिथिकृत्यमेव प्रधानं तिथ्यन्तरकृत्यं
तदङ्गं तत्र साङ्गप्रधानप्रयोगः । तावत्कालिक इति प्रधान-
तिथ्यनुरोधेनेतरतिथिग्रहोऽयुक्तः । पूर्वापरतिथिकृत्याङ्गकैकादशी-
व्रतादौ तु त्रिरात्रादिव्यवहारविरहस्तवनादेस्तस्यापर्यनुयोज्यत्वा-
त् । प्रकृते तु तिथित्रयकृत्यं प्रधानमतः कथमित्यत्राह—*अत्रेति ।
प्रधानत्वादिति । यद्यपि तिथित्रयकृत्यं प्रधानं तथाऽपि वट-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्णिमान्ते कार्यम् ॥

अत्र स्त्रीव्रतेषु विशेषः परिभाषायामुक्तः । अथ विशेषो भविष्ये—

'गृहीत्वा वालुकां पात्रे प्रस्थमात्रां युधिष्ठिर ।
ततो*वंशमये पात्रे वस्त्रयुग्मेन वेष्टित ॥
सावित्रीप्रतिमां कुर्यात्सौवर्णीं वापि मृन्मयीम् ।
सार्धं सत्यवता साध्वीं फलनैवेद्यदीपकैः ॥
रजन्या कण्ठसूत्रैश्च शुभैः कुङ्कुमकेशरैः ॥'

पूजयेदिति शेषः । रजनी=हरिद्रा । कण्ठसूत्रं=सौभाग्यतन्तुः ।

'सावित्र्याख्यानकं वापि वाचयीत द्विजोत्तमैः ।
रात्रौ जागरणं कृत्वा प्रभाते विमले ततः ॥
तामपि ब्रह्मणे दत्त्वा प्रणिपत्य क्षमापयेत् ॥'

मन्त्रस्तु—

'सावित्रीयं मया दत्ता सहिरण्या महासती ।
ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यताम् ॥
व्रतेनानेन राजेन्द्र वैधव्यं नाप्नुयात्क्वचित् ॥' इति ॥

ज्येष्ठपौर्णमास्यां विशेष आदित्यपुराणे-

'ज्येष्ठे मासि तिलान्दद्यात्पौर्णमास्यां विशेषतः ।
अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः ॥'

विष्णुरपि—

पूर्णिमा वटपैतृकीत्यादिसमाख्यव त्रयोदशीचतुर्दश्योरुपवासानुकल्पविधानं च पूर्णिमादेर्निर्णयोपजीव्यत्वरूपं प्राधान्यं द्योतयति । तथा निर्णीतपूर्णिमादेरव्यवहितपूर्वतिथ्योरनुकल्पवाक्ये त्रयोदश्यादिशब्देन ग्रह इत्यर्थः । *वंशमये पात्रे । पात्रं च सप्तधान्यपूर्णं कार्यम् । 'सप्तधान्यभृतं कार्यम्'इति कथायामुक्तेः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'ज्यैष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नराधिपत्यमाप्नोति' इति।

हेमाद्रौ ज्योतिषे—

'ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा।
पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता॥' इति।

इयं मन्वादिरपि। सा पौर्वाह्णिकी ग्राह्या। विशेषस्तु त्रे उक्तः। तथाऽपरार्के वामनपुराणे—

'उदकुम्भाम्बुदानं च*तालवृन्तं सचन्दनम्।
त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि तु॥' इति।

इति कमलाकरभट्टकृते निर्णयसिन्धौ ज्येष्ठमासः॥

मिथुनसंक्रान्तौ पराः षोडश घटिकाः पुण्यकालः। त्रौ तु प्रागेवोक्तम्। आषाढशुक्लद्वितीयायां रथोत्स-॥। तदुक्तं तिथितत्त्वे स्कान्दे—

'आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता।
तस्यां रथे समारोप्य रामं वै *भद्रया सह॥
यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान्बहून्॥'

तथा—

'ऋक्षाभावे तिथौ कार्या यात्राऽसा प्रीयते मम॥'

'इहामुत्रातपत्राणां कुरु मे केशव प्रभो।
छत्रं त्वत्प्रीतये दत्तं ब्राह्मणाय मया सह॥'

छत्रमन्त्रः।

'उपानहौ प्रदास्यामि कण्टकादिनिवारणे।
सर्वस्थानेषु सुखदे अतः शान्तिं प्रयच्छ मे॥'

उपानन्हमन्त्रः।

*तालवृन्तं=तालव्यजनः॥

इति ज्येष्ठः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आषाढशुक्लदशमी पौर्णमासी च मन्वादिः । सा च पूर्वाह्णव्यापिनी ग्राह्येति प्रागुक्तम्। आषाढशुक्लद्वादश्यामनुराधायोगरहितायां पारणं कुर्यात्। तदुक्तं भविष्ये-

'आभाकासितपक्षेषु मैत्रश्रवणरेवती* ।
सङ्गमे न हि भोक्तव्यं द्वादश द्वादशीर्हरेत् ॥'

'आषाढभाद्रपदकार्तिकशुक्लद्वादशीष्वनुराधाश्रवणरेवतीयोगे पारणं न कुर्यादिति। अत्र यद्यप्येतावदेवोक्तं तथाप्यनुराधाप्रथमपाद एव वर्ज्यः। तदुक्तं विष्णुधर्मे

'मैत्राद्यपादे स्वपितीह विष्णुः,
पौष्णान्त्यपादे प्रतिबोधमेति ।
श्रुतेश्च मध्ये परिवर्तमेति
सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् ॥' इति ।

*वस्तुतस्तु*पूर्ववचनमिदं च निर्मूलमेव ॥

अत्रैव विष्णुशयनोत्सव उक्तो हेमाद्रौ ब्राह्मे—

*एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः ।

---

*भद्रा=सुभद्रा ॥ *आभाकेति। गद्यं 'संजवे'इति पाठं वदताम्। रेवतीति लुप्तषष्ठीकम् । संगवे न भोक्तव्यं, प्रातर्मध्याह्नयोस्तु तद्भवत्येवेति तदर्थः । यत्र दिनं व्याप्यानुराधा द्वादशी च तत्र प्रातरेव पारणं 'सर्वेषामुपवासानाम्'इत्युक्तेः ॥ *वस्तुतस्त्विति । महानिबन्धेष्वदर्शनात् । *एकादश्यामिति । शयनादीनि निशादिवेलायां कार्याणीति ।

'निशि स्वापो दिवोत्थानं संध्यायां परिवर्त्तनम्' ।

इत्युक्तेः । तत्तन्नक्षत्रयोगस्तु नापेक्षितः तदनुक्तेः । स्वापविधिर्भविष्ये—

'महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः ।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुजङ्गशयने शेते क्षीरार्णवजले सदा ॥' इति।
कल्पतरौ यमः—
*'क्षीराब्धौ*शेषपर्यङ्के आषाढ्यां संविशेद्धरिः।
निद्रां त्यजति कार्तिक्यां तयोः सम्पूजयेत्सदा॥
ब्रह्महत्यादिकं पापं क्षिप्रमेवं व्यपोहति।
हिंसात्मकैस्तु किं तस्य यज्ञैः कार्यं महात्मनः॥
प्रस्वापे च प्रबोधे च पूजितो येन केशवः।
टोडरानन्देऽपि स्कान्दे—
आषाढशुक्लैकादश्यां कुर्यात्स्वप्नमहोत्सवम्।'
अयं द्वादश्यामप्युक्तः
'आषाढासितपक्षेषु मैत्रश्रवणरेवती।
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः॥

'सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम्।
विबुद्धे च विबुद्ध्येत प्रसन्नो मे भवाच्युत॥' इति।
भाद्रशुक्लैकादश्यां विष्णोः परिवर्त्तनमुक्तं भविष्ये—
'प्राप्ते भाद्रपदे मासि एकादश्यां दिने सिते।
कटिदानं भवेद्विष्णोर्महापातकनाशनम्॥'
कटिदानम्=अङ्गपरिवर्त्तनम्। तत्र महापूजां कृत्वा परिवर्त्तनं प्रार्थयेत्
'परिवर्त्तस्व देवेश केशवाच्युत भो प्रभो।
त्वयैषैकादशी देव हितार्थं निर्मिता पुरा॥' इति।
कार्त्तिकशुक्लैकादश्यां विष्णोरुत्थापनं पाद्मे—
'एकादश्यां तु शुक्लायां कार्त्तिके मासि केशवम्।
प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः॥' इति।
*क्षीराब्धाविति। कल्पतरुकृतामयमाशयः। 'नक्षत्रेण युक्तः काल:' इति प्रत्ययः। पूर्णिमायामेवेति न नियमः कालमात्रग्रह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम्।
अन्यत्र पादयोगेऽपि द्वादश्यामेव कारयेत्॥
आभाकाद्येषु मासेषु*मिथुने माधवस्य च।
द्वादश्यां शुक्लपक्षे च प्रस्वापावर्तनोत्सवाः॥'
इति भविष्योक्तेः।

णात् पूर्णिमायां तत्तन्नक्षत्रयोगस्य प्रायिकत्वाच्च। न च तदत्यन्तायोगव्यावृत्त्या योगः मानाभावात्। तस्मादिह कथंचिल्लक्षणया एकादश्यपि ग्राह्या इति। अत्राहुः-अस्तु तथा माघी सप्तमी प्रौष्ठपदी अष्टकेत्यादौ मघायुक्तः कालो=माघी यत्र मासे स माघः। माघस्येयं माघी सप्तम्यन्वयानुरोधात्। प्रथमतो नक्षत्राण् ततो मासाण् ततः शैषिकाण् कर्त्तव्यः। एवं प्रौष्ठपदीत्यत्रापि अष्टकान्वयाऽनुरोधात्। पठन्ति च।

'नक्षत्राणं च मासाणं कृत्वा प्रौष्ठपदीपदम्।
विशेष्यं चाष्टकारूपं शैषिकाणां प्रबोधयेत्॥'इति।

इह तु आषाढी कार्त्तिकी च अत्यन्तायोगव्यावृत्त्याऽऽषाढादियुक्तैव नक्षत्राणैव अनुरोधविशेषविरहात्। पौर्णमासीलाभस्तु

'आषाढशुक्लपक्षान्ते भगवान्मधुसूदनः।
भोगिभोगे निजां मायां योगनिद्रां समाप्नुयात्॥'

इत्युक्तेः। *मिथुने इति॥ आषाढमात्रान्वयि। अन्यत्र बाधात्। यद्द्वादश्यां शयनाद्युक्तं तन्मिथुनार्क एवेत्यर्थ इति मयूखः। उत्सवो=जागरः।

'आषाढशुक्लद्वादश्यां सर्वशान्तिकरं शुभम्।
य एतेन विधानेन ज्ञात्वा वै कर्म कारयेत्॥
स पुमान्न प्रणश्येत संसारेषु युगे युगे॥'

तथा—

'इयं च द्वादशी देवप्रबोधार्थं तु निर्मिता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वयैषा सर्वलोकानां हितार्थं शेषशायिना ॥' इति ॥ परिवर्त्तनेऽपि द्वादश्येव ग्राह्या । एतासां रात्रिदिनसन्ध्यादिषु अनुराधाश्रवणरेवतीनां क्रमेणादिमध्यान्तभागे प्रस्वापादि कार्यम् ।

'आषाढासितपक्षेषु मैत्रश्रवणरेवती ।
आदिमध्यावसानेषु प्रस्वापावर्त्तनोत्सवाः ॥'

इति भविष्यात्,

'मैत्राद्यपादे स्वपितीह विष्णुः
श्रुतेश्च मध्ये परिवर्त्तमेति ।
पौष्णावसाने च सुरारिहन्ता
प्रबुध्यते मासचतुष्टयेन ॥'

इतिनारदीयाच्च ।

'निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्त्तनम् ।'

इत्युक्तेः निशादौ नक्षत्रपादयोगाभावे नक्षत्रमात्रयोगो ग्राह्यः ।

'पादयोगो यदा न स्यात् ऋक्षेणापि तदा भवेत् ।'

इति वाराहात् ।

'विष्णुर्दिवा न स्वपिति न च रात्रौ प्रबुध्यते ।
द्वादश्यामृक्षसंयोगे पादयोगो न कारणम् ॥'

इति विष्णुधर्मोत्तरात् । द्वादश्यामेकदेशेनापि नक्षत्रयोगाभावे एकादश्यां त्रयोदश्यां वा तद्दक्षभाग एव निशादिवेलानादरेणैव प्रस्वापादि कार्यम् ।

'अप्राप्ते द्वादशीमृक्षे उत्थानशयने हरेः ।
पादयोगेन कर्त्तव्ये नाहोरात्रं विचिन्तयेत् ॥'

इति जीमूतवाहनोदाहृतवचनात् । उत्थानशयने इति परिवर्त्तनोपलक्षणम्, अहोरात्रमिति संध्यादिवेलायाः । एवं च द्वादश्यां निशाद्यादरे अन्यतिथौ च नक्षत्रपादयोगादरे च नियते सति यदा द्वादशीषु निशादेरन्यत्र तत्तद्दक्षभागयोगः अन्यतिथौ च तदि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'द्वादश्यां*सन्धिसमये नक्षत्राणामसम्भवे।
आभाकासितपक्षेषु शयनावर्तनादिकम् ॥'
इति वाराहोक्तेश्च । द्वादश्यामित्यत्रापि पारणाऽहो-मात्रं विवक्षितम् ।

'*पारणाऽहे पूर्वरात्रे घण्टादीन्वादयन्मुहुः ।'
इति रामार्चनचन्द्रिकोक्तेः । *अत्रैकादशीद्वादश्यो-र्देशभेदेन व्यवस्था ।

तरनक्षत्रस्यैव योगः तदा द्वादशीषु संध्यायां प्रस्वापादि कार्य-मित्याह—*द्वादश्यामिति । निशादौ तन्नक्षत्रयोगाभावे सति शयनावर्त्तनप्रबोधाः संधिसमये=संध्यासमय एव, न तु तत्र नक्षत्रभागयोगे ।

'रेवत्यन्तो यदा रात्रौ द्वादश्यां च समागतः ।
तदा विबुध्यते विष्णुर्दिनान्ते प्राप्य रेवतीम् ॥'
इति वचनात् । रेवत्यन्तविबोधग्रहणं चोपलक्षणम् । न चैतस्य श्रीरामविषयत्वमस्तु तत्र तत्र विष्णुरिति श्रवणात् । अत्र मैत्राद्यपादे इति नानावाक्येषु चतुर्थभागार्थकपादशब्दात् अनुराधारेवत्यौ चतुर्द्धा विभज्याऽऽद्यान्त्यपादयोरेव स्वापबोधौ कार्यौ श्रवणं तु त्रेधा विभज्य तन्मध्यभागे परिवर्त्तनं कार्यम् । श्रुतेश्च मध्ये परि-वर्त्तमेतीति मध्यपदात् । *पारणाहे इति । वैष्णवैः पारणाह एव प्रस्वापादि क्रियते इत्यपरः पक्षः । अत्र द्वादशीपदमस्त्वेकादशी-परमित्यत्राह-*अत्रेति । "धनदश्च रमा गौरी"इत्यादिपवि-त्रारोपणप्रकरणस्थवाक्यानन्तरम्

'यस्य यस्य च देवस्य यन्नक्षत्रं तिथिस्तथा ।
तस्य देवस्य तस्मिंस्तु शयनावर्त्तनादिकम् ॥'
इति वाक्यात्पवित्रारोपणदेवप्रस्वापादेर्द्वादश्यामप्यौचित्यादतो व्यवस्थेत्यर्थः । आषाढकार्त्तिकपौर्णमास्योरपि स्वापप्रबोधौ दर्शितौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं च मलमासे न कार्यम्।

'ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम्।'

इति कालादर्शे निषेधात्। यदपि—

'एकादश्यां तु गृह्णीयात्संक्रान्तौ *कर्कटस्य वा।
आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतक्रियाम्॥'

इति हेमाद्रौ ब्रह्मवैवर्ते, तदपि मलमासेऽसति द्रष्टव्यम्।

*'मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत्।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे॥'

इति तत्रैव मोहचूलोत्तरोक्तेः॥

सीराब्धौ शेषपर्यङ्के''इत्यादि। एकादशीमारभ्य पञ्चाहमपि प्रस्वापादि पुराणान्तरे तद्विस्तरः। *कर्कटस्येति। प्रस्वापवत्तदुत्तरकर्त्तव्यस्य चातुर्मास्यव्रतस्य मिथुन एव न्याय्यत्वात्कथमेतदित्यपेमानः। मलमासे मिथुनेऽधिकमासे न। तथा च हरिशयने मिथुने द्वादशीस्थाने कर्के द्वादशी लभ्यते तदुत्तरकर्त्तव्यचातुर्मास्यमेव संक्रान्तौ कर्कटस्येत्यनेन धर्त्तव्येत्यर्थः। वस्तुतस्तु चातुर्मास्यव्रतारम्भे चत्वारः पक्षाः। आषाढे—शुक्लैकादशी—तद्वादशी—तत्पौर्णमासी—कर्कसंक्रान्तिभेदात्। "एकादश्यान्तु शुक्लायाम्"इति वाक्यात्।

'आषाढशुक्लद्वादश्यां पौर्णमास्यामथाऽपि वा।
चातुर्मास्यव्रतारम्भं कुर्यात्कर्कटसंक्रमे॥'

इति वाराहात्। *मिथुनस्थ इति।

'माधवाद्येषु यद्येकमासि दर्शद्वयं यदा।
द्विराषाढः स विज्ञेयः शेते कर्कटकेऽच्युतः॥'

इति द्विराषाढकथनं तु व्यवस्थार्थम्।

'मेषादिमिथुनान्तेषु यदा दर्शद्वयं भवेत्।
अब्दान्तरे तदावश्यं मिथुनार्के हरिः स्वपेत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अत्रैव चातुर्मास्यव्रतारम्भ उक्तो भारते—

'आषाढे तु सिते पक्षे एकादश्यामुपोषितः।
चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः॥' इति।

अस्य नित्यत्वं तत्रैवोक्तम्—

'वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः।
व्रतेन नोचेदाप्नोति किल्बिषं वत्सरोद्भवम्॥
असम्भवे तुलार्केऽपि कर्तव्यं तत्प्रयत्नतः॥' इति।

तेनाषाढशुक्लैकादश्यां द्वादश्यां पौर्णमास्यां वाऽऽरम्भः। समाप्तिस्तु कार्तिकशुक्लद्वादश्यामेव। तदुक्तं हेमाद्रौ भारते—

'चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत्॥' इति।

अस्यारम्भः शुक्रास्तादावपि कार्यः।

'न शैशवं न मौढ्यं च शुक्रगुर्वोर्न वा तिथेः।
खण्डत्वं चिन्तयेदादौ* चातुर्मास्यविधौ नरः॥'

इति हेमाद्रौ वृद्धगार्ग्योक्तेः। *इदं च द्वितीयाद्यारम्भविषयम्। प्रथमारम्भस्तु न भवत्येव। आशौचमध्येऽपि द्वितीयाद्यारम्भो भवति।

'अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्।

कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत्।
अब्दान्तरे तदावश्यं मिथुनार्के हरिः स्वपेत्॥'

इति स्पष्टमुक्तेः। *अत्रैवेति। आषाढशुक्लद्वादश्यामित्यादिवाराहाच्चत्वारः पक्षा अनुपदमुक्ताः। एकादश्यां सूतकादिना प्रतिबन्धे द्वादश्यादयः सर्वत्रापि प्रतिबन्धे त्वनारम्भ एव। 'आरब्धे सूतकं न स्यात्' इति वाक्यात्। *आदौ=आरम्भे। *इदं चेति। निषिद्धस्यास्तादेस्सामान्यतः प्रतिप्रसवे गौरवाद् द्वितीयारम्भपरत्वमिति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्रतमेतन्नरः कृत्वा मुच्यते सर्वपातकैः ॥'
इति भार्गवार्चनदीपिकायां स्कान्दोक्तेः ।
'आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ।'
इति विष्णुवचनाच्च ।

यत्तु—
'*असंक्रान्तं तथा मासं दैवे पित्र्ये च कर्मणि ।
*मलमासमशौचं च वर्जयेन्मतिमान्नरः ॥'
इति हेमाद्रौ चातुर्मास्यव्रतप्रकरणे भविष्यवचनं, तत्र *पूषानुमन्त्रणमन्त्रवदसम्बद्धं मध्ये पठितमिति ज्ञेयम् । *अन्यथा पित्र्यस्य पूर्वोक्तस्य विवाहादेश्च चातुर्मास्यव्रते कः प्रसङ्गः । *प्रकरणनिवेशेऽपि वा प्रथमारम्भविषयं ज्ञेयम् । केचित्तु प्रतिवर्षं चातुर्मास्यव्रतप्रयोगाणां भिन्नत्वादाशौचादिपाते द्वितीयादिप्रयोगो न भवत्येवेत्याहुः । तन्न ।
'*प्रतिवर्षं च यः कुर्यादेवं वै संस्मरन् हरिम् ।
देहान्तेऽतिप्रदीप्तेन विमानेनार्कवर्चसा ॥

तः । वस्तुतस्तु वर्षभेदेऽपि व्रतैक्ये मानाभावात्सर्वेऽपि प्रथमारम्भा एवेति । अत एव बहुषु पुस्तकेष्विदं चेत्यादिपाठो न दृश्यते । *असंक्रान्तम्=अधिकम् । *मलमासं=क्षयमासम् । *पूषेति । दर्शपूर्णमासप्रकरणे 'पूष्णोहं देव प्रजया पशुभिश्च जनिषीय' इति पूषानुमन्त्रणमन्त्रः पठितोऽपि स तत्र न विनियुज्यते तत्र देवताविरहेण प्रकरणस्य दौर्बल्यात् विनियोज्यस्वरूपसामर्थ्यमपेक्ष्य विनियोगाभावात् । अतः स पूषयागे नेतव्य इत्यर्थः ॥ प्रकरणदौर्बल्यमाह—*अन्यथेति । दैवविवाहादि चातुर्मास्यव्रते देवमिति मत्वाह—*प्रकरणेति । *प्रतिवर्षं चेति । वस्तुतस्त्विदं फलविशेषार्थावृत्तिबोधकं प्रयोगैक्यपक्षे मानाभावात् । चातुर्मास्यव्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मोदते विष्णुलोकेऽसौ यावदाभूतसंप्लवम् ॥'
इति हेमाद्रौ भविष्यवचनादित्यास्तां विस्तरः।
इदं च शिवभक्तादिभिरपि कार्यम्।
'शिवे वा भक्तिसंयुक्तो भानौ वा गणनायके।
कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेत् ॥'
इति ब्रह्मवैवर्तात्। व्रतग्रहणप्रकारस्तु हेमाद्रौ भविष्ये-
*'महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः।
जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत् ॥
सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदम्।
विबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत ॥
एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः।
प्रभाषेताग्रतो विष्णोः कृताञ्जलिपुटस्तथा ॥
चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि।
इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ॥
इदं व्रतं मयादेवगृहीतं पुरतस्तव।
निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ॥
गृहीतेऽस्मिन्व्रते देव पञ्चत्वं यदि मे भवेत्।
तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥
गृहीतेऽस्मिन्व्रते देव यद्यपूर्णे मृतो ह्यहम्।
तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥' इति।
तत्र भार्गवार्चनदीपिकायां नृसिंहपरिचर्यायां च भविष्ये—
'श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा।
दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत् ॥' इति।
स्कान्देऽपि चातुर्मास्यकल्पे—

---

*प्रारम्भः शयनोत्सवं कृत्वा कार्य इति सूचयितुं—*महापूजामिति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'चत्वार्येतानि नित्यानि चतुराश्रमवर्णिनाम्।
प्रथमे मासि कर्तव्यं नित्यं *शाकव्रतं नरैः॥
द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमम्।
पयोव्रतं तृतीये तु चतुर्थेऽपि निशामय॥
द्विदलं बहुबीजं च वृन्ताकं च विवर्जयेत्।
नित्यान्येतानि विप्रेन्द्र व्रतान्याहुर्मनीषिणः॥
जम्बीरं राजमाषांश्च मूलकं रक्तमूलकम्।
कूष्माण्डं चेक्षुदण्डं च चातुर्मास्ये त्यजेद् बुधः॥'

तथा—

'विशेषाद्बदरीं धात्रीं कूष्माण्डं तिन्तिणीं त्यजेत्।
जीर्णधात्रीफलं ग्राह्यं कथञ्चित्कायशोधनम्॥' इति।

तीर्थसौख्ये स्कान्दे—

'वार्षिकांश्चतुरो मासान्प्रसुप्ते वै जनार्दने।
मञ्चखट्वादिशयनं वर्जयेद्भक्तिमान्नरः॥
अनृतौ वर्जयेद्भार्यां मांसं मधु परौदनम्।
पटोलं मूलकं चैव वृन्ताकं च न भक्षयेत्॥
अभक्ष्यं वर्जयेद् दूरान्मसुरं सितसर्षपम्।
राजमाषान्कुलित्थांश्च आशुधान्यं च सन्त्यजेत्॥
शाकं दधि पयो माषान् श्रावणादिषु सन्त्यजेत्॥'

अत्र त्यजेदिति वर्जनसङ्कल्परूपः पर्यु(१)दासो ज्ञेयः प्रोपक्रमात्। अत्र केचित्—

'शाकाख्यं पत्रपुष्पादि' इत्यमरकोशस्य 'शक्यतेऽ

---

*शाकव्रतं=शाकवर्जनसंकल्पः। बहुबीजव्रतं च मासचतुष्टये। राजमाषाः=चवल्या इति महाराष्ट्राः। मधु=क्षौद्रम्। पटोलमपि। आशुधान्यम्='आशुव्रीहिः पाटलः स्यात्' इति

(१) पर्युदासो निषेधः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शितुमनेनेति शाकः' इति क्षीरस्वामिना व्याख्यानात्
व्यञ्जनमात्रस्य निषेधमाचक्षते। अन्ये तु शाकशब्दस्य
पत्रादिदशविधशाके योगरूढत्वात् योगाच्च*रूढेर्बली
यस्त्वात् मूपादीनामपि त्यागापत्तेश्च तत्प्रत्याचक्षते। तेन
'*मूलपत्रकरीराग्रफलकाण्डाधिरूढकाः।
त्वक् पुष्पं कवचं चेति शाकं दशविधं स्मृतम्॥
इति क्षीरस्वामिनोक्तस्य शाकस्य निषेध इति। अधि-
रूढकाः=अङ्कुराः। वस्तुतस्तु
*तत्तत्कालोद्भवाः शाका वर्जनीयाः प्रयत्नतः।
बहुबीजमबीजं च विकारि च विवर्जयेत्॥
इति भविष्यवचनात्तत्कालोत्पन्नानां दशविधशा-
कानां निषेधः। तत्र *तत्कालो(१)द्भवजातीयत्वं विवक्षि-
तम्। तेनातपादिशोषितानां वर्षान्तरोद्भवानामपि निषे-

कोशात्तुच्छधान्यम्। *योगाच्चेति। केवलयौगिकत्वमते।
*मूलेति। मूलं कन्दोऽपि बोध्यः। करीरं=वंशांकुरः। अग्रं=पल्ल-
वः। काण्डो=दण्डः। कवचं=छत्राकसदृशम्। अङ्कुर इति क्षेत्रो-
द्भिन्नफलमूलादेः, स्वेदोद्भिन्नोऽङ्कुर इति केचित्। अत्र फलपत्रे-
त्यादेः सर्वस्य न निषेधः किंतु फलमूलादेरेव। तेषां व्यञ्जनत्वेन
भूयो लोकव्यवहारादिति केचित्। तत्रान्यत्रापि तद्व्यवहारभूय-
स्त्वादित्यपरे। *तत्तादिति। 'यत्र काले व्रतं तस्य तदन्यस्य च
इत्येवं वर्षाकाललाभात्। एतेन तत्तत्कालेति संवत्सरलाभे तत्का-
लोत्पन्नानामित्यग्रिमग्रन्थविरोधः। इतरथा वीप्सावैयर्थ्यमिति समा-
हितम्। *तत्कालेति तत्तत्कालेत्यभिधातव्ये द्वितीयतच्छब्दप्रभृत्य-
नुवादः। एतच्च वर्षाकालोद्भवशाकव्रतमित्यभिप्रायेण। शाकसामा-

(१) क्वचित् 'तत्तत्कालोद्भवजातिर्विवक्षिता' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

। *अत्र तत्कालोद्भवा इति वीप्सावशात्स्वस्वकालोद्भवानां सर्वेषां निषेध इति निष्कर्षः । बहुबीजमित्यनेकबीजमिति केचित् । इतरावयवापेक्षया बीजावयवा यत्र बहवस्तदित्यन्ये । अबीजं कदलादि* । वस्तुतस्तु इदं महानिबन्धेष्वभावान्निर्मूलमेव । आचारप्रदीपे—

'वृन्ताकं च कलिङ्गं च बिल्वौदुम्बरभिःसटाः ।
उदरे यस्य जीर्यन्ति तस्य दूरतरो हरिः ॥'

तथाऽपरार्के देवलः—

'ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनम् ।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥'

आमिषाणि चोक्तानि रामार्चनचन्द्रिकायां पाद्मे—

'प्राण्यङ्गचूर्णं चर्माम्बु जम्बीरं बीजपूरकम् ।
अयज्ञशिष्टमाषादि यद्विष्णोरनिवेदितम् ॥
दग्धमन्नं मसूरं च मांसं चेत्यष्टधाऽऽमिषम् ।
रुच्यं तत्तद्देशलभ्यं सुप्ते देवे विवर्जयेत् ॥'

पाद्मे कार्तिकमाहात्म्ये—

'गोच्छागीमहिषीदुग्धादन्यद् दुग्धादि चामिषम् ।
धान्यं मसूरिकाः प्रोक्ता अन्नं पर्युषितं तथा ॥
द्विजक्रीता रसाः सर्वे लवणं भूमिजं तथा ।

न्यव्रतमित्याशयेनाह—*अत्रेति । *कदलमिति । अनुदरा कन्येनिवत् अत्यल्पबीजमित्यर्थादाम्रफलमिति । भिःसटा=दग्धान्नम् । भीःसटेति पाठे 'भीःसटं श्लेष्मान्तकम्'इति धन्वन्तरिनिघण्टुः ॥ प्राण्यङ्गं=मौक्तिकशुक्त्यादि । रुच्यं=रुचिकादि । धान्यं=कुस्तुम्बुरुः । अन्नं पर्युषितम्—

'अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*'ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितम्।
*आत्मार्थं पाचितं चान्नमामिषं तत् स्मृतं बुधैः॥'

तथा—

*'निष्पावान् राजमाषांश्च मसूरं संधितानि च।
वृन्ताकं च कलिङ्गं च सुप्ते देवे विवर्जयेत्॥'

संधितानि=लवणशाकादीनि।

तत्रैव विष्णुधर्मे—

'चतुर्ष्वपीह मासेषु हविष्याशी न पापभाक्।'

हविष्याणि तु पृथ्वीचन्द्रोदये भविष्ये-

*'हैमन्तिकं सितास्विन्नं धान्यं मुद्गा यवास्तिलाः।
कलायकङ्गुनीवारा वास्तुकं हिलमोचिका॥
षष्टिका कालशाकं च मूलकं केमुकेतरत्।
कन्दः सैन्धवसामुद्रे गव्ये च दधिसर्पिषी॥

इत्याद्युक्तम्। आरनालादि च द्विजात्क्रीताः। *ताम्रेति।

'यज्ञपात्रे तथा दोहे पाके च परिवेषणे।
स्नानतर्पणदानेषु ताम्रे गव्यं न दुष्यति॥'

इत्युक्तम्। *आत्मार्थमिति। 'परपाकरतश्च यः, तावुभौ पापकर्माणौ'इति निषेधेऽपि दोषाधिक्यार्थं विप्रभोजनवैश्वदेवाद्यर्थं पाकहीनः परपाकनिवृत्तः। *निष्पावा पावटे इति महाराष्ट्राः।

'यच्चोत्कोचादिना प्राप्तं पतिताद्यदुपार्जितम्।
कन्याविक्रयतो लब्धं सुप्ते देवे विवर्जयेत्॥'

इत्यादीनि त्वतिदोषार्थानि। *हैमन्तिकं=हेमन्तोद्भवम्। सितं श्वेतमस्विन्नम्=अनूष्मकं किंचिदग्निपाकेन जातस्वेदं स्विन्नं तद्भिन्नं तेन पृथुकादिनिषेधः। धान्यं=तण्डुलाः। कलायः=सतीनकः, मटरीइति प्रसिद्धम्। वास्तुकं बथुवा इति प्रसिद्धः शाकः। हिलमोचिका=गौडदेशे। कालशाकम्=तद्देशे। मूलकं स्वार्थे कः मूलानि न तु मूलशाकम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*पयोऽनुद्धृतसारं च *पनसाम्रहरीतकी।
पिप्पली जीरकं चैव नागरङ्गं च तित्तिणी॥
कदलीलवलीधात्रीफलान्यगुडमैक्षवम्।
*अतैलपक्वं मुनयो हविष्याणि प्रचक्षते॥' इति।

सितास्विन्नम्=अनूष्मपक्वम्। धान्यं=तण्डुलादि*। केमुकं केमुताइति प्राच्येषु प्रसिद्धः कन्दः 'कलायस्तु-वतीनकः' इत्यमरः 'बटुरी' इति प्रसिद्धं धान्यम्। मदनरत्नेऽप्येवम्। अगस्त्यसंहितायां हैमन्ताद्युक्त्वा—

'नारिकेलफलं चैव कदली लवली तथा।
आम्रमामलकं चैव पनसं च हरीतकी॥
व्रतान्तरप्रशस्तं च हविष्यं मन्वते बुधाः॥'

अन्यान्यपि व्रतान्युक्तानि हेमाद्रौ भविष्ये-

'स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः।
गृह्णीयान्नियमानेतान्दन्तधावनपूर्वकान्॥
तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक् पृथक्।
मधुरस्वरो भवेद्राजन् पुरुषो गुडवर्जनात्॥
तैलस्य वर्जनाद्राजन् सुन्दराङ्गः प्रजायते।
कटुतैलपरित्यागाच्छत्रुनाशः प्रजायते॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात्।

तस्य वृत्ते मदिरोपमत्वात्। केमुकेतरत्=केमुकं केमुता इति प्राच्येषु प्रसिद्धं मूलं तद्भिन्नम् इतोऽपि च न मूलशाकः अव्यावर्त्तकत्वेन एतदन्वयात्। कन्दः यद्यपि 'अर्शोघ्नः सूरणः कन्दः' इत्युक्तस्तथापि तस्य निषिद्धत्वात्तदन्यो ग्राह्यः॥ *अनुद्धृतसारमिति। दधन्यपि बोध्यम्। *पनसेत्यादि। 'फले लुक्। नारङ्गं=नारिङ्गम्। नागरमिति पाठे शुण्ठी। *अतैलपक्वमिति कथितहविष्याणामेव विशेषणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते ॥
घृतत्यागाच्च लावण्यं सर्वस्निग्धतनुर्भवेत् ।
शाकपत्राशनाद्भोगी अपक्वादीऽमलो भवेत् ॥
भूमौ प्रस्तरशायी च विप्रो मुनिवरो भवेत् ।
एकान्तरोपवासेन ब्रह्मलोके महीयते ॥
धारणान्नखरोम्णां च गङ्गास्नानफलं लभेत् ।
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ॥
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्याः पतिर्भवेत् ।
प्रदक्षिणाशतं यस्तु करोति स्तुतिपाठकः ॥
हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत् ।
अयाचितेन प्राप्नोति पुत्रान्धर्म्यान्विशेषतः ॥
षष्ठान्नकालभोक्ता यः कल्पस्थायी भवेदिति ।
पर्णेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ॥
गुडवर्जी नरो दद्यात्तद्धृतं ताम्रभाजनम् ।
सहिरण्यं नरश्रेष्ठ लवणस्याप्ययं विधिः ॥
सुप्ते देवे तु यो विष्णोः शिवस्याङ्गणमर्चयेत् ।
पञ्चवर्णैस्तु यो नित्यं स्वस्तिकैः पद्मकैस्तथा ॥
स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात् ॥'

अथैषां समाप्तौ कार्तिक्यां दानानि । 'एकभक्तव्रते* दम्पती संपूज्य धेनुर्देया, नक्ते वस्त्रयुगं, एकान्तरोपवासे गौः, भूशयने शय्या, षष्ठकालभोजने गौः, व्रीहिगोधूमादित्यागे हैमव्रीह्यादि, कृच्छ्रे गोयुग्मं, शाकाशने गौः

---

*एकभक्तव्रते इति । विहितदानानन्तरं
"चतुरो वार्षिकान् मासान्नियमो येन यः कृतः ।
कथयित्वा द्विजेभ्यस्तं दद्याद्भक्त्या सदक्षिणाम् ॥
दत्त्वा विसर्जयेद्विप्रांस्ततो भुञ्जीत वाग्यतः ।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भोजनव्रते च, दधिमधुघृतव्रतेषु वासो गौश्च, ब्रह्मचर्ये स्व-
मूर्तिः, ताम्बूलव्रते वासोयुगं, मौने घृतकुम्भो वस्त्रयुगं
घटा च, देवाग्रे रङ्गमालिकाकरणे धेनुर्हेमपद्मं च, दीपि-
कव्रते दीपिका वासोयुगं च, भूमिभोजने पर्णभोजने च
पात्रं गौश्च, चतुष्पथदीपे गोग्रासे च गोवृषौ, प्र-
क्षणाशने वस्त्रम्, *अनुक्तेषु स्वर्णं गौश्च' इत्यादि
माद्रौ ज्ञेयम् । तथाच भार्गवार्चनदीपिकायां पाद्मे-
'शयनीबोधिनीमध्ये शमीदूर्वापमार्गकैः ।
भृङ्गराजेन देवांस्तु नार्चयीत कदाचन ।'
हेमाद्रौ पाद्मे—
'आषाढादिचतुर्मासानभ्यङ्गं वर्जयेन्नरः ।
समाप्तौ च पुनर्दद्यात्तिलतैलयुतं घटम् ॥
आषाढादिचतुर्मासं वर्जयेन्नखकृन्तनम् ।
वृन्ताकं गृञ्जनं चैव मधु सर्पिर्घटान्वितम् ॥
कार्तिक्यां तत्पुनर्हेमं ब्राह्मणाय निवेदयेत् ।
अन्यान्यपि (१)केशकर्तनादिवर्जनसंकल्पानुरूपाणि
चन्द्रोदये ज्ञेयानि । टोडरानन्दे स्कान्दे—
'एकान्तरं द्व्यन्तरं वा कुर्यान्मासोपवासकम् ।
अनोदनं फलाहारं नक्तव्रतमथापि वा ॥'
अत्रैव तसमुद्राधारणमुक्तं रामार्चनचन्द्रिकायां भ-
विष्ये—

अन्युक्तेर्व्रतसमापनं कार्यम् । *वस्त्रमिति । सन्ध्याकाले दीपदाने
स्वर्णयुतां दीपिकां दद्यात् । *अनुक्तेष्विति । चातुर्मास्यव्रतं
वा 'व्रतान्ते गोवृषप्रदः' इति वाक्याद्धेनुं वा दद्यात् । व्यासः—

---

(१) आदर्शपुस्तके 'केशकर्तनादि' इति नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'शयन्यां चैव बोधिन्यां चक्रतीर्थे तथैव च।
शङ्खचक्रविधानेन वह्निपूतो भवेन्नरः॥' इति।

(१)'अतप्ततनूर्न तदामो अश्नुते'इति ऋग्वेदात्, 'स होवाच याज्ञवल्क्यस्तस्मात्पुमानात्महिताय हरिं भजेत्। सुश्लोकमौलेर्वर्माण्यङ्गेष्वग्निना संदधते' इति शतपथश्रुतेः, 'प्रतद्विष्णो अञ्जचक्रे सुतप्ते जन्माम्भोधिं*तर्तवे ऋचर्षणीन्द्राः। मूले बाह्वोर्दधन्ते ये पुराणा लिङ्गान्यङ्गे तावकायार्पयन्ति' इति सामवेदात्।

'योऽधीते भारतं पुण्यं ब्राह्मणो नियतव्रतः।
चतुरो वार्षिकान् मासान् सर्वपापात्प्रमुच्यते॥
तस्मान्नियमसंयुक्तैः श्रोतव्यं ब्राह्मणैरिदम्।
कृष्णप्रोक्तामिमां पुण्यां भारतीमुत्तमां कथाम्॥
श्रावयिष्यन्ति ये विप्रा ये च श्रोष्यन्ति मानवाः।
सर्वथा वर्तमाना वै न ते शोच्याः कृताकृते॥' इति।

नियमाः ब्रह्मचर्यहविष्याशनभूशय्यादयः। एवं सङ्कल्पपूर्वकं श्रुत्वा समाप्तौ सति सामर्थ्ये पर्वसमाप्तौ वाचकं पायसेन भोजयेत्तस्मै रत्नकाञ्चनगोभूगृहवस्त्रादि दद्यात् ततो द्विजान् भोजयित्वा तेभ्यो दक्षिणां दद्यादेवं सर्वपुराणश्रवणविधिरिति। *तर्तवे=तरितुम्। *चर्षणीन्द्राः=ज्ञानपूर्णाः।

---

(१) इयं श्रुतिर्वैष्णवैः स्वमतपरतया व्याख्याता। अस्या वास्तवार्थस्तु—'तत् पवित्रं अतप्ततनूः पयोव्रतादिना असन्तप्तगात्रः आत्मा अपरिपक्वो नाश्नुते न व्याप्नोति'इति श्रीमत्सायणाचार्यैः ऋक्संहिताभाष्ये उक्तः। एवमन्यान्यपि श्रुतिवाक्यानि वस्तुतो भिन्नार्थानि बलात्कृष्य व्याख्यातानि सन्ति। सार्वजनीनं तु ग्रन्थकृदप्यग्रे वक्ष्यति-'यस्तु संतप्तशङ्खादि' इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ।
ब्राह्मणस्य तथैवेदं तप्तमुद्रादिधारणम् ॥'
इति पद्मपुराणाच्चेति ।
'ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि वेतरः ।
शङ्खचक्राङ्कितततनुस्तुलसीमञ्जरीधरः ॥
गोपीचन्दनलिप्ताङ्गो दृष्टश्चेत्तदघं कुतः ॥'
इति काशीखण्डात् । तत्प्रकारस्तु रामार्चनचन्द्रिकातो ज्ञेयः ।
पृथ्वीचन्द्रोदयादयस्तु —
'यस्तु संतप्तशङ्खादिलिङ्गचिह्नतनुर्नरः ।
स सर्वयातनाभोगी चण्डालो जन्मकोटिषु ॥
द्विजं तु तप्तशङ्खादिलिङ्गाङ्कितततनुर्नरः ।
संभाष्य रौरवं याति यावदिन्द्राश्चतुर्दश ॥'
इति बृहन्नारदीयोक्तेः ।
शङ्खचक्राद्यङ्कनं च गीतनृत्यादिकं तथा ।
एकजातेरयं धर्मो न जातु स्याद्द्विजन्मनः ॥
शङ्खचक्रे मृदा यस्तु कुर्यात्तप्तायसेन वा ।
स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्मणः ॥
यथा श्मशानजं काष्ठमनर्हं सर्वकर्मसु ।
तथा चक्राङ्कितो विप्रः सर्वकर्मसु गर्हितः ॥'
तथा—
'शिवकेशवयोरङ्काञ्छूलचक्रादिकान्द्विजः ।
न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः ॥'
इति विष्णवाश्वलायनादिवचनात् ऋग्वेदादिश्रुतीनामन्यार्थत्वादन्यश्रुतीनां चासत्त्वाच्चक्रादिधारणं शूद्र-

---

*अन्यार्थत्वात्=तप्तादिपदस्य कृच्छ्रचान्द्रायणादिपरत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयमित्यूचुः । 'नृत्यं चोदरार्थं निषिद्धम्' इति श्रीधरस्वामी ।

यद्यपि निषेधस्य प्राप्तिमपेक्षत्वाद्विधिं विना च तदयोगादुपजीव्यविरोधेन 'न तौ पशौ करोति' इतिवद्विकल्पो युक्तस्तथापि 'एकजातेरयं धर्मः' इत्यनेन(१) सामान्यवाक्यानामुपसंहाराद्द्विजातिनिषेधो नित्यानुवादः इति तदाशयः । अत्र शिष्टाचार एव संकटपाशनिःसरणसरणिरिति संक्षेपः । आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भविष्ये—

'आषाढपौर्णमास्यां तु सन्ध्याकाले ह्युपस्थिते ।
संकल्पयेन्मासमेकं श्रावणे प्रत्यहं ह्यहम् ॥
स्नानं करिष्ये नियता ब्रह्मचर्ये स्थिता सती ।
भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयाम् ॥'

इति ।

अस्य नक्तव्रतत्वात् *सायाह्नव्यापिनी (२)ग्राह्या । अत्रैव शिवशयनोत्सव उक्तो हेमाद्रौ वामनपुराणे—

'पौर्णमास्यामुमानाथः स्वपते चर्मसंस्तरे ।
वैयाघ्रे च जटाभारं समुद्वह्याहिवर्ष्मणा ॥'

---

*आषाढेति । अधिकाषाढपौर्णमास्यामारम्भः ।

'आषाढौ द्वौ यदा स्यातां कोकिलाव्रतमाचरेत् ।'

इत्युक्तेः । अधिकाषाढपौर्णमासीविरहे तु तत्प्रतिनिधिभूतश्रावणमभिव्याप्य शुद्धे कार्यम् । *सायाह्नव्यापिनीति=म

---

(१) मुद्रितपुस्तके 'विधवाक्यानाम्' इति पाठः ।

(२) आषाढौ द्वौ यदा स्यातां कोकिलायास्तदार्चनम् । तथा य कुरुते नारी न सा वैधव्यमाप्नुयात् ॥ शृणु देवि प्रवक्ष्यामि मन्त्रैः पौरा णिकैर्युतम् । मलमासे त्वतिक्रान्ते शुद्धाषाढे समागते ॥' इतिव्रतरा जवराहोक्तिस्तु मलमासे प्राप्ते सति शुद्धमास एव व्रतनिर्णयपरा न तु आषाढेऽधिमासे सत्येव तद्व्रतकरणानियमपरेति बोध्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदनरत्नेऽप्येवम् । इयं च *प्रदोषव्यापिनी । अत्रैव व्यासपूजोक्ता । तत्र त्रिमुहूर्ता चेत् परैवेति(१) संन्यासपद्धतौ ।

'त्रिमुहूर्ताधिकं ग्राह्यं पर्व क्षौरप्रणामयोः ।'

इति वचनात् ॥

इति श्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिन्धौ आषाढः समाप्तः ॥

कर्कसंक्रान्तौ पूर्वे त्रिंशद्दण्डाः पुण्यकालः । सूर्यो-

व्यापकाल व्यापिनीति मयूखे । *प्रदोषेति । स्वापस्य प्रदोषकालीनत्वात् । आषाढपूर्णिमायां किञ्चिद्देयम् ।

'आषाढी कार्त्तिकीमाघीतिथयः पुण्यसम्भवाः ।
अप्रदानवतो यान्तु यस्यार्थोऽनुमतो गतः ॥'

इति भरतशपथेषूक्तेः ।

'आषाढीकार्त्तिकीमाघीतिथयोऽतीव पावनाः ।
स्नानदानविहीनास्ता न नेयाः पाण्डुनन्दन ॥' इति,

'आकाभावे त्वनन्तकम्' इति च वाक्यात् ।

इत्याषाढः ॥

---

(१) संन्यासिनां चातुर्मास्याऽऽवाससंकल्पाङ्गत्वेन क्षौरव्यासपूजादिकं विहितम् । तत्रादौ क्षौरं विधाय द्वादश मृत्तिकास्नानानि प्राणायामादिविधिं च कृत्वा व्यासपूजां कुर्यात् । पूजान्ते 'असति प्रतिबन्धे चतुरो मासानिह वसामि' इति मनसा संकल्प्य—'अहं तावन्निवत्स्यामि भूतहिताय वै । प्रायेण प्रावृषि प्राणिसंकुलं वर्त्म दृश्यते ॥ तस्तेषामहिंसार्थं पक्षान्वै श्रुतिसंश्रयान् । स्थास्यामश्चतुरो मासानसति बाधके ॥' इति वाचिकसंकल्पं कुर्यात् । ततो गृहस्थाः निब्रुयुः—'निवसन्तु सुखेनात्र गमिष्यामः कृतार्थताम् । यथाशक्ति शुश्रूषां करिष्यामो वयं मुदा ॥' इति । अन्योऽपि सविस्तरविधिमसिन्धुतोऽवगन्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दयोत्तरं संक्रमे तु परत एव पुण्यम् । रात्रौ तु निशीथात्प्राक् परतश्च संक्रमेऽपरार्कहेमाद्र्यनन्तभट्टादिमते पूर्वोत्तरदिनयोः पञ्च नाड्यः पुण्यकालः ।

'धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा ।
पूर्वापरविभागेन रात्रौ संक्रमते रविः ॥
दिनान्ते पञ्च नाड्यस्तु तदा पुण्यतमाः स्मृताः ।
उदयेऽपि तथा पञ्च दैवे पित्र्ये च कर्मणि ॥'

इति स्कान्दोक्तेः । 'पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रान्तिपरम् । वक्ष्यमाणवचोविरोधात्' इत्युक्तं मदनरत्ने । तेनायमर्थः-रात्रौ पूर्वभागे मकरे उदये पञ्च नाड्यः पुण्यकालः । रात्रावपरभागे कर्कटे दिनान्ते पञ्च नाड्यः पुण्यकालः । विषुवतोस्तु पूर्वदिने पञ्चापरदिने च पञ्चेति वाक्यान्तरानुरोधात् । तेन हेमाद्रिमाधवयोः सर्ववचनानां चाविरोधः । माधवमते तु—

'अर्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने ।
पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः ॥'

इति वृद्धगार्ग्योक्तेः ।

'मिथुनात्कर्कसंक्रान्तिर्यदि स्यादंशुमालिनः ।
प्रभाते वा निशीथे वा तदा पुण्यं तु पूर्वतः ॥'

इति भविष्योक्तेश्च पूर्वदिन एव पुण्यम् । दाक्षिणात्यास्त्वेतदेवाद्रियन्ते । अत्र रात्रावपि स्नानादि भवतीत्युक्तं प्राक् । अत्र दानोपवासादि पूर्वमुक्तम् । तथा कर्के *केशादिकर्तनं* निषिद्धम् ।

'कुम्भे कर्कटके वापि कन्यायां कार्मुके रवौ ।

---

*केशादीति । 'नखानामनुक्तत्वात्तत्खण्डने न दोषः' इत्याहुः । *कर्तनमिति । वपनस्यापि न ग्रहः 'रोमखण्डम्' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रोमखण्डं *गृहस्थस्य पितॄन्प्राशयते यमः ॥'
इति सुमन्तुवचनादित्युक्तं जीवत्पितृकानिर्णये गुरुभिः ॥
अथ नदीनां रजोदोषः । हेमाद्रावत्रिः—
*'सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
न स्नानादीनि* कर्माणि तासु कुर्वीत मानवः ॥'
इदं च क्षुद्रनदीषु ।
'सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ॥'
इति व्याघ्रोक्तेः । मात्स्ये त्वगस्त्योदयावधित्वमुक्तम् ।
'यावन्नोदेति भगवानदक्षिणाशाविभूषणः ।
तावद्रजो महानद्यः करतोयाः प्रकीर्तिताः ॥'
करतोयाः=अल्पतोयाः । तथा कात्यायनः—
'याः शोषमुपगच्छन्ति ग्रीष्मे कुसरितो भुवि ।
तासु प्रावृषि न स्नायादपूर्णे दशवासरे ॥'
इदं चापदि । स्मृतिसङ्ग्रहे—
'धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते ।
नता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः ॥'
महानदीषु तु भविष्ये उक्तम्—

सामान्येनोक्तेः । *गृहस्थस्येति वर्ण्यादिव्युदासः । जीवत्पितृकस्यापि व्युदास इति केचित् । उपरते लक्षणापत्त्या तस्य न व्युदास इत्यन्ये ।
'धनुःकुम्भौ द्विधा कृत्वा पूर्वभागं परित्यजेत् ।
कर्कटस्यान्तिमं भागं कन्यां तु सकलां त्यजेत् ॥'
इत्यपि केचित् । नद्यो द्विविधाः—अल्पाः, महत्यश्च । तदन्या गर्तास्तत्राद्यायामाह- *सिंहेति । *स्नानादीनीति । आदिना तर्पणादिग्रहः । तदुक्तम्—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'आदौ तु कर्कटे देवि महानद्यो रजस्वलाः ।
त्रिदिनं च चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवीं*पथा ॥

महानद्यश्च ब्राह्मे—

'गोदावरी भीमरथी तुङ्गभद्रा च वेणिका ।
तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥
भागीरथी नर्मदा च यमुना च सरस्वती ।
विशोका च विहस्ता च विन्ध्यस्योत्तरसंस्थिताः ।
द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः ॥'

मदनरत्ने पुराणान्तरे—

'महानद्यो देविका च कावेरी वञ्जरा तथा ।
रजसा तु प्रदुष्टाः स्युः कर्कटादौ त्र्यहं नृप ॥'

कात्यायनः—

'कर्कटादौ रजोदुष्टा गोमती वासरत्रयम् ।
चन्द्रभागा सता सिन्धुः सरयूर्नर्मदा तथा ॥'

इदं गङ्गाद्यतिरिक्तविषयम् ।

'रजोदुष्टेऽम्भसि स्नानं वर्ज्यं नद्यादिषु द्विजैः ।
कदर्थितं रजस्तेषां सन्ध्योपास्तिश्च तर्पणम् ॥ इति ।

कदर्थितं=निन्दितम् । एतच्चादृष्टार्थकर्मसामान्यपरम् । "ग्राम-भोगो न दुष्यति" इति वचनात् । *जाह्नवीति । यथा जाह्नवी सर्वकाले शुद्धा, तथा तदन्या । त्रिदिनानन्तरमित्यर्थः । अत्र प्रायश्चित्तमुक्तम्—

'काले नभस्यशुद्धं स्यात् त्रिरात्रं तु नवोदकम् ।
अकाले तु दशाहं स्यात्पीत्वा नाद्यादहर्निशम् ॥' इति

स्नानपानोभयकरणे तु त्रिरात्रं कृच्छ्रो वा बोध्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'गङ्गा च यमुना चैव *प्लक्षजाता सरस्वती ।
रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञिताः ॥
शोणसिन्धुहिरण्याख्याः कांकलोहितघर्घराः ।
शतद्रुश्च नदाः सप्त पावनाः* परिकीर्तिताः ॥'

इति देवलोक्तेः । यत्तु—

'प्रथमं कर्कटे देवि त्र्यहं गङ्गा रजस्वला ।'

इत्यादि वचनं तज्जाह्नवीभिन्नगोदावर्यादिगङ्गान्तरपरमिति मदनरत्ने । अन्ये त्वन्तर्गतरजोविषयम् ।

'गङ्गा धर्मद्रवः पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोदोषाः सर्वावस्थासु चामलाः ॥'

इति निगमोक्तेः । तीरवासिनां तु रजोदोषो नास्ति । न तु तत्तीरवासिनाम्'इति निगमोक्तेः । रजोदुष्टमपि जलं गङ्गाजलयोगे पावनम् ।

'गङ्गाम्भसा समायोगाद् दुष्टमप्यम्बु पावनम् ।'

इति मात्स्योक्तेः । नूतनकूपादौ तु योगियाज्ञवल्क्यः-

'अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।
भूमेर्नवोदकं*चैव दशरात्रेण शुध्यति ॥' इति ।

क्वचित्त्वदोषमाह व्याघ्रपादः—

'अभावे कूपवापीनामनपायिपयोभृताम् ।
रजोदुष्टेऽपि पयसि ग्रामभोगो न दुष्यति ॥'

गौडास्तु—'अन्येनापि समुद्धृते'इति द्वितीयपादे पाठः ।

---

*प्लक्षजाता=कुरुक्षेत्रस्था । *पावना इति । रजोदोषहीनत्वं पवित्रत्वमित्याशयः । 'नदाः कृष्णा च वेणिका' इति विवेचने चतुर्थपादः ।

*नवोदकं=नवखानितकूपाद्युदकम् । एतच्च प्रसङ्गादुपात्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेनोद्धृते न दोषः। तथा च 'तासु स्नानं नेति प्रागुक्तम्' इत्याहुः। वसिष्ठोऽपि—

'उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च।
चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥' इत्यलं विस्तरेण ॥

श्रावणशुक्लतृतीया मधुस्रवाख्या गुर्जरेषु प्रसिद्धा *सा परयुता ग्राह्येति दिवोदासः। श्रावणशुक्लचतुर्थी पूर्वयुता*। 'मातृविद्धो गणेश्वरः' इत्यादिवचनात्। श्रावणशुक्लपञ्चमी नागपूजादौ परैवेति सामान्यनिर्णये उक्तम्। चमत्कारचिन्तामणौ—

'पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता।
तस्यां तु तुषिता नागा इतरा सचतुर्थिका ॥' इति।
'श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी।
तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः ॥'

इति मदनरत्नेऽभिधानाच्च। तेन परैवेति। अत्र विशेषो हेमाद्रौ भविष्ये—

'श्रावणे मासि पञ्चम्यां शुक्लपक्षे नराधिप।
द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः ॥
पूजयेद्विधिवद्वीर दधिदूर्वाङ्कुरैः कुशैः।
गन्धपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः ॥
ये यस्यां पूजयन्तीह नागान् भक्तिपुरःसराः।
न तेषां सर्पतो वीर भयं भवति कुत्रचित् ॥' इति।

---

*सेति 'अस्या मधुस्रावणिका' इत्यग्रिमवचनात्। 'रम्भाख्यां वर्जयित्वा' इत्युक्तेश्च। *पूर्वयुतेति। मध्याह्नव्यापिनीति नव्याः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रावणशुक्लद्वादश्यां(१) दधिव्रतं प्रागुक्तम् । तक्रा-
नां त्वनिषेधः । तत्र दधिव्यवहाराभावादिति व-
क्ष्यते(२) ।
अत्रैव विष्णोः पवित्रारोपणमुक्तं हेमाद्रौ विष्णुरहस्ये—
'श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ।
द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतम् ॥
द्वादश्यां श्रावणे मासि पञ्चम्यामथ वा द्विज ।
आनुकूल्येषु कर्तव्यं पञ्चदश्यामथापि वा ॥' इति ।
शिवे तु तत्रैव कालोत्तरे—
'आषाढान्ते चतुर्दश्यां नभस्यनभसोस्तथा ।
अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः समम् ॥' इति ।
अन्यदेवतानां तु वक्ष्यते । अधिवासनं दीपिकायाम्—
'गोदोहान्तारते काले पूर्वेद्युर्वाऽधिवासनम् ।' इति ।
गौणकालो रामार्चनचन्द्रिकायाम्—
'पवित्रारोपणं विघ्नाच्छ्रावणे न भवेद्यदि ।
कार्तिक्यवधि*शुक्लास्ते कर्तव्यमिति नारदः ॥
हैमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः ।

---

*शुक्लास्ते=शुक्लास्तेऽपि । 'शुक्लार्के'इति पाठे शुक्लद्वादश्या-

---

(१) चातुर्मास्ये भक्ष्याभक्ष्यविचारे 'द्वितीये मासि कर्तव्यं' द-
धिव्रतम्—'इत्यादिनेत्यर्थः । अस्यामेव द्वादश्यां मासं कृतस्य शाकव-
तव्रतस्य साङ्गतार्थं 'ब्राह्मणाय शाकदानं करिष्ये' इति संकल्प्य ब्रा-
ह्मणं संपूज्य—'उपायनामिदं देव व्रतसंपूर्तिहेतवे । शाकं तु द्विजवर्या-
य सहिरण्यं ददाम्यहम् ॥' इत्यादिमन्त्रेण पक्वमामं वा शाकं दद्यात् ।
तथा—'दधि भाद्रपदे मासि वर्जयिष्ये सदा हरे ।' इत्येतच्च संकल्प-
यम् । इति धर्मसिन्धुः ।

(२) भाद्रपदमासनिर्णये शुक्लद्वादश्यां दुग्धव्रतविचारे 'एवं दधिव्रते
तक्रादीनां निषेधः' इत्यादिनेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः* ॥
कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत* ।
तत्रोत्तमं पवित्रं तु षष्ट्या सह शतैस्त्रिभिः ॥
सप्तत्या सहितं द्वाभ्यां शताभ्यां मध्यमं स्मृतम् ।
साशीतिना शतेनैव कनिष्ठं तत्समाचरेत् ॥
साधारणपवित्राणि त्रिभिः सूत्रैः समाचरेत् ।
उत्तमं तु*शतग्रन्थि पञ्चाशद्ग्रन्थि मध्यमम् ॥
कनिष्ठं तु पवित्रं स्यात्षट्त्रिंशद्ग्रन्थिशोभनम् ।
षट्त्रिंशच्च चतुर्विंशद्द्वादशेति च केचन ॥
चतुर्विंशद्द्वादशाष्टावित्येके मुनयो विदुः ॥

हेमाद्रौ विष्णुरहस्ये त्वन्यथोक्तम्—

'अष्टोत्तरशतं कुर्याच्चतुःपञ्चाशदेव वा ।
सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसम् ॥
अधमं नाभिमात्रं स्याद्दूरुमात्रं द्वितीयकम् ।
प्रलम्बतो जानुमात्रं प्रतिमायां निगद्यते ॥'

शिवपवित्रं तु तत्रैव शैवागमे—

'एकाशीत्यथवा सूत्रैस्त्रिशता वाष्टयुक्तया ।
पञ्चाशता वा कर्तव्यं तुल्यग्रन्थ्यन्तरालकम् ॥

मित्यर्थः । *शुभैरिति ।

कन्यया वा पवित्रं स्यान्न पुंश्चल्यादिभिः कृतम् ।

इति पाठः । *शोधयेदिति । पृथक्पृथक् पञ्चगव्यादकादिना ।

'पृथक्पृथक्पञ्चगव्यैरद्भिः प्रक्षालयेत्ततः ।
मूलेनाष्टोत्तरशतं गायत्र्या रामसञ्ज्ञया ॥
शङ्खोदकेनाभिमन्त्र्य पवित्राणि विनिर्ममेत् ।'

इत्युक्तेः । *शतग्रन्थीति । ग्रन्थिप्रमाणं तत्रैव-

'अङ्गुष्ठपर्वमात्रं तु कुर्याद्ग्रन्थिमथोत्तमे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादशाङ्गुलमानानि व्यासादष्टाङ्गुलानि वा।
लिङ्गविस्तारमानानि चतुरङ्गुलकानि च ॥' इति।

माद्रौ कालोत्तरे युगधर्मे—
'कृते मणिमयं कार्यं त्रेतायां हेमसम्भवम्।
पट्टजं द्वापरे प्रोक्तं कार्पासं तु कलौ स्मृतम् ॥'

अधिकारिणोऽपि तत्रैव विष्णुरहस्ये—
'ब्राह्मणः क्षत्रियो वैश्यस्तथा स्त्री शूद्र एव च।
स्वधर्मावस्थिताः सर्वे भक्त्या कुर्युः पवित्रकम् ॥'

तथा—
'अतोदेवेति मन्त्रेण द्विजो विष्णौ निवेदयेत्।
शूद्रस्य मूलमन्त्रो वा येन वा पूजयेद्धरिम् ॥'

एतच्च नित्यम्।
'न करोति विधानेन पवित्रारोपणं तु यः।
तस्य सांवत्सरी पूजा निष्फला मुनिसत्तम ॥
तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः।
वर्षे वर्षे प्रकर्तव्यं पवित्रारोपणं हरेः ॥'

इति तत्रैवोक्तेः। देवताविशेषे तिथयोऽपि तत्रैव—
'धनदश्च रमा गौरी गणेशः सोमराड् गुहः।
भास्करश्चण्डिकाऽम्बा च वासुकिश्च तथर्षयः ॥
चक्रपाणिर्हनङ्गश्च शिवो ब्रह्मा तथैव च।
प्रतिपत्प्रभृतिष्वेताः पूज्यास्तिथिषु देवताः ॥
यथोक्ताः शुक्लपक्षे तु तिथयः श्रावणस्य च ॥' इति।

तथा हेमाद्रौ कालोत्तरे—
चतुर्दश्यामथाष्टम्यां सर्वसाधारणं तु तत्। इति।

तत्प्रकारस्तु रामार्चनचन्द्रिकायां यथा—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'*ततस्तानि पवित्राणि वैणवे पटले शुभे।
संस्थाप्य शुचिवस्त्रेण पिधाय पुरतो न्यसेत् ॥
अरत्निसंमितां वेणीं कुर्यात्षट्त्रिंशता कुशैः।
क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो ॥
मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकम्।
न मे विघ्नो भवेद्देव कुरु नाथ दयां मयि।
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥
उपवासेन देव त्वां तोषयामि जगत्पते।
कामक्रोधादयोऽप्येते न मे स्युर्व्रतघातकाः ॥
अद्यप्रभृति देवेश यावद्वैशेषिकं दिनम्।
तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोऽस्तु ते ॥'
इति देवं संप्रार्थ्य कुम्भं संस्थाप्य तत्र वंशपात्रे-
'ॐ सांवत्सरस्य यागस्य पवित्रीकरणाय भो।
विष्णुलोकात्पवित्राद्य आगच्छेह नमोऽस्तु ते ॥'
अनेन मूलेन चावाह्योत्तममध्यमकनिष्ठेषु विष्णु-ब्रह्मरुद्रान्, सत्त्वरजस्तमांसि, *देवत्रयं, वनमालायां

तदर्धेन तदर्धेन मध्यमे च कनिष्ठिके ॥' इति।

*तत इति। पवित्रेषु कुङ्कुमगोरोचनादिनाऽञ्जनमुत्तम-मध्यमा-ऽधमानां तेषां क्रमेण द्वादशाक्षरमन्त्रेण त्रिर्द्विःसकृदभिमन्त्रणं चोक्तं, तत इत्यर्थः। *देवत्रयं=ब्रह्म-विष्णु-रुद्रान्। वनमालालक्षणं तत्रैव-

'आरभ्य मुकुटं यावत्सूत्रैर्विरचिता शुभा।
आपादलम्बिनी माला वनमाला प्रकीर्तिता ॥' इति(१)।

---

(१) अन्यच्च—तुलसीकुन्दमन्दारपारिजाताम्बुजैस्तु या। पञ्चभिर्ग्रथिता माला वनमाला प्रकीर्तिता ॥' इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कृतिं चावाह्य त्रिसूत्र्यां ब्रह्मविष्णुरुद्रान् ग्रन्थिषु-क्रि-
, पौरुषी, वीरा, विजया, ईशा, अपराजिता, मनो-
नी, जया, भद्रा, मुक्तिश्चेत्यावाह्य सम्पूज्य ।
'ॐ संवत्सरकृतार्चायाः संपूर्णफलदोऽपि यत् ।
पवित्रारोपणायैतत्कुरु कन्धर ते नमः ॥
विष्णुतेजोद्भवं रम्यं सर्वपातकनाशनम् ।
सर्वकामप्रदं देव तवाङ्गे धारयाम्यहम् ॥'
इति देवकरे मङ्गलसूत्रं बद्ध्वा देवं संपूज्य निमन्त्रयेत्-
'आमन्त्रितोऽसि देवेश पुराणपुरुषोत्तम ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॥
क्षीरोदधिमहानागशय्यावस्थितविग्रह ।
प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः ॥
निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकम् ।
सर्वथा सर्वदा विष्णो नमस्तेऽस्तु प्रसीद मे ॥'
ततः पुष्पाञ्जलिं दत्वा रात्रौ जागरणं कुर्यादिति अ-
धिवासनम् । प्रातर्नित्यपूजां कृत्वा गन्धदूर्वाक्षतयुतं
पवित्रमादाय—
'ॐदेवदेव नमस्तुभ्यं गृहाणेदं पवित्रकम् ।
पवित्रीकरणार्थाय वर्षपूजाफलप्रदम् ॥
पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतम् ।
शुद्धो भवाम्यहं देव त्वत्प्रसादान्महेश्वर ॥'
मूलसंपुटितेनानेन दत्वाऽङ्गदेवताभ्यो नाम्ना समर्प्य
महानैवेद्यं दत्वा नीराज्य-'मणिविद्रुममालाभिः' इत्या-
दिभिर्दमनारोपणोक्तमन्त्रैः प्रार्थयित्वा गुरवे ब्राह्मणेभ्यश्च
दत्वा स्वयं धारयेत् । तथा—
'मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवे तं सूत्रसंदर्भे देशकालविवक्षया ॥'

अकरणे तु तत्रैव—

'पवित्रारोपणं काले न करोति कथंचन।
तदाऽयुतं जपेन्मन्त्रं स्तोत्रं वाऽपि समाहितः ॥'

इत्युक्तम् ॥

इति पवित्रारोपः।

श्रावणशुक्लचतुर्दशी पूर्वयुता ग्राह्या। अत्र वक्तव्यो विशेषश्चैत्रचतुर्दश्यामुक्तः। अथोपाकर्म*। तत्र बह्वृचानां प्रयोगपारिजाते शौनकः—

'अथातः श्रावणे मासे श्रवणर्क्षयुते दिने।
श्रावण्यां श्रावणे मासि पञ्चम्यां हस्तसंयुते ॥
दिवसे विदधीतैतदुपाकर्म यथोदितम्।
अध्यायोपाकृतिं कुर्यात्तत्रौपासनवह्निना ॥'

इति। अत्र पौर्णमास्युपसंहारन्यायेन यजुर्वेदिपरेति हेमाद्रिः*। अत्र हस्तयुक्ता पञ्चम्युक्ता। कारिकाऽपि—

'तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते।' इति।

---

*उपाकर्मेति कर्मनामधेयम्। अध्यायोपाकरणमित्यादेस्तु अधीयते यः सोऽध्यायो=वेदः, तस्योपाकरणम्=उपक्रम इत्यर्थः।

*हेमाद्रिरित्यरुचिः। श्रावण्यामित्यस्य यजुर्वेदिपरत्वे शौनकोक्तौ तद्वैयर्थ्यं स्यात्। तस्मात्तद्बह्वृचानां पौर्णमासीं विधत्ते इत्येव वाच्यम्। पर्वद्वैधे च श्रवणं निर्णायकम्। 'पर्वण्यौदयिके' इत्युपक्रम्य 'बह्वृचाः श्रावणे कुर्युः' इत्युक्तेः। तदलाभे शुक्लपञ्चम्याम्। तस्माच्छ्रवणयुक्ते दिने तद्युक्तायां पूर्णिमायामित्यनयोः पक्षयोराचाराद्व्यवस्थेति प्रतियन्ति। तन्मासे इति वृत्तिकृन्मतम्। एतन्मते ये यजुषामपि यत्सूत्रे हस्तपञ्चम्यावुक्ते, तेषामपि हस्तयुक्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*केवलपञ्चम्यां *हस्तयुतेऽन्यस्मिन् दिने इति तु
ाद्रिः । उपासनवह्निनेति तु—
'कर्मद्वयमिदं केचिल्लौकिकाग्नौ प्रकुर्वते ।'
इति कारिकोक्तलौकिकाग्निना विकल्पते । तत्र
ाप्य*ध्याप्यैरन्वारब्धः' इति सूत्रात् सशिष्यस्य कर्तृत्वे
ाधिकारिकस्याचार्यस्याग्नौ नान्यस्याग्नावन्यो जुहुया-
तिनिषेधाल्लौकिक एव । तदभावे तु स्मार्ते* इति
ार्वः । यद्यपि दीपिकायां—

ेव बोध्या । अनुक्तपञ्चमीकैस्तु प्रौष्ठपदी ग्राह्येत्यग्रे । *के-
लपञ्चम्यामिति ।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु ।
त्यग्रिमवचनात् । *हस्तयुते इति । 'प्रौष्ठपदीं हस्तेनोपाकर्म'
ि गोभिलीये केवलहस्तस्याप्युपादानात्तद्विशिष्टपञ्चमीलक्षणायां
ाभावात् ।
'अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥'
ति याज्ञवल्क्येन श्रावणीविकल्पितश्रवणयोरिव व्य-
ाने हस्तपञ्चम्योरुक्तेश्च । *अध्याप्यैरिति । चतुःपञ्चाव-
ादिभेदेन भिन्नकल्पानामपि तेषामधिकारः । 'अप्यजामदग्न्यो
ामदग्न्यमामन्त्र्य कुर्यात्'इति सत्याषाढोक्तेः । 'दातृपु-
हितौ सायुज्यकामौ यजेयाताम्'इति विहितकुलाययागवत् । तत्र
ुयकल्पानामेवाधिकार इत्यस्य अपवादाधिकरणे वसिष्ठशुनकाऽ
वध्यश्वराजन्यानां नाराशंसो द्वितीयः प्रयाजः । तनूनपादन्ये-
ां नाराशंसाद्वितीयप्रयाजवद्राज्ञः तनूनपाद्द्वितीयप्रयाजवत्पुरोहित-
ा चोभयोरधिकार इति शबरस्वामिनोक्तेः । *स्मार्त्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'वेदोपाकृतिरोषधिप्रजनने पक्षे सिते श्रावणे'

इति शुक्लपक्षोऽपि सर्वेषां मुख्यकालत्वेनोक्त *वक्ष्यमाणगार्ग्यवचनेन छन्दोगान्प्रति विहितस्या विरोधिनः सर्वान्प्रति प्रवृत्तिश्च। तथापि श्रावणमास सम्बन्धस्य *सूत्रोक्तत्वात्कृष्णपक्षेऽपि कार्यमिति वृद्धाः तथाच सूत्रम्—'अथातोऽध्यायोपाकरणमोषधीनां प्रादु र्भावे श्रवणेन श्रवणस्य पञ्चम्यां हस्तेन वा'। अत्र श्रव णो मुख्योऽन्ये गौणाः*तस्य प्राथम्यात्। तस्याहर्ह यथोगे हेमाद्रौ व्यासः—

'धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत्।
तत्कर्म सकलं ज्ञेयमुपाकरणसंज्ञितम्॥
श्रवणेन तु यत्कर्म ह्युत्तराषाढसंयुतम्।

इति। शिष्याभावेऽपि स्मार्तासत्त्वे लौकिको बोध्यः। *वक्ष्यमा णगार्ग्यवचनेनेति। कातीयवचनेनेति त्वपपाठः। तथा का तीयस्याग्रेऽदर्शनात्। *सूत्रोक्तत्वादिति। सूत्रानुक्तशुक्लत्वस्य नान्वय इत्याशयः। पञ्चम्यामिवेहापि सूत्रानुक्तावपि शुक्लत्वान्वय इत्यन्ये। *अन्ये गौणा इति। स च श्रावणशुक्लपञ्चमीहस्त युक्तं दिनं भाद्रशुक्लश्रवणः। तद्वतशुक्लपञ्चमी एवमादि। येषां श्राव णपञ्चमी हस्तयुक्ता, तेषां भाद्रपञ्चमी तादृशीति केचित्। एवमेव यजुर्वेदिनां श्रावणहस्तपञ्चम्यौ, भाद्रपदपौर्णमासीतद्वतहस्तपञ्च म्यौ वा। अत्र—"पूर्वेद्युरुत्तराषाढयोगे, परेद्युः श्रवणाभावे घटि काद्वयन्यूने वा पञ्चम्यादौ कार्यं, न तु पूर्वविद्धायां सङ्गवमात्रे। अपवादाभावात्। किञ्च परेद्युः सङ्गवास्पर्शे निषिद्धपूर्वग्रहणे कि मानम्?, सङ्गववाक्यं श्रवणवाक्यं चेति चेत्तर्हि व्रीहिवाक्यादप्य शफवाक्याच्च माषमिश्राणामप्युपादानं स्यात्। निषेधानुप्रवेशाच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥' इति ।

प्रयोगपारिजाते गार्ग्योऽपि—

'उदयव्यापिनीं त्वेव विष्णवर्क्षे घटिकाद्वयम् ।
तत्कर्म सफलं ज्ञेयं तस्य पुण्यं त्वनन्तकम् ॥' इति ।

पूर्वेद्युरुत्तराषाढयोगे परेद्युः श्रवणाभावे घटिकाद्वय-
ने वा पञ्चम्यादौ कार्यम्, न तु पूर्वविद्धायां संगवमा-
। अपवादाभावात् । किञ्च परेद्युः संगवास्पर्शे निषि-
र्वाग्रहणे किं मानम् ?। संगववाक्यं श्रवणवाक्यं
ति चेत् तर्हि व्रीहिवाक्यादश्वशफवाक्याच्च
पामिश्राणामप्युपादानं स्यादिति महत्पाण्डित्यम् ।
षेधानुप्रवेशान्नैरपेक्ष्यबाधान्नेति चेदिहापि तुल्यम् ।
तेन पर्वाप्यौदयिकं व्याख्यातम् । निषेधानुप्रवेशस्यो-
यत्र तुल्यत्वात् ॥

ष्यबाधान्नेति चेदिहापि तुल्यम् । एतेन पर्वाप्यौदयिकं व्या-
ातम् । "निषेधानुप्रवेशस्योभयत्र तुल्यत्वात्"इति पाठः । स च-
म एव । परं तु श्रवणेन श्रावणस्येति कार्त्स्न्येन श्रवणसम्बन्धः
ीयते । स चान्तिमक्षणसम्बन्धः। तद्वत्त्वं च पौर्णमास्यां दिनान्तरे
। तदुक्तम्—'धनिष्ठाप्रतिपद्युक्तम्' इत्यादि । तेन यत्रोदया-
र्वे प्रवृत्तः श्रवणः परेऽह्नि उदयोत्तरं किञ्चिद्वर्तते । तत्र परेऽह्नि
निष्ठायोगात् ग्राह्यत्वे प्रसक्तेऽपि तत्र कर्मकालव्याप्तिर्नास्ति ।
ुश्चान्त्यक्षणेऽभावेनाग्राह्यत्वात् पञ्चम्यादि ग्राह्यम् । यत्र तूत्तरा-
संयुक्तश्रवणः क्षयवशान्न परेद्युः, तदा धनिष्ठायुक्तश्रवणस्य
ष्यकालस्यासत्त्वादुत्तराषाढयुक्तेऽपि तद्दिन एव कार्यम् । उ-
षाढयोगनिन्दावाक्यं तु न हि निन्दान्यायग्रस्तम् । स्वतो
निषिद्धत्वाभावादेव न निषिद्धमाषग्रहणापत्तिर्विभीषिकाऽपि । द्विती-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रवणयुतादिने *संक्रान्त्यादौ तु—
उपाकर्म न कुर्वन्ति क्रमात्सामर्ग्यजुर्विदः।
ग्रहसंक्रान्तियुक्तेषु हस्तश्रवणपर्वसु ॥
इति हेमाद्रौ निषेधात्। पञ्चम्यादयो ग्राह्याः मदनरत्नेऽपि—
*यदि स्याच्छ्रावणं पर्व ग्रहसंक्रान्तिदूषितम्।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु ॥
स्मृतिमहार्णवे—
'संक्रान्तिर्ग्रहणं वाऽपि यदि पर्वणि जायते।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ॥'

यदिने च कर्मकालपर्याप्तश्रवणलाभे तद्दिने, अन्यथा तु पञ्चम्यादाविति। यत्तु श्रवणे आदौ घटीचतुष्टयमभिजिन्नक्षत्रांशः सत्याज्य इति स्मृत्यर्थसारे उक्तं, तत्क्षयस्थले इति प्राहुः। अधिकमग्रे।

*संक्रान्त्यादाविति। सम्भावितसूतकाद्यपि द्रष्टव्यम्।
'संक्रान्तौ ग्रहणे वाऽपि सूतके मृतकेऽथ वा।
गणस्नानन्न कुर्वीत नारदस्य वचो यथा ॥'
इत्युक्तेः। न च सूतकादौ प्राप्त्यभावात्कथं निषेध इति वाच्यम्। गृह्याग्नेः श्रौतत्वात् उपाकर्मणश्च वैतानत्वात्। *यदीति। याजुषान्प्रति 'परतश्चेन्न दोषकृत्'इति, 'परतश्चेत्परेऽहनि'इति पाठे परेऽहनि न कुर्वीतेत्यर्थः। श्रावण्यामिति पञ्चम्यादेरुपलक्षणम्। अत्र पर्वश्रवणगतयोरेव ग्रहणसङ्क्रान्त्योर्निषेधः।
'ग्रहसङ्क्रान्तियुक्तेषु हस्तश्रवणपर्वसु।' इति ॥
तत्सामानाधिकरण्यात् न तिथ्यन्तरनक्षत्रान्तरगतयोरपि। तेन प्रतिपदि धनिष्ठादौ वा ग्रहणसङ्क्रमयोः पर्वणि श्रवणेचोपाकर्म कार्यम्। अन्ये तुग्रहसङ्क्रान्तिदिने येषामुपाकर्म प्राप्तं, तैस्तत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ—
'*अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं यदा ।
उपाकर्म न कुर्वीत परतश्चेन्न दोषकृत् ॥' इति ।
मदनरत्ने गार्ग्योऽपि—
'यद्यर्धरात्रादर्वाक्तु ग्रहः संक्रम एव वा ।
नोपाकर्म तदा कुर्याच्छ्रावण्यां श्रवणेऽपि वा ॥'
एतेन ग्रहसंक्रान्तिकाले श्रवणसत्त्वे एव निषेधो नागिति मूर्खशङ्का परास्ता । ग्रहविशिष्टानां हस्तश्रवणपर्वणां प्रत्येकं निषेधे तद्युतोपाकर्मनिषेधे च विशिष्टोद्देशे वाक्यभेदात् पञ्चम्यां संक्रान्तौ निषेधाभावाच्च । तेनार्धरात्रात्पूर्वं ग्रहसंक्रमसत्त्वे एवोपाकर्मनिषेधो न तद्योगे एव । हेमाद्रौ निगमः—
'ग्रहयोगो गुरुं हन्ति संक्रान्तिः शिष्यघातिनी ।
तयोर्हन्त्युत्तराषाढा उपाकर्मणि वैष्णवे ॥'
यत्तु—
'प्रतिपन्मिश्रिते नैव नोत्तराषाढसंयुते ।
श्रवणे श्रावणं कुर्युर्ग्रहसंक्रान्तिवर्जिते ॥'
इति प्रतिपन्मिश्रनिषेधकं वचनं, तन्निर्मूलम् ।
अत्र च—
'*वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ ।

कार्यमित्यर्थः । अन्यथा ग्रहादिविशिष्टपर्वाद्युद्देशेनोपाकर्मनिषेधे विशिष्टोद्देशे वाक्यभेदापत्तेरित्याहुः । *अर्धरात्रातिति । यद्दिने उपाकर्म तद्दिनार्धरात्रात्पूर्वमेव ग्रहसङ्क्रान्तियोगो यदि स्यात्, नोत्तरतइत्यर्थः ।
*वेदेति । चैत्रादेर्मीनादिरूपत्वात्तत्क्रमेण श्रावणःकर्कः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्तके ॥'
इति वचनं *देशान्तरविषयम् ।
'नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ।
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे ॥'
इति बृहस्पतिवचनादिति प्रयोगपारिजातेनोक्तम् । पराशरमाधवीयेऽप्येवम् । सामगानां हि सिंहस्थरवावुक्तेस्तद्विषय इदं *पुरोडाशचतुर्धाकरणवदुपसंहियते ।

तत्र चाधिक एवोपाकर्मप्राप्तौ सिंहश्रावणविधानम् । *देशान्तरेति । नेदं सामगविषयम् । तेषां कर्कप्राप्त्यभावेन व्यवस्थाया अनुपपत्तेः । किन्तु तदितरविषयम् । तेषां च श्रावणशब्देनोपाकर्मकालोविहितः । श्रावणश्च सौरः ।

'उपाकर्ममहाषष्ठ्योर्ह्येतदिष्टं वृषादितः ।'

इत्युक्तेः । सच 'मीनमेषयोर्मेषवृषयोर्वा वसन्तः' इति क्रमेण चैत्रादिरिव द्वेधेति कर्कसिंहयोरप्यव्यवस्थाप्राप्तौ व्यवस्थाविधिरर्थवान् । नच चैत्रादेर्मीनादिरूपवत्त्वात्तत्क्रमेण श्रावणः कर्क एवेति वाच्यम् । न्यायस्य मान्थर्यात्प्रागेव व्यवस्थापनात् । अन्यथा न्यायेन सुसदृशानुपेक्ष्य विसदृशपूर्तीकानियमविधानानुपपत्तेः । कथं तर्हि नर्मदोत्तरभागस्थानामार्यावर्तनिवासिनां शिष्टानामृग्यजुर्वेदिनां कर्कटस्थेऽपि रवावुपाकर्मानुष्ठानम् ? । प्राच्यनिबन्धादावेतद्वाक्यस्यालिखितत्वेनानाश्वासात् । *पुरोडाशेति । यथा 'पुरोडाशं चतुर्धा करोति' इत्यस्य 'आग्नेयं चतुर्धा करोति' इत्यनेनोपसंहारः ।

'सामान्यविधिरस्पष्टः संह्रियेत विशेषतः' ।

इत्युक्तेः । तथा 'वेदोपाकरणे' इत्यस्य 'सिंहे रवौ' इत्यग्रिमेणोपसंहार इत्यर्थः । 'नर्मदोत्तरभागे' इति देशभेदेन कर्कसिंहव्यवस्थाऽपि सामगान् प्रत्येव । अयं हि तदर्थः-यत्सिंहे कार्यं तन्नर्मदोत्तरभागे इति । तर्हि सामगैर्दक्षिणभागे कदा कार्यमित्यपे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ामेव देशव्यवस्था न तु बह्वृचादिपरम्। तेषां सूत्रे
न्द्रश्रावणोक्तेः। सौरे पञ्चम्ययोगात् इति तु वयं प-
ामः सामान्येन सौत्रविशेषस्य बाधायोगाच्च। यत्तु
लादर्शे—

'अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः।
बह्वृचाः श्रवणे कुर्युः सिंहस्थोऽर्को भवेद्यदि॥
*सहस्तशुक्लपञ्चम्यां वा तद्ग्रहणसंक्रमे।
असिंहार्के प्रौष्ठपद्यां श्रवणेन व्यवस्थया॥' इति।

ायां कर्कटे इति विधिः। एककोटिसिंहमात्रप्राप्तावपि काव्य-
ाकर्कटाप्राप्त्यव्यवस्थाविधिः सङ्गच्छत एव। पाठतो द्विती-
स्थाने तनूनपात्प्रयाजस्य प्राप्तौ नाराशंसस्य चाप्राप्तौ
सिष्ठादीनां नाराशंसो द्वितीयः प्रयाजः, तनूनपादन्येषाम्'
वत्। बह्वृचादीन्प्रति तु नेदं प्रवर्तते, अप्राप्तसिंहादिविधौ
रवात्। 'श्रवणेन श्रावणस्य' इति सूत्रे हि चान्द्र एव श्रावण
कः। नतु सौरः पञ्चम्यनन्वयापत्तेः। न चोभयपरता। वृत्ति-
विरोधात् लक्षणापत्तेश्च। न च बह्वृचसूत्रेण श्रावणश्रवणे विहि-
पि सिंहार्कविरहे भाद्रश्रवणे उत्कृष्यते इत्येव किं न स्या-
ति वाच्यम्। ऋग्यजुःसामवेदिविशेषाश्रवणेन बह्वृचान्प्रत्येव
तन्त्र्येण प्रवर्तमानसूत्रबोध्यचान्द्रश्रावणश्रवणादेः कर्कार्के
भवे परित्यागायोगात्। किंचमूलेति। बह्वृचान्प्रतीत्यादिः।
ोपाकरणे इत्यादेः सामगपरत्वादिति भावः। वस्तुतस्तु काला-
र्शो नासङ्गतः। 'भवेद्यदि' इति यदि पदस्य पाक्षिकाभिप्रायत्वा-
। तदभावेऽपि श्रवणस्यैव लाभात्। तत्र ग्रहणादौ त्वाह—
सहस्तेति। प्रौष्ठपद्यां=पञ्चम्याम्। *श्रवणे=भाद्रश्रवणे
र्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत् *मूलालेखनाच्चिन्त्यम्। सूत्रे हि श्रवणेन श्रावणस्येति चान्द्रमास एवोक्तो न सौरः तस्य पञ्चस्य-भावात्। श्रुतिलक्षणाभ्यामुभयपरत्वे वृत्तिद्वयविरोधा-च्च। तेन सिंहस्थोऽर्को भावी यदि तदा कर्केऽपि ग्रहण-संक्रमे सति असिंहार्के शुक्लपञ्चम्यां श्रावणे वा बह्वृचा-प्रौष्ठपद्यां तैत्तिरीया इति व्याख्येयम्। तेषां सौरमा-सासाभावात्। श्रावणे सस्यानुद्गमादौ तु बह्वृचपरिशिष्टे-

'*अवृष्ट्यौषधयस्तास्मिन्मासे तु न भवन्ति चेत्।
तदा भाद्रपदे मासि श्रवणेन तदिष्यते॥' इति।

तत्राप्यनुद्गमे तु—

*'कुर्यादेव तद्वार्षिकमित्याचक्षते' इति सूत्रात्। वर्षे-तौ भवं वार्षिकम्। एतच्च शुक्रास्तादावपि कार्यम्।

'उपाकर्मोत्सर्जनं च पवित्रदमनार्पणम्।'

इति दमनारोपे लिखितवचनात्।

'नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते॥'

इति प्रयोगपारिजाते संग्रहोक्तेः। पर्वणि ग्रहणे सति पूर्वे त्रिरात्रादिवेधाभावं वक्तुमिदम्। तेन पर्वणि ग्रहणे-ऽपि चतुर्दश्यां श्रवणे कार्यमिति हेमाद्रिः। अस्ते प्रथ-मारम्भस्तु न भवति।

'गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्धकेऽपि वा।

---

*अवृष्ट्येति। ग्रहणसङ्क्रान्तिसूतकादिवशाच्छ्रवणाद्यतिक्र-मोऽपि द्रष्टव्यः। *कुर्यादेवेति। भाद्रश्रवणे तच्छुक्लपञ्चम्यादौ वा। तत्रापि प्रतिबन्धे तु उपाकर्म लुप्यत एव अशक्तवत्। यजुर्वेदिनां तूक्तम्। 'शुक्रास्तादावपि' इत्यादिना ग्रहवेधग्रहः। अधिमाससंसर्ग-रूपौ मलमासौ। नतु मलमासः क्षयः तस्य कार्तिकादित्रयनैय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथाधिमाससंसर्पमलमासादिषु द्विजे ॥
प्रथमोपाकृतिर्न स्यात्कृतं कर्म विनाशकृत् ॥'
इति तत्रैव कश्यपोक्तेः । अत्र प्रथमारम्भे *वृद्धि-
श्राद्धं कुर्यादिति नारायणवृत्तौ । एतच्चाधिमासे न
कार्यम् ।
'उपाकर्मतथोत्सर्गः प्रसवाहोत्सवाष्टकाः ।
मासवृद्धौ परे कार्या वर्जयित्वा तु पैतृकम् ॥'
इति ज्योतिः पराशरोक्तेः ।
'उत्कर्षः कालवृद्धौ स्यादुपाकर्मादिकर्मणि ।
अभिषेकादिवृद्धीनां न तूत्कर्षो युगादिषु ॥'
इति कात्यायनोक्तेश्च । यत्तु—
'उपाकर्माणि चोत्सर्गे ह्येतादिष्टं वृषादितः ।' इति ऋ-

तत्रोपाकर्मप्रसक्तेः । आदिना सिंहस्थगुरुवक्रातीचारा-
ग्रहः ।
'गुरुशुक्रतिरोधाने वर्जयेच्छ्रुतिचोदितम् ।'
इत्याह भगवानत्रिः 'श्रावणे तु विशेषतः ।' इत्यपि प्रथमो-
पाकर्म परमेव ।
'यज्ञोपवीतं धर्तव्यं श्रावणे गुरुशुक्रयोः ।
मौढ्येपि वार्धके वाऽल्पे नित्यवत्कर्मचोदितम् ॥'
इति स्मृतिसारे । तदनुष्ठानस्यापि तत्रोक्तेः । यज्ञोपवीतधारणं
उपाकर्म । तत्र यज्ञोपवीतधारणस्याग्रे स्पष्टत्वात् अधिमासादि-
कर्मणां च प्रत्यवायातिशयज्ञापनार्थम् । वचनान्तरेण सर्वसाधार-
णनिषेधस्य सिद्धत्वात् । श्रावणश्रवणस्य गुरुशुक्रास्तबाल्या-
क्रान्तत्वे च तत्र प्रथमोपाकृत्यभावाद्यथासम्भवं श्रावणपञ्चम्यां
श्रवणपञ्चम्योर्वा कार्यम् । *वृद्धिश्राद्धमिति ।
'नानिष्ट्वा तु पितॄन् श्राद्धे कर्म किंचित्समारभेत्' ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्यशृङ्गवचनं तत्सामगविषयम् । *तेषां सिंहार्के एवोक्तेः । एतच्चापराह्णे कार्यम् ।

'उपाकर्मापराह्णे स्यादुत्सर्गः प्रातरेव तु ।' इति ।

'अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णिके ।

इत्युक्तेः । तच्च यद्यध्ययनमध्यापनविधिप्रयुक्तम् । तदा संस्कारस्याचार्यनिष्ठत्वादाचार्यः स्वपित्रादिभ्यो नान्दीश्राद्धं दद्यात् यदि त्वध्ययनं विधेयं तत्स्वीकारार्थमुपाकरणं तदा माणवकस्य तत्संस्कारार्थं जीवन् पिता स्वपित्रादिभ्यो दद्यात् । मृतश्चेत्तदा बटुरेव स्वपित्रादिभ्यो दद्यात् ।

'स्वपितृभ्यः पितादद्यात्सुतसंस्कारकर्मसु ।

पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात् ॥'

इति वचनात् । तस्य पितुरभावे तत्क्रमात्=पितृक्रमादित्यर्थः । तस्य पितुरभावे तत्क्रमात्संस्कार्यपितृक्रमात् इत्यर्थे तु आचार्य एव तत्पित्रादिभ्यो दद्यात् ।

नान्दीश्राद्धान्ते च निवीतिना ऋषयः पूजनीयाः । 'नव्यग्रन्थे चोत्सृष्टानामुपाकर्म' इति 'उपाकृतानामुत्सर्ग' इति मतद्वयं लिखितम् । प्रसवाहोत्सवो=जातेष्ट्यादिः । वर्धापनं वा न तु जातकर्म तस्य तत्रैव कर्तव्यत्वात् । परे=उत्तरे मासि । कालवृद्धावि-ति । संसर्पे च नैतत्प्रवर्तते कालवृध्यभावात् । उपाकर्मणि भाद्रश्रावणौ विना कालाभावाच्च । प्रथमस्य तु तत्र वचनान्निषेधः । 'आभिषेकादिवृद्धीनामिति' । उत्कर्ष इति वर्तते ।'

'वर्षवृध्यभिषेकादि कर्तव्यमधिकेन तु ।

इत्युक्तेः । 'नतूत्कर्षो युगादिषु' इतिच्छेदः, युगादेरुभयत्र ग्राह्यत्वात् । उपाकर्ममहाषष्ठ्योरिति ।

'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु ।'

इति पूर्वार्धम् । *तेषामिति । अयमर्थः युगादिविधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः ॥'
ति च हेमाद्रौ गोभिलोक्तेः । वस्तुतस्तु—
'भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु ।'
इति प्रचेतसो वचनात् पूर्ववाक्यं सामगविषयम् ।
ाम्*अपराह्ण एवोक्तेरित्यनुपदं वक्ष्यते । दीपिकापि-
य तु विधेः पूर्वाह्णकालः स्मृतः' इति । *याजुषास्तु
णि कुर्युः । तच्चापस्तम्बैरौदयिकं ग्राह्यमन्यैस्तु
वत् ।
'पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।
बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रान्तिवर्जिते ॥'
ति गार्ग्योक्तेः ।
'संप्राप्तवाञ्श्रुतिर्ब्रह्मा पर्वण्यौदयिके पुनः ।
अतो भूतदिने तस्मिन्नोपाकरणमिष्यते ॥'
ति कालिकापुराणाच्च ।
'अथ चेद्दोषसंयुक्ते पर्वणि स्यादुपाक्रिया ।
दुःखशोकामयग्रस्ता राष्ट्रे तस्मिन् द्विजातयः ॥'

ाकर्मविधौ च मासानां सौरत्वं सममेव । इयांस्तु विशेषः -युगा-
ः सर्वान् प्रति विधीयन्ते । उपाकर्म तु छन्दोगान्प्रत्येव तद्वि-
कतयैवोपपत्तेः । सर्वान् प्रति श्रावणादिपदस्य सौरपरत्वद्यो-
ऽसामर्थ्यात् । 'ह्येतदिष्टं वृषादितः' इति सिद्धस्यैव हेतुभावात्,
ामर्थ्येऽपि क्षयाच्च । अत एव तेषामेवाधिमासे तत्र प्रथमोपाकर्म-
विधः सार्थकः । अन्येषां चान्द्रश्रावणादेरेवोपादानादुत्कर्षेण तत्रा-
रिति तेषां तत्र लोपः । आशौचाशक्त्यादिना प्रतिबन्धो
ीयप्रयोगस्येवेति । *'अपराह्ण इति' । द्वेधा विभागेन ।
ाक्ये पूर्वाण्हापराण्हयोर्द्वयोरेव ग्रहणात् । मुख्यानुकल्पभावेन तु
धा चतुर्धा त्रेधा द्वेधा वा।*याजुषास्त्विति । मैत्रायणीयानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मदनरत्नहेमाद्र्यादौ गार्ग्येण दोषोक्तेः । अत्र शिङ्गाभट्टीये विशेषः—

'श्रवणः श्रावणं पर्व सङ्गवस्पृग्यदा भवेत् ।
तदैवौदयिकं कार्यं नान्यदौदयिकं भवेत् ॥'

पराशरमाधवीयेऽपि गार्ग्यः—

'श्रावणी पौर्णमासी तु सङ्गवात्परतो यदि ।
तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत् ॥'

कर्मकालमाह—कालादर्शे निगमः—

'श्रावण्या प्रौष्ठपद्या वा प्रतिपत्षण्मुहूर्तकैः ।
विद्धा स्याच्छन्दसां तत्रोपाकर्मोत्सर्जनं भवेत् ॥'

अत्र पौर्णमासीश्रवणहस्तयोरुपलक्षणम् । *तेन तावपि सङ्गवस्पृशौ ।

'उदये संगवस्पर्शे श्रुतौ पर्वणि चार्कभे ।
कुर्युर्नभस्युपाकर्म ऋग्यजुः सामगाः क्रमात् ॥'

इति पृथ्वीचन्द्रः । *तेनोदयसङ्गवोभयव्यापिनी

गृह्ये श्रवणस्यैवोक्तेस्तदन्ये याजुषा ग्राह्याः । *पूर्वामिति । कात्यायनादीनां त्वित्यादिनाऽग्रे स्पष्टम् । अत्रोदयव्यापित्वं घटिकाद्वयव्यापित्वमुदयसङ्गवोभयस्पर्शित्वम्, प्रातःसङ्गवोभयात्मकषण्मुहूर्तव्यापित्वं वेति मतत्रयम् । तत्राद्यं ग्रन्थकृन्मतम् । तत्र सङ्गवस्पर्शित्वादिवाक्यानि घटिकाद्वयमुपोद्बलयन्ति । द्वितीयं पृथ्वीचन्द्रोदयमतम् । तत्र घटिकाद्वयवाक्यमवयुत्याऽनुवादः । सङ्गवात्परतः षण्मुहूर्तकैरिति तु मुख्यत्वार्थम् । तृतीयं हेमाद्र्यादेर्मयूखविवेचनकृतोश्च मतम् । सङ्गवात्परतो यदिषण्मुहूर्तकैरित्येतद्यथाश्रुतलभ्यम् सङ्गवस्पर्शित्वादिकमनुवादः । सुदर्शनभाष्ये त्वेतद्विशेषः *तत्राद्यं मतं प्रपञ्चितम्, तृतीयं तु न विवृतम् । द्वितीयं मतमाह—*तेनेति । हस्तश्रवणयोरपि ग्रहेणेत्यर्थः । *तेन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्पर्शश्रवणेन । *मुख्येति । अन्यथा 'सङ्गवात्परतः' देवैयर्थ्यात् । केचित्तु कर्मकालः प्रातःसङ्गवरूपषण्मुहूर्तरूपः, तावत्साध्यमुपाकर्म तत्पराणि 'सङ्गवात्परतः'इत्यादीनि । स्पर्शः सर्वावयवावच्छेदेन विवक्षित इति तद्वाक्यमपि तत्पर- । एवं सङ्गवस्पर्श एकदेशावच्छेदेनेति यथाश्रुतार्थोऽपि विव- ः । येषां न्यूनकालसाध्यमुपाकर्म तत्परं च । तेन घटिकाद्वय- यं तु सङ्गवात्पूर्वावयवप्रशंसाद्वारा सङ्गवस्तावकम् । ईदृशरीत्या वाक्यानामर्थसम्भवादनुवादत्वे मानाभावः । नाप्यष्टदोषग्रस्तो कल्प इति भाष्यानुसारेणाहुः । सामगानां त्वपराह्णः कर्म- ल इत्यपराह्णोपाकर्मिणामुदये सङ्गवस्पर्शे इत्यादिवचनात्तत्काल- पिनमपि पूर्वहस्तं बाधित्वोत्तरदिन एव तदनुष्ठानम् । न च द्वयेऽपराह्णव्याप्तौ तदस्पर्शे वा परग्रहोऽस्त्विति वाच्यम् । सङ्ग- र्शत्वमात्रेण ग्राह्यताविधानानुपपत्तेः । केचित्तु येषां सामगाना- ृषिकः कर्मकालः, तत्परं वचनमित्याहुः । तादृशः सामगो त्येवेत्यप्याहुः । (१) (केचित्तु कर्मकालः प्रातःसङ्गवरूपषण्मुहू- त्मकः । तद्व्यापित्वं हेमाद्र्यादिभिर्मयूखविवेचनादिकृद्भि- दृतम् । तत्राद्यं प्रपञ्चितम् । एतन्मते 'सङ्गवस्पृक्' 'सङ्गवात्परतः' चानुवादकम् । द्वितीयमभिप्रेत्याह—*तेनेति । हस्तश्रवणयोरपि त्यर्थः । षण्मुहूर्तव्याप्यत्वं मदर्थः । सङ्गवस्पर्शः सर्वावयवाव- देनेति प्रातःसङ्गवोभयस्य षण्मुहूर्तकैरिति षण्मुहूर्तस्पृक्तेर्लाभात् । च येषामुपाकर्म षण्मुहूर्तसाध्यं तत्परम् । एवं संगवस्पर्शः एक- वच्छेदेन । एतच्च येषामुपाकर्म ऊनकालसाध्यं तत्परं 'विष्ण्वर्क्षे कद्वयम्' इति तु सङ्गवात्पूर्वावयवप्रशंसाद्वारा सङ्गवस्ताव- । ईदृशरीत्या सर्ववाक्यानामर्थसम्भवे एकदेशानुवादत्वे मा- वः, नाप्यष्टदोषग्रस्तो विकल्प इत्याहुः । सामगानामपराह्णः

(१) कंसान्तर्गतः पाठः क्वचिदादर्शपुस्तकेऽधिको दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुख्या* । *परेद्युः *सङ्गवाभावे *पूर्वेद्युरुदयाभावे चै-
कैकसत्त्वे पूर्वेद्युश्चतुर्दशीवेधनिषेधात्*सामान्यवाक्यादौ-
दयिकी कर्मपर्याप्ता ग्राह्या, न पूर्वा । *सङ्गवनिमित्त-
पूर्वविद्धापवादाभावात् । 'नान्यदौदयिकी' इत्यस्य पूर्व-
विद्धापरत्वाभावात् । तेन भाद्रादौ कालान्तरे स्यान्न

कर्मकालः । तादृशे साम(१) तेन=सङ्गवस्पर्शश्रवणेन । *मुख्येति
यथा न विवृतं सङ्गवात्परतः षण्मुहूर्तकैरित्येतल्लभ्यम् । एतन्मते
'विष्ण्वर्क्षे घटिकाद्वयं''सङ्गवस्पृक्'इति चानुवादः । अपराह्णोपाकर्मिणा
वचनात्तत्कालव्यापिनमपि पूर्वहस्तं बाधित्वोत्तरदिन एव तदनु-
ष्ठानम् ।) अत्र 'परेद्युः सङ्गवाभावे पूर्वेद्युरुभयाभावे चैकैकसत्त्वे पूर्वे-
द्युश्चतुर्दशीवेधनिषेधात्सामान्यवाक्यादौदयिकी कर्मपर्याप्ता ग्राह्या, न
पूर्वा । सङ्गवनिमित्तपूर्वविद्धापवादाभावात् । नान्यदौदयिकीत्यस्य
पूर्वविद्धापरत्वाभावात् । तेन भाद्रादौ कालान्तरे स्यान्न तु निषिद्धे
न हि व्रीह्यलाभे निषिद्धमाषग्रहणं युक्तम् । अत एव परेद्युः स-
ङ्गवव्याप्तौ पूर्वविद्धानिषेधः, तदभावे तु नेति मूर्खव्यवस्थाऽप्य-
युक्ता । विधिवैषम्यात्, माषनिषेधेऽपि तथाऽऽपत्तेश्च । पूर्वविद्धाव-
चनसत्त्वे हि सा युज्यते । एवं श्रवणेऽपि ज्ञेयम् । तन्न, 'विष्ण्वर्क्षे
घटिकाद्वयम्'इति पूर्वोक्तविरोधात् । तेन प्राशस्त्यमात्रपरमिदम्'इति
क्वचित्पाठः । सुदर्शनभाष्यमतं प्रपञ्चयति-*परेद्युरिति ।
*सङ्गवाभावे=सङ्गवास्पर्शे । *पूर्वेद्युरुभयाभावे=उदयसङ्गवोभ-
याभावे चैकैकसत्त्वे इति यावत् । एतेन पूर्वेद्युरुदयसङ्गवोभयसत्त्वे
पूर्वेति व्यञ्जितम् । तत्रापि न पूर्वा, प्रतिपद्योगाभावादिति मतान्तरं
प्रागुक्तम् । *सामान्यवाक्यादिति । सुदर्शनभाष्यकृता
सङ्गववाक्यस्यानुवादकत्वात् । (२) (*सङ्गवेति । सङ्गवव्यापित्वाति-

---

(१) इदमसंबद्धं प्रतिभाति । तत् सुधीभिर्विचार्यम् ।
(२) 'कंसान्तर्गतः पाठोऽत्र क्वचित्पुस्तके दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निषिद्धे। न हि व्रीह्यलाभे निषिद्धमाषग्रहणं युक्तम्। एव परेद्युः सङ्गवव्याप्तौ पूर्वविद्धानिषेधः। तदभावे इति मूर्खव्यवस्थाप्ययुक्ता, विधिवैषम्यात्। माषधेऽपि तथापत्तेश्च। *पूर्वविद्धावचनसत्त्वे हि सा यते। एवं श्रवणेऽपि ज्ञेयम्। तन्न। 'विष्णवर्क्षे घटिद्वयम्' इति पूर्वोक्तविरोधात्। तेन प्राशस्त्यमात्रमिदम्। तत्त्वं तु एतच्छुद्धाधिकपरम्। तेन यथाग्निहोत्रादौ सायंप्रातःकालबाधे सामान्ये जीवनावच्छिन्नकाले *दर्शादौ वाऽनुष्ठानम्, यथा वा व्रीह्यश्वशफाद्यभावे यागाक्षिप्तनिषिद्धवर्जद्रव्येण, तथाऽत्र सङ्गवाभावे निषिद्धवर्जकर्मपर्याप्तौदयिके कालान्तरे ऽनुष्ठानं न तु कदाऽपि निषिद्धे। अपवादाभावे

नको यस्तदपवादः पूर्वविद्धाग्राह्यत्ववादः, तस्याभावादित्यर्थः।) यिवैषम्यं विवृणोति—*पूर्वविद्धावचनेति। इदं तु चिन्त्यम्। 'अतो भूतादिने तस्मिन्नोपाकरणमिष्यते।' ति न निषेधः। हेतुपूर्वमेव 'नेष्यते' इत्यभिधानात्। तस्मात्सङ्गवव्याप्तौ परा, अन्यथा पूर्वेति मतं सम्यक्। अत्र त्त्वं त्वेतच्छुद्धाधिकपरम्। तेन यथाऽग्निहोत्रादौ सायंप्रातःकाले सामान्ये जीवनावच्छिन्नकाले दर्शादौ वाऽनुष्ठानम्, यथा वा व्रीह्यश्वशफाद्यभावे यागाक्षिप्तनिषिद्धवर्जद्रव्येण, तथाऽत्र सङ्गवाभावे निषिद्धवर्जकर्मपर्याप्तौदयिके कालान्तरे वाऽनुष्ठानं, न तु दाऽपि निषिद्धे। अपवादाभावे उत्सर्गस्यैव प्राप्तेः" इति क्वचित् दः। 'एतत्कर्मपर्याप्तं चेत् परमेव' इति सुदर्शनभाष्यम्। एतेऽपि सङ्गवो न नियामक इत्याशयः। अत्रापि 'अतो भूतादिने' स्य न निषेधत्वमिति स्मर्तव्यम्। 'तैत्तिरीया' इति पदोपादानलं स्पष्टयति—*दर्शादाविति। यदि सामान्यकालेऽपि प्रतिबन्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्सर्गस्यैव प्राप्तेः। *कात्यायनादीनां तु दिनद्वये पूर्वाह्णव्याप्तौ एकदेशस्पर्शे वा पूर्वैवेति हेमाद्रिः। यदपि—

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी।
पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनम्॥'

इति ब्रह्मवैवर्तम्, तद्ब्रह्मपवित्रश्रवणाकर्मादिदैवकर्मविषयमिति हेमाद्रिः। अत एव वचनात्कुलधर्मव्रतादावपि पूर्वैव। मदनरत्नेऽप्येवम्। मदनपारिजाते-पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्मेत्युक्तम्।

मदनरत्ने तु—

'पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः।'

इति बह्वृचपरिशिष्टे बह्वृचान्प्रति कर्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयककर्मविध्ययोगात् पूर्वोक्तकालिकापुराणादौ सामान्यत औदयिकपर्वप्राप्तेस्तन्निषेधेन बह्वृचानां श्रवणविधानात्तैत्तिरीयकपदमनुवादत्वात् तस्य च प्राप्त्यधीनत्वात् प्राप्तेश्च यजुर्वेदिमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थम्, अ(१)वयुत्यानुवादो वा, न तु विधायकम्। *येन विशेषविधिनोपसंहारः स्यात्। अनुवादत्वाल्लक्षणा न दोषः। अन्यथा त्वौदयिकपर्वविशिष्टो

स्तदा कालान्तरमेवेत्यत्र दृष्टान्तः। *कात्यायनादीनां त्विति। सर्वं वाक्यमेवानुवादः तैत्तिरीयकपदमात्रं वा?, आद्ये कालिकापुराणादिति। अन्त्ये कुर्युरिति। कालिकापुराणादौ प्रत्यक्षतो विधिप्रत्ययाश्रवणेन यावद्विधिः कल्प्येत तावत्ततः प्रागेव कुर्युरिति प्रत्यक्षविधिना तैत्तिरीयान् प्रत्येव तद्विधिरुपेयते, उपस्थितिलाघवादिति भावः।

*येनेति। तैत्तिरीयकसम्बन्धिधर्मविधानार्थं प्रवृत्तेन गृहेन

---

(१) अवयुत्य = पृथक्कृत्य अनुवादो वा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्मोद्देशेन कर्तृविधौ कर्तृविशिष्टे वा औदयिकपर्व-
विधौ वाक्यभेदापत्तेः । तस्मात्तैत्तिरीयकपदाविव-
त्या सर्वयजुर्वेदिनामौदयिकमेव पर्वेत्युक्तम् । तन्न । न
तावत्परिशिष्टे बह्वृचान्प्रत्येव विधिः ।
'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।'
इत्यादितदुदाहृते एव परिशिष्टे वेदान्तरधर्मविधीनां
दर्शनात् । नाप्यनुवादोऽयं कालिकापुराणाद्बह्वृचादी-
नामपि तदापत्तेः । कुर्युरित्यस्य विधित्वेन तस्यैवार्थवा-
दत्वेनैतत्प्राप्तानुवादित्वाच्च । न च तैत्तिरीयकाणां गृह्ये
विधिरस्ति, येनानुवादः स्यात् । न च वाक्यभेदः ।
तैत्तिरीयकमात्रस्य कर्ममात्रस्य वा उद्देश्यत्वायोगेन
हविरार्तिवत्, 'अष्टवर्षं ब्राह्मणमुपनयीत' इतिवच्चाग-
त्या विशिष्टस्योद्देश्यत्वात् । *अन्यथोत्तरार्धे बह्वृचपद-
स्याप्यविवक्षापत्त्या श्रवणस्य सर्वसाधारण्यापत्तेः ।
तस्मात् हेमाद्रिमतमेव युक्तमिति दिक् । इदं च शि-
ष्यानध्यापयत आवसथ्येऽग्नौ, अनध्यापयतो नाधिकार
इति कर्कः । श्रावण्यामपि ग्रहणादिदुष्टायां कातीयभिन्नैः

लाभे पुनस्तदुपादानमिति शेषः । *हविरिति । हविरार्त्यादे-
रुद्देश्यस्वरूपानन्तःप्रवेश उद्देश्यत्वस्यायोगात् । 'तैत्तिरीयकमात्रस्य'
इत्यत्राष्टवर्षमिति दृष्टान्तः । ब्राह्मणमात्रस्योद्देश्यत्वायोगात् । 'कर्म-
मात्रस्य' इत्यत्र हविरिति दृष्टान्तः । आर्तिमात्रस्योद्देश्यत्वायोगात् ।
नन्वेवं वाक्यभेदपरिहारेऽपि तुल्यकक्षाणामेव समभिव्याहा-
राजुषसामान्यं लभ्यते । न हि क्षत्रियैरिदं कर्म कर्तव्यं वैश्यै-
रिदं कठैरिदमिति भवति, भवति तु ब्राह्मणैरिदमितीत्यत्राह—
*अन्यथेति । समभिव्याहारस्य तैत्तिरीयकपदधर्मत्वेन तस्यैवा-
विवक्षायां बह्वृचपदस्याप्यविवक्षापत्तिरिति भावः । *तस्मादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*प्रौष्ठपद्यां कार्यम्। तैस्तु श्रावणपञ्चम्यां—

'संक्रान्तिर्ग्रहणं वाऽपि पौर्णमास्यां यदा भवेत्।
उपाकृतिस्तु पञ्चम्यां कार्या वाजसनेयिभिः॥'

इति स्मृतिमहार्णवे वाजसनेयिग्रहणादिति हेमाद्रिः।(१)(इदं च सूत्रोक्तकालपरत्वाद्बह्वृचपरमपि। साङ्ख्यायनैस्तु हस्ते कार्यम्। आपस्तम्बैराथर्वणैश्च प्रौष्ठपद्याम्।) यत्तु बौधायनः-'श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य' इत्यूचे, तत् प्रौष्ठपद्यामपि दोषे आषाढ्यां कार्यमित्येवमर्थं, *तच्छाखीयविषयं वा।

सामगास्तु श्रावणे हस्ते कुर्युः।

'बह्वृचाः श्रवणे चैव हस्तर्क्षे सामवेदिनः।'

इति निर्णयामृते गोभिलोक्तेः। सोऽप्युत्तरः।

ति। 'धनिष्ठाप्रतिपद्युक्तम्' इत्यादौ यजुःपदस्य तैत्तिरीयपरत्वादिति भावः। दिगर्थस्तु कालिकापुराणमपि तैत्तिरीयकपरमेवेति। विवेचने तु हेमाद्रिमतं त्यक्तम्। *प्रौष्ठपद्यामिति। 'श्रावण्यां प्रौष्ठपद्यां वा' इत्युक्तेः। परं तु येषां गृह्ये श्रावण्यसम्भवे श्रावणहस्तपञ्चम्यावुक्ते तैस्तत्र कार्यम्। तयोरप्यसम्भवे भाद्रपौर्णमास्यां तद्गतहस्तपञ्चम्योर्वा कार्यम्, येषां गृह्ये तेनोक्ते तैर्भाद्रपद्येव ग्राह्या वाजसनेयिभिरिति।

अत्राहुः-अत्र वाजसनेयिभिरेवेति नार्थः। बह्वृचानां पञ्चम्यनापत्तेः। किं तु येषां वाजसनेयिनां सूत्रे पञ्चम्युक्ता तेषां पर्वदोषे पञ्चमी, अन्येषां तु प्रौष्ठपदीति। एवं च मैत्रायणीयानां पौर्णमास्येव न। तद्गृह्ये श्रवणस्यैवोक्तेरिति द्रष्टव्यम्। *तच्छाखीयेति। बौधायनैर्वार्षिकसमाख्यां बाधित्वाऽऽषाढी ग्राह्येत्यर्थः। एवं च—

---

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम् ।
श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः ॥'
इति मदनरत्ने परिशिष्टोक्तेः । गार्ग्योऽपि—
'सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे*ऽविवरे बहिः ।
छन्दोगा मिलिताः कुर्युरुत्सर्गं स्वस्वछन्दसाम् ॥
*शुक्लपक्षे तु *हस्तेन उपाकर्मापराह्णिकम् ॥' इति ।
अविवरे=ग्रहादिदोषहीने । विचरेदिति पाठोऽज्ञानकृतः । (१)(पुष्यर्क्षे*पूर्वाह्णे उत्सर्गः । अपराह्णिकमुपाकर्मेत्यन्वयः ।) उपाकरणं नाम पक्षद्वयेऽपि स्वाध्यायपाठस्य स्वीकारः । तथा च सूत्रम्-'षण्मासानधीयीत' इति । एवं च यथागृह्यमुपाकर्म कृत्वा सार्धांश्चतुरः पञ्च वा मासानुत्सर्जनकालवशाद् व्यवस्थया स्मृतिसिद्धानध्यायपरिहारेण शुक्लकृष्णपक्षयोः स्वाध्यायमधीयीरन्, अनध्यायेष्वङ्गानि । उत्सर्जनं च यथापूर्वं पक्षद्वयेऽपि स्वाध्यायपाठस्य त्यागः । उत्सर्जनोत्तरं शुक्लपक्षेष्वेव वेदाध्ययनविधानात् । तथा च मनुः—
'यथाशास्त्रं तु कृत्वैवमुत्सर्गं छन्दसां बहिः ।
विरमेत् पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥

'श्रावणस्य तु मासस्य पौर्णमास्यां द्विजोत्तमाः ।
आषाढ्यां प्रौष्ठपद्यां वा वेदोपाकरणं मतम् ॥'
इति क्रमवाक्यमपि बौधायनपरमेवेति भावः । *अविवरे=सकान्त्यादिदोषहीने । विचरेदिति पाठोऽज्ञानकृतः । *शुक्लपक्षे त्विति । सिंहे रवाविति वर्तते । *हस्तेनेति । 'प्रौष्ठपदीं हस्तेन' इत्यादौ सौरप्रौष्ठपदोपादानेन तन्मासस्थां हस्तयुक्तां कां च न तिथिं प्राप्येति सम एवार्थः । *पुष्यर्क्षे इति । एतेन हस्ता-

---

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत् ॥' इति।

अन्यस्तु *विशेषः पूर्वमेवोक्तः । प्रयोगपारिजाते गोभिलः—

'*उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते।
*धारणाध्ययनाङ्गत्वाद् गृहिणां ब्रह्मचारिणाम् ॥
उत्सर्जनं च वेदानामुपाकरणकर्म च ।

त्पूर्वः पुष्यो लभ्यते ।

*विशेषः=मलमासे सामगानां प्रथमोपाकर्मनिषेध इत्यादिः। 'उपाकृत्याधीयीत' इति सूत्रादुपाकरणं ग्रहणाध्ययनाङ्गम् । तदधिकारिणश्च ब्रह्मचारिणः व्रतमात्रस्नातका गृहिणोऽपि । 'तेषां समावृत्तो ब्रह्मचारिकल्पेन' इत्याश्वलायनेन

'वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।'

इति व्रतमात्रानुष्ठानेन स्नानं वदता योगीश्वरेण च ग्रहणाध्ययनध्वननात् । अतो धारणाध्ययनार्थत्वमप्याह-*उपाकर्मेति । ग्रहणधारणब्रह्मयज्ञपारायणादिकरणहेतुकर्मविशेषः=उपाकर्म । तत्त्यागहेतुकर्मविशेषः=उत्सर्जनम् । हेत्वन्तं च परिचायकम् । तत्रोपाकर्मानन्तरं यावदुत्सर्जनं स्मृतिसिद्धाननध्यायान्विना पक्षद्वये वेदोऽध्येतव्यः, अनध्यायेष्वङ्गानि । उत्सर्जनानन्तरं तु शुक्लपक्ष एव वेदः ।

'यथाशास्त्रं तु कृत्वैवमुत्सर्गं च्छन्दसां बहिः ।
विरमेत्पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम् ॥
अत ऊर्ध्वं तु च्छन्दांसि शुक्लेषु नियतः पठेत् ।
वेदाङ्गानि रहस्यं च कृष्णपक्षेषु सम्पठेत् ॥'

इति मनुवाक्यात् । एतच्च धारणाध्ययनं न तु ग्रहणाध्ययनम् । 'उपाकृत्याधीयीत' इत्युक्तेः । उत्तरायणे आरण्यकाध्ययनं तूपाकर्मदिनस्योत्सर्जनकालत्वमादायोपपाद्यम् । *धारणेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥'
सर्वथा लोपे तु कृच्छ्र उपवासश्च । 'वेदोदितानां
त्यानाम्' इति मनुनाऽभोजनोक्तेः । एवमुत्सर्गेऽपि ।
अथ प्रसङ्गादत्रैवोत्सर्जनमुच्यते । तच्च पौषमासे
हिण्यां तत्कृष्णाष्टम्यां वा कार्यम् ।
'पौषमासस्य रोहिण्यामष्टकायाम*थापि वा ।
जलान्ते छन्दसां कुर्यादुत्सर्गं विधिवद्बहिः ॥'
इति याज्ञवल्क्योक्तेः । *श्रावण्यां प्रौष्ठपद्यां वोपा-
तौ क्रमेण पौषशुक्लप्रतिपदि माघशुक्लप्रतिपदि वा का-

ध्येष्यमाणोऽध्याप्यैरन्वारब्धः' इति । अध्येष्यमाणः=अध्या-
पिष्यमाणः । अध्याप्यपदसमभिव्याहारात् । अध्यापनम्=धा-
ध्ययनरूपमिति तेनैव रूपेण लटोपाकर्म प्रति शेषित्वम-
तिः । वेदजप्येनेत्यपि धारणाध्ययनाङ्गत्वसूचकम् । एवं च
मपर्थस्याध्याप्यैर्विनाऽप्युपाकर्मादि आवश्यकम् । उपाकृतानां
सर्गः । ततश्चानयोर्नित्यत्वात्तल्लोपे प्रायश्चित्तं सर्वथा इति
कृः । पाकयज्ञलोपे कृच्छ्रविधानात् ।
'वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥' इति ।
*अथापि वेति ।
'जलान्ते छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।'
त्युत्तरार्धे ग्रामाद्बहिरित्यर्थः । *श्रावण्यामिति ।
'पुष्ये तु च्छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य सम्प्राप्ते पूर्वाण्हे प्रथमेऽहनि ॥'
ति मानवात् । पुष्ये=पौषे मासि । शुक्लपक्षादेरप्यन्वयः ।
दा श्रावण्यामुपाकर्म तदा पौषशुक्लप्रतिपदि, यदा भाद्र्यां तदा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

र्थम् । '*अर्धपञ्चमान्मासानधीयीत' इति तेनैवोक्तेः अर्धः पञ्चमो येषु सार्धचतुर इत्यर्थः । यत्तु हारीतः-अर्धपञ्चमान्मासानधीत्योर्ध्वमुत्सृजेत, पञ्चा*र्धषष्ठान्वा इति; तदाषाढ्युपाकर्मविषयम् । बौधायनास्तु पौष्यां माघ्यां वा कुर्युः । 'पौष्यां माघ्यां चोत्सृजेत्' इति तत्सूत्रात् । तैत्तिरीयैस्तु तैष्यां कार्यम् । 'तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत्' इति तत्सूत्रात् । बह्वृचैस्तु माघ्यां कार्यम् ।

'अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते' इति कारिकोक्तेः । कातीयास्तु भाद्रपदे कुर्युः ।

'उत्सर्गश्चेत्तदा तिष्यातिथ्यां प्रौष्ठपदेऽपि वा ।' इति कात्यायनोक्तेः । सामगास्तु सिंहार्के पुष्ये कुर्युः तथा च 'सिंहे रवौ तु' इति गार्ग्यवचनं पूर्वमुक्तम् *सर्वैरुपाकर्मदिने वा कार्यम् ।

माघशुक्लप्रतिपदीत्यर्थः । *अर्धेति । अर्धः पञ्चमो येषु इति विग्रहः । सार्धाश्चत्वार इत्यर्थः ।

'श्रावण्यां प्रौष्ठपद्यां वाऽप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान् ॥'

इत्यत्र तथैव प्रतीतेः । एतेषां पक्षाणां यथा परिग्रहं व्यवस्था विज्ञानेश्वरस्तु पौषे पूर्वाण्हमात्रान्वयः, न तु प्रथमाहशुक्लपक्षयोः 'अर्धपञ्चमान्मासानधीयीत' इत्यादौ अर्धपदं खण्डपरं न समांशपरं चन्द्रार्धमौलिरित्यादिवत् । वाकारस्तु व्यवस्थितविकल्पार्थः इत्याह—*अर्धषष्ठानिति । अर्धः षष्ठो येषां तादृशान् पञ्चेत्यर्थः ।

*सर्वैरिति । अत्रापि खण्डत्वे औदयिका एव सङ्गवस्पर्शिनः कालाः, तेषां दैवत्वेन पूर्वाह्णकालत्वात् । ननु सिंहे रवाविति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथ वा ।'
इति हेमाद्रौ खादिरगृह्योक्तेः ।
*यदा सिंहस्थे सूर्ये सति तन्मध्यस्थहस्तनक्षत्रा-
त् पुष्यः कर्कस्थो भवति तदा तस्मिन्पुष्ये उत्सर्गं
वा तदुत्तरहस्ते उपाकर्म सामगाः कुर्युः ।
'मासे प्रौष्ठपदे हस्तात्पुष्यः पूर्वो भवेद्यदा ।
(तदा च श्रावणे कुर्यादुत्सर्गं छन्दसां द्विजः ॥)
इति तत्रैव परिशिष्टोक्तेः । अत्र द्वावपि सौरौ मा-
ज्ञेयौ* । तेषां सौरस्यैवोक्तेः ।
अत्र *विशेषमाह कार्ष्णाजिनिः—
'उपाकर्माणि चोत्सर्गे यथाकालं समेत्य च ।

नोपाकर्मोत्सर्गयोर्नक्षत्रयोः हस्तपुष्ययोः सिंहस्थत्वमुक्तं तत्रो-
र्णनक्षत्रपुष्यस्य यत्र कर्कस्थत्वं तत्र तल्लोपापत्तिः सिंहस्थ-
भावादित्यत्राह—*यदेति । तत्र 'उपाकर्मोत्सर्जनं भवेत्'इति
कवचनाच्च । आषाढ्यामुपाकृत्य माघशुक्लप्रतिपद्युत्सर्गे तु सार्ध-
ध्ययनमपि बोध्यम् । कर्कस्थः=कर्कस्थ एव न तु सिंहस्थः ।
हस्थे पुष्ये तु तत्रैवेत्यर्थः । *ज्ञेयाविति । अन्यथा यत्र
न्द्रप्रौष्ठपदे एव सौरश्रावणे पुष्यः, सौरभाद्रपदे च हस्तः
ऽपि चान्द्रश्रावणग्रहणं स्यात् । *विशेषमिति । अत्र चेदं
व्यम् ।
'ऋक्शाखी नैव कुर्वीत स्वकीयं परशाखया ।
प्रमादाद्यदि कुर्वीत पुनः संस्कारमर्हति ॥
यत्र नास्ति स्वशाखोक्तमृक्शाखोक्तं समाचरेत् ।
पुनर्नार्हति संस्कारमन्यदाऽर्हति चेत् पुनः ॥
यजुःशाखाविधानेन बह्वृचैर्यदि कर्म तत् ।
कृतं चेत्तर्हि तत्कर्म पुनः कुर्याद्यथाविधि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः ॥' इति।

'उपाकर्मण्युत्सर्गे च त्रिरात्रं पक्षिणीमहोरात्रं वाऽनध्यायः' इति मिताक्षरायामुक्तम्। अत्र नदीनां रजोदोषो नास्ति।

('उपाकर्मणि चोत्सर्गे रजोदोषो न विद्यते।)
इति गार्ग्योक्तेः।

अत्रैव रक्षाबन्धनमुक्तं हेमाद्रौ भविष्ये '

(१)('संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये।
स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः॥
उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम्।
शूद्राणां मन्त्ररहितं स्नानं दानं च शस्यते।)
उपाकर्मणि कर्तव्यमृषीणां चैव पूजनम्॥
ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्।
कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैः॥' इति।

अत्रोपाकर्मानन्तर्यस्य पूर्णातिथावार्थिकस्यानुवादो न तु विधिः। गौरवात् प्रयोगविधिभेदेन क्रमायोगाच्छूद्रादौ तदयोगाच्च। तेन परेद्युरुपाकरणेऽपि पूर्वेद्युरपराह्णे तत्करणं सिद्धम्। इदं भद्रायां न कार्यम्।

('भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा।)

ऋक्शाखाविधिना कर्म यदि स्यादन्यशाखिनाम्।
न तत्कर्म पुनः कुर्यादिति यज्ञविदां मतम्॥' इति।

ननु—

'उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम्।'

इत्याद्युपक्रम्य 'ततोऽपराह्णसमये' इत्यादि उक्तम्। ततश्च वक्ष्यमाणदोषो दुर्वार इत्यत्राह—*अत्रेति। अपराण्हः कर्मकालः।

(१) कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri,Funding: MIDF

श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनी ॥'
इति संग्रहोक्तेः । *तत्सत्त्वे तु रात्रावपि तदन्ते कुर्या-
दिति निर्णयामृते । (१) इदं प्रतिपद्युतायां न कार्यम् ।
'नन्दायां दर्शने रक्षा बलिदानं दशासु च ।
भद्रायां गोकुलक्रीडा देशनाशाय जायते ॥'
इति मदनरत्ने ब्रह्मवैवर्तात् । भविष्ये—
'उपलिप्ते गृहमध्ये दत्तचतुष्के न्यसेत्कुम्भम् ।
पीठे तत्रोपविशेद्राजाऽमात्यैर्युतश्च सुमुहूर्ते ॥
तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण ॥'
इदं रक्षाबन्धनं नियतकालत्वाद्भद्रावर्ज्यग्रहणादिनेऽपि
कार्यं होलिकावत् । ग्रहसंक्रान्त्यादौ रक्षानिषेधाभावात् ।
'सर्वेषामेव वर्णानां सूतकं राहुदर्शने ।'
इति तत्कालीनकर्मपर एव न त्वन्यत्र । अन्यथा
होलिकायां का गतिः । अत एव—
'नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च ।
उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥'
इति नियतकालीने तदभाव इति दिक् । उपाकर्मणि
तद्दिनभिन्नपरं तत्र तन्निषेधादित्युक्तं प्राक् । मन्त्रस्तु—
*'येन बद्धो बली राजा दानवेन्द्रो महाबलः ।
तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥

दिनद्वयव्याप्तौ पूर्वा 'श्रावणी दुर्गनवमी' इति वाक्यात् । *तत्स-
त्त्वे त्विति । भद्रां विना चेदपराण्हे तदा परा । तत्सत्त्वे तु
रात्रावपीत्यर्थः । *येन=रक्षाबन्धनाभावेन हेतुना । तेनेत्यस्यापि

---

(१) तत्कालमात्रनिषेधाच्च 'त्रयोदश्यादितो वर्ज्यं दिनानां नवकं
ध्रुवम् । माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्ययोः ॥' इति यो निषेधः
सोऽप्यनित्य इति विशेषः कस्मिंश्चित्पुस्तके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः।
कर्तव्यो रक्षिताचारो द्विजान्संपूज्य शक्तितः॥'इति
अत्रैव हयग्रीवोत्पत्तिः। तदुक्तं कल्पतरौ—
'श्रावण्यां श्रवणे जातः पूर्वं हयशिरा हरिः।
जगाद सामवेदं तु सर्वकल्मषनाशनम्॥
स्नात्वा संपूजयेत्तं तु शङ्खचक्रगदाधरम्॥'
अत्राश्वलायनेन श्रवणाकर्मोक्तम्। श्रावण्यां पौर्णमास्यां श्रवणाकर्म' इति। तत्रा*स्तमययोगिनी ग्राह्या। 'अस्तमिते स्थालीपाकं अपयित्वा' इति सूत्रात्। अत एव निशीष्टेर्दर्शप्रयोगान्तःपातनियमात्तदङ्गैः प्रसङ्गसिद्धिरुक्ता द्वादशे। अन्यथा परेद्युः प्राप्तौ कः प्रसङ्गः प्रसङ्गस्य। *केचित्तु पौर्णिमादर्शशब्दयोः पर्वान्त्यक्षणवदहोरात्रवाचित्वात्तत्रैव कर्मकालव्याप्तिर्ग्राह्येति विकृतित्वाच्छेषपर्वेच्छन्ति।

स एवार्थः। तत्कार्ये तत्कार्यस्य प्रतिबन्धकत्वात्। *अस्तमयेति। कर्मकालशास्त्रात्। दिनद्वये तद्व्याप्तावव्याप्तौ वा परा विकृतित्वात्। एवं सर्पबलावपि। *केचित्त्विति याज्ञिकमतम्। दर्शशब्दवत् पौर्णमासीशब्दस्यापि तदन्त्यक्षणवदहोरात्रवाचित्वात् पर्वसन्धिदिनेऽस्तमितलाभः।

अत्रेदमरुचिबीजम्। द्वादशे निशीष्टेर्दर्शप्रयोगान्तःपातित्वात्तदङ्गैः प्रसङ्गसिद्धिरिति सिद्धान्तितम्, तद्भङ्गापत्तिः। भवन्मते तस्या विकृतित्वेन शेषपर्वण्येव न्याय्यत्वेनान्तःपाताभावादिति। श्रवणाकर्मसर्पबल्योरकरणे प्रायश्चित्तमाह प्रजापतिः—
'हविर्यज्ञेष्वशक्तस्य लुप्तमप्येकमादितः।
प्राजापत्येन शुध्येत पाकसंस्थासु चैव हि॥' इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रावणादिमासचतुष्टयकृष्णपक्षद्वितीयासु अशून्य-
शयनव्रतम् । तत्र *चन्द्रोदयव्यापिनी, दिनद्वये तत्त्वे
परेति निर्णयामृते ॥ इति कमलाकरभट्टकृते निर्णय-
सिन्धौ श्रावणमासः ॥

*सिंहे पराः षोडशघटिकाः पुण्यकालः । अन्यत्पूर्व-
वत् । अत्र गोप्रसवेऽद्भुतसागरे नारदः–

'भानौ सिंहगते चैव यस्य गौः संप्रसूयते ।
मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः ॥
तत्र शान्तिं प्रवक्ष्यामि येन संपद्यते शुभम् ।
प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत् ॥
ततो होमं प्रकुर्वीत घृताक्तै राजसर्षपैः ।
आहुतीनां घृताक्तानामयुतं जुहुयात्ततः ॥
[व्याहृतिभिश्चायं होमः ।]

एतच्च श्रवणाकर्मसर्पबलयाश्वयुजीकर्माग्रयणप्रत्यवरोहणेषु प्रव-
र्तते । तत्र प्रायश्चित्तान्तरादर्शनात् । *चन्द्रोदयेति ।

'एकभक्ते दिवानक्ते निशि चन्द्रोदयव्रते ।
तिथिस्तात्कालिकी ग्राह्या पारणे त्वपरा तिथिः ॥'

इति स्मृतिसङ्ग्रहात् । इदं च चन्द्रोदयव्रतम् ।

'चन्द्राय वाऽर्घ्यो दातव्यो दध्यक्षतविभूषितः ।'

इति चन्द्रोदये चन्द्रार्घ्यदानविधानात् । *परेति ।

'चतुर्ष्वसितपक्षेषु मासेषु श्रावणादिषु ।
अशून्याख्यं व्रतं कुर्याज्जायया तु फलाधिकम् ॥'

इत्युक्तेः । अत एव दिनद्वये तदभावेऽपि परा ।
मासश्च पूर्णिमान्तः । हेमाद्रिणा तथा व्याख्यानात् ।

इति श्रावणः ॥

*सिंहे परा इति । पूर्वा इत्यपपाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणाम् ।' इति।

तथा—

'सिंहराशौ गते सूर्ये गोप्रसूतिर्यदा भवेत् ।
पौषे च महिषी सूते दिवैवाश्वतरी तथा ॥
तदाऽनिष्टं भवेत्किंचित्तच्छान्त्यै शान्तिकं चरेत् ।
अस्यवामेति सूक्तेन तद्विष्णोरिति मन्त्रतः ॥
जुहुयाच्च तिलाज्येन शतमष्टोत्तराधिकम् ।
मृत्युंजयविधानेन जुहुयाच्च तथायुतम् ॥
श्रीसूक्तेन ततः स्नायाच्छान्तिसूक्तेन वा पुनः ।
मध्यरात्रे निशीथे वा यदा गौः क्रन्दते सदा ॥
ग्रामे वा स्वगृहे वापि शान्तिकं पूर्ववद्दिशेत् ॥'

एवं श्रावणे वडवाप्रसवो दिने निषिद्धः । तदुक्तमथर्ववेदिनां गार्ग्यपरिशिष्टे—

'माघे बुधे च महिषी श्रावणे वडवा दिवा ।
सिंहे गावः प्रसूयन्ते स्वामिनो मृत्युदायकाः ॥'इति।

अत्र *तदुक्तामृताख्या शान्तिः कार्या ।

भाद्रकृष्णतृतीया कज्जलीसंज्ञा । सा परा ग्राह्येति दिवोदासीये उक्तम् । *वचनं तु हारितालिकाप्रकरणे वक्ष्यामः । *भाद्रकृष्णचतुर्थी बहुलाख्या मध्यदेशे

---

*तदुक्ता=अथर्वोक्ता । कज्जलीव्रतं पूर्णिमान्तश्रावणकृष्णतृतीयायां कार्यमिति मतं निरसितुमाह—*वचनान्त्विति । चतुर्थीमिश्रिता' इत्युपक्रम्य 'भाद्रस्य कज्जली कृष्णा' इत्युक्तेः ।

*भाद्रकृष्णेति । अमान्तमानेन श्रावणकृष्णोपादानं प्रमादात् । पूर्णिमान्तमानेन श्रावणकृष्णे द्रष्टव्यम् । भाद्रपदकृष्णचतुर्थ्यां सङ्कष्टचतुर्थीव्रतं स्कान्दे—

'श्रावणे बहुले पक्षे चतुर्थ्यां तु विधूदये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सद्धा । सा *सायाह्नव्यापिनी ग्राह्या । दिनद्वये तत्त्वे
ी ग्राह्या ॥
ीर्याश्चतुर्थी *वटधेनुपूजा *दुर्गार्चनं दुर्भरहोलिके च ।
वत्सस्य पूजा शिवरात्रिरेताः परान्विता घ्नन्ति नृपं
ाष्ट्रम् ॥'
इति दिवोदासीये वचनात् । 'अत्र वत्सपूजायाः
ुपादानात् धेनुपूजाशब्देन बहुलाख्या गृह्यते' इति
एव व्याचख्यौ । मदनरत्नेऽप्येवम् । अत्र गोपूजा-
ान्नाशनं च तत्रैवोक्तम् । भाद्रकृष्णषष्ठी हलषष्ठी ।
ासप्तमीयुतेति दिवोदासः । भाद्रकृष्णसप्तम्यां शी-
ाव्रतम् । तत्र *पूर्वा ग्राह्येति हेमाद्रौ ।

अथ जन्माष्टमी । सा च *कृष्णादिमासेन भाद्रप-

गणेशं पूजयित्वा तु चन्द्रायार्घ्यश्च दीयते ॥' इति ।
श्रावणोऽमान्तः 'व्रते शुक्लादिमेव च' इत्युक्तेः । इयं चन्द्रो-
योगिनी ग्राह्या । तत्काले चन्द्रार्घ्यदानोक्त्या चन्द्रोदय-
त्वात् ।
'चन्द्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृता ।'
इत्युक्तेः । दिनद्वये चन्द्रोदये सत्त्वेऽसत्त्वे वा पूर्वं निरूपितमे-
सामान्यनिर्णये । *सायाह्नेति । गोधूलिकाले गोपूजाद्युक्तेः ।
ौर्याः=गौरीव्रतसम्बन्धिनी चतुर्थी ।
*वटेति । वटसम्बन्धिनी पञ्चदशी । *दुर्गार्चनं=दुर्गानवमी ।
ाः+ ॥ *वत्सस्य पूजा=वत्सद्वादशी । *पूर्वेति । नव्याह्नतु
ष्ठ्यां शीतलाव्रते च मध्याह्नव्यापिनी ।
'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ।'
त्युक्तेः । दिनद्वये सत्त्वेऽसत्त्वे वा पूर्वा युग्मवाक्यादित्याहुः ॥
*कृष्णादीति । 'श्रावणे बहुले पक्षे' इत्यादिकं तु शुक्ला-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दकृष्णाष्टमी ।

'तथा भाद्रपदे मासि *कृष्णाष्टम्यां कलौ युगे।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥'

इति कल्पतरौ ब्राह्मोक्तेः । अत्रेदं माधवमतम् । अ-
ष्टमी द्वेधा—जन्माष्टमी जयन्ती चेति । तत्राद्या केव-
लाष्टमी ।

'ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम् ।
ते भवन्ति नराः प्राज्ञ व्याला व्याघ्राश्च कानने ॥'

इति स्कान्दात्,

'दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला ।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ॥'

इति पुराणान्तरात्,

'श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु भवति क्रूरराक्षसः ॥'

इति भविष्योक्तेश्च केवलाष्टम्या एवोपोष्यत्वावगतेः
सैव रोहिणीयुक्ता जयन्ती ।

*'कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि ।
जयन्ती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः ॥'

इति वह्निपुराणात् ।

'अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता ।
भवेत्प्रौष्ठपदे मासि जयन्ती नाम सा स्मृता ॥'

इति विष्णुरहस्यादिवचनाच्च । *ज्योतिरादिवत्सं-

दिमासेनेत्युभाभ्यामेकैव तिथिर्लभ्यते । अन्यथा तिथिभेदापत्त्या
मूलश्रुतिभेदापत्तेः । *कृष्णाष्टम्याम्=कृष्णपक्षाष्टम्याम् । कृष्णा-
ष्टम्याम्=कृष्णजन्माष्टम्याम् । *ज्योतिरादिवदिति । य-
"अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योतिरेतेन सहस्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

या कर्मभेदः। रोहिणीयोगश्चाहोरात्रं मुख्यः, निशीथमात्रे मध्यमः, दिवसादावधमः।

'*अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि।
मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत्॥'

इति वसिष्ठसंहितोक्तेः।

'अर्धरात्रे तु योगोऽयं तारापत्युदये सति।
नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्तयेत्॥'

इति विष्णुधर्मोक्तेः।

'वासरे वा निशायां वा यत्र स्वल्पाऽपि रोहिणी।
विशेषेण नभोमासे सैवोपोष्या मनीषिभिः॥'

इति पुराणान्तराच्च। विशेषेणेति श्रुते*भाद्रपदेऽपीदम्। 'श्रावणे वा नभस्ये वा' इति वक्ष्यमाणात्। गौडास्तु निशीथ एव रोहिणीयोगे जयन्ती *नान्यथेत्याहुः। तन्न। *'वासरे वा निशायां वा' इति विरोधात्। *योगविशेषेण यजेत" इत्यत्र प्रकृतविच्छेदकेनाथशब्देन एतच्छब्दाभ्यां प्रकृतज्योतिष्टोमानुवादासम्भवात्तत्र गुणविधित्वं न सम्भवतीति ज्योतिष्टोमादिसंज्ञाभिन्नया ज्योतिरादिसंज्ञया कर्मभेदः। तथा जन्माष्टमीसंज्ञाभिन्नया जयन्तीसंज्ञयाऽपीत्यर्थः।

*अहोरात्रमिति। अहोरात्रयोगं प्रत्याय्यैव व्यतिरेकोक्तेः। *भाद्रपदेऽपीति। शुक्लादिमासमभिप्रेत्य। *नान्यथेति। अहोरात्रयोगे निशीथयोगः सम्भवति। मुहूर्तपदं च निशीथाल्पमुहूर्तपरम्। *वासरे वेति। न चेदं स्तावकं, निशीथेनात्यन्तविप्रकर्षात्। केषांचिन्मतमास्कन्दयति—* योगेति। अयमाशयः—रोहिणीयोगस्य जयन्तीति संज्ञा सा नित्यां जन्माष्टमीमाश्रित्य

'रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शेषाद्गुणात्फलमित्यन्ये। तेऽप्य*अकरणे दोषश्रुतेरुपेक्ष्याः।

तत्र जन्माष्टमीव्रतं नित्यं, पूर्वोक्तवचनेषु अकरणे निन्दाश्रुतेः।

जयन्ती नाम सा प्रोक्ता सर्वपापहरा तिथिः॥'

इत्यादिवचनैः फलाय विधीयते। 'दध्नेन्द्रियकामस्य' इत्यनेन नैत्यकाग्निहोत्रे फलार्थं दधिवत्। यथा न नैत्यकाग्निहोत्रान्य इन्द्रियार्थदधिहोमस्तथा न जन्माष्टमीभिन्ना जयन्तीति। न च रोहिण्याः कालविशेषत्वेनानुपादेयत्वात्कथं विधिः?, 'वसन्ते ज्योतिषा यजेत' इतिवदनुष्ठानाङ्गत्वेन तत्प्रतीक्षणात्। अन्यथा कालविधिलोपः स्यात्। *अकरणे इति। जयन्त्यकरणे इत्यर्थः। तथा च जयन्त्या अपि नित्यत्वेन स्वतन्त्रव्रतत्वमेव, न तु रोहिण्या जयन्तीति नामेत्यर्थः। किं च जयन्त्यां शवहस्तस्थभोजने 'तत्पापं लभते कुन्ति' इत्युक्तावपि नोपवासमात्रं व्रतशरीरं, किं तु 'जयन्तीविमुखो नरः' इत्येवोक्तेः पूजाजागरणादिरपि। 'पूजां तत्र प्रवर्तयेत्' इत्युक्तेः।

'मासि भाद्रपदेऽष्टम्यां निशीथे कृष्णपक्षके।
शशाङ्के वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके॥
योगेऽस्मिन् वसुदेवाद्धि देवकी मामजीजनत्।
तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः॥
ब्राह्मणान् भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणाम्।
हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च॥
यद्यदिष्टतमं लोके कृष्णो मे प्रीयतामिति।'

इति भविष्यात्।

'उपोष्य जन्माचिन्हानि कुर्याज्जागरणं तु यः।
अर्द्धरात्रयुताष्टम्यां वाजपेयफलं लभेत्॥'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'वर्षे वर्षे तु या नारी* कृष्णजन्माष्टमीव्रतम्।
न करोति महाप्राज्ञ व्याली भवति कानने॥'
इति स्कान्दे *वीप्साश्रुतेश्च। 'न करोति नरो यस्तु'
इति पूर्वमुक्तेरत्र स्त्रीलिङ्गमतन्त्रम्।

इति नारदीयाच्च। जन्माष्टम्यां तूपवासमात्रं व्रतशरीरं
अधिकम्।

'गृध्रमांसं खगं पोतं श्येनं च मुनिपुङ्गव।
मांसं च द्विपदां भुक्तं कृष्णजन्माष्टमीदिने॥
जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम।
त्रैलोक्यसम्भवं पापं तेन भुक्तं न संशयः॥'

इति तदकरणे दोषस्मरणात्। तथा च यथा 'तप्ते पयसि
अभ्यानयति सा वैश्वदेवी आमिक्षा, वाजिभ्यो वाजिनम्' इत्यत्र
कृत एव विश्वेदेवदेवताके वाजोऽन्नमामिक्षारूपं येषां विश्वेषां दे-
वानामिति व्युत्पत्त्याऽपि समुच्चयेन विकल्पेन वा न वाजिनरूपगु-
णविधिः। उत्पत्तिशिष्टामिक्षारूपगुणावरुद्धतया गुणान्तरानपेक्ष-
णात्, किंतु कर्मभेदः, तथा उपवासरूपतादृशे गुणावरुद्धे जन्मा-
ष्टमीव्रते न पूजादिरूपगुणविधिः, किं तु कर्मभेदः। अधिकमन्य-
तोऽवगन्तव्यम्।

*नारीति स्त्रीत्वमतन्त्रम्। 'न करोति नरः' इति दर्शनात्।
*वीप्सेति। न चास्या अकरणे निन्दायामन्तर्भाव इति वा-
च्यम्। 'वर्षे वर्षे जन्माष्टमी व्रतं कुर्यात्' इति विधौ तात्पर्यात्।
कृष्णजन्मव्रताऽकरणे प्रायश्चित्तं च

'प्राणायामशतं कार्यं सर्वपापापनुत्तये।
उपपातकजातानामनादिष्टस्य चैव हि॥'

इत्यादिकम्। विशेषतोऽनुपदिष्टत्वात्। प्रतिनिधिरपि 'उप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मदनरत्ने स्कान्दे त्वत्र *फलमप्युक्तम् ।

'जन्माष्टमीव्रतं ये वै प्रकुर्वन्ति नरोत्तमाः ।
कारयन्त्यथवा लोकाँल्लक्ष्मीस्तेषां सदा स्थिरा ॥
सिध्यन्ति सर्वकार्याणि कृते जन्माष्टमीव्रते ॥'इति ।

जयन्तीव्रतं तु नित्यं काम्यं च ।

'महाजयार्थं कुरुतां जयन्तीं मुक्तयेऽनघ ।
धर्ममर्थं च कामं च मोक्षं च मुनिपुङ्गव ॥
ददाति वाञ्छितानर्थान्ये चान्येऽप्यतिदुर्लभाः ॥'

इति स्कान्दादौ फलश्रुतेः ।

'शूद्रान्नेन तु यत्पापं शवहस्तस्थभोजने ।
तत्पापं लभते कुन्ति जयन्तीविमुखो नरः ॥
न करोति यदा विष्णोर्जयन्तीसम्भवं व्रतम् ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥'

इत्यकरणे निन्दाश्रुतेश्च । *यदा च *पूर्वेद्युः परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयन्त्यामन्तर्भूता ज्ञेया

वासासमर्थश्चेदेकं विप्रं तु भोजयेत्'इत्यादिर्द्रष्टव्यः । *फलमपीति । एतच्च 'जन्माष्टमी नित्यत्वाच्छुद्धा, जयन्ती तु नित्यकाम्यत्वाभ्यां मिश्रा'इति माधवोक्तिखण्डनार्थम् । वस्तुतस्तु स्कान्दात् तत्र फलं न प्रतीयत एव तस्य सुहृत्संमितत्वात् । तस्मात्

'केवलेनोपवासेन तस्मिन् जन्मदिने मम ।
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥'

इति वाक्यात्पापक्षयः फलमिति नव्याः । नन्वेवं यत्र पूर्वेद्युर्जन्माष्टमी परेद्युश्च जयन्ती तत्र पारणाया अङ्गत्वाद्भोजनोपवासरूपविरुद्धधर्मद्वयमसंगतम् इत्यत्र माधवाचार्याणां समाधिमाह-*यदा चेति । *पूर्वेद्युरिति दृष्टान्तार्थम् । नन्वेवं तद्व्रतयो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न तु जन्माष्टमीव्रतं पृथक्कार्यं विष्णुशृङ्खलवत् । तदुक्तं माधवेनैव —

'यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा ।
अन्तर्भूता जयन्त्यां स्याद्दक्षयोगः प्रशस्ततः ॥' इति

मदनरत्ननिर्णयामृतगौडमैथिलमतेऽप्येवम् । *हेमाद्रिस्तु -

'रोहिणीसंयुतोपोष्या सर्वाघौघविनाशिनी ।
अर्धरात्रादधश्चोर्ध्वं कलया वा यदा भवेत् ॥
जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी ॥'

इत्यग्निपुराणाद*र्धरात्र एव रोहिणीयोगस्य प्राशस्त्यात् *'मुहूर्तमपि लभ्येत' इत्यादीनां चा*र्धरात्र-

---

क्यापत्तिरित्यत्राह—*न त्विति । यद्वर्षे जयन्तीयोगो नास्ति तद्वर्षे जन्माष्टमीव्रतं भवत्येव, ऐक्ये तु जयन्त्यभावे तन्न स्यादिति भावः । अत्रोपक्रान्तजयन्तीव्रतस्य जन्माष्टमीव्रतं भवत्येव पारणालोपभयाभावस्याग्रे स्फुटीकरणादित्यरुचिः । *हेमाद्रिस्त्विति । इत्यूचिवानित्यनेनान्वयः । *अर्धरात्र एवेति । "अर्धरात्रे तु योगोऽयम्" इतिवाक्योक्तस्येत्यादिः । "पूजां तत्र प्रवर्तयेत्" इति तु "दाक्षायणयज्ञेन स्वर्गकामो यजेत" इतिवज्जन्माष्टमीव्रतस्य प्रकारभेदमात्रमिति भावः । ननु—

'प्राजापत्यृक्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्त्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत् ॥'

इतिवचनेऽहोरात्रे तदन्तर्गतयात्किंचिन्मुहूर्त प्रतीयते ।

'मुहूर्त्तमप्यहोरात्रे यस्मिन् युक्तं हि लभ्यते ।
अष्टम्यां रोहिणीमृक्षं तां सुपुण्यामुपावसेत् ॥'

इतिविष्णुरहस्यादिति कथं प्रकारभेद इत्यत्राह—*मुहूर्तमपीति । आदिना "कृष्णाष्टम्यां भवेद्यत्र कलैका" इत्यादिवाक्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगेऽप्युपपत्तेर्न जयन्तीव्रतं भिन्नम्* । तत्त्वं तु हेमाद्रिमतेऽपि जयन्तीव्रतं भिन्नमेव । 'उदये चाष्टमी' इत्यस्य तेन जयन्तीपरत्वोक्तेः । *किञ्च—

'रोहिण्यामर्धरात्रे च यदा कृष्णाष्टमी भवेत् ।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम् ॥'

इति विष्णुधर्मोक्तेः,

'समायोगे तु रोहिण्यां निशीथे राजसत्तम ।
समजायत गोविन्दो बालरूपी चतुर्भुजः ॥
तस्मात्तं पूजयेत्तत्र यथावित्तानुरूपतः॥'

इति वह्निपुराणाच्चार्धरात्रस्य *कर्मकालत्वमवसीयते । अतः 'कर्मणो यस्य यः कालः' इत्यादिवचनात्पूर्वत्रैव प्राप्तेः परदिने सतोऽपि रोहिणीयोगस्य न प्रयोज-

---

कलादिपदग्रहः । *अर्धरात्रेति । मुहूर्तादिपदं निशीथमुहूर्तकलादिपरम् । वस्तुत ऋक्षयोगस्तावकमिदम् । अपिशब्दवशेन स्वार्थे तात्पर्याभावात् । *न जयन्तीव्रतं भिन्नमिति । एतेन श्रावणकृष्णाष्टमीमाश्रित्य जन्माष्टमीजयन्त्योरुक्तेराश्रयाश्रयिभावो व्रतैक्यभ्रमहेतुरिति माधवोक्तं प्रत्युक्तम् । वस्तुतो व्रताभेदादिति सूचितम् । ननु गुणविकृतित्वादस्तु कर्मभेदः, उपवाससाम्येऽपि जयन्त्यां पूजादिरूपाधिकगुणसत्त्वात् द्वादशस्तोत्रकाज्ज्योतिष्टोमादुक्थ्यादावधिकस्तोत्रत्रयवदिति । अतः पृथक् जयन्त्या गुणप्रयोजकत्वं निराकरोति—*किं चेति । *कर्मकालत्वं=पूजादिरूपकर्मकालत्वम् । तत्र चोपवासस्याङ्गत्वान्न गुणविकृतित्वमित्याशयः । ननु "ये न कुर्वन्ति" इत्याद्युक्तेरुपवासः प्रधानं पूजाऽपि । स्वातन्त्र्येण फलसंबन्धात् । न चैवं प्रयोगभेदापत्तिः । चित्रोद्भिदन्निरपेक्षेतिकर्तव्यताया एवान्वयादिति वाच्यम् । तत्तद्वाक्यानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लं फलसंबन्धबोधकत्वं स्वीकृत्य 'श्रावणे बहुले पक्षे' इत्यादि-
लविधिषु कृष्णजन्माष्टम्यादिपदेनोभयोपादानवशादर्शपूर्णमास-
जमूयादिवत् प्रयोगैक्य एव लाघवात्। एवं च

'वासुदेवं समुद्दिश्य सर्वपापोपशान्तये।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम्॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम्।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि॥'

इति संकल्पवाक्ये उपवासपदं पूजोपलक्षणम्। अन्यथोपवासे
देश्यानपेक्षणेन 'वासुदेवं समुद्दिश्य' इत्यस्यानन्वयापत्तेः। न च
वासुदेवपदे तत्प्रीतौ लक्षणया तदन्वयः। जघन्यतयोपवासपदे एव
तया न्याय्यत्वात् "सोपवासो हरेःपूजाम्" इत्यादौ उपवासस्य
पूजोपसर्जनत्वदर्शनाच्च। ततश्चापर्यायप्रकृतिकाख्यातरूपाच्छब्दा-
न्तरादपि कर्मभेदो दुर्वार इति चेन्न। एकपदोपादानस्य "य इष्ट्या
पुना सोमेन" इत्यादिवदप्युपपादयितुं शक्यत्वेनोक्तरीत्या प्रयो-
गविधिभेदो दुरुद्धरः स्यादित्यतः फलिसंस्कार एवोपवासः स्वी-
कार्यः। "मासि भाद्रपदे" इत्यादौ 'शुचिः सम्यगुपोषितः' इति
गुणत्वप्रतीतेः न तु प्रधानम्। पारार्थ्यात्तूपवासवाक्ये फलोल्लेखः
पूर्णतादिवदर्थवादः। संकल्पवाक्ये उपवासस्य कार्यत्वेनोल्लेखश्च
मन्त्रस्य क्रियासंबन्ध्युपवासप्रकाशकत्वेन करणत्वात्। क्रियां
क्रियासंबन्धिनं वा प्रकाशयन्मन्त्रः करणत्वं भजते इति न्यायात्।
उत्तरार्धे चोपवासेनेति उपलक्षणे तृतीया। पूजाकरणत्वासंभवा-
त्। पूजैव नित्या। 'श्रावणे बहुले पक्षे' इति तस्या एव निन्दार्थ-
वादात् तत्र व्रतशब्देन पूजाग्रहणात्। एतेन रूपभेदोऽप्यपाकृतः।
अन्यत्तिशिष्टगुणस्य वाक्यान्तरेऽश्रवणात्। धात्वर्थभेदस्तु न रूप-
भेदः। कर्मभेदकतयाऽऽमिक्षाधिकरणोपन्यासासंगतेः। *न प्रयो-
जकत्वमिति। तथा च कथं स कर्म भेदयेत्। एतेन-निमित्तभेदात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कत्वम्* । अन्यथा बुधवारादेरपि तत्त्वापत्तेः* । *किञ्च जयन्तीशब्दो रात्रिविशेषवचनः ।

'*अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी ।
मुहूर्तो विजयो नाम यत्र जातो जनार्दनः ॥'

इति ब्रह्माण्डपुराणात् । तेन तद्योगिरोहिण्यां *गौणत्वान्न व्रतभेदः । यत्तु 'वासरे वा निशायां वा' इति, तत्कैमुतिकन्यायेन निशीथयोगस्यैव स्तुत्यर्थं पूर्वदिनेऽर्धरात्रयोगाभावे प्राशस्त्यार्थमित्याहुः । अन्ये तु*यद्यपि-

---

कर्मभेदः । जयन्त्या योगनिमित्तकत्वात् जन्माष्टम्या अतथात्वात् । जन्माष्टम्यां तु योगो न निमित्तं जन्मन्यष्टम्या एव प्रधानप्रयोजकत्वात् जन्माष्टमीसमाख्यानात् । न त्वत्र कलामात्रोऽपि रोहिणीयोगो मृग्यः । क्वचित्संभवस्तु बुधवारादिवदप्रयोजकः । जन्मरोहिणीजन्मयोग इत्याद्यसमाख्यानादित्यपास्तम् । जयन्तीव्रतस्यैवालीकत्वात् । *तत्त्वापत्तेरिति । यत्तु बुधवारस्य न रोहिणीतुल्यत्वं 'दिवा वा'इत्यादि हि रोहिणीप्रापकं दृश्यते न तु बुधप्रापकं किंचित् 'किं पुनर्बुधवारेण'इति तु स्पष्टमेव प्राशस्त्यद्योतकमिति, तत्तुच्छम् । वचनान्तरप्राप्तस्यैव तौल्यमित्यस्याप्रयोजकत्वात् । भवदाभिमतस्य नवमीयोगनिर्णायकत्वस्य भङ्गापत्तेः । तथा च सरोहिणीमप्यष्टमीं हित्वा बुधनवमीयुताया एव ग्रहापत्तिरिति भावः । अथ नाम्ना कर्मभेदमाशङ्क्य जयन्तीति न व्रतनामेति ध्वनयन्नाह—*किं चेति । अष्टमीरात्रिरेव जयन्तीपदार्थः । रामाद्यवतारप्रादुर्भावतिथिष्वपि जयन्तीपदप्रयोगादिति न संज्ञाभेदः । अत्र मानमाह—*अभिजिदिति । *गौणत्वात्=गुणवत्तायाः प्राशस्त्यार्थत्वात् । एवं च कृष्णाष्टम्यां भवेदित्यादौ रोहिण्या न नामभेदकत्वमिति भावः । यत्कर्मकालशास्त्रप्राबल्यं तत् रोहिणीयोगाभाव एवेति शङ्कते—*यद्यपीति । " दिवा वा " इति दिनावच्छेदेन रात्र्यवच्छेदेन वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला।
रात्रियुक्तां *प्रकुर्वीत विशेषेणेन्दुसंयुताम्॥'

इत्यनेन रोहिणीयोगाभावेऽर्धरात्रव्याप्तेर्ग्राह्यतोक्ता, यापि यस्मिन्वर्षे जयन्तीयोगो नास्ति तत्र जयन्तीतलोपे प्राप्ते अष्टमीमात्रेऽपि जयन्तीव्रतं कार्यमित्येपरमिदमिति तदाशयः। अत्र हि 'सत्रायागूर्य विवजिता यजेत"

एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं द्विजः।

इतिवद्रोहिणीयोगाभावे विधानात्तत्कार्यापत्तिः स्पष्टैव। अत एवोक्तं-'जयन्ती नाम शर्वरी' इति। यच्च स्कान्दे—

लामात्राऽपि चेद्रोहिणी नास्ति तदा रात्रियुक्तां परामिति यात्। *प्रकुर्वीतेति। दिनद्वये निशीथे अष्टम्यभावे यत्किंचिद्दिने तत्सत्त्वे इन्दुसंयुतामर्धरात्रव्यापिनीं विशेषेण प्रकुर्वीतेत्यर्थः। जयन्तीयोगो माधवाभिमतः। जयन्तीव्रतलोपे प्राप्ते अष्टम्या जयन्तीत्वेऽपि रोहिणीयोगनिबन्धत्वभ्रमेण पूजादिप्रधानलोपप्रसङ्गवारणाय अनेन वचनेन पूजादेरष्टमीनिबन्धनत्वबोधनादिति भावः।

केचित्तु इन्दुः=सोमवारः "सोमेनापि विशेषतः" इत्येकमूलकल्पनालाघवात्। तथा च सोमवारयुक्तां विशेषेणाधिक्येन रात्रियुक्तां प्रकुर्वीतेत्यर्थः। तेन दिनद्वये निशीथास्पर्शे सोमवाराधिकव्याप्तेर्निर्णायकत्वलाभात्कर्मकालशास्त्राबाधेनोपपत्तौ तद्बाधो न कल्प्यते इत्याहुः। परे तु रात्रिपदमधिकरात्रिपरम्। रोहिणीयोगाभावेऽधिकरात्रिव्यापिनी ग्राह्या। तद्योगे तु तद्युक्तनिशीथिगा कार्येत्यर्थ इत्याहुः। अपरे तु रोहिणीयोगाभावेऽधिकनिशीथव्यापिनी ग्राह्या। तद्योगे त्वधिकनिशीथव्यापिनीं विहाय स्वल्पनिशीथिगा ग्राह्येत्याहुः-रात्रियुक्तां प्रकुर्वीतेति। नन्वेवं कर्मकालशास्त्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'उदये चाष्टमी किञ्चिन्नवमी सकला यदि।
भवते बुधसंयुक्ता प्राजापत्यर्क्षसंयुता॥
अपि वर्षशतेनापि लभ्यते वाऽथवा न वा॥' इति।

यच्च पाद्मे—

'प्रेतयोनिगतानां तु प्रेतत्वं नाशितं तु तैः।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा॥'

इति, तद्दानादिविषयम्। उपवासाश्रवणादित्यनन्तभट्टः*, *जयन्तीपरमिति हेमाद्रिः। *उदये=चन्द्रो-

---

बाधं विनाऽगतिप्रसङ्ग इति चेन्न। बाधो ह्यनन्यगतिका गतिः। यावद्बाधं विना न गतिस्तावदेव बाधते इति न्यायात्। अन्यथा व्रीहियवशास्त्रयोरन्योन्यं सार्वत्रिक एव बाधो भवेदित्याहुः।

अन्ये तु विशेषः=आधिक्यं, वैशिष्ट्ये तृतीया तस्येन्दावन्वयः। तथा चाधिकनिशीथगां रात्रियुक्तां प्रकुर्वीतेत्यर्थः। एतेन शब्दतो रोहिणीयोगाभावलाभेऽपि शब्दतो दिनद्वये वैषम्येण निशीथस्पर्शालाभान्नैतद्वाक्यस्य तत्परत्वमिति प्रत्युक्तम्। रात्रियुक्तामिति त्वनुवादः। यच्चानुवादत्वपरिजिहीर्षया विशेषपदस्य रात्रिपदेनान्वयं मत्वा रोहिणीयोगाभावेऽधिकरात्रिव्यापिनी ग्राह्येति सार्थक्यकल्पनं, तन्न। यत्र पूर्वेद्युः सार्धप्रहरोत्तरं प्रवृत्त्या परेद्युर्निशीथान्तमनुवर्तते तत्र पूर्वेद्युरधिकव्याप्तेर्ग्रहणेऽपसिद्धान्तादित्याहुः। *अनन्तभट्ट इति। अनन्तभट्टेनैवंरीत्या समर्थ्यते इत्यर्थः। एवमग्रेऽपि। *जयन्तीति। जयन्ती=रात्रिस्तत्परामित्यर्थः। उदये अष्टमी=उदयमारभ्य प्रवृत्ताऽष्टमी। सकला=निशीथमारभ्य निशीथान्ता। प्राजापत्यृक्षसंयुक्ता=रोहिणीयुक्ता उभयेद्युरपि निशीथेऽष्टमीरोहिणीभ्यां युक्तेति यावत्। सा च किञ्चिन्न-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

य इति केचित् । तन्न । चन्द्रोदयसत्त्वेऽसंदेहान्नवमी*स-
लेत्ययोगान्मानाभावाच्च । तेन पूर्वेद्युः सप्तमीविधे पर
दिने सूर्योदये घटिकाऽपि ग्राह्या । पूर्वविद्धाऽष्टमीति पा-
मोक्तेः । इति युक्तम् । अतो न व्रतभेदो नाप्यन्तर्भा-
इत्यूचिवान् ।

गौडास्तु नवमीक्षयपरमिदं वचनम् 'नवमी सकला
दि' इति विशिष्योक्तेः । *एतत्पूर्वदिने जयन्त्यभाव-

ति परैव जयन्ती । "अपि वर्षशतेनापि" इत्यर्थवादाज्ञस्यादि-
र्थात् । न त्वत्र जयन्तीव्रतं हेमाद्रेर्भिन्नमस्तीति भ्रमः कार्यः ।
उदये इति । "नाशयत्युदये तथा" इति वाक्यान्तरसंवा-
त् । यत्त्वेवं सति नवमी सकलेत्यनन्वयः । निशीथोत्तरनवम्याः
ाकल्यासम्भवादिति, तत्तुच्छम् । न हि षष्टिदण्डव्यापित्वं सा-
ल्यं सूर्योदये कलाकाष्ठादशमीसत्त्वे तद्बाधात् । उदयमार-
भ्यापरोदयपर्यन्ताया एव सकलत्वात् । किं तु एकाहोरात्रे सूर्योद-
ऽष्टम्याः सत्त्वे तदुत्तरकालव्याप्तत्वं साकल्यम् । तच्च चन्द्रोदये
निशीथे अष्टम्यां तदुत्तरनवम्या अप्यक्षतमिति । तथा च दिनद्वये
ाम्येण निशीथस्पर्शे पूर्वाऽधिकनिशीथगाऽपि न जयन्ती रात्रिः,
किं तु रोहिणीसत्त्वे स्वल्पनिशीथगा परैवेति जयन्तीरात्रिनिर्वचन-
स्यार्थः । उदये सूर्योदये इति तु नोक्तम् । किञ्चित्सकलपदयो-
र्व्यर्थापत्तेः । *सकलेति । सूर्योदयान्तरास्पर्शित्वरूपसाक-
ल्येनाष्टमीविद्धाया नवम्याः क्षयलाभादिति भावः ।

*एतादिति ।

'सिंहार्के रोहिणीयुक्ता नराः कृष्णाष्टमी यदि ।
रात्र्यर्धपूर्वापरगा जयन्ती कलयाऽपि च ॥'

इत्यादिवचनादर्धरात्र एव रोहिणीयोगे अष्टमी जयन्तीत्युक्तम् ।
त्र 'जयन्ती शिवरात्रिश्च' इति 'जयन्त्यां पूर्वविद्धायाम्' इत्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमित्याहुः । *जयन्त्यादिसर्वापवादोऽयमित्याचार्य-चूडामण्यादयः । वयं तु*सत्यं व्रतभेदः । लोकास्तु *जन्माष्टमीमेवानुतिष्ठन्ति । *न हि—

'श्रावणे वा नभस्ये वा रोहिणीसहिताष्टमी ।
यदा कृष्णा नरैर्लब्धा सा जयन्तीति कीर्तिता ॥
श्रावणे न भवेद्योगो नभस्ये तु भवेद् ध्रुवम् ॥'

इति माधवीये वसिष्ठसंहितोक्ताऽपि भाद्रे जयन्ती केनापि न क्रियते । (अतः पूर्वेद्युरेवोपवासः) । यद्वा

दिना पूर्वा न त्वष्टम्या एव पूर्वदिने निशीथे सत्त्वे तदुत्तरं च रोहिण्यादियोगे तत्र जयन्त्यभावात् । किं तु तत्र परा नवम्यां सूर्योदयान्तराननुवृत्तिरूपसाकल्यसत्त्वात् । एतन्मते ह्यहर्वेध एव वेधः । या तु न विद्धा नापि जयन्ती सा कर्मकालशास्त्रादेव ग्राह्येति भावः । अत्राष्टम्या यदा कदाचिद्रोहिणीयोगेऽपि जयन्ती-त्वसाधनादरुचिः । *जयन्त्यादीति । 'जयन्त्यां पूर्वविद्धा-याम्' इत्यादिविरोधोऽरुचिः । *सत्यमिति । उपलभ्यमानस्मृत्या-देरसन्निध्यनुपलम्भेऽपि 'कृष्णाष्टम्यां भवेद्यत्र' इत्यादेर्भिन्नवाक्य-त्वमेव प्रकरणान्तरत्वसम्पादकं "स्योनं ते सदनं कृणोमि" इत्यादिवदित्यभिप्रायः । *जन्माष्टमीमेवेति । एवकारो जय-न्तीव्रतव्यावृत्त्यर्थः । तेन जन्माष्टम्या उपवासमात्रेण सिद्धेरभावेन वक्ष्यमाणपूजादि तत्र भवत्येव शिष्टाचारात् । 'शुचिः सम्य-गुपोषितः' 'पूजां तत्र प्रवर्तयेत्' इति वचनाद्वा न त्वेता-वता तत्र जयन्तीसम्बन्धित्वभ्रमः कार्यः । जयन्तीव्रतं तु म-त्स्यादिजयन्तीसाधारण्येनानुष्ठातुरेवेत्यभिप्रायः । अस्तु केवलकृ-ष्णजयन्तीव्रतमपि परं तु तदापि न तदा क्रियते इत्याह-*न हीति । जयन्तीव्रतस्य कदाचिल्लोप इत्येतन्निराकरणाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणात्फलम्। 'सप्तमे ब्रह्मवर्चसकाममुपनयेत्' इतिवदि-
त्ये। तन्न। *नित्यत्वानुपपत्तेः। अत्र गौणमुख्यचा-
भ्यामेक एव *मास इत्यन्ये। तन्न। एकवाक्ये उभ-
निर्देशे *वाशब्दद्वयायोगात्। अतो जयन्तीव्रतस्यापि
त्यत्वादुपवासद्वयं कार्यमिति ब्रूमः। अत एव हेमा-
मदनरत्नादौ जन्माष्टमीव्रतं *जयन्तीव्रतं च भिन्न-
कम्। भिन्नकालत्वात्सर्वथा तावदन्तर्भावो नेति
द्धम्। यद्यपि पूर्वा परा वाल्पाऽपि रोहिणीयुतैव का-
ति ग्रन्थानां तत्त्वं प्रतीयते तदपि जयन्तीपरमेव। इदं
काम्यमेवेत्यनन्तभट्टः। तद्दूषणं हेमाद्रौ ज्ञेयम्। नित्यं
म्यमिति तु बहवः।

ननु यथा विष्णुशृङ्खलयोगेन श्रवणद्वादशी*वाम-
जयन्त्यादिसर्वसिद्धिर्यथा वैकादशी स्वल्पापि परा,
था

'कला काष्ठा मुहूर्ताऽपि यदा कृष्णाष्टमी तिथिः।
नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता न हि॥'

इत्यादिवचनादर्धोदयादिवद्योगाधिक्ये फलाधिक्या-

---

*गुणादिति। यथा नित्योपनये फलविशेषार्थः सप्तमवर्षादिरूपकाल-
विधिः, तथा नित्योपवासे जयन्तीविधिरित्यर्थः। *नित्यत्वेति।
दान्ते केवलकाम्यत्वेन नित्यत्वाभावः, दार्ष्टान्तिके तु जयन्त्य-
सिद्ध्या जन्माष्टम्या आश्रयत्वाभाव इत्यर्थः। *मास इति।
था च भाद्रे जयन्त्यां प्रमाणाभाव इति भावः। *वाशब्देति।
मुच्चयार्थत्वे तु पौनरुक्त्यं स्यात्। 'श्रावणे न भवेत्' इति शेषवि-
धोऽपि द्रष्टव्यः। *जयन्तीव्रतं चेति। हेमाद्रिमते दशज-
न्तीव्रतान्तरमस्तीति तदभिप्रायेण।

*वामनेति। वामनजयन्तीव्रतं प्रकारभेद इत्याशयेन।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्परैव जन्माष्टमी युक्तेति चेत् वार्तमात्थ। न हि तत्र व्रत-भेदो द्वयोर्नित्यत्वं द्वयोरकरणं दोषो वा श्रुतः। इह त्वे-*तैस्त्रिभिर्हेतुभिः *संज्ञाभेदाद्धर्मभेदात्कालभेदाच्चो-पवासभेदः स्पष्ट एव। एकदैवतत्वाच्छ्रवणद्वादशीवन्न पारणालोपदोषोऽपि। *तेन व्रतद्वयमेव युक्तम्। द्वयो-रपि नित्यत्वात्*। केचित्तु—

'त्रेतायां द्वापरे चैव राजन्कृतयुगे तथा।
रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता॥
अतः परं महीपाल संप्राप्ते *तामसे कलौ।

---

*एतैरिति। जन्माष्टमीव्रतं श्रावणमात्रकालकं, योगव्रतं यो-गवशेन श्रावणभाद्रपदान्यतरकालकमिति व्रतभेदः। नित्यत्वं=नि-यतत्वम्। माधवोक्तानन्यानपि हेतूनाह-*संज्ञेति। धर्मभेदा-त्=माधवमते जन्माष्टम्यामुपवासः प्रधानं, जयन्त्यां पूजादि ग्रन्थकृन्मते च तत्र पूजयोरेव भेदः जन्माष्टम्यां पापनाशमात्रं जयन्त्यां तु

'महाजयार्थं कुरुतां जयन्तीं मुक्तयेऽनघ।'

इत्यादिनोक्तफलभेदः। न चैतदुभयत्रापि नित्यकाम्यतया संयोगपृथक्त्वन्यायेन वाच्यं, तच्च न संभवति काम्यत्वे कादाचि-त्कत्वं नित्यत्वे तदभाव इति विरोधादिति वाच्यम्। कामनाप्रयुक्ता-त्तदनुष्ठानात्फलसिद्धिरित्येव कामसंयोगफलमित्याविरोधात्। *ते-नेति। रामादिजयन्त्यां क्वचित्तद्व्रतमुपक्रम्य जन्माष्टमीव्रतोत्तरदि-ने तदाचरणमित्याभिप्रायः। *नित्यत्वात्=अवश्यकर्तव्यत्वात्। *तामसे इति। तथा च जयन्तीव्रतानिषेधाविधिकल्पनं न संभ-वतीत्यर्थः।

"श्रावणे वा नभस्ये वा" इतिवचनं जयन्तीपरमिति प्रपञ्चि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'जन्मना वासुदेवस्य भाविता व्रतमुत्तमम् ॥'

इति हेमाद्रौ वह्निपुराणात् कलौ जन्माष्टमीव्रतमेव जयन्तीव्रतमित्याहुः। तन्न। 'तामसे कलौ' इत्युक्तेः प्रश्रेयोहेतोरस्य कलौ पापिनां दुर्लभत्वमुच्यते। तेन कलौ तामसा न करिष्यन्ति किन्तु धन्यास्त एवेत्यर्थः। तथा

'शूद्राश्च ब्राह्मणाचारा भविष्यन्ति युगे कलौ।'

इत्यादौ विधिकल्पनापत्तेः ॥

इदानीं जन्माष्टमीपरमिति दर्शयति—तत्त्वं त्विति। दिनद्वये हीनीयोगे तु परैवेति स्मर्तव्यम्। इदं च=जयन्तीव्रतं च। प्रथमेत्रेति। शूद्रान्नेनेत्यादिपापक्षयरूपफलश्रवणात्। न च मात्रेण नित्यत्वं वियुनादियागानामपि तत्त्वापत्तेः। तद्दूषमिति। अवश्यापेक्षितफलसाधनत्वं=नित्यत्वम्। तच्च पापक्षयावश्यत्वादक्षतम्। अन्यथा नित्यकर्मणामपि काम्यत्वापत्तेरिति। नित्येति। अकरणे प्रत्यवायजनकत्वं=नित्यत्वम्। तच्च शूद्रान्नेनेत्यादिना दर्शितम्। महाजयार्थमिति स्वतन्त्रफलश्रवणात्काम्यत्वम्। वस्तुतस्तु तत्र—

'एनसो मोक्षकामोऽस्मि यद्गोविन्द त्रियोनिजम्'।

इतिपापक्षयकामश्रवणात्काम्यत्वमेव। कामनोपाधौ चोदितत्वात्, न तु केवलनैमित्तिकत्वं कामनोपाधावविहितानां प्रायश्चित्तादीनामेव तथात्वात्। नापि केवलकाम्यत्वम्। यत्र न निमित्तोपाधौ विधानं तत्र केवलकाम्यत्वमिति हि मीमांसकाः। यथा वियुनादियागेषु। प्रकृते च न तथा।

'प्राजापत्यर्क्षसंयुक्ता श्रावणस्यासिताष्टमी।
वर्षे वर्षे तु कर्तव्या तुष्ट्यर्थं चक्रपाणिनः ॥'

इति नैमित्तिकत्वेन नित्यत्वावेदकवीप्साश्रवणात्, एतच्च जय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र*निशीथवेध एव ग्राह्यः । *पूर्वोक्तवचनेषु तस्यैव मुख्यकालत्वोक्तेः ।

न्तीपरमेव । 'प्राजापत्यृक्ष' इत्युक्तेः ।

नन्वत्राष्टमीविशेषावच्छिन्नजीवनं निमित्तम् ।
वीप्सायुक्तो वसन्तो हि निमित्तत्वेन गम्यते ॥'

इति न्यायात् । तुष्टिश्च फलमिति उद्देश्यद्वयान्वये वाक्यभेद इति चेन्न । चक्रपाणितुष्ट्यर्थं यद्व्रतं वाक्यान्तरविहितं तद्वर्षे वर्षे कार्यमित्यर्थात् । परे तु एवं सति निमित्तस्य विधेयत्वं स्यादतो यथाश्रुतमेव सम्यक् । तथा हि यथा जातेष्टिविधौ जननं निमित्तं पूतत्वादिकं फलमन्वेति तथा प्रकृतेऽपि प्रोक्तमेव निमित्तं फलं च। तत्कस्य हेतोरिति चेत् यत एकरूपमुद्देश्यद्वयं निमित्तरूपं फलरूपं वा एकस्मिन् विधौ नान्वेति एकेनैव नैराकाङ्क्ष्यात् । यस्य पिता पितामह इतिवत्, भिन्नरूपं त्वन्वेत्येव । अस्मिन्निमित्ते अनेनेदं फलं भावयेदिति वचनव्यक्तिसंभवादित्याहुः । निबन्धेषु प्रायशः कृष्णजन्माष्टमीव्रतप्रकरणे एतद्वाक्यस्य दर्शनात्तत्रैव नित्यत्वसाधकत्वं नान्यत्रेत्यरुचिः ।

ननु प्रायश्चित्तादीनां केवलनैमित्तिकत्वम्, एतद्व्रतस्य तु काम्यत्वमिति कथमिति चेत् ।

'एनसो मोक्षकामोऽस्मि यद्गोविन्द ममार्जितम् ।'

इत्यतीतप्रत्ययात्कामनोपाधौ चोदितत्वाच्च व्रतस्य काम्यत्वम् । प्रायश्चित्तस्य तु कामनोपाधावचोदितस्य एनोनिवर्तकतया नैमित्तिकत्वमित्याहुः ।

*निशीथवेध एवेति । एवकारोऽप्यर्थकः । तेन वेध्याया अष्टम्या दिवापि वेधः समुच्चीयते । *पूर्वोक्तेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'*अष्टमी शिवरात्रिश्च ह्यर्धरात्रादधो यदि।
दृश्यते *घटिका या सा पूर्वविद्धा प्रकीर्तिता॥'
इति माधवीये पुराणान्तरात्।
'*अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्।
तस्यामभ्यर्चनं शौरेर्हन्ति पापं त्रिजन्मजम्॥'
इति भविष्योक्तेः।
'अष्टमी रोहिणीयुक्ता निशयर्धे दृश्यते यदि।
मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयम्॥'
इति वसिष्ठसंहितोक्तेश्च॥
तत्राष्टमी द्वेधा। रोहिणीरहिता तद्युता च। आ-

'रोहिणीसंयुतोपोष्या सर्वाघौघविनाशिनी।
अर्धरात्रादधश्चोर्द्धं कलया वा यदा भवेत्॥'
इत्यनेन खण्डतिथौ नवमीयुक्तायां रात्रिपूर्वार्धावसानिककला-
द्वयमनूद्य तत्पश्चार्द्धे तद्विधिवत् सप्तमीयुक्तायां रात्रिपूर्वार्द्धा-
वसाने कलासद्भावो विधीयते तदुत्तरार्धे तस्य सिद्धत्वादिति तत्र
समीपवेशो वेधः। "नक्तादिव्रतयोगेषु" इति सामान्यवाक्याच्च।
तस्यातिदुर्लक्ष्यत्वेऽप्याह—*अष्टमीति। *घटिकेति।
'अर्धरात्रादधश्चोर्ध्वमेकार्धघटिकाऽन्विता।
रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिषु॥'
इति स्मृत्यन्तरे एका चार्धघटिका चेति व्युत्पत्त्या पूर्वोत्तर-
त्रिंशीथांशयोरेकेति घटीद्वयं मुख्यतमः काल इति माधवेनोक्तेः।
'त्रिकालं पूजयेद्देवं दिवारात्रौ विशेषतः।
अर्धरात्रावपि तथा पुष्पैर्नानाविधैरपि॥'
इति भविष्योक्तेः। कालान्तरस्यापि मुख्यत्वमित्यत्राह—
*अर्धरात्रे त्विति। मुख्यकालः=मुख्यस्य पूजादिप्रधानस्य
कालः, अङ्गकालानुरोधेन तु न वेधो युक्त इति भावः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्याऽपि चतुर्धा । *पूर्वेद्युरेव निशीथयोगिनी परेद्युरेवोभयेद्युरनुभयेद्युश्चेति । तत्राद्ययोरसन्देह एव कर्मकालव्याप्तेः ।

'जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च ।
*पूर्वविद्धैव कर्तव्या तिथिभान्ते च पारणम् ॥'

इति भृगूक्तेश्च । *अस्मात्केवलरोहिण्युपवासोऽपि सिद्धः । अन्त्ययोः परैव । प्रातःसङ्कल्पकालव्याप्तेराधिक्यात्* ।

'*वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी ।'

इति ब्रह्मवैवर्ताच्च । एवमंशतः समव्याप्तावपि ।

विषमव्याप्तौ त्वाधिक्येन*निर्णयः ।

रोहिणीयुतापि चतुर्धा । *पूर्वेद्युरेव निशीथे रोहि-

---

*पूर्वेद्युरेवेति । इयं शुद्धा विद्धा चेति द्वेधा । परं तु तत्र न विशेषः । परेद्युः कर्मकालेऽसत्त्वात् ।

*पूर्वविद्धैवेति । दिनवेध एव, न रात्रिवेधे । केचित्तु रोहिणीपदं जयन्तीपरं जन्माष्टमीरोहिणीभ्यां जयन्तीलाभो वेत्याहुः । तत्र द्वितीयपक्षे केवलाष्टमीपरत्वं नास्तीति तन्निरस्यति-*अस्मादिति । 'ऋते वै रोहिणीव्रतात्' इत्यादेरुपलक्षणम् । *आधिक्यादिति । आद्ये विशेषेणेन्दुसंयुतामिति मुख्यकालव्याप्तेः । अन्त्ये 'रात्रियुक्तां प्रकुर्वीत' इति गौणकालव्याप्तेः । *वर्जनीयेति ।

'विना ऋक्षं न कर्तव्या सप्तमीसंयुताऽष्टमी ।'

इति वचनमपि द्रष्टव्यम् । *आधिक्येन=निशीथेऽष्टम्या अधिकव्याप्त्या ।

*पूर्वेद्युरेवेति । इयं च विना निशीथं प्रवृत्तया सप्तम्या विद्धाधिका शुद्धाधिका चेति द्वेधा, न तु विद्धानधिका शुद्धानधि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ुता परेद्युरेवोभयेद्युरनुभयेद्युश्च । अत्राप्याद्ययो*र-
देहः ।

'कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी ।'

ति पाद्मोक्तेः

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ।'

ति गारुडाच्च ।

'*सप्तमीसंयुताष्टम्यां निशीथे* रोहिणी यदि ।
भविता साष्टमी पुण्या यावच्चन्द्रदिवाकरौ ॥'

ति वह्निपुराणाच्च । द्वितीयेऽसन्देह एव । तृतीय-
ा परैव ।

ा परेद्युरष्टम्यभावेनासन्देहात् । *आद्ययोरिति । योग-
ा एव ग्राह्यत्वात् ।

'प्राजापत्यृक्षसंयुक्ता कृष्णा नभसि चाष्टमी ।
मुहूर्तमपि लभ्येत सैवोपोष्या महाफला ॥'

ते वाक्यात् । अत्र वर्जनीया प्रयत्नेनेति निषेधात् प्रतिप्र-
ाह—*सप्तमीति । *निशीथे इति । एतेन दिनद्वये रो-
ीयोगे यदि पूर्वेद्युर्निशीथे रोहिणी तदा पूर्वैवेति ध्वनितम् ।
ये तु—

'अविद्धायां तु सर्क्षायां जातो देवकि नन्दन ।'

ति बोध्यम् । तत्र जन्मश्रवणादर्धरात्रे ऋक्षसाहित्यप्रत्ययात् ।
र्जनीयेति । इदं च परदिने निशीथे रोहिणीसत्त्वे एव ।
था—

'जयन्ती शिवरात्रिश्च कार्ये भद्राजयान्विते ।
कृत्वोपवासं तिथ्यन्ते तदा कुर्याच्च पारणम् ॥'

ते विष्णुधर्मविरोधात् ।

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'*वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी।
सऋक्षापि न कर्तव्या सप्तमीसंयुताष्टमी ॥'

इति ब्रह्मवैवर्तात् । चतुर्थ्यपि त्रेधा । पूर्वेद्युर्निशीथेऽष्टमी परेऽह्नि रोहिणी, परेऽह्न्यष्टमी पूर्वेऽह्नि रोहिणी उभयेद्युरुभयस्य निशीथासम्बन्धो वेति । आद्ये *परेद्युर्जयन्तीयोगस्य सत्त्वात्परैवेति माधवः । तदुक्तं तेनैव-

'यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा ।
अन्तर्भूता जयन्त्यां स्याद्दक्षयोगप्रशस्तितः ॥'इति ।

'*पूर्वविद्धाऽष्टमी या तु उदये नवमीदिने ।
मुहूर्तमपि*संयुक्ता सम्पूर्णा साष्टमी भवेत् ॥
कला काष्ठा मुहूर्ताऽपि यदा कृष्णाष्टमी तिथिः
नवम्यां सैव ग्राह्या स्यात्सप्तमीसंयुता नहि ॥'

इति पाद्मोक्तेश्च । *केचित्तु हेमाद्रौ—'अष्टम्याः प्राधान्यात्तस्याश्च पूर्वेद्युः *कर्मकालव्यापित्वात्पूर्वैव । पाद्मे तु पूर्वेह्नि निशीथेऽष्टम्यभावे ज्ञेयम् । अन्तर्भावोक्तिस्तु मूर्ख*दन्भ्रणामात्रम्' इति आहुः । *अन्ये तु 'पूर्वविद्धाष्टमी' इति वाक्येन जन्माष्टम्यां*सूर्योदये सप्तमीवेधानिषेधात्कलाघटीमात्राप्यौदयिकी ग्राह्या । 'कार्या

तिथ्यन्ते चोत्सवान्ते च व्रती कुर्वीत पारणम् ॥'

इति गारुडादिविरोधात् । माधवाचार्य मतं दर्शयति—*परेद्युरिति । परेद्युरष्टम्या अल्पत्वात्कथं ग्राह्यत्वमित्यत्राह—*पूर्वविद्धेति । *संयुक्ता=रोहिण्या । माधवमतस्य प्राग्दूषितत्वादाह—*केचित्त्विति । *कर्मेति । अबाधेनोपपत्तौ कर्मकालशास्त्रबाधस्यान्याय्यत्वादिति भावः । *दन्भ्रणा=प्रतारणा । माधवहेमाद्र्युभयविरुद्धं मतमाह—*अन्ये त्विति । *सूर्योदये इति । काकाक्षिगोलकन्यायेनोदयान्वय इत्यभिमानः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽपि सप्तम्या' इति जयन्तीपरम्।

'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत्।'

कवाक्यत्वात्। तत्रापि द्वयोर्नित्यत्वात्कालभे-
पवासद्वयं* भवत्येव। यदा तु केवलाष्टमी शुद्धा-
तदा त्यागहेतोः सप्तमीवेधस्याभावात्पूर्वैव।
वा विद्धन्यूना तदा परदिने ग्राह्यतिथेरभावात्पूर्वै-
एवं सर्वाण्यौदयिकवाक्यानि सप्तमीवेधपराणि।
—

'जन्माष्टमीं पूर्वविद्धां सऋक्षां सकलामपि।
विहाय नवमीं शुद्धामुपोष्य व्रतमाचरेत्॥'

ति व्यासोक्तेर्विद्धायाः क्षये शुद्धनवम्यामुपवासः।
मीवेधे द्वादश्युपवासवदित्याहुः, ते निर्मूलत्वादुपे-
। 'मुहूर्तमपि संयुता' इति रोहिणीयोगे *त्याज्य-
कः *तिथ्यन्तपारणवाक्यानां निर्विषयत्वापत्तेः।
च जयन्तीपराणि शुद्धाधिकापराणि वा तानि।

पवासद्वयम्=पूर्वेद्युर्जयन्तीप्रयुक्तमुत्तरेद्युर्जन्माष्टमीप्रयुक्तम्।
यिकवाक्यानि='उदये चाष्टमी किंचित्' इत्यादीनि रो-
यीयोगे इति संयुक्तत्वं च नाष्टम्याः, दिनद्वये रोहिणीराहित्ये
सङ्गात्, किन्तु रोहिण्या एव अष्टम्यास्तथात्वं त्वार्थिकं
विद्धाष्टमीत्युक्त्या तल्लाभात्। तथा च तत्कथमष्टम्याः कर्मका-
साधयेदिति भावः। *त्याज्यत्वेति। दिनद्वये जयन्ती-
तेन जयन्तीप्रयुक्तोपवासे पूर्वदिने त्याज्यत्वं बोध्यते, न
ग्राह्यत्वम्। यत्र पूर्वेद्युरेव जयन्ती तत्र 'जयन्त्यां पूर्वविद्धाया-
इत्यस्य सावकाशत्वादिति भावः। सप्तमीपदस्याष्टमीसंयुक्तार्थत्वे
कूलमप्याह—*तिथ्यन्तेति। आङ्गस्येनैव तिथ्यन्तलाभात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भृग्वाद्यैः *पूर्वविद्धाष्टम्यामपि तिथ्यन्ते पारणोक्तेः। *तेन 'कला काष्ठा' इति *वाक्यान्तरवशाज्जयन्तीपरमेतत्*

*तत्त्वं तु अष्टम्याः कर्मकालव्याप्तेः

'दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला।
रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम्॥'

इति पूर्वोक्तवाक्यैः रोहिणीयोगाभावे*ग्राह्यत्वोक्तेर्वचनात्कर्मकालव्यापिनीं त्यक्त्वा पूर्वा परा वाऽल्पापि रोहिणीयुता ग्राह्या। माधवमदनरत्ननिर्णयामृतानन्तभट्टगौडमैथिलग्रन्थादिष्वप्येवमिति। *युक्तं तु उपवासद्वयं कार्यं द्वयोर्नित्यत्वादिति तु वयम्। अन्त्ययोपरैव।

'सप्तमीसंयुताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम।

---

*पूर्वविद्धाष्टम्यां=पूर्वविद्धाष्टम्युपवासे। *तेन=जयन्तीव्रतपार्थक्यस्थापनेन। *वाक्यान्तरवशात्=तादृशोत्तरवाक्यवशात् *एतत्=पाद्मवाक्यम्। तत्र 'सप्तमीसंयुता न हि'इति दर्शनात्। पारिशेष्याज्जयन्त्युपवासे पूर्वदिनहेयत्वबोधनात्। दूषणान्तरमाह—*तत्त्वं त्विति। *ग्राह्यत्वोक्तेरिति। तेन उदयः कर्मकाल इति न सिद्ध्यतीत्याशयः। अत्रैवान्तर्भावो न श्रद्धेय इति स्मारयति—*युक्तं त्विति। यद्वा—उक्तस्थलेऽन्तर्भावं निरसितुं पूर्वैवेति निर्धारितम्, इदानीं प्राचीनबहुग्रन्थमतमाह—*तत्त्वं त्विति। त्यक्त्वा परेति अन्वयः। तत्र पूर्वेति दृष्टान्तः अथवा यत्र पूर्वा रोहिणीयुतो परदिने च रोहिणी नास्ति निशीथोत्तराष्टमिका तत्परं पूर्वापदम्। अत्र दिवावेत्यनेन केवलाष्टमी प्रतिपादिता तां रात्रियुक्तां निशीथव्यापिनीं प्रकुर्वीत एवमेव समव्याप्तौ वचनान्तरानुग्रहात्परेति सिद्धौ विषमव्याप्तौ विशेषेणेत्यादिनाऽधिकनिशीथव्यापिनी पूर्वा परा वा इति कर्मकाल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राजापत्यं द्वितीयेऽह्नि *मुहूर्तार्धं भवेद्यदि ।
तदाष्टयामिकं पुण्यं प्रोक्तं व्यासादिभिः पुरा ॥'
ति स्कान्दात् ।
'मुहूर्तेनापि*संयुक्ता संपूर्णा साऽष्टमी भवेत् ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥'
ति पाद्माच्चेति दिक् । निम्बादित्योपासकास्तु जन्मा-
रामनवमीशिवरात्र्यादौ पूर्वेऽह्नि कर्मकालीनां तिथिं
क्त्वा *द्वित्रिमुहूर्ता परैव तिथिर्ग्राह्या ।
'उदयव्यापिनी ग्राह्या कुले तिथिरुपोषणे ।
निम्बार्को भगवान्येषां वाञ्छितार्थफलप्रदः ॥'
ति (१)हेमाद्रौ मात्स्योक्तमुक्तिसप्तमीव्रते भवि-
क्तेरित्याहुः । तन्न ।
'यदि द्वितीये दिवसे तु ऋक्ष
तिथ्योर्युतिः स्यान्न तदोपवासः ।
पूर्वे प्रकुर्याद्दिवसे द्वितीये ।
दिनेशभक्तोऽथ तदा व्रताद्यम् ॥'
ति मात्स्यवाक्येन तत्रैव उपसंहारात्सर्वार्थत्वेन
नाभावात् । ऋक्षतिथ्योः=हस्तसप्तम्योः । अन्यथा

बाधेनोपपत्तेर्न तद्बाधो युक्तः । एवं च यत्र पूर्वेऽह्नि निशीथे
मी तत्रापि पूर्वैव युक्ता न परेत्यरुचिः । *मुहूर्तार्धमिति ।
वाचानिकं संपूर्णत्वमित्याशयः । *संयुक्ता=रोहिण्या ।
र्थस्तु योगस्त्रिविध उक्तः । तेन शुद्धाधिकाऽपि त्रिविधा रो-
ण्याः साम्येन, निशीथात् प्रागारभ्य प्रवृत्त्या, तदुत्तरं प्रवृत्त्या
। तत्र सर्वत्रापि पूर्वैव । आद्ययोर्निशीथे जयन्तीयोगात् अन्त्ये
नीभूताष्टम्याः कर्मकालव्यापित्वादिति । *द्वित्रीति । उदेते

---

(१) 'हेमाद्रौ' इत्यादर्शपुस्तके नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋषिपञ्चम्यादौ तदापत्तिः। *शिष्टाचारान्नेति चेत्, न। *तस्य न्यायवचोविरोधेन हेयत्वात्। *इदानीं क्वापि निम्बार्कोपासनाभावाच्चेति संक्षेपः॥

*पारणं तु—

'तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणम्।
तस्मात्प्रयत्नतः कुर्यात्तिथिभान्ते च पारणम्॥'

दैवतं भानावित्येकवाक्यतयेति केचित्। उदयव्यापिनीत्येव दर्शनात्तदविवक्षितार्थमिति परे। *शिष्टेति। जन्माष्टम्यादौ तु तदाचारोऽस्तीति भावः। *तस्य=जन्माष्टम्यादौ तदाचारस्य। तुष्यत्विति न्यायेन तदेकवाक्यतामुपेत्याप्याह-*इदानीमिति। तद्वंश्यानां तदनुपासकानां तदनाचार एव युक्त इत्याशयः। अत्र

'सर्वेष्वेवोपवासेषु पूर्वाह्णे पारणं भवेत्।
अन्यथा तु फलस्यार्धं धर्ममेवोपसर्पति॥'

इति देवलेन पारणं स्मर्यते। तच्चोपवासे व्रतसामान्ये वाऽङ्गम्। पारणान्तव्रतं ज्ञेयमित्यत्र हि व्रतशब्दस्योपवास एव नियम एव वाऽर्थः।

'तिथीनामेव सर्वासामुपवासव्रतादिषु।
तिथ्यन्ते पारणं कुर्याद्विना शिवचतुर्दशीम्॥'

इत्यत्राऽऽदिशब्देनैकभक्तनक्तयोरपि ग्रहात्। यस्यां तिथावेतानि कृतानि परेद्युस्तत्तिथ्यन्ते भोजनस्य पारणत्वात्। न चैवं तथाविधकर्मसमाप्तिलक्षणपारणस्य 'भोक्ष्येऽहम्'इत्यादिलिङ्गादभोजननियमात्मकोपवाससमाप्तेश्च भोजनेनैव भावाद्भोजनरूपत्वे च रागप्राप्ततदनुवादेन पूर्वाह्णे विधीयतां किमङ्गत्वेनेति वाच्यम्। उद्यापनादिवच्छास्त्रीयकर्मसमाप्तेः शास्त्रीयत्वावश्यंभावात्। भोजननियमाङ्गीकारे उपवासादौ अद्भिस्तु पारणं कुर्यादित्यादिप्रतिनिधिविध्यनुपपत्तेश्चेति। तत्कालं निरूपयति—*पारणं त्विति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति ब्रह्मवैवर्तात्,

'*तिथ्यृक्षयोर्यदा छेदो*नक्षत्रान्तम*थापि वा।

थिभान्ते चेति तिथेर्भस्यान्तो यस्मिन्निति व्युत्पत्त्या बृहद्रथन्तर-
त्यादिवत्तिथिभयोर्विनैवेतरेतरयोगद्वन्द्वं तिथ्युपवासे तिथ्यन्तः
त्रोपवासे नक्षत्रान्तश्च लभ्यत इति जन्माष्टम्युपवासे केवल-
ष्ण्युपवासे च स्वस्वान्तसिद्धिः। दर्शितं च जन्माष्टमी रोहिणी
ते स्वतन्त्रं भार्गवम्। एतेन

'तिथिनक्षत्रनियमे तिथिभान्ते च पारणम्।
अतोऽन्यथा पारणायां व्रतभङ्गमवाप्नुयात्॥'

ति व्याख्यानात्।

'पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना।
उपोष्य विधिवत् कुर्यात्तत्तदन्ते च पारणम्॥'

ति तिथीनामेव सर्वासामित्याद्यसमासनिर्देशाच्च तावतैव
रोहिण्यष्टम्युपवासे उभयानुवृत्तावुभयान्त एव लभ्यते। जयन्ती
रात्रिश्चेति जयन्तीपदं च जन्माष्टमीपरम्। तथैव तिथ्यन्त-
णसंपत्तेः। एतेन जन्माष्टमीव्रतमात्रानुष्ठातॄणां परेद्युरष्टमीमध्ये
त्रान्तपारणं चिन्त्यम्। ननु यत्रार्धरात्र एवोभयान्तः तत्र
यं पारणम्? भोजननिषेधात्।

'अन्यातिथ्यागमो रात्रौ तामसस्तैजसो दिवा।
तामसे पारणं कुर्वंस्तामसीं गतिमश्नुते॥'

ति दोषश्रवणाच्चेत्यत्राह-*तिथ्यृक्षयोरिति। *नक्षत्रान्तम्=
थ्यृक्षयोरेकतरान्तम्।

'रोहिणीसहिता चेयं विद्वद्भिः समुपोषिता।
वियोगे पारणं चक्रुर्मुनयो ब्रह्मवादिनः॥'

त्युक्तेः।

'सांयोगिके व्रते प्राप्ते यद्येकोऽपि वियुज्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्धरात्रेऽथवा कुर्यात्पारणं त्वपरेऽहनि ॥'

इति हेमाद्रौ वचनाच्चार्धरात्रेऽप्युभयान्तेऽन्यतरान्ते वेति मुख्यः पक्षः ।

'सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।'

इति ब्रह्मवैवर्तं त्वन्यविषयम् । दिने*मुख्यकालालाभेऽन्यतरान्ते वा ज्ञेयम् । *गौडास्तु—

'न रात्रौ पारणं कुर्याद्दृते वै रोहिणीव्रतात्* ।
तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानिशाम् ॥'

इति ब्रह्माण्डपुराणाद्रात्रौ सार्धप्रहरमध्ये कार्यम् ।

'महानिशा तु विज्ञेया मध्यमं मध्ययामयोः ।'

तथा—

'मध्यमप्रहरे रात्रेर्विज्ञेया तु महानिशा ।'

इति स्मृत्यन्तरात् । कल्पतरौ मदनरत्ने चैवम् । कामधेनौ गर्गस्तु—

'महानिशा तु विज्ञेया मध्यमं प्रहरद्वयम् ।'

इत्याह । वृद्धशातातपस्तु—

तत्रैव पारणं कुर्यादिति वेदविदो विदुः ॥'

इति सामान्यत उक्तेश्च । *अथेति । प्रतिपदाद्युपवासेत्यर्थः । अन्यतिथ्यागम इत्यपि द्रष्टव्यम् । *मुख्येति । उक्तदिवापारणविधिरात्रिनिषेधयोरेकवाक्यतया दिवान्यतरान्तलाभे तत्रैव अनुकल्पत्वेनानुज्ञातस्य मुख्यतयैवोपादानात् न तूभयान्तप्रतीक्षया रात्रावपीति मदनरत्नादयः । एवमेव दिवान्यतरान्तस्यालाभे महानिशातः प्राक्तल्लाभे तत्रैव, इतरथा महानिशायामपीति द्रष्टव्यम् । तिथ्यृक्षयोरित्यस्य—

'अर्धरात्रे ततः कुर्यात्पारणं त्वपरेऽहनि ।'

इत्युत्तरार्धं वदतां मतमाह—*गौडास्त्विति । *रोहिणी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'महानिशा द्वे घटिके रात्रौ मध्यमयामयोः।'
याह। वेदपाठपरमे*तदित्यन्ये। *महानिशाया-
यतरान्ते तृतीयदिने पारणम्। 'अपरेऽहनि' इति पा-
त्तरदिनपरत्वात् उभयान्तापेक्षणादित्याहुः। *तत्त्वं
महानिशातोऽर्वागन्यतरान्तलाभे महानिशानिषेधः
निशायामेव लाभे*तत्रैव पारणमिति।
दिवोदासस्तु—
'रजनीप्रहरं यावत्प्रवृत्तिः कर्मणो मता।
पारणं तावदेवेष्टं प्रमादान्न भवेद्यदि॥'
ति स्कान्दादूर्ध्वं निषेधमाह। तन्निर्मूलम्।
अशक्तौ तु वह्निपुराणे—
'भान्ते कुर्यात्तिथेर्वापि शस्तं भारत पारणम्।' इति।
गारुडे विष्णुधर्मे च—
'जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत्।
तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणम्॥'

तादिति। तद्युक्ताष्टमीव्रतादित्यर्थः। *एतादिति। सुबुद्धिदुर्बुद्धि-
देन वाक्यद्वयमित्यर्थः। स्वापादिपरमस्तु, प्रकृते तु नैतद्द्वयं प्रवर्तते।
'भुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा।'
इत्यादिवदिति भावः। *महानिशायामिति। वर्जयि-
त्वा महानिशामिति तत्र भोजननिषेधात्। अत्र तादृशपाठ-
कल्पने वर्जयित्वा महानिशामित्येतदेव बीजम्। अर्धरात्रेऽथ-
ति पाठे विरोधात्। तच्चायुक्तं तृतीयदिनपारणेऽनौ-
त्यात्। महानिशातोऽव्यवहितप्राक्क्षणे सन्देहतादवस्थ्याच्च महा-
निशोत्तरमन्यतरान्ते तत्रैव पारणं तदुत्तरनिषेधस्य रागप्राप्त-
चिरत्वेन वैधेऽप्रवृत्तेः, महानिशायां तु परेद्युरित्यनौचित्याच्चे-
रुचिः। स्वयं विरोधं परिहरति—*तत्त्वं त्विति। *तत्रैवेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्धरात्रेऽथवेत्युक्तेः । तथा च न द्वयोर्विरोध इति भावः । न रात्रौ पारणं कुर्यादिति निर्मूलमेव । दाक्षिणात्यनिबन्धे ऽदर्शनात् । अस्तु वा समूलं, तथापि तिथ्यृक्षयोरिति वाक्यार्थो न तद्विरुद्धः ।

'आततायिनमायान्तमपि वेदान्तगं रणे ।'

इत्यादावपिशब्दवत् । अथवापदस्यापि स्वार्थत्यागेनान्यार्थतात्पर्यावगमात् । व्रतनिषिद्धरात्रिपारणप्रतिप्रसवार्थत्वेनार्धरात्रेऽपि पारणं सुकरं किमुत ततः प्रागरात्राविति व्याख्येयम् । यदि तु रोहिणीव्रतं नक्षत्रमात्रव्रतं तदाऽपि रात्रौ मुख्यगौणपक्षाश्रयेण पारणं कैमुतिकन्यायव्याख्यानात् । महानिशातः प्रागन्यतरान्तालाभे तु रात्रिपारणनिषेधातिक्रमस्य निर्बीजत्वात् 'तिथ्यन्ते चोत्सवान्ते च'इति वाक्याज्जागरान्ते दिवैवेति न द्वयोर्विरोध इति तु केचित् । वस्तुतस्तु रात्रिपारणनिषेधवाक्याविरोधेनैव व्याख्यानं सम्भवति । अर्धरात्रे यदा तिथ्यृक्षयोश्छेदस्तदाऽपरेऽहनि पारणमिति ह्यन्वयः । अर्धरात्रेऽपरेऽहनीति तु नान्वयः । एकं पदमेकत्रान्वितं विना बलवदनुपपत्तिमन्यत्र नान्वेतीति न्यायात् । "एकैकमन्यांश्चमसांश्चमसिनो भक्षयेति अथैतस्य हारियोजनस्य सर्वे एव लिप्सन्ते" इत्यत्र चमसिपदस्य हारियोजनान्वयवारणाय तन्न्यायस्य तृतीये व्युत्पादितत्वात् । तत्र निश्यपीत्यपिश्च स्वार्थत्यागेनान्यार्थपरत्वात्कैमुतिकन्यायाद् दिवैव पारणार्थः । वस्तुतो रोहिणीनक्षत्रमात्रव्रत एव तेन रात्रिपारणा बोध्यते ।

'सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते ।

अन्यथा पुण्यहानिः स्याद्दते धात्रृक्षपारणात् ॥'

इति वचनात् । धारणपारणमिति पाठ आहारं विना शरीरस्य धारणम्=उपवासः, तदुत्तरादिने चतुर्थकालभोजनविधिना विहितं भोजनं=पारणम् । व्रतविशेष इत्यर्थ इति तु केचित् । ग्रन्थस्त्वित्थं योज्यः—परदिने अष्टम्यादिमध्ये पारणाप्राप्तौ 'अतोऽन्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तौ तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ॥'

एवोत्सवान्तः—

*'तिथ्यन्ते वो*त्सवान्ते वा व्रती कुर्वीत पारणम् ।'

ति कालादर्शोक्तिश्चेति सङ्क्षेपः ॥

ष्टम्यां विशेषो हेमाद्रौ भविष्ये—

'*ततोऽष्टम्यां तिलैः स्नातो नद्यादौ विमले जले ।

पारणायाम्' इत्यादिदर्शनादन्तापेक्षायामुभयान्तो मुख्यः ।
रष्टगुणमिति वचनात् । अन्यतरान्तस्तु गौणः । 'भान्ते कुर्या-
र्वापि' इति वचनात् अथ वा यदि वोभयान्तोऽन्यतरान्तो वा
। तदाऽप्यपरेऽहन्येव दिवैव तिथ्यृक्षयोरिति वचनात् । तत्रार्ध
शब्दस्य रात्र्यर्थकत्वात् । तवापि यत्रार्धरात्रात्प्रागुभयान्त-
र्धरात्रवारणाय तथैव व्याख्येयत्वात् । सर्वेष्विति प्रतीक-
ण तेनान्यविषयमित्यस्य दर्शितश्लोकान्तर्गतम् 'ऋते धातृक्ष-
णम्' इत्येतन्नैतदुपवास विषयं किन्तु केवलरोहिण्युपवास-
यमित्यर्थः । मुख्येति यत्रान्यतरान्ते गौणकाले दिवा उभयान्तो
यकालस्तु रात्रौ तत्रान्यतरान्ते गौणकाले एकवाक्यताद्वारा
ल्यत्वप्रत्ययार्थमित्यर्थः । तत्त्वं त्वित्यादि तु मतान्तरमिति
तिथ्यन्ते=अन्यतरान्ते । *उत्सवान्ते=जागरान्ते । एकतरा-
मेऽपि शेषविरोधापत्तिवारणाय । एतदेव

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ॥'

ति गीयते माधवाचार्यैः । उत्सवान्तस्यैव प्रातस्त्वात् या-
मेत्यशक्तेर्विवरणाच्च । एतन्निर्मूलमेवेति तु विवेचने ।
मत इति पूर्वेद्युर्नियमाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुदेशे शोभनं कुर्याद्देवक्याः *सूतिकागृहम् ॥
तन्मध्ये*प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता ।

'सप्तम्यां लघुभुक्कुर्याद्दन्तधावनपूर्वकम् ।
उपवासस्य नियमं रात्रौ कृत्वा जितेन्द्रियः ॥'

इत्यादयः । परेद्युः कृतनित्यक्रियः

'सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपाः ।
पवनो दिक्पतिर्भूमिराकाशं खचरा नगाः ॥
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम् ॥'

इति पठेत् । एतदेव सूर्यादिदेवताभ्यो व्रतनिवेदनं गीयते । तत आचम्य प्राणानायम्य प्राङ्मुख उदङ्मुखो वा दर्भपाणिः फलपुष्पाक्षतं वारिपूर्णं ताम्रपात्रमादाय मासाद्युल्लिख्य श्रीकृष्णप्रीतये पापक्षयार्थं वा जन्माष्टमीव्रतमहं करिष्ये इति सङ्कल्पयेत् । सङ्कल्पेऽधिकरणतिथेरुल्लेखः । ततः श्लोकचतुष्टयं पठेत् —

'वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये ।
उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहम् ॥
अद्य कृष्णाष्टमीं देवीं नभश्चन्द्रसरोहिणीम् ।
अर्चयित्वोपवासेन भोक्ष्येऽहमपरेऽहनि ॥
एनसो मोक्षकामोऽस्मि यद्गोविन्दत्रियोनिजम् ।
तन्मे मुञ्चतु मां त्राहि पतितं शोकसागरे ॥
आजन्म मरणं यावद् यन्मया दुष्कृतं कृतम् ।
तत्प्रणाशय गोविन्द प्रसीद परमेश्वर ॥' इति ।

ततः पात्रस्थं जलं क्षिपेत् । तत आह—*ततोऽष्टम्यामिति । तिलस्नानं मध्यान्हे प्रातःस्नानस्य वृत्तत्वात् । *सूतिकागृहम्=षष्ठ्या देव्या अधिष्ठितं गृहम् । *प्रतिमेति । प्रतिमायामग्न्युत्तारणसंस्कारं कुर्यात् । स च ऋग्वेदे—'अग्निः सप्तिं वाजम्भरं ददाति' इति सूक्तमग्निपदहीनं पठित्वा अग्निपदसहितं पठन् स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काञ्चनी राजती ताम्री पैत्तली मृन्मयी तथा ॥
वार्क्षी मणिमयी चैव वर्णकैर्लिखिताऽथवा ।
सर्वलक्षणसंपूर्णा पर्यङ्के च पटावृते ॥
देवकीं तत्र चैकस्मिन्प्रदेशे सूतिकागृहे ।

तां जलधारां पातयेदिति । प्रतिमापूजनं चाकृतप्राणप्रतिष्ठाया-
स्याः प्राणप्रतिष्ठां कृत्वा कार्यम् ।
'प्रतिमायाः कपोलौ द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्वीत तस्यां देवस्य वा हरेः ॥
अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ।
यथापूर्वं तथा भावः स्वर्णादीनां न देवता ॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ।
प्राणप्रतिष्ठा कर्त्तव्या तस्यां देवत्वसिद्धये ॥
वासुदेवस्य बीजेन तद्विष्णोरित्यनेन च ।
तथैव हृदयेऽङ्गुष्ठं दत्त्वा शश्वच्च मन्त्रवित् ॥
एभिर्मन्त्रैः प्रतिष्ठां तु हृदयेऽपि समाचरेत् ।
अस्मै प्राणाः प्रतिष्ठन्तु अस्मै प्राणाः क्षरन्तु च ॥
अस्मै देवत्वसङ्घाय स्वाहेति यजुरीरयेत् ।
अङ्गमन्त्रैरङ्गिमन्त्रैर्वैदिकैरित्यनेन च ॥
प्राणप्रतिष्ठां सर्वत्र प्रतिमासु समाचरेत् ।'
बीजेन=मूलमन्त्रेण ।
'प्रणवादिनमोऽन्तं च चतुर्थ्यन्तं च सत्तम ।
देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्तितः ॥'
इति तल्लक्षणम् । यदा स्वहृदये पूजा क्रियते तदा हृदयेऽङ्गुष्ठं द-
त्वा मन्त्राः पठनीयाः । प्रतिमायां तु कपोलौ स्पृष्ट्वेति विशेषः ।
अत्र श्रीकृष्णमभिप्रेत्य देवक्यादिप्रतिमासु अग्न्युत्तारणान्तरं
तन्मूलमन्त्रान् वैदिकमन्त्रांश्च पठेत् । अस्मैइत्यस्य स्थाने चतु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*प्रसुतां च प्रसूतां च स्थापयेन्मञ्चकोपरि ॥
*मां तत्र बालकं सुप्तं पर्यङ्के स्तनपायिनम् ।
यशोदां तत्र चैकस्मिन्प्रदेशे सूतिकागृहे ॥
तद्वच्च कल्पयेत्पार्थ प्रसूतवरकन्यकाम् ।
कश्यपो वसुदेवोऽयमदितिश्चैव देवकी ॥
शेषो वै बलभद्रोऽयं यशोदा क्षितिरन्वभूत् ।
नन्दः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः ॥
*गौर्धेनुः कुञ्जरश्चैव दानवाः शस्त्रपाणयः ।
लेखनीयाश्च तत्रैव कालियो यमुनाह्रदे ॥
*इत्येवमादि यत्किंचिच्छक्यते चरितं मम ।
लेखयित्वा प्रयत्नेन*पूजयेद्भक्तितत्परः ॥
मन्त्रेणानेन कौन्तेय देवकीं पूजयेन्नरः ।

र्थ्यन्तं तत्तद्देवतानामयुक्तं स्वाहान्तं मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात् । प्रसूतां=देवकीम् । *प्रसुतां=संजातक्षीराम् । *मां तत्रेति । ध्याने उपयोगः ।

*गौरिति । एते च मोहितास्तत्र लेख्याः ।

'तत्र कंसनियुक्ताश्च मोहिता योगनिद्रया ।'

इति वाक्यशेषात् । गोपादयस्त्वत्रामोहिता लेख्या इत्यर्थः । लेखश्च काञ्चन्यादिप्रतिमाभिर्विकल्पते प्रतिमात्वात् । पूर्वोक्तस्यावश्यकत्वमाह—*इत्येवमिति । *पूजयेदिति । पूजा च प्राणप्रतिष्ठोत्तरं कार्या । ताम्बूलदक्षिणा च पूजासाङ्गुण्याय विनोद्वासनमुपचारान्निवेदयेत् । उद्वासनं तु परेऽह्नि कार्यम् । तत्र देवकीं वसुदेवं यशोदां नन्दं सुप्तश्रीकृष्णं बलदेवं चण्डिकां च पृथक्तत्तन्नाममन्त्रेण पर्यङ्कादेः प्रतिमादेश्चाशक्तौ फलेषु अक्षतपुञ्जेषु वा पूजयेत् ।

'कुर्यात्पूजां विधिज्ञश्च सर्वपापापनुत्तये ।
देवक्यै वसुदेवाय वासुदेवाय चैव हि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*गायद्भिः किन्नराद्यैः सततपरिवृता वेणुवीणानिनादैः
शृङ्गारादर्शकुम्भप्रवरवृतकरैः किंकरैः सेव्यमाना ।
पर्यङ्के स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते,
सा देवी देवमाता जयति सुतनया देवकी कान्तरूपा ॥
पादौ संवाहयन्ती श्रीर्देवक्याश्चरणान्तिके ।
निषण्णा पङ्कजे पूज्या नमो देव्यै श्रियै इति ॥

बलदेवाय नन्दाय यशोदायै पृथक् पृथक् ॥'
इति भविष्योत्तरात् । श्रियं च 'नमो देव्यै श्रियै' इति मन्त्रेण ।
न्येषां तु विशिष्यमन्त्रानुक्तावपि 'गर्गाद्यावाहितदेवताभ्यो नमः'
ति मन्त्रेणापि । *गायद्भिरिति ध्यानम् । भविष्ये एकवच-
मन्त्रा दर्शिताः ।
'विध्यन्तरमपीच्छन्ति केचिदत्रैव सूरयः' ।
इत्युक्त्वा
'योगेश्वराय देवाय योगानां पतये विभो ।
योगोद्भवाय नित्याय गोविन्दाय नमो नमः ॥'
इति स्नाने,
'यज्ञेश्वराय यज्ञाय तथा यज्ञोद्भवाय च ।
यज्ञानां पतये नाथ गोविन्दाय नमो नमः ॥'
इति धूपादौ,
'विश्वेश्वराय विश्वाय तथा विश्वोद्भवाय च ।
विश्वस्य पतये तुभ्यं गोविन्दाय नमो नमः ॥'
इति नैवेद्ये, गारुडे तु 'यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसम्भ-
वाय गोविन्दाय नमो नमः' इत्यर्घ्ये 'धर्माय धर्मेश्वराय धर्मपतये
धर्मसम्भवाय गोविन्दाय नमो नमः' इति स्वाहान्तास्तिलहोमे,
सोमाय सोमेश्वराय सोमपतये सोमसम्भवाय नमोनमः' इति चन्द्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अर्धरात्रे वसोर्धारां पातयेद् गुडसर्पिषा ।
*नाडीवर्धापनं षष्ठी नामादेः करणं मम ॥
*ततो मन्त्रेण वै दद्याच्चन्द्रायार्घ्यं समाहितः ।
शङ्खे तोयं समादाय सपुष्पकुशचन्दनम् ॥
जानुभ्यां धरणीं गत्वा चन्द्रायार्घ्यं निवेदयेत् ॥
क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव ।
गृहाणार्घ्यं शशाङ्केदं रोहिण्या सहितो मम ॥
ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषां पते ।
नमस्ते रोहिणीकान्त अर्घ्यं नः प्रतिगृह्यताम् ॥
यथा पुत्रं हरिं लब्ध्वा प्राप्ता ते निर्वृतिः परा ।
तामेव निर्वृतिं देहि सुपुत्रं दर्शयस्व मे ॥'

इति देवक्यर्घ्यः ।

'ततः पुष्पाञ्जलिं दत्त्वा यामे यामे प्रपूजयेत् ।
प्रभाते ब्राह्मणान् शक्त्या भोजयेद्भक्तिमान्नरः ॥'
'ॐ नमो वासुदेवाय गोब्राह्मणहिताय च ।
शान्तिरस्तु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत् ॥'

इदं प्रतिमासकृष्णाष्टम्यामप्युक्तं मदनरत्ने वह्निपुराणे

पूजायां मन्त्रा उक्ताः । *अर्धरात्रे इति । ततो गव्यघृतेनाग्नौ वसोर्धारां कुर्याद् । क्वचिद्गुडसर्पिषेति पाठः । *नाडीति । जातकर्मनालच्छेदनषष्ठीपूजानामकर्मादीनि संक्षेपेण । *तत इति । चन्द्रोदये प्रतिमादौ रोहिणीसहितं चन्द्रं सम्पूज्य 'जानुभ्यां धरणीं गत्वा' शङ्खे तोयमित्यादिचन्द्रार्घ्योत्तरं च

'ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः ।
नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते ॥
नमो मण्डलदीपाय शिरोरत्नाय धूर्जटेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कलाभिर्वर्धमानाय नमश्चन्द्राय चारवे' ॥

ति मन्त्राभ्यां प्रणमेत्, देवक्यर्घ्योत्तरं देवकीं च प्रणमेत् ।

यर्घ्यो नावश्यक इति केचित् । ततः—

'अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।

वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥

वाराहं पुण्डरीकाक्षं नृसिंहं दैत्यसूदनम् ।

दामोदरं पद्मनाभं केशवं गरुडध्वजम् ॥

गोविन्दमच्युतं कृष्णमनघं चापराजितम् ।

अधोक्षजं जगद्बीजं सर्गस्थित्यन्तकारणम् ॥

अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमम् ।

नारायणं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥

पीताम्बरधरं नित्यं वनमालाविभूषितम् ।

श्रीवत्साङ्कं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिम् ॥

प्रपद्येऽहं सदा देवं सर्वकामप्रसिद्धये ।

प्रणमामि सदा देवं वासुदेवं जगत्पतिम् ॥

ति मन्त्रैः स्वनामकीर्तनपूर्वकं प्रणम्य

त्राहि मां सर्वलोकेश हरे संसारसागरात् ।

त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्रभो ॥

सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे ।

देवकीनन्दन श्रीश हरे संसारसागरात् ॥

त्राहि मां सर्वदुःखघ्न रोगशोकार्णवाद्धरे ।

दुर्गतांस्त्रायसे विष्णो ये स्मरन्ति सकृत् सकृत् ॥

सोऽहं देवातिदुर्वृत्त त्राहि मां शोकसागरात् ।

पुष्कराक्ष निमग्नोऽहं मायाविज्ञानसागरे ॥

त्राहि मां देव देवेश त्वत्तो नाऽन्योऽस्ति रक्षिता ।

यद्बाल्ये यच्च कौमारे यौवने यच्च वार्धके ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुध ॥'

इति प्रार्थ्य रात्रिशेषं स्तोत्रपुराणश्रवणादिभिरतिवाहयेत् ततः परदिने प्रातः स्नानादिनित्यकृत्यं कृत्वा पुनः सपरिवा श्रीकृष्णं यथाविभवं संपूज्य यथाविभवं चण्डिकामहोत्सवं कृत्व यथाशक्ति ब्राह्मणान्संपूज्य भोजयित्वा तेभ्यः सुवर्णमेदिनीधेनुव स्त्रादि यद्यदिष्टं तत्कृष्णो मे प्रीयतामिति दत्वा मां प्रति

यं देवं देवकी देवी वसुदेवादजीजनत् ।
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥
ॐ नमो वासुदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

शान्तिरस्तु शिवं चास्तु इत्युक्त्वा ब्राह्मणान् विसृज्य इष्टैः स स्वयं पारणं कुर्यादित्यर्थः । सुजन्म वासुदेवायेति पाठान्तरम् अङ्गदेवताविसर्जनं कार्यम् । श्रीकृष्णप्रतिमादिदानं तु विसर्जनम कृत्वैव । एवं श्रीकृष्णप्रतिमाया अधार्यत्वे 'ॐ कृष्णाय नमः' इति मन्त्रेण 'ॐ वासुदेवाय'इति मन्त्रेण वा तद्विसर्जनमपि । उद्यापन तु नैतस्यानुक्तत्वात् ।

'यदि वोद्यापनं नोक्तं व्रतानुगुणतश्चरेत् ।'

इत्यादिप्रागुक्तत्वादुद्यापनमावश्यकमिति स्मार्ताः । व्रतभङ्गे तूक्तमथवा सम्पूर्णतानुष्ठानं कार्यम् । युधिष्ठिर उवाच—

संपूर्णतामनुष्ठानं व्रतानां च जनार्दन ।
कुरुप्रसादं गुह्यार्थमेतन्मे वक्तुमर्हसि ॥

श्रीकृष्ण उवाच—

साधु साधु महाबाहो कुरुराज युधिष्ठिर ।
रहस्यानां रहस्यं ते कथयामि व्रते तव ॥
किञ्चिद्भग्नं प्रमादेन यद् व्रतं व्रतिनां व्रतम् ।
तत्संपूर्णं भवेत्सर्वं कृतेनानेन पाण्डव ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काञ्चनं रुप्यकं वाऽथ शिल्पिना तु घटापयेत् ।
भग्नव्रतस्य यो देवस्तत्स्वरूपं विनिर्मितम् ॥
द्विभुजं पङ्कजारूढं सौम्यं प्रहसिताननम् ।
भुजमितिचतुर्भुजादेरुपलक्षणम् ॥
निष्पादितं शिल्पिना च तस्मिन्नेव दिने पुनः ।
तन्मासे तु पुनः प्राप्ते ब्राह्मणो विधिना गृहे ॥
स्नापयेत्पयसा दध्ना घृतक्षौद्ररसाम्बुभिः ।
गन्धचन्दनपुष्पैश्च पूजां कुर्यात्समाहितः ॥
ता चाग्न्युत्तारणप्राणप्रतिष्ठानन्तरं कार्येत्युक्तम् ।
अर्घ्यं प्रदद्यात्तन्नाम्ना मन्त्रेणानेन पाण्डव ।
शरणं वः प्रपन्नोऽस्मि कुरुष्वाद्य दयां पुनः ॥
प्रसन्नो भवभीतस्य भिन्नचर्यव्रतस्य च ।
कुरु प्रसादं सम्पूर्णं व्रतं संजायतां मम ॥
तपश्छिद्रं जपाच्छिद्रं यच्छिद्रं यज्ञकर्मणि ।
तत्सर्वं त्वत्प्रसादेन संपूर्णं जायतां मम ॥
पूर्वदक्षिणपश्चात्सु उत्तरे च बलिं हरेत् ।
उपर्यधस्तात्सर्वेभ्यो दिक्पालेभ्यो नमो नमः ॥
इदमर्घ्यमिदं पाद्यं तेभ्यस्तेभ्यो नमो नमः ।
पादौ च जानुनी चैव कटिं शीर्षं च वक्षसि ॥
कुक्षिं तु हृदयं पृष्ठं वाक्चक्षुश्च शिरोरुहान् ।
पूजयित्वाऽस्य देवस्य ततः पश्चात् क्षमापयेत् ॥
पूजितस्त्वं यथाशक्त्या नमस्तेऽस्तु सुरोत्तम ।
ऐहिकामुष्मिकीं देव कार्यासिद्धिं दिशस्व मे ॥
एवं क्षमापयित्वा तु देवं साष्टाङ्गमानमेत् ।
तन्मूर्तिं चापि विप्राय विधिवत् प्रतिपादयेत् ॥
स्थित्वा पूर्वमुखो विप्रो गृह्णीयाद्दर्भपाणिना ।
दर्भयुक्तेन पाणिनेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*प्रतिमासं च ते पूजामष्टम्यां यः करिष्यति ।
विप्रहस्ते प्रयच्छेत दाता चैवोत्तरामुखः ॥
मन्त्रेणानेन कौन्तेय सोपवासः प्रयत्नतः ।
इदं व्रतं मया खण्डं कृतमासीत्पुरा द्विज ॥
तत्सर्वं पूर्णमेवास्तु तव मूर्तिप्रदानतः ।
वाक्यं पूर्णमतो ब्रूयाद् व्रतेनानेन ते पुरा ॥
सम्पूर्णं स्यात्प्रसादेन तव पूर्णा मनोरथाः ।
ब्राह्मणा यत्प्रभाषन्ते तन्मन्यन्ते दिवौकसः ॥
सर्वदेवमया विप्रा न तद्वचनमन्यथा ।
जलधिः क्षारतां नीतः पावकः सर्वभक्षताम् ॥
सहस्रनेत्रः शक्रोऽपि कृतो विप्रैर्महात्मभिः ।
ब्राह्मणानां तु वचनाद् ब्रह्महत्या विनश्यति ॥
अश्वमेधफलं साग्रं लभन्ते नात्र संशयः ।
व्यासवाल्मीकिवचनात्पराशरवसिष्ठयोः ॥
गर्गगौतमधौम्यात्रिकश्यपाङ्गिरसस्तथा ।
वचनान्नारदादीनां पूर्णं भवतु मे व्रतम् ॥
एवं विधिविधानेन गृहीत्वा ब्राह्मणो व्रजेत् ।
दाता तत्प्रेषयेत्सर्वं ब्राह्मणस्य गृहं स्वयम् ॥
ततः पञ्चमहायज्ञान्निर्वपेद्भोजनादिकम् ।
एवं यः कुरुते भक्त्या व्रतमेतन्नरोत्तम ॥
तस्य सम्पूर्णतां याति तद्व्रतं यत्पुरा कृतम् ।
खण्डं सम्पूर्णतां याति प्रसन्ने व्रतदैवते ॥
भग्नानि यानि मदमोहवशाद् गृहीत्वा
जन्मान्तरेष्वपि नरेण समत्सरेण ।
सम्पूर्णपूजनपरस्य पुरो भवन्ति
सर्वव्रतानि परिपूर्णफलप्रदानि ॥' इति ।

*प्रतिमासं चेति । चण्डिकां प्रति श्रीकृष्णवाक्यम् । आर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मम चैवाखिलान्कामान्स संप्राप्स्यत्यसंशयम् ॥'

था—

'अनेन विधिना यस्तु प्रतिमासं नरेश्वर ।
करोति वत्सरं पूर्णं यावदागमनं हरेः ॥
दद्याच्छय्यां सुसंपूर्णां गोभी रत्नैरलंकृताम् ॥'

ति जन्माष्टमीव्रतम् ॥

भाद्रामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन-

'*मासे नभस्यमावास्या, तस्यां दर्भोच्चयो मतः ।

स्वस्य रोहिणीयुताष्टम्याम् । अत्रोत्सङ्गावस्थितचतुर्भुजबालस्व-
श्रीकृष्णाया देवक्याः प्रतिमा, तत्र श्रीकृष्णपूजादि, देवक्यर्चा,
मादानादि ।

'ततः पुष्पाञ्जलिं दत्त्वा यामे यामे प्रपूजयेत् ।' इति ।

सुवासिनीनामपि एतद्व्रते अधिकारः । अयं विशेषः—उक्तपूजो-
मरुणोदये रक्तवस्त्रं परिधाय स्वां स्वां प्रतिमां गृहीत्वा नदीतीरं,
त्सरो वा गत्वा तत्र स्वयं स्नात्वा प्रतिमां स्नापयित्वा किञ्चि-
स्य सह प्रतिमया स्वं स्वं गृहमागत्य मध्वाज्यमरिचेक्षुविकार-
कृतं यवान्नं बन्धुभिः सह भुञ्जीरन्निति । पञ्चमृत्तिकापूजायां
माष्टम्यां मृत्तिकागोकुलपूजा कार्या । इति जन्माष्टमी ।

*मासे इति । यत्तु शङ्खः—

'अमायां चैव न च्छिन्द्यात्कुशांश्च समिधस्तथा ।'

ति, तत्तत्कालकर्मातिरिक्तपरम् ।

'कुशान् काशांश्च दूर्वाद्यान् गवार्थं च तृणादिकम् ।
निषिद्धे चापि गृह्णीयादमावास्याहनि द्विज ॥'

ति जाबाल्युक्तेः । वनस्पतिसंज्ञकमुहूर्ते च निषेधः 'वन-
तिगते सोमे' इति वक्ष्यमाणवचनात् । मरीचिः—

'आर्द्रान् लुनीयाद्रात्रौ च लुनीयाद्वापि सन्ध्ययोः ।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः ॥'
नभः=श्रावणः। तेन दर्शान्तमासे जन्माष्टम्यनन्तरं दर्शो लभ्यते। *मदनरत्ने तु-

'मासे नभस्येऽमावास्या, तस्यां दर्भोच्चयो मतः।'

इति मरीचिवाक्यमुक्तम्। नभस्यो=भाद्रपदः। तेन महालयान्तर्गतदर्शो लभ्यते। गौणमुख्यचान्द्राभ्यामेक एव दर्श इत्यन्ये॥

भाद्रपदशुक्लतृतीयायां हरितालि(१)काव्रतम्। तत्र परा ग्राह्या।

'मुहूर्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे।
शुद्धाधिकायामप्येवं गणयोगप्रशंसनात्॥'

पाद्मे—

'न दर्भानुद्धरेच्छूद्रो न पिबेत्कापिलं पयः।'

*अयातयामाः=उपयुक्ताः अपि अपवादं विहायान्यत्र प्रयोज्याः।

समित्पुष्पकुशादीनां द्वितीयः प्रहरो मतः।

इत्युक्तेस्तद्व्यापिनी अमा ग्राह्या, अधिकमग्रे। *मदनरत्ने त्विति तु नाऽरुचिः। शुक्लादिकृष्णादिमासभेदेन एकस्यैव चान्द्रस्य ग्रहीतुं शक्यत्वात्।

भाद्रशुक्लप्रतिपदि रुद्रव्रतं, तत्र पूर्वविद्धा ग्राह्या।

'रुद्रव्रतेषु सर्वेषु कर्तव्या सम्मुखी तिथिः।

---

(१) हरितालिकेति। एतदन्वर्थकं नाम 'आलिभिर्हरिता यस्मात्तस्मात्सा हरितालिका।' इति वचनात्। अत्र च भवानीशिवयोः पूजा, मन्त्रः 'मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय। दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय॥' इति तत्कथायामुक्तः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति माधवोक्तेः । चतुर्थीयुक्तायां फलाधिक्यम् ।
माधवीये आपस्तम्बः—
'चतुर्थीसहिता या तु सा तृतीया फलप्रदा ।
अवैधव्यकरा स्त्रीणां पुत्रपौत्रप्रवर्धिनी ॥'
द्वितीयायोगे प्रत्यवायमाह स एव—
'द्वितीयाशेषसंयुक्तां या करोति विमोहिता ।
सा वैधव्यमवाप्नोति प्रवदन्ति मनीषिणः ॥' इति ।
'आद्या मधुस्रावणिका कज्जली हरितालिका ।
चतुर्थीमिश्रिता स्त्रीभि*र्दिवानक्ते विधीयते ॥
तृतीया नभसः शुक्ला मधुस्रावणिका स्मृता ।
भाद्रस्य कज्जली कृष्णा, शुक्ला च हरितालिका ॥'
इति दिवोदासोदाहृतवचनाच्च ॥
*भाद्रशुक्लचतुर्थी मध्याह्नव्यापिनी ग्राह्या ।
'प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप ।'
इति हेमाद्रौ भविष्ये तत्रैव पूजोक्तेः । मदनरत्नेऽप्येव-

अन्येषु व्रतकल्पेषु यथोद्दिष्टामुपावसेत् ॥'
इति ब्रह्मवैवर्तात् । आद्या=परेद्युरौदयिकी, मधुस्रावणिकेत्यत्र
न्यः सकारो न तु तालव्यः शकारः । मधुस्रवाख्येत्युक्तेः ।
दिवानक्ते=अहोरात्रसाध्ये व्रते । *भाद्रस्येति 'नभसः कज्ज-
ली कृष्णा' इति दिवोदासपाठाच्छ्रावणकृष्णतृतीया कज्जली-
ति कृत्यरत्नावली ।

वरदेति ।
'सुरासुरानाप्नुवतो गणेशं बुद्धिपूर्वकम् ।
तस्यां प्रादाद्वरं यस्मात्तस्माद्वरचतुर्थिका ॥'
इति पुराणान्तरे तद्विवरणात् ।
*अंशेनेति । परेद्युरधिकव्याप्तौ परेद्युराधिक्यादिति के-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म् । परदिने एवांशेन*साकल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षेषु पूर्वा ग्राह्या । तथा च बृहस्पतिः—

'चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ।
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि ॥' इति ।
'मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके ।
मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ॥'

इति माधवीये स्मृत्यन्तराच्च । तत्र गणेशरूपं स्कान्दे—

'एकदन्तं शूर्पकर्णं नागयज्ञोपवीतिनम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिवि(१)नायकम् ॥'इति।

इयं रविभौमयोरतिप्रशस्ता ।

'भाद्रशुक्लचतुर्थी या भौमेनार्केण वा युता ।
महती साऽत्र विघ्नेशमर्चित्वेष्टं लभेन्नरः ॥'

इति निर्णयामृते वाराहोक्तेः ।

अत्र चन्द्रदर्शनं निषिद्धम् । तथाचापरार्के मार्कण्डेयः—

'*सिंहादित्ये शुक्लपक्षे *चतुर्थ्यां चन्द्रदर्शनम् ।

चित् । या तु पूर्वेद्युः किंचिन्मध्याह्नं व्याप्य परेद्युः कृत्स्नं मध्याह्नं व्याप्नोति सा परा; संपूर्णकर्मकालव्याप्तेः । संदिग्धे हि 'मातृविद्धा प्रशस्यते' 'मातृविद्धा प्रशस्ता स्यात्' इत्यादीनि प्रवर्तन्ते ।

*सिंहादित्ये इति । कन्यादित्यसिंहादित्यशब्दयोः चान्द्रो भाद्रपद इत्यर्थः । *चतुर्थ्यामिति । अत एव कृत्यरत्नाव-

---

(१) अत्र 'मृन्मयादिमूर्तौ प्राणप्रतिष्ठापूर्वकं विनायकं षोडशोपचारैः संपूज्यैकमोदकेन नैवेद्यं दत्त्वा सगन्धा एकविंशतिदूर्वा गृहीत्वा-'गणाधिपायोमापुत्रायाघनाशनाय विनायकायेशपुत्राय सर्वसिद्धिदायकदन्तायेभवक्त्राय मूषकवाहनाय कुमारगुरवे' इति दशनामभिर्दूर्वयोर्द्वयं द्वयं समर्प्यावशिष्टामेकां दूर्वामुक्तदशनामभिः समर्पयेत् । दश मोदकान् विप्राय दत्त्वा दश स्वयं भुञ्जीत' इति संक्षेपतः पूजाविधिर्धर्मसिन्धावुक्तः । विस्तरस्तु व्रतराजादिग्रन्थेभ्योऽवगन्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा ॥'
चतुर्थ्यां न पश्येदित्यन्वयः । प्रधानक्रियान्वयला-
त् । तेन चतुर्थ्यामुदितस्य पञ्चम्यां न निषेधः ।
डा अप्येवमाहुः । पराशरोऽपि—
'कन्यादित्ये चतुर्थ्यां तु शुक्ले चन्द्रस्य दर्शनम् ।
मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा ॥
तद्दोषशान्तये सिंहः प्रसेनमिति वै पठेत्' । इति ।
श्लोकस्तु विष्णुपुराणे—
'सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः ।
सुकुमारक मा रोदीस्तव ह्येषः स्यमन्तकः ॥'इति ॥
भाद्रपदशुक्लपञ्चमी=ऋषिपञ्चमी । सा मध्याह्नव्या-
पिनी ग्राह्या ।
'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ।'
इति माधवीये हारीतोक्तेः । दिनद्वये तत्त्वे *हेमा-
द्रिमते परा । 'सिता परयुता स्यात्पञ्चमी' इति दीपि-

कायाम्—
'पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥'
इति तिथितत्त्ववाक्ये चतुर्थ्यां नेक्षितव्य इति सम्बन्ध इति
व्याख्यातम् । दिवादर्शने च न दोषः । सकृत्पाठेऽपि तन्निवृत्तिः ।
अर्घ्यश्च प्राङ्मुखेनोदङ्मुखेन वा कार्यः । तथा च पुराणान्तरम्—
'ततश्चतुर्थ्यां रात्र्यां तं प्रमादाद्वीक्ष्य मानवः ।
पठेत्पौराणिकं वाक्यं प्राङ्मुखो वाऽप्युदङ्मुखः ॥' इति ।
सिंहः प्रसेनमिति मन्त्रेणामन्त्रितं जलं पिबेत्, स्यमन्तको-
पाख्यानं च श्रोतव्यमाचारादिति स्मार्ताः ।
*हेमाद्रीति । तत्त्वं तु सामान्यनिर्णये दर्शितम् । वस्तुत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कोक्तेः । माधवमते पूर्वा । 'सर्वत्र पञ्चमी पूर्वा' इत्युक्तेः । युग्मवाक्यान्निर्णयस्तु युक्तः । ऋषिपञ्चमी षष्ठीयुतैवेति दिवोदासः । *अत्र ऋषीन्प्रतिमासु पूजयित्वाऽकृष्टभू-

---

स्तु मध्यान्हव्यापिनी ग्राह्या ।

'पूजाव्रतेषु सर्वेषु मध्यान्हव्यापिनी तिथिः ।'

इतिवचनात् मनुष्यदैवत्यत्वाच्च । मध्याह्नव्याप्त्या निर्णयाभावे तु पूर्वविद्धा ग्राह्या युग्मवाक्यात् । *अत्रेति ।

'नभस्ये शुक्लपक्षे तु यदा भवति पञ्चमी ।
नद्यादिषु तदा स्नानं कृत्वा नियममेव च ॥
विधाय नित्यकर्मादि गत्वा द्वारवतीमृषीन् ।

(द्वारवती=अग्निहोत्रशाला धूमनिर्गमनद्वारैर्बहुभिर्वृतत्वात् ।)

स्नापयेद्विधिवद्भक्त्या पञ्चामृतरसैः शुभैः ॥
चन्दनागरुकर्पूरैर्विलिप्य च सुगन्धिभिः ।
पूजयेद्विविधैः पुष्पैर्गन्धधूपादिदीपकैः ॥
समाच्छाद्य तथा वस्त्रैः सोपवीतैर्यथाविधि ।
ततो नैवेद्यसंपन्नमर्घ्यं दद्याच्छुभैः फलैः ॥
कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सप्तैते ऋषयः स्मृताः ॥
गृह्णीतार्घ्यं मया दत्तं तुष्टा भवत सर्वदा ।' इति ।

'अकृष्टपृथिवीजातशाकाहारं प्रकल्पयेत् ।
शयीत ब्रह्मचर्येण ऋषीन् ध्यात्वा समाहितः ॥
अनेन विधिना सप्त वर्षाणि व्रतमाचरेत् ॥'

इति च ब्राह्मात् । अत्र ब्राह्मण्यादीनां सर्वासामधिकारः ।

'ब्राह्मणी क्षत्रिया वैश्या शूद्रा वाऽपि वरानने' ।

इति ब्राह्मात् ।

भाद्रशुक्लषष्ठी=सूर्यषष्ठी । सा परयुता, युग्मवाक्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जशाकेन वर्तनम् । एवं सप्तवर्षाणि कृत्वा सप्तकुम्भेषु
तिमाः सम्पूज्य परेऽह्नि तत्तन्मन्त्रेणाष्टोत्तरशतं तिला-
त्वा सप्त ब्राह्मणान्भोजयेत्' इति निर्णयामृते ॥
भाद्रशुक्लषष्ठी=सूर्यषष्ठी । सा सप्तमीयुतैवेति दि-
दासः ।

'शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पञ्चगव्यस्य अश्वमेधफलाधिकम् ॥'

ति वचनात् । कल्पतरौ भविष्ये—

'येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ ।

'शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनम् ।
प्राशनं पञ्चगव्यस्य अश्वमेधशताधिकम् ॥'

भविष्ये—

'येयं भाद्रपदे मासि षष्ठी स्याद्भरतर्षभ ।
योऽस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनम् ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ।'

गाङ्गेयं=स्वामिकार्तिकम् ।

इयमेव भौमवारे विशाखावैधृतियोगे चम्पाषष्ठी । तदुक्तं स्कान्दे—

'षष्ठी भाद्रपदे शुक्ला वैधृतेन समन्विता ।
विशाखाभौमवाराभ्यां सा चम्पेतीह कीर्तिता ॥
पञ्चम्यामेकभक्ताशीचम्पाषष्ठ्यामुपोषितः ।
रथे दलद्वादशके पूजयेत्सूर्यदेवताम् ॥
आदित्यस्तपनः पूषा भानुमान् भानुरर्यमा ।
विश्वचक्रोंऽशुमान् देवः सहस्रांशुर्विनायकः ॥
सूरः सूर्यः खगः कर्ण्यामादित्यः प्राग् दलादिषु ।
तपनादींश्च संपूज्य सप्तम्यां जुहुयात्तिलान् ॥' इति ।

देव इति विशेषणम् । रोगनिवृत्त्यर्थमिदं व्रतमिति प्रतीमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योऽस्यां पश्यति गाङ्गेयं दक्षिणापथवासिनम् ॥
ब्रह्महत्यादिपापैस्तु मुच्यते नात्र संशयः ॥'

गाङ्गेयः=स्वामिकार्तिकेयः ॥

भाद्रपदशुक्लसप्तम्यां=मुक्ताभरणव्रतम्। तत्र सप्तमी पूर्वयुता ग्राह्या। 'षण्मुन्योः'इति युग्मवाक्यात्।

भाद्रपदशुक्लाष्टमी=दूर्वाष्टमी। सा पूर्वा ग्राह्या।

'श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ॥
*पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनम् ॥'

इति हेमाद्रौ बृहद्यमोक्तेः।

'शुक्लाष्टमी तिथिर्या तु मासि भाद्रपदे भवेत्।
दूर्वाष्टमी तु सा ज्ञेया नोत्तरा सा विधीयते ॥'

इति पुराणसमुच्चयाच्च। *यत्तु—

'मुहूर्ते रौहिणेऽष्टम्यां पूर्वा वा यदि वा परा।
दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेत् ॥'

इति तत्रैवापरार्के उक्तम्, तत् पूर्वदिने* ज्येष्ठादियोगे द्रष्टव्यम्।

'दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता।'

---

*पूर्वेति। 'शुक्लपक्षेऽष्टमी चैव'इत्यस्यापवादः। हुताशनी=होला, वह्निव्रततिथिर्वा; रम्भा तृतीयेत्यन्ये। दूर्वाव्रते भाद्रशुक्लाष्टमी पूर्वा ग्राह्येत्युक्तं तत्रैव। भाद्रशुक्लाष्टमी ज्येष्ठामूलशून्यरौहिणमुहूर्तव्यापिनी ग्राह्येति दर्शयति-*यत्तु मुहूर्ते इति। विवेचनकृतस्तु दूर्वाव्रतं ज्येष्ठामूलयोगरहितायां सिंहस्थे सूर्येऽगस्त्येऽनुदिते मध्यान्हव्यापिन्यां कार्यमित्याहुः। *पूर्वदिने इति। रौहिणे मुहूर्ते इति शेषः। यत्र दिनद्वये रौहिणे मुहूर्तेऽष्टमी पूर्वदिने च ज्येष्ठादियोगस्तत्रेति यावत्। दिनद्वये रौहिणे ज्येष्ठादियोगे पूर्वैव 'श्रावणी दुर्गनवमी'इति वचनात्। एवं परदिने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा—

'ऐन्द्रर्क्षे पूजिता दूर्वा हन्त्यपत्यानि नान्यथा ।
भर्तुरायुर्हरा मूले तस्मात्तां परिवर्जयेत् ॥'

इति तत्रैव तन्निषेधात् । इदमगस्त्योदये कन्यार्के च कार्यम् ।

'शुक्ले भाद्रपदे मासि दूर्वासंज्ञा तथाऽष्टमी ।
सिंहार्क एव कर्तव्या न कन्यार्के कदाचन ॥
सिंहस्थे सोत्तमा सूर्येऽनुदिते मुनिसत्तम ॥'

र्कालस्पर्शाभावे ज्येष्ठादियोगेऽपि पूर्वैव । कर्मकालशास्त्रादिति वः । 'कन्यार्के च'इति निषेधो व्यर्थः । "न कन्यार्के कदाच-इति तु 'नान्तरिक्षे न दिवि'इतिवत् । यथा कन्यार्के न कदाचन ा सिंहार्केऽपि अगस्त्योदयानन्तरं नेति वाऽर्थः । लौगाक्षि-न्यत्राप्याह—

'उद्यानिकाशिवपवित्रकमेघपूजा-
दूर्वाष्टमीव्रतविरूढकजागराणि ।
स्त्रीणां व्रतानि निखिलान्यपि वार्षिकाणि
कुर्यादगस्त्य उदिते न शुभानि लिप्सुः ॥'इति ।

अस्यार्थः—उद्यानिका=उद्याने स्वेष्टदेवतापूजादि, तत्प्री-र्थं ब्राह्मणभोजनादिरूपव्रतविशेषः । शिवपवित्रकम्=आषाढ-ावण-भाद्रपदान्यतमचतुर्दशीविहितं शिवपवित्रारोपणम् । मेघपूजा= तविशेषः । दूर्वाष्टमी=भाद्रशुक्लाष्टमी । व्रतविरूढकं=भाद्रशुक्लचतुर्द-ीविहितं पालीसंज्ञं कदलीव्रतम् । जागरम्=आश्विनपूर्णिमाविहितं ोजागरम्, कार्तिकशुक्लचतुर्दशीविहितं जागरं वा । अत्रोभयत्रापि गस्त्योदयस्यावश्यतया विध्यनवकाशापत्तेर्विकल्पः । वार्षिका-ि=वर्षासु भवन्ति, न तु वर्षासु भवानि इति । शरदादि-ीष्मान्तमगस्त्योदयानुवृत्तेस्तत्र स्त्रीव्रतानामनारम्भापत्तेर्विध्यन-

 Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति मदनरत्ने स्कान्दोक्तेः ।

'अगस्त्ये उदिते तात पूजयेदमृतोद्भवाम् ।
वैधव्यं पुत्रशोकं च दश वर्षाणि पञ्च च ॥'

इति तत्रैव दोषोक्तेश्च । *भाद्रपदशुक्लाष्टम्यामगस्त्योदये भाविनि सति पूर्वकृष्णाष्टम्यामेव कुर्यादिति हेमाद्रिः । दीपिकाऽप्येवम् । इदं च व्रतं *स्त्रीणां नित्यम् ।

'या न पूजयते दूर्वां मोहादिह यथाविधि ।
त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः ॥
तस्मात्सम्पूजनीया सा प्रतिवर्षं वधूजनैः ॥'

इति पुराणसमुच्चयात् । यदा ज्येष्ठादिकं विनाऽष्टमी न लभ्यते तदा तत्रैवोक्तम्—

'कर्तव्या चैकभक्तेन ज्येष्ठा मूलं यदा भवेत् ।
दूर्वामभ्यर्चयेद्भक्त्या न वन्ध्यं दिवसं नयेत् ॥' इति ।

अत्र विधिर्मदनरत्ने भविष्ये—

'शुचौ देशे प्रजातायां दूर्वायां ब्राह्मणोत्तम ।

वकाशनिबन्धनाष्टदोषग्रस्तविकल्पापत्तेर्वा वर्षाकालीनानामेव निषेधौचित्यादिति । कदा चेयं भाद्रकृष्णाष्टमी ग्राह्येत्यत्राह—*भाद्रेति । *स्त्रीणामिति । स्त्रीणामेवाधिकार इति मयूखः । ज्येष्ठामूलग्रहणं निषिद्धकालमात्रोपलक्षणम् । तत्राप्यपेक्षासत्त्वात् । अत्र निषिद्धयोगाभावे स्त्रीभिः स्वयमेव पूजां कृत्वाऽनग्निपक्वादिभक्षणं कार्यम् । तद्योगे तु पूजा ब्राह्मणेन कार्या स्वयं त्वेकभक्तं कार्यमिति यस्मिन् कस्मिन् दिने यस्यां कस्यां चित्पूर्वस्यां परस्यां वाऽष्टम्याम् ।

'कन्यास्थार्काऽष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता ।
अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेत् ॥'

इति वाक्यात् । अत्र कन्यार्कयोगः स्तावकः 'मासि भाद्रपदे' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थाप्य लिङ्गं ततो गन्धैः पुष्पैर्धूपैः समर्चयेत् ॥
दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्त्रिलोचने ।
दूर्वाशमीभ्यां विधिवत्पूजयेच्छ्रद्धयाऽन्वितः ॥'

मन्त्रस्तु—

'त्वं दूर्वेऽमृतजन्मासि वान्दितासि सुरासुरैः ।
सौभाग्यं सन्ततिं देहि सर्वकार्यकरी भव ॥
यथा शाखाप्रशाखाभिर्विस्तृताऽसि महीतले ।
तथा ममापि सन्तानं देहि त्वमजरामरम् ॥' इति ।

अत्रानग्निपक्वं भक्षयेत् ।

'अनग्निपक्वमश्नीयादन्नं दधि फलं तथा ।
अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनाऽन्वितम् ॥'

इति तत्रैव भविष्योक्तेः । भाद्रपदेऽधिमासे सति निर्णयदीपे स्कान्दे—

'अधिमासे तु सम्प्राप्ते नभस्य उदये मुनेः ।
अर्वाग्दूर्वाव्रतं कार्यं परतो नैव कुत्रचित् ॥'

अत्रैव ज्येष्ठापूजोक्ता माधवीये स्कान्दे—

'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता ।
रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥' इति ।

इयं ज्येष्ठायोगवशेन पूर्वा परा वा ग्राह्या । *दिनद्वयोगे परा* । पूर्वेऽह्नि रात्रियोगे पूर्वैव* ।

'नवम्या सह कार्या स्यादष्टमी नात्र संशयः ।
मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता ।
रात्रिर्यस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ।'

चान्द्रभाद्रपदग्रहणात् । *दिनद्वयेति दिवाद्वयास्पर्शोपलक्षणम् । *परेति । अत्र प्रमाणं नवम्या सहेति । *पूर्वैवेति । अत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तत्रैवोक्तेः । *अस्यापवादः—

'यस्मिन्दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणुः ।
तस्मिन्हविष्यं पूजा च न्यूना चेत्पूर्ववासरे ॥'इति ।

*इदं केवलतिथौ नक्षत्रे चोक्तम् । तत्राद्यं केवलतिथौ कार्यम् । अन्त्यं केवलर्क्षे । तदुक्तं मात्स्ये-

'प्रत्याब्दिकं तिथावुक्तं यज्ज्येष्ठादैवतव्रतम् ।
प्रतिज्येष्ठाव्रतं यच्च विहितं केवलोडुनि ॥
तिथावेवाचरेदाद्यं द्वितीयं केवलर्क्षतः ॥' इति ।

अत एव मदनरत्ने भविष्ये नक्षत्रमात्रे उक्तम्-

'मासि भाद्रपदे पक्षे शुक्ले*ज्येष्ठा यदा भवेत् ।
रात्रौ जागरणं कृत्वा एभिर्मन्त्रैश्च पूजयेत् ॥' इति ।

दाक्षिणात्यास्त्वृक्ष एव कुर्वन्ति । हेमाद्रौ स्कान्देऽपि-

'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुते ।
यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥'इति

प्रमाणं रात्रीति । सामान्यवाक्यापवादः । *अस्य=रात्रियोगस्य ।

'तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च ।
नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकी ॥'

इति तु स्तावकम् । एतच्च तिथिसापेक्षमेव व्रतं ज्येष्ठादिवशेन पूर्वं परं वा भवतीति माधवः । स्वसम्मतं मतमाह-*इदमिति । *ज्येष्ठा यदेति । अष्टमीसम्बन्धव्युदासः । एवम्—

'मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते ।
यस्मिन्कस्मिन्दिने कुर्याज्ज्येष्ठायाः परिपूजनम् ॥' इति ।
'कृतस्नानो नरः कुर्यात्तस्यामन्यत्र वा दिने ।
भक्तियुक्तः शुचिर्भूत्वा ज्येष्ठायाः परिपूजनम् ॥'

इति च । अत्र नाष्टमीसंबन्धः । नक्षत्रमात्रापेक्षे 'यस्मिन् कस्मिन् दिने' 'तस्यामन्यत्र वा दिने' इत्यस्य यस्यां कस्यां चित्तिथावित्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा—

'*मैत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत् ।
मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमम् ॥' इति ।

मन्त्रस्तु—

'एह्येहि त्वं महाभागे सुरासुरनमस्कृते ।
ज्येष्ठे त्वं सर्वदेवानां मत्समीपगता भव ॥
इत्यावाह्य 'तामग्निवर्णाम्' इति संपूज्य)
ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते नमो नमः ॥
शर्वायै ते नमस्तुभ्यं शांकर्यै ते नमो नमः ।
ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनि ॥
एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वति ॥'
इत्यर्घ्यः ॥

भाद्रपदशुक्लद्वादश्यां श्रवणयोगरहितायां पारणं
र्यात् । 'आभाकासितपक्षेषु' इति दिवोदासोदाहृतव-
नात् ।

'उपोष्यैकादशीं मोहात्पारणं श्रवणे यदि ।

र् । तत्र नक्षत्रस्य खण्डत्वेऽष्टमीभानुवारयुक् तदन्यतरयुग्वा
त्रं ग्राह्यम् ।

"तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च ।
नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकी ॥"

ति स्कान्दात् । नीलज्येष्ठेति नक्षत्रनामैव । न च 'नीलज्येष्ठेति
इति गुणभूताष्टमीपरामर्शः, तस्या एवाधेयव्याप्यत्वेन प्राधान्या-
वैश्वदेवीतिवदिति वाच्यम् । तत्र देवताऽन्वयद्वारैव प्राधान्यं
त्विह तथेति वैषम्यात् । अन्यतरयोगस्याप्यभावे मध्याह्नादूर्ध्वं
र्तमानं ग्राह्यम् । "यस्मिन्दिने भवेत् ज्येष्ठा" इति वचनादिति ।
मैत्रेणेति । निर्णीतपूजादिनात् पूर्वेद्युरनुराधायामावाहनमुत्तरे-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करोति हन्ति तत्पुण्यं द्वादशद्वादशीभवम् ॥'

इति तत्रैव स्कान्दाच्च । अस्य तत्रैव प्रतिप्रसवः । मार्कण्डेयः—

'विशेषेण महीपाल श्रवणं वर्धते यदि ।

*तिथिक्षये न भोक्तव्यं *द्वादशीं लङ्घयेन्न हि ॥' इति ।

*केचित्तु—

'यदा त्वपरिहार्यो योगस्तदा श्रवणनक्षत्रे त्रेधाविभक्ते मध्यमविंशतिघटिकायोगं त्यक्त्वा पारणं कार्यम् । तदुक्तं *विष्णुधर्मे—

श्रुतेश्च मध्ये परिवर्तमेति

सुप्तिप्रबोधपरिवर्तनमेव वर्ज्यम् । इति ।

केचिच्चतुर्धा विभज्य मध्यपादद्वयं वर्ज्यमाहुः । अत्र मूलं चिन्त्यम् ॥

अत्रैव विष्णुपरिवर्तनोत्सवं कुर्यात् । सन्ध्यायां विष्णुं सम्पूज्य प्रार्थयेत् । मन्त्रस्तु तिथितत्त्वे उक्तः—

'ॐ वासुदेव जगन्नाथ प्रासेयं द्वादशी तव ।

पार्श्वेन परिवर्तस्व सुखं स्वपिहि माधव ॥' इति ।

अत्रैव शक्रध्वजोत्थापनमुक्तमपरार्के गर्गेण—

'द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदे तथा ।

शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ॥'

द्युश्च मूले विसर्जनमित्यर्थः ।

*तिथिक्षये=एकादशीक्षये । अत्र हेतुमाह—

*द्वादशीमिति । विवेचनमतमाह-*केचित्त्विति । वस्तुत 'आभाकासित'इति 'मैत्राद्यपादे स्वपितीह'इति च निर्मूलम् । तदाऽप्युपोष्यैकादशीमित्यादि बोध्यम् । *विष्णिवति । "श्रुतेश्च मध्ये परिवर्तमेति"इति "सन्ध्यायां परिवर्तनम्"इति चोक्तेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यमेव श्रवणद्वादशी* । तत्रैकादश्यां*द्वादशीश्रवण-
गे सैवोपोष्या ।

'एकादशी द्वादशी च वैष्णव्यमपि तत्र चेत् ।
तद्विष्णुशृङ्खलं नाम विष्णुसायुज्यकृद्भवेत् ॥'

इति विष्णुधर्मोक्तेः । नारदीयेऽपि—

'संस्पृश्यैकादशीं राजन्द्वादशीं यदि संस्पृशेत् ।
श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति ॥
द्वादशी श्रवणस्पृष्टा स्पृशेदेकादशीं यदि ।
स एव वैष्णवो योगो विष्णुशृङ्खलसञ्ज्ञितः* ॥'

इति हेमाद्रौ मात्स्योक्तेश्च । *दिनद्वये द्वादशीश्रवण-
गेऽपि पूर्वा । निर्णयामृते त्वस्य पूर्वार्धमन्यथा पठितम्-

'द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदि ।' इति ।

तेन हेमाद्रिमते एकादश्याः श्रवणयोगाभावेऽपि त-
त्रद्वादशीयोगमात्रेण विष्णुशृङ्खलं भवति । निर्णया-

---

*श्रवणद्वादशीति । अस्यां चाल्पश्रवणयोगेऽपि तन्नि-
मित्तमुपवासादि कार्यम् ।

'द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः' ।

इति मात्स्यात् । तत्र एकस्मिन्नेव दिने श्रवणयोगवती शुद्धाधिका
विद्धाधिका वा, तत्र न सन्देहः । *एकादश्यामित्यादि योगे
वन्तम् । एकादशीदिन एव एकादशीद्वादश्योरुभयोः श्रवणयोगे
त्यर्थः । *संज्ञित इति ।

'उपोष्य तस्मिन्नहनि नरः संक्षीणकिल्बिषः ।
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभाम् ॥' इति,

तत्र एकादशीद्वादशीप्रयुक्तोपवासद्वयं तन्त्रेण भवति । *दि-
नद्वय एवेति । विद्धाधिकाया दिनद्वये श्रवणयोगे एकादशी-
त्या ग्राह्येत्यर्थः । 'द्वादशी श्रवणस्पृष्टा'इत्युक्तेरिति भावः । अत्रो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मृतमते* तु-'श्रवणस्यैकादशीद्वादशीभ्यां योग एव विष्णुशृङ्खलं नान्यथेति । *यदा निशीथानन्तरं सूर्योदयावधि द्विकलामात्रमपि श्रवणर्क्षं भवति तदाऽपि पूर्वैव । तदुक्तं तत्रैव नारदीये इमां प्रकृत्य—

'तिथिनक्षत्रयोर्योगो*योगश्चैव नराधिप ।
द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिकः ॥' इति ।

योगः शिवरात्र्यादौ शिवयोग आदिः ।

*'द्वादशी श्रवणस्पृष्टा कृत्स्ना पुण्यतमा तिथिः ।
*न तु सा तेन संयुक्ता तावत्येव प्रशस्यते ॥'

इति मदनरत्ने मात्स्याच्च । दिवोदासीये तु—

'रात्रेः प्रथमपादे चेच्छ्रवणं हरिवासरे ।
तदा पूर्वामुपवसेत्प्रातर्भान्ते च पारणम् ॥'

इत्युक्तम् । इदं तु निर्मूलत्वात्पूर्ववचोविरोधाच्चोपेक्ष्यम् । इयं बुधवारेऽतिप्रशस्ता ।

'बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् ।
अत्यन्तमहती सा स्याद्दत्तं भवति चाक्षयम् ॥'

इति हेमाद्रौ स्कान्दात् । यानि तु पठन्ति—

भयत्र तन्त्रेणैकादशीद्वादशीप्रयुक्तमुपवासद्वयं वक्ष्यति । *मते त्विति । तुनाऽरुचिः । सकलधार्मिकसंमतपाठपरित्यागात् । शुद्धाधिकामधिकृत्याह—*यदा निशीथेति । *योगश्चैवेति । शिवयोगादेः=शिवचतुर्दश्यादेः पुण्यतमत्वप्रयोजको योगश्चैवेत्यर्थः । अत्र यथा व्यतीपातादियोगो दानादिविषयस्तथाऽयमपि, उपवासे तु अन्तत उदयास्तमयान्तत्वमपेक्षितमहोरात्रसाध्यत्वानुरोधादित्याह—*द्वादशीति । *न त्विति ।

'यावती तेन संयुक्ता तावत्येव प्रशस्यते' ।

इति तु न । तेन तावत्यां यत्कर्तुं शक्यं स्नानादि तद्योगका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*'उत्तराषाढसंयुक्ता श्रोणामध्याह्नगाऽपि वा।
आसुरी सैव तारा स्याद्धन्ति पुण्यं पुराकृतम् ॥
उदयव्यापिनी ग्राह्या श्रोणा द्वादशिकायुता।
विश्वर्क्षसंयुता सा च नैवोपोष्या शुभप्सुभिः ॥'

इत्यादीनि विष्णुधर्मस्कान्दभविष्यादिवचनानि तानि
र्मूलानि । यदपि स्मृत्यर्थसारे 'उदयव्यापिनी ग्राह्या'
त्युक्तम्, यच्च बृहन्नारदीये-

'उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते ।' इति,
तद्यदा शुद्धाधिका द्वादशी परदिन एवोदये
वणयोगः, पूर्वेद्धि च तद्भिन्ने काले योगस्तत्परम् ।
दिनद्वये उदययोगे पूर्वैव बहुकर्मकालव्याप्तेरित्युक्तं
मदनरत्ने। यदा त्वेकादश्येव श्रवणयुता न द्वादशी तदापि
र्वैव । श्रवणद्वादशीव्रतं तु द्वादश्याः श्रवणयुक्ताया
लाभे एकादश्याश्च तद्युक्ताया लाभे तत्रैव कार्यम् ।

*'यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित् ।
एकादशी तदोपोष्या पापघ्नी श्रवणान्विता ॥'

इति मदनरत्ने नारदीयोक्तेः । यदा परैवर्क्षयुता तदा
रा । तत्र शक्तेनोपवासद्वयं कार्यम् ।

'एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ।

कं तदेव स्यात् । इह तु श्रवणसंबन्धेन पूर्वोत्तरयोरपि काल-
दुपवासादि सुकरमित्यर्थः । *उत्तराषाढेति । उक्तस्थले
त्युक्तमसङ्गतम्, उत्तराया औचित्यादिसभिमानः । *यदा नेति ।
श्रवणद्वादशीप्रयुक्तमुपवासादि सर्वमप्येकादश्यां कार्यमित्यर्थः ।
द्धाधिकाया अपि परदिने श्रवणयोगाभावे श्रवणयोगवती
द्धाऽपि प्राप्ता(१) ।

---

(१) 'ग्राह्या' इति कपुस्तके पाठः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चात्र *विधिलोपः स्यादुभयोर्दैवतं हरिः ॥'
इति भविष्योक्तेः । यत्तु विष्णुधर्मे-
'पारणान्तं व्रतं ज्ञेयं व्रतान्ते विप्रभोजनम् ।
असमाप्ते व्रते पूर्वे नैव कुर्याद् व्रतान्तरम् ॥'
इति, तदे*तद्भिन्नपरम् । अत्र गौडाः—
'शृणु राजन्परं काम्यं श्रवणद्वादशीव्रतम् ।'
इति स्थूलशीर्षवचनात्काम्यमेवेदम् । तेनाशक्तस्य नित्यैकादशीव्रतमेवेति मन्यन्ते ।
'द्वादश्यामुपवासेन शुद्धात्मा नृप सर्वशः ।
चक्रवर्तित्वमतुलं संप्राप्नोत्युत्तमां श्रियम् ॥'
इति गौडनिबन्धे मार्कण्डेयोक्तेश्च । दाक्षिणात्यास्तु-
'एकादश्यां नरो भुक्त्वा द्वादश्यां समुपोषणात् ।
व्रतद्वयकृतं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥'
इति वराहवामनपुराणोक्तेः श्रवणद्वादशीव्रतमेवे-

'दशम्येकादशी यत्र सा नोपोष्या भवेत् तिथिः ।
श्रवणेन तु संयुक्ता सा शुभा सर्वकामदा ॥'
इति वह्निपुराणात्, तदापि एकादश्युपवासस्य तेन सह तन्त्रमेव । *विधिलोपः=एकादशीपारणाहानिप्रयुक्तः । *एतद्भिन्नेति । भिन्नदैवत्यव्रतमित्येकोऽर्थः । वस्तुतस्तु चतुर्थीपञ्चम्यादौ स्वस्वपारणाकालमालोच्य भिन्नदैवत्योपवासोपक्रमतः कदाचित्क्रमेणोपवासद्वयं प्राप्तं तत्र शेषिलोपापत्त्या पारणाङ्गाबाधवदिहापि तत्सिद्धेर्न चात्रेत्यर्थवादः किं तु कुर्यादित्यस्य प्रारभेदित्यर्थः । तेनानुवृत्तं व्रतं कार्यमिति सिध्यति । यत्रैकादशी शुद्धा द्वादशी त्वधिका परोदये श्रवणयोगवती च तत्र स्मार्तानामेकादशीपारणानन्तरमौदयिकश्रवणद्वादश्यामुपवासः, वैष्णवानां तु तत्रापि द्वादश्यामेवोपवास इति स्वस्वपारणाकालमालोच्य एका-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याहुः । *भुक्त्वेति फलाद्याहारपरं न त्वन्नपरम् 'अन्ना-
श्रितानि पापानि' इति निषेधात् ।

'उपवासद्वयं कर्तुं न शक्नोति नरो यदि ।
प्रथमेऽह्नि फलाहारी निराहारोऽपरेऽहनि ॥'

इति दिवोदासीये भविष्योक्तेश्च । *अशक्तौ तु
*गृहीतैकादशीव्रतो यस्तं प्रति उक्तं मात्स्ये-

'द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि ।
उपोष्यैकादशीं तत्र द्वादश्यां *पूजयेद्धरिम् ॥' इति ।

पूजयेन्न*तूपवसेदित्यर्थः । *अगृहीतैकादशीव्रतश्चे-
दैकादश्यां भुक्त्वा द्वादश्यामुपवसेत् ।

*'एवमेकादशीं भुक्त्वा द्वादशीं समुपोषयेत् ।
पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयम् ॥'

दशीश्रवणोपवासयोरुपक्रम एव न सम्भवतीत्याशयेन एतद्भिन्ने-
ति । श्रवणद्वादशीव्रतमेवेत्येवकारादरुचिः । एकादश्यां नरो भुक्त्वे-
त्यस्याशक्तौ गौणमुख्योपवासाभ्यामुपवासद्वयमर्थ इत्याह-*भु-
क्त्वेति । *अशक्तौ=गौणमुख्योपवासद्वयेऽप्यशक्तौ । *गृही-
तैकादशीव्रतः=कृतैकादशीव्रतसंकल्पः । *पूजयेदिति । सं-
कल्पितमेकादश्युपवासं विधाय श्रवणद्वादशीप्रयुक्तं विष्णुपूजादि
कुर्यादित्यर्थः । तेन एकादश्युपवासहानौ संकल्पबाधापत्तिः ।
विष्णुपूजादेरकरणे शेषविरोधश्च समाहितः । ननूपवासाङ्गहरि-
पूजायाः प्राप्तत्वादेव तद्विधिर्व्यर्थ इत्यत्राह-* नतूपवसेदिति ।
पूजयेदिति सावधारणमिति भावः । *अगृहीतेति । प्रागेवोप-
वासद्वयासामर्थ्यादसंकल्पितेत्यर्थः । उपक्रान्तश्रवणद्वादशीव्रतप-
रित्यागे इति शेषः । यद्यप्यत्र काम्यं नित्यस्य बाधकमिति न्यायेन
एकादश्युपवासत्यागे दोषो नास्तीति सिद्धमेव तथापि तं स्पष्टी-
कर्तुमाह-*एवमिति । एतच्च मयूखे न दृश्यते । उभयान्ते इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति नारदीयोक्तेः । पारणं तूभयान्तेऽन्यतरान्ते वा कुर्यात् ।

'तिथिनक्षत्रनियमे तिथिभान्ते च पारणम् ।'

इति स्कान्दात् ।

'तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् ।
पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः ॥'

इति नारदीयादिति हेमाद्रिः । यद्यप्यत्र नक्षत्रमात्रान्तेऽपि पारणं प्रतिभाति, तथापि तिथिमात्रान्ते ज्ञेयम्, न त्वृक्षान्ते । तिथिमध्येऽपि—

'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः ।
ऋक्षान्ते पारणं कुर्याद्विना श्रवणरोहिणीम् ॥'

इति विष्णुधर्मे श्रवणान्तमात्रे पारणानिषेधात् । रोहिण्यां तु-'भान्ते कुर्यात्तिथेर्वापि' इति वह्निपुराणात् तदन्तेऽप्यस्तु, न त्वत्रैवमस्तीति न ऋक्षान्तोऽनुकल्प इति। मदनरत्ने असंभवे तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणा ॥'

इति ज्ञेयम् । यत्तु मदनरत्ने-'द्वादशीवृद्धौ श्रवणवृद्धौ वा श्रवणान्त एव पारणं कुर्यात् ।

'पारणं तिथिवृद्धौ तु द्वादश्यामुडुसंक्षयात् ।
वृद्धौ कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते ॥'

इति वह्निपुराणादित्युक्तम् । तत्प्रकरणादेतस्यामेव

मुख्यः कल्पः । यत्तु पारणादिने तिथ्यपेक्षया ऋक्षस्याधिक्ये तिथ्यन्ते पारणे कृते द्वादश्यामनिवृत्त्या एकादश्युपवासासिद्धिरतस्तत्र द्वादशीमध्य एव पारणं कार्यम् । तन्त्रिप्रासङ्गिनोर्विरोधे तन्त्रिणो बलीयस्त्वात् । दिनत्रयसाध्यमेकादशीव्रतं हि तन्त्रि, तत्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रवणयुक्तैकादश्यां *विहितविजयैकादशीव्रतपरं *न तु श्रवणद्वादशीपरमिति मदनरत्ने । गौडास्तु श्रवणद्वादशीपरमाहुः । अत्र विधिर्मदनरत्ने विष्णुधर्मे–

*'तस्मिन्दिने तथा स्नानं यत्र क्वचन संगमे ।'

त्रमध्यपातिश्रवणद्वादशीव्रतं तु प्रासङ्गि पशुपुरोडाशवदिति, तत्तु ग्रम् । न्यायादपि वचनमात्रत्वात् । मदनरत्ने इत्यरुचिः । सा विना श्रवणरोहिणीमिति पर्युदासः रोहिणीनिमित्तके इव श्रवणनिमित्तकेऽप्युपवासे उभयान्तपक्षस्य मुख्यत्वार्थः । एवं चोत्राप्यन्यतरपक्षो गौण इति सिद्ध्यति । अन्यथा रोहिण्यामृन्तपारणस्य सर्वथा निषेद्धुमशक्यतया वैरूप्यापत्तेरिति । आसम्भवे तु—

'तिथ्यन्ते तिथिभान्ते वा पारणं यत्र चोदितम् ।
यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणम् ।'

इति पाठं कल्पयन्ति केचित् । उडुवृद्धाविति पाठः । वृद्धौर्यादिति पाठे वृद्धावुडुवृद्धावित्येवार्थः । *विहितेति । 'एकादशी सा सा स्यात्' इत्यग्रिमवचनात् । *नत्विति । तत्र तिथ्यन्तपक्षापि सत्त्वात् । वस्तुतस्तु विजयैकादशीव्रतं भिन्नमिति प्रमादात् दश्यास्ते विधिः'इत्यादिना पूजाप्रकारभेदस्य एषा व्युष्टिः इत्यादिना तत्प्रयुक्तफलभेदस्यैव चाभिधानात् । तस्मात् पारणातिथिवृद्धावित्येतद्विष्णुश्रृङ्खलं पारणापरमिति । *तस्मिन्निति । भविष्ये–

'मासि भाद्रपदे शुक्लद्वादशी श्रवणान्विता ।
सर्वकामप्रदा पुण्या उपवासो महाफलः ॥
श्रवणे सङ्गमाः सर्वे परव्युष्टिप्रदाः स्मृताः ।
विशेषा द्वादशीयुक्ते बुधयुक्ते विशेषतः ॥
सङ्गमे सरितां स्नात्वा द्वादशीं समुपोषितः ।
समग्रं समवाप्नोति द्वादशद्वादशीफलम् ॥'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा—

'दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे।
वस्त्रसंवेष्टितं दत्त्वा छत्रोपानहमेव च॥
न दुर्गतिमवाप्नोति गतिमग्र्यां च विन्दति।'

मन्त्रस्तु भविष्ये घटे जनार्दनपूजामभिधाय-

'नमो नमस्ते गोविन्द बुधश्रवणसंज्ञक।
अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव॥
प्रीयतां देवदेवेशो मम संशयनाशनः॥' इति॥

वामनावतारनिमित्तोपवासस्तु व्रतहेमाद्रौ भविष्ये-

'द्वादश्यास्ते विधिः प्रोक्तः श्रवणेन युधिष्ठिर।
सर्वपापप्रशमनः सर्वसौख्यप्रदायकः॥
एकादशी यदा सा स्याच्छ्रवणेन समन्विता।
विजया सा तिथिः प्रोक्ता भक्तानां विजयप्रदा॥'

इत्युपक्रम्य—

'अथ काले बहुतिथे गते सा गुर्विणी भवेत्।
सुषुवे नवमे मासि पुत्रं सा वामनं हरिम्॥'

इत्युक्त्वा—

'एतत्सर्वं समभवदेकादश्यां युधिष्ठिर।

वरुणासङ्गमे स्नानमुक्तं लैङ्गे—

'अतः परं तु संसेव्यं गङ्गावरुणसङ्गमम्।' इति।

भविष्ये—

'सवत्सां तुल्यवर्णां च शीलिनीं गां पयस्विनीम्।
चन्दनादिभिरालिप्य पुष्पमालाभिरर्चयेत्॥
अर्घ्यं ताम्रमये पात्रे कृत्वा पुष्पाक्षतैस्तिलैः।
पादमूले तु दद्याद्वै मन्त्रेणानेन पाण्डव॥
क्षीरोदार्णवसम्भूते सुरासुरनमस्कृते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेनेष्टा देवदेवस्य सर्वथा विजया तिथिः ॥
एषा व्युष्टिः समाख्याता एकादश्यां मया तव ।
पूर्वमेव समाख्याता द्वादशी श्रवणान्विता ॥'
इत्युपसंहारादेकादश्यामेव* । व्युष्टिः फलम् । भाग-
तेऽष्टमस्कन्धे तु द्वादश्यां वामनोत्पत्तिरुक्ता—
'श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः ।
ग्रहनक्षत्रताराद्याश्चक्रुस्तज्जन्मदक्षिणम् ॥
द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप ।
विजया नाम सा प्रोक्ता यस्यां जन्म विदुर्हरेः ॥
श्रोणायां चन्द्रे, अभिजित्=श्रवणप्रथमोंऽशः । गौडा
प्येवम् । अत्र कल्पभेदाद्व्यवस्था । तद्विधिश्च हेमाद्रौ
हिपुराणे—
'नदीनां सङ्गमे स्नायादर्चयेदत्र वामनम् ।
सौवर्णवस्त्रसंयुक्तं द्वादशाङ्गुलमुच्छ्रितम् ॥'

सर्वदेवमये मातर्गृहाणार्घ्यं नमो नमः ।
ततो माषादिसंसिद्धान् वटकान्विनिवेदयेत् ॥
सुरभित्वं जगन्मातर्देवि विष्णुपदे स्थिता ।
सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस ॥'
ततः—
'सर्वदेवमये देवि सर्वदेवैरलंकृते ।
मातर्ममाभिलषितं सफलं कुरु नन्दिनि ॥'
इति प्रार्थयेत् ।
'तत्रैव तद्दिने तैलस्थालिपक्वं युधिष्ठिर ।
गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेत् ॥' इति ।
*एकादश्यामेवेति । श्रवणसाहित्यात् । श्रवणसाहित्यं तु
ज्ञास्त्यार्थम् । 'भृङ्गारः=कनकालुका ॥'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ततो विधिवत्संपूज्य)

हिरण्मयेन पात्रेण दद्यादर्घ्यं प्रयत्नतः ।
नमस्ते पद्मनाभाय नमस्ते जलशायिने ॥
तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे ।
नमः कमलकिञ्जल्कपीतनिर्मलवाससे ॥
महाहरिवपुस्कन्धधृतस्कन्धाय चक्रिणे ।
नमः शार्ङ्गसीरबाणपाणये वामनाय च ॥
यज्ञभुक्फलदात्रे च वामनाय नमो नमः ।
देवेश्वराय देवाय देवसंभृतिकारिणे ।
प्रभवे सर्वदेवानां वामनाय नमो नमः ॥
एवं संपूजयित्वा तं द्वादश्यामुदये रवेः ।
शृङ्गारसहितं तं तु ब्राह्मणाय निवेदयेत् ॥
वामनः प्रतिगृह्णाति वामनोऽहं ददामि ते ।
वामनं सर्वतोभद्रं द्विजाय प्रतिपादयेत् ॥' इति ।

अनन्तभट्टोऽप्याह-'श्रवणद्वादश्यां जनार्दननामा विष्णुः पूज्यते। श्रवणैकादश्यां वामनावतारः' इति । श्रवणयुतशुद्धैकादश्यलाभे तु दशमीविद्धाऽपि श्रवणर्क्षयुता कार्या ।

'*दशम्यैकादशी यत्र सा नोपोष्या भवेत्तिथिः ।
श्रवणेन तु संयुक्ता सा चेत्स्यात्सर्वकामदा ॥'

इति वह्निपुराणादित्युक्तं मदनरत्ने । पूजा च मध्याह्ने कार्या । 'अह्नो मध्ये वामनो रामरामौ' इति पूर्वोक्तवचनात् ॥

अत्रैव दुग्धव्रतं संकल्पयेत् । तदुक्तम्—'दुग्धमाश्व-

---

*दशमीति । विजयैकादशीव्रतस्य भिन्नत्वमते परेद्युः श्रवणयोगाभावे तन्त्रमेव न तु परोऽप्युपवास इति भावः । भागवतात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जे मासि' इति । अत्रेदं चिन्त्यते–दुग्धव्रते पायसादि
र्ज्यं न वेति । नेति केचित् । न हि प्रकृतिवर्जने विकार-
र्जनं युक्तम् । दधिघृतादीनामपि वर्जनापत्तेः । न च
त्र प्रकृतिरसोपलम्भस्तद्वर्जनमिति वाच्यम् । मांसवि-
ारस्यौष्ट्रदध्यादेश्चावर्जनापत्तेः । तस्माद्दध्यादिवत्पाय-
ादि भक्ष्यमिति । अत्र ब्रूमः–यत्र विकारे प्रकृतिरसोप-
म्भस्तत्प्रत्यभिज्ञा वा तत्र विकारस्यापि निषेधः ।
स्ति च मांसविकारे मांसप्रत्यभिज्ञा मांसत्वानपायात् ।
तु–औष्ट्रदध्यादेरनिषेधापत्तिरिति, तन्न । औष्ट्रमिति
विकारतद्धितेन निषेधात् । तथा च विज्ञानेश्वरः—

'औष्ट्रमेकशफं स्त्रैणमारण्यकमथाविकम् ।'

इत्यत्र 'औष्ट्रमिति विकारतद्धिताच्छकृन्मूत्रादीना-
पि निषेधः' इत्याह । नन्वेवं

'सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ।'

इति सन्धिन्यादिक्षीरनिषेधेऽपि दध्यादिग्रहणं स्यात् ।
त्यं प्राप्तम् । वचनेन परं निषेधः । तदाहापरार्के शङ्खः–

"क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।
सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः ॥" इति ।

व्रतं=गोमूत्रयावकम् । तस्मात्पायसे दुग्धरसोपल-
म्भाद्वर्जनम् । अत एवाऽमिक्षायां दधिसत्त्वेपि माधुर्यो-
पलम्भात्पयोरूपत्वमुक्तं मीमांसकैः । तदुक्तम्—

'पय एव घनीभूतमामिक्षेत्यभिधीयते' । इति ।

मध्यन्दिनगतोऽन्त्यः' इतीत्यादि । अत्रैव शक्रध्वजोत्थापनम् ।

"द्वादश्यां तु सिते पक्षे मासि प्रौष्ठपदेऽपि वा ।
शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे ॥"

इति गर्गोक्तेः ।

 Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'दध्यादिषु तु तदभावादवर्जनम्' इति ।

एवं=दध्यादिव्रते न तक्रादीनां निषेधः । उक्तोभयहेत्वभावादिति केचित् । पूर्वोक्तशङ्खवचनात्सर्वविकारनिषेध इति युक्तं प्रतीमः ॥ इति दुग्धव्रतम् ॥

भाद्रपदशुक्लचतुर्दश्यामनन्तव्रतम् । तत्र*त्रिमुहूर्ताप्यौदयिकी ग्राह्येति माधवः । तदुक्तम्—

'उदये त्रिमुहूर्तापि ग्राह्याऽनन्तव्रते तिथिः ।' इति ।

*'मध्याह्ने भोज्यवेलायाम्' इति कथायां श्रवणात् 'उपरि हि देवेभ्यो धारयति' इतिवद्विधिकल्पनात् ।

'पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः ।'

इति माधवीये वचनात् मध्याह्नव्यापिनी ग्राह्येति तु दिवोदासः । प्रतापमार्तण्डेऽप्येवम् । इदमेव च युक्तम् । निर्णयामृते तु घटिकामात्राऽप्यौदयिकीत्युक्तम् ।

'तथा भाद्रपदस्यान्ते चतुर्दश्यां द्विजोत्तम ।
पौर्णमास्याः समायोगे व्रतं चानन्तकं चरेत् ॥'

इति भविष्योक्तेः ।

"मुहूर्तमपि चेद्भाद्रे पूर्णिमायां चतुर्दशी ।
सम्पूर्णा तां विदुस्तस्यां पूजयेद्विष्णुमव्ययम् ॥"

इति स्कान्दाच्चेति । *अत्र मूलं चिन्त्यम् । *द्व्यहेप्यौ-

---

*त्रिमुहूर्त्ताऽपीति । अपिस्त्याज्यः । पूजा तु तत्र मध्याह्न एव । साकल्यवचनापादिततिथिसत्त्वात् । मतान्तरमाह-*मध्याह्न इति । 'उपरि हि'इत्याद्यर्थवादो विधिसापेक्ष इति युक्तं तत्र विधिकल्पनम् । प्रकृते च साकल्यवचनानुगृहीततिथिमादाय पूजोपपत्तेर्न तदित्यरुचिः । *अत्र मूलं चिन्त्यमिति । योगमुहूर्त्तादिवचनानां त्रिमुहूर्त्तस्तावकत्वेनोपपत्तेः स्वार्थमात्रे मानाभावात् । *द्व्यहेऽप्यौदयिकत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ायिकत्वे पूर्णत्वात्पूर्वेति युक्तम् । (तत्त्वं तु विध्यर्थवा-
योर्भिन्नार्थत्वे एकवाक्यत्वायोगात् 'सन्दिग्धेषु एकवा-
यत्वात्' इति न्यायेन पूर्वा परा वा मध्याह्नव्यापिन्येव
ुख्या । माधवस्तु सामान्यवाक्यान्निर्णयं कुर्वन् भ्रान्त
व । अनन्तव्रतस्य पुराणान्तरेष्वभावान्निबन्धान्तरेष्व-
ावाच्च वचनं निर्मूलमेवेति ॥)

अथागस्त्यार्घ्यः । तत्कालो व्रतहेमाद्रौ भविष्ये—

"कन्यायामागते सूर्ये अर्वाग्वा सप्तमे दिने ।
कन्यायां समनुप्राप्ते ह्यर्घकालो निवर्तते ॥"

तेन उदयोत्तरमपि सप्तदिनमध्ये इत्यर्थः । यत् पाद्मे—

"आ सप्तरात्रादुदयाद्यमस्य दातव्यमेतत्सकलं नरेण ।
ावत्समाः सप्तदशाऽथ वा स्युरथोर्ध्वमप्यत्र वदन्ति॥
चित् ॥"

यमस्य=अगस्त्यस्य । उदयकालश्च दिवोदासीये उक्तः—

"उदेति याम्यां हरिसंक्रमाद्रवे-
रेकाधिके विंशतिमे ह्यगस्त्यः ॥
स सप्तमेऽस्तं वृषसंक्रमाच्च
प्रयाति गर्गादिभिरभ्यभाणि ॥"

अत्र विधिर्विष्णुरहस्ये—

"काशपुष्पमयीं रम्यां कृत्वा मूर्तिं तु वारुणेः ।
प्रदोषे विन्यसेत्तां तु पूर्णकुम्भे स्वलङ्कृताम् ॥
कुम्भस्थां पूजयेत्तां तु पुष्पधूपविलेपनैः ।
दध्यक्षतबलिं दद्याद्रात्रौ कुर्यात्प्रजागरम् ॥"

पूजा च वक्ष्यमाणार्घ्यमन्त्रेण कार्या—

"प्रभाते तां समादाय यायात्पुण्यं जलाशयम् ।

ाति । यत्र परेऽह्नि न त्रिमुहूर्त्ता तत्र विद्धापि पूर्वा बोध्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निशावसाने तां पश्यन् जलान्ते प्रतिमां मुनेः ॥
अर्घ्यं दद्यादगस्त्याय भक्त्या सम्यगुपोषितः ।"

मात्स्ये तु—

"अङ्गुष्ठमात्रं पुरुषं तथैव सौवर्णमत्यायतबाहुदण्डम्।"

पूर्वं काशमयीत्वशक्तौ—

"चतुर्भुजं कुम्भमुखे निधाय धान्यानि सप्ताङ्कुरसंयुतानि।
सकाशपुष्पाक्षतशुक्तियुक्तं मन्त्रेण दद्याद्द्विजपुङ्गवाय'
धेनुं बहुक्षीरवतीं च दद्यात्सवस्त्रघण्टाभरणां द्विजाय।'

भविष्ये—

"विरूढैः सप्तधान्यैश्च वंशपात्रे निधापितैः।
सौवर्णरूप्यपात्रेण ताम्रवंशमयेन वा ॥
मूर्ध्नि स्थितेन नम्रेण जानुभ्यां धरणीं गतः।"

विष्णुरहस्ये—

*"अगस्त्यः खनमानेति पठन्मन्त्रमिमं मुनेः।
अर्घ्यं दद्यादगस्त्याय, शूद्रे मन्त्रविधिस्त्वयम् ॥
काशपुष्पप्रतीकाश वह्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥
विन्ध्यवृद्धिक्षयकर मेघतोयविषापह ।
रत्नवल्लभ देवेश लङ्कावास नमोऽस्तु ते ॥
वातापी भक्षितो येन समुद्रः शोषितः पुरा ।
लोपामुद्रापतिः श्रीमान्योऽसौ तस्मै नमो नमः ॥
येनोदितेन पापानि विलयं यान्ति व्याधयः ।
तस्मै नमोऽस्त्वगस्त्याय सशिष्याय च पुत्रिणे ॥
अगस्त्यः खनमानेति विप्रोऽर्घ्यं विनिवेदयेत् ।
राजपुत्रि महाभागे ऋषिपत्नि वरानने ॥

---

*अगस्त्य इति। "अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोपामुद्रे नमस्तुभ्यमर्घ्यं मे प्रतिगृह्यताम् ।
दत्त्वैवमर्घ्यं कौरव्य प्रणिपत्य विसर्जयेत् ॥
अर्चितस्त्वं यथाशक्त्या नमोऽगस्त्यमहर्षये ।
ऐहिकामुष्मिकीं दत्वा कार्यसिद्धिं व्रजस्व मे ॥
विसर्जयित्वाऽगस्त्यं तं विप्राय प्रतिपादयेत् ।
अगस्त्यो मे मनस्थोऽस्तु अगस्त्योऽस्मिन्घटे स्थितः ॥
अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः ।"
ानमन्त्रः—
"अगस्त्यः सप्तजन्माघं नाशयत्वावयोरयम् ।
अतुलं विमलं सौख्यं प्रयच्छ त्वं महामुने ॥"
तिग्रहमन्त्रो विष्णुरहस्ये—
"त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसम् ।
होमं कृत्वा ततः पश्चाद्वर्जयेन्मानवः फलम्* ॥"
ोमश्चार्घ्यमन्त्रेणाज्येन । भविष्ये—
"दत्वाऽर्घ्यं सप्तवर्षाणि क्रमेणानेन पाण्डव ।
ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः ॥

मिच्छमानः । उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो ज-
म"इति मन्त्रः । (१)*वर्जयेन्मानवः फलमिति । अगस्त्या-
दानं काम्यं न कुर्यादित्यर्थः । अधिकमन्यतोऽवगन्तव्यम् ।

१—अयं मन्त्रो ऋग्वेदसंहितायां द्वितीयाष्टके चतुर्थाध्याये । अ-
व्याख्या च श्रीमत्सायणाचार्यकृता-'अयमगस्त्यो मद्गुरुः खनि-
फलस्योत्पादसाधनैः यज्ञस्तोत्रादिभिः खनमानः=फलमभिमतमुत्पा-
न् प्रजां प्रकर्षेण पुनःपुनर्जायमानमपत्यं=कुलस्यापतनसाधनं पुत्रा-
कं बलं चेच्छमानः सन्, यद्वा प्रजां=भृत्यादिरूपां चेच्छन् ऋ-
=अतीन्द्रियद्रष्टा महानुभावः उग्रः=उद्गूर्णः संसारे संचरन्नप्यपापः
उभौ वर्णौ=वर्णनीयाकारौ कामं च तपश्च पुपोष । सत्या आशि-
देवेषु=देवेभ्यो जगाम=प्राप्तवान् । यतोऽयं महानुभावस्तस्मादस्मान्
त्यर्थः इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैश्ये च धान्यनिष्पत्तिः शूद्रश्च धनवान्भवेत् ।
यावदायुश्च यः कुर्यात्स परं ब्रह्म गच्छति ॥"
इत्यगस्त्यार्घ्यः ॥

*भाद्रपौर्णमास्यां प्रपितामहात्परांस्त्रीनुद्दिश्य श्राद्धं कार्यम् । तदुक्तं हेमाद्रौ ब्राह्मणमार्कण्डेययोः—
*"नान्दीमुखानां प्रत्यब्दं कन्याराशिगते रवौ ।
पौर्णमास्यां तु कर्तव्यं वराहवचनं यथा ॥"इति ।
नान्दीमुखत्वं चोक्तं ब्राह्मे—
"पिता पितामहश्चैव तथैव प्रपितामहः ।
त्रयो ह्यश्रुमुखा ह्येते पितरः परिकीर्तिताः ॥
तेभ्यः पूर्वतरा ये च प्रजावन्तः सुखैधिताः ।
ते तु नान्दीमुखा नान्दी समृद्धिरिति कथ्यते ॥"
एतच्च प्रत्यब्दमित्युक्तेः पक्षश्राद्धपक्षे सकृन्महाल-

---

*भाद्रेति । भाद्र्यां कन्यार्कयोगाभावे तद्युक्तायामाश्विन्यां पूर्णिमायां कार्यमिति तु रामचन्द्रः, तदसत् । वर्जयित्वा प्रौष्ठपदीमिति भाद्र्या एव पर्युदासात्कन्यार्कयोगः स्तावक इति । तदलाभेऽपि भाद्र्या एवाग्राह्यत्वात् । प्रौष्ठपदीनं श्राद्धमिति शिष्टव्यवहाराच्च । अत्र धूरिलोचने विश्वेदेवौ कन्यानिमित्तत्वात् ।
*नान्दीमुखानामिति । इयं च नान्दीमुखसंज्ञा विश्वेदेवव्याहृता । वृद्धिश्राद्धीयानां तु तत्साधारणी ऊर्ध्ववक्त्रपितॄणामेव ।
'ऊर्ध्ववक्त्रास्तु ये तत्र ते नान्दीमुखसंज्ञिताः ॥'
इत्युक्तेः ।
"नान्दीमुखेभ्यो देवेभ्यः प्रदक्षिणकुशासनम् ।
पितृभ्यस्तन्मुखेभ्यश्चाऽप्रदक्षिणमिति स्थितिः ॥"
इति पराशराच्च । एषामेव प्रसन्नमुखसंज्ञाऽप्यधिका ।
'प्रसन्नमुखसंज्ञास्तु मङ्गलीया यतस्तु ते' ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षे चावश्यकमिति प्रयोगपारिजाते । *अत्र माता-
हा अपि कार्याः ।

"पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।"
इति धौम्योक्तेः । पितृशब्दस्य च जनकपरत्वे बहु-
वनविरोधेन पितृभावापन्नपरत्वात् । वार्षिके तु वच-
न्निवृत्तिः । नच जीवत्पितृकस्यान्वष्टकायां मातृश्राद्धे
दापत्तिः । इष्टापत्तेः । अत एव स उक्तश्राद्धेषु स्वमातृ-
तामहयोर्दद्यादिति मदनरत्नकालादर्शौ । एतच्च जी-
त्पितृकश्राद्धे वक्ष्यामः । केचित्तु अजहल्लक्षणया पि-
ादयो यत्र तत्र मातामहास्तेनात्र नेत्याहुः । न चात्र
ाम्ना नान्दीश्राद्धधर्मातिदेशः । वैष्णवादिशब्दवद्देव-
ापरस्य कर्मनामत्वाभावात् । नापि नान्दीमुखत्वं पि-
विशेषणं पारिभाषिकत्वादिति दिक् । तथा निर्णय-
ापे गार्ग्यः—

"पौर्णमासीषु सर्वासु निषिद्धं पिण्डपातनम् ।
वर्जयित्वा प्रौष्ठपदीं यथा दर्शस्तथैव सा ॥" इति ॥
इति श्रीमीमांसकरामकृष्णभट्टात्मजभट्टकमलाकरकृते
र्णयसिन्धौ भाद्रपदमासः समाप्तः ॥

ति वचनात् वृद्धिश्राद्धस्य नान्दीमुखश्राद्धमिति नामधेयं
। एतेनात्र नाम्ना नान्दीश्राद्धधर्मातिदेशः प्रत्युक्तः । वि-
ादिशब्दवदस्य देवतापरत्वेन कर्मनामत्वाभावाच्च । नापि
ादेर्नान्दीमुखत्वम् । अश्रुमुखत्वात् । अन्यत्र पारिभाषि-
त्वाच्च । 'पूर्वतरा' इति बहुवचनात् सपत्नीकत्वादिपार्वण-
ानं च बोध्यम् । अविरोधात् । केषाञ्चिन्मतमाह—
त्रेति । दिगर्थस्तु पित्रपितृसमुदाये पितृशब्दलक्षणास्वीका-
पत्तिमपेक्ष्य उक्तार्थस्यौचित्यमिति अत्रेदं दूषणम् । अतोऽत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातामहा न कार्याः प्रापकाभावात् । न च 'पितरो यत्र पूज्यन्ते' इति वाक्यं प्रापकम् । तत्र हि पितृशब्दो न सपिण्डीकरणान्तश्राद्धजन्यपितृभावापन्नपरः । तथा सति—

"कर्षूसमन्वितं मुक्त्वा तत्राद्यं श्राद्धषोडशम् ।
प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥"

इति परिशिष्टे षोडशश्राद्धपर्युदासानुपपत्तेः । तत्र भवद्रीत्या मातामहाप्राप्तेः, किन्तु जनकादिसमुदायपरः । लिङ्गसमवायन्यायात् । 'प्राणभृदुपदधाति' इति बहुवचनान्तप्राणभृच्छब्दस्य प्राणभृदप्राणभृत्समुदायार्थकत्ववत् । न चैवं तवापि षोडशश्राद्धपर्युदासानुपपत्तिः । पितॄणामुद्देश्यत्वेन तद्गतसंख्याया अविवक्षितत्वात् । नापि चतुर्दश्यां मातामहप्राप्तिः । 'श्राद्धं शस्त्रहतस्यैव' इत्येवकारेण तथा वृत्तेः । न च 'पितरो यत्र' इत्यादिना तदप्राप्तावपि सर्वश्राद्धानां दर्शविकृतित्वात् "मातामहानामप्येवम्' इति वाक्याद्वा तत्प्राप्तिरिति वाच्यम् । वैकृतदेवतान्तरविधिना प्राकृतदेवताबाधात् । यत्र हि सङ्क्रान्त्यादिश्राद्धे न देवतोपदेशस्तत्रैव प्राकृतदेवताप्राप्तिर्न तु प्रौष्ठपद्यादिश्राद्धे इति॥ एवम्—

"आन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि ।
मातुः श्राद्धं पुनः कुर्यात्पितर्यपि च जीवति ॥"

इति जीवत्पितृकस्यान्वष्टक्यश्राद्धे मातुः सपिण्डनान्तश्राद्धजन्यपितृत्वेऽपि न मातामहाः कार्याः । पितरो यत्रेत्योदरमापकत्वस्यावेदितत्वादिति । विष्णुधर्मे—

'गोदाने प्रौष्ठपद्यां च पौर्णमास्यां महाफलम् ।'

मदनरत्ने मात्स्ये—

"यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ।
वृत्रासुरवधोपेतं तद्भागवतमुच्यते ॥
लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कन्यासंक्रमे पराः षोडश घटिकाः पुण्याः, शेषं प्राग्वत् ।
अथ महालयः । तत्र पृथिवीचन्द्रोदये वृद्धमनुः—
*"आषाढीमवधिं कृत्वा पञ्चमं पक्षमाश्रिताः ।
काङ्क्षन्ति पितरः क्लिष्टा अन्नमप्यन्वहं जलम् ॥"

पौर्णमास्यां प्रौष्ठपद्यां स याति परमं पदम् ॥
अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम् ।" इति ॥
ननु 'आश्विने श्राद्धं कुर्यात्' इत्यादौ आश्विनः सौर एव ।
"कन्यागते सवितरि पितृराजानुशासनात् ।
भवेत् प्रेतपुरी शून्या यावद् वृश्चिकदर्शनम् ॥"
इति कन्यासम्बन्धेन श्राद्धविधानात् । एवं नभस्योऽपि सौर
व 'मीनमेषयोर्मेषवृषयोर्वसन्तः' इति सर्वमासानां द्वैविध्येन क-
ायां भाद्रत्वस्यापि सम्भवात् ।
"मासः कन्यागते भानावसंक्रान्तो भवेद्यदि ।
दैवं पित्र्यं तदा कर्म तुलास्थे कर्त्तुरक्षयम् ॥"
इति वचनादनुकल्पत्वेन तुलोक्तेश्चेत्यत्राह-*आषाढीमिति ।
ं पक्षपदम् 'आश्वयुक्कृष्णपक्षे तु' इति पक्षपदं चाश्विनादेश्वा-
त्वे लिङ्गम् । 'मासः कन्यागते भानौ' इति तु न महालयपर-
त्युक्तं प्राक् । महालयश्राद्धं च नित्यं काम्यं च ।
'आषाढयाः पञ्चमे पक्षे यः श्राद्धं न करिष्यति ।
शाकेनापि दरिद्रोऽपि सोऽन्त्यजत्वमुपैष्यति ॥'
इति नागरखण्डात् ।
"शक्रध्वजनिपाताङ्को यः स्यात्पक्षस्तु पञ्चमः ।
स विज्ञेयोऽपरः पक्षः श्राद्धं तत्र विधीयते ॥
पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा ।
प्राप्नोति पञ्चमं दत्त्वा श्राद्धकामांस्तु पुष्कलान् ॥"
इति कार्ष्णाजिन्युक्तेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कन्यायोगे पुण्यतमत्वमाह शाट्यायनिः—

"कन्यास्थार्कान्वितः पक्षः सोऽत्यन्तं पुण्यमुच्यते।"

इति।

अत्र विशेषमाह वृद्धमनुः—

*"मध्ये वा यदि वाऽप्यन्ते यत्र कन्यां व्रजेद्रविः।
स पक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति॥"

तथा ब्रह्माण्डमार्कण्डेययोः—

"कन्यागते सवितरि*दिनानि दश पञ्च च।
पार्वणेनेह विधिना श्राद्धं तत्र विधीयते॥"

तथा च तत्रैव षोडशदिनान्युक्तानि—

"कन्यागते सवितरि यान्यहानि तु षोडश।
क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत्॥"

अत्र हेमाद्रिः षोडशत्वं त्रेधा व्याचख्यौ। तिथिवृद्ध्या पक्षस्य षोडशदिनात्मकत्वे श्राद्धवृद्ध्यर्थमेकः पक्षः,

---

*मध्ये वेति।

"आषाढीमवधिं कृत्वा यः स्यात्पक्षस्तु पञ्चमः।
श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वा॥"

इति आदित्यपुराणे। 'सूर्यः पक्षोपक्रमे' इति शेषात्सर्वस्य पक्षस्य कन्यायोगो नापेक्षित इत्यर्थः। कन्यायोगनैयत्येन यथाश्रुतासङ्गतेः। *दिनानीति। दिनपदं चान्द्रदिनपरतया तिथिपरम्।

'तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्तितः।'

इति विष्णुधर्मात्। एवम् 'अहानि' इत्यत्राहःपदमपि तिथिपरमेव।

'आश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने।'

इति पक्षप्रक्रमेण दिनपदस्य तिथिपरतया तदेकवाक्यत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाद्रपदपूर्णिमया सहेति द्वितीयः, आश्विनशुक्लप्रतिपदा सहेति तृतीयः। *अन्त्य एव तु युक्तः।

"अहःषोडशकं यत्तु शुक्लप्रतिपदा सह।
*चन्द्रक्षयाविशेषेण सापि दर्शात्मिका स्मृता॥"

इति देवलोक्तेः। तत्र पञ्च पक्षाः। तदुक्तं हेमाद्रौ ब्राह्मे—

*"आश्वयुक्कृष्णपक्षे तु श्राद्धं कार्यं *दिनेदिने।
त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा॥"

दिने दिने इति पक्षपर्यन्तत्वमुक्तम्। त्रिभागहीनमिति पञ्चम्यादिपक्षः,

'भौजङ्गीं तिथिमारभ्य यावच्चन्द्रार्कसङ्गमम्।'

इति वाक्यात्। अर्धमित्यष्टम्यादिपक्षः। त्रिभागमिति दशम्यादिपक्षः। त्रिभागहीनमिति चतुर्दशीसहितप्रति-

---

अत्र तिथिवृद्ध्येति पक्षो न युक्तः षोडशत्वस्य नित्यवच्छ्रवणविरोधात्। नापि पूर्णिमासाहित्येनेति पक्षः। अपरपक्षश्रुतिविरोधादत आह—*अन्त्य एवेति। *चन्द्रेति। न दृश्यते चन्द्रोऽस्यामिति व्युत्पत्त्या धातोरचाक्षुषज्ञानार्थकतया तल्लभ्यदर्शत्वेन शुक्लप्रतिपदोऽप्येकीकारान्नापरपक्षत्वविरोध इत्यर्थः। पञ्चसु पक्षेषु षोडशतिथिपक्षः पञ्चदशतिथिपक्षश्चोक्तौ, शेषान् दर्शयितुमाह—*आश्वयुगिति। दिनपदं तिथिपरमित्युक्तं न तु—

'अहोरात्रेण चैकेन सावनो दिवसः स्मृतः।'

इति सावनदिनपरः पक्षोपक्रमात्। नन्वेवं पक्षस्य चतुर्दशसावनात्मकत्वे षोडशतदात्मकत्वे वा कथं पञ्चदशैव श्राद्धानीत्यत्राह—*दिनेदिनेइति। ह्रासे तिथिद्वयप्रयुक्तप्रयोगद्वयस्य तन्त्रं वृद्धौ च यद्यप्येकदिनच्छेद एव प्राप्नोति गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् सकृत्करणादेव पञ्चदशश्राद्धसिद्धेः तथाऽपि 'अन्नमप्यन्वहं जलम्' इति वाक्यादविच्छेदेनानुष्ठानलाभायाचारादेकतिथिप्रयुक्तं श्राद्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदादिचतुष्टयवर्जनाभिप्रायेणेति कल्पतरुः। *अत्र दिनपदं तिथिपरं वीप्सया तत्पक्षीयतिथित्वं श्राद्धव्याप्यतावच्छेदकम्। तेन पञ्चदशतिथिव्यापि श्राद्धं सिद्ध्यति। तेन चतुर्दशीनिषेधोऽन्यकृष्णपक्षपर इति गौडाः। तन्न।

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये।'

इत्यादिविरोधात्। यच्च कश्चित्पूरणप्रत्ययलोपेन तृतीयभागहीनं षष्ठ्यादिपक्षं तृतीयभागमेकादश्यादि तदर्धं त्रयोदश्यादि, *उत्तरोत्तरं लघुकालोक्तेरिति। तन्न। *गौतमादिवचनेन मूलकल्पनालाघवात् पक्षमित्यनन्वयापत्तेश्च।

मावर्तनीयम्। तत्रापि यस्यां तिथौ कर्मकालव्याप्तिर्दिनद्वये तत्प्रयुक्तस्य श्राद्धस्यावृत्तिः एवमग्रिमपक्षेष्वपि पञ्चम्यादीति त्रिभागस्तृतीयो भागः पक्षस्य पञ्चदशतिथयस्तेन हीनमित्यर्थात्। एवमर्धपक्षस्यैव। उक्तपक्षयोः पक्षस्यैव विशेषत्वादत्रापि तदन्वयात्। एवं तृतीयो भागो दशम्यादिः। एषु पक्षेषु चतुर्दशी वर्ज्या। प्रतिपदादिपक्षयोरेव तद्ग्रहणेनान्यत्र तद्वर्जनप्रतीतेः। ननु नन्दादिसङ्ख्याहानिप्रसङ्गात् दिने दिने इत्यस्य सकृत्पक्षाभिप्रायकत्वं वदतां गौडानां मतमाह-*अत्रेति। *उत्तरेति।

"उत्तरादयनाद्राजन् श्रेष्ठं स्याद्दक्षिणायनम्।
याम्यायनाच्चतुर्मासं तत्र सुप्ते तु केशवे॥
प्रौष्ठपद्याः परः पक्षस्तत्रापि च विशेषतः।
पञ्चम्यूर्ध्वं च तत्रापि दशम्यूर्ध्वन्ततोऽप्यति॥
मघायुक्ता तु तत्रापि श्रेष्ठा राजन् त्रयोदशी।"

इति नागरखण्डाच्चेति शेषः। *गौतमादीति। अग्रिमेत्यादिः। एवं च त्रिभागहीनमिति पञ्चम्यादिपक्षः, त्रिभागमिति दशम्यादिः, अर्धमित्यष्टम्यादिरित्यर्थः। स्वयमधिकं पक्षद्वयमाह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*'पञ्चम्यूर्ध्वं च तत्रापि दशम्यूर्ध्वं ततोऽपि च।'
इति विष्णुधर्मोक्तेः। षष्ठ्याद्येकादश्यादिपक्षावपि
ज्ञेयाविति तत्त्वम्। कालादर्शेऽपि—

"पक्षाद्यादि च दर्शान्तं पञ्चम्यादि दिगादि च।
अष्टम्यादि यथाशक्ति कुर्यादापरपक्षिकम्॥"

पक्षादिः=प्रतिपत्, दिक्=दशमी, दर्शान्तमिति
सर्वत्र। गौतमोऽपि—'अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्
पञ्चम्यादि दर्शान्तमष्टम्यादि दशम्यादि सर्वस्मिंश्च'इति।
तथैकस्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ नागरखण्डे—

"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे।
यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे॥
तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवम्।"इति।

अत्र शक्ताशक्तपरा व्यवस्थेति प्राञ्चः। तन्न। तद्बा-
धकपदाभावात्। *त्रयोदश्यादिपक्ष एव नित्यः। तत्रैव
निन्दाश्रुतेः। ब्राह्मे एवकारेण तस्यैव पञ्चमपक्षायोग-
व्यवच्छेदोक्तिः इति गौडाः। तन्न। एकस्मिन्नपीति
*विरोधात्। तेन फलभूमार्थिनाऽन्यानि कार्याणीति
तत्त्वम्। तत्र चतुर्दशीश्राद्धाभावे पञ्चम्यादिदशम्यादि-
पक्षौ। तत्सत्त्वे षष्ठ्याद्येकादश्यादिकौ। एवं चतुर्दश्य-
भावे द्वादश्यादिः। तत्सत्त्वे त्रयोदश्यादिरिति व्यवस्था॥

विधवायास्तु विशेषः। स्मृतिसंग्रहे—

---

*पञ्चम्यूर्ध्वमिति। तथा च विष्णुधर्मगौतमाभ्यां स्पष्टमुक्ताः
प्रतिपत्पञ्चमीषष्ठीअष्टमीदशमीएकादशीप्रभृति षट् पक्षाः, तदेकवा-
क्यतया वाक्यान्तरं योज्यमिति बोध्यम्। गौडमतमाह—*त्र-
योदश्यादीति। *एवकारेण=अर्धमेवेत्येवकारेण। *विरोधा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*"चत्वारः पार्वणाः प्रोक्ता विधवायाः सदैव हि ।
स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च ॥
ततो मातामहानां च श्राद्धदानमुपक्रमेत् ।"

तथा—

'श्वश्रूणां च विशेषेण मातामह्यास्तथैव च ।' इति ।

अशक्तौ तु स्मृतिरत्नावल्याम्—

"स्वभर्तृप्रभृति त्रिभ्यः स्वपितृभ्यस्तथैव च ।
विधवा कारयेच्छ्राद्धं यथाकालमतन्द्रिता ॥"

विधवा स्वयं संकल्पं कृत्वाऽन्यद्ब्राह्मणद्वारा कारयेदित्युक्तं प्रयोगपारिजाते ।

दिति । सकृत्पक्ष एव नित्यो नान्य इति भावः । *चत्वार इति । विधवायाः पार्वणचतुष्टयं पार्वणषट्कं पार्वणद्वयमिति पक्षत्रयम् । पक्षत्रयेऽपि भ्रात्राद्येकोद्दिष्टानि भवन्ति । पार्वण एव तन्नियमात् । अत्रेदं बोध्यम् । विधवाया दर्शश्राद्धे पुत्राभावे तद्देवोधिकारः ।

'अपुत्रा पुत्रवत्पत्नी पुत्रकर्म समाचरेत् ।'

इति वचनात् पुत्रवदिति वतिना प्रकरणानुरोधात् श्राद्धक्रियातुल्यतोक्त्या पुत्रकर्तृकश्राद्धवदेव देवताः, उद्देश्यत्वं तु पित्रादीनां भर्तृत्वादिना तन्मातामहानां च पितृत्वादिना । यं प्रति येन रूपेण सम्बन्धिता तं प्रति तेनैव रूपेणोद्देश्यत्वात् । अत एव स्मृतिदर्पणे 'स्वभर्तृप्रभृतित्रिभ्यः'इत्यादि । भर्तृपित्रोश्च यथायोग्यं सपत्नीकत्वमपि । इदं षड्दैवत्यं दर्शश्राद्ध एव । स्वपितरि जीवति तु द्वारलोपात्पार्वणलोपः । तीर्थमहालयादिश्राद्धे तु मृतश्वश्र्वादेः श्वश्र्वादिपार्वणमपीति नवदैवत्यम् । तच्च कृताकृतमित्येके । केचिन्मृतमातृकायाः स्वमात्रादिपार्वणमपीति द्वादशदैवत्यमाहुः । अपरे स्वमातामहपार्वणेन पञ्चदशदैवत्यमाहुः । अन्ये स्वमातामह्यादिपार्वणेन सहाष्टादशदैवत्यमाहुः । अत्र सर्वत्राप्याद्यजीवने द्वारलोपः । एवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*सकृन्महालये च वर्ज्यतिथ्याद्युक्तं पृथ्वीचन्द्रोदयप्रयोगपारिजातादिषु । वसिष्ठः—

"नन्दायां भार्गवदिने *चतुर्दश्यां त्रिजन्मसु ।
एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥"

*जन्मभं तत्पूर्वोत्तरे च त्रिजन्मानि । वृद्धगार्ग्यः—

"प्राजापत्ये च पौष्णे च पित्रर्क्षे भार्गवे तथा ।

व चत्वारः पार्वणा इति । श्वश्रूणां विशेषेणेति च निर्मूलं प्रतिभाति । एकोद्दिष्टानि च तीर्थमहालयादौ स्वसम्बन्धेनास्याः पुत्रवद्भवन्त्येव । यत्तु—

"भर्त्तुः श्राद्धे तु या नारी मौढ्यात्पार्वणमाचरेत् ।
न तेन तृप्यते भर्त्ता स्वयं च नरकं व्रजेत् ॥" इति,

तत्क्षयाहे एकोद्दिष्टपक्षप्रशंसार्थं न तु सर्वथा पार्वणनिषेधार्थमिति । *सकृन्महालये इति । कृष्णपक्षसामान्यनिमित्तकश्राद्धं हेमाद्रिमते आवृत्त्या, विवेचनकारादिमते तु सकृत् । तत्र यद्यपि काम्ये श्राद्धे याज्ञवल्क्येन चतुर्दशी वर्जिता तथाऽपि नित्येऽपि तत्र 'नभस्यस्यापरे पक्षे' इति कार्ष्णाजिनिना भाद्रपदापरपक्षे चतुर्दशीवर्जननिषेधादन्यत्र प्रतिपदादिपक्षे तद्वर्जनावगमात् । दशम्यादिपक्षे च—

"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः ॥"

इति मनुवचनात् सुतरां च पञ्चम्यादिप्रतिपदादिपक्षयोस्तद्वर्जनावगमाच्च कृष्णपक्षसामान्य एव तद्वर्जनं नन्दादिकं च तद्वर्ज्यम् । इदं च चतुर्दशीनन्दादिवर्जनं भाद्रपदकृष्णपक्षेऽपि सकृत्करणपक्षे तदप्रवृत्तेर्निर्बीजत्वात् । पक्षान्तरेषु तु न नन्दादि वर्ज्यं संख्याहान्यापत्तेः, षोडशपञ्चदशपक्षयोस्तु न चतुर्दश्यपीत्यर्थः । *चतुर्दश्यामिति । त्रयोदश्यामिति विवेचने । *जन्मभमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति ॥"

प्राजापत्यं=रोहिणी, पौष्णं=रेवती, पित्र्यं=मघा। अन्यान्यपि प्रत्यरादीनि तत्रैव ज्ञेयानि। केचित्तु—

"नन्दाश्वकामरव्यारभृग्वग्निपितृकालभे।
गण्डे वैधृति*पाते च पिण्डास्त्याज्याः सुतेप्सुभिः॥"

इति सङ्ग्रहात्। नन्दाः=प्रतिपत्षष्ठ्येकादश्यः, अश्वः=सप्तमी, कामः=त्रयोदशी, आरो=भौमः, भृगुः=शुक्रः, अग्निभं=कृत्तिका, पितृभं=मघा, कालभं=भरणी, अत्र पिण्डास्त्याज्या इत्याहुः। तत्र*मूलं मृग्यम्। एतच्च सकृन्महालयविषयम्।

"सकृन्महालये काम्यं पुनः श्राद्धेऽखिलेषु च।
अतीतविषये चैव सर्वमेतद्विचिन्तयेत्॥"

इति पृथ्वीचन्द्रोदये नारदोक्तेः।

अस्यापवादो हेमाद्रौ पृथ्वीचन्द्रोदये च—

आत्मभार्यापुत्राणां जन्मभानीति। जन्मदशमैकोनविंशतिभानीति रघुनाथः। एवञ्च—

"भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्॥'

इति स्मृत्यन्तरे पिण्डदानपदं श्राद्धोपलक्षणं बोध्यम्। अन्ये पिण्डदाने कालविशेषनिषेधास्तु प्रेतकृत्यविषया इति विवेचने। प्रत्यरादीत्यादिना त्रिपादादयः। एतत्प्रेतकृत्यविषयमित्यन्ये। *पाते इति। पातभरण्यादावपि सकृन्महालये पिण्डदानं कार्यम्। पातादिनिमित्तकश्राद्ध एव तन्निषेधात्। 'अमापाते भरण्यां च' इत्यग्निपवचनादिति बोध्यम्। *मूलं मृग्यमिति। सप्तमीरविभौमभरणीगण्डवैधृतिव्यतिपातेष्विति मयूखः। पुनःश्राद्धे=आवृत्त्या क्रियमाणे श्राद्धे। *अखिलेषु=व्रीहिपाकादिश्राद्धेषु। तत्र कालान्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अमापाते भरण्यां च द्वादश्यां पक्षमध्यके ।
तथा तिथिं च नक्षत्रं वारं च न विचारयेत् ॥'

पराशरमाधवीये मदनपारिजातादिषु चैवम् । निर्णयदीपिकायां तु-*'पितृमृताहे निषिद्धदिनेऽपि सकृन्महालयः कार्यः' इत्युक्तम् ।

'आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
मृताहनि पितुर्यो वै श्राद्धं दास्यति मानवः ॥
तस्य संवत्सरं यावत्सन्तृप्ताः पितरो ध्रुवम् ॥'

इति नागरखण्डोक्तेः ।

'या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते ।
सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः ॥
तिथिच्छेदो न कर्तव्यो विनाऽशौचं यदृच्छया ।
पिण्डश्राद्धं च कर्तव्यं विच्छित्तिं नैव कारयेत् ॥
अशक्तः पक्षमध्ये तु करोत्येकदिने यदा ।
निषिद्धेऽपि दिने कुर्यात्पिण्डदानं यथाविधि ॥'

इति कात्यायनोक्तेश्च । *अत्र मूलं चिन्त्यम् ।

तथा पक्षश्राद्धकरणेऽपि न नन्दादिषु पिण्डनिषेध इत्याह पराशरमाधवीये कार्ष्णाजिनिः—

'नभस्यस्यापरे पक्षे श्राद्धं कार्यं दिने दिने ।
नैव नन्दादि वर्ज्यं स्यान्नैव निन्द्या चतुर्दशी ॥'इति।

अत्र श्राद्धमित्ये*कवचनाद् *दिने दिने इति वीप्साव-

रसम्भवात् । *पितृमृताह इति । शिष्टाचारसिद्धोऽयं पक्ष इति रघुनाथः । नन्वेवं 'नैव निन्द्या चतुर्दशी' इति चतुर्दशीग्रहणं वर्जयित्वा चतुर्दशीमिति तन्निषेधश्चेति विकल्पः स्यादित्यत्राह—*अत्रेति । एकेति । प्रकृत्यर्थानामिति व्युत्पत्त्या अत्यन्तसंयोगार्थक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाच्च सोमयागवदेकस्याभ्यासेनै*कप्रयोगपरमिदम्। अत

द्वितीयातश्च एकत्वविशिष्टश्राद्धस्य भाद्रपदापरपक्षीयतिथित्वनियमो लभ्यते। ततश्चतुर्दशीलाभात्तद्वर्जनं पक्षान्तरम्। न च—

'स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति।'

इति दर्शनात्संख्यया श्राद्धानां भेदो दुर्वारः। तत्र च काभ्यासः?। 'नैव निन्द्या चतुर्दशी' इति च चतुर्दशीग्रहणार्थमिति वाच्यम्। संख्याया अनुत्पत्तिवाक्यगतत्वात्। वचनस्यैकदेशकन्यासम्बन्धमात्रेण सकलपक्षपूज्यत्वमात्रप्रतिपादकत्वेनोत्पत्तिविधित्वासम्भवात्। श्राद्धषोडशकमिति द्वितीयानिमित्तभूतकर्मप्रवचनीयप्रतियोगेन श्राद्धानामुद्देश्यत्वप्रतीतेश्च पक्षरूपकालविधौ तत्सम्बन्धित्वेनोपादेयानामपि कर्मणामनुवाद्यत्वे बाधकाभावात्। 'यदि ब्राह्मणो यजेत' इत्यादौ हि स्वरूपेण यागस्योपादेयतयाऽनुवाद्यत्वं दूषितमतो न तद्विरोधः। तस्मात् 'नभस्यस्यापरे पक्षे' इति श्राद्धोत्पत्तिविधौ संख्यायुक्ततिथिसमुच्चयेन यावत्तिथिसिद्धानामभ्यासानां श्राद्धषोडशमिति संख्येत्यर्थः। यद्यपि पक्षस्य पञ्चदशतिथ्यात्मकत्वात् कृष्णपक्षसामान्येऽपि प्रतितिथि श्राद्धावृत्तिः प्राप्नोति न तु सकृत्करणम्, तथापि तत्र पक्षस्याखण्डस्यैवायोगव्यावृत्त्याऽङ्गत्वम्, अयनर्तुमासादिविशेषवत्, न तु स्वरूपेण तिथीनाम्। अत एवेदं कर्मास्मिन्नयनेऽस्मिन्नृतावस्मिन्मासेऽस्मिन्पक्षे इति सम एव व्यपदेशः तस्य सकृत्करणेऽप्यव्याहतः। महालयापरपक्षे तु यावत्तिथ्यभ्यास इति विशेषे बीजमाह—*दिने दिने इति। *एकप्रयोगेति। यत्त्वत्र हेमाद्रेरन्त्यदिने दक्षिणादानं तद्वशाच्च पात्रैक्यमिति मतं, तदयुक्तम्। निमन्त्रणादिविसर्जनान्तश्राद्धप्रयोगस्यैवावृत्तेः कालस्य प्रयोगानुबन्धत्वेन तत्समुच्चयवशात्प्रयोगावृत्तेरेवौचित्यात्। किञ्च दक्षिणादानमात्रस्यैव कुतः सकृत्करणं प्रधानमात्राभ्यासोपगमे सर्वेषामपि प्रधानपूर्वोत्तरभाविनामङ्गानां पात्रानत्यर्थानां चाभ्यासस्यैवौचित्यात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।'

इति याज्ञवल्क्यीयं प्रयोगभेदपरं न तु पञ्चम्यादिपक्ष-विषयम् । 'प्रतिपत्प्रभृतिषु' इति विशिष्योक्तेः । निर्णय-

---

एवं निमन्त्रणादिविसर्जनान्तश्राद्धप्रयोगस्य भेदे यदि ब्राह्मणा-लाभस्तदाऽस्तु तैरेव ब्राह्मणैः सः ।

'कुशा दर्व्यादयो मन्त्रा ब्राह्मणाश्च बहुश्रुताः ।
न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः ॥'

इति ब्राह्मणानां विनियुक्तविनियोगाविरोधात् । वरणभरणरूपे तु निमन्त्रणदक्षिणादाने प्रतिश्राद्धप्रयोगं भिन्ने एवानुष्ठेये । अत एव पक्षश्राद्धार्थं ब्राह्मणैः सह सकृदेवोपसंवादेऽपि तेषामाशौचेऽभ्या-सान्तरे त्यागोऽन्येषामुपादानम् ।

'निमन्त्रितस्य विप्रस्य स्वाध्यायाद्विरतस्य च ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ॥'

इति वाक्यस्य शास्त्रीयनिमन्त्रणाभावेनाप्रवृत्तेः । प्रयोगसङ्घ-स्य सम्भूयैकफलजनकत्वं सायंप्रातरग्निहोत्रवत् । 'प्रतिपदि महा-लयापरपक्षश्राद्धं करिष्ये' 'द्वितीयायां महालयापरपक्षश्राद्धं करिष्ये' 'तृतीयायां महालयापरपक्षश्राद्धं करिष्ये' इत्यादिप्रतितिथि सङ्क-ल्पभेदाच्च पाकभेदाच्चान्तरा प्रतिबन्धानिश्चयेन केनचिदभ्यासपक्षे-णारब्धे महालयश्राद्धे यद्यन्तरा श्राद्धकर्तुराशौचपातः, तदा 'श्राद्धे पाकपरिक्रिया' इत्युक्तमुख्यप्रारम्भाभावात्सङ्कल्पाभावाच्च 'प्रारब्धे सूतकं नास्ति' इत्यस्याप्रवृत्तेरनधिकारात्तत्र प्राप्ताः श्राद्धप्रयोगा नानुष्ठेयाः । न चैवं सायमग्निहोत्रपौर्णमासानन्तराशौचपाते प्रातर-ग्निहोत्रदर्शयोराशौचमध्येऽनुष्ठानं न स्यादिति वाच्यम् । तत्र—

'वैतानोपासनाः कार्याः क्रियाश्च श्रुतिचोदनात् ।'

इत्यधिकारप्रतिप्रसवात्तदनुष्ठानोपपत्तेः । न च यथा कृष्णपक्षे यजमानमरणसम्भावनायां दर्शेष्टिपर्यन्ताग्निहोत्रहोमपूर्वकं तदानी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीपे मदनपारिजाते चैवम् । *अन्यकृष्णपक्षपरं याज्ञवल्कीयम् । एतत्परत्वे नैवनिन्द्याचतुर्दशीविरोधात् इति गौडाः । तन्न—

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये ।'

इति विरोधात् । तत्त्वं तु—

मेव दर्शानुष्ठानम् । तथा प्रकृते शुद्धिपर्यन्तश्राद्धप्रयोगाणामशौचपातात्पूर्वमेवानुष्ठानं स्यादिति वाच्यम् । तत्राग्निहोत्रहोमदर्शेष्ट्योर्वाचनिकत्वादिह वचनाभावात् । आशौचमध्ये श्राद्धप्रयोगाणामकरणे च कृतानां प्रयोगाणां न फलम् । सहकार्यन्तराभावात् एकदेशादेव फलस्य कल्पयितुमशक्यत्वाच्च । एवंविधस्थले चाशौचापगमोत्तरं सकृदादिपक्षेण यावद्दीपावलि पुनर्महालयश्राद्धं कर्तव्यम् । प्रतिबन्धान्तरे तु तद्दशायां प्रतिनिधिना कार्यम् । सोमयागवदिति अभ्यासमात्रेण दृष्टान्तः । तत्र प्रधानस्वरूपानुबन्धभूतदेवतासमुच्चयवशात् प्रधानस्यैवावृत्तेः । प्रधानमात्रावृत्तिश्च देवतादिसमुच्चयकृता सोमयागग्रहयज्ञादिषु, उत्पन्नगतसंख्याकृता वा एकादशप्रयाजलक्षहोमकोटिहोमादिषु; प्रकृते तु तयोरेकविधाऽपि न सा, किन्तु कालवशात्प्रयोगावृत्तिरेव । सायंप्रातरग्निहोत्रहोमदर्शपौर्णमासिकाग्नेयादीनामिवेति विशेषः । याज्ञवल्कीयं पञ्चम्यादिपक्षविषयमिति पाठः । यद्यपि याज्ञवल्कीयं काम्यश्राद्धपरमित्यग्रे स्पष्टम्, तथापि 'नैव निन्द्या चतुर्दशी' इति कार्ष्णाजिनिज्ञापितं तत्सदृशं तच्छब्देन ग्राह्यम् । तत्पञ्चम्यादिपक्षविषयमित्यर्थः । याज्ञवल्कीयं प्रयोगभेदपरम्, न तु पञ्चम्यादिपक्षविषयम् । प्रतिपत्प्रभृतिष्विति विशिष्योक्तेरिति पाठान्तरम् । काम्यश्राद्धप्रकरणस्थं याज्ञवल्कीयं कृष्णपक्षश्राद्धस्य सकृत्कर्तव्यपरं न तु महालयस्य पञ्चम्यादिपक्षपरमिति तदर्थः । आश्विनापरपक्षे कस्मिन्नपि पक्षे चतुर्दशीवर्जनं नास्ति इति मतं निरस्यति—*अन्यकृष्णपक्षपरमिति । केचित्तु—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*'तिथिनक्षत्रवारादिनिषेधो य उदाहृतः ।
स श्राद्धे तन्निमित्ते स्यान्नानुषङ्गकृते ह्यसौ ॥'
इति दिवोदासीये वृद्धगार्ग्योक्तस्तन्निमित्ते*पक्षान्तरे

'कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।'
इति मन्वुक्तश्चतुर्दशीवर्जनं दशम्यादिपक्षे । अन्यथा महाल-
श्राद्धगता षोडशत्वसंख्या व्याहन्येत । अत एव 'नैव निन्द्या
तुर्दशी' इत्यस्यापि सङ्गतिरित्याहुः । वस्तुतस्तु—
'शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते ।'
इति इतरदेवताबाधेन शस्त्रहतानां देवतात्वविधानात्तदभावो
ुप्यते । यथाऽभ्युदयेष्टौ प्रकृतदेवताबाधाद्देवतान्तरविधानाच्चोपां-
ुयाजः । मानवकार्ष्णाजिनीये अपि शस्त्रहतपितृकं प्रत्येव
ुच्छेते । मानवे दशम्यादावित्यादिपदेन पक्षान्तराणामपि ग्रहणम् ।
ीवत्पितृकाजीवत्पितृकाऽमावास्यायां तत्तिथितदुत्तरप्रतिपदादि-
ेव शस्त्राशस्त्रमृतपितृकरूपभिन्नाधिकारिकश्राद्धेष्वेव श्राद्धगता
ोडशत्वसंख्योपपद्यते । अतो देवताविरहेण चतुर्दशीश्राद्धं लुप्यत
ेति युक्तमुत्पश्यन्ति । तत्त्वं त्विति क्वचित्पाठः । *तिथीति ।
िथ्यादौ पिण्डदानादिनिषेधो 'नन्दाश्वकामरव्यार'इत्यादिकः ।
न्निमित्ते=नन्दादिनिमित्तके । अनुषङ्गकृते=नन्दादिसम्बन्धेन कृते
हालयादौ नेत्यन्वयः । यद्वा नन्दादेर्निषेध इत्येवार्थः । 'नन्दायां
ार्गवदिने' इत्यादिपुत्रवद्गृहिणो निषेधो नन्दादिनिमित्तक एव
ो तु नन्दादौ पञ्चम्यादिपक्षेण क्रियमाणे महालये इत्यर्थः । *प-
ान्तरे इति । कृष्णपक्षान्तरे इत्यर्थः ।
'न नन्दासु भृगोर्वारे रोहिण्यां च त्रिजन्मसु ।
रेवत्यां च मघायां च कुर्यादापरपाक्षिकम् ॥'
इति नारदसंहितावचनात् । एवञ्च नन्दाश्वकामेत्यपि आप-
ापक्षिकपरमेव एकवाक्यत्वात् । नन्वेवं सकृन्महालयेऽपि 'नन्दादि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

च ज्ञेयः। *सकृन्महालये तु वचनान्निषेधः। अन्यत्र *न कोऽपि निषेधः कार्ष्णाजिनिस्मृतेरिति। *अतो *नन्दादौ सपिण्डकश्राद्धे पुत्रवतोऽप्यधिकारः। अत्रिरपि—

'महालये क्षयाहे च दर्शे पुत्रस्य जन्मनि।
तीर्थेऽपि निर्वपेत्पिण्डान् रविवारादिकेष्वपि॥'

*पूर्वोक्तनन्दानिषेधस्तु *मृताहातिक्रमे सकृन्महालये*पौर्णमास्यादिमृतश्राद्धे तन्निमित्ते च ज्ञेयः। यत्तु स्मृत्यर्थसारे—

'विवाहव्रतचूडासु वर्षमर्धं तदर्धकम्।
पिण्डदानं मृदा स्नानं न कुर्यात्तिलतर्पणम्॥' इति।

तस्यात्रापवादो दिवोदासीये बृहस्पतिः—

'तीर्थे संवत्सरे प्रेते पितृयागे महालये।

निषेधो न स्यात्तस्य नन्दाद्यनिमित्तकत्वादत आह—*सकृदिति। *अन्यत्र=पञ्चम्यादिप्रभृतिपक्षेषु। *न कोपीति। पञ्चदशषोडशपक्षयोरेव चतुर्दशीग्रहात्तदन्यपक्षे तन्निषेधः स्मर्त्तव्यः। एतावता प्रथममतमुपपादितम्। इदानीं निर्णयदीपमनुरुध्याह—*अत इति। *नन्दादाविति। पुत्रगृहिणो निषेधस्य नन्दादिनिमित्तश्राद्ध एव प्राप्तेर्महालयनिमित्तके तदप्राप्तेरित्यर्थः। सकृन्महालयेऽपीति शेषः। एतेन 'तिथिच्छेदो न कर्तव्यः' इति युक्तिर्दृढीकृता। महालये इति सामान्यत उपादानात्सकृन्महालयेऽपि प्रवृत्तेरिति भावः। एवं सति सकृन्महालये इत्यस्य को विषय इत्यत्राह—*पूर्वोक्तेति। *मृताहेति। केन चिद्धेतुना मृताहस्य सकृन्महालयकालस्यातिक्रमे इत्यर्थः। *पौर्णमास्यादीति। पौर्णमास्यां मृतस्य महालये तिथिर्नास्ति अतः तस्य सकृन्महालयः नन्दादिनिषिद्धकालं विहाय कस्याश्चित्तिथौ कार्य इत्यर्थः। आदिना चतुर्दशीग्रहः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पिण्डदानं प्रकुर्वीत*युगादिभरणीमघे ॥
महालये गयाश्राद्धे मातापित्रोः क्षयेऽहनि ।
कृतोद्वाहोऽपि कुर्वीत पिण्डनिर्वपणं सदा ॥' इति ।
निर्णयदीपे तु नन्दादिनिषेधः प्रत्यहं भिन्नश्राद्धविषयः । षोडशाहव्यापिश्राद्धप्रयोगैकत्वे तु प्रत्यहं पिण्डदानं कार्यमेवेत्युक्तम् । तदयमर्थः सम्पन्नः-षोडशाहव्यापिश्राद्धैक्ये न पिण्डनिषेधः । मृताहे सकृन्महालयेऽपि तथेति केचित् । तत्रापि निषेधस्तु युक्तः, प्रत्यहं श्राद्धभेदेऽपि व्यतीपातादौ तथा । अन्यत्र *मृताहातिक्रमे महालये च पिण्डनिषेध इति ।
संन्यासिनां तु द्वादश्यां श्राद्धं कार्यम् ।
*'यतीनां च वनस्थानां वैष्णवानां विशेषतः ।
द्वादश्यां विहितं श्राद्धं कृष्णपक्षे विशेषतः ॥'
इति पृथ्वीचन्द्रोदये सङ्ग्रहोक्तेः ।
अत्र पक्षे श्राद्धाकरणे गौणकालमाह हेमाद्रौ यमः—
'हंसे कन्यासु वर्षास्थे शाकेनापि गृहे वसन् ।
पञ्चम्योरन्तरे दद्यादुभयोरपि पक्षयोः ॥'
आश्विनकृष्णशुक्लपञ्चम्योर्मध्य इत्यर्थः । *तत्राप्यसम्भवे भविष्ये—

निमित्ते=महालयनिमित्ते । पितृयागे=पित्र्येष्ट्याम् । *युगादीति । इति सप्तमी, मृताहे इत्यधिकरणसप्तमी, तथा च न पिण्डनिषेधः । 'व्यतीपाते' इत्युक्तेः । एवं च श्राद्धभेदे कदाचित्सपिण्डं कदाचिदपिण्डमित्यत्रेष्टापत्तिर्बोध्या । *अन्यत्र=अपरपक्षे पौर्णमास्यादिमृतश्राद्धे वा । *मृताहेति । सकृन्महालये इति शेषः । *यतीनामिति । सकृन्महालये नियमः । तेन तेषां पक्षान्तराण्यपि भवन्त्येव । *तत्राप्यसम्भवे इति । आश्विनशुक्लपञ्चम्यन्तं कस्मिंश्चिद्दिने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'येयं दीपान्विता राजन्ख्याता पञ्चदशी भुवि ।
तस्यां दद्यान्न चेद्दत्तं पितॄणां वै महालये ॥'
*तत्राप्यसम्भवे भारते—

श्राद्धस्याकरणे तुलासंक्रान्तिं यावत् कस्मिंश्चिद्दिने, तत्राप्यसम्भवे वृश्चिकसंक्रान्तिं यावत् ।

"न ददाति नरः श्राद्धं पितॄणां चन्द्रसंक्षये ।
क्षयिताशाः परीताङ्गाः पितरस्तस्य दूषिताः ॥
प्रेतपक्षं प्रतीक्षन्ते गुरुवाञ्छासमन्विताः ।
कर्षका जलदं यद्वद्दिवानक्तमतन्द्रिताः ॥
प्रेतपक्षेऽप्यतिक्रान्ते यावत्कन्यागतो रविः ।
तावच्छ्राद्धं प्रवाञ्छन्ति दत्तं वै पितरः सुतैः ॥
ततस्तुलागतेऽप्येके सूर्ये वाञ्छन्ति पार्थिव ।
श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः ॥
तस्मिन्नपि व्यतिक्रान्ते काले वृश्चिकगे रवौ ।
निराशाः पितरो दीनास्ततो यान्ति निजालयम् ॥
मासद्वयं प्रतीक्षन्ते गृहद्वारं समाश्रिताः ।
वायुभूताः पिपासार्ताः क्षुत्क्षामाः पितरो नृणाम् ।
यावत् कन्यागतः सूर्यस्तुलास्थश्च महीयते ॥

इति नागरखण्डे कन्यामपेक्ष्य तुलायाः स्फुटमनुकल्पत्वेनोक्तेः । तत्र दीपावली अतिप्रशस्तेत्यर्थः । पञ्चदशी=कार्तिकामावास्या । तत्र 'दीपमाला च कर्तव्या' इति बहुदीपदानविधानात्, न तु कार्तिकपौर्णमासी । तत्र दीपदानविधानेऽपि ख्यातेत्युक्तेः अमावास्याया एव दिपावलीत्वेन ख्यातत्वात् पित्र्ये प्रशस्तत्वाच्च । तस्यां च तत्प्रयुक्तश्राद्धप्राप्तावपि महालयप्रयुक्तमप्राप्तं विधीयते । तत्र दर्शे सपत्नीकस्य पित्रादेर्देवतात्वं महालये सपत्नीकस्य तस्येति विशेषः । *तत्रापि=कन्यायामपि, यद्वा दीपावल्यामपीत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यावच्च कन्यातुलयोः क्रमादास्ते*दिवाकरः।
शून्यं प्रेतपुरं तावद्वृश्चिकं यावदागतः ॥'

ब्राह्मे—

'वृश्चिके *समतिक्रान्ते पितरो दैवतैः सह ।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम् ॥'

यत्तु जातूकर्ण्यः—

'आकाङ्क्षन्ति स्म पितरः पञ्चमं पक्षमाश्रिताः ।
तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम् ॥'

इति, तत्फलातिशयहानिपरम् । 'कन्यां गच्छतु वा न
॥' इति तुरीयपादे वा पाठः । तेन कन्यायोगे प्राश-
त्यमात्रम् । अतः श्राद्धविवेकोक्तं श्राद्धद्वयं ज्ञेयम् । इदं
श्राद्धमन्नेनैव कार्यं नाऽमान्नादिना ।

'मृताहं च सपिण्डं च गयाश्राद्धं महालयम् ।
आपन्नोऽपि न कुर्वीत श्राद्धमामेन कर्हिचित् ॥'

इति स्मृतिदर्पणे गालवोक्तेः ।

अथात्र देवताः । सङ्ग्रहे—

'ताताम्बात्रितयं, सपत्नजननी, मातामहादित्रयं
सस्त्रि, स्त्रीतनयादि, तात-जननी-स्व-भ्रातरः सस्त्रियः ।
ताताम्बात्मभगिन्यपत्यधवयुक्, जायापिता, सद्गुरुः,

तदुत्तरतुलादीनां तदनुकल्पत्वात् । *दिवाकर इति ।

'तावच्छ्राद्धस्य कालः स्याच्छून्यं प्रेतपुरं तदा ।'

इत्युत्तरार्द्धे ब्राह्मपाठानुसारेण रवेः कन्यातुलयोः क्रमावस्थाना-
क्रमाच्छ्राद्धस्य कालः स्यादित्यर्थः । *समतिक्रान्ते=प्राप्तवृश्चिके
महालयश्राद्धं लुप्यते मोहादिना तत्करणेऽपि कर्तुः प्रसवाया-
नुद्धारात् इत्यत्र तात्पर्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्याप्ताः पितरो महालयविधौ, तीर्थे, तथा *तर्पणे ॥'

---

*तर्पणे इति । तर्पणस्य मध्यान्ह एव मुख्यः कालः । कात्यायनादिसूत्रे माध्यान्हिकादिकर्मसु तत्पाठात् ।

"स्नानं माध्यान्हिकं कृत्वा सन्ध्याकर्म निवर्त्य च ।
ब्रह्मयज्ञं विधायाथ गृहमेत्याचरेत्परान् ॥"

इति आत्रेयवाक्ये मध्यान्हे तदुक्तेश्च । ब्रह्मयज्ञाङ्गं च तर्पणम् ।

'संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।'

इति वाक्यात् मध्याह्नसंध्यानन्तरं कार्यम् ।

"उपास्य विधिवत्संध्यामुपस्थाय च भास्करम् ।
गायत्रीं शक्तितो जप्त्वा तर्पयेद्देवताः पितॄन् ॥"

इति वृद्धपराशरोक्तेश्च, इति अन्यत्र विस्तरः ।

यत्तु तर्पणं प्रकृत्य—

"तस्मात्सदैव कर्तव्यमकुर्वन्महतैनसा ।
युज्यते ब्राह्मणः कुर्वन विश्वमेतद्बिभर्त्ति च ॥" इति,

तत्र सदापदस्य यावज्जीवमित्यर्थः ।

"प्रहराभ्यन्तरे पित्रोः पुत्रो दद्यात जलाञ्जलीन् ।
द्वितीये तु पयो देयं तृतीये जलमेव च ॥"

इति त्वनुकल्पः ।

यत्तु 'यत्रोषः स्नात्वोदयात् प्रागेव तर्पणं कृतं तत्र मध्याह्ने स्नानाकरणेऽपि पुनस्तर्पणं कार्यम् । अहःकालिकतर्पणस्यावश्यकस्याकरणात् । उदयोत्तरं प्रातः स्नाने तु तर्पणे कृते पुनस्तन्न कार्यम् । तेनैव सिद्धेः । मध्याह्नस्नानस्य वैधत्वमते तु तदनन्तरं पुनः कार्यम्'इति, तन्न । उदयात्पूर्वं तर्पणविध्यविध्योरभावात् । विधानाभावे चोदयात् प्रागनुष्ठानायोगात् । अथाधिकारिणः । मनुः—

"चतुर्णामपि वर्णानां तर्पणं तु भवेत्सदा ।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्यार्थः-तातत्रयी=पितृत्रयी । अम्बात्रयी च । स्मृत्यर्थसारेपि-'महालये मातृश्राद्धं *पृथक् प्रशस्तम्'इति । अत्र विशेषः स्मृतिदर्पणे गालवः—

*'अनेका मातरो यस्य श्राद्धे चापरपाक्षिके ।
अर्घ्यदानं पृथक्कुर्यात्पिण्डमेकं तु निर्वपेत् ॥'

जीवन्मातृकस्तु सापत्नमातुरेकोद्दिष्टं कुर्यान्न पार्व-

वर्णानामिति न कर्मषष्ठी । सवर्णेभ्यो जलं देयम् । 'सवर्णेभ्य एव च'इति योगियाज्ञवल्क्यात् । एतच्च मातापितृव्यतिरेकेणेति शाश्वः । जीवत्पितृकस्यापि तर्पणं भवत्येव । 'जीवत्पितृकोऽप्येतान्' इति कात्यायनोक्तेः । एतान्=देवऋषिदिव्यपितृसनकादिमनुष्यान् । पितुर्जीवनेन तर्पणाधिकारात्

संन्यस्तपितृकादौ—

"येभ्य एव पिता दद्यात्तेभ्य एव प्रदापयेत् ।"

इति वचनात् तस्य । तीर्थेऽप्येतत् जीवत्पितृकश्राद्धवत् । मातृमरणेऽपि न तर्पणम्, उद्वाह इत्यादिवत् प्रतिप्रसवाभावात् 'सपितुः पितृकृत्येषु' इति निषेधाच्च । *पृथगिति ।

"अन्वष्टकासु वृद्धौ च प्रतिसम्वत्सरन्तथा ।
महालये गयायां च सपिण्डीकरणात्पुरा ॥
मातुः श्राद्धं सुतः कुर्यादन्यत्र पतिना सह ।"

इति वाक्यात् 'नवदैवतमत्रेष्टम्' इति वचनाच्च । *अनेकामातर इति । सापत्नमातुर्मात्रा सहैकतन्त्रेण द्विपितृकश्राद्धवदित्यर्थः । इदमशुद्धम् । यत इदं वचनमान्वष्टक्य एव प्रवर्तते न तु तद्भिन्ने महालयादावपि सङ्ग्रहे मातृत्रयानन्तरं सापत्नमातुरुक्तेः । जीवदजीवन्मातृकयोः प्रकारभेदानौचित्याच्च । अस्माकं तूभयत्रापि सापत्नमातुरेकोद्दिष्टमेवेति तदभेदात् । अधिकमन्यतोऽवगन्त-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णम् । श्राद्धदीप*कलिकायां तु पार्वणमुक्तम् ।

'आन्वष्टक्यं च यन्मातुर्गयाश्राद्धं महालयम् ।
पितृपत्नीषु च श्राद्ध कार्यं पार्वणवद्भवेत् ॥'

इति बृहन्मनूक्तेः । सस्त्रीति मातामहानां सपत्नीकत्वे-पि विभवे सति मातामहीनां पृथक्कार्यम् ।

'महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
ज्ञेयं द्वादशदैवत्यं तीर्थे प्रौष्ठे मघासु च ॥'

इति निगमोक्तेः । हेमाद्रिमते त्वत्र नवदैवत्यमेव ।

'महालये गयाश्राद्धे वृद्धौ चान्वष्टकासु च ।
नवदैवत्यमत्रेष्टं शेषं षट्पौरुषं विदुः ॥'

इति विष्णुधर्मोक्तेः । तातभ्राता=पितृव्यः, जननीभ्राता=मातुलः, तत्स्त्रियः=पितृव्यस्त्रीमातुलानीभ्रातृजायाः । पितृष्वसृमातृष्वसृस्वभगिन्योऽपत्यभर्तृयुक्ताः । तेन सापत्यायै सधवायै इति प्रयोगो ज्ञेयः । एतासु सतीषु न तद्भर्त्रादेर्दानम् । द्वारलोपात् । जायापिता=श्वशुरः ।

व्यम् । *कलिकायां त्विति । तुनाऽरुचिः

"सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् ।
पितृव्यभ्रातृमातॄणामेकोद्दिष्टं न पार्वणम् ॥"

इत्यनेन विरोधात् । तस्मात् 'पितृपत्नीषु च' इत्यत्रान्वष्टक्यादे-नान्वयः किं तु श्राद्धमित्यस्याऽऽब्दिकं श्राद्धमित्यर्थात् । तच्च ज्ये-ष्ठापरम् । आब्दिकं प्रकृत्य—

'पितृव्यभ्रातृमातॄणां ज्येष्ठानां पार्वणं भवेत् ।'

इति वचनात् । यद्वा कलिकामते सर्वासामेवाब्दिकं पार्वणमि-ति । वस्तुतस्तु कलिकावचनं निर्मूलमिति । 'प्रौष्ठे' इत्यादिसप्तमी तत्र षड्दैवत्यस्यैव भावात् ।

मते त्विति तुनारुचिः । विभवे द्वादशदैवत्यन्तदभावे तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्वश्रूरप्यत्रोपलक्ष्या । अत्र *मूलं स्मृतिचन्द्रिकायां ज्ञेयम् । अत्र पार्वणैकोद्दिष्टयोर्व्यवस्थोक्ता हैमाद्रौ पुराणान्तरे—

*'उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः ।
श्वशुरभ्रातृतत्पुत्रपुत्रर्त्विक्शिष्यपोषकाः ॥
भगिनीस्वामिदुहितृजामातृभगिनीसुताः ।
पितरौ पितृपत्नीनां पितुर्मातुश्च या स्वसा ॥

त्रदैवसमिति व्यवस्थासम्भवात् । 'सस्त्रियः' इतिपाठः 'तत्स्त्रियः' ति पाठो न युक्तः, पितृव्यादेः सपत्नीकत्वस्यैवौचित्यात् पितृष्वसादीनां सधवात्ववत् । सापत्यत्वं तु पूरणीयम् । सतीषु=विद्यमानासु । *मूलमिति ।

"आदौ पिता ततो माता सापत्नजननी तथा ।
मातामहाः सपत्नीकाः स्वपत्नी तदनन्तरम् ॥
सुतभ्रातृपितृव्याश्च मातुलाश्च सपत्नयः ।
दुहिता भगिनी चैव दौहित्रो भागिनेयकः ॥
पितृष्वसा मातृष्वसा श्वश्रुरो गुरुरर्थिनः ।" इति ।

अस्यार्थः—सुतान्तानां क्रमो विवक्षितः । ततः तदनन्तरपदत्वात् । ततो दुहितैव सापत्या सधवा । संबन्धासत्तेः दौहित्रभागिनेयोस्तत्र विशेषणत्वम् । सुते पत्नीपुत्रयोरिव ।

'सुतस्तत्पुत्रदुहितृदौहित्रा भावुकः स्नुषा ।'

इति वचनान्तरेऽपि तथैव । गयायां तु केचित् पृथगर्षां कुर्वन्ति । पितृव्यमातुलयोरन्ते भ्राता पितृष्वस्रोरन्ते भगिनी सम्बन्धासत्तेरिति । *उपाध्यायेति । श्वशुरः सपत्नीकः, न तु पृथक् श्वश्रूः, सापत्यश्च । नापि श्वशुरे जीवति सा । भ्राता सापत्यो न तु पृथक् तत्पुत्रः, सपत्नीकश्च । भगिनीदुहितरौ सधवे सापत्ये न तु भगिनीसुतः तत्स्वामी जामाता च पृथक् । 'पितरौ पितृपत्नीनाम्'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सखिद्रव्यदशिष्याद्यास्तीर्थे चैव महालये ।
*एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः ॥' इति ।

इतरेषां पित्रादीनां पार्वणमर्थसिद्धम् । अत्र क्रमान्यत्वेप्याचाराद्व्यवस्था । अशक्तौ तु पृथिवीचन्द्रोदये चतुर्विंशतिमते-

'एकस्मिन्ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत् ।
*दश द्वादश वा पिण्डान्दद्यादकरणं न तु ॥'

एकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः-

'एकोद्दिष्टं देवहीनमेकार्घ्यैकपवित्रकम् ।
आवाहनाग्नौकरणरहितं त्वपसव्यवत् ॥' इति ।

इति सापत्नमातामहौ । तत्राचारविसंवादे आचारपक्षे सापत्नभ्राता प्रपूर्यः पित्रादिस्वस्रोः सापत्यसधवात्वं बोध्यम् 'शिष्यपोषकाः' 'शिष्याद्यपोषकाः' इति पाठौ पोषकद्रव्यदाववान्तरभेदमालम्ब्य 'शिष्यपोषकम्' इत्येकं वा, विद्याकलाभेदेन शिष्यौ वा, पोषकादीनामत्राभावः । आद्यपदेन सतीर्थ्यः । *एकोद्दिष्टेति ।

"तेन प्रदानं यत्र स्यात्सपिण्डीकरणात्परम् ।
तत्र पार्वणवत् कुर्यादेकोद्दिष्टं त्यजेद् बुधः ॥"

इति गालवं बाध्यते इति सूचितम् । अत्र प्रत्येकोद्दिष्टं ब्राह्मणभेदः । *दशेति । पत्नीप्रभृतिगुर्वन्ता दश आचार्यान्तास्तु द्वादशेत्यर्थः । वक्ष्यति च—

"सपिण्डीकरणादूर्ध्वं यत्र यत्र प्रदीयते ।
भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ॥
मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् ॥'

हेमाद्रौ—

"सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम् ।
पितृव्यभ्रातृमातृणामेकोद्दिष्टं न पार्वणम् ॥" इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रै*कपाको *वैश्वदेवतन्त्रं पिण्डं बर्हिश्च *एकमिति स्मृत्यर्थसारे उक्तम् । अत्र *पाणिहोमः *पिण्डश्चात्र द्विजान्तिक इत्याह प्रयोगपारिजाते आचार्यः—

'काम्यमभ्युदयेऽष्टम्या*मेकोद्दिष्टमथाष्टमम् ।
चतुर्ष्वेषु करे होमः पिण्डश्चात्र द्विजान्तिके ॥' इति ।

पार्वणैकोद्दिष्टयोः समानतन्त्रत्वे तु अग्निसमीप एव । अत्र धुरिलोचनौ वैश्वदेवौ ।

पार्वणैकोद्दिष्टयोः क्रममाह मरीचिः—

"यद्येकत्र भवेत्स्थानमेकोद्दिष्टं च पार्वणम् ।
पार्वणं त्वभिनिर्वृत्य एकोद्दिष्टं समारभेत् ॥" इति ।

एकपवित्रकम्=एका शलाका। अधिकमग्रं । *एकपाक इति ।

"महालये गयाश्राद्धे गतासूनां क्षयेऽहनि ।
तन्त्रेण श्रपणं कृत्वा श्राद्धं कुर्यात्प्रयत्नतः ॥"

इति पौलस्त्यात् । *वैश्वदेवेति । 'यद्येकत्र भवेत्स्थानम्' इति वाक्यात्तादृशश्राद्धस्य पार्वणपूर्वकत्वादसञ्जातविरोधितयोपक्रमप्राबल्यादेव वैश्वदेवसिद्धेः 'देवहीनम्'इति निषेधो न प्रवर्तते । *एकमिति । 'एकत्र भवेत् स्थानम्' इत्यस्यान्यथाऽनुपपत्तेः । प्रधानानुरोधेन गुणावृत्तिश्च तत्रैव यत्र तां विना न प्रधानसिद्धिरिति । *पाणिहोम इति । पार्वणे इत्यादिः न त्वेकोद्दिष्टे इत्यर्थः । *पिण्डश्चेति । पिण्डपितृयज्ञकल्पाभावात् । पार्वणैकोद्दिष्टयोः समानतन्त्रत्वे त्वग्निसमीप एवेति पाठः । तत्र प्रामाण्ये यद्याग्रहः तदाऽमावास्यायां महालयकरणे(१) (कथं चिद्योज्यः । यद्वा बह्वृचगृह्यभाष्यकारैरेकोद्दिष्टे पाणिहोमाङ्गीकारात्तत्र तन्मते तन्निषेधो न प्रवर्तते इत्याशयेन) *एकोद्दिष्टमिति । आन्वष्टक्यातिदेशेन यस्यां कस्यां चित्तिथौ श्रा-

---

(१) कंसान्तर्गतो ग्रन्थः क्वचित् पुस्तके नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अपि *कन्यागते सूर्ये काम्ये च धुरिलोचनौ।'

इति हेमाद्रावादित्यपुराणात्। *अत्र *प्रति दिनं भिन्नप्रयोगत्वाद्दक्षिणाभेदो वा *प्रयोगैक्यादन्ते एव वा दक्षिणेति हेमाद्रौ उक्तम्। एतच्च संन्यस्तपितृकादिना जीवत्पितृकेणापि कार्यम्।

द्धे पितृयज्ञकल्पमत्त्वाच्चतुर्ष्वाद्येति वचनादग्नौ होमः अग्निसमीपे पिण्डदानमिति पाठान्तरं नेयम्। *कन्यागते=कन्यागतसूर्यनिमित्तके भाद्रपदापरपक्षश्राद्धे इत्यर्थः। कन्यासंक्रान्तिनिमित्तके श्राद्धे इति वर्णयतां मते तु पुरूरवार्द्रवौ, तच्चिन्त्यम्। धर्मिणः सूर्यस्य शाब्दनिमित्तत्वमुपेक्ष्य तद्धर्मस्य संक्रमणस्य अशाब्दनिमित्तताया आश्रयणासम्भवात्। हेमाद्रिमतमाह-*अत्रेति। *प्रतिदिनमिति।

"आदौ मध्येऽवसाने वा यत्र कन्यां रविर्व्रजेत्।
सपक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति॥"

इति कार्ष्णाजिनिवाक्यात्कर्मभेदः "तिस्र आहुतीर्जुहोति" इतिवत्। यदि वाक्यान्तरप्राप्तमेकं श्राद्धमनूद्य तिथिसमुच्चयो विधीयेत तदा न भेदः स्यात्। प्रकृते तु न तथा। तेन ब्राह्मणभेददक्षिणानां भेदेऽपि न दोषः। अमावास्यात्वेन प्रतिपद एकाकाराभिप्रायेण पक्षपदम्। तेन न षोडशत्वबाधः। *प्रयोगैक्यादिति।

"नभस्यस्यापरे पक्षे तिथिषोडषकं तु यत्।
कन्यास्थार्कान्वितः श्रेयान्स कालः श्राद्धकर्मणि॥"

इति शाट्यायनिवचने 'संख्यायुक्तेषु समुच्चयः स्यात्' इति न्यायेन तिथीनां श्राद्धे समुच्चयावगमात् तस्य श्राद्धावृत्तिं विनाऽनुपपत्तेरेकस्यैव श्राद्धस्य सायंप्रातरग्निहोत्रहोमस्येवावृत्तिः। तत्रानेकदिनसाध्य एक एव श्राद्धप्रयोगः। अतो ब्राह्मणदेशदक्षिणाना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'वृद्धौ तीर्थे च *संन्यस्ते ताते च पतिते सति ।
येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः ॥'
इति कात्यायनोक्तेः । यत्तु कौण्डिन्यः-
'दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् ।
न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च ॥' इति,
तत्संन्यस्तापित्राद्यतिरिक्तविषयम् *काम्यश्राद्धपरं वा । *अत्र बहु वक्तव्यं श्रीपितृकृतजीवत्पितृकनिर्णये ज्ञेयम् । एतच्च जीवत्पितृकेण पिण्डरहितं कार्यम् ।
*'मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः ।

मैक्यमिति । अत्रेदमरुचिबीजम् । शाट्यायनिवाक्यस्योत्पत्तिपरतया क्वोत्पत्तिः क्व गुणविधिरिति विनिगमनाविरहात् समुच्चितानेकतिथिविशिष्टश्राद्धविधौ 'यदाऽऽग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इत्यत्रेव समुच्चितानेककालविशिष्टकर्मविधिकृतभेदवदिहाऽपि श्राद्धभेदस्यैवौचित्यात् । *संन्यस्ते इति । पितृयज्ञे होमान्तमनारम्भो वेति पक्षद्वयम् । आरम्भपक्षे होमान्तः पित्रादिदेवतानां वा पिण्डदानमित्यग्रे स्पष्टम् । सर्वस्मिन्नपि पक्षे संन्यस्तादिपितृकस्यामावास्याश्राद्धं स्मृत्युक्तं भवति स्मृतीनां सर्वसाधारण्यात् । *काम्येति । नित्यनिषेधबाधेन काम्यस्य प्रवृत्तेः। ननु वृद्धौ चेति सर्वश्राद्धप्रतिप्रसवस्यापरपक्षिकनिषेधो बाधकोऽस्त्वित्यत आह-*अत्रेति । सामान्यतः—
'सपितुः पितृकृत्येषु अधिकारो न विद्यते ।'
इति सामान्यतोऽपरपक्षे श्राद्धनिषेधे सिद्धे कौण्डिन्यनिषेधस्य वैयर्थ्यवारणाय कृष्णपक्षान्तर्गतमप्यन्वष्टकाश्राद्धं पिण्डपितृयज्ञकल्पेन न कार्यमिति व्याख्येयम् । न चानेन तदुपसंहारः । तथा सत्येतदन्यसर्वश्राद्धप्राप्ते जीवत्पितृकस्य प्रतिप्रसवान्तरवैयर्थ्यात् । *मुण्डनमिति । वस्तुतस्तु एतस्य निर्मूलत्वात्सपिण्डं भवत्येव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव च ॥'

इति दक्षेण तस्य पिण्डनिषेधात् । अन्वष्टक्यमातृवार्षिकादौ तु वचनाद्भवतीति वक्ष्यामः । तथा छागलेयः-

'पिण्डो यत्र निवर्तेत मघादिषु कथंचन ।
सांकल्पं तु तदा कार्यं नियमाद्ब्रह्मवादिभिः ॥'

सांकल्परूपं च वक्ष्यते ।

अत्र श्राद्धाङ्गतर्पणं पक्षश्राद्धे प्रतिदिनं श्राद्धोत्तरम् । सकृन्महालये तु परेऽह्नि कार्यम् ।

तदुक्तं नारदीये—

'पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने ।
सकृन्महालये चैव परेहनि तिलोदकम् ॥'

गर्गोपि-

'पक्षश्राद्धे हिरण्ये च अनुव्रज्य तिलोदकम् ॥' इति ।

तथा प्रयोगपारिजाते गर्गः—

'कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत् ।
पितॄणां प्रत्यहं कार्यं निषिद्धाहेऽपि तर्पणम् ॥
सकृन्महालये श्वः स्यादष्टकास्वन्त एव हि ॥'

इदं निषिद्धदिनेपि कार्यम् ।

'तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वदा ।'

इति स्मृत्यर्थसारोक्तेः ।

'तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम् ॥'

इति स्मृतिरत्नावल्यां वचनाच्च ॥

एतच्च श्राद्धं मलमासे न कार्यम् । तदाह भृगुः—

'वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् ।
राजाभिषेकं काम्यं च न कुर्याद्धानुलङ्घिते ॥' इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हेमाद्रौ नागरखण्डे—

*'नभो वाथ नभस्यो वा मलमासो यदा भवेत्।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः॥'

एतच्च पित्रोर्मरणे प्रथमाब्दे *कृताकृतमिति त्रिस्थलीसेतौ भट्टाः।

इदं च नित्यं काम्यं च।

'पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा।
प्राप्नोति पञ्चमे दत्त्वा श्राद्धं कामान्सुपुष्कलान्॥'

इति(१) जाबाल्युक्तेः।

'वृश्चिके समतिक्रान्ते पितरो दैवतैः सह।
निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदारुणम्॥'

इति कार्ष्णाजिनिवचनाच्च। तदतिक्रमे प्रायश्चित्तमुक्तमृग्विधाने—

(२)'दुरोअश्वस्य' मन्त्रं च दशवारं द्विमासयोः।

---

*नभोवेति। नन्वत्र यदाऽऽश्विनोऽधिकमासस्तदा तत्र कन्यार्कसत्त्वात् श्राद्धप्रसङ्गः। अत्र नव्याः—

'यातुधानप्रियो मासः कन्यार्के जायते यदा।
दैवं पित्र्यं तदा कर्म उत्तरे मासि युज्यते॥'

इति वचनात्तुलार्के कार्यमित्याहुः। *कृताकृतमिति। कृ-

---

(१) 'याज्ञवल्क्युक्तेः' इति पुस्तकान्तरे पाठः।

(२) स मन्त्रो ऋग्वेदसंहितायां प्रथमाष्टके चतुर्थाध्याये—'दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः। शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि॥' इति। अस्य व्याख्या—'हे इन्द्र, त्वम् अश्वस्य दुरो दाताऽसि, तथा गोः पश्वादेर्दुरो दाताऽसि, तथा यवस्य यवादेर्धान्यजातस्य दुरो दातासि। वसुनः निवासहेतोर्धनस्येनः स्वामी पतिः सर्वेषां पालयिता। शिक्षानरः शिक्षतिर्दानकर्मा। शिक्षाया दानस्य नेताऽसि। प्रदिवः=पुराणः प्रगता दिवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महालयं यदा न्यूनं तदा संपूर्णमिति तत् ॥' इति। द्विमासयोः कन्यातुलयोर्महालयश्राद्धं यदा हीनमित्यर्थः॥ अत्र भरण्यां श्राद्धमतिप्रशस्तम् । तदुक्तं पृथिवीचन्द्रोदये मात्स्ये—

*'भरणी पितृपक्षे तु महती परिकीर्तिता।
अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् ॥'

पृथिवीचन्द्रोदये श्रीधरीये बृहस्पतिः—

'नभस्यापरपक्षस्य द्वितीया यदि याम्यभे।
तृतीया वाश्विताराभिः सहिता प्रीतिदा पितुः ॥'

एतत्पक्षे षष्ठी योगविशेषेण कपिलासंज्ञा। तदुक्तं वाराहे—

'नभस्यकृष्णपक्षे तु रोहिणीपातभूसुतैः।
युक्ता षष्ठी पुराणज्ञैः कपिला परिकीर्तिता ॥
व्रतोपवासनियमैर्भास्करं तत्र पूजयेत्।
कपिलां च द्विजाग्र्याय दत्त्वा क्रतुफलं लभेत् ॥'

पुराणसमुच्चये—

'भाद्रे मास्यसिते पक्षे भानौ चैव करे स्थिते।
पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत् ॥'

अत्र दर्शान्तत्वेन महालयो भाद्रपदकृष्णपक्षो तेऽभ्युदयः, अकृते तु न दोषः। द्विमासयोर्महालयं यदा न्यूनमिति सम्बन्धः। *भरणीति। इदं च पिण्डरहितं कार्यम्।

दिवसा यस्मिन् स तथोक्तः। अकामकर्शनः कामान् कर्शयति नाशयतीति कामकर्शनः न कामकर्शनः अकामकर्शनः हविर्दत्तवतां यजमानानां कामानभिमतफलप्रदानेन पूरयतीत्यर्थः। सखिभ्यः समानाख्यानेभ्य ऋत्विग्भ्यः सखा सखिवदत्यन्तं प्रियः, एवंभूतो य इन्द्रस्तं प्रति इदं स्तोत्रलक्षणं वचः गृणीमसि ब्रूमहे।' इति श्रीमत्सायणाचार्याणाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

य इत्युक्तं निर्णयामृते, हेमाद्रौ च । *हस्तार्कस्तु फ-
ल्गुनातिशयार्थः ।

'संयोगे तु चतुर्णां वै निर्दिष्टा परमेष्ठिना ।'

इति तत्रैवोक्तेः । अत्र विशेषो हेमाद्रौ स्कान्दे—

*'देवदारुं तथोशीरं कुङ्कुमैलामनःशिलाम् ।
पत्रकं पद्मकं यष्टिं मधु गव्येन पेषयेत् ॥
क्षीरेणालोड्य कल्केन स्नानं कुर्यात्समन्त्रकम् ।
आपस्त्वमसि देवेश ज्योतिषां पतिरेव च ॥
पापं नाशय मे देव वाङ्मनःकायकर्मजम् ।
पञ्चगव्यकृतस्नानः पञ्चभङ्गैस्तु मार्जयेत् ॥'

पञ्चभङ्गैः=पञ्चपल्लवैः । तथा—

'रत्नैर्नानाविधैर्युक्तं सौवर्णं कारयेद्रविम् ।
शक्तितस्तु पलादूर्ध्वं तदर्धं कर्षतोपि वा ॥
सौवर्णमरुणं कुर्यान्नौकां चैव तथा रथम् ॥'

तथा—

'अल्पवित्तोपि यः कश्चित्सोपि कुर्यादिमं विधिम् ।'

प्रभासखण्डे—

'स्थापयेदव्रणं कुम्भं चन्दनोदकपूरितम् ।
रक्तवस्त्रयुगच्छन्नं ताम्रपात्रेण संयुतम् ॥

"अयनद्वितये श्राद्धं विषुवद्द्वितये तथा ।
भरणीषु च सर्वासु पिण्डनिर्वपणं न हि ॥"

इति पुलस्त्यनिषेधात् । 'युगादिभरणिमघे' इति प्रोक्तं तु सति
प्रसम्या व्याख्यातम् । 'तिथिनक्षत्रवारादि' इति वचनात् । ननु
वाराहे योगचतुष्टयं पुराणसमुच्चये च तत्पञ्चकमिति कथं कपि-
लाषष्ठ्यैक्यमित्यत्राह—*हस्तार्कस्त्विति । इयं च षष्ठी योग-
विशेषेण पूर्वा वा परा वा ग्राह्या । *देवदारुमिति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रथो रौक्मपलस्यैव एकचक्रः सुचित्रितः।
सौवर्णपलसंयुक्तां मूर्तिं सूर्यस्य कारयेत् ॥'
ततः सूर्यं कपिलां च षोडशोपचारैः संपूज्य दद्यात्।
'दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः।
कपिलासहितो देवो मम मुक्तिं प्रयच्छतु॥
यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी।
प्रदत्ता सह सूर्येण मम मुक्तिप्रदा भव ॥' इति।
विशेषान्तरं तत्रैव ज्ञेयमिति दिक् ॥

इयमेव चन्द्रषष्ठी। सा चन्द्रोदयव्यापिनी ग्राह्या। उभयत्र तथात्वे पूर्वा। तदुक्तं भविष्ये—

'तद्वद्भाद्रपदे मासि षष्ठ्यां पक्षे सितेतरे।
चन्द्रषष्ठीव्रतं कुर्यात्पूर्वविद्धः प्रशस्यते ॥
चन्द्रोदये यदा षष्ठी पूर्वाह्णे चापरेऽहनि।
चन्द्रषष्ठ्यसिते पक्षे सैवोपोष्या प्रयत्नतः ॥' इति।
अष्टम्यामाश्वलायनेन मघावर्षसंज्ञं श्राद्धमुक्तम् ॥
'एतेन माघ्यावर्षं प्रौष्ठपद्या अपरपक्षे' इति। *इदं

"पञ्चम्यामेकभक्तं तु कुर्यात्तत्र विचक्षणः।
षष्ठ्यां प्रातः समुत्थाय कृत्वाऽऽदौ दन्तधावनम् ॥"
दन्तधावनमिति नित्यकर्मोपलक्षणम्। दन्तधावनं च काष्ठं विनेति स्मर्तव्यम्।

"जलपूर्णाऽञ्जलिं कृत्वा इमं मन्त्रमुदीरयेत्।
निराहारोऽद्य देवेशस्त्वद्भक्तस्त्वत्परायणः ॥
पूजयिष्याम्यहं भक्त्या शरणं भव भास्कर।
अर्घ्यं दत्त्वाऽथ सङ्कल्पं कृत्वा स्नात्वा शुचिस्मितः ॥"
इत्यनन्तरमिदम्। गव्येन=क्षीरेण। कपिलां=गाम्। विशेषान्तरं कपिलाषष्ठीव्रतान्तरम्। *इदमिति। अष्टका=अन्वष्टका, पूर्वेद्युःश्राद्धा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सप्तम्यादिषु त्रिष्वहःसु कार्यम्' इति नारायणवृत्तिः । हरदत्तस्तु मघायुक्तवर्षासु भवं त्रयोदशीश्राद्धमिति व्याख्यौ । पृथ्वीचन्द्रोदये ब्राह्मे—

'आषाढ्याः पञ्चमे पक्षे गया माध्याष्टमी स्मृता ।
त्रयोदशी गजच्छाया गयातुल्या तु पैतृके ॥

आश्विनकृष्णाष्टम्यां *महालक्ष्मीव्रतम् । तत्र निर्णयामृते पुराणसमुच्चये—

'श्रियोऽर्चनं भाद्रपदे सिताष्टमीं
प्रारभ्य *कन्यागते च सूर्ये ।
समापयेत्तत्र तिथौ च यावत्
सूर्यस्तु पूर्वार्धगतो युवत्याः ॥' इति ।

तत्रैव—

'कन्यागतेऽर्के प्रारभ्य कर्तव्यं न श्रियोऽर्चनम् ।
हस्तप्रान्तदलस्थेऽर्के तद्व्रतं न समापयेत् ॥
पूजनीया गृहस्थानामष्टमी प्रावृषि श्रियः ।
दोषैश्चतुर्भिः संत्यक्ता सर्वसंपत्करी तिथिः ॥,

तथा—

युक्ता एतेनेत्युक्तेः । माध्यावर्षमिति पठित्वा मध्ये वर्षासु भवमिति कचिदाहुः । *महालक्ष्मीव्रतमिति । तदनुरोधेन पूर्वाणि पञ्चदश दिनानि ग्राह्याणीति भावः । अत्र भाद्रशुक्लाष्टमीमारभ्याश्विनकृष्णाष्टमीपर्यन्तं षोडशदिनेषु महालक्ष्मीयात्रा कार्या ।

((१)'महालक्ष्म्यष्टमीं प्राप्य तत्र यात्रा कृता नृणाम् ।
संपूजीतेह विधिवत् पद्मां स च न मुञ्चति ॥'

इति काशीखण्डात् । महालक्ष्म्यष्टमी=भाद्रशुक्लाष्टमी । तत्र ज्येष्ठापूजासत्त्वात्तां प्रारभ्य महालक्ष्म्यष्टमी=आश्विनकृष्णा-

---

(१) कंसान्तर्गतो ग्रन्थः क्वचित्पुस्तके नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पुत्रसौभाग्यराज्यायुर्नाशिनी सा प्रकीर्तिता।
तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ॥
विशेषेण परित्याज्या नवमीदूषिता यदि॥'

इति दोषचतुष्टयं तत्रैवोक्तम्।

'त्रिदिने चावमे चैव अष्टमीं नोपवासयेत्।
पुत्रहा नवमीविद्धा स्वघ्नी हस्तार्धगे रवौ॥' इति।

त्रिदिनावमदिनलक्षणं च रत्नमालायाम्—

'यत्रैकः स्पृशति तिथिद्वयावसानं
वारश्चेदवमदिनं तदुक्तमार्यैः।
यः स्पर्शाद्भवति तिथित्रयस्य चाह्नां
त्रिद्युस्पृक्कथितमिदं द्वयं च नेष्टम्॥'

एते च सर्वे निषेधाः प्रथमारम्भविषयाः। मध्ये तु सति सम्भवे ज्ञेयाः। व्रतस्य षोडशाब्दसाध्यत्वेन मध्ये त्यागायोगात्। *इयं चन्द्रोदयव्यापिनी ग्राह्या। तत्रैव पूजाद्युक्तेः। परदिने चन्द्रोदयादूर्ध्वं त्रिमुहूर्तव्यापित्वे परैव कार्या, अन्यथा*पूर्वैव।

ष्टमी तां प्राप्य तावत्पर्यन्तमित्यर्थः। *कन्यामगते चेति। कन्यामगते सिंहस्थे सूर्ये प्रारम्भः। युवत्याः=कन्यायाः पूर्वार्धे सूर्येऽवस्थिते सति समाप्तिरित्यर्थः। इदं च वाक्यं षोडशदिनानां समप्राधान्येन व्रताङ्गत्वार्थम्।

'मासि भाद्रपदे शुक्लपक्षे ज्येष्ठायुताष्टमी।
प्रारब्धव्यं व्रतं तत्र महालक्ष्मी यतात्मभिः॥'

इति वचनाच्च। तत्र समाप्तिदिननिर्णयमाह—*इयमिति। पूजादीत्यादिना चन्द्रार्घ्यदानग्रहः।

'चन्द्रोदयव्रते चैव तिथिस्तात्कालिकी स्मृता।'

इति स्मृतेः। *पूर्वैवेति।)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पूर्वा वा परविद्धा वा ग्राह्या चन्द्रोदये सदा ।
त्रिमुहूर्ताऽपि सा पूज्या परतश्चोर्ध्वगामिनी ॥'
इति मदनरत्ने निर्णयामृते च सङ्ग्रहोक्तेः ।
'अर्धरात्रमतिक्रम्य वर्तते योत्तरा तिथिः ।
तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं सदा ॥'
इति वचनाच्चेति सङ्क्षेपः ॥ इति महालक्ष्मीव्रतनिर्णयः ॥
अथ नवम्यामन्वष्टकाश्राद्धम् । तत्र कात्यायनः—
*'अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् ।
पित्रादिमातृमध्यं च ततो मातामहान्तकम् ॥'
पृथ्वीचन्द्रोदये ब्रह्माण्डे—
'पितॄणां प्रथमं दद्यान्मातॄणां तदनन्तरम् ।
ततो मातामहानां च अन्वष्टक्ये क्रमः स्मृतः ॥'
श्राद्धहेमाद्रौ छागलेयः—
'केवलास्तु क्षये कार्या वृद्धावादौ प्रकीर्तिताः ।
अन्वष्टकासु मध्यस्था नान्त्याः कार्यास्तु मातरः ॥'

"कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी ।
पूर्वविद्धैव कर्तव्या परविद्धा न कुत्रचित् ॥"
इत्युक्तेः । अत्र अष्टम्याः श्राद्धं मघाश्राद्धसमफलम् ।
"आषाढ्याः पञ्चमे पक्षे गयामध्याष्टमी स्मृता ।
त्रयोदशी गजच्छाया गयातुल्या तु पैतृके ॥"
इत्युक्तेः । भाद्रकृष्णनवम्यामन्वष्टकाश्राद्धं मातृश्राद्धं च । तत्राद्यमभिप्रेत्याह—*अन्वष्टकास्विति । हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका अपरेद्युरन्वष्टक्यमिति चतस्रोऽन्वष्टकाः भाद्रकृष्णाष्टम्युत्तरा चान्वष्टका पञ्चमी 'प्रौष्ठपद्युत्तराभूयः' इति वचनात् । अथवा आश्वलायनानां माध्यावर्षोत्तरनवम्यामन्वष्टकासदृशं कर्मेति । तत्रायं देवताक्रमः । अयमेवोत्तरान्वष्टक्ये ग्राह्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दीपिकायां तु मातृश्राद्धमादौ कार्यमित्युक्तम्। मातृयजनं त्वन्वष्टकास्वादित इति हेमाद्रौ। ब्राह्मेऽपि—

*'अन्वष्टकासु क्रमशो मातृपूर्वं तदिष्यते।' इति।

अत्र *शाखाभेदेन व्यवस्थेति पृथ्वीचन्द्रोदयः। *जीवत्पितृकाविषयमिति निर्णयदीपः। इदं च जीवत्पितृकेणापि कार्यम्। तदुक्तं निर्णयामृते मैत्रायणीयपरिशिष्टे—

'आन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च मृतेऽहनि।
मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति॥'इति।

*यद्यपि जीवत्पितृकस्य पश्चाप्यन्वष्टका अवश्यं कर्तव्याः, *तथाप्यशक्तस्येयमावश्यकी।

'प्रौष्ठपद्यष्टका भूयः पितृलोके भविष्यति।'

इति हेमाद्रौ पाद्मोक्तेः।

*'सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ।
नवम्यां हि प्रदातव्यं ब्रह्मलब्धवरा यतः॥'

इति सूतेनावश्यकत्वोक्तेश्च। अत्र *'सर्वासाम्' इत्युक्तेः स्वमातरि जीवन्त्यामपि सपत्नमातृभ्यो दद्यात्। तन्मरणे सति तस्यै ताभ्यश्च दद्यादित्युक्तं जीव-

---

*शाखेति। बह्वृचानां पितृपूर्वम्। तत्सूत्रे तथोक्तेः। अन्येषां मातृपूर्वम्। *जीवदिति। तस्य पितृतर्पणाभावात्। अत्र क्रमानुपपत्तेररुचिः। आन्वष्टक्यं=भाद्रकृष्णा नवमी। श्राद्धमात्रमित्याशयेन शङ्कते-*यद्यपीति। तदेवादृत्य समाधत्ते-*तथापीति। अन्वष्टकाश्राद्धोत्तरश्राद्धमन्वष्टक्यम्। 'अपरेद्युरन्वष्टक्यम्'इत्युक्तेरिति अष्टकामालम्ब्य शङ्कोत्तरे कृते। द्वितीये जीवत्पितृकस्य मृतमातृकस्य तत्त्वमिति। *सर्वासामिति। अत्र ग्रन्थकृन्मतेऽपि मातामहा न कार्याः। श्रुतदेवतयैवाकाङ्क्षानिवृत्तेः। अत्र वृत्युक्तं विशेषमाह-*अत्रेति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पितृकनिर्णये गुरुभिः । अत्र सर्वासां नामनिर्देशेनै*को ब्राह्मणो*ऽर्घ्यः पिण्डश्च । नामैक्ये तु *द्विवचनादिप्रयोग इत्युक्तं नारायणवृत्तौ । अन्वष्टकाश्राद्धं *तद्यागश्च गोभिलीयानां मध्यमायामेव, न सर्वासु* ।

'अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ ।'

इति छन्दोगपरिशिष्टात् । अत्र भर्तृमरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यमिति केचिदाहुः । पठन्ति च—

'श्राद्धं नवम्यां कुर्यात्तन्मृते भर्तरि लुप्यते ।' इति ।

तदेतन्निर्मूलत्वान्मूर्खप्रतारणमात्रम् । श्राद्धदीपकलिकायां ब्राह्मे—

*'पितृमातृकुलोत्पन्ना याः काश्चित्तु मृताः स्त्रियः ।
श्राद्धार्हा मातरो ज्ञेयाः श्राद्धं तत्र प्रदीयते ॥' इति ।

*अत्र देशाचाराद्व्यवस्था ।

आन्वष्टक्यमधिकृत्यैवेयं वृत्तिः मातृश्राद्धेऽप्यालम्बनीया बाधकाभावात् । तत्र ब्राह्मणभेदेऽर्घ्यदानभेदवाक्यं व्यर्थमित्यत उक्तम्—*एक इति । *अर्घ्य इति । अर्घ्यदानं तु पृथक् । 'अनेका मातरो यस्य' इत्युक्तगालववाक्यात् । *द्विवचनादीति । एकशेषोत्तरमित्यादि । नामभेदे द्वन्द्वोत्तरम् । द्विवचनादेः सत्त्वात् । एतच्च सधवाया एव मातुर्मरणे अविधवानवमीसमाख्यानात् इत्येके । 'अविशेषाद्विधवाया अपि'इति मयूखः । तद्यागो=मातृयागः । न सर्वासु=न पूर्वपरयोः 'स्त्रीशूद्रौ नाधीयाताम्'इतिवद्विशेषतः प्राज्ञेतरनिषेधात् । *पित्रिति । प्रत्यासत्तिविशेषपरिचयायेदम् । याः काश्चिदिति दर्शनात् । तेनापुत्रपत्न्यादेरपि श्राद्धसिद्धिः । पितृष्वस्रादेः श्राद्धपरमिति वदतां मते त्वाह—*अत्रेति । यस्तु जीवत्यां मातरि पितृष्वस्रादिभिः पालितः तद्धनग्राही वा तत्परमिति तु प्रतीमः । अत्र भार्याविरहितः=अविवाहि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं चानुपनीतेनापि कार्यम् । तदुक्तं श्राद्धशूलपाणौ मात्स्ये—

'अमावास्याष्टकाकृष्णपक्षपञ्चदशीषु च ।'

इत्यभिधाय—

'एतच्चानुपनीतोऽपि कुर्यात्सर्वेषु पर्वसु ।
श्राद्धं साधारणं नाम सर्वकामफलप्रदम् ॥
भार्याविरहितोप्येतत् *प्रवासस्थोपि नित्यशः ।
शूद्रोप्यमन्त्रवत् कुर्यादनेन विधिना बुधः ॥' इति ।

तेन* साग्नेरेवेदमिति *परास्तम् । *अन्वष्टकातः पृथगेवेदं मातुः श्राद्धमित्यपि परास्तम् । *लाघवेन *मूलैक्यादष्टकापवादाविशेषाच्च । तेनान्यत्रान्वष्टकाश्राद्धस्य

तः, मृतभार्यश्च । *प्रवासस्थ इति । पत्न्यभावाभिप्रायम् । तेन= भार्याविरहिताद्युक्त्या । *साग्नेरेवेति । अन्वष्टकायां पिण्डपितृयज्ञकल्पसत्त्वात् तस्य साग्निकमात्रविषयत्वात् । *परास्तमिति । निरग्न्यादेस्तु पाणिहोमः । आपस्तम्बीयानां तु लौकिकाग्नौ होम इति स्मर्तव्यम् । नन्वत्र सर्वेषां साग्न्यनग्निजीवदजीवत्पितृकाणामधिकारे 'मातुः श्राद्धं सुतः कुर्यात्'इति कुत इत्यत्र केषां चित्समाधानमुत्थापयति-*अन्वष्टकात इति । *लाघवेनेति । अन्वष्टकाश्राद्धं नवदैवत्यं च मृतपितृकं प्रत्येव सम्भवतीयतस्तदन्तर्गतमातृश्राद्धे एव जीवत्पितृकस्याधिकारो 'मातुः श्राद्धं सुतः कुर्यात्'इत्यनेन बोध्यते । इतोऽपि च न मातामहचर्चाऽपि । तदेतदुक्तम्-*मूलैक्यादिति । अयं भावः-भवद्रीत्या श्राद्धद्वये भिन्नैव श्रुतिः कल्प्या स्यात् । मम तु सर्वाधिकारिकं श्राद्धं मूलभूतश्रुत्या बोध्यम् । तत्र मृतपितृकस्य प्रधानत्रयम् । जीवत्पितृकस्य त्वेकं प्रधानमिति विशेषव्युत्पादकं 'मातुः श्राद्धं सुतः कुर्यात्'इति वचनम् ।

"पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*अङ्गस्याप्य*त्र प्रधानत्वं वचनात्। *(१)अवेष्टेरिव राज-
सूयान्तर्गताया 'एतयान्नाद्यकामं याजयेत्' इति फलार्थ-

इति बहुवचनवशेन पितृपदस्य जनकपरत्वादिह तदभावादपि-
न मातामहानां प्रसक्तिरिति भावः । *अङ्गस्येति । तावताऽपि
तदन्तर्गतमातृश्राद्धे स्वप्राधान्यमस्त्येवेत्यप्याहुः । वस्तुतस्तु 'अमा-
वास्याष्टका'इति विधिः साग्निकपर एव। अन्वष्टक्यस्य पितृयज्ञकल्प
नियतत्वात् । अनुपनीतादीनां च तत्कल्पासम्भवेनाप्राप्तमेव श्रा-
द्धमन्वष्टक्यातिदेशेन विधीयते इति मतमुत्थापयति—तेनेति ।
मूलैक्यादिति। यानि कल्पसूत्राणि पुराणानि च तेषां सर्वेषां एकैव
श्रुतिर्मूलत्वेन कल्प्यते । साग्निनिरग्निभेदेन पितृयज्ञभावाभावौ तु
प्रयोगविधेरेव भेदकौ नोत्पत्तिविधेरिति भावः । ननु कश्चन प्र-
योगः पितृयज्ञकल्पेन कश्चित्तु तं विनापीति कथमुत्पत्तिविधेर्न
भेद इत्यत्राह—अष्टकेति । न चायमभ्यासः । अन्यपरपुनःश्रवणं हि
अभ्यासः । न चान्यपरतेति भावः । मूलैक्येपि प्रयोगभेदं दृष्टान्त-
मुक्त्वा व्युत्पादयति—तेनेति । *अन्यत्र=साग्निप्रयोगे । *अत्र=
निरग्निप्रयोगे । वचनात्=एतच्चानुपनीतोऽपीति वाक्यात् ।
वस्तुतस्तु

"अष्टकान्वष्टकास्तिस्रस्तथैव च नृपोत्तम ।
एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ॥"

इति वाक्यभेदेन निर्देशादन्वष्टकाश्राद्धं स्वतन्त्रमेव न च क-
स्याप्यङ्गं न च बृहस्पतिसववदस्यापि प्रयोगबहिर्भूतगतत्वमस्तु
बृहस्पतिसवस्य पृथक् निर्देशाभावेन विशेषादिति ।

नन्वेवं कथं तस्येह प्राप्तिरित्यत्राह—*अवेष्टेरिवेति । राजाधि-

---

(१) अवेष्टिः राजसूयान्तर्गतेष्टिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कारिकराजसूयान्तर्गताया अवेष्टेरप्राप्तौ "यदि ब्राह्मणो यजेत* एतयान्नाद्यकामं याजयेत्" इति एतच्छब्देनोपादानं तद्वत् मृतपितृकाधिकारिकान्वष्टक्यान्तर्गतस्य मातृश्राद्धस्याप्राप्तौ एतच्चेत्येतच्छब्देनोपादानमित्यर्थः। एवमवेष्टौ विप्रो राजा चाधिकारिणौ मातृश्राद्धेऽपि जीवदजीवत्पितृकौ तथैव तुल्यमेवेत्युभयत्राप्युत्पत्तिविधेर्न भेद स इत्यपि बोध्यम्। ननु जीवत्पितृकस्य 'सपितुः' इतिनिषेधेनानधिकारे प्राप्ते

"मातुः श्राद्धं सुतः कुर्यात् पितर्यपि च जीवति।"

इति तत्प्राप्तिफलकोऽयमपूर्वविधिरेव स्यात्। ब्राह्मणस्य 'राजाधिकारिकराजसूयाप्राप्तौ 'यदि ब्राह्मणो यजेत' इति विधिवत् 'यदहरेव विरजेत्तदहरेव प्रव्रजेत्' इति ज्ञानार्थतया काम्ये संन्यासे सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारादतथाभूतस्यातुरस्याधिकाराप्राप्तौ 'यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्' इति तत्प्राप्तिफलकविधिवदिति मैवम्। यदि ब्राह्मणो यजेतेत्याद्यवेष्टिप्रयोगविधायकवाक्ये तस्या राजसूयान्तर्गतत्वेनेतरसापेक्षतयैव साधनत्वावगमाद्राजसूयसाध्यत्वेनावगतस्य स्वाराज्यस्यावेष्टिसाध्यत्वेनोपस्थानासम्भवाद्विश्वजिदादिन्यायेन फलापत्तिवारणाय 'एतयान्नाद्यकामम्' इत्येतेन फलं समर्प्यते आतुरवाक्ये तु यदहरेवेति संन्यासस्य निरपेक्षसाधनत्वावगमात्प्रागेव तत्साध्यत्वेनावगतस्य ज्ञानस्याप्रत्यूहमुपस्थित्या फलान्तरोपस्थापकापेक्षैव नास्तीति प्रकृतज्ञानमेव फलमन्वेति तद्वदष्टकान्तर्गतस्य मातृश्राद्धस्येतरसापेक्षत्वेन साधनतया तत्साध्यत्वेनावगतस्य प्रत्यवायानुत्पादस्यैव जीवत्पितृकाधिकारिकमातृश्राद्धेऽपि फलत्वं न तु स्वर्गस्यान्यस्य वा कस्यचित्। यथा यावज्जीवादिवाक्यस्य उपस्थितमपि स्वर्गं विहाय निष्कामं प्रति प्रयोगनिर्वाहार्थं पापक्षयार्थत्वन्तद्वत्। न चाङ्गत्वे फलसम्भवात्पर्णतादिवदिति प्राधान्यं नापि प्रत्यवा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वम् । *अत्राष्टका=अन्वष्टका *पूर्वानुरोधात् । तथा-
ग्निपुराणे-

'अन्वष्टकासु वृद्धौ च गयायां च क्षयेऽहनि ।
अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह ॥'

आपस्तम्बानां तु 'अष्टकासु च वृद्धौ च' इति भाष्यकारैः पाठादष्टकायां मातृश्राद्धम् *(१)छन्दोगैस्त्वत्र मातृ-मातामहश्राद्धं न कार्यं किन्तु त्रिपुरुषमेव ।

'न योषिद्भ्यः पृथग्दद्यादवसानदिनादृते ।
(२)कर्षूसमन्वितं मुक्त्वा तथाद्यं श्राद्धषोडशम् ॥
प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः ॥'

इति छन्दोगपरिशिष्टात् । 'अन्वष्टकासु तेषां कर्षू-विधानात्' इति शूलपाणिः । यत्तु—

'*तमिस्रपक्षे नवमी पुण्या भाद्रपदे हि या ।
चत्वारः पार्वणाः कार्याः पितृपक्षे मनीषिभिः ॥'

इति, तद्देशाचारतो व्यवस्थितं ज्ञेयम् । इदं जीवत्पि-

यानुत्पादस्य फलत्वम् क्षेमत्वादिति विशेषणमभिप्रेत्य दार्ष्टान्तिकं प्रधानत्वं, दृष्टान्ते च फलार्थत्वमित्येवोक्तम् । अन्यथा दार्ष्टान्तिके फलार्थत्वं ब्रूयात् । एतावताऽयमधिकारविधिविशेषमात्रं नोत्पत्ति-विधिभेद इति भावः । एवं यथाऽऽतुरस्य मनसा वाचा वेत्युक्त्या कथं चित्प्रधानमात्रेण फलसिद्धिः । तथा जीवत्पितृकस्य मातृश्राद्धमात्रे-णेति न कोऽपि दोषः । ननु अमावास्याष्टकेति अष्टकायामेवानुपनी-तादेरधिकारः स्यादित्यत्राह-*अत्रेति । *पूर्वेति । प्रौष्ठपद्यष्ट-केत्यर्थः । *छन्दोगैरिति । मृतमातृकैरपीत्यादि । *तमिस्रेति

---

(१) छन्दोगाः सामवेदिनः ।
(२) कर्षूप्रकारस्तृतीयपरिच्छेदोत्तरार्धे द्रष्टव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृकेणापि सपिण्डं कार्यम् । हेमाद्रौ विष्णुधर्मोत्तरे—

'अन्वष्टकासु च स्त्रीणां श्राद्धं कार्यं तथैव च ।'

इत्युपक्रम्य—

'पिण्डनिर्वपणं कार्यं तस्यामपि नृसत्तम ।'

इति वचनं श्राद्धविधिना पिण्डदाने प्राप्ते पुनस्तत्कीर्तनं यस्य जीवत्पितृकगर्भिणीपतित्वादिना पिण्डदानं निषिद्धं तस्य तत्प्राप्त्यर्थमिति श्रीतातचरणाः ।

अत्र सुवासिनीभोजनमुक्तं मार्कण्डेयपुराणे—

'मातुः श्राद्धे तु सम्प्राप्ते ब्राह्मणैः सह भोजनम् ।
सुवासिन्यै प्रदातव्यमिति शातातपोऽब्रवीत् ॥
*(१)भर्तुरग्रे मृता नारी सह दाहेन वा मृता ।
तस्याः स्थाने नियुञ्जीत विप्रैः सह सुवासिनीम् ॥'

तत्रैव मदालसावाक्यम्—

स्त्रीश्राद्धे पुत्र देयाः स्युरलङ्काराश्च योषिते ।
मञ्जीरमेखलादानकर्णिकाकङ्कणादयः ।' इति ।

अत्राशक्तावनुकल्पमाहाश्वलायनः—

'अनडुहो यवसमाहरेदग्निना वा कक्षमुपोषेदेषा मेऽष्टकेति न त्वेवानष्टकः स्यात' इति ।

हेमाद्रौ पितामहः—

'अमावास्या व्यतीपातपौर्णमास्यष्टकासु च ।

निर्मूलमिति नव्याः । *भर्तुरिति । विधवाश्राद्धे सुवा-

(१) धर्मसिन्धौ तु-'अत एवास्या अविधवानवमीत्वप्रसिद्धिः । अतः पत्न्या अपि नवमीश्राद्धं कार्यम् । अस्याविधवानवमीश्राद्धस्य महालयवद्यावद्वृश्चिकदर्शनं गौणकालः' इत्युक्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वान् श्राद्धमकुर्वाणो नरकं प्रतिपद्यते॥'

अकरणे च प्रायश्चित्तमुक्तमृग्विधाने—

'एभि(१)र्द्युभिर्जपेन्मन्त्रं शतवारं तु तद्दिने ।
आन्वष्टक्यं यदा न्यूनं संपूर्णं याति सर्वथा ॥' इति॥

एतत्पक्षे द्वादश्यां विशेषः पृथ्वीचन्द्रोदये वायवीये—

'संन्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथाविधि ।
महालये तु यच्छ्राद्धं *द्वादश्यां पार्वणं तु तत् ॥' इति ।

सिन्यनावश्यकत्वार्थम् । एतदेव मातुराब्दिकादिसमस्तश्राद्धे सुवासिनीप्रापकम् । भोजनं=भोज्यमन्नम् । सहदाहेनेति । एतच्च-सहदग्धाया मातुराब्दिकादाविव नवमीश्राद्धे सुवासिनीप्रापकं नवमीश्राद्धमपि प्रापयति । यवसम्=आर्द्रतृणम्, कक्षं=शुष्कतृणम् । उपोषेत्=दहेत् । अयं च—

अग्निना वा दहेत्कक्षं श्राद्धकाले उपागते ।
तृणानि वा गवे दद्यात्पिण्डान्वाऽप्यथ निर्वपेत् ॥

इत्यग्रे वचनात्सर्वश्राद्धानुकल्पः । 'अष्टकासु च' इति चकारादन्वष्टकाग्रहः । अस्यामेव नवम्यां बिल्वशाखायां देवीबोधनं वक्ष्यति । *द्वादश्यामिति । सकृत्करणपक्षे वानप्रस्थादेरपि उक्तं

---

(१)—तत्र पूर्वं ममान्वष्टक्याकरणजनितप्रत्यवायपरिहारार्थं शतवारमेभिर्द्युभिः सुमना इति मन्त्रजपं करिष्ये इति संकल्प्य तज्जपं कुर्यात् । मन्त्रस्तु-"एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना । इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥" इति । ऋ० सं० अ० १ अ० ४ । अस्य—'हे इन्द्र, एभिरस्माभिर्दत्तैर्द्युभिर्दीप्तैश्चरुपुरोडाशादिभिः एभिरिन्दुभिः पुरोवर्तिभिस्तुभ्यं दत्तैः सोमैश्च प्रीतस्त्वं अस्माकममतिं दारिद्र्यं गोभिस्त्वया दत्तैः पशुभिरश्विना ऽश्वयुक्तेन धनेन च निरुन्धानो निवर्तयन् सुमनाः शोभनमना भव । वयमिन्दुभिरस्माभिर्दत्तैः सोमैः प्रीतेनेन्द्रेण दस्युं उपक्षपयितारं शत्रुं दरयन्तो हिंसन्तः अत एव युतद्वेषसः पृथग्भूतशत्रुका भूत्वा इषा इन्द्रदत्तान्नेन संरभेमहि संरब्धा भवेम । संगच्छेमहीत्यर्थः ।' इति श्रीमत्सायणाचार्यकृता व्याख्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ त्रयोदशीश्राद्धम् । तत्र चन्द्रिका—

*'त्रयोदशी भाद्रपदी कृष्णा *मुख्या पितृप्रिया ।
तृप्यन्ति पितरस्तस्यां स्वयं पञ्चशतं समाः ॥
मघायुतायां तस्यां तु जलाद्यैरपि तोषिताः ।
तृप्यन्ति पितरस्तद्वद्वर्षाणामयुतायुतम् ॥'

प्रयोगपारिजाते शङ्खः—

'प्रौष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् ।
प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन च ॥
प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा ।
नृणां श्राद्धे सदा प्रीताः प्रयच्छन्ति पितामहाः ॥'

एतन्नित्यमपि । पृथ्वीचन्द्रोदये विष्णुधर्मे—

'प्रौष्ठपद्यामतीतायां तथा कृष्णत्रयोदशी ।

प्राक् । अत्र—

यत्किञ्चिन्मधुना मिश्रं प्रदद्यात् त्रयोदशीम् ।
तदप्यक्षय्यमेव स्याद्वर्षासु च मघासु च ॥

इति मानवे मघासु चेति पृथक् चकारात् त्रयोदशीश्राद्धमघाश्राद्धयोर्भेदः । "यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति" इत्यत्र चकारादाग्नेयभेदवत् । तेन दिनान्तरगासु मघासु मघाश्राद्धं भवति । एवं च मघात्रयोदश्योर्योगे फलाधिक्यं दर्शयति—*त्रयोदशीति । अत्र

"आषाढ्याः पञ्चमे पक्षे गयामध्याष्टमी स्मृता ।
त्रयोदशीगजच्छाया गयातुल्ये तु पैतृके ॥"

इत्यादितोऽपरपक्षनिमित्तकमेव सकृत्पक्षाभिन्नेन पक्षेण महालयत्रयोदश्यां क्रियमाणं श्राद्धं त्रयोदशीश्राद्धमिति प्रतीयते । अतः महालयत्रयोदशीश्राद्धस्य अपरपक्षश्राद्धाद्भेदं व्युत्पादयति—त्रयोदशीति । *मुख्या पितृप्रियेति । मघायुक्तां त्रयोदशीं प्राप्येति तथा कृष्णा त्रयोदशीति चोक्तेः अपरपक्षश्राद्धस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्युक्त्वा—

'एतांस्तु श्राद्धकालान्वै नित्यानाह प्रजापतिः ।
श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते ॥'

इत्युक्तेः । एतच्चाऽविभक्तैरपि पृथक्कार्यम् । तथा च हेमाद्रौ—

'विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक् सुताः ।
मघासु च ततोन्यत्र नाधिकारः पृथग्विना ॥'इति ।

अपरार्के वायवीये—

*'हंसे हस्तास्थिते या तु मघायुक्ता त्रयोदशी ।
तिथिर्वैवस्वती नाम सा छाया कुञ्जरस्य तु ॥'

*अत्र च—

प्रत्यभिज्ञानाच्च महालयत्रयोदशीश्राद्धमपरपक्षश्राद्धाद्भिन्नम् । अत एव तद्विशेषान्महालयश्राद्धादपि भिन्नम् । एतत्त्रयोदश्याः कृष्णपक्षाविनाभूतत्वेऽपि न त्रयोदशीश्राद्धं कृष्णपक्षश्राद्धाविनाभूतं सकृत्करणपक्षे त्रयोदश्यां तदभावात् । अस्य नित्यत्वाच्च काम्यकृष्णपक्षश्राद्धादपि भेदः । युगादिश्राद्धात्तु त्रयोदशीश्राद्धं न भिद्यते, त्रयोदशीविशेषस्य युगादित्वाविनाभावात् । युगादिश्राद्धं विधाय त्रयोदशीश्राद्धविधानं तु अयनादिश्राद्धविधानवदावश्यकत्वार्थम्, फलातिशयार्थञ्च । *हंसे इति । पारिभाषिकी गजच्छाया । उक्तवचनेषु क्वचिन्मघायोगः स्मर्यते क्वचित्तु नेत्यतो विचारमारभते—*अत्र चेति । केवलमघावाक्यानां केवलत्रयोदशीवाक्यानां चार्थवादत्वोपरामादर्थवादानां विधिशेषत्वेन तदनुरोधेन नेयत्वादिति भावः । अत्रेदमरुचिबीजम्—लाघवमात्रेणैकविधिकल्पनास्वीकारे गजच्छायाख्ययोगयुक्तायामेव त्रयोदश्यां कुञ्जरप्राक्छाये एव श्राद्धं स्यान्नान्यत्रेति । अत्र च केवलापि त्रयोदशी कालः तद्वाक्ये त्रयोदशीपदस्य यथाश्रुतार्थकत्वेनैवोपपत्तेर्मघायुक्ततत्परत्वे मानाभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अपि नः स कुले भूयाद्यो नो दद्यात्त्रयोदशीम् ।
पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च ॥'

इति विष्णुमनुवचने केवलत्रयोदशीश्रुतेर्मघा गुण इति कल्पतरुः । शूलपाणिस्तु—'केवलवाक्यानामर्थवादत्वाद्विधौ च मघायोगश्रुतेर्विधिलाघवाद्विशिष्टमेव(१)

"अपि जायेत सोस्माकं कुले कश्चिन्नरोत्तमः ।
प्रावृट्कालेऽसिते पक्षे त्रयोदश्यां समाहितः ॥
मधुप्लुतेन यः श्राद्धं पायसेन समाचरेत् ।
कार्तिकं सकलं चाऽपि प्राक्छाये कुञ्जरस्य च ॥"

इति मन्वादिस्मृतौ त्रयोदशीमात्रप्रशंसनाच्च । कार्तिकं सकलं चापीति च पृथगेव प्रशंसोन्नेया । सकलकार्तिकव्यापिनः मधुप्लुतपायसद्रव्यकस्य श्राद्धस्य विधिः। प्राक्छाये कुञ्जरस्य चेति च पृथगेव आपराह्णिकहस्तिच्छायारूपदेशाङ्गस्य । अत एव महाभारते—

"अपि नः स कुले जायात् यो नो दद्यात् त्रयोदशीम् ।
मघासु सर्पिषा युक्तं पायसं दक्षिणायने ॥
अनेन सर्वलोकेन मघासु च यतव्रतः ।
हस्तिछायासु च तथा कर्णव्यजनवीजिनम्" ॥ इति ।
"परमान्नं तु यो दद्यात्पितॄणां मधुना सह ।
छायायां कुञ्जरेन्द्रस्य पूर्वस्यां दक्षिणामुखः ॥"

इति विश्वामित्रोक्तेश्च । एवं महालयपक्षदिनान्तरगतकेवलमघापि पृथक्कालः । 'मधुमांसैश्च'इतिवचने

यत् किञ्चिन् मधुना मिश्रं प्रदद्यात् त्रयोदशीम् ।
तदप्यक्षय्यमेव स्याद्वर्षासु च मघासु च ॥"

इति मानवे च पृथक् मघासु चेति चकाराच्च । मधु च कलौ-

---

[१] विशिष्टशब्देन मघाविशिष्टं ज्ञेयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निमित्तम्' इत्याह । *वस्तुतस्तु—

'मधुमांसैश्च शाकैश्च पयसा पायसेन च ।
एष नो दास्यति श्राद्धं *वर्षासु च मघासु च ॥'

इति वासिष्ठवचने केवलमघाश्रुतेर्विनिगमकाभावादुभयं भिन्नं निमित्तं, पूर्वोक्तवचनाच्च योगाधिक्ये फलाधिक्यम् । अत एव याज्ञवल्क्यः ।

'तथा वर्षात्रयोदश्यां मघासु च विशेषतः ।' इति ।

त्रयोदशीश्राद्धं नित्यम् । अन्यत्काम्यम् ।

*अत्र 'त्रयोदश्यां *बहुपुत्रा युवमारिणस्तु भवन्ति'

वर्ज्यम्'श्राद्धे मांसं तथा मधु'इति वाक्यात् इत्यभिप्रेत्याह—*वस्तुतस्त्विति । तस्य परस्परनिरपेक्षैकक्रियान्वयलक्षणसमुच्चयार्थत्वात् । अत एव न गुणः । आश्रयीभूतायास्त्रयोदश्या अत्राश्रवणाच्च । *वर्षास्विति । ऋतुसंवत्सराभिप्रायेण । मासचतुष्कात्मकवर्षर्तुमभिप्रेत्य—

"चतुरो वार्षिकान्मासान् यो मांसं परिवर्जयेत् ।
चत्वारि भद्राण्याप्नोति कीर्तिमायुर्यशो बलम् ॥"

इत्यादितद्व्यवहारात् । एतच्च त्रयोदशीविशेषणम् ।

"प्रावृट्कालेऽसिते पक्षे त्रयोदश्याम्" "तथा वर्षात्रयोदश्याम्" इत्यादिवचनात् । योगाधिक्ये मघात्रयोदश्युभययोगे—

"यो नो मघात्रयोदश्योः कुञ्जरच्छायसंज्ञितः ।
भवेन्मघायां सिंहे च शशिन्यर्के करे स्थितः ॥"

इति ब्राह्मे कुञ्जरच्छाययोगे प्राशस्त्यातिशयात् । अत्र सामान्यकृष्णपक्षत्रयोदश्यां ज्ञातिश्रैष्ठ्यादिफलकं काम्यमेव श्राद्धम् । महालयापरपक्षत्रयोदश्यां तु पक्षश्राद्धाभ्यां भिन्नं युगादित्वानिमित्तकमितरयुगादिश्राद्धापेक्षयाऽत्यावश्यकमिति स्थिते तन्निषेधं विचारयति—*अत्रेति । कृष्णत्रयोदशीसामान्यश्राद्धपक्षेऽयं ग्रन्थः । त्रयोदश्यामित्येतावन्मात्रोक्तेः । हेमाद्रिप्रमुखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यापस्तम्बोक्तेर्युवमारित्वमपत्यदोषं सहिष्णोरपत्यमात्रार्थिनः स्मृत्यन्तरोक्तधनार्थिनो वाधिकार इति कल्पतरुः। *अपत्यनिन्दया तदर्थिनोऽनधिकारात् फलान्तरकामस्यैवाधिकार इति हलायुधः। एतत्पिण्डरहितं कार्यम्।

'मघायुक्तत्रयोदश्यां पिण्डनिर्वपणं द्विजः।
ससंतानो नैव कुर्यान्नित्यं ते कवयो विदुः॥'

इतिबृहत्पराशरोक्तेः। इदं मलमासेपि कार्यम्।

'मघात्रयोदशीश्राद्धं प्रत्युपास्थितिहेतुकम्।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे॥'

इत्याद्यग्रिमग्रन्थस्तु महालयत्रयोदशीश्राद्धपरः। तत्र निषेधोन्नायकनिन्दामाह—*बह्विति। युवानः समनन्तरजनिष्यमाणापेक्षया पूर्वोत्पन्ना इति यावत्। ते म्रियन्ते इति व्युत्पत्त्या पुत्रवद्गृहिणोऽन्यबहुपुत्रलाभार्थं तच्छ्राद्धनिषेधोयम्। अत एवैतत्सामान्यतोदृष्टमूलक एव शिष्टानामेकमात्रपुत्रवतो बहुपुत्रकामनया पुत्रार्थविहितहरिवंशश्रवणादिकर्मानाचारः सङ्गच्छते। अत एव संतानरहितस्य तद्वतोऽपि वा तदतिरिक्तमोक्षादिफलार्थिनः न त्रयोदशीसामान्यश्राद्धनिषेधः।

"यो वाञ्छति नरो मुक्तिं पितृभिः सह चात्मनः।
असन्तानश्च यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी॥"

इत्यादिस्कान्दात्। चकारः असन्तानस्याधिकारान्तरार्थः। तदेवाह—*अपत्येति। तस्मादयमर्थः। सामान्यकृष्णत्रयोदशीश्राद्धमेव पुत्रवता बहुपुत्रेच्छया न कर्तव्यम्। महालयत्रयोदशीश्राद्धं च पितृवर्गमात्रस्य न कर्तव्यं किन्तु मातामहवर्गस्यापि। तत्रापि पिण्डदानं न कर्तव्यं, किन्तु मधुघृतप्लुतपायसादिना ब्राह्मणभोजनमात्रमिति। पूर्वोत्तरग्रन्थस्तु सुमतिभिर्लापनीयः। प्रतीत्यादिप्रतीकाभ्यां केवलमघाश्राद्धं केवलत्रयोदशीश्राद्धं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति काठकगृह्योक्तेः । यानि तु आङ्गिराः—

'त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः ।
पश्वत्वं तस्य जानीया*ज्ज्येष्ठपुत्रस्य निश्चितम् ॥'

वामनपुराणे—

त्रयोदश्यां तु वै श्राद्धं न कुर्यात्पुत्रवान् गृही ।'

इत्यादीनि वचनानि तानि*पुत्रवद्विषयाणि वा, (१)*(महालयस्थभिन्नत्रयोदशीविषयाणि वा, *काम्यश्राद्धविषयाणि वा,) *सपिण्डकश्राद्धविषयाणि वेति केचित् । हेमाद्रिप्रमुखास्त्वेकवर्गश्राद्धविषयाणि ।

विशिष्टनिमित्तकत्वेन सगतिकत्वेन च शुद्धमास एव कार्यं न मले इति सूचितम् । *ज्येष्ठपुत्रस्येति । समनन्तरजनिष्यमाणापेक्षया पूर्वोत्पन्नो ज्येष्ठ इति केचित् ।

"ऋक्षे पिण्डप्रदानं तु ज्येष्ठपुत्रो विवर्जयेत्" ॥

इति वत्सर्वज्येष्ठ एवेत्यन्ये । *पुत्रवदिति । पुत्रवत्पदश्रवणात् । *महालयेति । गजच्छायायाः श्राद्धकालत्वात् । *काम्येति । नित्यस्य निषेद्धुमशक्यत्वात् । *सपिण्डकेति । उक्तवचने कृष्णपक्षत्रयोदशीमात्रप्रतीतावपि—

"ऋक्षे पैत्रे यदा चन्द्रो हंसश्चैव करे स्थितः ।
त्रयोदश्यां तु सा छाया विज्ञेया कुञ्जराभिधा ॥
श्राद्धेष्वतिप्रशस्ता सा पितॄणां तृप्तिकारिणी ।
अतो मघात्रयोदश्यामेतैरेव हि साधनैः ॥
करोति श्रद्धया श्राद्धं तत्प्रभावमनुस्मरन् ।
तस्य तद्वचनं श्रुत्वा ये चान्येऽपि जना भुवि ॥
नभस्यस्य त्रयोदश्यां श्राद्धं चक्रुर्मुदान्विताः ॥ इति ।
अद्यप्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति ।
कन्यासंस्थे सहस्रांशौ तस्य स्याद्वंशसंक्षयः ॥

---

[१] कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'श्राद्धं नैवैकवर्गस्य त्रयोदश्यामुपक्रमेत् ।
न तृप्तास्तत्र ये यस्य प्रजां हिंसन्ति तस्य ते ॥'
इति कार्ष्णाजिनिस्मृतेः । यद्यपि

इति मध्ये महालये त्रयोदशीपरामर्शादुपक्रमेप्यविरोधेन तत्परत्वात्तत्रापि श्राद्धं प्रतीयते । तस्य बहुफलार्थितया विहितस्यात्यन्तं निषेधायोगात् षोडशिग्रहणवद्विकल्पासंभवेन निषेधे कस्मिंश्चिद्विषये वाच्ये सपिण्डकत्वं विषय उपेयते ।

अतः श्राद्धं विना देयं तद्दिने मधुपायसम् ।
खड्गमांसं कालशाकं मांसं बार्ध्राणसस्य तु ॥
तस्याभावेऽपि दातव्यं क्षीरोदनमनुत्तमम् ।
तस्मिन्नहनि विप्रेभ्यः पितॄणां तुष्टये नृप ॥
तस्याभावेपि दातव्यं जलं तिलविमिश्रितम् ।

इति नागरखण्डात् । अत्र श्राद्धं पिण्डदानम् । अग्रे ब्राह्मणभोजनस्योक्तत्वेन तन्निषेधासंभवादिति भावः । न च—

"अयनद्वितये श्राद्धं विषुवद्वितये तथा ।
युगादिषु च सर्वासु पिण्डनिर्वपणादृते ॥"

इति सामान्यतो युगादिश्राद्धत्वात् पिण्डदाननिषेधे सिद्धे विशेषतस्तन्निषेधो व्यर्थ इति वाच्यम् । प्रागुक्तवचनैरेतत्त्रयोदशीश्राद्धस्यात्यावश्यकत्वात् क्षयपितृतृप्तिहेतुत्वयोरवगमात् । पिण्डदानस्य चात्यन्ततृप्तिहेतुत्वात्सत्यपि युगादिश्राद्धत्वे सामान्यनिषेधबाधेन पिण्डदानं भविष्यतीति शङ्कानिवृत्त्यर्थत्वात् ।

असन्तानस्तु यः श्राद्धे तस्य प्रोक्ता त्रयोदशी ।
सन्तानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेत् ॥"

इत्यनेन असन्तानस्याधिकारो न बोध्यते किन्तु मघायुक्तत्रयोदश्यामित्याद्येकवाक्यतया ससन्तानस्य पिण्डवर्जनम् । असन्तान इत्यर्धं तु स्तावकम् । तस्मादिमानि सर्वाण्यपि पुत्रवद्गृहस्थस्य सपिण्डकश्राद्धविषयाणीति मयूखः । एकवर्गस्य=पितृपितामह-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'पितरो यत्र पूज्यन्ते तत्र मातामहा अपि ।'
इति धौम्योक्तेर्न केवलपितृवर्गस्य प्राप्तिस्तथापि व्यामोहादिप्राप्तिनिषेधोऽयमित्या*हुः । वयं तु पश्यामः—पुत्रवद्विषयाण्येवेति ।

'असंतानस्तु यस्तस्य श्राद्धे प्रोक्ता त्रयोदशी ।
संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो भवेत् ॥'
इति हेमाद्रौ नागरखण्डोक्तेः । पूर्ववाक्यमप्यसंता-

मात्रस्य । *आहुरिति । येषां सूत्रे मातामहा नाम्नातास्तान्प्रति सामान्यत एकपार्वणमेव प्राप्नोति

"यावत्किञ्चित्स्वगृह्योक्तं यस्य कर्म प्रचोदितम् ।
तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥"

इति वचनात्, तन्निषेधार्थत्वसम्भवाद्व्यामोहानुसरणं व्यर्थम् । यत्तु उभयवर्गप्राप्तिनिषेधे वचोवैयर्थ्यापत्त्या जीवन्मातृमातामहवर्गकं प्रत्ययं निषेधस्तस्यैकवर्गप्राप्तेरिति, तत्र न तृप्ता इत्याद्यौत्तरार्धिकार्थवादासंगतेरिति । वस्तुतस्तु दर्शश्राद्ध एव मातामहानावश्यकत्वस्य मिताक्षरायां दर्शनात्त्रयोदश्यामेकवर्गश्राद्धप्रसक्तौ तन्निषेधो युज्यते । एवंवृद्धिश्राद्धादौ

षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ।

इति मातामहश्राद्धपुनर्वचनवादिति । मघेत्यादि (१)महालयश्राद्धकरणे तु तेन त्रयोदश्यादिश्राद्धानां प्रसङ्गसिद्धिः । बहुदैवत्यसपिण्डत्वादिभिर्विशेषग्रहणात् । तेन महालयश्राद्धस्य तन्त्रतोक्तिश्च नादेया । तत्राऽपत्नीकस्य पित्रादेः, त्रयोदश्यादौ तु सपत्नीकस्य तस्येति देवताभेदे तु न प्रसङ्गसिद्धिरपीति ।

---

(१) षड्देवतामहालयकरणे तु महालये पितृव्यादेरेकोद्दिष्टस्यापि सत्त्वाद्बहुदैवत्यत्वं, द्वादशदेवताकमहालये तु अपत्नीकपित्रादेर्देवतात्वं, त्रयोदश्यादौ तु सपत्नीकस्येति भेदे न प्रसङ्गोऽपि तु पृथक् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नस्यैवैकवर्गनिषेधकमिति । अत्र मघात्रयोदशीमहालय-युगादिश्राद्धानां तन्त्रेण (१) प्रयोगे न तु प्रसङ्गसिद्धिरित्यन्यत्र विस्तरः ॥

अथ चतुर्दशी । पृथ्वीचन्द्रोदये प्रचेताः—

*'वृक्षारोहणलोहाद्यैर्विद्युज्जलविषाग्निभिः ।
नखिदंष्ट्रिविपन्ना ये तेषां शस्ता चतुर्दशी ॥'

ब्राह्मे—

* 'युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ।
तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता ॥'

नागरखण्डे—

'अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा ।
श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप ॥'

एतच्च प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छ

यद्यपि कन्यां कन्यावेदिनश्चेति काम्यकृष्णपक्षश्राद्धे—
"प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् ।
शस्त्रेण तु हता ये वै तेभ्यस्तस्य प्रदीयते ॥"
इति याज्ञवल्क्येन सर्वकृष्णपक्षचतुर्दशीमुक्तं, तथापि—
'श्राद्धं शास्त्रहतस्यैव चतुर्दश्यां महालये ।'
इति कालादर्शान्महालयचतुर्दश्यामप्यावश्यकम् । तत्र शस्त्रहतपदं येषामुपलक्षणं, तानाह—*वृक्षेत्यादि । अपमृत्युः=अकालमृत्युः, तदाह—*युवान इति । अपमृत्युरुपसर्गमृत्युर्द्रष्टव्यः । उपसर्गो ग्रहभूताद्यावेशस्तेन मृत्युः ।

---

[१] अङ्गानामैक्यं प्रधानमात्रभेदस्तन्त्रम् । तेन विश्वेदेवपाकाद्यङ्गानामैक्यं विप्रार्घ्यपिण्डादेर्भेद एव । प्रसङ्गसिद्धिस्थले तु प्रधानमपि न भिद्यते इति । त्रयोदशीश्राद्धेऽपरपक्षत्वाद् धूरिलोचना विश्वेदेवाः श्राद्धसारे उक्ता इति धर्मसिन्धुः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तामिति गौतमोक्तदुर्मरणोपलक्षणम् । एकयोगनिर्देशात्

'सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तत्समं ज्ञेयमेकरूपा हि ते स्मृताः ॥

इत्युशनसोक्तेश्च । तच्च कृताक्रियाणामेवेति वक्ष्यामः । मरीचिः—

'विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघातिनाम् ।
चतुर्दश्यां क्रियाः कार्या अन्येषां तु विगर्हिताः ॥'

अत्र *ब्राह्मणघाती तेन हतो न तु ब्रह्महा, तस्य पतितत्वादिति शूलपाणिः । अत्रोद्देश्यविशेषणस्याविवक्षितत्वात्स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं कार्यं (१)(न पार्वणमिति) श्रीदत्तोपाध्यायः । इदं विषादिहतानामेव न प्रसवादिमृतानामिति वाचस्पतिः । यत्तु शाकटायनः—

'जलाग्निभ्यां विपन्नानां संन्यासे वा गृहे पथि ।
श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीम् ॥' इति,

तत्*प्रायश्चित्तार्थजलादिमृतविषयमित्याकरे उक्तम् ।

"उपसर्गमृतानां च विषमृत्युमुपेयुषाम् ।
श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिप ॥"

इति वाक्यात् । *ब्राह्मणेति । विषादिभिर्घातो येषामिति विग्रहः । एतच्च प्रायोनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति गौतमोक्तदुर्मरणोपलक्षणम् । एकयोगनिर्देशात् ।

"सर्वेषां तुल्यधर्माणामेकस्यापि यदुच्यते ।
सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृताः ॥"

इत्युशनसोक्तेः । इच्छयेत्युक्तेः प्रसवादिमृतानां नैतत् । *प्रायश्चित्तेति । सर्पादेः साहचर्याज्जलाग्न्यादयोऽननुज्ञाता एव

---

[१] कंसान्तर्गतो ग्रन्थ आदर्शपुस्तके नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव वैधत्वात्सहगमनेऽपि न कार्यमिति हेमाद्रिः। एतच्च दैवयुक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते—

'प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टं विधानतः।
दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत्॥
तच्छ्राद्धं दैवहीनं चेत्पुत्रदारधनक्षयः।
एकोद्दिष्टं दैवयुक्तमित्येव मनुरब्रवीत्॥'

भविष्येऽपि—

'समत्वमागतस्यापि पितुः शस्त्रहतस्य च।
चतुर्दश्यां तु कर्तव्यमेकोद्दिष्टं महालये॥
चतुर्दश्यां तु यच्छ्राद्धं सपिण्डीकरणे कृते।
एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः॥'इति।

संवत्सरप्रदीपे हारीतः—

'विश्वेदेवांश्च तत्रापि पूजयित्वा दितोऽमरान्।
ये वै शस्त्रहतास्तेषां श्राद्धं कुर्यादतन्द्रितः॥'

अत्रैकोद्दिष्टवचनानां निर्मूलत्वं, समूलत्वेऽपि पार्वणशक्तपराणि। *विष्ण्वादिवचनैः प्रकरणात् कृष्णपक्षीयपार्वणावगतेरिति शूलपाणिः। तन्न। *वाक्येन प्र-

---

ग्राह्याः। अतः असाध्यव्याध्यादिपीडितानां जलाग्न्यादिप्रवेशेन भर्तृमरणनिमित्तकाग्निप्रवेशेन च मृतानां नेदं श्राद्धमित्यर्थः। युद्धमृतौ प्रायोनाशके च वैधत्वेऽपि वचनाद्भवतीति बोध्यम्। एवं च—

"ज्ञातिश्रेष्ठं त्रयोदश्यां चतुर्दश्यां तु सुप्रजाः।
प्रीयन्ते पितरश्चास्य ये वै शस्त्रहता रणे॥"

इत्यादिकं त्ववैधमृतिविषयम्। पितरित्यादि पितृसुतपदश्राद्धदेवता तदधिकारिपरम्। *विष्ण्वादीति। कृष्णपक्षप्रकरणे "संभूते पार्वणं कुर्यात्" इत्यादीत्यर्थः। *वाक्येनेति। श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करणस्य बाधात् । पित्रादीनां पार्वणं भ्रात्रादीनामेकोद्दिष्टमिति गौडार्वाश्चः । तन्न, पितुरित्यनेन विरोधाद् *विशेषवाक्यवैयर्थ्यापत्तेश्च । अत्र शस्त्रहतस्यैव चतुर्दश्यामिति नियमो न तु चतुर्दश्यामेव शस्त्रहतस्येति ।

'श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये ।'

इति कालादर्शाद् वार्षिकादीनामकरणापत्तेश्च । तेन महालये एव दिनान्तरे पार्वणं मातामहादितृप्त्यर्थं

विप्रकर्षादिति बलाबलाधिकरणसूत्रम् । दर्शपूर्णमासप्रकरणे 'इदं द्यावापृथिवी भद्रमभूत्' इति सूक्तवाकनिगदे "इद्राग्नी इदं हविरजुषेतामवीवृधेतांमहोज्यायोऽक्राताम्, अग्नीषोमाविदं हविरजुषेतामवीवृधेतां महोज्यायोऽक्राताम्" इतिवाक्यद्वयं श्रूयते । तत्र पौर्णमास्याम् इद्राग्नी न देवते इति तत्पदमपनीयते असमवेतार्थत्वात् । एवं च येन सह यदेकवाक्यतापन्नं तेनैव सह तदपयनयौचित्यात् वाक्येन 'अवीवृधेताम्' इत्यादीन्यप्यपनेयानि । अथासमवेतार्थतया देवतापात्रापनयेऽपि 'अवीवृधेताम्' इत्यादेरितिकर्तव्यताकाङ्क्षारूपप्रकरणाद् प्रयोगो दुर्वार इति चेत् । न, यतः प्रकरणस्य विनियोज्यस्वरूपसामर्थ्यमनपेक्ष्य न विनियोजकत्वम् । अत एव दर्शपूर्णमासप्रकरणपठितोऽपि 'पूष्णोऽहं देवयज्यायै' इति पूषानुमन्त्रणमन्त्रस्तद्देवताविरहिणोस्तयोर्न प्रवर्तते । एवं तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति एकाहसाध्यसोमयागरूपे साह्ने द्वादशोपसत्तां न बोधयति सा पुनर्नानादिनसाध्यसोमयागरूपाहीनं नीयते तस्मात्प्रकरणेनाकाङ्क्षावशात् संबन्धं कल्पयित्वा तेन क्रमेण कल्पिताभ्यां सामर्थ्यश्रुतिभ्यां चतुर्थकाले विनयोगो भवेत् । अतः प्रागेव च वाक्येन सामर्थ्यं कल्पयित्वा श्रुतिः कल्प्येति तृतीयकाले विनियोग इति बलीयसा वाक्येन प्रकरणं बाध्यते । एवं च लिङ्गेन यथा—'इन्द्राग्निभागोऽपनीयते' एतद्वा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कार्यमेव। पितामहोऽपि-शस्त्रहतश्चेदेकोद्दिष्टद्वयं कार्यम्। तदुक्तं हेमाद्रौ स्मृत्यन्तरे-'एकस्मिन्द्वयोर्वैकोद्दिष्टम्'इति। त्रिषु शस्त्रहतेषु पार्वणमेव कार्यम्।

यत्तु देवस्वामिनोक्तं त्रिष्वपि शस्त्रहतेषु पृथगेको*द्दिष्टत्रयं कार्यं न तु पार्वणमाहत्यवचनाभावादिति, तदयुक्तम्।

*'पित्रादयस्त्रयो यस्य शस्त्रैर्याताश्चतुर्थकात्।
स भूते पार्वणं कुर्यादाब्दिकानि पृथक् पृथक्॥'
इति बृहत्पराशरोक्तेः

क्येन तच्छेषभागः, तत्र पदानां संबन्धस्य प्रत्यक्षसिद्धत्वात्। प्रकृते च 'समत्वमागतस्य' इति वाक्यस्य झटिति प्रकृतेस्तेन कृष्णपक्षप्रकरणं बाध्यते इत्यर्थः। *विशेषेति।

"सपिण्डीकरणादूर्ध्वं पित्रोरेव हि पार्वणम्।
पितृव्यभ्रातृमातॄणामेकोद्दिष्टं न पार्वणम्"॥

इति पार्वणेत्यादिसामान्यवाक्यैरेव सिद्धेः समत्वमागतस्यापीत्यादिवाक्यानां वैयर्थ्येत्यर्थः।

*एकोद्दिष्टत्रयमिति। 'एकस्मिन् द्वयोः'इत्येतद्यथाश्रुते वाक्यभेदभयेन तस्योपलक्षणत्वात् शस्त्रहनने निमित्ते एकोद्दिष्टविधिमात्रपरम् 'एकस्मिन्, द्वयोः' इति तु 'एकं वृणीते, द्वौ वृणीते' इत्यादिवदनुवाद इत्यर्थः। एकोद्दिष्टद्वयादिकं तन्त्रेणेति बोध्यम्। *पित्रादय इति। 'शस्त्रेण तु हता ये वै' इति शस्त्रहतदेवतानियमबलादेकस्य द्वयोर्वा शस्त्रादिमरणेऽन्यथानुपपत्त्या प्राप्तमेकोद्दिष्टम् एकस्मिन् इत्यादिनाऽनूद्यते न तु विधीयते। एवमेव विश्वेदेवस्यापि सिद्धेः 'पितृपक्षे चतुर्दश्याम्' इत्यादिरनुवादः। एवं नाप्यपराह्णिकत्वभङ्गः। एकोद्दिष्टस्य विधाने हि तदङ्गतया मध्याह्नोऽपेक्ष्येतापि, न त्विह तथा। एवं च त्रिषु मृतेषु 'ऊर्ध्वं पा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'एकस्मिन्वा द्वयोर्वापि विद्युच्छस्त्रेण वा हते।
एकोद्दिष्टं सुतः कुर्यात्त्रयाणां दर्शवद्भवेत्॥'

इति स्मृत्यन्तराच्चेति पृथिवीचन्द्रोदये उक्तम्। अपरार्के हेमाद्रौ चैवम्। यस्तु अत्रैव शस्त्रादिना हतस्तस्य वार्षिकमेव पार्वणमे*कोद्दिष्टं वा कार्यं न तु श्राद्धद्वयं *प्रसङ्गासिद्धेरिति पृथिवीचन्द्रोदये। अत्र*श्राद्धाकरणेऽग्रिमापरक्षे दिनान्तरे*पार्वणेनैव कार्यमिति तत्रैवोक्तम्। यद्यपि—

'शस्त्रविप्रहतानां च शृङ्गिदंष्ट्रिसरीसृपैः।
आत्मनस्त्यागिनां चैव श्राद्धमेषां न गारयेत्॥'

र्वणवत्कुर्यात्' इति सपिण्डनोत्तरभावित्वेन सामान्यवाक्यप्राप्तपार्वणस्याबाधात् पार्वणमेव भवति। तथा च प्रोक्तवाक्यानां निर्मूलत्वं वदतामपि नैकोद्दिष्टसिद्धिरिति तु वस्तुगतिः। *एकोद्दिष्टं वेति। यथाचारमिति शेषः। *प्रसङ्गसिद्धेरिति। चतुर्दशीश्राद्धं न भवतीति भावः। संक्रान्तिव्यतीपातादिनिमित्तकं तु चतुर्दश्यां पार्वणमेव। चतुर्दशीनिमितकं तु पृथक् कार्यं सपिण्डकत्वरूपविरूद्धधर्मसत्त्वात्। *श्राद्धाकरणे इति। यदि महालये चतुर्दशीश्राद्धं न कृतं तदा वृश्चिकदर्शनपर्यन्तं कस्मिंश्चिद्दिने कार्यमित्यर्थः। *पार्वणेनैवेति।

"संक्रान्तावुपरागे च पर्वोत्सवमहालये।
निर्वपेदत्र पिण्डांस्त्रीनिति प्राह प्रजापतिः॥"

इतिवाक्यस्य शस्त्रहतानां दिनान्तरे पार्वणप्रापकत्वादिति मयूखभाष्यः। एकोद्दिष्टविधिनैव अन्तरितं कार्यम्। यथाप्राप्त एव गौणकालविधानात् न तु पार्वणं देवताविरहादिति नव्याः। चतुर्दश्यां पार्वणे प्राप्ते देवताभूतपित्रादिदुर्मरणनिमित्तक एकोद्दिष्टेतिकर्तव्यताकः प्रयोगो विधीयते न त्विदं कर्मान्तरं पार्वणत्वादग्रे पार्वणं का-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति छागलेयाद्यैः शस्त्रादिहतानां श्राद्धं निषिद्धं तथापि प्रमादमृतानां श्राद्धार्हत्वात्कार्यं, वृद्धादिभिन्नबुद्धिपूर्वमृतानां तु न कार्यम्। यत्तु-

'चतुर्दश्यां तर्पणीया लुप्तपिण्डोदकक्रियाः।'

इति ब्राह्मे, तद्गौ*णमिति शूलपाणिः। *लक्षणायां मानाभावात्।

*'पतितेनापि कर्तव्यं कर्तव्यं*पतितस्य च॥'

इति गयादिवद्विशेषविधिबलात्पतितानामपि कार्यमिति नव्यगौडाः। तत्त्वं तु*समत्वमागतस्येत्यादिवशात्कृतक्रियाणां कार्यं नान्येषामिति वयं प्रतीमः। यत्तु मनुः-

'न पैतृयज्ञियो होमो लौकिकाग्नौ विधीयते।
न दर्शेन विना श्राद्धमाहिताग्नेर्विधीयते॥' इति,

अत्र पूर्वार्धं *हेतुत्वेनोक्तम्। *तद्यथाश्रुतमेव मन्य-

र्यमित्यर्थ इत्यन्ये। *गौणमिति। श्राद्धं निषिद्धमेवातस्तदभावात्तर्पणमेव कार्यमित्यर्थः। *लक्षणायामिति। लुप्तपदस्य निषिद्ध इत्यादिः। यथाश्रुतार्थत्वे तु शस्त्रादिहतानां श्राद्धं मुख्यं तर्पणमनुकल्प इति लभ्यते इत्यर्थः। *पतितेनापीति। अपतितस्येति शेषः। *पतितस्येति। अपतितेनापीति शेषः। *समत्वमिति। दुर्मरणमृतानामौर्ध्वदेहिकं वर्षोर्ध्वं तत्काले वा कार्यम्। तत्र यावदौर्ध्वदेहिकं न कृतं तावत्पर्यन्तमिदं न कार्यम्। कृतक्रियाणां तु कार्यं 'समत्वमागतस्य' इति विशेषणादित्यर्थः। दर्शितच्छागलेयवचनं तु दुर्मरणमृतानां प्रायश्चित्तं विना तत्कालमौर्ध्वदेहिकं न कार्यमित्येतदर्थकम्। *हेतुत्वेनेति। 'न दर्शेन' इति वाक्यं कृष्णपक्षश्राद्धविषयम्। आहिताग्निना सर्वाधानिना श्राद्धरूपपितृयज्ञाङ्गभूतो होमः 'कर्ममात्रं विवाहाग्नौ' इति विहित औपासने दुष्करः। लौकिके तु स न विधीयते। अग्नेः प्रतिनिधिय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भावात् । प्रत्युत

"साग्निरग्नावनग्निस्तु द्विजपाणावथाप्सु वा ।
कुर्यादग्नौ क्रियां नित्यं लौकिकेनेति निश्चितम् ॥"

इति स्मृत्या तत्र निषेधः । नाप्यनग्निकविहिते पाण्यादौ साग्नित्वात् । तस्मात् परिशेषात्त्रेतायामेव कार्यः । तत्रापि दक्षिणाग्नावेव पित्र्यकर्माधिकरणत्वेन दृष्टत्वात् "अयं पितॄणामग्निः" इत्यादिमन्त्रवर्णाच्च । स च दर्शान्यदिने न लभ्यते । यदि हि श्राद्धीयहोमेऽपि स्वार्थतया तस्य विहरणमाहरणं वा प्रयुञ्जीत ततस्तत्रापि स लभ्येत । स च तदा तत्प्रयुञ्जीत यदि कापि तत्प्रयुक्तिं विना तन्न लभेत । शक्नोति तु दर्शे तां विनापि दर्शयागार्थं विहरणादेरेव तं लब्धुम् । तस्मात्सर्वाधान्याहिताग्निना दर्श एव कृष्णपक्षश्राद्धं कार्यं नान्यदिने इति । अत्रेदमस्वरसबीजम् । साक्षाद्वचनं विना श्राद्धीयहोमः श्रौताग्नौ कर्तुमशक्यः । तथा हि श्रौतानामग्नीनां प्रयोजनाकाङ्क्षया स्मार्त्ते कर्मणि विनियोगः । असंयुक्तोत्पन्नानामपि तेषां वाचनिकैर्होमादिभिरेव प्रयोजनाकाङ्क्षाशान्तेः । 'हुत्वाग्नौ पितृयज्ञवत्' इति च अग्निपदं न श्रौताग्निपरं 'गृह्याणि वक्ष्यामः' इति प्रतिज्ञा नागृह्यगतस्याग्निपदस्य 'कर्म स्मार्तं विवाहाग्नौ' इत्युक्तेः । स्मृतिगतस्य च तस्यौपासनाग्निपरत्वात् ।

नापि पितृयज्ञवदित्यतिदेशाद्दक्षिणाग्निप्रगतिः । अग्नेरुपदेशसिद्धत्वेनातिदेशस्य तद्भिन्नधर्मविषयत्वात् । अन्यथा 'अग्नौ' इत्यस्य वैयर्थ्यात् । न च तस्य दक्षिणाग्निपरत्वं तथात्वेऽतिदेशाद्दक्षिणाग्निरेव प्राप्नुयादिति तन्निवृत्त्यर्थं तस्यौपासनाग्निपरत्वात् । एकस्यैवाग्निशब्दस्य गृह्याग्निमन्तं प्रति तत्परत्वं सर्वाधानिनं च प्रति दक्षिणाग्निपरत्वं च कथं स्यात् ? तस्माद् गृह्येषु स्मृतिषु चाग्निपदेन गृह्याग्नेरेव ग्रहणात्तदभावे निरग्नेरिव पाणावेव श्राद्धीयो होम उचितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*न्ते पृथ्वीचन्द्रोदयादयः।आहिताग्नेः पिण्डपितृयज्ञकल्पे-
न श्राद्धनिषेधार्थमि*दं *न तु साकल्यादेरपीत्यस्मद्गुर-

'अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्' ।

इति मनुवचनात् । अत एव होमस्याधिकरणाकाङ्क्षया दक्षिणाग्निप्राप्तिरित्यपि न वाचनिकेन पाणिनैवाकाङ्क्षानिवृत्तेः संभवात् । यदि च—

'आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः' ।

इत्यादि वक्ष्यमाणवचनमेव सर्वाधानिनामाहिताग्नेः श्राद्धीयहोमे दक्षिणाग्निप्रापकमिति मन्यते तदा श्रौतेष्ट्यादिभिरिव श्राद्धीयहोमेनापि तस्य विहरणादिप्रयुक्तिसंभवाद् दर्शान्यदिनेऽपि दक्षिणाग्निः सुलभ एव स्यात् । तस्मान्न दर्शेनेत्यत्र न पैतृयज्ञिय इत्यस्य हेतुत्वेन व्याख्यानमसंगतमेवेति गुरुमतमाह—*न्ते इति । अयं भावः-द्वयोरप्याहिताग्न्योः 'न दर्शेन विना श्राद्धम्' इति वाचनिक एवार्थः । 'न पैतृयज्ञिय' इति वाक्यं तु पृथगेव

"आरुह्य दक्षिणांग्निन्तु होमार्थं वै प्रयत्नतः ।
अग्न्यर्थं लौकिकं वाऽपि जुहुयात्कर्मसिद्धये ॥"

इति पुराणोक्तलौकिकनिषेधार्थम् । निषिध्यते च ऋष्यन्तरोक्तमप्यन्तरेण यदुच्यते द्विजातीनामितिवत् । न च वायुपुराणे—'अग्न्यर्थं दक्षिणाग्निकार्यार्थं लौकिकं गृह्यम्' इत्युक्त्याऽग्नौकरणहोमे दक्षिणाग्निर्मुख्यस्तदभावे गृह्याग्निरित्येवास्त्विति वाच्यम् । स्ववाक्यगतप्रकृतपरामर्शस्य सर्वनाम्ना तत्तद्विशेषशब्देनैव वा दृष्टत्वात्सामान्यवाचिनाऽग्निशब्देन दक्षिणाग्निपरामर्शानुपपत्तेरिति । *इदमिति । न दर्शेत्यस्य यथाश्रुतार्थो न ग्राह्यः, तथा सति मृतपितृकेऽप्यान्वष्टक्याद्यकरणप्रसङ्गात् , किंतु अग्निसाध्येषु दर्शं विना पिण्डपितृयज्ञकल्पं विना साग्निको नाधिकारीत्यर्थः । अग्निसाध्येष्वित्यध्याहारफलमाह—*न त्विति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वः । *कृष्णपक्षश्राद्धमन्यदिनेषु प्राप्तमाहिताग्नेर्दर्शे नियम्यत इति तु वयम् । *दर्शेन पार्वणेन विना श्राद्धं न । तेन क्वापि वार्षिकादावेकोद्दिष्टं नेति हरिहरः ॥

इति चतुर्दशी ॥

अमायां विशेषमाहापरार्के यमः-

*"हंसे करस्थिते या तु अमावास्या *करान्विता ।

अत्र दर्शपदे लक्षणापत्तिरग्निसाध्यानामनग्निसाध्यानां च सर्वेषामनुवादत्वे पर्यवसानं चास्वरसः । सिद्धान्तमाह—*कृष्णपक्षेति । न दर्शेनेति वाक्यं नाहिताग्नेर्दर्शश्राद्धातिरिक्तश्राद्धनिषेधार्थं प्रतिसांवत्सरिकादेरकरणप्रसङ्गात् , दर्शपदे श्राद्धलक्षणापाताच्च, नियममात्रपरत्वे सम्भवति अपूर्वनिषेधपरत्वे गौरवाच्च, किन्तु कृष्णपक्षश्राद्धे यस्यां कस्यां चित्तिथौ कर्तव्ये दर्शकालनियमार्थम् । एवं महालयापरपक्षश्राद्धमपि सकृत्पक्षे दर्शे एवाहिताग्नेर्भवति । प्राप्ते सामान्यतः सकृत्त्वे तत्र कालविशेषनियममात्रकरणे लाघवेन तत्रैव पक्षे पूर्ववचनप्रवृत्तेः । पक्षान्तराण्यप्याहिताग्नेरपि संभवन्त्येव, यथा महालयश्राद्धस्य सकृत्करणपक्षे संन्यासिनः कस्यचित्तिथौ कर्तव्ये द्वादशीकालो नियम्यते तस्य महालये पक्षान्तराणि भवन्त्येव, तद्वदिति । एतेनाहिताग्नेर्दर्शश्राद्धमेव नियतं तेन विनाऽन्यच्छ्राद्धं तु न तस्य नियतमिति नियतपदाध्याहारेण मेधातिथिविधानं प्रत्युक्तं, वार्षिकादेरनियतप्रसङ्गात् । *दर्शेनेति । सपत्नमात्रादेरेकोद्दिष्टविधिना वार्षिकाकरणापत्तिस्वरसः ।

*हंसे इति । करो हस्तः । रवीन्द्वोर्हस्तस्थयोरिति फलितार्थः । गजच्छाया द्विविधा-यौगिकी पारिभाषिकी च । तत्रेयमन्त्या

"यथेन्दुः पितृदैवत्यो हंसश्चैव करे स्थितः ।
तिथिर्वैश्रवणीया च गजच्छाया प्रकीर्तिता ॥"

इति स्कान्दोक्तापि सैव । पितृदैवत्यं मघा, वैश्रवणीया तिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सा ज्ञेया कुञ्जरच्छाया इति बौधायनोऽब्रवीत् ॥
*वनस्पतिगते सोमे छाया या प्राङ्मुखी भवेत् ।
गजच्छाया तु सा प्रोक्ता*तस्यां श्राद्धं प्रकल्पयेत् ॥"

भारते-

*"अजेन सर्वलोहेन *वर्षासु नियतव्रतः ।
हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितम् ॥"
श्राद्धं दद्यादिति शेषः ॥

आश्विनशुक्लप्रतिपदि दौहित्रस्य मातामहश्राद्धमुक्तम् । हेमाद्रौ संग्रहे च-

*"जातमात्रोऽपि दौहित्रो विद्यमानेऽपि मातुले ।
कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ॥" इति ।

त्रयोदशी । तथा च रवौ हस्तर्क्षे द्वादश्यां मघासत्त्वे ग्रन्थोक्ता, त्रयोदश्यां मघासत्त्वे चेयमिति फलितम् । इदं कालाङ्गकम् । यौगिकीमाह-*वनस्पतीति । अपराह्णोपलक्षणम् । हस्तिनइति शेषः । *तस्यामिति । अपराह्णे गजच्छायायामित्यर्थः । इदं च देशाङ्गकमिति विशेषः । *अजेनेति । *वर्षास्विति त्रयोदशीश्राद्धपरम् । मघास्विति पाठान्तरं प्रागुक्तम् । हस्तीति देशाङ्गत्वलाभः । कर्णेत्युपादानात् कर्णो मुखावयवविशेषः । अथ वानस्पतिरश्वस्य सोमवारः तथा च सोमवासरयुक्तामावास्यायां प्राङ्मुख्यामश्वस्य छायायां श्राद्धं कुर्यादित्यर्थः । कर्णः पल्लव इति । आपराण्हिकं गजच्छायारूपदेशाङ्गकं चेदम् । कर्णशब्दस्य यथाश्रुतार्थकत्वात् ।

*जातमात्र इति । जातमात्रोऽपीत्यविवक्षितार्थम् । अपिपदोपादानात् । एवं च

"गर्भच्युतोऽपि दौहित्रः कुर्यात्पितरि जीवति ।
श्राद्धं मातामहादीनां पक्षान्तादपरेऽहनि ॥" इति,

परन्तु गर्भच्युतोऽपीत्यस्तन्य एव । कस्यचित्कारिकायामपि—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इयं संगवव्यापिनी ग्राह्या इति निर्णयदीपे उक्तम् ।
"प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणम् ।
श्राद्धं मातामहं कुर्यात्सपिता संगवे सदा ॥
जातमात्रोऽपि दौहित्रो जीवत्यपि च मातुले ।
प्रातः संगवयोर्मध्ये*आर्यस्य प्रतिपद्भवेत् ॥"
इति वचनात् । अत्र*समूलत्वं विमृश्यम् । *इदं च मलमासे न कार्यम् ।
'स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले ।'
इति निषेधात् । इदं च*जीवत्पितृकेणैव कार्यमिति

"पुत्रः स्वोत्पत्तिमात्रेण संस्कुर्यादृणमोचनात् ।
पितरं नाब्दिकाच्चौलात्पैतृमेधेन कर्मणा ॥"
इति वचनात्प्रथमवर्षचूडाया असत्त्वे यथा पितृश्राद्धेऽनधिकारस्तथाऽस्मिन्मातामहश्राद्धेऽपीति प्रतिभाति । मयूखकृतस्तु जातमात्र इति अधिकारी जात इत्येवार्थः । तस्मादुपनयनोत्तरमेवाधिकारो न ततः प्राक् इत्याहुः । *आर्यस्य=मातामहस्य । अत्र सपत्नीकानामेव देवतात्वम् । अमाश्राद्धान्तर्गतमातामहपार्वण इवेहापि सत्यपि पितृपार्वणाविकृतित्वे सपत्नीकत्वगुणलम्भकप्रमाणस्य
'स्वभर्तृपिण्डमात्राभ्यस्त्वाप्तिरासां यतः स्मृता ।'
इति वचसः प्रतिबन्धासम्भवात् । *समूलत्वमिति । सङ्गवव्यापिनीग्राह्यत्वाद्येकवचनस्य निर्मूलत्वात् पार्वणत्वादपराह्णव्यापिनी ग्राह्येत्यर्थः । *इदञ्चेति । मातामहश्राद्धस्य कन्योपलक्षितापरपक्षनिमित्तकत्वात्कन्यायामधिमासे तदुत्तरप्रतिपद्येव कन्यायुक्तायामपरपक्षव्यवधानेनैव कार्यमिति भावः । तत्र कथंचिदन्तराये तु शुक्लपञ्चम्यादिगौणगौणोत्तरकाले कार्यम् । एवमेव जीवत्पितृकस्य मातृनवमीश्राद्धान्तरायेऽपीति । *जीवत्पितृकेणैवेति । ननु सपितेत्युक्ते शिष्टा इति किमेतत् ? श्रुणु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिष्टाः। इदं च शिष्टाचारात्सपिण्डकं कार्यमिति केचित्। पिण्डरहितं तु युक्तम्। जीवत्पितृकस्य-

"मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः।
न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव च ॥"

इति दक्षेण पिण्डनिषेधात्। आन्वष्टक्यवद्विशेषवचनाभावाच्चेति संक्षेपः ॥ इति श्रीकमलाकरभट्टकृते निर्णयसिन्धौ महालयनिर्णयः ॥

अथाश्विनशुक्लप्रतिपदि नवरात्रारम्भः। तन्निर्णयः। तत्र भार्गवार्चनदीपिकायां देवीपुराणे। सुमेधा उवाच-

"शृणु राजन् प्रवक्ष्यामि चण्डिकापूजनक्रमम्।

"कन्यागते सवितरि पितरो यान्ति वै सुतान्।
शून्या प्रेतपुरी तावत् यावद्वृश्चिकदर्शनम् ॥"

इत्यर्थवादेनैषां श्राद्धे ये अधिकारिणस्तेषां कन्योपलक्षितापरपक्षश्राद्धं कर्तव्यमिति विधिः कल्प्यते। पितृसुतपदं श्राद्धे देवतातदधिकार्यर्थकम्।

"ततस्तुलागतेऽप्येके सूर्ये वाञ्छन्ति पार्थिव।
श्राद्धं स्ववंशजैर्दत्तं क्षुत्पिपासासमाकुलाः ॥"

इति सामान्येन नागरखण्डाभिधानात्। तत्र मृतापितृकस्य पितृश्राद्धेन सहैव मातामहश्राद्धं, जीवत्पितृकस्य तु तेन विनेति, प्रतिपदि तत्करणं तु केवलमाचारात्। कल्पितेनोक्तविधिना च

"दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षकम्।
न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम् ॥"

इति जीवत्पितृकस्यापरपक्षकसामान्यनिषेधो बाध्यते, एवं मातृनवमीश्राद्धेऽपि तद्बाध इति क्रमेण सपितेति सिद्धेरिति। 'मुण्डनम्' इति वाक्यस्य निर्मूलत्वं वदतां मते तु सपिण्डमिति।

इति महालयनिर्णयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आश्विनस्य सिते पक्षे प्रतिपत्सुशुभे दिने ॥"
इत्युपक्रम्योक्तम्।
*"शुद्धे तिथौ प्रकर्तव्यं*प्रतिपच्चोर्ध्वगामिनी।
आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा॥
अपराह्णे च कर्तव्यं शुद्धसंततिकाङ्क्षिभिः॥"
इदं*चापराह्णयोगिन्याः प्राशस्त्यं द्वितीयादिने प्रतिपदोऽभावे ज्ञेयम्। तथा तत्रैव देवीपुराणे डामरतन्त्रे च देवीवचः—
*"अमायुक्ता न कर्तव्या प्रतिपत् पूजने मम।
मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता॥
*आद्याः षोडश नाडीस्तु लब्ध्वा यः कुरुते नरः।
कलशस्थापनं तत्र ह्यरिष्टं जायते ध्रुवम्॥"
मार्कण्डेयदेवीपुराणयोः—
"पूर्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी।
नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता॥
देशभङ्गो भवेत्तत्र दुर्भिक्षं चोपजायते॥
नन्दायां दर्शयुक्तायां यत्र स्यान्मम पूजनम्॥" इति।
स्कान्देपि—
"प्रतिपद्याश्विने मासि सा शुद्धा शुभदा भवेत्।
भाद्रपश्चदशी कृष्णा तया युक्ता न शस्यते॥
विरुद्धफलदा सा हि पुत्रदारभयावहा॥" इति।

---

*शुद्धे=अमास्पर्शरहिते। अमास्पर्शे त्वाह—*प्रतिपच्चेति। ऊर्ध्वगामिनी अमोर्ध्वगा। *इदञ्चेति। एतावताऽमायुतायाः क्षयवृद्धिभ्यां क्रमेण ग्राह्यत्वाग्राह्यत्वे दर्शिते, तदनुरोधेन स्फुटममायुक्तान् निषेधांस्तद्विधींश्च व्यवस्थापयितुं तन्निषेधानाह—*अमायुक्तेति। *आद्या इति। परेद्युः प्रतिपदः द्वौ१ एतदेव स्पष्टयति—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा-

"वर्जनीया प्रयत्नेन अमायुक्ता तु पार्थिव ।
द्वितीयादिगुणैर्युक्ता प्रतिपत्सर्वकामदा ॥'

तथा देवीपुराणे-

"यो मां पूजयते नित्यं द्वितीयादिगुणान्विताम् ।
प्रतिपच्छारदीं ज्ञात्वा सोऽश्नुते सुखमव्ययम् ॥
यदि कुर्यादमायुक्तां प्रतिपत्स्थापने मम ।
तस्य शापायुतं दत्त्वा भस्मशेषं करोम्यहम् ॥
आग्रहात्कुरुते यस्तु कलशस्थापनं मम ।
तस्य संपद्विनाशः स्याज्ज्येष्ठः पुत्रो विनश्यति ॥
अमायुक्ता न कर्तव्या प्रतिपच्चण्डिकार्चने ।
धनार्थिभिर्विशेषेण वंशहानिश्च जायते ॥
न दर्शकलया युक्ता प्रतिपच्चण्डिकार्चने
उदये द्विमुहूर्तापि ग्राह्या सोदयदायिनी ॥' इति ।

देवीपुराणे-

"या चाश्वयुजि मासे स्यात्प्रतिपद्भद्रयान्विता ।
शुद्धा ममार्चनं तस्यां शतयज्ञफलप्रदम् ॥"

रुद्रयामले-

"अमायुक्ता सदा चैव प्रतिपन्निन्दिता मता ।
तत्र चेत्स्थापयेत्कुम्भं दुर्भिक्षं जायते ध्रुवम् ॥
प्रतिपत्सद्वितीया तु कुम्भारोपणकर्मणि ॥" इति ।

यद्यपि रुद्रयामलं डामरं च निर्मूलं तथाप्यविरोधात् प्रचाराच्च तद्वचनानि लिख्यन्ते । तिथितत्त्वे देवीपुराणेऽपि-

---

'प्रतिपत्सद्वितीया तु कुम्भारोपणकर्मणि ।' इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"*प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् ।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत् ॥"

तत्रैव—

*"शरत्काले महापूजा क्रियते या च वार्षिकी ।
सा कार्योदयगामिन्यां*न तत्र तिथि(१)युग्मता ॥"

तथा—

"कुहूकाष्टोपसंयुक्तां वर्जयेत्प्रतिपत्तिथिम् ।
राज्यनाशाय सा प्रोक्ता*निन्दिता चाश्वपूजने॥"इति।

एषु वचनेषु कलशस्थापनग्रहणात्तदेव प्रथमदिने निषिध्यते, न तूपवासादि। तस्य 'प्रतिपद्यप्यमावास्या'इति युग्मवाक्यात्, 'शुक्ला स्यात्प्रतिपत्तिथिः प्रथमतः' इति दीपिकोक्तेः,'शुक्लपक्षे दर्शविद्धा'इति माधवोक्तेश्च पूर्वदिने प्राप्तस्य बाधे मानाभावादिति केचित्। वस्तुतस्तु पूर्वोक्तवाक्येषु चण्डिकार्चनपूजाग्रहणादुपवासादेश्चा*ङ्गत्वात्

प्रतिपत्सद्वितीया चेत्तदावाहनकालात्तमाह—*प्रातरिति । यद्यपीदं पत्रपूजाविषयमेव तथापि देवीपूजायामपि योजितं बाधकाभावात् । एवञ्च प्रातस्तदभावे पूजा न, किन्तु तल्लाभ एवेत्यर्थतोऽमायुक्ताव्याप्तिः । *शरत्काल इति । वार्षिकी वर्षादौ संवत्सरादौ चैत्रशुक्लप्रतिपदमुपक्रम्य नवम्यन्ता पूजा विधीयते । शरद्वसन्तयोस्तुल्य एव दुर्गोत्सवः कार्य इत्यर्थः । *न तत्र तिथियुग्मेति । युग्मवाक्यानुरोधेन दुर्गापूजायां न निर्णय इत्यर्थः। *निन्दिता चेति । लोहाभिसारिकाभिप्रायम् । यद्वा अश्वपूजनम् आश्विनमासीयदेवीपूजनं, रेवन्तनामा देवानामश्वः अश्वपीडाशान्त्यर्थक्रियमाणं तत्पूजनं वा । *अङ्गत्वादिति ।

'आश्विनस्य सिते पक्षे नवरात्रमुपोषितः ।

---

(१)युग्मवाक्यानुसरणमत्र नेष्टमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रधानदेवीपूजादावपि परेति युक्तम् । कलशस्थापनग्रहणं तूपलक्षणम् । अत एव देवलः—

"व्रतोपवासनियमे घटिकैकापि या भवेत् ।
सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके ॥" इति ।

अत्र घटिका मुहूर्त इति गौडाः । यदा तु पूर्वदिने संपूर्णा शुद्धा च भूत्वा परादिने वर्धते तदा संपूर्णत्वादमायोगाभावाच्च पूर्वैव । यानि च*द्वितीयायोगनिषेधकानि वचनानि केचित्पठन्ति तान्यपि शुद्धाधिकानिषेधपराणि । परादिने प्रतिपदोऽत्यन्तासत्त्वे तु दर्शयुताऽपि पूर्वैव ग्राह्या । तदाह लल्लः—

तिथिः शरीरं तिथिरेव कारणं
तिथिः प्रमाणं तिथिरेव साधनम् । इति ।

यानि तु*'अमायुक्ता प्रकर्तव्या'इत्यादीनि नृसिंहप्रसादे वचनानि तानि समूलत्वे सत्येतद्विषयाणि । अत्रेदं तत्त्वम्-पूर्वोक्तवाक्यानां सर्वेषां हेमाद्र्याद्यलिखितत्वेन निर्मूलत्वात्तैश्चान्यनिर्णयस्यानुक्तेः *सामान्यनिर्णयात्पूर्व-

---

मुस्नातस्तिलतैलेन पूर्वार्द्धे पूजयेच्छिवाम्' ॥

इति देवीपुराणे । गौडा इत्यरुचिः, अनुपदं तद्बीजं स्फुटम् । *द्वितीयेति ।

'द्वितीयाशेषसंयुक्ता प्रतिपच्चण्डिकार्चने ।
मोहादथोपदेशाच्चेत्कुर्यात्पुत्रविनाशनम् ॥'

इत्यादीनीत्यर्थः । इदानीममायुक्तविधीन्व्यवस्थापयति-*यानि त्विति । *अमेति ।

"अमायुक्ता प्रकर्तव्या प्रतिपच्चण्डिकार्चने ।
न ग्राह्या परसंयुक्ता शुद्धसन्ततिकाङ्क्षिभिः ॥"

इत्यादीनीत्यर्थः । *सामान्यनिर्णयात् युग्मादिवाक्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्तावपि गौडनिबन्धेषु *विशेषनिर्णयादौदयिकी ग्राह्या। तत्रापि घटिकैकेत्यस्य द्विमुहूर्तस्तुतित्वोक्तर्द्विमुहूर्ता ग्राह्या । (१)'उदिते दैवतं भानौ' इत्यत्र 'द्विमुहूर्तं त्रिरह्नश्च' इति औदयिक्या द्विमुहूर्तत्वनियमात् । तेन*'उदये द्विमुहूर्तापि' इत्याद्यनुसारोपि 'मुहूर्तमात्रा कर्तव्या' इति द्विमुहूर्तस्तुतिः । अन्यथा द्विमुहूर्ताविधिवैयर्थ्यात् । केचित्तु मुहूर्तमात्रेति वचनात्ततो न्यूनत्वे परा नेत्याहुः ।

---

*विशेषनिर्णयात् 'सा कार्योदयगामिन्याम्' इति देवीपुराणात् । *उदये इति ।

'उदये द्विमुहूर्ताऽपि ग्राह्या सोदयगामिनी ।

इत्यर्थः । *गौडा अपीति ।

'सुस्नातास्तिलतैलेन पूर्वाह्णे पूजयेच्छिवाम्' ।

इत्युक्तवचनात्पूर्वाह्णः कर्मकालः । कर्मकालशास्त्राच्च पूर्वाह्णव्यापिनी प्रतिग्राह्या ।

'शरत्काले महापूजा क्रियते या च वार्षिकी । '

'सा कार्योदयगामिन्याम्' इत्यादि समस्तमुदयव्यापित्वं पूर्वाह्णव्यापित्व एवेति तत्रैव तात्पर्यं न तु द्विमुहूर्तव्यापित्वे । 'प्रातरावाहयेद्देवीम्' इति प्रातःशब्दोऽपि पूर्वाह्णपर एव ।

'सम्यक्कल्पोदितां पूजां यदि कर्तुं न शक्नुयात् ।
उपचारांस्तथा दातुं, पञ्चैतान्वितरेत्तदा ॥"
गन्धं पुष्पं च धूपं च दीपं नैवेद्यमेव च ।
अभावे पुष्पतोयाभ्यां तदभावे तु भक्तितः ॥"

इति संक्षेपपूजोपदर्शनात् विस्तारपूजायाः पूर्वाह्णं विना दु-

---

(१)एतद्वचनं तु—

'उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ ।
द्विमुहूर्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोः ॥'इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*गौडा अप्येवम् । अत्र *देवीपूजैव प्रधानम्, उपवासादि त्वङ्गम् ।

*'अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम् ।
पूजयित्वाऽऽश्विने मासि विशोको जायते नरः ॥'

इति हेमाद्रौ भविष्ये तस्या एव फलसंबन्धात्,

'नवमीतिथिपर्यन्तं वृद्ध्या पूजाजपादिकम् ।'

इति तत्रैव देवीपुराणात्,

'शरत्काले महापूजा क्रियते या च वार्षिकी ।'

इति मार्कण्डेयपुराणाच्च । पूर्ववचनादष्टमीनवमीपूजैव प्रधानमन्यत्सर्वमङ्गमिति गौडाः । एकाहपक्षोऽपि(१) कालिकापुराणे—

ष्करत्वादिति नव्यगौडास्तदनुयायिनो दाक्षिणात्याश्च । *देवीपूजैवेति । एवकारेण 'एवञ्च विन्ध्यवासिन्याम्' इत्याद्यग्रिमवाक्येनोपवासादिनानाकर्माभिधानात्तेषां प्राधान्यमिति शङ्कानिरासः । *अष्टम्यामिति ।

"आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् ।
देवीं संपूजयित्वाऽग्रे अर्द्धरात्रेऽष्टमीषु च ॥
क्रीडन्ति विविधैर्भोगैर्देवलोकेषु दुर्लभैः ।
नाधयो व्याधयस्तेषां न च शत्रुभयं भवेत् ॥"

इति स्कान्दे नवरात्रपूजाया अपि फलसम्बन्धावगमादित्यपि द्रष्टव्यम् । यद्वा कुलाचारभेदेनाष्टम्यां वा पूजयित्वा पूजां समाप्येत्यर्थात् प्रकृतसङ्गतिः । नवमीत्यादि च न प्राधान्यबोधकं, किन्तु पूजादिवृद्धिविधायकमिति तु वस्तुगतिः । गौडा इत्यरुचिः । एवञ्च विन्ध्यवासिन्यामित्यादिना नवरात्रपूजाया एव मुख्यकल्पत्वावगमात्सप्तम्यादिरनुकल्पो वक्ष्यते । तदनुकल्पो वैकल्पिकः ।

---

(१)'देवीपुराणे' इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'यस्त्वेकस्यामथा*ष्टम्यां नवम्यामथ साधकः ।
पूजयेद्वरदां देवीं महाविभवविस्तरैः ॥' इति ।

*तत्त्वं तु राजसूयेऽन्ययागैः समप्रधानायाः सहितायाअप्यवेष्टेः "एतयान्नाद्यंकामं याजयेत" इत्येकत्वान्मध्ये विधानाच्च यथा फलार्थो बहिःप्रयोगस्तथा नवरात्रमध्यस्थाया अष्टम्या नवम्या वा फलार्थः पृथक्प्रयोगः । रूपनारायणधृतदेवीपुराणे—

'महानवम्यां पूजेयं सर्वकामप्रदायिका ।
सर्वेषु चैव वर्णेषु तव भक्त्या प्रकीर्तिता ॥
कृत्वाप्नोति यशोराज्यपुत्रायुर्धनसंपदः ॥'

सा च काम्या नित्या च ।

'एवमन्यैरपि तथा देव्याः कार्यं प्रपूजनम् ।
विभूतिमतुलां लब्धुं चतुर्वर्गप्रदायकम् ॥' इति,
'यो मोहादथवाऽऽलस्याद्देवीं दुर्गामहोत्सवे ।
न पूजयति दम्भाद्वा द्वेषाद्वाऽप्यथ भैरवी ॥
क्रुद्धा भगवती तस्य कामानिष्टान्निहन्ति वै ॥'

इति कालिकापुराणे फलनिन्दाश्रुतेः

'वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनम् ।'

इति तिथितत्त्वे देवीपुराणाच्च ।

---

*अष्टम्यां नवम्यामिति । षष्ठ्यादिपक्षस्तु पत्रीपूजायामेव ।

*तत्त्वन्त्विति । इदन्तु चिन्त्यम् । एतयेति सर्वनाम्ना प्रकृतपरामर्शाद्युक्तोऽवेष्टेरेव बहिः प्रयोगः, न त्विह तथा परामर्शकं किञ्चिदस्ति अष्टमीनवम्योः पृथगग्रे पूजाविधानादेतद्वचनस्य तदेकवाक्यता सम्भवति ।

'शरत्काले महापूजा क्रियते या च वार्षिकी' ।
इति मार्कण्डेयन्तु न नित्यत्वव्यञ्जकं वीप्साभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये—
एवं च *विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
गृहे गृहे शक्तिपरैर्ग्रामे ग्रामे वने वने ॥
स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः ।
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥' इति ।
यत्तु रूपनारायणीये भविष्ये—
'एवं नानाम्लेच्छगणैः पूज्यते सर्वदस्युभिः ।'
इति, तत्ता*मसपूजापरम् ।
'विना मन्त्रैस्तामसी स्या*त्किरातानां तु संमता ।'
इति तत्रैवोक्तेः । मदनरत्ने देवीपुराणेऽपि—
*'कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नन्दिकाम् ।
अयाची ह्यथवैकाशी नक्ताशी (१)वाथवाम्बदः ॥
भूमौ शयीत चामन्त्र्य कुमारीर्भोजयेन्मुदा ।

*विन्ध्यवासिन्यामिति सम्भवाभिप्रायम्।एकभक्तादयस्त्रयोऽनुकल्पा व्युत्क्रमेणोक्ताः। स्नातैरिति । पूजाधिकारिणः। स्थाने स्थाने ब्राह्मणैः,पुरे पुरे क्षत्रियैः नृपैः,गृहे गृहे वैश्यैः,ग्रामे ग्रामे शूद्रैः, वने वने म्लेच्छैः । अथवा स्थानादौ सर्वत्र ब्राह्मणादिभिरित्यर्थः । अन्यैः प्रतिलोमानुलोमैः। *तामसपूजेति। पूजा त्रिविधा भविष्ये-
[राजसी] सा धूपचारैर्जपयज्ञैर्विना तु या ।
विना मन्त्रैस्तामसी स्यात्किरातानान्तु सम्मता ।' इति ।
तत्र सात्त्विक्यां ब्राह्मणस्यैवाधिकारो राजस्यां क्षत्रियादेरित्यधिकमग्रे । *किरातानामिति । म्लेच्छाद्युपलक्षणं साम्यात् । पूजामाह—*कन्यासंस्थे रवाविति । सम्भवाभिप्रायम् ।

(१) 'अथ वाम्बदः' इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वस्त्रालंकारदानैश्च संतोष्याः प्रतिवासरम् ॥
*बलिं च प्रत्यहं दद्यादोदनं मांसमाषवत् ।
*त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ॥' इति ।
नन्दिका प्रतिपत्तिथिरिति मैथिलाः, षष्ठीति गौडाः। तच्च पूजनं रात्रौ कार्यम् ।

'आश्विने मासि मेघान्ते महिषासुरमर्दिनीम् ।
निशासु पूजयेद्भक्त्या सोपवासादिकः क्रमात् ॥'
इति देवीपुराणात् । संग्रहेऽपि—

'आश्विने मासि मेघान्ते प्रतिपद्या तिथिर्भवेत् ।
तस्यां नक्तं प्रकुर्वीत रात्रौ देवीं च पूजयेत् ॥
रात्रिरूपा यतो देवी दिवारूपो महेश्वरः ।
रात्रिव्रतमिदं देवि सर्वपापप्रणाशनम् ॥
सर्वकामप्रदं नृणां सर्वशत्रुनिबर्हणम् ।
रात्रिव्रतमिदं तस्य रात्रौ कर्तव्यतेष्यते ॥
नक्तव्रतमिदं यस्मादन्यथा नरके गतिः ॥'
इत्यादिवचनाच्च । रात्रिव्रतमेवाभिप्रेत्य माधवेनोक्तम्—

नान्दिका प्रतिपत्प्रथमोपस्थितत्वात् । तथा च आश्विनशुक्लप्रतिपदमारभ्याग्रिमनवमीपर्यन्तं देवीपूजनं कार्यमित्यर्थः । तत्रैव—

महानवम्यां पूजेयं स्वर्गमोक्षप्रदायिनी ।'
इत्युत्तरसंदर्भात् । अयमेव मुख्यकल्पः । षष्ठ्यादिपूजाकल्पानामग्रे वाच्यत्वात्

'मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।'
इत्यग्रिमवाक्ये नवरात्रपूजोक्तेश्च । परन्तु तत्रैव तन्मते नक्तपदं पाक्षिकोपवासादेरुपलक्षणम् । *बलिमिति । मांसादि ब्राह्मणान्यपरम् । *त्रिकालमिति ।

'प्रातःस्नायी जितद्वन्द्वस्त्रिकालं शिवपूजकः ।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तस्य नक्तव्रतत्वादिति, न तु *रात्रिभोजनात्' इति। ननु

'मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः।
संपूज्य नवदुर्गां च नक्तं कुर्यात्समाहितः॥
नवरात्राभिधं कर्म नक्तव्रतमिदं स्मृतम्।
आरम्भे नवरात्रस्य'

इत्यादिस्कान्दात् माधवोक्तेश्च नक्तमेव प्रधानमिति चेत्। न, 'नवरात्रोपवासतः' इत्यादेरनुपपत्तेः। तेन *पाक्षिकनक्तानुवादोऽयम्। नित्यानित्यसंयोगविरोधात्। न ह्यग्निहोत्रे दशमपक्षे प्राप्तस्य 'दध्ना जुहोति' (१)इत्यस्येन्द्रियकामहोमेऽनुवादो घटते, (२)नित्यवदनुवादायोगात् इत्युक्तं वार्तिके, तथात्रापि। तेनात्र तद्वदेव गुणात्फलमिति ज्ञेयम्। ननु रात्रेः कर्मकालत्वे तद्व्यापिनी पूर्वैव प्रतिपत्प्राप्नुयात्। मैवम्। न्यायतः प्राप्तावपि पूर्वोक्तवचनैर्बाधात्। यथा पूर्वेद्युः कर्मकालव्यापिनीमपि त्यक्त्वा स्वल्पापि परैव रामनवमीति प्रागुक्तम्, यथा

इत्यत्र तु शिवश्च शिवा च शिवौ तयोः पूजक इत्यर्थः। तत्र हेमाद्रिमाधवादिमते इदं नक्तव्रतम्। तत्र रात्रिपूजैव मुख्या। प्रातर्मध्याह्नपूजाद्वयमङ्गम्। *रात्रिभोजनादिति। तस्याङ्गत्वात्पाक्षिकत्वाच्चेति भावः। नक्तं=रात्रिभोजनम्। *पाक्षिकेति। यत्तु यथा दशमपक्षे प्राप्तस्य दध्नो 'दध्नेन्द्रियकामस्य' इति न नित्यवदनुवादस्तद्वत्प्रकृतेऽपि पाक्षिकत्वात्कथमनुवादः। किन्तु स यथा फलार्थं गुणविधिस्तथाऽयमपि स्यादिति। तन्न। दध्नः प्रधानत्वान्नक्तस्याङ्गत्वेनादोषात्। एवञ्च माधवमते पूजारूपप्रधानस्य नक्तकालत्वेन नवरात्रव्रते प्रदोषव्यापिनी प्रतिपद्ग्राह्या।

---

(१)'दध्ना इन्द्रियकामस्य जुहुयात्' इति।
(२)नित्यस्यानित्योऽनुवादो न भवतीति तदर्थः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वा निशीथे सतीमपि पूर्वां जन्माष्टमीं त्यक्त्वा रोहिणी-

प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा ।'

इति वाक्यात् 'कर्मणो यस्य यः कालः' इति कर्मकालशास्त्राच्च । अतश्च तत्र पूर्वेद्युरेव प्रदोषव्याप्तौ पूर्वा, अमायुक्ताविधानाद् द्वितीयायुक्तानिषेधाच्च । दिनद्वये तद्व्याप्तौ तत्स्पर्शे वा परा, द्वितीयायुताविधानादमायुतानिषेधाच्च । अत एव दिनद्वये तदव्याप्तावपि परैव

'अतथात्वे परत्र स्यादस्तादर्वाग्यतो हि सा ।' इति ।

"प्रदोषव्यापिनी न स्याद्दिवानक्तं विधीयते ।
तन्नक्तं नक्तमित्याहुर्न नक्तं निशि भोजनम् ॥"

इति च सायाह्नरूपगौणकालव्याप्तिसत्त्वात् । भोजनं तु रात्रावेव 'सायाह्ने तु भुजिक्रियाम्' इतिवदिह विशेषवचनाभावेनावश्यकरात्रिसम्बन्धत्यागे मानाभावात् । न चात्र पूर्वोक्तयुक्त्या 'स्वकालादुत्तरः कालः' इति रीत्या गौणकाललाभात् पूजाद्युपक्रमस्य तिथ्यस्पर्शोऽपि प्रदोषे 'तिथ्यादौ च भवेद्यावान्' इत्याद्यापादितसाकल्यस्याभावाच्चेति चेन्न । एवं विशेषस्य माधवादिग्रन्थेऽदर्शनेन सर्वस्यापि नक्तनिर्णयस्य तदनियतत्वात् द्वितीयायुताविधानादमायुक्तानिषेधाच्च । द्विमुहूर्तापीत्यपिशब्दे कैमुत्यन्यायोपबन्धात्कलादिशब्दा अप्यविरुद्धाः । न च—

'आद्यास्तु नाडिकास्त्याज्याः षोडश द्वादशापि वा ।'

इत्यादिषोडशादिनाडीत्यागानुपपत्तिः, प्रदोष एव पूजोपक्रमविधानादिति वाच्यम् । तस्य कुलाचारविशेषप्राप्तकलशस्थापनमात्रपरत्वात् ।

'आद्याः षोडशनाडीस्तु लब्ध्वा यः कुरुते नरः ।
कलशस्थापनम्' इति वचनात्कलशस्थापनं चामायुक्तप्रतिपदि न कार्यम् ।

"अमायुक्ता सदा चैव प्रतिपन्निन्दिता तथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युक्ता परैवेति माधवेनोक्तम्, तथाऽत्रापि । *वस्तुतस्तु रात्रेः कर्मकालत्ववचसां हेमाद्याद्यलिखनात्समूलत्वं विमृश्यमेव, 'त्रिकालं पूजयेत्' इत्यादिपूर्वविरोधाच्च । माधवोक्तिस्तु पाक्षिकनक्तानुवाद इत्युक्तम् । तस्मात्सर्वपक्षेषु परैव प्रतिपदिति सिद्धम् । अत्र केचित् *नवरात्रशब्दो नवाहोरात्रपरः ।

'वृद्धौ समाप्तिरष्टम्यां ह्रासे वा प्रतिपन्निशि ।
प्रारम्भो नवचण्ड्यास्तु नवरात्रमतोऽर्थवत् ॥'
इति देवीपुराणादित्याहुः । तन्न ।*अतिह्रासवृद्ध्यो-

तत्र चेत्स्थापयेत्कुम्भं दुर्भिक्षं जायते ध्रुवम् ॥
प्रतिपत्सद्वितीया तु कुम्भारोपणकर्मणि ।'

इति रुद्रयामलात् । एवं पूर्वदिने चित्रावैधृतिमात्रसत्त्वेऽपि न दोषः । 'त्वाष्ट्रवैधृतियुक्ता चेत्' इति वाक्ये 'कलशारोपणं गृहे' इत्युक्तेः । एतच्च माधवाद्यनुसारेण । वस्तुतः परदिने द्विमुहूर्ताग्राह्यत्वोक्तिस्तदनुसारेणाह-*वस्तुतस्त्वत्रि । पूर्वाह्णव्यापिनीग्राह्यत्वमते तु या पूर्वदिने पूर्णा सती परेद्युर्वृद्ध्या त्रिमुहूर्ता, सा पूर्वैव ग्राह्या । सम्पूर्णत्वात् ।

'आदित्योदयवेलायामारभ्य षष्टिनाडिकाः ।
तिथिस्तु सा हि शुद्धा स्यात्सार्वतिथ्यो ह्ययं विधिः ॥"

इति वचनात् । खण्डा प्रतिपत्पूर्वाह्णव्यापिनी द्वितीयाविद्धैव ग्राह्या ।

'या चाश्वयुजि मासे स्यात्सा प्रतिपदमान्विता ।'

इत्युक्तवाक्यात्पूर्वविद्धानिषेधबाहुल्याच्च । एतन्मते 'त्रिकालं पूजयेद्देवीम्' इत्युक्तावपि प्रातःपूजैव प्रधानं 'प्रातरावाहयेद्देवीम्' इति पूर्वोक्तवचनात् । पूजात्रयं प्रधानमिति तु युक्तम् । सा च त्रिकालं, प्रदोषे विशेषेण षोडशोपचारैः छत्रचामरादिनीराजनोपचारैश्च । *नवरात्रशब्दः नवरात्रोपवासत इत्यादौ । *अतिह्रासवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यूनाधिकत्वापत्तेः अत्र मूलाभावाच्च । तेन तिथिवाच्ये-वायम् । तदुक्तम्—

"तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ।
*अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षये ॥"इति ।

स च नवरात्रशब्दः क्वचि*ल्लक्षणया कर्मवाची । यथा 'प्रारम्भो नवरात्रस्य' इत्यत्रेति दिक् ॥

प्रतिपदि च वैधृत्यादियोगनिषेधो भार्गवार्चनदीपिकायां देवीपुराणे—

द्ध्योरिति । अमावास्यारात्रौ प्रतिपत्प्रवेशाभावेऽपि प्रतिपत्प्रभृत्येवात्यन्तापचयेनाऽष्टरात्रमतिवृध्द्याऽष्टम्यहोरात्रास्पर्शिनीं नवमीं गृहीत्वा दशरात्रं तिथिवृद्धाविति शङ्कायामाह—*अष्टरात्रे इति । रात्रिशब्दस्य तिथिवाचित्वादिति भावः । *लक्षणयेति । 'रथन्तरसामा सोमः'इत्यादौ सोमादिपदवत् । दिमर्थस्तु 'नवरात्राभिधं कर्म' इत्यादौ अभिधापदं न शक्त्यर्थकम् । 'सुरा वै बाजिनं सुरा सोमः' इति नामातिदेशोक्तिवत् संज्ञासंज्ञिसम्बन्धस्य शास्त्रप्रमेयत्वाभावात् तद्गमकस्य सामानाधिकरण्यादेरभावस्योक्तप्रायत्वात्, किन्तु प्रतिपत्त्यर्थकमिति । अत्र एकमपि पूजाद्यात्मकं प्रधानमसम्भवात्समुच्चयकालत्वान्नानातिथिष्वावर्तते, दिनन्यूनतायां तन्त्रेण, तदाधिक्ये तु व्रतप्रयोगस्य सकलतिथिव्याप्त्यर्थमावृत्तिः । अत एव भविष्ये—

'व्रती सम्पूजयेद्देवीं सप्तम्यादिदिनत्रये ।
द्वाभ्यां चतुरहोभिर्वा ह्रासवृद्धिवशात्तिथेः ॥"

इत्युक्तम् । न चैवं ह्रासे वृद्धौ वा उपवासादिकर्मणो नवत्वनियमभङ्गप्रसङ्ग इति वाच्यम्, इष्टत्वात् । यथा एकदिने क्रियमाणे षोडशप्रेतश्राद्धे प्रधानानामेकदेशकालकर्तृत्वादङ्गवत्तन्त्रेणानुष्ठाने प्रसक्ते सम्बुद्धिभेदेनानुष्ठानं तथेह न, उपवासादिकर्मगतनवत्व-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

*"त्वाष्ट्रवैधृतियुक्ता चेत्प्रतिपच्चण्डिकाऽर्चने ।
तयोरन्ते विधातव्यं कलशारोपणं गृहे ॥" इति ।

चित्रावैधृतियुक्तापि द्वितीयायुता चेत्सैव ग्राह्येत्युक्तं दुर्गोत्सवे—

"भद्रान्विता चेत्प्रतिपत्तु लभ्यते
विरुद्धयोगैरपि संगता सती ।
सैवापराह्णे विबुधैर्विधेया
श्रीपुत्रराज्यादिविवृद्धिहेतुः ॥" इति ।

यदा तु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते तदोक्तं तत्रैव कात्यायनेन-

'प्रतिपद्याश्विने मासि भवेद्वैधृतिचित्रयोः ।
आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकम् ॥'इति ।

भविष्येऽपि—

"चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप ।
त्याज्या ह्यंशास्त्रयस्त्वाद्यास्तुरीयांशे तु पूजनम्॥"इति

रुद्रयामलेऽपि-

"वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनम् ।
तस्मान्न स्थापयेत्कुम्भं चित्रायां वैधृतौ तथा ॥
संपूर्णा प्रतिपद्देव चित्रायुक्ता यदा भवेत् ।
वैधृत्या वापि युक्ता स्यात्तदा मध्यंदिने रवौ ॥
अभिजित्तु मुहूर्ते यत्तत्र स्थापनमिष्यते ॥" इति ।

चित्रादिनिषेधे मूलं चिन्त्यम् । इदं कलशस्थापनं रात्रौ न कार्यम् ।

संख्याद्यश्रवणात् । 'नवरात्रोपवासतः'इत्यादेरेव तिथिगतनवत्वश्रवणादिति ।

*त्वाष्ट्रेति । देवीपूजनादौ कलशस्थापनमात्रे वा निषेध इ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'न रात्रौ स्थापनं कार्यं न च कुम्भाभिषेचनम्।'
इति मात्स्योक्तेः।

*"भास्करोदयमारभ्य यावत्तु दश नाडिकाः।
प्रातःकाल इति प्रोक्तः स्थापनारोपणादिषु॥"
इति विष्णुधर्मोक्तेश्च। रुद्रयामले—

*"स्नानं माङ्गलिकं कृत्वा ततो देवीं प्रपूजयेत्।
शुद्धाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम्॥
यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान्।
तत्र संस्थापयेत्कुम्भं विधिना मन्त्रपूर्वकम्॥
सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वा॥" इति॥

अथ पूजाविधिः—सा च जयन्तीमन्त्रेण नवाक्षरेण वा कार्या। तदुक्तं दुर्गाभक्तितरङ्गिण्यां देवीपुराणे—

"कुर्याद्देव्यास्तु मन्त्रेण पूजां क्षीरघृतादिभिः।
(इत्युक्त्वा-)
जयन्ती मङ्गला काली भद्रकाली कपालिनी॥
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तु ते।
अनेनैव तु मन्त्रेण जपहोमौ तु कारयेत्॥" इति।

*'ॐदुर्गे दुर्गे रक्षिणि स्वाहा' इति *नवाक्षरः।

ति मतभेदः। *भास्करोदयमिति। पूर्वाह्णस्य कर्मकालत्वपक्षे एतदप्यनुकूलम्। एतत्परिभाषावशात् 'प्रातरावाहयेद्देवीम्' इत्यादौ प्रातःकालः पूर्वाह्णः। कलशस्थापनं च सति सम्भवे प्रतिपद आद्यनाडीषोडशकं त्यक्त्वा कार्यम्। 'आद्याः षोडशनाडीस्तु' इति प्रागुक्तवचनात्। *स्नानमिति। तच्च 'सुस्नातस्तिलतैलेन' इत्युक्तेस्तिलतैलेन कार्यम्।

*दुर्गे दुर्गे इति द्विरुक्तं, प्रणवस्तु नवाक्षरानन्तर्गतइति बोध्यम्। *नवाक्षर इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'तल्लिङ्गैः पूजयेन्मन्त्रैः सर्वदेवान्समाहितः' ।

इत्याग्नेयात् । यथा-एतद्वाक्यादुर्गालिङ्गक आगमक एवमादिः तथैव वैदिकोऽपि 'जातवेदसे सुनवाम सोमम्' इत्यादिस्तादृशो ग्राह्यः । प्रणवादिचतुर्थ्यन्तं नमोऽन्तं नाम वा 'नाम्ना सर्वं समापयेत्' इति वाक्यात् । पूजा च कुम्भस्थप्रतिमायां कार्या । 'पूज्या मण्डलकुम्भस्था' इति वचनात् सर्वतोभद्रमण्डलदेवतावाहनमपि कार्यम् । तत्र स्थापयितुमशक्या मृन्मयादिका तु प्रतिमा पश्चादासने स्थाप्या । आचाराद्वैदिकोणेषु चत्वारः कलशा विधिना स्थाप्याः ।

"चतुरः कलशान् यस्तु दद्यादेवगृहे नरः ।
चतुःसमुद्रवलयां स तु भुङ्क्ते वसुंधराम् ॥"

इति विष्णुधर्मोत्तरात् । सर्वतोभद्रं स्कान्दे-

"प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिः ।
खण्डेन्दुस्त्रिपदः कोणः शृङ्खलाः पञ्चभिः पदैः ॥
एकादशपदा वल्ली भद्रन्तु नवभिः पदैः ।
चतुर्विंशत्पदा वाऽपि चतुर्विंशतिभिः पदैः ॥
मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् ।
श्वेतेन्दुः शृङ्खला कृष्णा वल्ली नीलेन पूरयेत् ॥
भद्रारुणा सित[illegible]पि परिधिः पीतवर्णकः ।
बाह्यान्तरदले श्वेता कर्णिका पीतवर्णिका ॥
परिध्या वेष्टितं पद्म बाह्ये सत्त्वं रजस्तमः ।
तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरानिति ॥
आवाह्य मध्ये ब्रह्माणं लोकपालानुदग् यजेत् ।
सोम ईशान इन्द्रोऽथ वह्निर्धर्मश्च निर्ऋतिः ॥
वरुणश्चापि वायुश्च लोकपालाः क्रमान्मताः ।
वायुसोमान्तर्वसवो रुद्राः सोमेशमध्यगाः ॥
ईशेन्द्रान्तरथादित्या महेन्द्राग्न्यन्तरश्विनौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्र प्रतिपदि *प्रातरभ्यङ्गं कृत्वा देशकालौ संकीर्त्य समेह

यमाग्न्यन्तः सपितृकान् विश्वान्देवान्यजेद्बुधः ॥
यमनिर्ऋतिमध्ये तु सप्तयक्षानथो यजेत् ।
रक्षोवरुणयोर्मध्ये भूतनाथानथो यजेत् ॥
गन्धर्वाप्सरसो देवान्मध्ये वरुणवातयोः ।
स्कन्दनन्दीश्वरौ शूलमहाकालौ च सोमतः ॥
ब्रह्मणः सप्तयक्षादीनीशानादिन्द्रतो यजेत् ।
(ब्रह्मसोममध्ये ईशानसोममध्ये इत्यादिरर्थः ।)
दुर्गाविष्णू स्वधामग्नेर्यमाद्वै मृत्युरागकान् ॥
निर्ऋतेः श्रीगणपतिं वरुणादय एव च ।
वायुतो मरुतश्चेष्ट्वा ब्रह्मपादे धरां यजेत् ॥
कर्णिकाधश्च तत्रैव नदीर्गङ्गादिका यजेत् ।
तत्रैव सागरान्सप्त पूजयेद्वरुणालयात् ॥
(ब्रह्मपादमूले कर्णिकाधः पृथ्वीं नदीः सागरांश्च यजेदित्यर्थः । एतदन्तो वैदिको वा नाममन्त्रो वा पूजाहोममन्त्रः ।)
तस्योपरि सुमेरुं च मण्डलाद्बाह्यतोऽप्युदक् ।
(उदीचीक्रमेण सोमादि क्रमेणेति यावत् ।)
गौतमश्च भरद्वाजो विश्वामित्रश्च कश्यपः ॥
जमदग्निर्वसिष्ठोऽत्रिररुन्धत्या च नित्यशः ।
पूर्वादितश्च तद्बाह्ये ऐन्द्रीं कौमारिकामपि ॥
ब्राह्मीं तथा च वाराहीं चामुण्डां वैष्णवीं तथा ।
माहेश्वरीवैनायक्यावष्टशक्तीः समर्चयेत् ॥" इति ।
"सोमादेरायुधानीह क्रमेण स्थापयेद्बुधः ।
गदाशूले वज्रशक्ती दण्डखड्गे तथैव च ॥
पाशाङ्कुशौ च तद्बाह्ये क्रमेणाथ यजेदृषीन् ।"

*प्रातरिति । प्रातःकालीनव्रतादिसंकल्पस्तु प्रातःसन्ध्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मनि दुर्गाप्रीतिद्वारा सर्वापच्छान्तिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रतिपदि विहितकलशस्थापनदुर्गापूजाकुमारीपूजादि करिष्ये इति*संकल्प्य 'मही द्यौः'इति भूमिं स्पृष्ट्वा 'ओषधयः सम्' इति यवान्निक्षिप्य 'आकलशेषु'इति कुम्भं संस्थाप्य 'इमं मे गङ्गे' इति जलेनापूर्य 'गन्धद्वाराम्' इति गन्धं 'या ओषधीः' इति *सर्वौषधीः,'काण्डात् काण्डात्'इति दूर्वाः, 'अश्वत्थेव'इति *पञ्चपल्लवान्'स्योना पृथिवी'इति *सप्तमृदः 'याः फलिनीः'इति फलं 'स हि रत्नानि'इति *पञ्चरत्नानि हिरण्यं क्षिप्त्वा 'युवा सुवासाः' इति वस्त्रेणावेष्टय कृत्वैव कार्यः ।

'प्रातःसन्ध्यां बुधः कृत्वा संकल्पं तत आचरेत् ।'

इति वचनात् । *संकल्प्येति । कदलीस्तम्भवस्त्रादिमण्डिते गृहे चतुर्हस्तवेदिकोपरि सर्वतोभद्रदेवता आवाह्य गणेशकलशं संस्थाप्य दुर्गाकलशं संस्थापयेदिति । तत्र दुर्गाकलशस्थापनमाह- 'मही द्यौः'इत्यादिना । *सर्वौषधीः—

"कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनम् ।
वचा चम्पकमुस्ता च सर्वौषध्यो दश स्मृताः" ॥

इत्युक्ताः । *पञ्चपल्लवान्—

"अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः ।
पंचभङ्गा इति प्रोक्ताः सर्वकर्मसु शोभनाः ॥"

इत्युक्तान् । सप्तमृदः—

"गजाश्वरथ्यावल्मीकसङ्गमह्रदगोकुलात् ।
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥"

इत्युक्ताः । *पञ्चरत्नानि आदित्यपुराणे—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu